आचार्यप्रवरश्री मलयगिरिसूरिरचितवृत्तियुतम्

जीवाजीवाभिगमसुत्तं

भाग - १

संपादक :- संशोधकश्च

आचार्य विजय मुनिचन्द्रसूरिः

प्रकाशक :

श्री महावीर जैन विद्यालय

ओगष्टक्रांति रोड, मुंबई

जैन आगमग्रन्थमाला क्रमाङ्क ८ (१)


आचार्यप्रवरश्री मलयगिरिसूरिरचित वृत्तियुतम्

जीवाजीवाभिगमसुत्तं

भाग - १

संपादक :- संशोधकश्च

आचार्य विजय मुनिचन्द्रसूरिः



प्रकाशक :

श्री महावीर जैन विद्यालय

ओगष्टक्रांति रोड, मुंबई

ग्रन्थ नाम :	जीवाजीवाभिगमसुत्तं भाग - १ (प्रतिपत्ति १-३)
ग्रन्थनुं का संस्कृत नाम :	जीवाजीवाभिगमसूत्रम्
मूलग्रन्थ+ टीका	
ग्रन्थकार :	स्थविरभगवन्त
टीकाकार :	मलयगिरिसूरि म.सा. आचार्य
प्रकाशक :	आ. ॐकारसूरिज्ञानमंदिर- सुरत
	संपादक : मुनिचंद्रसूरि आचार्य
भाषा :	प्राकृत/संस्कृत
विषय :	आगम (जीवोनुं स्वरूप वगेरे)
पृष्ठ संख्या :	
नकल :	४००
प्रथम संस्करण :	वीर संवत २५४५/विक्रम संवत २०७५ इ.स.२०१९
मूल्य :	५००
संशोधन सहायक :	आ. श्री कुलचन्द्रसूरि, आ. श्री पुण्यरत्नसूरि, आ. श्री यशोरत्नसूरि, आ. श्री अभयचन्द्रसूरि, (प्रेम-भुवभानुसूरिसमुदायः) आ. श्री जगच्चन्द्रसूरि (डेला- वाळा) आ.श्री हार्दिकरत्नसूरिः, पं. दिव्यरत्नविजयगणी

प्राप्तिस्थान

आ. ॐकारसूरिज्ञानमंदिर
सुभाषचोक, गोपीपुरा, सुरत - १,
सेवंतीलाल महेता - ९८२४१५२७२७

सरस्वती पुस्तक भंडार
हाथीखाना, रतनपोळ,
अमदावाद - ३८०००१

ज्ञान नी बारी
जी-१, लाभ कोम्पलेक्ष, सत्तर तालुका सोसायटी, नवजीवन ईन्कमटेक्ष, अमदावाद-१४.
मो. **940 83 71 206**

प्रिन्टींग - ॐकार ग्राफिक्स - अमदावाद. मो. 940 80 31 622

Jain Aagam Granthavali No. 8 (1)

JIVAJIVABHIGAM SUTTAM

PART -1

PRATIPATTI - 1-3

EDITOR

ACHARYA VIJAY MUNICHANDRA SURI

SHRI MAHAVIR JAIN VIDYALAY

MUMBAI

First published - A.D. 2019 v.s. 2075

Price - 500
Copies : 400

Published by :

SHRI MAHAVIR JAIN VIDYALAY
August Kranti Marg, Mumbai - 400 036

Available at.

SHRI MAHAVIR JAIN VIDYALAY
Hill-drive, Talaja road,
Bhavnagar -364002
0278-2563969

SARASWATI PUSTAK BHANDAR
Hathikhana, Ratanpole,
Ahmedabad - 1

GYANNIBAARI
G-1, Labh Complex,
Sattar taluka Society,
Nr. C.U.Shah Collage,
Incometex, Ahmedabad -14
M-940 83 71 206

Priting by - **Omkargraphics** - Ahmedabad. M- 940 80 31 622

श्री महावीर जैन विद्यालय - जैन आगम ग्रन्थमाला

ग्रथांक १	नंदिसूत्तं अणुओगद्वारई	संपादकः मुनिश्री पुण्यविजयजी	४०-
ग्रथांक २	(१)आचारांग सूत्र	संपादकः मुनिश्री पुण्यविजयजी	४०-
ग्रथांक २	(२) सूयागडांग सूत्र	संपादकः मुनिश्री पुण्यविजयजी	४०-
ग्रथांक ३	ठाणांग सूत्र समवायांग सूत्र	संपादकः मुनिश्री पुण्यविजयजी	१२०-
ग्रथांक ४	(१) वियाहपण्णत्ति सूत्र भाग - १	संपादकः पंडित बेचरदास जीवराज दोशी	४०-
ग्रथांक ४	(२) वियाहपण्णत्ति सूत्र भाग - २	संपादकः पंडित बेचरदास जीवराज दोशी	४०-
ग्रथांक ४	(३) वियाहपण्णत्ति सूत्र भाग - ३	संपादकः पंडित बेचरदास जीवराज दोशी	५०-
ग्रथांक ९	(१) पन्नवणा सूत्र भाग - १	संपादकः मुनिश्री पुण्यविजयजी	३०-
ग्रथांक ९	(२) पन्नवणा सूत्र भाग - २	संपादकः मुनिश्री पुण्यविजयजी	३०-
ग्रथांक १५	देसवेयालिय सूत्र, उत्तरज्झयण्णाइ, आवस्सय सूत्र	संपादकः मुनिश्री पुण्यविजयजी	५०-
ग्रथांक १७	(१) पन्नवणा सूत्र भाग-१ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	८०-
ग्रथांक १७	(२) पन्नवणा सूत्र भाग-२ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	८०-
ग्रथांक १७	(३) पन्नवणा सूत्र भाग-३ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	६०-
ग्रथांक ५	णायाधम्मकहाओ	संपादकः मुनिश्री जम्बूविजयजी	१२५-
ग्रथांक १८	(१)अनुयोगद्वार सूत्र भाग-१ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	४५०-
ग्रथांक १८	(२)अनुयोगद्वार सूत्र भाग-२ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	४५०-
ग्रथांक १९	(१)श्री स्थानांग सूत्र भाग-१ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	५५०-
ग्रथांक १९	(२)श्री स्थानांग सूत्र भाग-२ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	५५०-
ग्रथांक १९	(३)श्री स्थानांग सूत्र भाग-३ टीकासह	संपादकः मुनिश्री जम्बूविजयजी	५५०-
ग्रथांक २०	(१)श्री समवायांग सूत्र टीकासह	संपादकः मुनिश्री जम्बूविजयजी	४५०-
ग्रथांक –	औपपातिक सूत्र सटीक	संपादक आ. विजय मुनिचंद्रसूरि	
ग्रथांक –	राजप्रश्नीय सूक्ष सटीक	संपादक आ. विजय मुनिचंद्रसूरि	
ग्रथांक १०	जम्बूद्वीपप्रज्ञप्तिसूत्र सटीक भाग-१	संपादक आ. विजय मुनिचंद्रसूरि	
ग्रथांक १०	जम्बूद्वीपप्रज्ञप्तिसूत्र सटीक भाग-२	संपादक आ. विजय मुनिचंद्रसूरि	
ग्रथांक १०	जीवाजीवाभिगम सूत्र सटीक भाग-१	संपादक आ. विजय मुनिचंद्रसूरि	
ग्रथांक ११	चन्द्रप्रज्ञप्तिसूत्र सटीक	संपादक पं. रत्नबोधि विजयजी म.सा.	

प्राप्ति स्थान

श्री महावीर जैन विद्यालय
हील ड्राईव तलाजा रोड,
भावनगर -३६४००२ (०२७८ - २५६३९६९)

श्री महावीर जैन विद्यालय
ओगष्ट क्रांति रोड,
मुंबई

प्रकाशकीय

आगमो के सुसंपादित संस्करण हेतु आगम प्रभाकर मुनिराज श्री पुण्यविजयश्री म.सा. आदि ने वि.सं. २०१७ कारतक वद ३ रविवार दिनांक ६-११-१९६० शुभमुहूर्ते प्रारंभ किया । 'नंदिसुत्तं-अणुओगद्दाराइं' आदि आगमग्रंथ प्रकाशित हुए। एक दसक तक यह कार्य निरंतर चला । आगम प्रभाकरश्रीजी की विदाय के बाद आगमप्रज्ञ मुनिराज श्री जम्बूविजयजी म.सा.ने जैन आगमग्रंथमाला का कार्य ३७ साल तक आगे बढाया ।

वि.सं. २०६५में आगमप्रज्ञाश्रीजी की अचानक विदाय के बाद सम्पादनकार्य की जिम्मेदारी शास्त्रसंशोधक आ. विजय मुनिचन्द्रसूरिने सम्हाली ।

वि.सं. २०६८ में उववाइसुत्तं, वि.सं. २०७० में 'रायपसेणियसुत्तं' का प्रकाशन हुआ वि.सं. २०७३में जंबुद्दीव पण्णत्तिसुत्तं का प्रथम भाग एवं वि.सं.२०७४ में दूसरा भाग प्रकाशित हुआ ।

आज जीवाजीवाभिगमसुत्तं भाग - १ प्रकाशित हो रहा है। बडे आनन्द की बात है। आगम प्रभाकरश्रीजी ने जेसलमेर के ज्ञानभंडार में जीवाजीवाभिगामसूत्र की अेक ताडपत्रीय प्रत देखी थी। उस प्रति के बहुत से पाठ मलयगिरिसूरि टीका से मिलते थे। जीवाजीवाभीगम सूत्र के संपादन समय इस प्रति का अवश्य उपयोग करेंगे एसा भी सूचित किया था। हमें विशेष आनन्द है कि इस जेसलमेर की प्रति का उपयोग करके प्रस्तुत संस्करण में सेंकडो स्थान पर पाठसंशोधन किया गया है। जीवाजीवाभिगम सूत्र भाग-२ भी शीघ्र प्रकाशित होगा। एवं निरियावलिया सुत्तं का कार्य भी चालु है।

अधिकारी मुनिगण इन अगामग्रंथो का अध्ययन कर के आत्मकल्याण करे यही प्रार्थना

प्रकाशक



સાધ્વીવર્યા પૂ. કલ્પલતાશ્રીજી મ.સા.

સાદર સમર્પણ

જન્મદાત્રી જનની બની જેમણે અગણિત ઉપકારો કર્યા છે.

ર અને વૈરાગ્યનું સિંચન કરી પ્રભુના માર્ગે મને સાથે લઈ આવ્યા

એવા ઉપકારી

સાધ્વીવર્યા પૂ. કલ્પલતાશ્રીજી મ.ના

કરકમળમાં સાદર સમર્પણ.

સંપાદકીય

શ્રી જીવાજીવાભિગમ ઉપાંગ સૂત્ર આ.શ્રી મલયગિરિસૂરિ મ.સા. એ રચેલી વિસ્તૃત ટીકા સાથે સંશોધન-સંપાદન થઈ પ્રકાશન થઈ રહ્યું છે. તે અત્યંત આનંદનો વિષય છે.

જીવાજીવાભિગમસૂત્ર ત્રીજું ઉપાંગ છે એટલે ત્રીજા અંગસૂત્ર સ્થાનાંગનું આ ઉપાંગ છે. કાલિક ઉત્કાલિક વિભાગમાંનું ઉત્કાલિક વિભાગમાં આ ઉપાંગનું સ્થાન છે.

ટીકાકારશ્રી મલયગિરિસૂરીજીએ ટીકાના પ્રારંભમાં સંબંધ સમજાવતાં જણાવ્યું છે કે-

અર્થથી પ્રભુ મહાવીરસ્વામીજીએ જીવાજીવાભિગમ બતાવ્યો છે. ગણધર ભગવંતોએ એને દ્વાદશાંગીમાં ગુંથ્યો છે એ પછી મંદબુધ્ધિ અભ્યાસીઓના અનુગ્રહ માટે ચૌદપૂર્વધરોએ ત્રીજા સ્થાનાંગ નામના અધ્યયનમાંથી પૃથક અધ્યયન તરીકે સ્થાપિત કર્યો. આ જ સંબંધને ધ્યાનમાં લઈ સ્થવિરભગવંતોએ આનું પ્રતિપાદન કર્યું છે. (પૃ.૨)

પ્રસ્તુત ઉપાંગ આગમ ઉપર નિર્યુક્ત કે ભાષ્યની રચના થઈ હોય એવું જણાતું નથી ચૂર્ણિની રચના થઈ છે ટીકાકારશ્રીએ ચૂર્ણિના અવતરણો પણ આવ્યા છે. પરંતુ એ ક્યાંયથી મળેલ નથી.

જેસલમેરના એક સૂચીપત્રમાં જીવાભિગમ ચૂર્ણિનો ઉલ્લેખ છે પણ, પૂ.જંબુવિજયમ. સંપાદિત નવા લીસ્ટમાં એનો ઉલ્લેખ નથી. 'જૈનગ્રંથાવલીમાં જીવાભિગમચૂર્ણિ પાટણના ભંડારમાં હોવાની વિગત છે. અમને હજુ સુધી મળી નથી. પાટણના સૂચિપત્રમાં પણ એની વિગત નથી.

સર્વપ્રથમ ટીકા રચના યાકિની મહત્તરાસૂનુ આ.ભ.થી હરિભદ્ર સૂરિજીએ રચી છે. આ ટીકા માટે અહીં પ્રસ્તુત ટીકામાં જણાવ્યું છે કે -

'पूर्वटीकाकृता अतिगम्भीरमल्पाक्षरैर्व्याख्यातम्, अत एव मन्दमेधसामुपकारायाऽप्रभविष्णु, तस्य तेषामनुग्रहाय सविस्तरमन्वाख्यानमातन्यते (पृ.१)

આ. હરિભદ્રસૂરિજીની ટીકા અતિસંક્ષિપ્ત છે. બધા સૂત્રો ઉપર નથી અમુક સૂત્રોના વિષમપદ ઉપર હોય એવી છે. અત્યાર સુધી અપ્રગટ રહેલી આ ટીકાની પ્રતિલિપિ અમને આ. શ્રી જયસુંદરસૂરિ મ.સા.પાસેથી મળેલી પ્રાયઃ પૂ. આનન્દસાગરજી મ.ની સૂચનાથી આ પ્રતિલિપિ તૈયાર થઈ હોય એવું અમારું અનુમાન છે. અમે આ પ્રતિલિપિનું સંપાદન કરવા મુનિશ્રી કલ્યાણભૂષણ વિ. મ. (પૂ.ગચ્છાધિપતિશ્રી આ.ભ. પુણ્યપાલસૂરિજી મ.સા.ના શિષ્ય)ને આપેલી એના પ્રુફો અમારી પાસે અત્યારે છે એનું પ્રકાશન આ ગ્રંથના પરિશિષ્ટમાં કરવાની અમારી ભાવના છે.

અર્હત્સ્તોત્ર નામના એક તાડપત્રીય ગ્રંથ (ભાંડારકર ઈસ્ટી.પુના)માં આગમગ્રંથોનું પરિમાણ આપવામાં આવ્યું છે તેમાં

જીવાભિગમ ૮૭૦૦, ટિપ્પણ ૧૧૦૦, ચૂર્ણિ ૧૫૦૦

આ પ્રમાણે પરિમાણ આવ્યું છે. આ ટિપ્પણ કે ચૂર્ણિ મળ્યા નથી.

જીવાભિગમ સૂત્ર ઉપર આ. દેવસૂરિમ.ની વૃત્તિનો ઉલ્લેખ જિનરત્નકોશ પૃ. ૧૪૪ માં છે.

પ્રસ્તુત જીવાજીવાભિગમસૂત્ર ૯ પ્રતિપત્તિઓમાં વહેંચાયેલું છે. લોક પ્રકાશમાં પ્રતિપત્તિનું સ્વરૂપ આ પ્રમાણે બતાવ્યું છે.

सम्पूर्णगत्यादिद्वारे जीवादिमार्गणा तु या ।
प्रतिपत्तिरियं जीवाभिगमे दृश्यतेऽधुना ॥ ३/८२९॥

પ્રસ્તુત સટીકગ્રંથના સંપાદન માટે અમે તાડપત્રીય વગેરે વિવિધ હસ્તપ્રતોનો ઉપયોગ અમારા પૂર્વસંપાદનની જેમ કર્યો જ છે પણ વિશેષ આનંદની વાત એ છે કે જીવાજીવાભિગમ મૂળસૂત્રની જેસલમેરની તાડપત્રીય પ્રત કે જેમાં અન્યપ્રતો કરતાં ઘણાં જુદા પોઠો મળી આવ્યા છે. અને શ્રીમલયગિરિસૂરિ મ.સા.ની ટીકા જોડે સંવાદી એવા સેંકડો પાઠો અમે માત્ર આ પ્રતના આધારે સુધારી શક્યા છીએ.

આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ જ્યારે જેસલમેરમાં આ પ્રતિ જોઈ ત્યારે તેઓ અતિ પ્રસન્ન થયેલા. અને 'નંદીસુત્તં અણુઓગદ્દારાઈં'ની પ્રસ્તાવના પૃ.૩૧ ટિપ્પણ-૧માં જણાવ્યું છે કે –

'આનંદની વાત છે કે પ્રાયઃ ટીકાના વ્યાખ્યાન મુજબની જીવાભિગમસૂત્રના મૂલપાઠની વાચનાવાળી પ્રાચીન પ્રતિ અમોને જેસલમેરના ભંડારમાંથી પ્રાપ્ત થઈ છે. જીવાભિગમના પ્રકાશન વખતે તેનો અચૂક ઉપયોગ થશે'.

એટલું જ નહીં આ પ્રતિના પાઠભેદો પણ આગમપ્રજ્ઞશ્રીએ નોંધાવેલા. આ પાઠભેદ નોંધાયેલી નોંધ પૃ.૨૭૭ પેજથી સંપૂર્ણ મળી છે. શરૂઆતના પાઠભેદો માટે અમે તાડપત્રીય પ્રતના ફોટાઓનો ઉપયોગ કર્યો છે.

પ્રજ્ઞાપના સૂત્ર (પ્ર.મહાવીર વિદ્યાલય) ભા.૨માં પ્રસ્તાવના (પૃ.૧૪-૧૫)માં એના સંપાદકો આગમપ્રભાકર મુનિ શ્રી પુણ્યવિજય મ.આદિએ પ્રજ્ઞાપના સૂત્ર સાથે જીવાભિગમસૂત્રની તુલના કરતાં લખ્યું છે કે –

''પ્રજ્ઞાપનામાં જીવ અને અજીવની પ્રજ્ઞાપના છે (સૂત્ર-૩) અને જીવાજીવાભિગમમાં પણ જીવ અને અજીવનો અભિગમ છે. પ્રજ્ઞાપના અને અભિગમ શબ્દનો ભાવાર્થ એક જ છે. બન્ને અંગબાહ્ય ગ્રંથો છે અને બન્ને સ્થવિરકૃત છે. બન્ને અધ્યયન નામે રચાયા છે. પ્રજ્ઞાપના ચોથા અંગ સમવાયના ઉપાંગ તરીકે મધ્યકાળમાં ગણાયું અને જીવાજીવાભિગમ સ્થાન નામના ત્રીજા અંગનું ઉપાંગ ગણાયું બન્નેનો વિષય - મુખ્ય વિષય એક છતાં એકને 'સ્થાન' સાથે અને ત્રીજાને 'સમવાય' સાથે જોડવામાં આવ્યું તેમાં કાંઈ ઐતિહાસિક ક્રમ જેવું છે કે નહિ તે તપાસવું જરૂરી છે.

જીવાજીવાભિગમનો મુખ્ય વિષય જીવ-અજીવ પ્રારંભમાં પ્રજ્ઞાપનાની જેમ જ ચર્ચિત છે. તેમાં પણ જીવ અજીવ એ બે માંથી પ્રથમ અજીવનું નિરૂપણ કરીને પછી જ જીવનું નિરૂપણ કરવામાં આવ્યું છે. જીવ નિરૂપણ નો ક્રમ જીવાજીવાભિગમમાં સમગ્ર ગ્રંથમાં તેના જે વિવિધ પ્રકારે ભેદો છે તેને મુખ્ય રાખીને છે એટલે કે પ્રથમ સંસારી જીવોના બે ભેદોથી માંડી દશ ભેદોનું નિરૂપણ અને પછી સર્વ જીવોના બે થી માંડીને દશ ભેદોનું વર્ણન છે. આમ, જીવાજીવાભિગમમાં ભેદોને મુખ્ય રાખીને નિરૂપણ ક્રમે ક્રમે આગળ વધે છે અને અંતે સર્વ જીવોના દશ ભેદોના વર્ણનમાં તે સમાપ્ત થાય છે. એક બાબત ધ્યાનમાં રાખવી જરૂરી છે કે સ્થાનાંગમાં પણ દશ સ્થાનો છે એટલે કે જીવ-

અજીવ ને લગતી એક બે ત્રણ એમ દશ સુધીની બાબતો તેમાં સંખ્યાક્રમે નિરૂપવામાં આવી છે અને જીવાજીવાભિગમમાં જીવના બે થી માંડીને દશ ભેદો પ્રથમ માત્ર સંસારી જીવના અને પછી સર્વજીવના નિરૂપવામાં આવ્યા છે. આમ, બે થી દશનું નિરૂપણ બન્નેમાં સરખું છે, સંભવ છે કે પ્રજ્ઞાપના અને જીવાજીવાભિગમમાં જીવાજીવની ચર્ચા સમાન છે છતાં આ પ્રકારે બેથી માંડી દશનું નિરૂપણ 'સ્થાન' અને જીવાજીવાભિગમમાં સરખું હોઈ તે બન્નેને અંગ અને ઉપાંગ તરીકે ગણવામાં આવ્યા હોય.

પણ, આપણી મુખ્ય સમસ્યા એ છે કે પ્રજ્ઞાપના અને જીવાજીવાભિગમમાં કોઈ ઐતિહાસિક ક્રમ સ્થાપી શકાય છે કે નહિ તેનું સમાધાન તો હજી બાકી જ રહે છે. જીવાજીવાભિગમમાં પ્રજ્ઞાપના અને તેના પદોનો ઉલ્લેખ અનેકવાર છે. (સૂત્ર[1]- ૪, ૫, ૧૩, ૧૫, ૧૩, ૨૦, ૩૫, ૩૬, ૩૮, ૪૧, ૮૬, ૯૧, ૧૦૦, ૧૦૬, ૧૧૩, ૧૧૭, ૧૧૯, ૧૨૨,) વળી રાજપ્રશ્નીય(સૂત્ર ૧૦૯, ૧૧૦) અને ઔપપાતિક (સૂત્ર- ૧૧૧) સૂત્રોનો પણ ઉલ્લેખ છે. એમાંથી ઔપપાતિકનો ઉલ્લેખ તો આગમોના લેખન કાળનો હોવો જોઈએ એટલે કે વલભી વાચનાના કાળમાં તે સગવડ ખાતર કરવામાં આવ્યો છે, એમ માની શકાય છે. પરંતુ પ્રજ્ઞાપનાનો ઉલ્લેખ પણ તે જ કાળે કરવામાં આવ્યો છે કે રચયિતાએ જ કર્યો છે તે નક્કી કરવા માટે તે બન્નેનું પૌર્વાપર્ય અન્ય પ્રકારે નક્કી કરવું જરૂરી છે.

જીવાજીવાભિગમની સામાન્ય રચના એવી છે કે તેમાં ક્રમે ક્રમે જીવભેદોનું નિરૂપણ અને તે ભેદોમાં તે તે જીવની સ્થિતિ, અંતર, અલ્પ બહુત્વ આદિનું નિરૂપણ કરવામાં આવ્યું છે, સામાન્ય રીતે એમ કહી શકાય કે સમગ્ર ગ્રંથ બે વિભાગમાં વહેંચાઈ જાય છે. પ્રથમ વિભાગમાં અજીવનું અને સંસારી જીવોના ભેદોનું અને બીજામાં સમગ્ર જીવોનું એટલે કે સંસારી અને સિદ્ધ એ બન્નેનો સમાવેશ થાય એવી રીતે ભેદ નિરૂપણ છે. તે તે બે ભેદ ત્રણ ભેદ ઈત્યાદિ દશ ભેદોનું નિરૂપણ કરતી વખતે તેમાં સ્થિતિ વગેરે બાબતોનું કથન કરવામાં આવ્યું છે. પરંતુ પ્રજ્ઞાપનામાં પણ મુખ્ય તે જ છતાં નિરૂપણ પદ્ધતિ જુદી છે. તેમાં તે ગ્રંથને ૩૬ પદોમાં વિભક્ત કરવામાં આવ્યો છે. અને ભેદ નિરૂપણ માત્ર પ્રથમ પદમાં કરવામાં આવ્યું છે એટલે કે જીવ-અજીવના જે ભેદ પ્રભેદો છે તેનું સમગ્ર ભાવે ચિત્ર પ્રથમ પ્રજ્ઞાપના પદમાં મળી રહે છે ત્યાર પછીના પદોમાં જીવોના સ્થાન અલ્પબહુત્વ સ્થિતિ ઈત્યાદિ અનેક વિષયોનો ક્રમે વિચાર છે.

---

૧. આ સૂત્ર ક્રમાંકો જૂના સંસ્કરણના છે. પ્રસ્તુત સંસ્કરણના પૃષ્ઠાંકો માટે સંપાદનોપયુક્ત ગ્રંથસૂચિ જોવી.

સારાંશ કે તે તે જીવભેદની સ્થિતિ આદિનો વિચાર તે તે જીવભેદના વર્ણન પ્રસંગે આપણે જીવાજીવાભિગમમાં જાણી શકીએ પણ પ્રજ્ઞાપનામાં તો તે તે પદમાં બધા જ જીવોની સ્થિતિ આદિ વિષયોનો એક સાથે પરિચય પ્રાપ્ત કરીએ છીએ વળી, જે અનેક વિષયોની ચર્ચા પ્રજ્ઞાપનાનાં શેષ ૩૫(૨ થી ૩૬) પદોમાં છે તે સર્વ વિષયની ચર્ચા જીવાજીવાભિગમમાં નથી.

આમ, નિરૂપણ પદ્ધતિનો ભેદ બન્નેમાં છે જ ઉપરાંત, પ્રજ્ઞાપનામાં વસ્તુ વિચારનું પણ આધિક્ય છે.

આ ઉપરાંત સહેજે એમ માનવા મન થાય છે કે જીવાજીવાભિગમની રચના પ્રજ્ઞાપનાથી પૂર્વે કદાચ થઈ હશે. અને તેમાં પ્રજ્ઞાપનાનો ઉલ્લેખ અંગમાં એટલે કે ભગવતીમાં કરવામાં આવ્યો છે તેમ સંક્ષેપ ખાતર કરવામાં આવ્યો હશે."

દેવેન્દ્રમુનિ શાસ્ત્રી - જીવાજીવાભિગમની પ્રસ્તાવના (પ્ર. આગમપ્રકાન (પૃ.૧૫-૧૬)માં જણાવે છે તે–

"प्रस्तुत सूत्र का नाम जीवाजीवाभिगम है परन्तु अजीव का संक्षेप दृष्टि से तथा जीव का विस्तृत रूप से प्रतिपादन होने के कारण यह 'जीवाभिगम' नाम से प्रसिद्ध है। इसमें भगवान महावीर और गणधर गौतम के प्रश्नोत्तर के रूप में जीव और अजीव के भेद और प्रभेदो की चर्चा है। परम्परा की दृष्टि से प्रस्तुत आगम में २० उद्देशक थे और बीसवे उद्देशक की व्याख्या श्रीशालिभद्रसूरि के शिष्य श्रीचन्द्रसूरि ने की थी। श्री अभयदेव ने इसके तृतीय पद पर संग्रहणी लिखी थी। परन्तु वर्तमान में जो इसका स्वरूप है उसमें केवल नौ प्रतिपत्तियां (प्रकरण) है जो २७२ सूत्रो में विभक्त है। संभव है इस आगम का महत्वपूर्ण भाग लुप्त हो जाने से शेष बचे हुए भाग को नौ प्रतिपत्तियों के रूप में संकलित कर दिया गया हो। उपलब्ध संस्करण में ९ प्रतिपतिया १ अध्ययन १८ उद्देशक ४७५० श्लोक प्रमाण पाठ है। २७२ गद्य सूत्र और ८१ पद्य (गाथाएँ) है।

यहां एक महत्त्वपूर्ण विचारणीय विषय यह है कि नन्दीसूत्र आदि श्रुतग्रन्थो में श्रुतसाहित्य का जो विवरण दिया गया है तदनुरूप श्रुतसाहित्य वर्तमान में उपलब्ध नहीं है। उसमें उल्लिखित विशाल श्रुतसाहित्य में से बहुत कुछ तो लुप्त हो गया और बहुत सा परिवर्तित भी हो गया।"

સંપાદનમાં ઉપયુક્ત પ્રતિઓનો પરિચય

S આ સંજ્ઞા પાટણ હેમચન્દ્રાચાર્ય જ્ઞાનભંડાર સ્થિત સંઘવીપાડાના જ્ઞાનભંડારની તાડપત્રીય પ્રત છે. ડાભડા નં ૧૦ ની પ્રતિની ઝેરોક્ષ આગમપ્રજ્ઞ મુનિરાજશ્રી જંબૂવિજયજી મ.સા.ના માર્ગદર્શન હેઠળ ચારૂપમાં થઈ. એ ઝેરોક્ષ નકલનો અમે ઉપયોગ કર્યો છે.

પત્ર ૧ થી ૧૨૩ સુધીમાં મૂળસૂત્ર અને પત્ર ૧૨૪ થી ૩૭૧માં આ.શ્રી મલયગિરિસૂરી મ.સા. રચિત વૃત્તિ છે. લં-પ ૭૩ સે.મી. X ૪.૫ સે.મી. લેખન સંવત ૧૪૪૪ (અંતભાગઃ સંવત ૧૪૪૪ વર્ષે અશ્વિન વદિ - ૮ બુધ)

પ્રત્યેક પત્રની બન્ને બાજુ ૪ થી ૫ પંક્તિ અને પ્રતિપંક્તિ ૧૨૦ થી ૧૪૦ અક્ષરો

સૂત્રનો ગ્રંથાગ્ર ૪૭૦૦ અને ટીકાનો ગ્રંથાગ્ર ૧૪૦૦૦ છે.

આ પ્રતિના પાઠભેદો આ. હાર્દિકરત્નસૂરિએ જોઈ આપ્યા છે. આ.પ્ર. મુનિરાજશ્રી જંબૂવિજયજી સંપાદિત કેટલોગ ભાગ-૧ પ્ર-૬૭માં આના રીમાર્કમાં જણાવ્યું છે કે અપૂર્ણ છે. વચમાં જીર્ણ છે.

પ્રાકૃત ટેક્ષ સોસાયટી (આ.શ્રી નેમિસૂરિજ્ઞાનમંદિર ૧૨ ભગતબાગ આ.ક.પેઢી. અમદાવાદ) પાસે પૂ. આગમપ્રભાકર પુણ્યવિજયજી મ.એ તૈયાર કરાવેલી પ્રતિલિપિઓનો સંગ્રહ છે. એમાંથી જીવાજીવાભિગમમૂળસૂત્રની પેજ નં. ૨૨૭થી ૫૭૯ સૂત્ર (૩/૩૩૫થી) સંપૂર્ણ ગ્રંથની પ્રતિલિપી અમને પ્રાપ્ત થઈ છે.

આ પ્રતિલિપિમાં નીચે મુજબની હસ્તલિખિત પ્રતોના પાઠભેદ નોંધવામાં આવ્યા છે.

જે. આ જેસલમેરની પ્રત જણાય છે. **V** સંસ્કરણમાં **તા.** સંકેતથી નોંધાયેલા પાઠભેદો સાથે સમાનતા હોવાથી **જે.** **તા** પ્રતિથી અભિન્ન જણાય છે.

V આ સંજ્ઞા જૈન વિશ્વભારતી લાડનૂ (રાજસ્થાન) દ્વારા પ્રકાશિત ઉવંગસુત્તાણી ૪ ખંડ ૧ ની છે.

આ સંસ્કરણના વાચના પ્રમુખ આ. તુલસીજી અને સંપાદક આ. મહાપ્રજ્ઞજી છે આ સંસ્કરણમાં પ્રકાશિત જીવાજીવાભિગમ સૂત્રના સંપાદનમાં નીચે મુજબની હસ્તપ્રતોનો ઉપયોગ કરવામાં આવ્યો છે એમ પણ આ પાઠભેદોનો જરૂર પ્રમાણે તે તે સંકેત સાથે ઉપયોગ કર્યો છે.

ક :- સરદાર શહેરમાં આવેલા શ્રીચન્દ ગણેશદાસ ગધૈયા પુસ્તકાલયની આ પ્રતિ જીવાજીવાભિગમ સૂત્રના મૂલપાઠની છે.

પત્ર સંખ્યા ૯૪

પત્રની બન્ને બાજુ ૧૫ પંક્તિ દરેક પંક્તિમાં ૫૩ થી ૫૬ અક્ષરો. લંબાઈ X પહોળાઈ ૧૩"X ૫" લે.સં. ૧૫૭૫ ગ્રંથાગ્ર ૫૨૦૦

અંતભાગ : संवत १५७५ वर्षे आश्विनमासे कृष्णपक्षे त्रयोदश्यां तिथौ भृगुवासरे पत्तननगरमध्ये मोढजातीय जोशी वीट्ठलसुत लटकणलिखतम् ॥छ ॥

ખ :- માત્ર મૂળ સૂત્રની આ પ્રતિ પણ ઉપરોક્ત ગધૈયા પુસ્તકાલયની છે. પત્ર સંખ્યા - ૮૦, પત્રની બંને બાજુ ૧૫ પંક્તિ દરેક પંક્તિમાં લગભગ ૬૧ અક્ષરો, લંબાઈ X પહોળાઈ ૧૨ "X ૪" લેખન સંવત અનુમાનતઃ ૧૬મો સૈકો.

ગ :- માત્ર મૂલસૂત્રની જ આ સંજ્ઞાની સચિત્ર પ્રત પણ ઉપરોક્ત ગધૈયા પુસ્તકાલયની છે.

પત્રની સંખ્યા ૯૦

પત્રની બંને બાજુ ૧૫ પંક્તિઓ દરેક પંક્તિમાં ૬૩ અક્ષરો લંબાઈ X પહોળાઈ ૧૧.૫" X ૪.૫" લેખન સંવત્ અનુમાનતઃ ૧૬મો સૈકો આ પ્રત ત્તા. પ્રત અને ટીકા જોડે વિશેષ મેળ ધરાવે છે.

ત્તા પ્રત જેસલમેરસ્થિત તાડપત્રીય ગ્રંથની ફોટો કોપીનો આ સંકેત છે.

સંભવતઃ આ વિ.સ. ૧૪૮૯માં લખાયેલી જિનભદ્રસૂરિ જ્ઞાનભંડાર જેસલમેરની ક્રમાંક ૨૫ની પ્રત છે.

પત્ર સંખ્યા ૧ થી ૧૦૨ લંબાઈ X પહોળાઈ ૩૧.૫" X ૨.૨૫"

ઉપરોક્ત તાડપત્રીયગ્રંથના પાઠભેદો આગમપ્રભાકર શ્રીપુણ્યવિજય મ.સા. એ નોંધાવેલા આના ફુલસ્કેપ પેજો ૨૭૭ થી ૫૭૯ સુધીના પેજોની ઝેરોક્ષ નકલ અમને પ્રાકૃત ટેક્ષ્ટ સોસાયટીના હર્ષદભાઈ પાસેથી મળી છે. કેટલાક સ્થળે એલમાં ન નોંધાયેલા પાઠો અમે આના આધારે નોંધ્યા છે. ૧થી ૨૭૬ પેજ અમને મળ્યા નથી. ૨૭૭પેજમાં ત્રીજી પ્રતિપત્રિના ૩૩૫ ક્રમાંકના સૂત્રથી શરૂ થઈ સંપૂર્ણ ગ્રંથ છે.

ટ :- લાડનૂ સ્થિત સંઘીય ભંડારની આ પ્રતમાં ટબ્બો (સ્તબક) છે. લે.સં. ૧૮૦૦ નીચેની પ્રતોનો અમુક સ્થળ પૂરતો જ ઉપયોગ કર્યો છે.

પા.૧ પાકાહેમ ૧૦૦૧૪ ક્રમાંકની પાટણ હેમચન્દ્રાચાર્ય જ્ઞાનભંડાર સ્થિત મોટી ભંડારની ડાભડા નં. ૨૧૪ ક્રમાંક ૧૦૦૧૪ ની આ પ્રત ૮૮ પત્રની છે. લે. સં. ૧૬મો સૈકો. આમાં જીવાભિગમ મૂળ સૂત્ર છે. પત્રની બંને બાજુ ૧૫ પંક્તિઓ દરેક પંક્તિમાં ૩૨ થી૬૪ અક્ષરો છે. લંબાઈ X પહોળાઈ ૧૨" X ૫"

પા.૨ પાકાહેમ ૧૦૫૬૧ ક્રમાંકની આ પ્રતિ પણ પાટણ સ્થિત હેમચન્દ્રાચાર્ય જ્ઞાનભંડારમાં સંગ્રહિત લહેરૂ વકીલ જૈન જ્ઞાનભંડારની આ પ્રત છે. ડાભડા નંબર ૨૨૭ પત્ર સંખ્યા ૧૦૯ લંબાઈ X પહોળાઈ ૧૦" X ૪.૫" પૃષ્ઠની દરેક બાજુ પંક્તિઓ ૧૫ દરેક પંક્તિમાં અક્ષરો ૫૦ અક્ષરો ઉપરોક્ત બે પ્રતોના થોડાક પાઠભેદો જ નોંધવામાં આવ્યા છે.

સ્થાનકવાસી સંપ્રદાયના આ. રામલાલજી મ.એ અલ્પબહુત્વ અંગે ચાલી આવતી કેટલીક અશુદ્ધિઓનું પરિમાર્જન કરવા અનેક પ્રતોનો ઉપયોગ કરેલ છે. એમાં જીવાભિગમના સૂત્રો અને ટાકાની પાઠ શુદ્ધિ માટે પૃ.૧૧૦, ટિ.૫, પૃ.૧૨૬ ટિ. ૨, પૃ.૧૪૭ ટિ.૧, પૃ.૧૪૯ ટિ.૧-૨ વગેરેમાં આ પ્રતોના પાઠ ભેદ નોંધ્યા છે. પાતા સંપા૧૦-૧,૧૦-૨, પા કા હેમ ૧૪૮૫૪,૧૦૧૩૦, પા કા ભા ૧૨,૧૩,૭, રા સં ૨૧૬,૨૧૮,૭૭૩, આબોલા ૨૧ વગેરે.

અહીયાં પા થી શરૂ થતી પ્રતો પાટણના જ્ઞાનભંડારની છે અને આબોલા બિકાનેરના આરૂગ્ગબોહિલાભં જ્ઞાન ભંડારની છે.

પ્રસ્તુત સંપાદન

- હારિભદ્રીવૃત્તિ જીવાજીવાભિગમ ઉપરની જો કે અપ્રગટ છે. એનું સંપાદન મુનિ કલ્યાણભૂષણ વિ.મ.કરે છે. એના પ્રુફો તેઓએ અમને મોકલેલા એના આધારે અમે પ્રસ્તુત સંપાદનમાં તુલના આદિ કરી છે. જુઓ. પૃ.૧ ટિ.૨, પૃ.૨, પૃ.૫ ટિ.૧, પૃ.૯૨ ટિ.૧,૨
- પ્રસ્તુત ગ્રન્થ સાથે પ્રજ્ઞાપનાસૂત્રનું વિષયસામ્ય હોવાથી વૃત્તિમાં અનેક સ્થળે પ્રજ્ઞાપનાસૂત્રના વિસ્તૃતસૂત્રપાઠો આપ્યા છે. અમે તે બધા પાઠ પ્રજ્ઞાપનાસૂત્ર જોડે મેળવ્યા છે. ક્યાંક બે વચ્ચે ફેરફાર વગેરે જોવા મળ્યા છે તે પણ અમે નોંધ્યા છે. જુઓ. પૃ.૨૯ ટિ.૧, પૃ.૩૦ ટિ.૧, પૃ.૪૨ ટિ.૨,૩,૪,
- તે તે સ્થળે પ્રજ્ઞાપનાસૂત્રની વૃત્તિમાં પણ મળતાં પાઠ ભેદ નોંધ્યા છે. જુઓ. પૃ.૩૯ ટિ.૧
- મૂળસૂત્રમાં મળતાં સૂત્રપાઠ એ વૃત્તિમાં ઉપલબ્ધ સૂત્ર-પ્રતીકો વચ્ચે અનેક સ્થળે ભેદ જોવામાં આવે છે. અમે મોટે ભાગે તેની નોંધ ટિપ્પણમાં આપી છે. જુઓ પૃ.૩૫ ટિ.૨
- વૃત્તિકાર શ્રી મલયગિરિસૂરિ મહારાજાએ અનેક સાક્ષીપાઠો આપ્યા છે. અમે તે પાઠના સંદર્ભ સ્થળ શોધી યથાશક્ય તે તે સ્થળે નોંધ્યા છે. ક્યારેક કોઈ ગાથા વગેરેનો સમાન પાઠ ગ્રંથાંતરમાં મળતો હોય તો તેની પણ નોંધ આપી છે. જુઓ. પૃ.૩૮ ટિ.૩
- સાધારણ વનસ્પતિના ભેદો સ્વયં જાણી લેવાનું વૃત્તિકારશ્રીએ જણાવ્યું છે. ત્યાં '**जैन आगम वनस्पति कोष**' વગેરેના આધારે વિગતો આપી છે. જુઓ પૃ.૪૬ ટિ.૧
- લાડનુથી પ્રકાશિત ઉવંગસુત્તાણિમાંથી કેટલાક ઉપયોગી ટિપ્પણો અમે એ સંસ્કરણના ઉલ્લેખ પૂર્વક લીધા છે. જુઓ. પૃ.૫૩ ટિ.૧

- **जे.** અથવા **ता.** આ જેસલમેરની તાડપત્રીયપ્રતના અનેક સ્થળે વિશિષ્ટ પાઠો મળ્યા છે. જે મોટા ભાગે મલયગિરિસૂરિ મ.ની ટીકાને અનુસરતા હોય છે. એમ આવા પાઠો મૂળમાં લીધા છે. અને મુદ્રિત પ્રતનો પાઠ ટિપ્પણમાં આપ્યો છે. જુઓ. પૃ.૧૧૫ ટિ.૧, પૃ.૧૨૦ ટિ.૧-૨, પૃ.૧૨૧ ટિ.૧, પૃ.૧૨૩ ટિ.૧, પૃ.૧૩૦ ટિ.૧, પૃ.૧૩૧ ટિ.૧-૨, પૃ.૧૬૪ ટિ.૧, પૃ.૧૭૨ ટિ.૨, પૃ.૧૭૩ ટિ.૨, પૃ.૧૭૫ ટિ.૩, પૃ.૧૭૬ ટિ.૧-૨, પૃ.૧૯૨ ટિ.૩, પૃ.૨૦૦ ટિ.૨, પૃ.૨૧૮ ટિ.૧, પૃ.૨૨૧ ટિ.૧, પૃ.૨૩૪ ટિ.૧, પૃ.૨૪૬ ટિ.૧, પૃ.૨૪૭ ટિ.૧-૨, પૃ.૨૪૮ ટિ.૨
- વિશિષ્ટ પાઠભેદ માટે જુઓ. પૃ.૧૪૭ ટિ.૧, પૃ.૧૪૬ ટિ.૧-૨-૩
- ટીકાકારશ્રીએ જે ગાથાઓ સંગ્રહણી ગાથા તરીકે જણાવી ટીકામાં આપી છે તે ગાથાઓ **जे.** પ્રતમાં કે અન્ય પ્રતમાં સૂત્રપાઠમાં પણ જોવા મળે છે. જુઓ. પૃ.૧૮૩ ટિ.૧, પૃ ૨૨૬
- **ટીકાની વિશેષતા**
- મૂળ સૂત્રમાં જ્યારે ઘણો વાચનાભેદ હોય છે ત્યારે સુગમસૂત્રનું પણ વિવરણ કર્યું છે. પૃ.૨૮૫ સૂત્ર ૨૩૮, પૃ.૬૮૩ સૂત્ર ૧૦૦૦ , પૃ.૬૯૩ સૂત્ર ૧૦૧૯ **बहुषु पुस्तकेषु न दृष्टम्**
- સ્થાનકવાસી સંપ્રદાયના આ. રામલાલજી મ.એ અલ્પબહુત્વ અંગે ચાલતી કેટલીક અશુદ્ધિઓ પરિમાર્જન કરવા જીવાભિગમ સૂત્ર અને ટીકાઓની વિવિધ હસ્તપ્રતોનો ઉપયોગ કર્યો છે. તે તે પ્રકરણના પ્રસ્તુત ગ્રંથના પ્રુફો જોઈ આપ્યા છે. પૃ.૧૧૦ ટિ.૫, પૃ.૧૨૬ ટિ.૨, પૃ૧૪૭ ટિ.૨, પૃ.૧૪૯ ટિ.૧-૨ વેગેરેમાં અમે એની નોંધ કરી છે.

• • •

આભાર પ્રદર્શન

આ. ભ. શ્રી યુગભૂષણસૂરિ મ.સા.ની પ્રેરણાથી શ્રી ગીતાર્થગંગા ટ્રસ્ટે અમને જીવાજીવાભિગમસૂત્ર સટીકની એન્ટ્રી કરેલી (સોફ્ટ કોપી) સી.ડી. અમને આપી છે. આ કારણે ગ્રંથની એન્ટ્રી કરવા વગેરે કાર્યનો શ્રમ બચી ગયો છે આ પૂર્વે જંબૂદ્વીપપ્રજ્ઞપ્તિ સટીકની પણ સી.ડી. ગીતાર્થગંગા પાસેથી મળી હતી.

જેસલમેર જિનભદ્રસૂરી જ્ઞાનભંડારની તાડપત્રીય પ્રતોનું સ્કેનીંગ આગમપ્રજ્ઞ મુનિશ્રી જંબૂવિજયજી મ.સા.ના માર્ગદર્શનમાં થયેલ. એમાંથી જીવાભિગમ સટીકની ૨૫ ક્રમાંકની અતિ મહત્ત્વની પ્રતની સી.ડી. અમને પં. શ્રી પુંડરીકરત્નવિજયજી મ.સા.ની પ્રેરણાથી જેસલમેર ટ્રસ્ટે આપી છે.

જેસલમેર ની પ્રતના પાઠભેદો નોંધેલી પ્રતિલિપિ (પેજ ૨૭૭થી) અમને પ્રાકૃત ટેક્ષ્ટ સોસાયટી તરફથી શ્રી હર્ષદભાઈના સૌજન્યથી મળી છે.

જિનશાસનના શણગાર પ.પૂ.આ.ભ.શ્રી વિજય ચન્દ્રોદયસૂરિ મ.સા. તથા ગુરુબંધુ સૂરિમંત્ર સમારાધક પ.પૂ.આ. ભ.શ્રી અશોકચન્દ્રસૂરિ મ.સા.ના પટ્ટપ્રભાવક સ્વ. આ.ભ.શ્રી સોમચન્દ્રસૂરિ મ.સા.ની પ્રેરણાથી સૂરત ગોપીપુરા સ્થિત શ્રી નેમિ-વિજ્ઞાન-કસ્તુરસૂરિજ્ઞાનમંદિરના વ્યવસ્થાપકો દ્વારા જેસલમેર-ખંભાતની તાડપત્રીય પ્રતોની ફોટો ફાઈલો મળી છે.

આગમોદય સમિતિ તરફથી પ્રકાશિત જીવાજીવાભિગમસૂત્ર સટીક પ્રકાશનનું સંપાદન સંશોધન આ.ભ.શ્રી આનન્દસાગરસૂરિ મ. (સાગરજી મ.) એ કર્યું છે. આટલા વર્ષો સુધી આ સંસ્કરણના માધ્યમે આગમપ્રેમી મુનિવરો સ્વાધ્યાય કરતા રહ્યા છે.

સાગરજી મ.ના આપણે ઋણી છીએ. પૂ. સાગરજી મ.ને જે તાડપત્રીયગ્રંથો નહોતા મળ્યા તે અમને મળ્યા માટે જ અમે પાઠો સુધારી શક્યા છીએ.

સંપાદન માટે સમાગ્રી આપનાર તમામની શ્રુતસેવાની અનુમોદના ....આભાર

ઋણ સ્વીકાર

આ. ભ. શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. ભ. શ્રી પુણ્યરત્નસૂરિ મ.સા., આ. ભ. શ્રી યશોરત્નસૂરિ મ.સા., આ. ભ. શ્રી અભયચન્દ્રસૂરિ મ.સા., (પ્રેમ-ભુવનભાનુસૂરિ સમુદાય) આ. ભ.શ્રી જગચ્ચન્દ્રસૂરિ મ.સા. (ડહેલાવાળા સમુદાય), આ. શ્રી રામલાલજી મ.સા. વગેરે વિદ્વદ્વર્યોએ ગ્રંથના પ્રુફો ઝીણવટપૂર્વક જોયા છે. ઉપયોગી સૂચનો કર્યા છે.

આ.શ્રી હાર્દિકરત્નસૂરિજી (આ. નીતિસૂરીશ્વરજી સમુદાય) એ સંઘવી પાડાની તાડપત્રીય પ્રત (S સંકેત)ના ગ્રંથ અને ટીકાના પાઠભેદો કાળજી પૂર્વક નોંધી આપ્યા છે અને પ્રુફો પણ જોયા છે.

અન્ય હસ્તપ્રતોના પાઠભેદો નોંધવામાં પં. દિવ્યરત્નવિજય ગણી, સા. કુલયશાશ્રી, સા. ભક્તિધરાશ્રી, સા. આગમદર્શનાશ્રી વગેરે એ સહાય કરી છે.

સા. નિર્વાણશ્રી, સા. વિનયપૂર્ણાશ્રી, સા. પરમશ્રદ્ધાશ્રી આદિએ પ્રુફો જોવામાં પરિશિષ્ટો વગેરે તૈયાર કરવામાં મદદ કરી છે. સા. હર્ષગુણાશ્રીજીએ કર્મગ્રંથ વિષયક પ્રશ્નોના સમાધાન આપ્યા છે.

દેવ-ગુરુ વંદના

શ્રી શંખેશ્વર પાર્શ્વનાથ પ્રભુના ચરણ કમળમાં વંદના
સંઘસ્થવિર પરમ પૂજ્ય આ.ભ. શ્રી સિદ્ધિસૂરીશ્વરજી મહારાજા
યુગમહર્ષિ પરમ પૂજ્ય આ.ભ. શ્રી ભદ્રસૂરીશ્વરજી મ.સા.
સંઘએકતા શિલ્પી પરમ પૂજ્ય આ.ભ. શ્રી ૐકારસૂરીશ્વરજી મ.સા.
પ્રશાન્તમૂર્તિ પરમ પૂજ્ય આ.ભ.શ્રી અરવિંદસૂરીશ્વરજી મ.સા.
સાધનારત પરમપૂજ્ય ગુરુદેવ મુનિરાજ શ્રી જિનચન્દ્રવિજયજી મ.સા. આદિના ચરણે વંદના
ભક્તિયોગાચાર્ય પૂ. આ. ભ. શ્રી યશોવિજયજીસૂરીશ્વરજી મ.સા.ના ચરણે ભાવભીની વંદના..
દેવ-ગુરૂના આશિષથી જ આ સંપાદન કાર્ય થઈ શક્યું છે. દેવ-ગુરૂ ચરણે વંદના...
અધિકારી મુનિવરો આનું અધ્યયન કરી આત્મકલ્યાણ કરે એજ વિનંતી

લિ.

યુગમહર્ષિ આ. ભ. શ્રી ભદ્રસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન
આરાધનારત મુનિરાજશ્રી જિનચંદ્રવિજયજી મ.સા.ના વિનેય
આ. વિજય મુનિચંદ્રસૂરિ

विषयानुक्रमः

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
	मङ्गलाचरणम्	१
१	जीवाजीवाभिगमस्य स्थविरकर्तृत्वं	४
२-११	जीवाजीवाभिगमस्य भेद-प्रभेदाः	७-१४
३-५	अजीवाभिगमप्रकाराः	८-११
६-१०	जीवाभिगमप्रकाराः	१२-१३
११	त्रस-स्थावरप्रकारद्वयम्	१४
१२-७४	स्थावरस्वरूपम्	१५-४७
१३-६२	**पृथ्वीकायस्वरूपम्**	१५-४१
१४-५६	सूक्ष्म-पृथ्वीकायस्वरूपम्	१६-३६
५७-६२	बादर-पृथ्वीकायस्वरूपम्	३७-४१
६३-६५	अप्कायस्वरूपम्	४१-४२
६६-७४	**वनस्पतिकायस्वरूपम्**	४३-४७
६८-७२	बादर-वनस्पतिकायस्वरूपम्	४३-४४
७३-७४	साधारण-वनस्पतिकायस्वरूपम्	४५-४७
७५-९०	**त्रसस्वरूपम्**	४७-५५
७६-७९	तेजस्कायस्वरूपम्	४७-४८
८०-८२	वायुकायिकस्वरूपम्	४९-५१
८३	औदारिकत्रसप्रकाराः	५१
८४-८७	द्विन्द्रीयस्वरूपम्	५१-५३

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
८८	त्रीन्द्रियस्वरूपम्	५४
८९-९०	चतुरिन्द्रियस्वरूपम्	५५
९१	पञ्चेन्द्रियप्रकाराः	५५
९२-९६	नैरयिकस्वरूपम्	५६-५९
९७-१२५	**तिर्यक्पञ्चेन्द्रियस्वरूपम्**	६०-७५
९८-१०१	संमूर्च्छिमजलचरपञ्चेन्द्रियतिर्यञ्चाः	६०-६२
१०२	संमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यञ्चप्रकाराः	६२
१०३	संमूर्च्छिमचतुष्पदस्थलचरतिर्यञ्चाः	६३-६४
१०४	संमूर्च्छिमस्थलचरप्रकाराः	६४
१०५-१११	संमूर्च्छिम उरपरिसर्पस्थलचरतिर्यञ्चाः	६४-६७
११०	आसालिगस्वरूपम्	६५-६७
११२	संमूर्च्छिमभुजपरिसर्प- स्थलचराः	६८-६९
११३-११६	संमूर्च्छिमखेचराः	६९-७०
११७-१२५	गर्भजतिर्यञ्चपञ्चेन्द्रियप्रकाराः	७१-७५
११८-११९	गर्भजजलचराः	७१-७४
१२०-१२४	गर्भजस्थलचराः	७४-७५
१२५	गर्भजखेचराः	७५
१२६-१३४	**मनुष्यप्रकाराः**	७६-८२
१२७-१२८	संमूर्च्छिममनुष्याः	७७
१२९-१३४	गर्भजमनुष्याः	७८-८२
१३५-१३६	देवस्वरूपम्	८२-८४
१३७-१३८	त्रस-स्थावरस्य भवस्थितिः	८५
१३९-१४०	त्रस-स्थावरकायस्थितिः	८५-८७
१४१-१४३	त्रस-स्थावराणामन्तर-अल्पबहुत्वादिः	८७-८८
१-१५१	**द्वितीया प्रतिपत्तिः**	८९-१५२

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
१	जीवानां प्रकारत्रयम्	८९
२-२६	**स्त्रीवेदवक्तव्यता**	८९-९३
३-१०	तिर्यञ्चस्त्रीस्वरूपम्	८९-९०
११-१४	मनुष्यस्त्रीस्वरूपम्	९०-९१
१५-१९	देवस्त्रीस्वरूपम्	९१
२०-२६	स्त्रिया भवस्थितिः	९२-९३
२७-३४	कर्मभूमिकादिविशेषस्त्रीणां वक्तव्यता	९४-९६
३५-४७	देवीवक्तव्यता	९६-९८
४८	स्त्रिया निरन्तरस्त्रीत्वकाले आदेशाः पञ्च	९८-९९
४९-५३	तिर्यक्स्त्रीत्वे नैरन्तर्यकालः	१००-१०१
५४-६२	विविधमनुष्यस्त्रियाः नैरन्तर्यस्त्रीत्वकालः	१०१-१०५
६३-६७	अन्तरकालः जीवानाम्	१०५-१०७
६८-७२	अल्पबहुत्वम्	१०७-११०
७३	स्त्रीवेदकर्मणः स्थितिमानम्	१११-११२
७४	वेदस्वरूपम्	११२
७५-९३	पुरुषवेदवक्तव्यता	११२-१२२
९४-९६	अल्पबहुत्वानि पञ्च	१२३-१२७
९७-९८	पुरुषवेदवक्तव्यता	१२७
९९-१२३	नपुंसकवेदवक्तव्यता	१२८-१३७
१३४-१३८	नपुंसकेषु अल्पबहुत्वम्	१३७-१४२
१३९-१४०	नपुंसकवेदकर्मणः बन्धस्थित्यादिः	१४२
१४१-१४९	अल्पबहुत्वानि अष्टौ	१४२-१५०
१५०	भवस्थिति-कायस्थितिमानम्	१५१
१५१	पुरुषेभ्यः स्त्रियः कतिगुणाः?	१५१-१५२

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
	प्रतिपत्तिः ३	
	नरकाधिकारः	१५३-२३०
१	जीवानां प्रकारचतुष्कम्	१५३
२-१२९	नरकवक्तव्यता	१५३-२३०
२	नैरयिकप्रकाराः	१५३
३-४	पृथ्वीनां नाम-गोत्राणि	१५३-१५४
५	पृथिव्याः बाहल्यादिः	१५४
६-११	काण्डत्रयवक्तव्यतादि	१५५-१५६
१२	नरकावासाः	१५६-१५९
१३-२१	घनोदध्यादिकाण्डत्रयम्	१५९-१६०
२२-२७	पृथिविषु द्रव्यादिः	१६०-१६२
२८-३८	पृथ्वीनां संस्थानादिः	१६२-१६४
३९-५०	घनोदध्यादीनां बाहल्यादिः	१६५-१६८
५१-५६	पृथिव्याः आयाम-विष्कम्भादिः	१६८-१७०
५७-७५	रत्नप्रभादिपृथ्वीवक्तव्यता	१७०-७७
	उद्देश - २ नरकाधिकारः	
७६-८७	नरकावासाः	१७९-१९२
८३-८७	नरकावासानां वर्णादिः	१८६-१९२
८८-९०	नरकेषु उपपातवक्तव्यता	१९२-१९४
९१-९७	नारकाणां शरीरवक्तव्यता	१९४-२००
९८-१११	नारकाणां लेश्यादिः	२०१-२०६
११२-११६	नारकाणां क्षेत्रजवेदनादिः	२०७-२०८
११७	क्रूरकर्मफले उदाहरणानि	२०८-२०९
११८-११९	नरकेषु उष्णशीतवेदनादिः	२०१-२१८
१२०-१२१	नारकाणां स्थित्यादिः	२१८-२२२

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
१२२-१२७	नारकाणां स्पर्शादिः	२२२-२२५
१२८-१२९	नारकाणां पुद्गलपरिणामादिः	२२६-२३०
	तिर्यञ्चाधिकारः	
१३०-१७४	तिर्यञ्चवक्तव्यता	२३१-२४२
१७५-१८२	विमानवक्तव्यता	२४२-२४५
१८३-१९१	पृथ्वीकायवक्तव्यता	२४६-२४७
१९२-१९७	नैरयिकादीनां स्थितिः	२४३-२५०
१९८-२११	लेश्यावक्तव्यता	२५१-२५३
	मनुष्याधिकारः	
२१२-२१४	मनुष्यप्रकारादिः	२५४
२१५-२२९	गर्भजमनुष्यवक्तव्यता	२५५-२७३
२१७-२१८	एकोरुकद्वीपवक्तव्यता	२५५-२६३
२१९-२२६	दाक्षिणात्या आभाषिकादिद्वीपाः	२६४-२७३
२२७-२२९	उत्तरादिदिग्वर्ति-अन्तरद्वीपाः	२७३
२३०-२५८	**देवाधिकारः**	२७४
२३०	देववक्तव्यता	२७४
२३१-२५०	भवनपतिदेववक्तव्यता	२७४-२९३
२३३-२३४	असुरकुमारदेववक्तव्यता	२८०-२८२
२३५-२४०	असुरेन्द्रचमरवक्तव्यता	२८३-२८७
२४१-२४३	बलीन्द्रवक्तव्यता	२८७-२८८
२४४-२५०	नागकुमारवक्तव्यता	२८८-२९३
सूत्राङ्क	**प्रथमा प्रतिपत्तिः**	**पृष्ठाङ्क**
२५०-२५६	**वानमन्तरवक्तव्यता**	२९३-२९७
२५७-२५८	ज्योतिष्कवक्तव्यता	२९८-३०१
२५९	द्वीपसमुद्रवक्तव्यता	३०१-३०२

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
२६०	**जम्बूद्वीपवक्तव्यता**	३०३
२६९-२६२	जगतीस्वरूपम्	३०४-३०५
२६३-२७६	**पद्मवरवेदिकास्वरूपम्**	३०५-३१४
२७३-२९८	**वनखण्डस्वरूपम्**	३१४-३४६
२७८-२८५	वनखण्डे मणी-तृणवर्णगन्ध-स्पर्श-शब्दस्वरूपम्	३२१-३३५
२८६-२९३	वनखण्डे वाप्यादीनां वर्णनम्	३३५-३४२
२८७-२९१	वाप्यादौ त्रिसोपान-तोरणस्वरूपम्	३३७-३४१
२९२-२९३	वाप्यादौ उत्पातपर्वताः	३४१-३४२
२९४-२९७	वनखण्डे विविधानि गृहाणि मण्डपकाः	३४२-३४४
२९८	पद्मवरवेदिकाया अर्वाक् वनखण्डस्वरूपम्	३४५-३४६
२९९	जम्बूद्वीपस्य द्वाराणि	३४६
३००-३४९	**विजयद्वारवक्तव्यता**	३५०-३७२
३०१-३०२	विजयद्वारे नैषेधिकी-नागदन्तक-माल्यदामादिः	३५०-३५३
३०३-३०४	विजयद्वारे शालभञ्जिका-जालकटकाः	३५३-३५५
३०५-३०७	विजयद्वारे घण्टा-वनमाला-प्रकण्ठकाः	३५५-३५८
३०८-३०९	विजयद्वारे प्रासादावतंसकेन्द्रउल्लोकःभूमिभागाः	३५८-३५९
३१०-३१२	विजयद्वारे मणिपीठिका-सिंहासन-विजयदूष्यादिः	३५९-३६१
३१३-३१४	विजयद्वारे अङ्कुश-अष्टमङ्गलानि	३६१-३६२
३१५-३३४	विजयद्वारस्य पार्श्वभागवर्णनम्	३६२-३६९
३३५-३४५	विजयद्वारे ध्वजा-भौम-सिंहासनादिः	३६९-३७२
३४६-३४९	विजयद्वारे उत्तरङ्गादिः	३७२
३५०	विजयदेववर्णनम्	३७२-३७४
३५१-३५७	**विजयाराजधानीवर्णनम्**	३७४-३७९
३२८	विजयाराजधान्यां वनखण्डाः	३७९
३६१-३६७	वनखण्डे उपकारिकालयन-भूमिभागादिः	३८१-३८३

सूत्राङ्क	प्रथमा प्रतिपत्तिः	पृष्ठाङ्क
३६८-३७२	वनखण्डे प्रासादावतंसकादिः	३८२-३८८
३७३-४१९	**सुधर्मासभावक्तव्यता**	३८८-४०७
३७३-३८०	सुधर्मासभाद्वारा-मुखमण्डपादिः	३८८-३९०
३८१-३९ २	सुधर्मासभा चैत्यस्तूप-चैत्यवृक्षादिः	३९०-३९५
३९३-४००	महेन्द्रध्वज-पुष्करिणी-मणिपीठिकादिः	३९५-३९८
४०१-४११	चैत्यस्थम्भ-देवशयनीयादिः	३९८-४०२
४१२-४१४	सिद्धायतन-मणिपीठिका-देवच्छन्दकादिः	४०२-४०३
४१५	जिनप्रतिमास्वरूपम्	४०४
४१६-४१९	जिनप्रतिमापार्श्वे छत्रधर-चामरधरादिः	४०४-४०६
४२०-४२८	सिद्धायतने उपपातसभा-भूमिभागादिः	४०७-४०९
४२९-४३८	अभिषेकभाण्ड-व्यवसायसभा-पुस्तकरत्नादिः	४१०-४११
४३९-५६५	**विजयदेवाधिकारः**	
४३९-४४३	विजयदेवस्य उपपातादिः	४११-४१४
४४४-४४८	विजयदेवस्य इन्द्राभिषेकादिः	४१५-४२९
४४९-४५३	विजयदेवस्य अलङ्कारसभागमनादिः	४२९-४३२
४५४-४५६	विजयदेवस्य सिद्धायतनगमनादिः	४३२-४३४
४५७-५५७	विजयदेवस्य जिनप्रतिमापूजनादिः	४३४-४४६
५५८-५६५	विजयदेवस्य सुधर्मासभा	४४६-४४८
५६६-७०९	**जम्बूद्वीपवक्तव्यता**	४४८
५६६-५७०	जम्बूद्वीपस्य वैजयन्तद्वारवक्तव्यता	४४८-४४९
५७१-५७६	जम्बूद्वीप-लवणसमुद्रसम्बन्धः	४५०-४५१
५७७	जम्बूद्वीपनामकरणम्	४५२-४५३
५७८-६६६	**उत्तरकुरुवक्तव्यता**	४५४-५२३

संपादनोपयुक्तग्रन्थसूची सङ्केसूची च

अनुयोग	अनुयोगद्वारसूत्र	पृ. ७०,३३३,३३४
अष्टक प्र.	अष्टकप्रकरण	पृ.८०
आचारांग शीला.	आचाराङ्ग शीलाङ्काचार्यवृत्ति	पृ. २९
आचाराङ्ग	आचाराङ्गसूत्र	पृ. ३३
आव. नि.	आवश्यकनिर्युक्ति	पृ. २,६
आव.नि.हा.टी	आवश्यकनिर्युक्तिहारिभद्रीटीका	पृ.७३
गाथा स.	गाथा सहस्री	पृ. १२४
जंबू. प्र.	जम्बूद्वीपप्रज्ञप्तिटीका	पृ. ३०८, टि. ३१५ टि.
जीवसमास	जीवसमास	पृ. ३९,१०७
	जैन आगमवनस्पति कोष	पृ. ४६
जीवाभि.पुण्य.	जीवाजीवाभिगमपुण्यसागरवृत्ति	पृ. ३१२ टि. ३१३ टि.
	प्र.ओमकारसूरिज्ञानमंदिर सूरत	पृ. ३१३ टि. ३२० टि.
	भगवद्गीता	पृ. ३१३
जीवाभिगमसं.	जीवाभिगमसंग्रहणी	पृ. ३८,४५,७६,८३
ज्यो.क.	ज्योतिष्करण्डक प्रकरण	पृ. २१२
तत्त्वार्थ	तत्त्वार्थसूत्र	पृ. १५, २६
तत्त्वार्थ.सिद्ध.	तत्त्वार्थसूत्रसिद्धसेनीया वृत्तिः	पृ. १८, ७३

त्रै.दी.	त्रैलोक्यदीपक	पृ. ७२, १५७, १५८, १५९, १६७, १९७, १९८
देवेन्द्रन. प्र.	देवेन्द्रनरकेन्द्रप्रकरण	पृ. १५७, १५८, १८२, ७१२, ७१७, ७१८, ७३२
ध.सं.	धर्मसंग्रहणी	पृ. ४३३
	त्रैलोक्यदीपक	पृ. ५३८, ६८७, ७००, ७१२, ७१३, ७१५, ७१६, ७१७, ७१८, ७२०, ७२८, ७२९, ७३२
	विशेषणवति	पृ. ५४४,६८७
	मण्डलप्रकरण	पृ. ५४४
नयचक्र	द्वादसारनयचक्र	पृ. १७१
नयचक्रवृत्ति	द्वादसारनयचक्रवृत्ति	पृ. १७१
	जल्पकल्पलता	पृ. १७१
	जैनस्याद्वादमुक्तावली	पृ. १७१
नाया.	नायाधम्मकहा	पृ. २१३
पंच सं.स्वो.	पञ्चसङ्ग्रह स्वोपज्ञवृत्ति	पृ. ८१
	सिद्धिविनिश्चय टीका	पृ. ८१
पंचव	पञ्चवस्तुकप्रकरण	६०६
पञ्चलिङ्गीप्र.	पञ्चलिङ्गीप्रकरण	पृ. २०
प्रज्ञा.टीका	प्रज्ञापनासूत्र मलयगिरिटीका	पृ. ६५,६७,१३८
प्रज्ञा.	प्रज्ञापनासूत्र	पृ. २३, २५, ३०, ४२, ४५, ४९, ५०, ५४, ५५, ५९, ६१, ६३, ६७, ६९, ७०, ७६, ७७, ८०, ८७, ८८, १३९, १८२, १९३, २७५, २७८, २८१, २८७, २८८, २९०,२९२, २९३, २९४, २९५, २९८, २९९

प्रज्ञा.तृ.पदसं.	प्रज्ञापनातृतीयपदसङ्ग्रहणी	पृ. १५२
प्रज्ञापनासूत्र हारि.टी.	प्रज्ञापनासूत्र हारिभद्रीटीका	पृ. ६, ११, १९
	तत्त्वार्थभाष्य	पृ. ८
प्रवचन सारो.	प्रवचनसारोद्धार	पृ. ९२, ९३, ११४, १५२, १५४, ५४६, ७१३, ७२९, ७३२, ७५०, ८०७
	षट्खण्डागम	पृ. १०७
	धवलटीका	पृ. १०७
प्रशमरति प्र.	प्रशमरतिप्रकरण	पृ. २८
बृ.सं.	बृहत्संग्रहणी	पृ. ७२,१५७,१९६
बृहत्क्षे.	बृहत्क्षेत्रसमास	पृ. २७२, ४५३, ५२५, ५२८, ५३५, ५४५, ५४६, ५४८, ५५२, ५७९, ५८१, ५८२, ५८७, ५८९, ५९०, ५९२, ५९३, ५९६, ५९९, ६१६, ६७६
बृहत्सं.	बृहत्संग्रहणी	पृ.२७८,८०७
भग. सू.	भगवतीसूत्र	पृ. १५७
भगवतीसूत्र टीका.	भगवतीसूत्र अभदेवसूरिटीका	पृ. २२, २७, ५९
मरणसमाहि	मरणसमाहिपयन्नो	पृ. ३
म.	मलयगिरि-शब्दानुशासनम्	पृ. ६०
महाप्रत्याख्यानप.	महाप्रत्याख्यानप्रकीर्णक	पृ. ३
राज प्र.	राजप्रश्नीयवृत्ति	पृ. ३१२, टि. ३२०, टि.६४६-७
राजप्र.	राजप्रश्नीयसूत्र	पृ. १७०, १७२, २१३
लघु सं.गा.	लघुसंग्रहणी गाथा	पृ. २५६, ३७५
लोकना.द्वा.	लोकनालिकाद्वात्रिंशिका	७००

	चैत्यवंदनमहाभाष्य	पृ. ७१४
	विशेषावश्यकभाष्य	पृ. ७१३
	प्रशमरतिप्रकरण	पृ. ८०३
	क्षुल्लकभवावलिः	पृ. ८०५
श्रावक प्र.	श्रावकप्रज्ञप्ति प्रकरण	पृ. ८३, १२४
	विशेषणवति	पृ. ८६
संबोध प्र.	सम्बोधप्रकरण	पृ. ११४,१२४
सि.हे.	सिद्धहेमचन्द्रशब्दानुशासन	पृ. ३४०, ३५३, ३७३, ४१४, ४३१, ७०७
स्तबक	स्तबक (जीवाजीवाभिगमे)	
	पञ्चसङ्ग्रह	पृ. १०९, १११, ११२, १३८
स्था./ठाणांग	स्थानाङ्गसूत्र	पृ. १८९, २१५, २३७, ३३३
स्थानाङ्ग अ.टी.	स्थानाङ्गसूत्र अभयदेवसूरिटीका	पृ. १९
हारि. टी.	हारिभद्री टीका (जीवाजीवाभिगम)	पृ. २, ५, १७७, १९१,३४८, ३५७, ३६८, ३६९
	विशेषावश्यकभाष्य	पृ. ३, २४, ५७
है.धा.	हैमधातुपाठ	पृ. २४८

પૂ.સા.શ્રી કલ્પલતાશ્રીજી મ.સા. (બા.મ.સા.)

મિતાક્ષરી જીવન પરિચય

સંસારીનામ	:	કમળાબેન
માતા	:	મંગુબેન
પિતા	:	ચીમનભાઈ
જન્મ	:	વિ.સં. ૧૯૮૧ કા.વ.૬ દસાડા (ગુજરાત)
લગ્ન પછી નામ	:	કંચનબેન
પતિ	:	જયંતિભાઈ (પૂ.મુનિરાજ જિનચંદ્ર વિજયજી)
પુત્ર	:	૧: જસવંત (હાલ પૂ.આ. યશોવિજયસૂરિ મ.સા.)
		૨ : મહેન્દ્ર (હાલ પૂ.આ.મુનિચંદ્રસૂરિ મ.સા.)
દીક્ષા	:	વિ.સં. ૨૦૨૩ મહા સુદ ૧૦ ઝીંઝુવાડા (ગુજરાત)
દીક્ષાદાતા	:	પૂ.આ.ભ.શ્રી ભદ્રસૂરિમ.સા., પૂ. આ. ભ. શ્રી ૐકારસૂરિ મ.સા.
દીક્ષા ગુરુણી	:	પૂ.સા.શ્રી સુવર્ણાશ્રીજી મ.સા.
શિષ્યા	:	૨ : સા. મોક્ષરસાશ્રીજી - સા.તત્ત્વરસાશ્રીજી (સંસારીપક્ષે ભત્રીજી)
શિષ્ય	:	પ્રશિષ્યા પરિવાર-૧૩
દીક્ષા પર્યાય	:	૫૦ વર્ષ, જીવન પર્યાય - ૯૨ વર્ષ
કાળધર્મ દિન	:	વિ.સં. ૨૦૭૩ ફા.સુ.૫ - ઝીંઝુવાડા
અગ્નિસંસ્કાર	:	વિ.સં. ૨૦૭૩ ફા.સુ. ૬ ઝીંઝુવાડા (સમાધિ તીર્થ)

પૂ.સાધ્વીજી કલ્પલતાશ્રીજી મ.સા.

પૂ. સાધ્વીશ્રી કલ્પલતાશ્રીજી મ.ના ૫૦ વર્ષના સંયમપર્યાય સાથે ૯૨ વર્ષના આરાધના સભર જીવનની અનુમોદનીય વાતો.

શ્રી શંખેશ્વર મહાતીર્થથી પચીસેક કી.મી. દૂર વીરમગામ તરફના માર્ગે આવેલા દસાડા ગામમાં વિ.સં. ૧૯૮૧ ના કા.વ.૬ના એમનો જન્મ થયો.

પિતા ચિમનભાઈ માતા મંગુબેનનું પ્રથમ સંતાન નામ કમળા.

એ પછી કમળાના અનુજ નાના બહેન ભાઈ અનુક્રમે કાંતાબેન, મંજુલાબેન, પદમસીભાઈ, પ્રભાબેન, રમીલાબેન

ભર્યા-ભાદર્યા કુટુંબમાં ભાઈબહેનો રમતા ઝગડતા મોટા થયા. કમળાબેનને જન્માંતરીય વૈરાગ્યના સંસ્કારો અને કુટુંબના ધાર્મિક સંસ્કારોના કારણે ધર્મ આરાધનાનો વિશેષ રંગ લાગ્યો.

શાંતિનાથ ભગવાનની ભક્તિ ખૂબ ઉમંગથી કમળાબહેન કરતા.

દસાડા ગામ શંખેશ્વરના વિહારમાં આવતું હોવાથી સાધુ-સાધ્વીજીનું આગમન વિશેષ રહેતું.

કમળાબહેન સાધુ-સાધ્વીજીને વહોરાવવા બોલાવી લાવતા. બીજા ઘરો પણ બતાવતા.

સાધ્વીજી મ.ના ઉપાશ્રયે જઈ સામાયિક લેતા, ધાર્મિક અભ્યાસ કરતાં, પ્રતિક્રમણ પણ કરતા.

સાધ્વીજી મ.નું ચાતુર્માસ હોય ત્યારે તો ધર્મઆરાધના વિશેષ થતી. નિશાળના સમય સિવાય કમળા ઉપાશ્રયે જ પહોંચી જતી. વળી કન્યાશાળા અને સાધ્વીજીનો ઉપાશ્રય અડીને જ આવેલા એટલે રીસેસના સમયે પણ સાધ્વીજીના ઉપાશ્રય પહોંચી જતાં. સ્તુતિ સ્તવન, સજઝાય ગોખતા.

આઠ-નવ વર્ષની વયે તો કમળાબેનના હૃદયમાં વૈરાગ્યનો દીપક પ્રગટી ગયો. સંયમ જીવન પામવાની આંતરિક ઈચ્છા ખરી પણ, પિતાજીનો કડક સ્વભાવ, એમની પાસે વાત કેવી રીતે રજુ કરવી

એ મૂંઝવણ હતી પણ, આખરે એક દિવસ હિમ્મત કરીને પિતાશ્રી પાસે રજૂઆત કરી દીધી : 'પિતાજી, મારે દીક્ષા લેવી છે.'

પણ, પિતાજીએ મોટો ઘાંટો પાડી દિકરીને ચૂપ કરી દીધી. 'બેસ, બેસ, દીક્ષા નથી લેવાની.'

૮૦-૯૦ વર્ષ પૂર્વેના એ કાળે આજના જેટલી સહેલાઈથી મા-બાપો દીક્ષા માટે રજા આપતા નહીં. અને નાની વયમાં દિકરા-દિકરીના લગ્ન પણ એ કાળે કરી દેવાતા.

હવે કમળાના સગપણની વાતો ચાલુ થઈ. પિતા ચીમનભાઈએ એમના લઘુ બંધુ મંગળદાસ જોડે ચર્ચા-વિચારણા કરી. બંને ભાઈની ભાવના ઝીંઝુવાડાના ધર્મનિષ્ઠ પરિવાર ઈશ્વરલાલ પોપટલાલ શાહના ચોથા નંબરના દિકરા જયંતિલાલ જોડે કમળાનું સગપણ કરવા માટે થઈ.

સારો દિવસ જોઈ મંગળદાસે ઝીંઝુવાડા સત્કામ કર્યું. ઈશ્વરભાઈને મળીને કહ્યું કે 'મારા મોટાભાઈની દિકરી કમળાનું સગપણ આપના દિકરા જયંતિલાલ સાથે કરવા હું આવ્યો છું.'

ઈશ્વરભાઈ કહે : 'જુઓ મંગળદાસ ભાઈ, મારું મન હવે સંસારથી ઉઠી ગયું છે. થોડા સમય બાદ ગુરૂ મહારાજ જ્યારે મુહૂર્ત કાઢે ત્યારે હું દીક્ષા લેવાનો છું.

વ્યવહારિક બધી જવાબદારી મારા નાના ભાઈ ખેતસીભાઈ સંભાળે છે.'

મંગળદાસ ભાઈને આશ્ચર્ય થયું કે પોતાના દિકરાના સગપણની પણ બાબતમાં રસ ન લેનારા આ કેવો વૈરાગી આત્મા છે.!

ખેતસીભાઈને મળ્યા. એમણે મંગળદાસભાઈની વાત માન્ય રાખી અને ટૂંક સમયમાં સગપણની વિધિ થઈ.

કમળાબેન પરણીને સાસરે આવ્યા એ પહેલાં એમના સસરા અને દિયરની દીક્ષા થઈ ગયેલી. મુનિ વિલાસ વિજયજી અને બાળમુનિ ૐકારવિજય તરીકે એ સંયમ સાધનામાં જોડાઈ ગયેલા. એ પછી તો આ પરિવારમાંથી દીક્ષાઓ થતી રહી. આજે આ આંકડો ૨૫ આસપાસ પહોંચ્યો છે એટલે દીક્ષાની ખાણ જેવી ઝીંઝુવાડા નગરી અને આ પરિવારનો થોડો પરિચય મેળવીએ.

દીક્ષાની ખાણ ઝીંઝુવાડા

શંખેશ્વરતીર્થની પશ્ચિમે પચીસ કીલોમીટર અંતરે કચ્છના નાના રણને અડીને આવેલું ઝીંઝુવાડા ઐતિહાસિક ગામ છે.

સિદ્ધરાજ જયસિંહના સમયમાં બંધાયેલો વિશાળ કિલ્લો, ઘાટની બાંધણી વાળું હેલર તળાવ અને સાત કોઠાવાળી વાવ ઝીંઝુવાડાને પ્રાચીન નગરીનો દરજ્જો આપે છે.

ચારે દિશાના ચાર વિશાળ દરવાજા આજે પણ એની કોરણી, કમાન ઉંચાઈ દ્વારા પુરાતત્ત્વના પ્રેમીને આકર્ષે છે.

કિલ્લાની અંદર પાછો નાનો કિલ્લો અને એના દરવાજા એ બધું જોતા પ્રાચીનકાળમાં સુરક્ષા માટે કેવી તકેદારી લેવાતી એ બાબત ઉજાગર કરે છે.

સિદ્ધરાજે પોતાના લશ્કરને પશ્ચિમ સરહદનું રક્ષણ કરવા અહીં રાખેલું. એ માટે એણે કિલ્લો બનાવેલો. ગઢની મોટી મોટી શિલા ઉપર વંચાતા 'મહં શ્રી ઉદ્દલ' અક્ષરો ઉદયનમંત્રી જોડે કંઈક સંબંધ હોવાનું સૂચવે છે. તો ઝીંઝુવાડા નામકરણમાં ઝુંઝા રબારી કારણભૂત હોવાનું પણ દંતકથાઓ જણાવે છે.

બાબરા ભૂતે આ કિલ્લો ઉભો કર્યાની પણ કિંવદંતી છે જ. પ્રાચીન પ્રબંધોમાં એવો ઉલ્લેખ મળે છે કે - 'સિદ્ધરાજ જયસિંહ ઝીંઝુવાડાથી સાંચોર જળમાર્ગે ગયો હતો. '

ઝીંઝુવાડાની આજુ-બાજુમાં દીવાદાંડી અને વહાણ લાંગરવાના કડા વગેરે અવશેષો અહીં ભૂતકાળમાં દરિયાકાંઠો હોવાના ઈશારા કરે છે.

આવી ઝીંઝુવાડા નગરીમાં શાંતિનાથ દાદાનું બે માળનું ભવ્ય જિનાલય ઉપાશ્રય, પૌષધશાળા, પાઠશાળા, ગોરજીનો ઉપાશ્રય વગેરે ધર્મસ્થાનકો અને દોઢસોથી વધુ શ્રાવકોના ઘરો ધર્મમય વાતાવરણ.

સકલાગમ રહસ્યવેદી પૂ.આ.ભ.શ્રી દાનસૂરીશ્વરજી મ.સા. વિલાસવિજયજી મ., પૂ.આ.ભ. ૐકારસૂરીશ્વરજી મ.,પૂ. આ.શ્રી યશોવિજયસૂરીશ્વરજી મ.સા., પૂ.આ.ભ. મુનિચન્દ્રસૂરિમ., પૂ.આ.ભ.શ્રી રાજપુણ્યસૂરિ મ., પૂ.આ.ભ.શ્રી ભાગ્યેશવિજયસૂરિ.મ.આદિની આ માતૃભૂમિ. આગમપ્રજ્ઞ મુનિરાજશ્રી જંબૂવિજય મ.નો જન્મ પણ ઝીંઝુવાડામાં મોસાળમાં ઈશ્વરભાઈના ઘરે થયેલો.

એક વાર પૂ.આ.ભ.શ્રી ભદ્રસૂરીશ્વરજી મ.સા. એમના શિષ્યો મુનિ લાભવિજયજી, મુનિ સંયમવિજયજી આદિ સાથે ઝીંઝુવાડા પધાર્યા.

ઈશ્વરભાઈ પૂ.આ.ભ. પાસેથી ધર્મની વૈરાગ્યની વાતો સમજતા. વળી મુનિ લાભવિજય અને મુનિ સંયમવિજય ઈશ્વરભાઈના સસરા અને સાળા થતા હતા. એ બધાનો સત્સંગ ઈશ્વરભાઈમાં વૈરાગ્ય જગાડી ગયો.

અરિહંત પરમાત્માની ભક્તિ કરો પછી અન્ય દેવ-દેવીની ભક્તિ કરવાની જરૂર નથી. એવું સમજ્યા પછી ઘરે બિરાજિત કરેલા દેવ-દેવલાને વાવમાં પધરાવી દીધા.

વર્ષોથી ચાલી આવતી ગોત્રજની વિધિ કરવાનું પણ બંધ કરાવ્યું.ઈશ્વરભાઈના પત્ની કંકુબેને પતિ અને પુત્રને દીક્ષા માટે સંમતિ આપી જેના પિતા અને ભાઈએ દીક્ષા લીધી હોય એવા સંસ્કારી કંકુબેને દિકરાઓને સંભાળવાની જવાબદારી લઈ લીધી.

ઝીંઝુવાડામાં વિ.સં. ૧૯૯૦ મહા સુદ૧૦ના ઈશ્વરભાઈ અને એમના પાંચમા નંબરના નાના પુત્ર ચીનુની દીક્ષા થઈ. મુનિ વિલાસવિજય અને મુનિ ૐકારવિજય બન્યા.

પચાસ વર્ષની વયે દીક્ષા લેનાર મુનિ વિલાસ વિજયજી એ છ વર્ષના સંયમ પર્યાયમાં ૧૬, ૩૧, ૪૫, ૬૦, ૭૦, ઉપવાસ જેવી ઉગ્ર તપસ્યા કરી.

વિ.સં. ૧૯૯૬ આસો સુ-૭ના સમી મુકામે કાળધર્મ પામ્યા.

જયંતીલાલ ઈશ્વરલાલ શાહ જોડે લગ્નગ્રંથીથી બંધાઈ કમળાબેન ઝીંઝુવાડા શ્વસુરગૃહે આવ્યા.

જોગાનુજોગ એમના જેઠાણી (ત્રીજાનંબરના ભાઈ શાંતિલાલના પત્ની)નું નામ કમળા હતું. એટલે કમળાબેનનું નામ 'કંચનબેન' રાખવામાં આવ્યું.

આ વર્ષોમાં ચારેય ભાઈઓ ભાઈલાલ, કાંતિલાલ, શાંતિલાલ, જયંતિલાલ ના ઘરે પુત્ર જન્મ થતો પણ બધા નાની ઉંમરમાં જ મૃત્યુ પામતાં.

માતા કંકુબેનને વહેમ પડ્યો કે ગોત્રજની વિધિ બંધ કરી એટલે કુળદેવી કોપ્યા છે માટે છોકરાઓને ઘરે છોકરા થાય છે અને મરી જાય છે.

એવામાં વિ.સં. ૨૦૦૨ આસો વદ ૧૩ના કંચનબેને દિકરાને જન્મ આપ્યો. નામ જશવંત પડ્યું. એ વખતે કંકુમાએ મનોમન સંકલ્પ કર્યો કે - જો આ જસવંત મોટો થશે તો એને નિશાળે બેસાડતા પૂર્વે થરાદમાં કુળદેવી નાણદેવીના દર્શન કરાવીને પછી જ નિશાળે બેસાડીશ. અને જસવંત પાંચ વર્ષનો થયો. એ વર્ષે (૨૦૦૬ વિ.સં.) પૂ.આ.ભ. શ્રીભદ્રસૂરીશ્વરજીમ.સા.નું ચોમાસું ઝીંઝુવાડા હતું. જશવંતને પાંચમું વર્ષ બેસતું હતું. જયંતીભાઈએ કંકુબાને વાત કરી.

બા, જસુને કા.સુ.પના નિશાળે બેસાડીએ, મુનિ ૐકારવિ.મ.એ જ્ઞાનપાંચમ શ્રેષ્ઠ કહી છે.

કંકુમા કહે : જુઓ, પહેલાં જશુને થરાદ નાણદેવી પાસે લઈ જાવ. ત્યાં વિધિ કરીને આવો પછી જ નિશાળે બેસાડવાનો છે. મેં મનમાં સંકલ્પ કરેલો છે.

જુઓ, બા, તમારી સમાધિ માટે તેમ કરીશું. બાકી, આપણે આ બધુ બંધ કર્યું છે. બાપા ના પાડીને ગયા છે.

કંકુબાઃ કહે, ભલે હવે આવું નહીં ધારું, આ વખતે જઈ આવો.

થરાદ જઈ આવ્યા. જસવંતને નિશાળે બેસાડ્યો.

●●●

નાનકડો જસવંત મુનિ યશોવિજય કેવી રીતે બન્યો તે આપણે એમના જ (ભક્તિયોગાચાર્ય આ.ભ.યશોવિજયસૂરી મ.સા.ના શબ્દોમાં જ જોઈએ.

'માં...

જેણે જન્મ આપ્યો, જેણે સંસ્કારો આપ્યા, જેણે પ્રભુમાર્ગમાં મને આવવા માટે પ્રોત્સાહિત કર્યો.

એક ઘટના યાદ આવે.

સાતેક વરસનો હું હોઈશ. ટાઈફોઈડ થયેલો ઘણી બધી દવાઓ થઈ, પણ ૬-૭ અઠવાડીયા સુધી રોગ ટસ નો મસ થવા તૈયાર નહિ. શરીર સાવ દુર્બળ બની ગયું.

માની આંખો આંસૂથી સભર...મારો દીકરો રોગને બિછાનેથી પાછો ફરશે કે શું થશે ?

શ્રદ્ધામતી હતી મા. એણે પ્રભુને પ્રાર્થના કરી : 'પ્રભુ ! દીકરો જો જીવી જશે તો, તને, તારા શાસનને સમર્પિત કરી દઈશ.'

માની એ પ્રાર્થના,

અને તબિયત મારી સુધરવા લાગી. હું સ્વસ્થ બન્યો પછી માએ કહ્યું કે 'બેટા ! તું રોગ મુક્ત બને તો તને પ્રભુશાસનનો સંયમી બનાવવો એવું મેં પ્રભુને કહેલું ને પછી જ તારું સ્વાસ્થ્ય તને મળ્યું'.

મેં કહ્યું : 'માં ! તું કહે તે કરવા હું તૈયાર છું.'

માની આ શ્રદ્ધા મને પ્રભુના માર્ગ પર લઈ આવી.

સાધના અને ભક્તિના મામલે મારી પાસે જે કંઈ છે એની પાછળ છે માની આ શ્રદ્ધા ...

એ માને શું સમર્પી શકાય ? બધું જ તો એ નું જ છે.

●●●

સ્મૃતિનો પાંખાળો ઘોડો મને અતીતમાં લઈ જાય છે. પાટણમા કલિકાલ સર્વજ્ઞ આચાર્ય ભગવંત હેમચંદ્રાચાર્યજી બિરાજમાન. સાધ્વી માતા પાહિનીનું સ્વાસ્થ્ય કથળ્યું છે એ સમાચાર મળતાં જ આચાર્ય શ્રી શિષ્યો જોડે શ્રાવિકા ઉપાશ્રયે પધાર્યા, શ્રાવક-શ્રાવિકા વર્ગ પણ આવી ગયો.

બધાને લાગ્યું કે હવે માને ધર્મ રૂપી ઔષધ જ આપી શકાય. કો કે કહ્યું મા! તમારા સ્વાસ્થ્ય લાભ માટે હું પાંચસો સામાયિક કરીશ. કો કે સ્વાધ્યાયની વાત મા સમક્ષ મૂકી.

અને એ વખતે માની આંખો પોતાના દીકરા પર ગઈ. એ આંખો કહેતી હતી કે 'મારો દીકરો મને શું આપે છે ?'

આચાર્ય ભગવંતશ્રી માના મનોભાવોને પારખી ગયા, તેમની આંખો ભીની બની. માને શું આપી શકાય ?

જેણે જન્મ આપ્યો, જેણે સંસ્કારો આપ્યા, જેણે પ્રભુમાર્ગમાં જવા માટે પોતાને પ્રોત્સાહિત કર્યો.

એ માને શું આપી શકાય ? બધું જ માનું જ છે તો ! પણ ના, મા આજે કંઈક ઈચ્છે છે મારી પાસેથી શું આપું ?

અને આપું તો એવું આપું જે મારી માની ગરિમા માટે યોગ્ય કહેવાય...

અને કલિકાલ સર્વજ્ઞશ્રી એ કહ્યું મા ! તારા સ્વાસ્થ્ય લાભ માટે હું સાડા ત્રણ કરોડ શ્લોક પ્રમાણ સાહિત્યનું સર્જન કરીશ.

માની આંખોમાં પરિતોષ દેખાયો.

• • •

માની આંખોનો પરિતોષ. માનું વય ૯૧ વર્ષ નું સુરત, કૈલાસનગરમાં તેઓશ્રી ચાતુર્માસાર્થ

રોજ સવારે એમની આશિષ લેવા માટે જાઉં ત્યારે ચહેરો હસી પડે. આંખોમાં પરિતોષ દેખાય. ભાઈ મહારાજ મુનિચસૂરિ મહારાજ આશિષ લેવા આવે ત્યારે પણ એમની આંખોમાં એ જ પરિતોષ.

અમારા બેઉ માટે એ પરિતોષ એ જ હતું રક્ષાચક્ર.

આશિષ આપતાં કહે : 'પ્રભુ શાસનની સેવા કરજો !'

આ ત્રણ શબ્દો અમારે માટે સાડા ત્રણ કરોડ રૂંવાડાને ઉંચકનારા બની જતા.

માને આપણે તીર્થ કહીએ છીએ. પૂજ્ય કલ્પલતાશ્રીજી મહારાજ અમારા માટે માતૃતીર્થ સમાન હતા.

એમનાં ચરણોમાં બેસતાં કેટલો તો પારાવાર આનંદ મળતો.

માની મમતાનો, માના પ્યારની તુલના આપણે કશાની સાથે નથી કરી શકતા. એ અજોડ છે લા-જવાબ.

માનો, દીક્ષા પછીનો, પરિવાર બહુ મોટો હતો. અગણિત ભક્તોને એમણે પુત્રવત્ પ્યાર આપ્યો. જાણે કે પ્યારનો ઘૂઘવતો સાગર હતી મા....

ઘણા ભક્તો, માને તકલીફ ન પડે તે રીતે, માની પાસે બેસી રહેતા. મા એમની સામે જોઈ મરક મરક હસતા. ઘણા લોકોએ મને કહ્યું કે માની એ ભાવપૂર્ણ આંખોમાંથી નીતરતો પ્રેમ અમારા થાકને દૂર કરી દેતો. માની જોડે પાંચ મિનિટ બેસતા અને નિર્ભાર બની જતા અમે.

મા !

આટલો બધો પ્યાર તું ક્યાંથી લઈ આવી ?

પ્રભુ પાસેથી જ ને ?

પ્રભુ પર ઓળઘોળ હતી મા. સવારથી સાંજ સુધી એની ભક્તિ ચાલ્યા કરતી માળા તો એના હાથમાં જ હોય.

ભક્તિ... સંપૂર્ણ શરણાગતિ. એની એ શરણાગતિએ જ તો મને પ્રભુના માર્ગ પર મુકેલો ને !

મારી દીક્ષાના થોડા દિવસો પૂર્વેની એક ઘટના યાદ આવે.

માને મેં રડતી જોયેલી. માને હું રડતી કેમ જોઈ શકું ? મેં કહ્યું : મા ! તારી ઈચ્છાને ખાતર હું જઈ રહ્યો છું પ્રભુના માર્ગ પર પણ તારા આંખનાં આંસુ સાથે તું મને વિદાય આપીશ ?

માંએ કહ્યું : મોહ તારા પર નથી એમ તો હું કઈ રીતે કહું ? પણ મારી આંખમાં આંસુ માત્ર મોહજન્ય નથી, મારો દીકરો પ્રભુના માર્ગ પર જઈ રહ્યો છે. એ વાત મને ભીની બનાવે છે. દીકરા, બેટા આ હર્ષનાં આંસુ છે તારો માર્ગ કલ્યાણમય હો !

માની એ આશિષ સંયમ માર્ગમાં મને ઉચકતી જ રહી.

માની આશિષનો આ ભાવ એની દીક્ષા પછી બહુ જ વિસ્તર્યો.

શિષ્યાઓને તો દીકરીઓની જેમ એણે ચાહી;

પણ એનો પ્રેમ તો અસીમ હતો ને !

જે પણ સાધ્વીજીઓ માની પાસે થોડો સમય પણ રહ્યા; અરે ! માત્ર આશીર્વાદ લેવા આવ્યા એ બધાં માના આ પ્રેમમાં ભીંજાયા... ઘણાં બધાં સાધ્વીજીઓએ મને કહેલું 'બા મહારાજમાં અમને અમારી મા દેખાતી'...

વત્સલતાનો આ સમંદર... વય ઢળતી ગઈ, સમંદરમાં ભરતી આવતી ગઈ....

માએ પોતાના આ અસીમ વાત્સલ્યથી કેટલાય લોકોને ધર્માભિમુખ, પ્રભુ સન્મુખ કર્યા.

એના નિર્મળ હાસ્યમાં એ તાકાત હતી કે એણે ક્યારેય કોઈને ઉપદેશ નથી આપવો પડ્યો કે તું આમ કરજે કે તેમ કરજે.

માના વાત્સલ્યમાં ભીંજાયેલ વ્યક્તિત્વ આપોઆપ ધર્માભિમુખ બની જતું.... માની ધર્મ પ્રત્યેની એ શ્રદ્ધાનો આ બહારી વૈભવ હતો.

ભીતરી શ્રદ્ધા માની અડગ હતી.. અને એને કારણે તપશ્ચર્યા આદિ પર પણ એનો ઝોક રહેતો.

છેલ્લા વર્ષોમાં સવારે દૂધ-ચા સાથે દવા લેવી અનિવાર્ય થઈ પડી, ત્યારે શિષ્યાઓએ તકેદારી રાખવી પડી કે આઠમ ચૌદશનો બા મહારાજ ને ખ્યાલ ન આવી જાય. ખ્યાલ આવી જાય તો તરત કહી દે હું એકાસણું જ કરીશ...

અભ્યન્તર સાધનાની સાથે બાહ્ય સાધનાનું આ સાયુજ્ય વ્યવહાર અને નિશ્ચય સાધનાનું આ સુભગ મિલન માની જાગૃતિ હતી.

આ જાગૃતિ અંતિમ ક્ષણ સુધી અકબંધ રહી. છેલ્લે દિવસે નવસ્મરણ શિષ્યા એમને સંભળાવતી હતી. એક ગાથા આમની તેમ થઈ ગઈ. માને તરત ખ્યાલ આવી ગયો માથું ધુણાવ્યું તેણે ના આ નહિ પેલી ગાથા અહીં આવે.

મા ! આ જાગૃતિ ક્યાંથી તું લઈ આવી ?

જો કે તારી સાધના જ ક્ષણ ક્ષણની જાગૃતિની હતી.... તો આ ક્ષણ જાગૃતિ વિહોણી કેમ હોઈ શકે ?

વત્સલતાનો આ સમંદર જાગૃતિની આ સુરેખ પળો... આશિષ આપવા ઉચકાતો આ હાથ....

એ નિર્મળ હાસ્ય...

આ બધું શું આજે નથી ? મારી દ્રષ્ટિએ તો આ બધી જ કાળજયી ઘટનાઓ છે

મારી સ્મૃતિમાં એ જ માને હું સતત અનુભવું છું.

મા દીકરાઓને છોડીને ક્યાં જાય ?

મા એ બધાના હૃદયમાં છે. હૃદયસ્થ માનાં ચરણોમાં વન્દના.

યક્ષ પ્રશ્ન તો હજુ ઉભો જ છે. માના ઋણમાંથી કઈ રીતે મુક્ત થવું? પોતાને એક ગાથા સૂત્ર સંભળાવી સદ્‌ગુરૂના ચરણોમાં મૂકી પ્રભુના પથ પર મૂકનાર સાધ્વી મહત્તરા યાકિનીજીના ઋણમાંથી મુક્ત થવું. પૂજ્ય હરીભદ્રાચાર્ય મહારાજને ય અશક્ય પ્રાય લાગેલું. પોતાના દરેક ગ્રંથમાં તેઓ પોતાને યાકિની મહત્તરાના પુત્ર તરીકે ઓળખાવે છે.

धर्मतो याकिनीमहत्तरा सुनो : आचार्य हरिभद्रस्येयं कृतिः

આવા પુરુષને માતૃઋણ ફેડવું અશક્ય પ્રાયઃ લાગતુ હોય તો મારી શી હેસિયત !

પણ એમ લાગે કે માને ગમતાં કાર્યો કર્યે જવા એ જ એક માર્ગ માતૃઋણમાંથી આંશિક મુક્તિનો હોઈ શકે.

મા ! તારી કૃપાથી એ માર્ગ પર ચાલી શકું એવું બળ આપજે...

●●●

જસવંતની દીક્ષા વિ.સં. ૨૦૧૩ મહાસુદ ૧૦ના થઈ ત્યારે નાના દિકરા મહેન્દ્રની ઉમર પાંચ વર્ષની હતી.

જયંતીભાઈ અને કંચનબેનની દીક્ષા લેવાની ભાવના હતી જ અને બરોબર દસ વર્ષ પછી એ મંગલ અવસર આવ્યો.

વિ.સં. ૨૦૨૩ મહાસુદ ૧૦ના જયંતીભાઈ, મહેન્દ્ર, કંચનબેન અને મૂદુલા-તક્ષિલા (ભત્રીજીઓ) પાંચની દીક્ષા થઈ.

અનુક્રમે મુનિ જિનચન્દ્ર વિ., મુનિ મુનિચન્દ્રવિ., સા.કલ્પલતાશ્રીજી, સા. મોક્ષરસાશ્રીજી, સા. તત્ત્વરસાશ્રીજી નામકરણ થયું.

સા. કલ્પલતાશ્રીજી પૂજ્ય સાધ્વીશ્રી સુવર્ણાશ્રીજીના શિષ્યા બન્યા.

મુનિ જિનચન્દ્રવિજય મ. પણ આરાધના - સાધનામય જીવન જીવી ૯૪ વર્ષની વયે વર્ધમાન તપની ૬૭મી ઓળી કરી ને વિ.સં. આસો વદ ૩૦(દિપાલિક પર્વ)ના સૂરત મુકામે સમાધિપૂર્વક કાળધર્મ પામ્યા.

પૂ. સા.શ્રી કલ્પલતાશ્રીજી મ. વાત્સલ્યના સાગર હતા. દરેક સાધ્વીજીના યોગક્ષેમની ચિંતા કરતા.

પાણી વાપરવું હોય તો પણ જુએ. સ્વાધ્યાય અધ્યયન કરનારને વિક્ષેપ ન પડે માટે રાહ જુએ, કોઈ ઉભું થાય ત્યારે કહે એ પણ ઈચ્છાકાર સામાચારી પૂર્વક 'મને પાણી આપશો ?' એ ભાષામાં.

ઉદારતા એવી કે એમની પાસે કોઈપણ ચીજ માંગો તરત આપી દે. હા, એમની નવકારવાળી કોઈ માંગે તો વિચારમાં પડી જાય. પણ, ના તો ન જ પાડી શકે. માંગે એને આપી દે પણ, પછી કહે: 'મારી પાસે આ એક જ નવકારવાળી છે. તમે લઈ જશો તો હું કેવી રીતે જાપ કરીશ ?'

સારણા, વારણા પણ મધુર શબ્દોમાં કરતા, 'નીચે જોઈને ચાલો, પોતું કાળજી પૂર્વક કરો. કીડી વગેરે મરે નહીં તે ખ્યાલ રાખો. કાપકાઢતાં વાતો ન કરાય, માખી મરે નહીં એનો ખ્યાલ રાખો મુહપત્તિનો ઉપયોગ રાખો.' વગેરે

ડો. સી.કે. વોરા ઝીંઝુવાડાના. એટલે ક્યારેક શાતા પૂછવા પણ આવે. પણ, ડોક્ટર ખુરશીમાં બેસે એ પહેલાં બા મહારાજ કહી દે - 'મને કંઈ તકલીફ નથી. એકદમ સારુ છે.'

ડોક્ટર કંઈ તપાસ માટે સંઘટ્ટો ન કરે એ માટે પાણી પહેલાં પાળ બાંધી દેતા.

વિ.સં.૨૦૭૩ છેલ્લુ ચોમાસું સૂરત થયું. ચોમાસા પછી પૂ. આ.ભ.યશોવિ.સૂરિમ.ની નિશ્રામાં ૯૯ યાત્રા પ્રસંગે પાલીતાણા આવ્યા, યાત્રા કરી.

પાલીતાણાથી ઝીંઝુવાડા આવ્યા. મહા સુદ-૧૦ના શ્રી શાંતિનાથ જિનાલયની સાલગિરિનો પ્રસંગ હતો એટલે સ્થિરતા કરી.

એ દિવસોમાં વર્ષોથી વપરાતા દાંતના ચોકઠા પેઢા પોચા પડી જવાના કારણે ફીટ થતા ન હતા.

ચાવવા પ્રયત્ન કરે ને ચોકઠું બહાર નિકળી જાય, વાપરવાનું ફાવે નહી. એ દિવસોમાં તુષારભાઈ અમદાવાદથી બા મ.ના દર્શન કરવા આવેલા, સુખશાતા પુછી.

બા મહારાજથી સહજ કહેવાઈ ગયું કે બધું સારું છે પણ, ચોકઠું મોંમાથી નિકળી જાય છે.

તુષારભાઈએ એમના મિત્ર ડેંટીસ્ટને જણાવ્યું ૯૨ વર્ષના સાધ્વીજી મ.ને નવું ચોકઠું બની શકે? ડોક્ટરે હા પાડી.

અમદાવાદથી ડેંટીસ્ટ આવ્યા મોઢાનું માપ લેવા.

બા મહારાજ ચિંતામાં પડ્યા. સંઘટ્ટો થશે. એમણે કહ્યું ચોકઠુ નથી બનાવવું. તમે મને અડશો નહી

ડૉ. પોતાનું ક્લીનીક બંધ કરીને ઘણી બધી સામગ્રીઓ લઈને આવેલા. એટલે બહુ સમજાવટ પછી માપ લેવા દીધું.

મહા સુદ ૧૦ બા મહારાજ સા. મોક્ષરસાશ્રી, સા. તત્ત્વરસાશ્રી આદિ ની ૫૧મી દીક્ષા તિથિ સંયમજીવનની અર્ધી સદી પૂર્ણ થયાનો આનંદ અને દાદા શાંતિનાથ ભગવાનની સાલગિરિનો પ્રસંગ અને નવા દાંત (ચોકઠું) બનીને આવ્યું તે પણ માપસરનું બનેલું આમ આનંદ આનંદ થઈ ગયો.

શાંતિનાથ દાદાના શિખરે ધ્વજારોપણ વિધિ ચાલતી હતી ત્યારે અમીટ નજરે ધ્વજારોહણ જોઈ રહ્યા હતા. ચહેરા ઉપર અવર્ણનીય આનંદ વરતાતો હતો. ૐ પુણ્યાહં પુણ્યાહં ઉચ્ચ સ્વરે બોલતા હતા આજે શ્વાસ પણ ચડ્યો નહી અને ધ્વજાને લહેરાતી જોતા રહ્યા, હરખાતા રહ્યા.

વૈજ્ઞાનિકો જેને બાયોલોજીકલ વોચ કહે છે એવી ઘડીયાળ બા મહારાજના મનમાં ગોઠવાઈ ગયેલી.

જ્યારે એ કહે ઉઠો, પ્રતિક્રમણનો સમય થયો ત્યારે ઘડીયાળમાં જુઓ તો એ બરાબર જ હોય. એ રીતે પોરસી ભણાવવાનો પડિલેહણનો સમય થાય કે એમને અંતઃસ્ફુરણા થઈ જાય. ક્રિયાઓ સમયસર કરવાનો અને ઉચ્ચાર-શુદ્ધિપૂર્વક કરવાનો એમનો હંમેશા આગ્રહ રહેતો.

વાંચના કરવાની ટેવ. રોજ કશુંક વાંચ્યા કરે. પાછળની વયમાં આંખનું તેજ નબળું પડ્યું ત્યારે મોટા અક્ષરવાળી અને ચિત્રોવાળી વાર્તાની પુસ્તિકાઓ વાંચતા. પાછળના વર્ષોમાં સ્મરણશક્તિ ઘટી ગયેલી એનું એ પુસ્તક પણ ફરી વાંચતા. યાદ ન રહે તો પણ વાંચતા.

બા મહારાજ નવસ્મરણનો નિત્ય સ્વાધ્યાય કરતા. પાછળની વયે નાના સાધ્વીજી સ્મરણ બોલે ત્યારે પણ પોતે મનમાં ઉચ્ચાર કરતા જાય. જો નાની સરખી પણ ભૂલ થાય તો તરત સુધારો કરાવે.

નવસ્મરણ પ્રત્યેની અનહદ પ્રીતિ જીવનની અંતિમ પળ સુધી અકબંધ રહી.

ફા.સુ.૩થી એમનું સ્વાસ્થ્ય વિશેષ કથળ્યું હોય એવું લાગ્યું. શ્વાસ વધારે ચડતો હતો.

રાત્રે ૨-૩૦ કલાકે મોટેથી નવસ્મરણ બોલવાનું શરુ કર્યું. બધા જાગી ગયા અત્યારે રાત છે. સુઈ જાવ એમ કહ્યું પણ, બાહ્ય દુનિયા જોડે એમને સંબંધ જ ન હોય એમ કશું સાંભળ્યું નહી . નવસ્મરણ બોલવાનું ચાલું રહ્યું.

ફા.સુ.૪ના દિવસ પણ અંતર્મુખતામાં જ વીત્યો. દસાડાવાળા સંસારી ભાભી મંજુલાબેન વંદનાર્થે આવ્યા પણ ખાસ પ્રતિસાદ ન આપ્યો. અંદર નવસ્મરણનું જ રટણ.

મોઢામાં કોળીયો મુક્યો હોય પણ ચાવવાનું પણ કાનમાં મોટેથી કહે ત્યારે કરે.

ફા.સુ.૫ હવે નવસ્મરણના રટણ સિવાય કોઈ ક્રિયામાં ઉપયોગ ન રહ્યો.

ચતુર્વિધસંઘ નવસ્મરણ અને એમના પ્રિય સ્તવનો (જગજીવન જગવાલહો વગેરે) સંભળાવતો રહ્યો.

શ્રાવકોએ ડૉક્ટરને પુછ્યું ડૉક્ટરે હોસ્પીટલમાં એડમીટ કરવાની સલાહ આપી. એમ્બ્યુલન્સ બોલાવવામાં આવી રાત્રે ૧૧-૩૦ કલાકે એમ્બ્યુલન્સ આવી. એમ્બ્યુલન્સમાંથી સ્ટ્રેચર લઈ ઉપાશ્રયમાં કાર્યકર્તાઓ દાખલ થયા. અહી બા મહારાજનો શ્વાસ ધીમો પડતો હતો. બરાબર ૧૧-૩૩મીનીટે હંસલો પિંજર છોડી ઉડીગયો

(એમ્બ્યુલન્સ પાછી ગઈ.)

અડધી સદીની સંયમયાત્રા અને ૯૨ વર્ષની જીવનયાત્રાનો અંત સમાધિમય મૃત્યુ દ્વારા આવ્યો 'સમાહિ મરણં'ની નિત્ય કરેલી પ્રાર્થના સફળ થઈ.

જીવન ધન્ય બનાવી ગયા.

વંદન હો ... પૂ.સા.શ્રી કલ્પલતાશ્રીજી મ.સા.ને

सम्पादकीयम्

विजयमुनिचन्द्रसूरिः

श्रीजीवाजीवाभिगमाभिधम् इदम् उपाङ्गसूत्रम् आचार्य श्रीमलयगिरिसूरिटीकासमलङ्कृतं नैकहस्तलिखितग्रन्थाधारेण सम्पादितं संशोधितं च प्राकाश्यमानीयते - इति आनन्दविषयोऽयम् ।

स्थानाङ्गस्य तृतीयाऽङ्गस्य इदम् उपाङ्गसूत्रं स्थविररचितमिति श्रद्धीयते ।

एतत्सूत्रोपरि निर्युक्ति-भाष्य रचना जाता-इति क्वापि निर्देशः न प्राप्यते, परं जेसलमेरभाण्डागार सूचिपत्रे चूर्णिः निर्देशस्तु प्राप्यते । अद्यावधि सा चूर्णिः अनुपलब्धा वर्तते ।

ऐदम्प्राथम्येन अस्य अतिसंक्षिप्ता टीका आ. हरिभद्रसूरिभिः रचिता । अद्यावधि सा अप्रकाशिता एव । आ. मलयगिरिसूरिभिः अस्यां टीकायां मूलटीकाररूपेण तदवतरणानि बहुत्र प्रदत्तानि सन्ति।

आ. श्रीमलयगिरिसूरयः आगमानां महाव्याख्यातृरूपेण जैनसङ्घे प्रसिद्धाः सन्ति । आसां टीकानाम् अतीव सुगमत्वात् ताः मातृदुग्धेन उपमिताः तज्ज्ञैः ।

आ. मलयगिरिसूरीणां सविस्तरं परिचयः अस्माभिः राजप्रश्नीयसूत्र- प्रस्तावनायां प्रदत्तोऽस्ति, इत्यतः इह न आम्रेड्यते । जिज्ञासुभिः तत्र विलोकनीयम् ।

अस्य सटीकग्रन्थस्य सम्पादने संशोधने च अस्माभिः विविधाः ताडपत्रीयाः कागदीयाः च हस्तिलिखितग्रन्थाः उपयुक्ताः । तेषां संक्षेपेण इह परिचयः कार्यते ।

आसु प्रतिकृतिषु जेसलमेरीया तालपत्रीया प्रतिकृतिः अन्यप्रतिकृतिभ्यः विलक्षणा अस्ति। तत्र अस्माभिः विशिष्टाः शुद्धाश्च पाठाः लब्धाः। तद्गताः शतशः पाठाः मलयगिरिटीकया सह संवदन्ति। तदाधारेण बहुत्र अस्माभिः शुद्धि-वृद्ध्यादिभिः पाठाः परिष्कृताः। क्वापि संक्षेपोऽपि विहितः एतदाधारेण ।

अस्मिन् सम्पादने उपयुक्तानां हस्तलिखित-मुद्रितग्रन्थानां परिचयः

(१) 'L' इति 'V' इति वा - इदं संज्ञाद्वयं 'जैन विश्वभारती -लाडनू' द्वारा प्रकाशितस्य 'उवंगसुत्ताणि' ४ (खण्ड-१) इत्यस्य अस्ति । कखगटताड संज्ञितानामादर्शानां पाठभेदाः अस्याधारेण दत्ताः सन्ति ।

- अथ हस्तलिखितग्रन्थानां परिचयः-

"क" इति संज्ञा श्रीचंद्र गधैया पुस्तकालय (सरदारनगरस्थ)इति प्रतिकृतेः अस्ति । मूलमात्रम् अस्यां प्रतिकृतौ । पत्रसंख्या - ९४ । दीर्घत्व - पृथुत्वे १३.२५" X ५" । ग्रन्थाग्रं - ५२०० । लेखन संवत् १५७५ ।

"ख" इति संज्ञाऽपि पूर्वोक्तश्रीचंद्र गधैया पुस्तकालय (सरदारनगरस्थ) ग्रन्थस्य अस्ति । पत्रसंख्या -८० । दीर्घत्व - पृथुत्वे १२" X ४.२५"। लेखन समयः - षोडशं शतकम् ।

"ग" इति संज्ञाऽपि पूर्वोक्तगधैया पुस्तकालयस्थितस्य सचित्रग्रन्थस्य अस्ति । पत्रसंख्या- ९०। लेखन समयः - षोडशं शतकम् ।

"ता" इति संकेतः जेसलमेरस्थितजिनभद्रसूरिज्ञानभंडारगतताल्पत्रीयग्रन्थस्य २५ क्रमाङ्कस्थितस्य अस्ति । पत्र-संख्या -१तः १०२ । दीर्घत्व - पृथुत्वे ३१.५" X २.२५"। लेखन - संवत् - १४८९ ।

"ड" इति संकेतः लाडनूस्थित संघीयभंडारगतग्रन्थस्य अस्ति । अस्मिन् स्तबकाऽन्वितं मूलमात्रमस्ति। लेखन - संवत् -१८०० ।

(२) 's' इति संज्ञा पाटण- हेमचन्द्राचार्यज्ञानमन्दिर स्थित-संघवी-पाडा-सत्कज्ञानभंडारस्थ तालपत्रीयग्रन्थस्य अस्ति । अस्मिन् १ तः १२३ पर्यन्तेषु पत्रेषु जीवाजीवाभिगममूलसूत्रम् अस्ति । १२४ तः ३७१ पर्यन्तेषु च पत्रेषु आ. मलयगिरिसूरि विरचिता टीका अस्ति । दीर्घत्व - पृथुत्वे ३३.५ X २ । लेखन संवत - १४४४ मूलसूत्रस्य ग्रन्थाग्रं ४०००, टीकायाश्च १४००० दर्शितं तत्र ।

(२) जे (J वा) इति ग्रन्थः 'ता' इति - ग्रन्थात् अभिन्नः प्रतीयते । 'जे' इति संज्ञावतः जेसलमेरग्रन्थस्य सान्द्रमुद्रिका (C.D.) अस्माभिः प्राप्ता अस्ति । तदुपयोगोऽपि अस्माभिः विहितः यथास्थानम् ।

आगमप्रभाकर मुनि पुण्यविजयेन अस्य ग्रन्थस्य यानि पाठान्तराणि अन्विष्टानि तेषां सूचिः (२२७ तः ५७९ पर्यन्ति पत्राणि । सूत्र - ३, ३३५ तः संपूर्ण सूत्रम्) 'प्राकृत टेक्ष्ट सोसायटी'

सकाशात् अस्माभिः लब्धा ।

इदं सर्वं यैः यैः प्रदत्तं, तेषां सर्वेषां वयम् ऋणं वहामः तेभ्यः सर्वेभ्यः साधुवादान् च वितरामः ।

देव-गुरु-वन्दना

श्री शंङ्खेश्वरपार्श्वनाथप्रभु चरणकमलद्वन्द्वं वन्दे ।

परमोपकारिणः पूज्याचार्यश्रीभद्रसूरीश्वर - पूज्याचार्यश्रीॐकारसूरीश्वर - पूज्याचार्य श्रीअरविन्दसूरीश्वर - पूज्याचार्यश्रीयशोविजयसूरीश्वर- पूज्यमुनिराजश्रीजम्बूविजय - पूज्य गुरूदेव मुनिवर्यश्रीजिनचन्द्रवर्यानपि वन्दे ।

ऋणस्वीकारः

आचार्यश्री विजय कुलचन्द्रसूरिः, आचार्यश्री पुण्यरत्नसूरिः, आचार्यश्री यशोरत्नसूरिः, आचार्यश्री अभयचन्द्रसूरिः, (प्रेम-भुवनभानु सूरिसमुदायीयाः)

आचार्यश्री जगच्चन्द्रसूरिः (डेहला समुदायीयाः)

एभिः सर्वैः विद्वद्भिः अस्य ग्रन्थस्य 'प्रुफ' पत्राणि सूक्ष्मेक्षिकया निरीक्षितानि । महत्त्वपूर्णानि सूचनानि अपि प्रदत्तानि ।

दत्तावधानेन आ. श्री विजयहार्दिकरत्नसूरिणा (आ. नीतिसूरि समुदायीयेन)

संघवीपाडाभण्डारगतताडपत्रीयग्रन्थस्य 's' संकेतवतः टीकागतानि पाठान्तराणि सञ्चितानि, प्रुफपत्राणि अपि शोधितानि ।

अन्यहस्तलिखितग्रन्थगतपाठभेदान्वेषणे पं. दिव्यरत्नविजयः गणि, सा. कुशलयशाश्रीः,

सा. भक्तिधराश्रीः, सा.आगमदर्शनाश्रीः इत्यादिभिरत्र सहकृतमिति स्मर्यते ।

सा. निर्वाणश्री, सा. विनयपूर्णाश्री, सा. परमश्रद्धाश्रीआदिभिः प्रुफपत्रशोधनपरिशिष्ट-निर्माणादिकार्येषु साहाय्यमाचरितम् ।

सा. हर्षगुणाश्रिया कर्मग्रन्थविषयकप्रश्नाः समाहिताः ।

सर्वेभ्यः एभ्यः शतशः साधुवादाः ।

(अनुवादकाः मुक्ति-मुनिचन्द्रसूरयः)

EDITORIAL

It's the time of happiness that shri Jivajivabhigam sutra is being published after editing the commentary of aa. Malaygirisuri m.s. on the basis of many hand-written Scriptures

Niryukti & Bhashya on this are neither found yet nor created first of all, Aa. Haribhadrasuri m.s. wrote a very short commentary on this scripture, which is not yet published some parts of this commentary are quoted as 'Mool Tika' by Aa. Malaygirisuri m.s. in his commentary.

Aa. Malaygirisuri m.s. is known as one of the great commentatar of aagam scriptures it is easy to understand, therefore his commentary is comparatively known as mother milk, easily digestable.

In Rajprashniya Sutra's editorial the detailed more introduction is given of Aa. Malaygirisuri m.s. the intrested readers read there.

Many palm-leaf-scripts and paper manuscript are used for editing this scripture. short introduction of it is given here.

Out of all these copies, the palm-leaf Scripts of Jaisalmer gives many variable readings and references. many readings sound same as that of Aa. Malaygirisuri's

On the basis of this copy we have corrected, added many readings and references at many place in this text.

INTRODUCTION OF MANY USEFUL MANUSCRIPTS IN EDITING

'L'or 'V' this sign indicates 'jain vishva Bharti' ladnus publishing uvangsuttani-4 khand 1.

in this publishment, for the editing of jivabhigam sutra, following manuscripts are used in this edition

"क" The manuscript indicated by this sign belongs to shrichand gadhiya pustakalaya (Sardarcity). This manuscript contains ' Mool Sutra' only
amount of leaves - 94
lenth x Breadth - 13.25" x 5"
Date of Creation V.S.1575

"ख" The manuscript of this sign also belongs to the above one, Gadhaiya Pustakalaya.
amount of leaves - 80
lenth x Breadth - 12" x 4.25"
Date of Creation :- 16 thCentury

"ग" This manuscript also belongs to the Gadhaiya Pustakalaya.
amount of leaves - 90
lenth x Breadth - 11.5" x 4.25"
Date of Creation :- 16 Century

'ता" This manuscript is of Jinbhadrasuri Gyanbhandar, Jaisalmer numberly 25. this is a palm-leaf Script
amount of leaves - 1 to 102
lenth x Breadth - 31.5" x 2.25"
Date of Creation :- V.S.1489

"ड" This Script is obtained from 'Sanghiya Gyanbhandra' in ladnu
date - V.S.1800

'J' or 'जे' :- this is Similar to 'ता' as told above. we got the C.D. of this Script from jaisalmer we have used it's phots.

Aagam Prabhakar muni punya vijay m.s had noted the differences in the references from this script. Which we got it from prakrit tex Society, from page 227 to 579, from sutra 3-1-334 to the end.

'S' This script belongs to hemcandracharya gyanmandir, sanghvipada Gyanbhandra, patan. in this palm-leaf Script, from, 1 to 123 leaves,mool sutras of jivajivabhigam are written and from 124 to 371 leaves the commentary of Aa. Malaygiri suri m.s. is written.

lenth x Breadth - 33.5" x 2"
Date of Creation :- 1444

The Granthagro of Sutra is 4000 and 14000 is of its commentary. Differences of refernces are noted by Aa.HardikRatnaSuri. m.s.

we are thankful of the organisers of these libraries for giving these scripts. their shrutbhakti is appreciable.

OBLIGATIONS

Aa. Kulchandrasuri m.s.

Aa. punyaratnasuri m.s

Aa. Yashoratnsuri m.s.

Aa. Abhaychandrasuri m.s. (Prem-Bhuvanbhanusuri Samuday)

Aa. Jagacchandrasuri m.s. (Dehlawala Samuday)

have checked the prooves very deeply and have also given important instructions

Aa. Hardikratna suri m.s.(Aa. Nitisuri Samuday) has Checked the proof and noted the differences of references from the palm-leaf script of Sanghvipada Gyanbhandar

P. Divyaratna Vijay Gani, Sa. Kualyasha Shriji, Sa. Bhaktidharashriji, Sa. Aagamdarshana Shriji, etc. have helped to note down the references from other Manuscripts.

Sa. Nirvanshriji, Sa. Vinaypurnashriji, Sa. Paramshraddhishriji have helped in Checking the prooves and to make parishishta Sa. Harshguna shriji has given solution on the karmagrantha subject.

We are grateful to the various libraries and their management staff for co-operating with us in providing all of the above mentioned reference material. We would like to thank all the people who have contributed to the work of editing this treatise critically.

REVERENCE TO LORD AND GURU

The work has been completed with the grace of the lord (tirthankara) and spiritual masters (Gurus).

Acarya siddhisuri m.s., Acarya bhadrasuri m.s., Acarya Omkarsuri m.s., munisri Jambuvijaya m.s. Munisri jinchandravijaya m.s.

My internal wish is that eligible scholar do read the work and make use of it for the purpose of one's own spiritual development and for the good of others.

we are grateful to muni shasanratna Vijayji for translation in english of this introduction.

• • •

।।अर्हम्।।

श्रीचतुर्दशपूर्वधरश्रुतस्थविरविहितं

श्रीमन्मलयगिर्याचार्यप्रणीतविवृतियुतं

श्रीजीवाजीवाभिगमसूत्रम्

प्रणमत[1] पदनखतेजःप्रतिहतनिःशेषनम्रजनतिमिरम्।
वीरं परतीर्थियशोद्विरदघटाध्वंसकेसरिणम्।।१।।

प्रणिपत्य गुरून् जीवाजीवाभिगमस्य विवृत्तिमहमनघाम्।
विदधे गुरूपदेशात् प्रबोधमाधातुमल्पधियाम्।।२।।

इह रागद्वेषाद्यभिभूतेन सांसारिकेण सत्त्वेनाऽविषह्यशारीरमानसिकदुःखोपनिपातपीडितेन तदपनोदाय हेयोपादेयपदार्थपरिज्ञाने यत्न आस्थेयः, स च विशिष्टविवेकप्रतिपत्तिमन्तरेण न भवति, विशिष्टश्च विवेको न प्राप्ताशेषातिशयकलापाप्तोपदेशमृते, आप्तश्च रागद्वेषमोहादिदोषाणामात्यन्तिकप्रक्षयात्, स चात्यन्तिकः प्रक्षयो दोषाणामर्हत एव, अतः प्रारभ्यतेऽर्हद्वचनानुयोगः, तत्राऽऽचारादिशास्त्राणामनुयोगः पूर्वसूरिभिर्व्यासादिप्रकारैरनेकधा कृतस्ततो न तदन्वाख्याने समस्ति तथाविधं प्रयाससाफल्यम्, अतो यदस्ति तृतीयाङ्गस्य स्थाननाम्नो रागविषपरममन्त्ररूपं[2] द्वेषाऽनलसलिलपूरोपमं [मोह]तिमिरादित्यभूतं भवाब्धिपरमसेतुर्महाप्रयत्नगम्यं निःश्रेयसावाप्त्यवन्ध्यशक्तिकं **जीवाजीवाभिगम**नामकमुपाङ्गं पूर्वटीकाकृताऽतिगम्भीरमल्पाक्षरैर्व्याख्यातम्, अत एव मन्दमेधसामुपकारायाऽप्रभविष्णु, तस्य तेषामनुग्रहाय सविस्तरमन्वाख्यानमातन्यते।

तत्र जीवाजीवाभिगमाध्ययनप्रारम्भप्रयासोऽयुक्तः, प्रयोजनादिरहितत्वात्, कण्टकशाखामर्दनादिवत्, इत्यादिशङ्काऽपनोदाय प्रयोजनादिकमादावुपन्यसनीयम्, उक्तं च –

---

१. इदं तु ध्येयम् - अत्र S ता.क. तालपत्रीयादर्शौ, PV कागदपत्रीयादर्शौ। २. तुला- रागविषम-रूपस्य, द्वेषानलजलसंहतेः ।। १ ।। मोहतिमिरादित्यभूतस्य भवाब्धिपरमसेतोः । महायत्नगम्यस्य अमृताप्त्यवन्ध्यशक्तेः ।। २ ।। हारिभद्रीवृत्तौ मङ्गलाचरणम् ।।

"प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम्।
मङ्गलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये।।१।।" इति, [द्रष्टव्या.आव. हारि.टी]

तत्र प्रयोजनं द्विधा–परमपरं च, पुनरेकैकं द्विविधं-कर्तृगतं श्रोतृगतं च, तत्र द्रव्यास्तिकनय-मतपर्यालोचनायामागमस्य नित्यत्वात्कर्तुरभाव एव, तथा चोक्तम्- **"नैषा द्वादशाङ्गी कदाचिन्नासीत् नं कदाचिन्न भवति न कदाचिन्न भविष्यति, ध्रुवा नित्या शाश्वती"** [दशाश्रुत] इत्यादि, पर्यायास्तिकनयमतपर्यालोचनायां चानित्यत्वादवश्यंभावी तत्सद्भावः, तत्त्वपर्यालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्यार्थाऽपेक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात्कथञ्चित्कर्तृसिद्धिः। तत्र सूत्रकर्त्तुः परमपवर्गप्राप्तिः अपरं सत्त्वानुग्रहः, तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेद्, उच्यते, न किञ्चित्, कृतकृत्यत्वाद् भगवतः, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासो निरर्थक इति चेत्, न, तस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात्, उक्तं च- "[२]**तं च कहं वेइज्जइ?, अगिलाए धम्मदेसणाए उ** [आव.नि.१८३]" इति। श्रोतॄणामनन्तरं प्रयोजनं विवक्षिताध्ययनार्थपरिज्ञानं, परं निःश्रेयसपदं, विवक्षिताध्ययनसम्यगर्थावगमतः संयमप्रवृत्त्या सकलकर्मक्षयोपपत्तेः, ततः प्रयोजनवान् अधिकृताध्ययनप्रारम्भप्रयासः १। अभिधेयं जीवाजीवस्वरूपं, तच्चाधिकृताध्ययननाम्नो यथार्थत्वमात्रादप्यवगतम् २। सम्बन्धश्च द्विधा–उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्राद्यस्तर्कानुसारिणः प्रति, तद्यथा–वचनरूपापन्नं प्रकरणमुपायस्तत्परिज्ञानं चोपेयं, गुरुपर्वक्रमलक्षणः केवलश्रद्धानुसारिणः प्रति, स चैवम्-अर्थतो भगवता वर्द्धमानस्वामिना जीवाजीवाभिगम उक्तः, सूत्रतो द्वादशस्वङ्गेषु गणधरैः, ततोऽपि मन्दमेधसामनुग्रहायातिशायिभिश्चतुर्दशपूर्वधरैस्तृतीय-स्मादङ्गादाकृष्य पृथगध्ययनत्वेन व्यवस्थापितः, अमुमेव सम्बन्धमनुविचिन्त्य स्थविरा भगवन्तः प्रज्ञापितवन्त इति प्रतिपादयिष्यन्ति ३ । इदं च जीवाजीवाभिगमाख्यमध्ययनं सम्यग्ज्ञानहेतुत्वात् अत एव (च) परम्परया मुक्तिपदप्रापकत्वाच्छ्रेयोभूतम्, अतो मा भूदत्र विघ्न इति विघ्नविनायकोपशान्तये शिष्याणां मङ्गलबुद्धिपरिग्रहाय स्वतो मङ्गलभूतेऽप्यस्मिन् मङ्गलमुपन्यस्यते, तच्चादिमध्यावसान-भेदात्त्रिधा, तत्रादिमङ्गलम् **"इह खलु** [३]**जिणमय"** [सूत्र - १]मित्यादि, अत्र जिननामोत्कीर्त्तनं मङ्गलं, मङ्गलं च नामादिभेदाच्चतुर्धा, तत्रेदं नोआगमतो भावमङ्गलम्, एतच्चाधिकृताध्ययनार्थपारगमनकारणं, मध्यमङ्गलं द्वीपसमुद्रस्वरूपकथनं, निमित्तशास्त्रे हि द्वीप-समुद्रनामग्रहणं परममङ्गलमिति निवेदितं, तथा च द्वीप-समुद्रादिनामग्रहणाधिकारे तत्रोक्तम्- "[४]**जो जं पसत्थमत्थं पुच्छइ तस्सऽत्थसंपत्ती**" [ ]

---

१. न कदाचिन्न भवति – PVS **नास्ति। २. तच्च कथं वेद्यते? अग्लान्या-धर्मदेशनयैव (नादिभिः)।**
३. जिणाणुमय०– PVS ।। ४. **यो यं प्रशस्तमर्थं पृच्छति, तस्यार्थसम्पत्तिः ।।**

इत्यादि, एतच्चाधिकृताध्ययनार्थस्थिरीकरणहेतुः, अवसानमङ्गलं **'दसविहा सव्वजीवा'** इत्यादिरूपं, सर्वजीवपरिज्ञानहेतुत्वेन माङ्गलिकत्वात्, तच्च शिष्य-प्रशिष्यसन्तानाऽव्यवच्छेदार्थम्, उक्तं च–

"[१]**तं मंगल माईए मज्झे पज्जंतए य सत्थस्स।**

पढमं सुत्तत्थाविग्घपारगमणाय निद्दिट्ठं।।१।। [विशेषावश्यकभाष्य - १३]

तस्सेव उ थिज्जत्थं, मज्झिमयं अंतिमंपि तस्सेव।

अव्वोच्छित्तिनिमित्तं, सिस्सपसिस्साइवंसस्स।।२।।" [विशेषावश्यकभाष्य - १४]

अथ कथं सकलमेवेदमध्ययनं स्वतो मङ्गलभूतम्?, उच्यते, निर्जरार्थत्वात्तपोवत्, निर्जरार्थता च सम्यग्ज्ञानरूपत्वात्, उक्तं च-

"[२]**जं अण्णाणी कम्मं, खवेइ बहुयाहिं वासकोडीहिं।**

तं नाणी तिहिं गुत्तो, खवेइ ऊसासमेत्तेणं।।१।।" [मरणसमाहि - १३५, महाप्रत्याख्यानप-१०१]

मङ्गलशब्दव्युत्पत्तिश्चेयम्–उख-णख-वख-मखेत्यादि दण्डकधातुः, मङ्ग्यतेऽधिगम्यते हितमनेनेति मङ्गलम्, अथवा मं[३]ङ्ग इति धर्मस्याख्या तं लाति-आदत्ते इति मङ्गलं, तथा चास्मिन्नध्ययने मनसि भावतः परिणमति समुपजायते सुविशुद्धसम्यग्दर्शनादिको भावधर्मः, उक्तं च–

"[४]**मंगिज्जएऽधिगम्मइ जेण हियं तेण मंगलं होइ ।**

अहवा मंगो धम्मो तं लाति तयं समादत्ते।।१।।" इति [विशेषावश्यकभाष्ये - २२]

यदि वा मां गालयति-अपनयति भवादिति मङ्गलं, मा भूद् गलो–विघ्नो गालो वा–नाशः शास्त्रस्यास्मादिति मङ्गलं, पृषोदरादित्वादिष्टरूपनिष्पत्तिः ३।। तदेवं प्रयोजनादित्रितयं मङ्गलं चोपदर्शितम्, अधुनाऽनुयोगः प्रारभ्यते, अथानुयोग इति कः शब्दार्थः?, उच्यते, सूत्रपाठानन्तरमनुपश्चात् सूत्रस्यार्थेन सह योगो–घटनाऽनुयोगः, सूत्राध्ययनात्पश्चादर्थकथनमिति भावना, यद्वाऽनुकूलः-अविरोधी सूत्रस्यार्थेन सह योगोऽनुयोगः, तत्रेदमादिसूत्रम्–

---

१. **तन्मङ्गलमादौ मध्ये पर्यन्ते च शास्त्रस्य । प्रथमं सूत्रार्थस्याविघ्नेन पारगमनाय निर्दिष्टम् ।।१।।**
तस्यैव तु स्थैर्यार्थं, मध्यममन्त्यमपि तस्यैव । अव्युच्छित्तिनिमित्तं, शिष्यप्रशिष्यादिवंशे ।।२।।

२. **यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटीभिः । तज्ज्ञानी त्रिभिर्गुप्तः, क्षपयत्युच्छ्वासमात्रेण ।। १ ।।**

३. मङ्गल इति – S।।

४. **मङ्ग्यतेऽधिगम्यते येन हितं तेन मङ्गलं भवति । अथवा मङ्गो धर्मस्तं लाति तकं समादत्ते।।१।।**

।। ऐं नमः।।

(१) इह खलु जिणमयं जिणाणुमयं[१] जिणाणुलोमं[२] जिणप्पणीतं जिणपरूवियं जिणक्खायं जिणाणुचिन्नं जिणपण्णत्तं जिणदेसियं जिणपसत्थं अणुव्वीइए[३] तं सद्दहमाणा तं पत्तियमाणा तं रोएमाणा थेरा भगवंतो जीवाजीवाभिगमं णाम अज्झयणं पण्णवइंसु[४]।। ।। १ ।।

'इह' अस्मिन् प्रवचने **खलु**शब्दोऽवधारणे इहैव प्रवचने न शेषेषु शाक्यादिप्रवचनेषु, अथवा 'इहे'ति मनुष्यलोके, खलुशब्दो वाक्यालङ्कारे, **'जिनमत'** मिति रागादिशत्रून् जयति स्म [इति] जिनः, स च यद्यपि छद्मस्थवीतरागोऽपि भवति तथाऽपि तस्य तीर्थप्रवर्त्तकत्वायोगादुत्पन्नकेवलज्ञानस्तीर्थ-कृदभिगृह्यते, सोऽपि च वर्द्धमानस्वामी, तस्य वर्त्तमानतीर्थाधिपतित्वात्, तस्य जिनस्य वर्द्धमानस्वामिनो मतम्–अर्थतस्तेनैव प्रणीतत्वादाचारादिदृष्टिवादपर्यन्तं द्वादशाङ्गं गणिपिटकं, कथम्भूतं वर्द्धमानस्वामिजिन-मतमित्याह-**'जिनानुमतं'** जिनानाम्-अतीतानागतवर्तमानानामृषभ-पद्मनाभसीमन्धरस्वामिप्रभृतीना-मनुमतम्–आनुकूल्येन संमतं वस्तुतत्त्वमपवर्गमार्गं च प्रति मनागपि विसंवादाभावादिति जिनानुमतम्, एतेन सर्वेषामपि तीर्थकृतां परस्परमविसंवादिवचनता प्रवेदिता, पुनः कथम्भूतमित्याह-**'जिनानुलोमं'** जिनानाम्–अवध्यादिजिनानामनुलोमम्–अनुकूलमनुगुणमिति भावः, एतद्वशादवध्यादिजिनत्वप्राप्तेः, तथाहि–यथोक्तमिदं जिनमतमासेवमानाः साधवोऽवधि-मनःपर्याय-केवल-लाभमासादयन्त्येवेति, तथा **'जिनप्रणीतं'** जिनेन–भगवता वर्द्धमानस्वामिना प्रणीतं समस्तार्थसङ्ग्रहात्मकमातृकापदत्रयप्रणयनाज्जिन-प्रणीतं, भगवान् हि वर्द्धमानस्वामी केवलज्ञानावाप्तावादौ बीजबुद्धित्वादिपरमगुणकलितान् गौतमादीन् गणधारिणः प्रत्येतन्मातृकापदत्रयमुक्तवान् **"उप्पन्नेइ वा विगमेइ वा धुवेइ वा"** [ ] इति, एतच्च पदत्रयमुपजीव्य गौतमादयो द्वादशाङ्गं विरचितवन्तस्ततो भवत्येतज्जिनमतं जिनप्रणीतमिति, एतेनागमस्य सूत्रतः पौरुषेयत्वमावेदितं, पुरुषव्यापारमन्तरेण वचनानामसम्भवात्, न खलु पुरुषव्यापारमन्तरेण नभसि ध्वनन्तः शब्दा उपलभ्यन्त इति, तेन यदवादि परैः–

---

१. जिणाणुमयं- S **नास्ति**।। ३. जिणाणुलोमं जिणदिहियं - जिणप्पणीतं-ता. ।। ३. अणुवीइ तं- L। अणुवयिं तं-जे। अणुवीतियं - क ख । अणुपुव्वीए-गट ।। ४. ०विंसु०– SP । ०वइसु-जे.।।

"वचनाज्जिनसंबुद्धिस्तन्नैरर्थक्यमन्यथा।

अपौरुषेयमेवेदं, धर्माधर्मनिबन्धनम्।।१।।" [ ]

इति तदपास्तमवसेयमिति, तत्र मा भूत्कस्याप्येवमाशङ्का-यथेदमविज्ञातार्थमेव तत्त्वतः, साक्षात्सर्वज्ञादपि श्रवणे सर्वज्ञविवक्षाया अतीन्द्रियत्वेन ग्रहणाभावे विवक्षितशब्दार्थपरिज्ञानायोगात्, केवलं म्लेच्छस्येवाऽऽर्योक्तानुभाषणमात्रमिदमिति, तथा चोक्तमपरैः-

'आर्याभिप्रायमज्ञात्वा, म्लेच्छवाग्योगतुल्यता।

सर्वज्ञादपि हि श्रोतुस्तदन्यस्यार्थदर्शने।।१।।' [ ]

तत आह-**'जिनप्ररूपितं'** जिनेन-भगवता वर्द्धमानस्वामिना यथा श्रोतॄणामधिगमो भवति तथा सम्यक्प्रणयनक्रियाप्रवर्त्तनेन प्ररूपितं जिनप्ररूपितं, किमुक्तं भवति? यद्यपि नाम श्रोता न भगवद्विवक्षां साक्षादधिगच्छति तथाऽप्यनादिरयं शाब्दो व्यवहारः साक्षाद्विवक्षाग्रहणमन्तरेणापि भवति यथासङ्केतं शब्दार्थावगमो, बालादीनां तथा दर्शनात्, अन्यथा सकलशाब्दव्यवहारोच्छेदप्रसक्तेः, चित्रार्था अपि शब्दा भगवतैव सङ्केतिताः, प्रस्तावौचित्यादिना च नियतमर्थं प्रतिपादयन्ति, ततश्चित्रार्थशब्दश्रवणेऽपि भवति यथाऽवस्थितार्थावगमो, न चान्यथाऽवबुध्यमानांस्तान्न निषेधति, अविप्रतारकत्वात्, न चोपेक्षते, तीर्थप्रवर्त्तनाय प्रवृत्तत्वात्, ततो गणभृतां साक्षात्, परम्परया शेषसूरीणामपि यथाऽवस्थितार्थावगम इति नेदमविज्ञातार्थमिति। **अन्ये** त्वाहुः-भगवान्न प्रवचनप्रयासमाधत्ते, केवलं तत्पुण्यप्राग्भारवशादेव श्रोतॄणां प्रतिभास उपजायते यथा-इत्थमित्थं भगवान् तत्त्वमाचष्टे, उक्तं च-

"तदाधिपत्यादाभासः, सत्त्वानामुपजायते।

स्वयं तु यत्नरहितश्चिन्तामणिरिव स्थितः।।१।।" इति [ ]

तन्मतविकुट्टनार्थमाह-**'जिनाख्यातं'** जिनेन-भगवता वर्द्धमानस्वामिना प्रकृष्टपुण्यसम्भारविपाकोदयतस्तथाव्यापारयोगेन आख्यातं-कथितं जिनाख्यातं, साक्षात्कथनव्यापारोपलम्भेऽपि यदि तदाधिपत्यमात्रात्तथाप्रतिभासः श्रोतॄणामित्यभ्युपगम्यते ततोऽन्यत्रापि तथाकल्पनाप्रसङ्गः, तथा च प्रत्यक्षविरोध इति यत्किञ्चिदेतद्, भगवांश्चाख्यातवान् सम्यग् योग्येभ्यः श्रोतृभ्यो नाऽयोग्येभ्यः, अमूढलक्षत्वात्, सम्यग्योग्यश्च श्रोता श्रोतृलक्षणोपेतः, श्रोतृलक्षणानि चामूनि-

---

१. **वचनाज्जिनसंसिद्धेस्त० हारिभद्री टीका।** २. **अतीन्द्रियत्वेन इत्यर्थः ।** ३. ०स्तन्न–PV। ०स्तन–V **संशो।** ४. प्र०–PVS **नास्ति ।** ५. आख्यातं० – PVS **नास्ति ।।**

"मध्यस्थो बुद्धिमानर्थी, जात्यादिगुणसंगतः।

श्रुतकृच्च यथाशक्ति, श्रोता पात्रमिति स्मृतः।।१।।" [द्रष्टव्यं प्रज्ञापना सू.१ हारि.टी.]

ततः फलवदेवेदं जिनाख्यातमित्यावेदयन्नाह-**'जिनानुचीर्ण'** जिना इह हिताप्त्यनिवर्त्तकयोगसिद्धा[1] गणधारिणः परिगृह्यन्ते, विचित्रार्थत्वात्सूत्राणां, ततोऽयमर्थः-जिनैः-हिताप्त्यनिवर्त्तकयोगसिद्धैर्गण-धारिभिरनुचीर्णं-सम्यक् तदर्थावगमासङ्गशक्तिगर्भानिवर्त्तकसमभावप्राप्त्या धर्ममेघनामकसमाधिरूपेण परिणमितं जिनानुचीर्णम्, अत एव तथारूपसमाधिभावतः समुल्लसितातिशयविशेषभावेन तेषां तथा सूत्रकरणशक्तिरिति दर्शयन्नाह-**'जिनप्रज्ञप्तं'** जिनैः-हिताप्त्यनिवर्त्तकयोगिभिः प्रज्ञप्तं-तदन्यसत्त्वानुग्रहाय सूत्रत आचाराद्यङ्गोपाङ्गादिभेदेन रचितं जिनप्रज्ञप्तम्, उक्तं च-

"अत्थं[2] भासइ अरिहा सुत्तं गंथंति गणहरा निउणं।

सासणस्स हियट्ठाए, तओ सुत्तं पवत्तई।।१।।" [आव.नि.९२] इति,

इदं च हितप्रवृत्तादिरूपेभ्यो जिनेभ्यो देशनीयं, तेषामेव सम्यग्विनेययोगभावतो हिताविघातकरणात्, इत्येतदुपदर्शयन्नाह-**'जिनदेशितं'** जिना इह हितप्रवृत्तगोत्रविशुद्धोपायाभिमुखापायविमुखादयः परिगृह्यन्ते, तथा **'मूलटीकाकृता'**[3] व्याख्यानात्, जिनेभ्यो-हितप्रवृत्तादिरूपेभ्यः शुश्रूषादिभिर्व्यक्तभावेभ्यो देशितं-कथितं गणधरैरपि जिनदेशितं, तथा च **जम्बूस्वामिप्रभृतय** एवंविधा एवेति निरूपणीयमेतत्, अथ प्रकृतिसुन्दरमिदमिति कस्मादजिनेभ्योऽपि नोपदिश्यते?, उच्यते, तेषां स्वतोऽसुन्दरत्वेनानर्थोपनिपात-सम्भवाद्, दृष्टं च पात्रासुन्दरतया स्वतः सुन्दरमपि रविकराद्युलूकादीनामनर्थाय, आह च—

"पउंजियव्वं[4] धीरेण हियं जं जस्स सव्वहा।

आहारोवि हु मच्छस्स न पसत्थो गलो भुवि।।१।।" [ ]

अस्यार्थस्य संदर्शनायाह-**'जिनप्रशस्तं'** जिनानां-गोत्रविशुद्धोपायाभिमुखाऽपायविमुखहितप्रवृत्तादिभेदानां प्रशस्तं-निरुजपथ्यान्नवत् उचितसेवनया हितं जिनप्रशस्तम्, एवंभूतं जिनमतम् **'अनुविचिन्त्य'** औत्पातिक्यादिभेदभिन्नया बुद्ध्या पर्यालोच्य **'तत्'** जिनमतं **'श्रद्दधानाः'** यद्यपि नाम कालवैगुण्यतो मेधादिगुणहीनाः प्राणिनस्तथाऽप्यतः स्वल्पमप्यधिगतं भवच्छेदायेत्यार्द्रचित्ततया मन्यमानाः, तथा **'तत्'**

---

१. अनिवर्तक इति अनिवर्तनशीलः अप्रतिपातशीलः इत्यर्थः । २. अर्थं भाषतेऽर्हन्, सूत्रं ग्रथ्नन्ति गणधरा निपुणम् । शासनस्य हितार्थं, ततः सूत्रं प्रवर्तते ।। ३. आचार्यहरिभद्रसूरिरचितायां लघुटीकायामिति ज्ञेयम् ।। ४. प्रयोक्तव्यं धीरेण हितं पद्यस्य सर्वथा । आहारोऽपि मत्स्यस्य न प्रशस्तो गरो भुवि ।।

जिनमतमेव **'प्रीयमाणाः'** असङ्गशक्तिप्रीत्या पश्यन्तः, तथा **'तत्'** जिनमतमेव **'रोचयन्तः'** सात्मीभावेनानुभवन्तः, क एते इत्याह-**'स्थविरा भगवन्तः'** तत्र धर्मपरिणत्या निवृत्तासमञ्जसक्रियामतयः स्थविरा इव स्थविराः, परिणतसाधुभावा आचार्या इति गर्भः, 'भगवन्तः' श्रुतैश्वर्यादियोगाद् भग्नवन्तः कषायादीनिति भगवन्तः पृषोदरादित्वान्नकारलोपः, **'जीवाजीवाभिगमं नाम'** नाम्ना जीवाजीवाभिगमं, नामन्शब्दस्यात्राव्ययत्वात्ततः परस्य तृतीयैकवचनस्य लोपः, जीवानाम्-एकेन्द्रियादीनाम् अजीवानां-धर्मास्तिकायादीनामभिगमः- परिच्छेदो यस्मिन् तत् जीवाजीवाभिगमम्, इदं चान्वर्थप्रधानं नाम यथा ज्वलतीति ज्वलन इत्यादि, किं तदित्याह-अधीयत इति **'अध्ययनं'** विशिष्टार्थध्वनिसन्दर्भरूपं **'प्रज्ञापितवन्तः'** प्ररूपितवन्तः, एतेन गुरुपर्वक्रमलक्षणः सम्बन्धः साक्षादुपदर्शितः, एतदुपदर्शनादभिधेयादिकमपि सिद्धं यथोक्तमनन्तरमिति कृतं प्रसङ्गेन।। १ ।।

(२) से किं तं जीवाजीवाभिगमे?, जीवाजीवाभिगमे दुविहे पन्नत्ते, तंजहा-जीवाभिगमे य अजीवाभिगमे य।। २ ।।

से किं तं इत्यादि, अथास्य सूत्रस्य किमैदम्पर्यम्?, उच्यते, प्रश्नसूत्रमिदम्, एतच्चादावुपन्यस्यन्निदं ज्ञापयति-पृच्छतो मध्यस्थस्य बुद्धिमतो भगवदर्हदुपदिष्टतत्त्वस्य तत्त्वप्ररूपणा कार्या नान्यस्येति, अक्षरगमनिका त्वेवम्-**से**शब्दो मगधदेशप्रसिद्धो निपातोऽथशब्दार्थे, अथशब्दश्च प्रक्रियाद्यर्थाभिधायी, उक्तं च-"**अथ प्रक्रिया-प्रश्नानन्तर्य-मङ्गलोपन्यास-प्रतिवचनसमुच्चयेषु**" [ ] इति, इह तूपन्यासे, किंशब्दः परप्रश्ने, स चाभिधेययथावत्स्वरूपानिर्ज्ञाते नपुंसकलिङ्गतया निर्दिश्यते, तथा चोक्तम्-"**अव्यक्ते गुणसन्दोहे नपुंसकलिङ्गं प्रयुज्यते**" [ ] ततः पुनरर्थापेक्षया यथाभिधेयमभिसम्बध्यते इति, अथ **'किं तज्जीवाजीवाभिगमम्'** इति, अथवा प्राकृतशैल्या "**अभिधेयवल्लिङ्गवचनानि भवन्ति**" [ ] इति न्यायात् किं तदिति-कोऽसावित्यस्मिन्नर्थे द्रष्टव्यं, ततोऽयमर्थः-कोऽसौ जीवाजीवाभिगमः? इति, एवं सामान्येन केनचित्प्रश्ने कृते सति भगवान् गुरुः शिष्यवचनानुरोधेनादराधानार्थं किञ्चित्प्रत्युच्चार्याह-**'जीवाजीवाभिगमः'** अनन्तरोदितशब्दार्थः **'द्विविधः'** द्विप्रकारः **प्रज्ञप्त**स्तीर्थकरगणधरैः, अनेन चागृहीतशिष्याभिधानेन निर्वचनसूत्रेणैतदाह-न सर्वमेव सूत्रं गणधरप्रश्नतीर्थकरनिर्वचनरूपं किन्तु किञ्चिदन्यथापि, केवलं सूत्रं बाहुल्येन गणधरैर्दृब्धं स्तोकं शेषैः, यत उक्तम्-"**अत्थं भासइ अरिहा**" [**आव.नि.९२**] इत्यादि, **'तद्यथे'**ति वक्ष्यमाणभेदकथनोपन्यासार्थः, स जीवाजीवाभिगमो यथा द्विविधो भवति तथोपन्यस्यत इति भावः, **जीवाभिगमश्चाजीवाभिगमश्च,** चशब्दौ वस्तुतत्त्वमङ्गीकृत्य

द्वयोरपि तुल्यकक्षतोद्भावनार्थौ, आह-जीवाजीवाभिगमः प्रश्नसूत्रे संवलित उपन्यस्तस्तं तथैवोच्चार्यासंवलित-निर्वचनाभिधानमयुक्तं, असंवलिते संवलितविधानायोगात्, नैष दोषः, प्रश्नसूत्रेऽप्यसंवलितस्यैवोपन्यासात्, भिन्नजातीययोरेकत्वायोगात्।। २।।

तत्र यद्यपि "**यथोद्देशस्तथा निर्देश**" इति न्यायोऽस्ति, तथाऽप्यल्पतरवक्तव्यत्वात् प्रथमतोऽजीवाभिगम-मभिधित्सुस्तत्प्रश्नसूत्रमाह-

(३) से किं तं अजीवाभिगमे?, अजीवाभिगमे दुविहे पन्नत्ते, तंजहा-रूविअजीवाभिगमे य अरूविअजीवाभिगमे य ।।३।।

से किं तमित्यादि, **अथ कोऽसौ अजीवाभिगमः**?, सूरिराह-**अजीवाभिगमो द्विविधः प्रज्ञप्तः, तद्यथा-रूप्यजीवाभिगमोऽरूप्यजीवाभिगमश्च,** रूपमेषामस्तीति रूपिणः, रूपग्रहणं गन्धादीनामुपलक्षणं, तद्व्यतिरेकेण तस्यासम्भवात्, तथाहि-प्रतिपरमाणु रूप-रस-गन्ध-स्पर्शाः, उक्तं च-

"**कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।**
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च।।१।।" [प्र.तत्त्वार्थभाष्य ५/२५]

एतेन यदुच्यते **कैश्चित्** 'भिन्ना एव रूपपरमाणवो भिन्नाश्च पृथक् पृथग् रसादिपरमाणव' इति, तदपास्तमवसेयं, प्रत्यक्षबाधितत्वात्, तथाहि-य एव नैरन्तर्येण कुच-कलशोपरिनिविष्टा रूपपरमाणव उपलब्धिगोचरास्तेष्वेवाव्यवच्छेदेन सकलेष्वपि स्पर्शोऽप्युपलभ्यते, य एव च घृतादिरसपरमाणवः कर्पूरादिगन्धपरमाणवो वा तेष्वेव नैरन्तर्येण रूपं स्पर्शश्चोपलब्धिविषयः, अन्यथा सान्तरा रूपादयः प्रतीतिपथमियुः, न च सान्तराः प्रतीयन्ते, तस्मादव्यतिरेकः परस्परं रूपादीनामिति, रूपिणश्च तेऽजीवाश्च रूप्यजीवास्तेषामभिगमो रूप्यजीवाभिगमः पुद्गलरूपाजीवाभिगम इतियावत्, पुद्गलानामेव रूपादिमत्त्वात्, रूपव्यतिरिक्ता अरूपिणो-धर्मास्तिकायादयस्ते च तेऽजीवाश्चारूप्यजीवा-स्तेषामभिगमोऽरूप्यजीवाभिगमः।।३।।

तत्रारूपिणः प्रत्यक्षाद्यविषयाः केवलमागमप्रमाणगम्यास्तत्त्वत इति प्रथमतस्तद्विषयं प्रश्नसूत्रमाह-

(४) से किं तं अरूविअजीवाभिगमे?, अरूविअजीवाभिगमे दसविहे पण्णत्ते, तं जहा-धम्मत्थिकाए एवं जहा पण्णवणाए जाव सेत्तं अरूविअजीवाभिगमे ।।४।।

सुगमं, सूरिराह-'**अरूवी**'त्यादि, अरूप्यजीवाभिगमः '**दशविधः**' दशप्रकारः **प्रज्ञप्तः**, तदेव

दशविधत्वमाह–**तं जहे**त्यादि, 'तद्यथे'ति वक्ष्यमाणभेदकथनोपन्यासार्थः, **धर्मास्तिकायः, 'एवं जहा पण्णवणाए'** इति **'एवम्'** उक्तेन प्रकारेण यथा "**प्रज्ञापनायां**" तथा वक्तव्यं तावद् यावत् "**सेत्तं असंसारसमापन्नजीवाभिगमे' इति, तच्चैवम्-"धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसा अधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पएसा आगासत्थिकाए आगासत्थिकायस्स देसे आगासत्थिकायस्स पएसा अद्धासमये" [सूत्र-५]** इति, तत्र जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभावधारणात्पोषणाद्धर्मः, अस्तयः–प्रदेशास्तेषां कायः-सङ्घातः "**गण [१]काए य निकाए खंधे वग्गे तहेव रासी य**" [ ] इति वचनात् अस्तिकायः–प्रदेशसङ्घात इत्यर्थः, धर्मश्चासावस्तिकायश्च धर्मास्तिकायः, अनेन सकलधर्मास्तिकायरूपमवयविद्रव्यमाह, अवयवी च नाम अवयवानां तथारूपः सङ्घातपरिणामविशेष एव, न पुनरवयवद्रव्येभ्यः पृथगर्थान्तरद्रव्यं, तस्यानुपलम्भात्, तन्तव एव हि आतान-वितानरूपसङ्घात-परिणामविशेषमापन्ना लोके पटव्यपदेशभाज उपलभ्यन्ते, न तदतिरिक्तं पटाख्यं नाम द्रव्यम्, उक्तं चान्यैरपि-

"तन्त्वादिव्यतिरेकेण, न पटाद्युपलम्भनम्।
तन्त्वादयोऽविशिष्टा हि, पटादिव्यपदेशिनः।।१।।" [ ]

कृतं प्रसङ्गेन, अन्यत्र "**धर्मसङ्ग्रहणि**"टीकादावेतद्वादस्य चर्चितत्वात्, तथा तस्यैव बुद्धिपरिकल्पितो द्व्यादिप्रदेशात्मको विभागो धर्मास्तिकायस्य देशः, धर्मास्तिकायस्य प्रदेशाः–प्रकृष्टा देशाः प्रदेशाः, प्रदेशा निर्विभागा भागा इति, ते चासङ्ख्येयाः, लोकाकाशप्रदेशप्रमाणत्वात्तेषाम्, अत एव बहुवचनं, धर्मास्तिकायप्रतिपक्षभूतोऽधर्मास्तिकायः, किमुक्तं भवति? जीवानां पुद्गलानां च स्थितिपरिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्त्तोऽसङ्ख्यातप्रदेशात्मकोऽधर्मास्तिकायः, अधर्मास्तिकायस्य देश इत्यादि पूर्ववत्, तथा आ-समन्तात्सर्वाण्यपि द्रव्याणि काशन्ते-दीप्यन्तेऽत्र व्यवस्थितानीत्याकाशम्, अस्तयः–प्रदेशास्तेषां कायोऽस्तिकायः, आकाशं च तदस्तिकायश्चाकाशास्तिकायः, आकाशास्तिकायस्य देश इत्यादि प्राग्वत्, नवरमस्य प्रदेशा अनन्ताः, अलोकस्यानन्तत्वात् 'अद्धासमय' इति, अद्धेति कालस्याख्या, अद्धा चासौ समयश्चाद्धासमयः, अथवाऽद्धायाः समयो–निर्विभागो भागोऽद्धासमयः, अयं चैक एव वर्त्तमानः परमार्थतः सन् नातीताऽनागताः, तेषां यथाक्रमं विनष्टा-ऽनुत्पन्नत्वात्, ततः [२]कायत्वाभावाद्देशप्रदेशकल्पनाविरहः, अथाऽऽकाश-कालौ लोकेऽपि प्रतीताविति तौ श्रद्धातुं शक्येते, धर्मा-ऽधर्मास्तिकायौ तु कथं प्रत्येतव्यौ?

१. काय ए निकाए य निकाए खंधवग्गे - S।। **२.वर्तमानकालिकत्वविशिष्टस्तु एक एव अद्धासमयः अतः तस्य कायत्वासम्भवः ।।**

येन तद्विषया श्रद्धा भवेत्, उच्यते, गति-स्थिति-कार्यदर्शनात्, तथाहि–यद् यदन्वय-व्यतिरेकानुविधायि तत्तद्धेतुकमिति व्यवहर्त्तव्यं, यथा च चक्षुरिन्द्रियान्वयव्यतिरेकानुविधायि चाक्षुषं विज्ञानं, तथा च जीवानां पुद्गलानां च गति-स्थितिपरिणामपरिणतानामपि गति-स्थिती यथाक्रमं धर्माधर्मास्तिकायान्वयव्यतिरेकानुविधायिन्यौ, तस्मात्ते तद्धेतुके, न चायमसिद्धो हेतुः, तथाहि–जीवानां पुद्गलानां च गति-स्थितिपरिणाम-परिणतानामपि गति-स्थिती न [१]तत्परिणमनमात्रहेतुके, तन्मात्रहेतुकतायामलोकेऽपि तत्प्रसक्तेः, अथ न तत्परिणमनमात्रं हेतुः किन्तु विशिष्टः परिणामः, स चेत्थंभूतो यथा लोकमात्रक्षेत्रस्यान्तरेऽत्र गति-स्थितिभ्यां भवितव्यं न बहिः प्रदेशमात्रमप्यधिकं, ननु स एवेत्थम्भूतो विशिष्टपरिणाम आकालं जीवानां पुद्गलानां चोत्कर्षतोऽप्येतावत्प्रमाण एवाभूद् भवति भविष्यति वा न तु कदाचनाप्यधिकतर इत्यत्र किं नियामकं?, यथा हि किल परमाणोर्जघन्यतः परमाणुमात्रक्षेत्रातिक्रममादिं कृत्वोत्कर्षतश्चतुर्दशरज्ज्वात्मकमपि क्षेत्रं यावद् गतिरुपजायते तथा [२]परतोऽपि प्रदेशमात्रमप्यधिका किं न भवति?, तस्मादवश्यमत्र किञ्चि-न्नियामकमपरं वक्तव्यं, तच्च धर्माऽधर्मास्तिकायावेव नाकाशमात्रम्, आकाशमात्रस्यालोकेऽपि सम्भवात्, नापि लोकपरिमितमाकाशम्, इतरेतराश्रयदोषप्रसङ्गात्। तथाहि–जीवानां पुद्गलानां चान्यत्र गति-स्थित्योरभावे सिद्धे सति विवक्षितस्य परिमितस्याकाशस्य लोकत्वसिद्धिः, तत्सिद्धौ चान्यत्र जीव-पुद्गलानां गति-स्थित्यभावसिद्धिरित्येकाभावेऽन्यतरस्याप्यभावः, अथ किमिदमसम्बद्धमुच्यते?, यत् लोकत्वेन सम्प्रति व्यवह्रियते क्षेत्रं, तावन्मात्रस्यैवाकाशखण्डस्य गतिस्थित्युपष्टम्भकस्वभावो न परस्य प्रदेशमात्रस्यापि ततो न कश्चिद्दोषः, ननु तावन्मात्रस्यैवाकाशस्य स स्वभावो न परस्य प्रदेशमात्रस्यापीत्यत्रापि सुधियः कारणान्तरं मृगयन्ते, आकाशत्वमात्रस्योभयत्रापि तुल्यत्वात्, विशेषणमन्तरेण च वैशिष्ट्यायोगात्, कारणान्तरं धर्मा-ऽधर्मास्तिकायभावाभावावेव नापरमिति स्थितम्, अन्यच्च–तावन्मात्रस्याकाशखण्डस्य स स्वभावो न परस्येत्यपि कुतः प्रमाणात्परिकल्प्यते?, आगमप्रमाणादिति चेत् तथाहि–तावत्येवाकाशखण्डे जीवानां च पुद्गलानां च गति-स्थितिमतां गति-स्थिती तत्र तत्र व्यावर्ण्येते न परत इति, यद्येवं तर्ह्यागमप्रामाण्यबलादेव धर्मा-ऽधर्मास्तिकायावपि गति-स्थितिनिबन्धनमिष्येयातां किमाकाशखण्डस्य निर्मूलस्वभावान्तरपरिकल्पनाऽऽयासेनेति कृतं प्रसङ्गेन।

अथामीषामित्थं क्रमोपन्यासे किं प्रयोजनम्?, उच्यते, इह धर्मास्तिकाय इति पदं मङ्गलभूतम्, आदौ धर्मशब्दान्वितत्वात्, पदार्थप्ररूपणा च सम्प्रत्युत्क्षिप्ता वर्त्तते, ततो मङ्गलार्थमादौ

---

१. तत् PV **नास्ति**।। २. परमोऽपि VPS।।

धर्मास्तिकायस्योपादानं, धर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्तिकाय इति तदनन्तरमधर्मास्तिकायस्य, द्वयोरपि चानयोराधारभूतमाकाशमिति तदनन्तरमाकाशास्तिकायस्य, ततः पुनरजीवसाधर्म्यादद्धासमयस्य, अथवा इह धर्माधर्मास्तिकायौ विभू न भवतः, तद्विभुत्वेन[१] तत्सामर्थ्यतो जीवपुद्गलानामस्खलितप्रचारप्रवृत्ते-[२]र्लोकाऽलोकव्यवस्थाऽनुपपत्तेः, अस्ति च लोका-ऽलोकव्यवस्था, तत एतावविभू सन्तौ यत्र क्षेत्रे समवगाढौ तावत्प्रमाणो लोकः, शेषस्त्वलोक इति सिद्धम्, उक्तं च–

"धर्माधर्मविभुत्वात्सर्वत्र च जीवपुद्गलविचारात्।
नालोकः कश्चित्स्यान्न च संमतमेतदार्याणाम्।।१।।
तस्माद्धर्माधर्मावगाढौ व्याप्य लोकखं सर्वम्।
एवं हि परिच्छिन्नः सिद्ध्यति लोकस्तदविभुत्वात्।।२।।" [द्र.प्रज्ञा. हा.टी.सू.३]

तत एवं लोकालोकव्यवस्थाहेतू धर्माऽधर्मास्तिकायावित्यनयोरादावुपादानं, तत्रापि माङ्गलिकत्वात् प्रथमतो धर्मास्तिकायस्य, [३]तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकायस्य, ततो लोकालोकव्यापित्वादा-काशास्तिकायस्य, तदनन्तरं लोके समयासमयक्षेत्रव्यवस्थाकारित्वादद्धासमयस्य, एवमागमानुसारेणान्यदपि युक्त्यनुपाति वक्तव्यमित्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः, अत्रोपसंहारवाक्यं-**'से तं अरूविअ[४]जीवाभिगमे'**।।४।। अत ऊर्द्ध्वमिदं सूत्रम्-

(५) से किं तं रूविअजीवाभिगमे?, रूविअजीवाभिगमे चउव्विहे पण्णत्ते, तं जहा-खंधा खंधदेसा खंधप्पएसा परमाणुपोग्गला, ते समासतो पंचविहा पण्णत्ता, तंजहा-वण्णपरिणया गंध० रस० फास० संठाणपरिणया, एवं ते ५ जहा पण्णवणाए, सेत्तं रूविअजीवाभिगमे, से तं अजीवाभिगमे ।। ५।।

'से किं तं रूविअजीवाभिगमे?, रूविअजीवाभिगमे चउव्विहे पण्णत्ते, तं०-खंधा खंधदेसा खंधपएसा परमाणुपुग्गला' इह **'स्कन्धा'** इत्यत्र बहुवचनं पुद्गलस्कन्धानामनन्तत्वख्यापनार्थं, तथा चोक्तम्-**"दव्वतो णं पुग्गलत्थिकाए णं अनन्ते"** इत्यादि, **'स्कन्धदेशाः'** स्कन्धानामेव स्कन्धत्वपरिणाममजहतां बुद्धिपरिकल्पिता द्व्यादिप्रदेशात्मका विभागाः, अत्रापि बहुवचनमनन्तप्रदेशिकेषु स्कन्धेषु स्कन्धदेशानन्तत्वसम्भावनार्थं, **'स्कन्धप्रदेशाः'** स्कन्धानां स्कन्धत्वपरिणाममजहतां प्रकृष्टा देशाः-निर्विभागा

---

१. न-S **नास्ति**।। २. S । ०लोकव्य० **मु.**।। ३. तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकायस्य–SVP **नास्ति**।। ४. ०अ० SVP **नास्ति**।।

भागाः परमाणव इत्यर्थः, **'परमाणुपुद्गलाः'** स्कन्धत्वपरिणामरहिताः केवलाः परमाणवः।। अत ऊर्द्ध्वं सूत्रमिदम्-**'ते समासतो पंचविधा पन्नत्ता, तं जहा-वण्णपरिणया गंधपरिणता रसपरिणता फासपरिणता संठाणपरिणता,** तत्थ णं जे वण्णपरिणया ते पंचविहा पन्नत्ता, तं जहा-कालवण्णपरिणता नीलवण्णपरिणता इत्यादि तावद् यावत् **'से तं रूविअजीवाभिगमे, से तं अजीवाभिगमे**।। ५।।

(६) से किं तं जीवाभिगमे?, जीवाभिगमे दुविहे पण्णत्ते, तंजहा-संसारसमावण्णगजीवाभिगमे य असंसारसमावण्णगजीवाभिगमे य।। ६ ।।

(७) से किं तं असंसारसमावण्णगजीवाभिगमे?, २ दुविहे पण्णत्ते, तंजहा-अणंतरसिद्धासंसारसमावण्णगजीवाभिगमे य परंपरसिद्धासंसारसमावण्णग-जीवाभिगमे य।।७।।

(८) से किं तं अणंतरसिद्धासंसारसमावण्णगजीवाभिगमे?, २ पण्णरसविहे पण्णत्ते, तंजहा-तित्थसिद्धा जाव[1] अणेगसिद्धा, से तं अणंतरसिद्धा।।८।।

(९) से किं तं परंपरसिद्धासंसारसमावण्णगजीवाभिगमे?, २ अणेगविहे पण्णत्ते, तंजहा पढमसमयसिद्धा[2] दुसमयसिद्धा जाव अणंतसमयसिद्धा, से तं परंपरसिद्धा-संसारसमावण्णगजीवाभिगमे, से तं असंसारसमावण्णगजीवाभिगमे।। ९।।

संसरणं संसारो-नारक-तिर्यङ्-नरा-ऽमरभवभ्रमणलक्षणस्तं सम्यग्-एकीभावेनापन्नाः-प्राप्ताः संसारसमापन्नाः[3] संसारवर्त्तिनस्ते च ते जीवाश्च तेषामभिगमः **संसारसमापन्नजीवाभिगमः**। तथा न संसारोऽसंसारः-संसारप्रतिपक्षभूतो मोक्ष इत्यर्थः, तं समापन्ना असंसारसमापन्नास्ते च ते जीवाश्च तेषामभिगमो**ऽसंसारसमापन्नजीवाभिगमः**, चशब्दौ उभयेषामपि जीवानां जीवत्वं प्रति तुल्यकक्षतासूचकौ, तेन ये विध्यातप्रदीपकल्पं निर्वाणमभ्युपगतवन्तः ये च नवानामात्मगुणानामत्यन्तोच्छेदेन ते निरस्ता द्रष्टव्याः, तथाभूतमोक्षाभ्युपगमे तदर्थं प्रेक्षावतां प्रवृत्त्यनुपपत्तेः, न खलु सचेतनः स्ववधाय कण्ठे कुठारिकां व्यापारयति, दुःखितोऽपि हि जीवन् कदाचिद् भद्रमाप्नुयात् मृतेन तु निर्मूलंमपहस्तिताः

---

१. द्र. **प्रज्ञापना १।१२।।** २. अपढ० L। ३. संसारापन्नाः-S। **एवमग्रेऽपि** ।। ४. PVS । ० मपि ह० **मु.** ।।

सम्पद इति, इह केवलान् अजीवान् जीवांश्चानुच्चार्याभिगमशब्दसंवलितप्रश्नोऽभिगमव्यतिरेकेण प्रतिपत्तेरसम्भवतस्तेषामभिगमगम्यताधर्मख्यापनार्थः तेन **'सदेवेद'**[ ]मित्यादि सदद्वैताद्यपोह उक्तो वेदितव्यः, सदद्वैताद्यभ्युपगमेऽभिगमगम्यतारूपधर्मायोगतः प्रतिपत्तेरेवासम्भवात्। तत्राल्पवक्तव्यत्वात्प्रथमतोऽसंसारसमापन्नजीवाभिगमसूत्रम्–

'से किं तं असंसारसमावन्नजीवाभिगमे?, २ दुविहे पं०, तं०-अनंतरसिद्धअसंसारसमावन्नजीवाभिगमे य परंपरसिद्धअसंसारसमावन्नजीवाभिगमे य' इत्यादि तावद्वाच्यं यावदुपसंहारवाक्यं **'से तं असंसारसमापन्नजीवाभिगमे'**अस्य व्याख्यानं **"प्रज्ञापनाटीका"**तो वेदितव्यं, तत्र सविस्तरमुक्तत्वात् ।।६-९।।

सम्प्रति संसारसमापन्नजीवाभिगममभिधित्सुस्तत्प्रश्नसूत्रमाह–

(१०) से किं तं संसारसमावन्नगजीवाभिगमे?, संसारसमावण्णएसु णं जीवेसु इमाओ णव पडिवत्तीओ एवमाहिज्जंति, तंजहा-एगे एवमाहंसु-दुविहा संसारसमावण्णगा जीवा पं०, एगे एवमाहंसु-तिविहा संसारसमावण्णगा जीवा पं०, एगे एवमाहंसु-चउव्विहा संसारसमावण्णगा जीवा पं०, एगे एवमाहंसु-पंचविहा संसारसमावण्णगा जीवा पं०, एतेणं अभिलावेणं जाव दसविहा संसारसमावण्णगा जीवा पण्णत्ता।। १० ।।

से किं तं संसारसमावन्नजीवाभिगमे? सूरिराह-**संसारसमावण्णएसु णं जीवेसु इमाओ णव पडिवत्तीओ एवमाहिज्जंति** इत्यादि संसारसमापन्नेषु णमिति वाक्यालङ्कारे जीवेषु **'इमाः'** वक्ष्यमाणलक्षणा **'नव प्रतिपत्तयो'** द्विप्रत्यवतारमादौ कृत्वा दशप्रत्यवतारं यावद् ये नव प्रत्यवतारास्तद्रूपाणि प्रतिपादनानि संवित्तय इतियावत् 'एवं' वक्ष्यमाणया रीत्याऽऽख्यायन्ते पूर्वसूरिभिः, इह प्रतिपत्त्याख्यानेन प्रणालिकयाऽर्थाख्यानं द्रष्टव्यं, प्रतिपत्तिभावेऽपि शब्दादर्थे प्रवृत्तिकरणात्, तेन यदुच्यते शब्दाद्वैतवादिभिः-**"शब्दमात्रं विश्व"**[ ] मिति, तदपास्तं द्रष्टव्यं, तदपासने चेयमुपपत्तिः-एकान्तैकस्वरूपे वस्तुन्यभिधानद्वयासम्भवात् भिन्नप्रवृत्तिनिमित्ताभावात्, ततश्च शब्दमात्रमित्येव स्यात् न विश्वमिति, प्रणालिकयाऽर्थाभिधानमेवोपदर्शयति, **तद्यथा-एके** आचार्या **एवमाख्यातवन्तः-द्विविधाः संसारसमापन्ना जीवाः प्रज्ञप्ताः, एके** आचार्या **एवमाख्यातवन्तः-त्रिविधाः संसारसमापन्ना जीवाः,** एवं **यावद्दशविधा** इति, इह एके इति न पृथग्मतावलम्बिनो दर्शनान्तरीया इव केचिदन्ये आचार्याः, किन्तु य एव पूर्वं

द्विप्रत्यवतारविवक्षायां वर्त्तमाना एवमुक्तवन्तः यथा द्विविधाः संसारसमापन्ना जीवा इति त एव त्रिप्रत्यवतारविवक्षायां वर्त्तमानाः, द्विप्रत्यवतारविवक्षामपेक्ष्य त्रिप्रत्यवतारविवक्षाया अन्यत्वात्, विवक्षावतां तु कथञ्चिद् भेदादन्यं[1] इति वेदितव्याः, अत एव प्रतिपत्तय इति परमार्थतोऽनुयोगद्वाराणीति प्रतिपत्तव्यम्, इह य एव द्विविधास्त एव त्रिविधास्त एव चतुर्विधा यावद्दशविधा इति तेषामनेकस्वभावतायां तत्तद्धर्मभेदेन तथा तथाऽभिधानता युज्यते, नान्यथा, एकान्तैकस्वभावतायां तेषां वैचित्र्यायोगतस्तथा तथाऽभिधानप्रवृत्तेरसम्भवाद्, एवं सति

"अष्टविकल्पं दैवं तिर्यग्योनं च पञ्चधा भवति।

मानुष्यं चैकविधं समासतो भौतिकः सर्गः।।१।।" [ ]

इति वाङ्मात्रमेव, अधिष्ठातृजीवानामेकरूपत्वाभ्युपगमेन तथारूपवैचित्र्यासम्भवादिति, एवमन्येऽपि प्रवादास्तथा तथा वस्तुवैचित्र्यप्रतिपादनपरा निरस्ता द्रष्टव्याः, सर्वथैकस्वभावत्वाभ्युपगतौ वैचित्र्यायोगात् ।।१०।।

सम्प्रत्येता एव प्रतिपत्तीः क्रमेण व्याचिख्यासुः प्रथमत आद्यां प्रतिपत्तिं विभावयिषुरिदमाह-

(११) तत्थ णं जे ते एवमाहंसु 'दुविहा संसारसमावण्णगा जीवा पण्णत्ता' ते एवमाहंसु-तंजहा तसा चेव थावरा चेव।। ११ ।।

'तत्थ जे ते' इत्यादि, 'तत्र' तेषु नवसु प्रतिपत्तिषु मध्ये **ये ते** द्विप्रत्यवतारविवक्षायां वर्त्तमाना **एवं[2] व्याख्यातवन्तः-द्विविधाः संसारसमापन्नका जीवाः प्रज्ञप्ता** इति **ते** णं इति वाक्यालङ्कारे, **'एवं'** वक्ष्यमाणरीत्या द्विविधत्वभावनार्थमाख्यातवन्तः, **'तद्यथे'** त्युपन्यस्तद्वैविध्योपदर्शनार्थः, **त्रसाश्चैव स्थावराश्चैव,** तत्र त्रसन्ति-उष्णाद्यभितप्ताः सन्तो विवक्षितस्थानादुद्विजन्ते[3] गच्छन्ति च छायाद्यासेवनार्थं स्थानान्तरमिति त्रसाः, अनया च व्युत्पत्त्या त्रसास्त्रसनामकर्मोदयवर्त्तिन एव परिगृह्यन्ते, न शेषाः, अथ च शेषैरपीह प्रयोजनं, तेषामप्यग्रे वक्ष्यमाणत्वात्, तत एवं व्युत्पत्तिः-त्रसन्ति-अभिसन्धिपूर्वक-मनभिसन्धिपूर्वकं वा ऊर्ध्वमधस्तिर्यक् चलन्तीति त्रसाः-तेजो-वायवो द्वीन्द्रियादयश्च, उष्णाद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः सन्तस्तिष्ठन्तीत्येवंशीलाः स्थावराः-पृथिव्यादयः, चशब्दौ स्वगतानेकभेदसमुच्चयार्थौ, एवकारावधारणार्थौ, एत एव संसारसमापन्नका जीवाः, एतद्व्यतिरेकेण संसारिणामभावात् ।। ११।।

---

१. ०न्ये PV ।। २. एवमाख्यात० S।। ३. SVP । ०न्ति-मु.।।

तत्राल्पवक्तव्यत्वात्प्रथमतः स्थावरानभिधित्सुस्तत्प्रश्नसूत्रमाह–

(१२) से किं तं थावरा?, २ तिविहा पन्नत्ता, तंजहा-पुढविकाइया १ आउक्काइया २ वणस्सइकाइया ३।। १२ ।।

'से किं तं' इत्यादि, **अथ के ते स्थावराः**?, सूरिराह–स्थावरास्त्रि**विधाः प्रज्ञप्ताः**, **तद्यथा-पृथिवीकायिकाः अप्कायिकाः वनस्पतिकायिकाः**, पृथिवी काठिन्यलक्षणा प्रतीता,सैव कायः शरीरं येषां ते पृथिवीकायिकाः आर्षत्वात्स्वार्थे इकप्रत्ययः, आपो-द्रवास्ताश्च प्रतीताः ता एव कायः–शरीरं येषां ते अप्कायाः अप्काया एवाप्कायिकाः, वनस्पतिः–लतादिरूपः प्रतीतः स एव कायः–शरीरं येषां ते वनस्पतिकायाः वनस्पतिकाया एव वनस्पतिकायिकाः, सर्वत्र बहुवचनं बहुत्वख्यापनार्थं, तेन **"पृथिवी देवता"** [ ] इत्यादिना यत्तदेकजीवत्वमात्रप्रतिपादनं तदपास्तमवसेयं, यदि पुनस्तदधिष्ठात्री काचनापि देवता परिकल्प्यते तदानीमेकत्वेऽप्यविरोधः। इह सर्वभूताधारा पृथिवीति प्रथमं पृथिवीकायिकानामुपादानं, तदनन्तरं तत्प्रतिष्ठितत्वादप्कायिकानां, तदनन्तरं **"जत्थ जलं तत्थ वणं"** [प्रज्ञापनासूत्र] इति सैद्धान्तिकवस्तुप्रतिपादनार्थं वनस्पतिकायिकानामिति, इह त्रिविधत्वं स्थावराणां तेजो-वायूनां लब्ध्या स्थावराणामपि सतां गतित्रसेष्वन्तर्भाववविवक्षणात्, तथा च **तत्त्वार्थसूत्र**मप्येवं व्यवस्थितं **"पृथिव्यम्बु-वनस्पतयः स्थावराः।। तेजो-वायू द्वीन्द्रियादयश्च त्रसाः"** [तत्त्वार्थ० अ० २ सू० १३-१४] इति।। १२ ।।

तत्र **'यथोद्देशं निर्देश'** इति प्रथमतः पृथिवीकायिकप्रतिपादनार्थमाह-

(१३) से किं तं पुढविकाइया?, २ दुविहा पं०, तं०-सुहुमपुढविकाइया य बायरपुढविकाइया य ।। १३ ।।

'से किं तं' इत्यादि, **अथ के ते पृथिवीकायिकाः**?, सूरिराह–**पृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-सूक्ष्मपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च**, ते च सूक्ष्मनामकर्मोदयात्सूक्ष्मा बादरनाम-कर्मोदयात्तु बादराः, कर्मोदयजनिते खल्वेते सूक्ष्म-बादरत्वे, नापेक्षिके बदरा-ऽऽमलकयोरिव, सूक्ष्माश्च ते पृथिवीकायिकाश्च सूक्ष्मपृथिवीकायिकाः, बादराश्च ते पृथिवीकायिकाश्च बादरपृथिवीकायिकाः, चशब्दौ स्वगतानेकभेदसूचकौ, सूक्ष्माः सकललोकवर्त्तिनः बादराः प्रतिनियतैकदेशधारिणः।। १३।।

तत्र सूक्ष्मपृथिवीकायिकप्रतिपादनार्थमाह–

(१४-A) से किं तं सुहुमपुढविकाइया?, २ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तगा य।।

'से किं तं' इत्यादि, **अथ के ते सूक्ष्मपृथिवीकायिकाः?**, सूरिराह-**सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–पर्याप्तकाश्चापर्याप्तकाश्च,** तत्र पर्याप्तिर्नाम-आहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयादुपजायते, किमुक्तं भवति? उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्सम्पर्कतस्तद्रूपतया जातानां यः शक्तिविशेष आहारादि-पुद्गलखलरसरूपतापादनहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणां[1]माहारपुद्गलखलरसरूपतापरिणमनहेतुः सा पर्याप्तिः, सा च षोढा, तद्यथा-आहारपर्याप्तिः १ शरीरपर्याप्तिः २ इन्द्रियपर्याप्तिः ३ प्राणापानपर्याप्तिः ४ भाषापर्याप्तिः ५ मनःपर्याप्तिश्च ६, तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति साऽऽहारपर्याप्तिः १, यया रसीभूतमाहारं रसा-ऽसृग्मांस-मेदो-ऽस्थि-मज्जा-शुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः २, यया धातुरूपतया परिणमितमाहारमिन्द्रिय-रूपतया परिणमयति सा इन्द्रियपर्याप्तिः ३, यया पुनरुच्छ्वासप्रायोग्यवर्गणापुद्गलानादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः ४, यया तु भाषाप्रायोग्यान् पुद्गलानादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५, यया पुनर्मनःप्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति सा मनःपर्याप्तिः ६, एताश्च यथाक्रममेकेन्द्रियाणां सञ्ज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां च चतुष्पञ्च-षट्सङ्ख्या भवन्ति, उत्पत्तिप्रथमसमये एव च एता यथायथं सर्वा अपि युगपन्निष्पादयितुमारभ्यन्ते क्रमेण च निष्ठामुपयान्ति, तद्यथा–प्रथममाहारपर्याप्तिस्ततः शरीरपर्याप्तिस्तत इन्द्रियपर्याप्तिरित्यादि, आहारपर्याप्तिश्च प्रथमसमय एव निष्पत्तिमुपगच्छति, शेषास्तु प्रत्येकमन्तर्मुहूर्त्तेन कालेन। अथाहारपर्याप्तिः प्रथमसमय एव निष्पद्यत इति कथमवसीयते?, उच्यते, इह भगवताऽऽर्यश्यामेन **प्रज्ञापनाया**माहारपदे द्वितीयोद्देशके सूत्रमिदमपाठि-

"आहारपज्जत्तीए अपज्जत्तए णं भंते! किं आहारए अणाहारए?, गोयमा! नो आहारए अणाहारए" [**तुला २८/२ सू.१९०५**] इति, तत आहारपर्याप्त्या अपर्याप्तो विग्रहगतावेवोपपद्यते नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रसमागतस्य प्रथमसमय एवाहारकत्वात्, तत एकसामयिकी आहारपर्याप्तिनिर्वृत्तिः, यदि

---

१. ०माहारपुद्गलविशेषाणामाहार० **मु.।।**

पुनरुपपातक्षेत्रसमागतोऽप्याहारपर्याप्त्या अपर्याप्तः स्यात्तत एवं **व्या**करणसूत्रं पठेत्-**"सिय आहारए सिय अणाहारए" [प्रश्न व्या.]** यथा शरीरादिपर्याप्तिषु **"सिय आहारए सिय अणाहारए"** इति, सर्वासामपि च पर्याप्तीनां पर्याप्तिपरिसमाप्तिकालोऽन्तर्मुहूर्त्तप्रमाणः, पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः, **"अभ्रादिभ्य" [सि.हे. ७/२/४६]** इति मत्वर्थीयोऽप्रत्ययः, पर्याप्ता एव पर्याप्तकाः, ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेऽपर्याप्ताः अपर्याप्ता एवापर्याप्तकाः, ते द्विधा-लब्ध्या करणैश्च, तत्र येऽपर्याप्तका एव म्रियन्ते ते लब्ध्याऽपर्याप्तकाः, ये पुनः करणानि-शरीरेन्द्रियादीनि न तावन्निर्वर्त्तयन्ति अथ चावश्यं निर्वर्त्तयिष्यन्ति ते करणापर्याप्ताः सम्प्राप्ताः।। सम्प्रति विनेयजनानुग्रहाय शेषवक्तव्यतासङ्ग्रहार्थमिदं संग्रहणिगाथाद्वयमाह-

(१४-B) "सरीरोगाहणसंघयण संठाणकसाय तह य हुंति सन्नाओ।
लेसिंदियसमुग्घाए सन्नी वेए य पज्जत्ती।।१।।
दिट्ठी दंसणनाणे जोगुवओगे तहा किमाहारे।
उववायठिई समुग्घाय चवणगइरागई चेव।।२।। ।। १४।।

अस्य व्याख्या-प्रथमतः सूक्ष्मपृथिवीकायिकानां **शरीराणि** वक्तव्यानि, तदनन्तर**मवगाहना,** ततः **संहननं,** तदनन्तरं **संस्थानं,** ततः **कषायाः,** ततः कति **भवन्ति सञ्ज्ञाः ?** इति वक्तव्यं, ततो **लेश्याः,** तदनन्तर**मिन्द्रियाणि,** ततः **समुद्घाताः,** ततः किं **सञ्ज्ञिनोऽ**सञ्ज्ञिनो वा? इति वक्तव्यं, तदनन्तरं **वेदो** वक्तव्यः, ततः **पर्याप्तयो** यथा कति पर्याप्तयः सूक्ष्मपृथिवीकायिकानाम्? इत्यादि, पर्याप्तिग्रहणमुपलक्षणं तेन तत्प्रतिपक्षभूता अपर्याप्तयोऽपि वक्तव्या इति द्रष्टव्यं, तदनन्तरं **दृष्टि**र्वक्तव्या, ततो **दर्शनं,** तदनन्तरं **ज्ञानं,** ततो **योगः,** तत[१] **उपयोगः,** तथा **किमाहार**माहारयन्ति सूक्ष्मपृथिवीकायिकाः इत्यादि वक्तव्यं, तदनन्तर**मुपपातः,** ततः **स्थितिः,** ततः **समुद्घातः** समुद्घातमधिकृत्य मरणं वक्तव्यमित्यर्थः, तदनन्तरं **च्यवनं,** ततो **गत्यागती** इति, इति सर्वसङ्ख्यया त्रयोविंशतिर्द्वाराणि।। १४।।

तत्र प्रथमद्वारव्याख्यानार्थमाह-

(१५) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता, गोयमा! तओ सरीरगा पं०, तं०-ओरालिए तेयए कम्मए।। १५।।

१. तत उपयोग - SVP **नास्ति**।।

'तेसि णं भंते।' इत्यादि 'तेषां' सूक्ष्मपृथिवीकायिकानां **णमि**ति वाक्यालङ्कारे **'भदन्त!'** परमकल्याणयोगिन्! **कति शरीराणि प्रज्ञप्तानि?**, अथ कः कमेवमाह?, उच्यते, भगवान् गौतमो भगवन्तं श्रीमन्महावीरं, कथमेतद् विनिश्चीयते इति चेद्?, उच्यते, निर्वचनसूत्रात्, ननु गौतमोऽपि भगवान् उपचितकुशलमूलो गणधरस्तीर्थकरभाषितमातृकापदत्रयश्रवणमात्रावाप्तप्रकृष्टश्रुतज्ञानावरण-क्षयोपशमश्चतुर्दशपूर्वविद् विवक्षितार्थपरिज्ञानसमन्वित एव ततः किमर्थं पृच्छति?, तथाहि-न चतुर्दशपूर्वविदः प्रज्ञापनीयं किञ्चि[1]दविदितमस्ति, विशेषतः सर्वाक्षरसंनिपातिनः संभिन्नश्रोतसो भगवतो गणभृतः सर्वोत्कृष्टश्रुतलब्धिसमन्वितस्य गौतमस्य, उक्तं च-

"[2]संखातीते वि भवे, [3]साहइ जं वा परो उ पुच्छेज्जा।
न य णं अणाइसेसी, वियाणई एस छउमत्थो।।१।।" [द्र. प्रज्ञा. हा.टी.सू.३९]

उच्यते-शिष्यसंप्रत्ययार्थं, तथाहि-जानन्नेव भगवान् अन्यत्र विनेयेभ्यः प्रतिपाद्य तत्संप्रत्ययनिमित्तं भूयोऽपि भगवन्तं पृच्छतीति, अथवा गणधरप्रश्नतीर्थकरनिर्वचनरूपं किञ्चित्सूत्रमितीत्थमधिकृतसूत्रकारः सूत्रं रचितवान्, यदि वा सम्भवति भगवतोऽपि स्वल्पोऽनाभोगः छद्मस्थत्वादिति पृच्छति, उक्तं च-

"न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति।
ज्ञानावरणीयं हि, ज्ञानावरणप्रकृतिकर्म।।१।।" [द्र. तत्त्वार्थ. सिद्ध.वृत्तिः ७/१८]

इति कृतं प्रसङ्गेन, प्रस्तुतमुच्यते, भगवानाह-**गोयमे**त्यादि, अनेन लोकप्रथितमहागोत्रविशिष्टा-भिधायकेनामन्त्रणध्वनिनाऽऽमन्त्रयन्निदं ज्ञापयति-प्रधानासाधारणगुणेनोत्साह्य विनेयस्य धर्मः कथनीयः, इत्थमेव सम्यक्प्रतिपत्तियोगादिति, **त्रीणि शरीराणि प्रज्ञप्तानि,** इह शरीराणि पञ्च भवन्ति, **तद्यथा-औदारिकं वैक्रियमाहारकं तैजसं कार्मणं च,** तत्रोदारं-प्रधानं, प्राधान्यं चास्य तीर्थकर-गणधर-शरीराण्यधिकृत्य, ततोऽन्यस्यानुत्तरसुरशरीरस्यापि अनन्तगुणहीनत्वात्, यद्वा उदारं सातिरेकयोजन-सहस्रमानत्वात् शेषशरीरापेक्षया बृहत्प्रधानं, बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया द्रष्टव्या, अन्यथोत्तरवैक्रियं योजनलक्षमानमपि लभ्यते, उदारमेव औदारिकं, विनयादिपाठादिकण् १, तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियं, तथाहि-तदेकं भूत्वाऽनेकं भवति, अनेकं भूत्वा एकं, तथाऽणु भूत्वा महद् भवति, महच्च भूत्वाऽणु तथा खचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खचरं तथा दृश्यं भूत्वाऽदृश्यं भवति, अदृश्यं भूत्वा दृश्यमिति, तच्च द्विविधम्-औपपातिकं

१. ०दविवक्षितमस्ति SPV ।। २. **सङ्ख्यातीतानपि भवान् साधयति यद्वा परः पृच्छेत्। न चानतिशायी विजानात्येष छद्मस्थः (इति) ।।१।।** ३. साहेइ - S।।

लब्धिप्रत्ययं च, तत्रौपपातिकमुपपातजन्मनिमित्तं, तच्च देव-नारकाणां, लब्धिप्रत्ययं तिर्यग्मनुष्याणां २, तथा चतुर्दशपूर्वविदां तीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते-निर्वर्त्त्यते इत्याहारकं, "**कृद्बहुलक**"[ ]मिति वचनात्कर्मणि वुञ्, यथा पादहारक इत्यत्र, उक्तं च-

"**कज्जंमि समुप्पन्ने[1], सुयकेवलिणा विसिट्ठलद्धीए।**
जं एत्थ आहरिज्जइ, भणंति आहारगं तं तु।।१।।" [द्र.स्थानाङ्ग सू.५-१-३९५ अ.टी.]

कार्यं चेदम्-

"**पाणिदयरिद्धिदंसण[2], सुहुमपयत्थावगहणहेउं वा।**
संसयवोच्छेयत्थं, गमणं जिणपायमूलंमि।।१।।" [द्र..स्था.सू. ५-१-३९५ अभय.टी.]

एतच्चाहारकं कदाचनापि लोके सर्वथाऽपि न भवति, तच्चाभवनं जघन्यत एकं समयमुत्कर्षतः षण्मासान् यावत्, उक्तं च-

"**आहारगाइ[3] लोगे, छम्मासा जा न होंतिवि कयाइं।**
उक्कोसेणं नियमा, एक्कं समयं जहन्नेणं।।१।।" [द्र.प्रज्ञापना सू.२१४ हारि.टी.]

आहारकं च शरीरं वैक्रियशरीरापेक्षयाऽत्यन्तशुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहात्मकं ३, तथा तेजसां-तेजःपुद्गलानां विकारस्तैजसं "**विकार**" [ ] इत्यण्, तत् औष्मलिङ्गं भुक्ताहारपरिणमन-कारणं, तद्वशाच्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः, उक्तं च-

"**सव्वस्स[4] उम्हसिद्धं, रसाइआहारपाकजणगं च।**
तेयगलद्धिनिमित्तं च, तेयगं होइ नायव्वं।।१।।" ४, [स्था.सू.५-१-३९५ अभय.टीका]

तथा कर्मणो जातं कर्मजं, किमुक्तं भवति? कर्मपरमाणव एवात्मप्रदेशैः सह क्षीरनीरवदन्योऽन्यानुगताः सन्तः शरीररूपतया परिणताः कर्मजं शरीरमिति, अत एवैतदन्यत्र कार्मणमित्युक्तं, कर्मणो विकारः कार्मणमिति, तथा चोक्तम्-

---

१. **कार्ये समुत्पन्ने श्रुतकेवलिना विशिष्टलब्ध्या । यदत्राहियते भणन्त्याहारकं तत्तु ।। १ ।।**
२. **प्राणिदयऋद्धिदर्शनसूक्ष्मपदार्थावगाहहेतवे वा। संशयव्युच्छेदार्थं गमनं जिनपादमूले ।। २ ।।**
३. **०णत्थमत्थोवगहणहेउं वा- इति स्थानाङ्ग अभयदेवसूरिवृत्तौ ।।**
४. **आहारकादयो नियमाल्लोके षण्मासान् यावन्न भवन्त्यपि कदाचित् । उत्कृष्टतो नियमात्, एकं समयं जघन्येन ।। १ ।।**
५. PVS **बाबु** । ततश्च वि० **मु**।।
६. **सर्वस्यौष्ण्यसिद्धं रसाद्याहारपाकजनकं च । तेजोलब्धिनिमित्तं च, तैजसं भवति ज्ञातव्यम् ।। १ ।।**

"[१]कम्मविकारो कम्मणमट्ठविहविचित्तकम्मनिप्फन्नं।
सव्वेसिं सरीराणं, कारणभूयं मुणेयव्वं।।१।।" [द्र. पञ्चलिङ्गी प्र. ५-९३ वृत्ति]

अत्र '**सव्वेसि**'मिति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं-बीजभूतं कार्मणं शरीरं, न खल्वामूलमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावः, इदं च कर्मजं शरीरं जन्तोर्गत्यन्तरसङ्क्रान्तौ साधकतमं कारणं, तथाहि-कर्मजेनैव वपुषा तैजससहितेन परिकरितो जन्तुर्मरणदेशमपहायोत्पत्तिदेशमभिसर्पति, ननु यदि तैजससहितकार्मणवपुःपरिकरितो गत्यन्तरं संक्रामति तर्हि स गच्छन्नागच्छन् कस्मान्न दृष्टिपथमवतरति?, उच्यते, कर्मपुद्गलानां तैजसपुद्गलानां चातिसूक्ष्मतया चक्षुरादीन्द्रियाऽगोचरत्वात्, तथा च परतीर्थिकैरप्युक्तम्-

"अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते।
निष्क्रामन् प्रविशन् वाऽपि, नाभावोऽनीक्षणादपि।।१।।" [द्र. पञ्चलिङ्गी प्र. ५-९३ वृत्ति]

एतेषां पञ्चानां शरीराणां मध्ये यानि त्रीणि शरीराणि सूक्ष्मपृथिवीकायिकानां तानि नामग्राहमुपदर्शयति-**'तंजहा-ओरालिए तेयए कम्मए'**, वैक्रिया-ऽऽहारके तु तेषां न सम्भवतो, भवस्वभावत एव तल्लब्धि-शून्यत्वाद्।। १५ ।। अधुनाऽवगाहनाद्वारमाह-

(१६) तेसि णं भंते! जीवाणं के महालिया सरीरोगाहणा पं०, गो०! जहन्नेणं [२]अंगुलासंखेज्जतिभागं उक्कोसेणवि [३]अंगुलासंखेज्जतिभागं ।।१६।।

'तेसि णं भंते!' इत्यादि सुगमं, नवरं जघन्यपदोत्कृष्टपदयोस्तुल्यश्रुतावपि जघन्यपदादुत्कृष्ट-पदमधिकमवसातव्यम्।।१६ ।।

संहननद्वारमाह-

(१७) तेसि णं भंते! जीवाणं सरीरा किंसंघयणा पण्णत्ता?, गोयमा! [४]छेवट्ठसंघयणा पण्णत्ता।। १७ ।।

तेसि णंमित्यादि, **तेषां भदन्त! जीवानां शरीरकाणि किंसंहननानि प्रज्ञप्तानि?**, संहननं नामाऽस्थिनिचयरूपं, तच्च षोढा, तद्यथा-वज्रऋषभनाराचम् ऋषभनाराचं नाराचमर्द्धनाराचं कीलिका छेदवर्त्ति च, तत्र वज्रं-कीलिका, ऋषभः-परिवेष्टनपट्टः नाराचं[५]मुभयतो मर्कटबन्धः ततश्च द्वयोरस्थ्नोरुभयतो

---

१. कर्मविकारः कार्मणम विधविचित्रकर्मनिष्पन्नम् । सर्वेषां शरीराणां कारणभूतं मुणितव्यम् ।। १ ।। २-३ अंगलस्स असं० टता ।। ४. कखगट । छेवट्टसंठिया- L। सेवट्ट० ता. ।। ५. S । ०चस्तूभ० मु.।।

मर्कटबन्धेन बद्धयोः पट्टाकृतिं[1] गच्छता तृतीयेनास्थ्ना परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाख्यं वज्रनामकमस्थि यत्र भवति तद्वज्रऋषभनाराचसञ्ज्ञं प्रथमं संहननम् १। यत्पुनः कीलिकारहितं संहननं तत् ऋषभनाराचं द्वितीयं संहननम् २। तथा यत्रास्थ्नोर्मर्कटबन्ध एव केवलस्तन्नाराचसञ्ज्ञं तृतीयं संहननम् ३। यत्र पुनरेकपार्श्वे मर्कटबन्धो द्वितीये च पार्श्वे कीलिका तदर्द्धनाराचं चतुर्थं संहननम् ४। तथा यत्रास्थीनि कीलिकामात्रबद्धानि तत्कीलिकाख्यं पञ्चमं संहननम् ५। तथा यत्रास्थीनि परस्परं छेदेन वर्त्तन्ते न कीलिकामात्रेणापि बन्धस्तत् षष्ठं छेदवर्त्ति, तच्च प्रायो मनुष्यादीनां नित्यं स्नेहाभ्यङ्गादिरूपां परिशीलनामपेक्षते ६। इत्थं षोढा संहननसम्भवे संशयः–तेषां शरीराणि किंसंहननानि प्रज्ञप्तानि? इति, भगवानाह-**गौतम! छेदवर्त्तिसंहननानि प्रज्ञप्तानि,** अयमत्राभिप्रायः–यद्यपि सूक्ष्मपृथिवीकायिकानामस्थ्यभावस्तथाऽप्यौदारिकशरीरिणामस्थ्यात्मकेन संहननेन यः शक्तिविशेष उपजायते सोऽप्युपचारात्संहननमिति व्यवह्रियते, शक्तिविशेषश्चात्यन्तमल्पीयान् सूक्ष्मपृथिवीकायिकानामप्यस्त्यौदारिकशरीरित्वात्, जघन्यश्च शक्तिविशेषश्छेदवर्त्तिसंहननविषय इति तेषामपि छेदवर्त्तिसंहननमुक्तम्।।१७।।

गतं संहननद्वारं, सम्प्रति संस्थानद्वारमाह-

(१८) तेसि णं भंते! जीवाणं सरीरा किंसंठिया पं०?, गोयमा! मसूरगचंदसंठिता पण्णत्ता।। १८ ।।

'तेसि णं भंते!' इत्यादि सुगमं, नवरं **'मसूरगचंदसंठिया'** इति, मसूरकाख्यस्य धान्यविशेषस्य यच्चन्द्राकृतिदलं स मसूरकचन्द्रस्तद्वदनुसंस्थितानि मसूरकचन्द्रसंस्थितानि, अत्रायं भावार्थः–इह जीवानां षट् संस्थानानि, तानि च समचतुरस्रादीनि वक्ष्यमाणलक्षणानि, तेषामाद्यानि पञ्च संस्थानानि मसूरचन्द्रकाकारे न सम्भवन्ति, तल्लक्षणाऽयोगात्, तत इदं मसूरचन्द्रकाकारं संस्थानं हुण्डं प्रतिपत्तव्यं, सर्वत्रासंस्थितत्वरूपस्य तल्लक्षणस्य योगात्, जीवानां संस्थानान्तराभावाच्च, आह च **मूलटीकाकारः-"संस्थानं मसूरचन्द्रकसंस्थितमपि हुण्डं, सर्वत्राऽसंस्थितत्वेन तल्लक्षणयोगात्, जीवानां संस्थानान्तराभावाच्चे"**ति।।१८।।

गतं संस्थानद्वारमधुना कषायद्वारमाह–

(१९) तेसि णं भंते! जीवाणं कति कसाया पण्णत्ता?, गोयमा! चत्तारि कसाया पण्णत्ता, तं जहा-कोहकसाए माणकसाए मायाकसाए लोहकसाए। १९।

१. पट्टाकृतिना तृती० S।।

'तेसि णं भंते!' इत्यादि, तेषां भदन्त! सूक्ष्मपृथ्वीकायिकानां **कति कषायाः प्रज्ञप्ताः**?, तत्र कषाया नाम कष्यन्ते-हिंस्यन्ते परस्परमस्मिन् प्राणिन इति कषः-संसारस्तमयन्ते-गच्छन्त्येभिर्जन्तव इति कषायाः-क्रोधादयः परिणामविशेषाः, तथा चाह-**'गोयमे'**त्यादि सुगमं, नवरं **क्रोधः**-अप्रीतिपरिणामः **मानो**-गर्वपरिणामः **माया**-निकृतिरूपा **लोभो**-गाद्ध्यर्लक्षणः। एते च क्रोधादयोऽमीषां मन्दपरिणामतयाऽनुपदर्शितबाह्यशरीरविकारा एवानाभोगतस्तथा तथा वैचित्र्येण भवन्तः प्रतिपत्तव्याः।।१९।।

गतं कषायद्वारं, सञ्ज्ञाद्वारमाह-

(२०) तेसि णं भंते! जीवाणं कति सण्णाओ पण्णत्ताओ?, गोयमा! चत्तारि सण्णाओ पण्णत्ताओ, तंजहा-आहारसण्णा जाव परिग्गहसन्ना।।२०।।

'तेसि ण'मित्यादि सुगमं, नवरं सञ्ज्ञानं सञ्ज्ञा, सा च द्विधा-ज्ञानरूपाऽनुभवरूपा च, तत्र ज्ञानरूपा मति-श्रुता-ऽवधि-मनःपर्याय-केवलभेदात्पञ्चप्रकारा, तत्र केवलसञ्ज्ञा क्षायिकी शेषास्तु क्षायोपशमिक्यः, अनुभवसञ्ज्ञा-स्वकृताऽसातवेदनीयादिकर्मविपाकोदयसमुत्था, इह प्रयोजनमनुभवसञ्ज्ञया, ज्ञानसञ्ज्ञायास्तद्द्वारेण परिगृहीतत्वात्, तत्रा**हारसञ्ज्ञा** नाम आहाराभिलाषः क्षुद्वेदनीयप्रभवः खल्वात्मपरिणामविशेषः, एषा चासातवेदनीयोदयादुपजायते, **'भयसञ्ज्ञा'** भयवेदनीयोदयजनितत्रासपरिणामरूपा, **'परिग्रहसञ्ज्ञा'** लोभविपाकोदयसमुत्थमूर्च्छापरिणामरूपा, **'मैथुनसञ्ज्ञा'** वेदोदयजनितो मैथुनाभिलाषः, एताश्चतस्रोऽपि मोहनीयोदयप्रभवाः, एता अपि सूक्ष्मपृथ्वीकायिकानामव्यक्तरूपाः प्रतिपत्तव्याः।। २० ।।

गतं सञ्ज्ञाद्वारमधुना लेश्याद्वारमाह-

(२१) तेसि णं भंते! जीवाणं कति लेस्साओ पण्णत्ताओ?, गोयमा! तिन्नि लेस्साओ पन्नत्ताओ, तं जहा-किण्हलेस्सा नीललेस्सा काउलेस्सा।।२१।।

'तेसि ण'मित्यादि सुगमं, नवरं लिश्यति-श्लिष्यते आत्मा कर्मणा सहानयेति लेश्या-कृष्णादिद्रव्यसाचिव्यादात्मनः शुभाशुभपरिणामः, उक्तं च-

"कृष्णादिद्रव्यसाचिव्यात्परिणामो य आत्मनः।
स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रवर्त्तते।।१।।" [द्र.भगवती सू. १-१-५३ टीका.]

सा च षोढा, तद्यथा-कृष्णलेश्या, नीललेश्या, कापोतलेश्या, तेजोलेश्या, पद्मलेश्या, शुक्ललेश्या च, आसां च स्वरूपं जम्बूफलखादकषट्पुरुषदृष्टान्तेनैवावसातव्यम्-

'पंथाओ परिभट्ठा छप्पुरिसा अडविमज्झयारंमि।
जंबूतरुस्स हेट्ठा परोप्परं ते विचिंतेंति।।१।।
निम्मूलखंधसाला गोच्छे पक्के य पडियसडियाइं।
जह एएसिं भावा तह लेसाओवि नायव्वा।।२।।'

अमीषां च सूक्ष्मपृथिवीकायिकानामतिसंक्लिष्टपरिणामत्वाद्देवेभ्यः सूक्ष्मेष्वनुत्पादाच्चाद्या एव **तिस्रः कृष्ण-नील-कापोतरूपा लेश्याः,** न शेषा इति।। २१ ।।

गतं लेश्याद्वारमिदानीमिन्द्रियद्वारमाह-

(२२) तेसि णं भंते! जीवाणं कति इंदियाइं पण्णत्ताइं?, गोयमा ! एगे फासिंदिए पण्णत्ते।। २२ ।।

'तेसि ण' मित्यादि, इन्द्रियं नाम **"इदु परमैश्वर्ये" "उदितः०"** इति नम्, इन्दनादिन्द्रः-आत्मा सर्वोपलब्धिरूपपरमैश्वर्ययोगात् तस्य लिङ्गं-चिह्नमविनाभावि इन्द्रियम्, **"इन्द्रिय"** [ ] मिति निपातनसूत्राद्रूपनिष्पत्तिः, तत्पञ्चधा, तद्यथा-श्रोत्रेन्द्रियं, चक्षुरिन्द्रियं, जिह्वेन्द्रियं, घ्राणेन्द्रियं, स्पर्शनेन्द्रियं च, एकैकमपि द्विधा-द्रव्येन्द्रियं भावेन्द्रियं च, द्रव्येन्द्रियं द्विधा-निर्वृत्तिरूपमुपकरणरूपं च, तत्र निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः, साऽपि द्विधा-बाह्याऽभ्यन्तरा च, तत्र बाह्या कर्णपर्पटिकादिरूपा, सा च विचित्रा न प्रतिनियतरूपतया निर्देष्टुं शक्यते, तथाहि-मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतोभाविनी भ्रुवावुपरितनश्रवणबन्धापेक्षया समे, वाजिनो नेत्रयोरुपरि तीक्ष्णे चाग्रभागे इत्यादि, अभ्यन्तरा तु निर्वृत्तिः सर्वेषामप्येकरूपा, तामेवाधिकृत्य चामूनि सूत्राणि प्रावर्त्तिषत-**"सोइंदिए णं भंते! किंसंठाणसंठिए पण्णत्ते?, गोयमा! कलंबुयासंठाणसंठिए पन्नत्ते, चक्खिंदिए णं भंते! किंसंठाणसंठिए पन्नत्ते?, गोयमा! मसूरचंदसंठाणसंठिए पन्नत्ते, घाणिंदिए णं भंते! किंसंठाणसंठिए पन्नत्ते?, गोयमा! अइमुत्तसंठाणसंठिए पन्नत्ते, जिब्भिंदिए णं भंते! किंसंठाणसंठिए पन्नत्ते?, गोयमा! खुरप्पसंठाणसंठिए पन्नत्ते, फासिंदिए णं भंते! किंसंठाणसंठिए पण्णत्ते?, गोयमा! नाणासंठाणसंठिए पन्नत्ते।।"** [तुल-प्रज्ञा.९७४] इति, इह स्पर्शनेन्द्रियनिर्वृत्तेः प्रायो न बाह्याभ्यन्तरभेदः, तत्त्वार्थमूलटीकायामनभ्युपगमात्, उपकरणं नाम खड्गस्थानीयाया बाह्यनिर्वृत्तेर्या खड्गधारास्थानीया स्वच्छतरपुद्गलसमूहात्मिकाऽभ्यन्तरा निर्वृत्तिस्तस्याः शक्तिविशेषः, इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृत्तेः

---

१. पथपरिभ्रष्टाः षट् पुरुषा अटवीमध्यभागे । जम्बूतरोरधस्तात् परस्परं ते विचिन्तयन्ति ।। १ ।।
निर्मूल-स्कन्ध-शाखा-गुच्छान् (छित्त्वा) पक्वानि पतितशटितानि भक्षयामः । यथैतेषां भावास्तथा लेश्या अपि ज्ञातव्याः ।। २ ।। २. ०रूपा S नास्ति ।

कथञ्चिदर्थान्तरं, शक्ति-शक्तिमतोः कथञ्चिद् भेदात्, कथञ्चिद्भेदश्च सत्यामपि तस्यामान्तरनिर्वृत्तौ द्रव्यादिनोपकरणस्योपघातसम्भवात्, तथाहि–सत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरायां निर्वृत्तौ महाकठोरतरघनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति, भावेन्द्रियमपि द्विधा–लब्धिरुपयोगश्च, तत्र लब्धिः श्रोत्रेन्द्रियादिविषयस्तदावरणक्षयोपशमः, उपयोगः स्वस्वविषये लब्ध्यनुसारेणात्मनः परिच्छेदव्यापारः, तत्र यद्यपि द्रव्यरूपं भावरूपं चेत्थमिन्द्रियमनेकप्रकारं तथाऽपीह बाह्यनिर्वृत्तिरूपमिन्द्रियं पृष्टमवगन्तव्यं, तदेवाधिकृत्य व्यवहारप्रवृत्तेः, तथाहि–बकुलादयः पञ्चेन्द्रिया इव भावेन्द्रियपञ्चकविज्ञानसमन्विता अनुमानतः प्रतीयन्ते तथाऽपि न ते पञ्चेन्द्रिया इति व्यवह्रियन्ते, बाह्येन्द्रियपञ्चकासम्भवात्, उक्तं च-

'पंचेंदिओ [१]उ बउलो नरो व्व सव्वविसओवलंभाओ।
तहवि न भण्णइ पंचिंदिउ त्ति बज्झिंदियाभावा।।१।।' [**विशेषावश्यकभा.३००१**]

ततो द्रव्येन्द्रियमधिकृत्य निर्वचनसूत्रमाह-'**गोयमे**'त्यादि सुगमम्।। २२।।

गतमिन्द्रियद्वारमधुना समुद्घातद्वारम्–

(२३) तेसि णं भंते! जीवाणं कति समुग्घाया पण्णत्ता?, गोयमा! तओ समुग्घाया पण्णत्ता, तं जहा-वेयणासमुग्घाते कसायसमुग्घाते मारणंतियसमुग्घाते ।।२३ ।।

तत्र समुद्घाताः सप्त, तद्यथा– वेदनासमुद्घातः १, कषायसमुद्घातः २, मारणसमुद्घातः ३, वैक्रियसमुद्घातः ४, तैजससमुद्घातः ५, आहारकसमुद्घातः ६, केवलिसमुद्घातश्च ७। तत्र वेदनायाः समुद्घातो वेदनासमुद्घातः, स चासातवेदनीयकर्माश्रयः १, कषायेण–कषायोदयेन समुद्घातः कषायसमुद्घातः, स च कषायचारित्रमोहनीयकर्माश्रयः २, मरणे भवो मारणः, स चासौ समुद्घातश्च मारणसमुद्घातः ३, वैक्रिये प्रारभ्यमाणे समुद्घातो वैक्रियसमुद्घातः, स च वैक्रियशरीरनामकर्माश्रयः ४, [तैजसेन हेतुभूतेन समुद्घातस्तैजससमुद्घातः तैजसशरीरनामकर्माश्रयः] ५, आहारके प्रारभ्यमाणे समुद्घात आहारकसमुद्घातः, स चाहारकशरीरनामकर्माश्रयः ६, केवलिनि अन्तर्मुहूर्त्तभाविपरमपदे समुद्घातः केवलिसमुद्घातः ७।

---

१. पञ्चेन्द्रिय एव बकुलो नर इव सर्वविषयोपलम्भात् । तथापि न भण्यते पञ्चेन्द्रिय इति बाह्येन्द्रियाभावात् ।। १ ।। २. व्व ब० PVS ।।

अथ समुद्घात इति कः शब्दार्थः?, उच्यते–समिति–एकीभावे उत्-प्राबल्ये एकीभावेन प्राबल्येन घातः समुद्घातः, केन सह एकीभावगमनम्? इति चेद्, उच्यते, अर्थाद्वेदनादिभिः, तथाहि–यदा आत्मा वेदनादिसमुद्घातगतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति नान्यज्ञानपरिणतः, प्राबल्येन घातः कथम्? इति चेद्, उच्यते, इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मपुद्गलान् कालान्तरानुभवयोग्यानुदीरणाकरणेनाकृष्योदयावलिकायां प्रक्षिप्यानुभूयानुभूय निर्जरयति, आत्मप्रदेशेभ्यः शातयतीति भावः, तत्र वेदनासमुद्घातगत आत्मा वेदनीयकर्मपुद्गलपरिशातं करोति, तथाहि–वेदनाकरालितो जीवः स्वप्रदेशाननन्तानन्तकर्मपरमाणुवेष्टितान् शरीराद् बहिरपि विक्षिपति, तैश्च प्रदेशैर्वदन-जघनादिरन्ध्राणि कर्णस्कन्धाद्यन्तरालानि चापूर्याऽऽयामतो विस्तरतश्च शरीरमात्रं क्षेत्रमभिव्याप्यान्तर्मुहूर्त्तं यावदवतिष्ठते, तस्मिंश्चान्तर्मुहूर्त्ते प्रभूतासातवेदनीयकर्मपुद्गलपरिशातं करोति। कषायसमुद्घातसमुद्धतः कषायाख्यचारित्रमोहनीयकर्मपुद्गलपरिशातं करोति, तथाहि–कषायोदयसमाकुलो जीवः स्वप्रदेशान् बहिर्विक्षिप्य तैर्वदनोदरादिरन्ध्राणि कर्णस्कन्धाद्यन्तरालानि चापूर्याऽऽयाम-विस्तराभ्यां देहमात्रं क्षेत्रमभिव्याप्य वर्त्तते, तथाभूतश्च प्रभूतकषायकर्मपुद्गलपरिशातं करोति। एवं मरणसमुद्घातगत आयुःकर्मपुद्गलपरिशातं करोति। वैक्रियसमुद्घातगतः पुनर्जीवः स्वप्रदेशान् शरीराद् बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमानमायामतः सङ्ख्येययोजनप्रमाणं दण्डं निसृजति, निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्मपुद्गलान् प्राग्बद्धान् शातयति, तथा चोक्तम्-**"वेउव्वियसमुग्घाए णं समोहणइ २ त्ता संखिज्जाइं जोयणाइं दंडं निसिरइ, निसिरित्ता अहाबायरे पुग्गले परिसाडेइ"** [ ] इति, तैजसाहारकसमुद्घातौ वैक्रियसमुद्घातवदवसातव्यौ, केवलं तैजससमुद्घातगतस्तैजसशरीरनामकर्मपुद्गलपरिशातं करोति, आहारकसमुद्घातगत आहारकशरीरनामकर्म-पुद्गलपरिशातं करोति। केवलिसमुद्घातसमुद्धतस्तु केवली सदसद्वेदनीयशुभाशुभनामोच्चनीचैर्गोत्रकर्म-पुद्गलपरिशातं [करोति], केवलिसमुद्घातवर्जाः शेषाः षडपि समुद्घाताः प्रत्येकमान्तर्मौहूर्त्तिकाः, केवलिसमुद्घातः पुनरष्टसामयिकः, उक्तं च **प्रज्ञापनायाम्-"वेयणासमुग्घाए णं कइसमइए पण्णत्ते?, गोयमा! असंखेज्जसमइए अंतमुहुत्ते, एवं जाव आहारगसमुग्घाए।। केवलिसमुग्घाए णं भंते! कइसमइए पण्णत्ते?, गोयमा! अट्ठसमइए पण्णत्ते।।" [प्रज्ञा० २०८७-८८]** इति। तदेवमनेकसमुद्घातसम्भवे सूक्ष्मपृथिवीकायिकानां तान् पृच्छति–**'तेसि णं भंते'** इत्यादि सुगमं, नवरं वैक्रियाऽऽहारक-तैजस-केवलिसमुद्घाताभावो वैक्रियादिलब्ध्यभावात्।। २३।।

गतं समुद्घातद्वारं, सम्प्रति सञ्ज्ञिद्वारमाह–

(२४) ते णं भंते! जीवा किं सन्नी असन्नी?,गोयमा! नो सन्नी, असन्नी।। २४ ।।

'ते णं भंते' इत्यादि, **'ते'** सूक्ष्मपृथिवीकायिकाः **ण**मिति वाक्यालङ्कारे **भदन्त! किं सञ्ज्ञिनोऽसञ्ज्ञिनो** वा?, सञ्ज्ञानं सञ्ज्ञा–भूतभवद्भाविभावस्वभावपर्यालोचनं सा विद्यते येषां ते सञ्ज्ञिनः--विशिष्टस्मरणादि-रूपमनोविज्ञानभाज इत्यर्थः, यथोक्तमनोविज्ञानविकला असञ्ज्ञिनः, अत्र भगवान्निर्वचनमाह–**गौतम! नो सञ्ज्ञिनः**, किन्त्व**सञ्ज्ञिनः**, विशिष्टमनोलब्ध्यभावात्, हेतुवादोपदेशेनापि न सञ्ज्ञिनः, अभिसन्धारणपूर्विकायाः करणशक्तेरभावात्, इहाऽसञ्ज्ञिन इत्येव सिद्धे नो सञ्ज्ञिन इति प्रतिषेधः प्रतिषेधप्रधानो विधिरयमिति ज्ञापनार्थः, प्रतिपाद्यस्य प्रकृतिसावद्यत्वादिति।। २४।।

गतं सञ्ज्ञिद्वारं, वेदद्वारमाह–

(२५) ते णं भंते! जीवा किं इत्थिवेया पुरिसवेया णपुंसगवेया?, गोयमा! णो इत्थिवेया, णो पुरिसवेया, णपुंसगवेया।। २५ ।।

'ते णं भंते!' इत्यादि, **'इत्थिवेयगा'** इति स्त्रियाः वेदो येषां ते स्त्रीवेदकाः, एवं **पुरुषवेदका नपुंसकवेदका** इत्यपि भावनीयं, तत्र स्त्रियाः पुंस्यभिलाषः स्त्रीवेदः, पुंसः स्त्रियामभिलाषः पुंवेदः, उभयोरप्यभिलाषो नपुंसकवेदः, भगवानाह–**गौतम! न स्त्रीवेदका न पुरुषवेदकाः, नपुंसकवेदकाः** संमूर्च्छिमत्वात्, **"नारक-संमूर्च्छिमा नपुंसका"** [तुला तत्त्वार्थ - २/५१] इति भगवद्वचनम्।। २५ ।।

पर्याप्तिद्वारमाह–

(२६) तेसि णं भंते! जीवाणं कति पज्जत्तीओ पण्णत्ताओ?, गोयमा! चत्तारि पज्जत्तीओ पण्णत्ताओ, तंजहा-आहारपज्जत्ती सरीरपज्जत्ती इंदियपज्जत्ती आणापाणुपज्जत्ती।। २६ ।। (२७) तेसि णं भंते! जीवाणं कति अपज्जत्तीओ पण्णत्ताओ?, गोयमा! चत्तारि अपज्जत्तीओ पण्णत्ताओ, तंजहा-आहारअपज्जत्ती जाव आणापाणुअपज्जत्ती।। २७ ।।

'तेसि णं भंते' इत्यादि सुगमं, पर्याप्तिप्रतिपक्षा अपर्याप्तिस्तन्निरूपणार्थमाह-**'तेसि णं भंते!'** इत्यादि पाठसिद्धं, नवरं चतस्रोऽप्यपर्याप्तयः करणापेक्षया द्रष्टव्याः, लब्ध्यपेक्षया त्वेकैव प्राणापानापर्याप्तिः, यस्मादेवमागमः–इह लब्ध्यपर्याप्तका अपि नियमादाहार-शरीरेन्द्रियपर्याप्तिपरिसमाप्तावेव म्रियन्ते नार्वाक्, यत आगामिभवायुर्बद्ध्वा म्रियन्ते सर्व एव देहिनः, तच्चाहारशरीरेन्द्रियपर्याप्तानामेव बन्धमायातीति।।२६-२७।।

सम्प्रति दृष्टिद्वारमाह–

(२८) ते णं भंते! जीवा किं सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी?, गोयमा! णो सम्मदिट्ठी, मिच्छादिट्ठी, नो सम्मामिच्छादिट्ठी।। २८।।

'ते णं भंते!' इत्यादि सुगमं, नवरं सम्यग्–अविपरीता दृष्टिः–जिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्येषां ते सम्यग्दृष्टयः, मिथ्या–विपर्यस्ता दृष्टिर्येषां भक्षितहृत्पूर(धत्तूर?)पुरुषस्य सिते पीतप्रतिपत्तिवत् मिथ्यादृष्टयः, एकान्तसम्यग्रूप-मिथ्यारूपप्रतिपत्तिविकलाः सम्यग्मिथ्यादृष्टयः, निर्वचनसूत्रं–**'गोयमे'**त्यादि सुगमं, नवरं सम्यग्दृष्टित्वप्रतिषेधः सासादनसम्यक्त्वस्यापि तेषामसम्भवात्, सासादनसम्यक्त्ववतां तन्मध्ये उत्पादाभावात्, ते ह्यतिसंक्लिष्टपरिणामाः, सास्वादनसम्यक्त्वपरिणामस्तु मनाक् शुभ इति तन्मध्ये सासादनसम्यक्त्ववतामुत्पादाभावः, अत एव सदा संक्लिष्टपरिणामत्वात्तेषां सम्यग्मिथ्यादृष्टित्व-परिणामोऽपि न भवति, नापि सम्यग्मिथ्यादृष्टिः सन् तन्मध्ये उत्पद्यते, **"न सम्मिच्छो कुणइ कालं"** [द्र. भगवती सू. १२-१०-९७२ वृत्तौ] इति वचनात्।। २८ ।।

गतं दृष्टिद्वारमधुना दर्शनद्वारमाह–

(२९) ते णं भंते ! जीवा किं चक्खुदंसणी अचक्खुदंसणी ओहिदंसणी केवलदंसणी?, गोयमा ! नो चक्खुदंसणी, अचक्खुदंसणी, नो ओहिदंसणी, नो केवलदंसणी ।। २९ ।।

दर्शनं नाम सामान्यविशेषात्मके वस्तुनि सामान्यावबोधः, तच्चतुर्धा, तद्यथा–चक्षुर्दर्शनमचक्षुर्दर्शन-मवधिदर्शनं केवलदर्शनं च, तत्र सामान्यविशेषात्मके वस्तुनि चक्षुषा दर्शनं–रूपसामान्यपरिच्छेदश्चक्षु-र्दर्शनम्, अचक्षुषा चक्षुर्वर्जशेषेन्द्रियमनोभिर्दर्शनमचक्षुर्दर्शनम्, अवधिरेव दर्शनं–रूपिसामान्यग्रहणमवधिदर्शनं, केवलमेव दर्शनं–सकलजगद्भाविवस्तुसामान्यपरिच्छित्तिरूपं केवलदर्शनं, तत्र किमेषां दर्शनमिति जिज्ञासुः पृच्छति–**'ते णं भंते'** इत्यादि पाठसिद्धं, नवरमचक्षुर्दर्शनित्वं स्पर्शनेन्द्रियापेक्षया, शेषदर्शनप्रतिषेधः सुज्ञानः।। २९।।

गतं दर्शनद्वारं, ज्ञानद्वारमाह–

(३०) ते णं भंते! जीवा किं नाणी अण्णाणी?, गोयमा! नो नाणी, अण्णाणी, नियमा दुअण्णाणी, तं जहा-मतिअन्नाणी य सुयअण्णाणी य।। ३० ।।

'ते णं भंते जीवा' इत्यादि, अज्ञानत्वं मिथ्यादृष्टित्वात्, तदपि चाज्ञानत्वं मत्यज्ञान-श्रुताज्ञानापेक्षया, तथा चाह-**'नियमा दुअण्णाणी'**त्यादि पाठसिद्धं, नवरं तदपि **मत्यज्ञानं श्रुताज्ञानं** च शेषजीवबादरादिराश्यपेक्षयाऽत्यन्तमल्पीयः प्रतिपत्तव्यं, यत उक्तम्-

"सर्वनिकृष्टो जीवस्य दृष्ट उपयोग एष वीरेण।
सूक्ष्मनिगोदापर्याप्तानां स च भवति विज्ञेयः।।१।।
तस्मात्प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम्।
लब्धिनिमित्तैः करणैः कायेन्द्रियवाग्मनोदृग्भिः।।२।।" [द्र.आचाराङ्ग सू. १४ शीला.वृत्तौ] ।। ३०।।

योगद्वारमाह-

(३१) ते णं भंते! जीवा किं मणजोगी वयजोगी कायजोगी?, गोयमा! नो मणजोगी, नो वयजोगी, कायजोगी।।३१।।

'ते णं भंते' इत्यादि पाठसिद्धम्।। ३१ ।।

गतं योगद्वारमधुनोपयोगद्वारं-

(३२) ते णं भंते! जीवा किं सागारोवउत्ता अणागारोवउत्ता?, गोयमा! सागारोवउत्तावि अणागारोवउत्तावि।। ३२ ।।

तत्रोपयोगो द्विविधः-**साकारोऽनाकारश्च,** तत्राऽऽकारः-प्रतिवस्तु प्रतिनियतो ग्रहणपरिणामः **'आगारो उ विसेसो'** [ ] इति वचनात्, सह आकारो यस्य येन वा स साकारो-ज्ञानपञ्चकमज्ञानत्रिकं, यथोक्ताऽऽकारविकलोऽनाकारः, स चक्षुर्दर्शनादिको दर्शनचतुष्टयात्मकः, उक्तं च-

"ज्ञानाज्ञाने पञ्च-त्रिविकल्पे सोऽष्टधा तु साकारः।
चक्षुरचक्षुरवधिकेवलदृग्विषयस्त्वनाकारः।।१।।" **[प्रशमरति प्र. १९५]**

तत्र क एषामुपयोगः? इति जिज्ञासुः पृच्छति-**'ते णं भंते!'** इत्यादि निगदसिद्धं, नवरं **साकारोपयोगोपयुक्ता** मत्यज्ञान-श्रुताज्ञानोपयोगापेक्षया, **अनाकारोपयोगोपयुक्ता** अचक्षु-र्दर्शनोपयोगापेक्षयेति।। ३२ ।।

साम्प्रतमाहारद्वारमाह-

(३३) ते णं भंते! जीवा किमाहारमाहारेंति?, गोयमा! दव्वतो अणंतपदेसियाइं दव्वाइं, खेत्तओ असंखेज्जपदेसोगाढाइं कालतो अन्नयरसमयट्ठिइयाइं भावतो वण्णवंताइं गंधवंताइं रसवंताइं फासवंताइं।। ३३।। (३४) जाइं भावओ वण्णमंताइं आ०, ताइं किं एगवण्णाइं आ० ? दुवण्णाइं आ० ? तिवण्णाइं आ० ? चउवण्णाइं आ० ? पंचवण्णाइं आ०?, गोयमा! ठाणमग्गणं पडुच्च एगवण्णाइंपि दुवण्णाइंपि तिवण्णाइंपि चउवण्णाइंपि पंचवण्णाइंपि आ०, विहाणमग्गणं पडुच्च कालाइंपि आ० जाव सुक्किलाइंपि आ०।। ३४।।

'ते णं भंते' इत्यादि, **'ते'** सूक्ष्मपृथिवीकायिकाः **ण**मिति वाक्यालङ्कारे **भदन्त! जीवाः किमाहारमाहारयन्ति?**, भगवानाह–**गौतम! 'द्रव्यतो'** द्रव्यस्वरूपपर्यालोचनाया**मनन्तप्रादेशिकानि** द्रव्याणि, अन्यथा ग्रहणासम्भवात्, न हि सङ्ख्यातप्रदेशात्मका असङ्ख्यातप्रदेशात्मका वा स्कन्धा जीवस्य ग्रहणप्रायोग्या भवन्ति, **क्षेत्रतोऽसङ्ख्यातप्रदेशावगाढानि, कालतोऽन्यतरस्थितिकानि** जघन्यस्थितिकानि मध्यमस्थितिकानि उत्कृष्टस्थितिकानि चेति भावार्थः, स्थितिरिति चाहारयोग्यस्कन्धपरिणामत्वेऽवस्थानं प्रत्येतव्यम्, आह च **मूलटीकाकारः-"कालतोऽन्यतरस्थितीनि तद्भावावस्थानेन जघन्यादिरूपां स्थितिमधिकृत्ये"** [ ]ति, **भावतो वर्णवन्ति गन्धवन्ति रसवन्ति स्पर्शवन्ति** च, प्रतिपरमाण्वेकैकवर्णगन्धरसद्विस्पर्शभावात्, **'एवं जहा पण्णवणाए'** इत्यादि, **'एवम्'** उक्तेन प्रकारेण यथा **प्रज्ञापनाया**मष्टाविंशतितमे आहारपदे प्रथमोद्देशके तावद्वक्तव्यं यावत् **'सिय तिदिसिं सिय चउदिसिं सिय पंचदिसि'**मिति, तच्चैवम्-

"जाइं भावतो वण्णमंताइं आहारेंति ताइं किं एगवण्णाइं आहारेंति जाव पंचवण्णाइं आहारेंति?, गोयमा! ठाणमग्गणं पडुच्च एगवण्णाइंपि आहारेंति जाव पंचवण्णाइंपि आहारेंति, विहाणमग्गणं पडुच्च कालवण्णाइं पि आहारेंति जाव सुक्किल्लवण्णाइं पि आहारेंति। जाइं कालवण्णाइं पि आहारेंति ताइं किं एगगुणकालाइं आहारेंति जाव दसगुणकालाइं आहारेंति संखिज्जगुणकालाइं आहारेंति असंखेज्जगुणकालाइं आहारेंति अणंतगुणकालाइं आहारेंति?, गोयमा! एगगुणकालाइं पि आहारेंति जाव अणंतगुणकालाइं पि आहारेंति एवं जाव सुक्किल्लाइं पि आहारेंति। एवं गंधतोवि रसतोवि।

जाइं भावतो फासमंताइं →आहारेंति ताइं किं एगफासाइं आहारेंति दुफासाइं आहारेंति जाव अट्ठफासाइं

१. →← चिह्नद्वयमध्यवर्तिपाठः प्रज्ञापनायां नास्ति ।।

आहारेंति?, गोयमा! ठाणमग्गणं पडुच्च← नो एगफासाइं आहारेंति नो दुफासाइं आहारेंति नो तिफासाइंपि आहारेंति चउफासाइं पि आहारेंति जाव अट्ठफासाइं पि आहारेंति, विहाणमग्गणं पडुच्च कक्खडाइं पि आहारेंति जाव लुक्खाइं पि आहारेंति।। जाइं फासतो कक्खडाइं पि आहारेंति ताइं किं एगगुणकक्खडाइं आहारेंति जाव अणंतगुणकक्खडाइंपि आहारेंति?, गोयमा! एगगुणकक्खडाइं पि आहारेंति जाव अणंतगुणकक्खडाइं पि आहारेंति, एवं अट्ठ वि फासा भाणियव्वा जाव अणंतगुणलुक्खाइं पि आहारेंति।। जाइं भंते! अणंतगुणलुक्खाइं आहारेंति ताइं भंते! किं पुट्ठाइं आहारेंति अपुट्ठाइं आहारेंति?, गोयमा! पुट्ठाइं आहारेंति नो अपुट्ठाइं आहारेंति, [प्रज्ञापना सू.१७९८-१८००] जाइं पुट्ठाइं आहारेंति ताइं भंते! किं ओगाढाइं आहारेंति अणोगाढाइं आहारेंति?, गोयमा! ओगाढाइं आहारेंति नो अणोगाढाइं आहारेंति, जाइं भंते! ओगाढाइं आहारेंति ताइं किं अणंतरोगाढाइं आहारेंति परंपरोगाढाइं आहारेंति?, गोयमा! अणंतरोगाढाइं आहारेंति नो परंपरोगाढाइं आहारेंति, ताइं भंते! किं अणूइं आहारेंति बायराइं आहारेंति?, गोयमा! अणूइंपि आहारेंति बायराइंपि आहारेंति, जाइं भंते! अणूइं आहारेंति ताइं भंते! किं उड्ढं आहारेंति अहे आहारेंति तिरियं आहारेंति?, गोयमा! उड्ढंपि आहारेंति अहेवि आहारेंति तिरियंपि आहारेंति, जाइं भंते! उड्ढंपि आहारेंति अहेवि आहारेंति तिरियंपि आहारेंति ताइं किं आइं आहारेंति ? मज्झे आहारेंति ? पज्जवसाणे आहारेंति?, गोयमा! आइं पि आहारेंति मज्झेवि आहारेंति पज्जवसाणे[वि]आहारेंति। जाइं भंते! आइंपि आहारेंति जाव पज्जवसाणेवि आहारेंति ताइं किं सविसए आहारेंति ? अविसए आहारेंति?, गोयमा! सविसए आहारेंति नो अविसए आहारेंति। जाइं भंते! सविसए आहारेंति ताइं किं आणुपुव्विं आहारेंति ? अणाणुपुव्विं आहारेंति?, गोयमा! आणुपुव्विं आहारेंति नो अणाणुपुव्विं आहारेंति । जाइं भंते! आणुपुव्विं आहारेंति ताइं किं तिदिसिं आहारेंति ? चउदिसिं आहारेंति ? पंचदिसिं आहारेंति ? छद्दिसिं आहारेंति?, गोयमा! निव्वाघाएणं छद्दिसिं, वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसि" [प्रज्ञापना सूत्र ८७७/१५-२३] मिति।।

अस्य व्याख्या-'**जाइं भावतो वण्णमंताइं**' इत्यादि प्रश्नसूत्रं सुगमम्, भगवानाह-**गौतम!** '**ठाणमग्गणं पडुच्चे**'ति तिष्ठन्ति विशेषा अस्मिन्निति स्थानं-सामान्यमेकवर्णं द्विवर्णं त्रिवर्णमित्यादिरूपं तस्य मार्गणम्-अन्वेषणं तत्प्रतीत्य, सामान्यचिन्तामाश्रित्येति भावार्थः, **एकवर्णान्यपि द्विवर्णान्य**पीत्यादि सुगमं, नवरं तेषामनन्तप्रदेशिकानां स्कन्धानामेकवर्णत्वं द्विवर्णत्वमित्यादि व्यवहारनयमतापेक्षया, निश्चयनयमतापेक्षया त्वनन्तप्रादेशिकस्कन्धोऽल्पीयानपि पञ्चवर्ण एव प्रतिपत्तव्यः, '**विहाणमग्गणं पडुच्चे**'त्यादि यावद्[२] [विधानं-विशेषः,] विवक्तम्-इतरव्यवच्छिन्नं धानं-पोषणं स्वरूपस्य यत्तत्प्रतीत्य सामान्यचिन्तामाश्रित्येति शेषः, कृष्णो नील इत्यादि प्रतिनियतो वर्णविशेष इतियावत्, तस्य मार्गणं तत्प्रतीत्य कालवर्णान्यप्याहारयन्तीत्यादि सुगमं, नवरमेतदपि व्यवहारतः प्रतिपत्तव्यं, निश्चयतः पुनरवश्यं तानि पञ्चवर्णान्येव।। ३३-३४।।

---

१. नयमा छ० **इति प्रज्ञापनायाम् ।।** २. यावद् – PVS **नास्ति।।**

(३५) जाइं वण्णओ कालाइं आ० ताइं किं एगगुणकालाइं आ० जाव अणंतगुणकालाइं आ०?, गोयमा! एगगुणकालाइंपि आ० जाव अणंतगुणकालाइंपि आ० एवं जाव सुक्किलाइं।। ३५ ।।(३६) जाइं भावतो गंधमंताइं आ० ताइं किं एगगंधाइं आ०? दुगंधाइं आ०?, गोयमा! ठाणमग्गणं पडुच्च एगगंधाइंपि आ० दुगंधाइंपि आ०, विहाणमग्गणं पडुच्च सुब्भिगंधाइंपि आ० दुब्भिगंधाइंपि आ०।। ३६ ।। (३७) जाइं गंधतो सुब्भिगंधाइं आ० ताइं किं एगगुणसुब्भिगंधाइं आ० जाव अणंतगुणसुब्भिगंधाइं आ०?, गोयमा! एगगुणसुब्भिगंधाइंपि आ० जाव अणंत-गुणसुब्भिगंधाइंपि, आ० एवं दुब्भिगंधाइंपि।। ३७ ।। (३८) रसा जहा वण्णा।। ३८।। (३९) जाइं भावतो फासवं(मं)ताइं आ० ताइं किं एगफासाइं आ० जाव अट्ठफासाइं आ०?, गोयमा ! ठाणमग्गणं पडुच्च नो एगफासाइं आ० नो दुफासाइं आ० नो तिफासाइं आ० चउफासाइं आ० पंचफासाइंपि जाव अट्ठफासाइंपि आ०, विहाणमग्गणं पडुच्च कक्खडाइंपि आ० जाव लुक्खाइंपि आ०।। ३९।। (४०) जाइं फासतो कक्खडाइं आ० ताइं किं एगगुणकक्खडाइं आ० जाव अणंतगुणक-क्खडाइं आ०?, गोयमा! एगगुणकक्खडाइंपि आ० जाव अणंतगुणकक्खडाइंपि आ० एवं जाव लुक्खा णेयव्वा।।४०।। (४१) ताइं भंते! किं पुट्ठाइं आ० अपुट्ठाइं आ०?, गोयमा! पुट्ठाइं आ० नो अपुट्ठाइं आ०।।४१।। (४२) ताइं भंते! किं ओगाढाइं आ० अणोगाढाइं आ०?, गोयमा! ओगाढाइं आ०, नो अणोगाढाइं आ०।।४२।। (४३) ताइं भंते! किमणंतरोगाढाइं आ० परंपरोगाढाइं आ०?, गोयमा! अणंतरोगाढाइं आ०, नो परंपरोगाढाइं आ०।।४३।।

'जाइं वण्णतो कालवण्णाइं' इत्यादि सुगमं याव**दनन्तगुणसुक्किलाइंपि आहारेन्ति,** एवं गन्ध-रस-स्पर्शविषयाण्यपि सूत्राणि भावनीयानि।। **'जाइं भंते! अणंतगुणलुक्खाइं'** इत्यादि, यानि भदन्त! अनन्तगुणरूक्षाणि, उपलक्षणमेतत्–एकगुणकालादीन्यप्याहारयन्ति **तानि स्पृष्टानि** आत्मप्रदेशस्पर्शविषयाण्या**हारयन्ति उताऽस्पृष्टानि**?, भगवानाह–**स्पृष्टानि नो अस्पृष्टानि,** तत्रात्मप्रदेशैः संस्पर्शनमात्मप्रदेशावगाढक्षेत्राद् बहिरपि सम्भवति ततः प्रश्नयति-'जाइं भंते' इत्यादि,

यानि भदन्त! स्पृष्टान्याहारयन्ति **तानि किमवगाढानि**-आत्मप्रदेशैः सहैकक्षेत्रावस्थायीनि उताऽ**नवगाढानि-**आत्मप्रदेशावगाहक्षेत्राद् बहिरवस्थितानि?, भगवानाह-**गौतम! अवगाढान्याहारयन्ति नानवगाढानि**। यानि भदन्त! अवगाढान्याहारयन्ति **तानि किमनन्तरावगाढानि?**, किमुक्तं भवति? येष्वात्मप्रदेशेषु यान्यव्यवधानेनावगाढानि तैरात्मप्रदेशैस्तान्येवाहारयन्ति उत **परम्परावगाढानि**-एकद्वित्राद्यात्मप्रदेशै-र्व्यवहितानि?, भगवानाह-**गौतम! अनन्तरावगाढानि न परम्परावगाढानि**।। ३५-४३।।

(४४) ताइं भंते! किं अणूइं आ० बायराइं आ०?, गोयमा! अणूइंपि आ० बायराइंपि आहारेंति।।४४।।

यानि भदन्त! अनन्तरावगाढान्याहारयन्ति **तानि भदन्त**! अनन्तप्रादेशिकानि द्रव्याणि **किमणूनि**-स्तोकान्याहारयन्ति उत **बादराणि**-प्रभूतप्रदेशोपचितानि?, भगवानाह-**अणून्यप्याहारयन्ति बादराण्यप्याहारयन्ति**, इहाणुत्व-बादरत्वे तेषामेवाहारयोग्यानां स्कन्धानां प्रदेशस्तोकत्व-बाहुल्यापेक्षया "**प्रज्ञापनामूलटीकाकारेणा**"पि व्याख्याते इत्यस्माभिरपि तथैवाभिहिते।। ४४।।

(४५) ताइं भंते! किं उड्ढं आ० अहे आ० तिरियं आहारेंति?, गोयमा! उड्ढंपि आ० अहेवि आ० तिरियंपि आ०।।४५।।

यानि भदन्त! अणून्यपि आहारयन्ति **तानि किमूर्ध्व**प्रदेशस्थितान्याहारयन्ति **अधस्तिर्यग्वा?**, इहोर्द्ध्वाधस्तिर्यक्त्वं यावति क्षेत्रे सूक्ष्मपृथिवीकायिकोऽवगाढस्तावत्येव क्षेत्रे तदपेक्षया परिभावनीयं, भगवानाह-**ऊर्ध्वमप्याहारयन्ति-**ऊर्ध्वप्रदेशावगाढान्यप्याहारयन्ति, एव**मधोऽपि तिर्यगपि**।। ४५ ।।

(४६) ताइं भंते! किं आदिं आ० मज्झे आ० पज्जवसाणे आहारेंति?, गोयमा! आदिंपि आ० मज्झेवि आ० पज्जवसाणेवि आ०।।४६।।

यानि भदन्त! ऊर्ध्वमप्याहारयन्ति अधोऽप्याहारयन्ति तिर्यगप्याहारयन्ति **तानि किमादावाहारयन्ति मध्ये आहारयन्ति पर्यवसाने आहारयन्ति?**, अयमत्राभिप्रायः-सूक्ष्मपृथिवीकायिका ह्यनन्तप्रादेशिकानि द्रव्याण्यन्तर्मुहूर्त्तं कालं यावदुपभोगोचितानि गृह्णन्ति, ततः संशयः-किमुपभोगोचितस्य कालस्यान्तर्मुहूर्तप्रमाणस्यादौ-प्रथमसमये आहारयन्ति उत मध्ये-मध्यसमयेषु आहोश्वित् पर्यवसाने-पर्यवसानसमये?, भगवानाह-**गौतम! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति**, किमुक्तं भवति?

उपभोगोचितकालस्यान्तर्मुहूर्त्तप्रमाणस्याऽऽदि-मध्या-ऽवसानसमयेऽप्याहारयन्तीति।। ४६ ।।

(४७) ताइं भंते! किं सविसए आ० अविसए आ०?, गोयमा! सविसए आ०, नो अविसए आ०।।४७।।

यानि भदन्त! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति **तानि भदन्त! किं स्वविषयानि**-स्वोचिताहारयोग्यान्याहारयन्ति **उताऽविषयानि**-स्वोचिताहाराऽयोग्यान्याहारयन्ति?, भगवानाह-**गौतम! स्वविषयाण्याहारयन्ति नो अविषयाणि**।।४७ ।।

(४८) ताइं भंते! किं आणुपुव्विं आ० अणाणुपुव्विं आहारेंति?, गोयमा! आणुपुव्विं आहारेंति, नो अणाणुपुव्विं आहारेंति ।।४८।।

यानि भदन्त! स्वविषयाण्याहारयन्ति **तानि भदन्त! किमानुपूर्व्याऽऽहारयन्ति अनानुपूर्व्या?**, आनुपूर्वी नाम यथाऽऽसन्नं, तद्विपरीताऽनानुपूर्वी, भगवानाह-**गौतम! आनुपूर्व्या,** सूत्रे द्वितीया तृतीयार्थे वेदितव्या प्राकृतत्वात्, यथा **आचाराङ्गे "अगणिं पुट्ठा"** [१-१-४-३७] इत्यत्र, **आहारयन्ति, नो अनानुपूर्व्या** ऊर्ध्वमधस्तिर्यग्वा, यथाऽऽसन्नं[१] नातिक्रम्याहारयन्तीति भावः।। ४८।।

(४९) ताइं भंते! किं तिदिसिं आहारेंति ? चउदिसिं आहारेंति ? पंचदिसिं आहारेंति ? छद्दिसिं आहारेंति?, गोयमा! निव्वाघाएणं छद्दिसिं, वाघातं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं ।। ४९ ।।

यानि भदन्त! आनुपूर्व्याऽऽहारयन्ति **तानि भदन्त! किं तिदिसिं**ति तिस्रो दिशः समाहृतास्त्रिदिक् तस्मिन् व्यवस्थितान्या**हारयन्ति चतुर्दिशि पञ्चदिशि षड्दिशि वा**, इह लोकनिष्कुटपर्यन्ते जघन्यपदेऽपि [जीवावगाहक्षेत्रं] त्रिदिग्व्यवस्थितमेव प्राप्यते न द्विदिग्व्यवस्थितमेकदिग्व्यवस्थितं वा, अतस्त्रिदिश्यारभ्य प्रश्नः कृतः, भगवानाह-**गौतम! 'निव्वाघाएणं छद्दिसि'**मित्यादि, व्याघातो नामाऽलोकाकाशेन प्रतिस्खलनं व्याघातस्याभावो निर्व्याघातं **"शब्दप्रथादावव्ययं पूर्वपदार्थे नित्यमव्ययीभाव"** [ ] इत्यव्ययीभावः **"तेन वा तृतीयाया"** [ ] इति विकल्पेनाम्भावविधानात् पक्षेऽत्राम्भावः, नियमाद्-अवश्यंतया षड्दिशि व्यवस्थितानि, षड्भ्यो दिग्भ्य आगतानीति भावः, द्रव्याण्याहारयन्ति, व्याघातं

---

१. ०सन्नं तानि आहा० PV।।

पुनः प्रतीत्य लोकनिष्कुटादौ स्यात्कदाचित्त्रिदिशि-तिसृभ्यो दिग्भ्य आगतानि, कदाचित् चतसृभ्यः कदाचित्पञ्चभ्यः, काऽत्र भावना? इति चेदुच्यते-इह लोकनिष्कुटे पर्यन्ताऽधस्त्यप्रतराग्नेयकोणावस्थितो[1] यदा सूक्ष्मपृथिवीकायिको वर्त्तते तदा तस्याधस्तादलोकेन व्याप्तत्वात् अधोदिक्पुद्गलाभावः, आग्नेयकोणावस्थितत्वात् पूर्वदिक्पुद्गलाभावो दक्षिणदिक्पुद्गलाभावश्च, एवमधःपूर्वदक्षिणरूपाणां तिसृणां दिशामलोकेन व्यापनात् ता अपास्य या परिशिष्टा ऊर्ध्वाऽपरोत्तरा च दिगव्याहता वर्त्तते तत आगतान् पुद्गलानाहारयन्ति। यदा पुनः स एव पृथिवीकायिकः पश्चिमां दिशमनुसृत्य वर्त्तते तदा पूर्वा दिगभ्यधिका जाता, द्वे च दिशौ दक्षिणाधस्त्यरूपे अलोकेन व्याहते इति स चतुर्दिगागतान् पुद्गलानाहारयति, यदा पुनरूर्ध्वं द्वितीयादिप्रतरगतपश्चिमदिशम-वलम्ब्य तिष्ठति तदाऽधस्त्यापि दिगभ्यधिका लभ्यते, केवला दक्षिणैवैका पर्यन्तवर्त्तिनी अलोकेन व्याहतेति पञ्चदिगागतान् पुद्गलानाहारयति।। ४९।।

(५०) उस्सन्नकारणं पडुच्च वण्णतो कालाइं नीलाइं जाव सुक्किलाइं, गंधतो सुब्भिगंधाइं दुब्भिगंधाइं, रसतो[2] तित्त जाव महुराइं, फासतो कक्खड-मउय जाव निद्ध-लुक्खाइं, तेसिं पोराणे वण्णगुणे जाव फासगुणे विप्परिणामइत्ता परिपालइत्ता परिसाडइत्ता परिविद्धंसइत्ता अण्णे अपुव्वे वण्णगुणे गंधगुणे जाव फासगुणे उप्पाइत्ता आतसरीरओगाढा[3] पोग्गले सव्वप्पणयाए आहारमाहारेंति।।५०।।

'वण्णतो' इत्यादि वर्णतः **काल-नील**-लोहित-हारिद्र-**शुक्लानि, गन्धतः सुरभिगन्धानि दुरभिगन्धानि** वा, **रसतस्तिक्तानि यावन्मधुराणि, स्पर्शतः कर्कशानि यावद्रूक्षाणि,** तथा **तेषा**माहार्यमाणानां पुद्गलानां **'पुराणान्'** अग्रेतनान् **वर्णगुणान्** गन्धगुणान् रसगुणान् **स्पर्शगुणान् 'विपरिणामइत्ता परिपालइत्ता परिसाडइत्ता परिविद्धंसइत्ता'** एतानि चत्वार्यपि पदान्येकार्थिकानि विनाशार्थप्रतिपादकानि नानादेशजविनेयानुग्रहार्थमुपात्तानि, विनाशः(श्य) किमित्याह-**अन्यान् अपूर्वान् वर्णगुणान् गन्धगुणान्** रसगुणान् **स्पर्शगुणान् उत्पाद्यात्मशरीरक्षेत्रावगाढान् पुद्गलान् 'सव्वप्पणयाए'** सर्वात्मना-सर्वैरेवात्मप्रदेशै**राहार**माहाररूपान् पुद्गलाना**हारयन्ति**।।५०।।

गतमाहारद्वारं, साम्प्रतमुपपातद्वारमाह-

१.पर्यन्तेऽध PVS।। २. ०तो जाव तित्त महुराइं- S P **खगट**।। ३. ०रखेत्तोगाढे L ०रतोगाढे-S।।

(५१) ते णं भंते! जीवा कतोहिंतो उववज्जंति? किं नेरइएहिंतो उववज्जंति तिरिक्ख-मणुस्स-देवेहिंतो उववज्जंति?, गोयमा! नो नेरइएहिंतो उववज्जंति, तिरिक्खजोणिएहिंतो उववज्जंति, मणुस्सेहिंतो उववज्जंति, नो देवेहिंतो उववज्जंति, तिरिक्खजोणियपज्जत्तापज्जत्तेहिंतो असंखेज्जवासाउयवज्जेहिंतो उववज्जंति, मणुस्सेहिंतो अकम्मभूमिग-[१अंतरदीवग]-असंखेज्जवासाउयवज्जेहिंतो उववज्जंति, वक्कंतीउववाओ भाणियव्वो।।५१।।

'ते णं भंते' इत्यादि, ते भदन्त! सूक्ष्मपृथिवीकायिका **जीवाः 'कुतः'** केभ्यो जीवेभ्य उद्वृत्योत्पद्यन्ते?, **किं नैरयिकेभ्यः?** इत्यादि प्रतीतं, भगवानाह–**गौतम! नो नैरयिकेभ्य** इत्यादि पाठसिद्धं, नवरं देव–नैरयिकेभ्य उत्पादप्रतिषेधो देव–नैरयिकाणां तथाभवस्वभावतया तन्मध्ये उत्पादासम्भवात्, **'[२]जहा वक्कंतीए'** इति, यथा **प्रज्ञापनायां** व्युत्क्रान्तिपदे तथा वक्तव्यं, तच्चैवम्–तिर्यग्योनेभ्योऽप्युत्पादः पर्याप्तेभ्योऽपर्याप्तेभ्यो वा केवलमसङ्ख्यातवर्षायुष्कवर्जितेभ्यः, मनुष्येभ्योऽप्यकर्मभूमिजान्तरद्वीपजासङ्ख्यातवर्षायुष्ककर्मभूमिजव्यतिरिक्तेभ्यः पर्याप्तेभ्योऽपर्याप्तेभ्यो वेति।। ५१ ।।

गतमुपपातद्वारमधुना स्थितिद्वारमाह–

(५२) तेसि णं भंते! जीवाणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं।।५२।।

'तेसि णं भंते!' इत्यादि सुगमं, नवरं जघन्यपदादुत्कृष्टपदमधिकमवसेयम्।।५२।।

गतं स्थितिद्वारमधुना समुद्घातमधिकृत्य मरणं चिचिन्तयिषुरिदमाह–

(५३) ते णं भंते! जीवा मारणंतियसमुग्घातेणं किं समोहया मरंति ? असमोहया मरंति?, गोयमा! समोहयावि मरंति असमोहयावि मरंति।। ५३ ।।

'ते णं भंते जीवा' इत्यादि सुगमम्, उभयथाऽपि मरणसम्भवाद्।। ५३।।

च्यवनद्वारमाह–

---

१. L अंतरदीवग०मु. PS**पा नास्ति** ।। २. अत्र **मूल-वृत्त्योः मध्ये भेदः । एवमग्रेऽपि अनेकत्र** ।।

(५४) ते णं भंते! जीवा अणंतरं उव्वट्टित्ता कहिं गच्छंति? कहिं उववज्जंति?-किं नेरइएसु उववज्जंति तिरिक्खजोणिएसु उ० मणुस्सेसु उ० देवेसु उवव०?, गोयमा! नो नेरइएसु उववज्जंति, तिरिक्खजोणिएसु उ०, मणुस्सेसु उ०, णो देवेसु उवव०।। ५४।। (५५) किं एगिंदिएसु उववज्जंति जाव पंचिंदिएसु उ०?, गोयमा! एगिंदिएसु उववज्जंति जाव पंचेंदियतिरिक्खजोणिएसु उववज्जंति, असंखेज्जवासाउयवज्जेसु पज्जत्तापज्जत्तएसु उव०, मणुस्सेसु अकम्मभूमगअंतरदीवगअसंखेज्जवासाउयवज्जेसु पज्जत्तापज्जत्तएसु उव०।।५५।।

'ते णं भंते जीवा' इत्यादि, **'ते'** सूक्ष्मपृथ्वीकायिका भदन्त! जीवा **अनन्तरमुद्वृत्य** सूक्ष्मपृथिवीकायिकभवादानन्तर्येणोद्वृत्येति भावः **क्व गच्छन्ति?-क्वोत्पद्यन्ते?,** एतेनात्मनो गमनधर्मकता पर्यायान्तरमधिकृत्योत्पत्तिधर्मकता च प्रतिपादिता, तेन ये सर्वगतमनुत्पत्तिधर्मकं चात्मानं प्रतिपन्नास्ते निरस्ता द्रष्टव्याः, तथारूपे सत्यात्मनि यथोक्तप्रश्नार्थासम्भवात्,**'किं नेरइएसु गच्छन्ति'**? इत्यादि सुप्रतीतं, भगवानाह-**'नो नेरइएसु गच्छन्ति'**इत्यादि पाठसिद्धं[1]**'जहा वक्कंतीए'**इति, यथा **'प्रज्ञापनायां'** व्युत्क्रान्तिपदे च्यवनमुक्तं तथाऽत्रापि वक्तव्यं, तच्चोत्पादवद् भावनीयमिति। ५४-५५।

गतं च्यवनद्वारमधुना गत्यागतिद्वारमाह-

(५६) ते णं भंते! जीवा कतिगतिका कतिआगतिका पण्णत्ता?, गोयमा! दुगतिया दुआगतिया, परित्ता असंखेज्जा पण्णत्ता समणाउसो!, से तं सुहुमपुढविकाइया।। ५६।।

'ते णं भंते जीवा' इत्यादि, ते भदन्त! जीवाः **'कतिगतिकाः?'** कति गतयो येषां ते कतिगतिकाः, **'कत्यागतिकाः?'** कतिभ्यो गतिभ्य आगतिर्येषां ते कत्यागतिकाः, भगवानाह-**गौतम! द्व्यागतिका** नरकगतेर्देवगतेश्च सूक्ष्मेषूत्पादाभावात्, **द्विगतिका** नरकगतौ देवगतौ च तत उद्वृत्तानामुत्पादाभावात्, **'परीत्ता'** प्रत्येकशरीरिणः, **असङ्ख्येया** असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात् **प्रज्ञप्ता** मया शेषैश्च तीर्थकृद्भिः, अनेन सर्वतीर्थकृतामविसंवादिवचनतामाह, हे **श्रमण**! हे **आयुष्मन्! 'से तं सुहुमपुढविक्काइया'** त एते सूक्ष्मपृथिवीकायिका उक्ताः।। ५६।।

---

१. **सूत्रे** 'जहा वक्कंतीए' **पाठो न दृश्यते** ।।

उक्ताः सूक्ष्मपृथिवीकायिकाः, अधुना बादरपृथिवीकायिकानभिधित्सुराह–

(५७) से किं तं बायरपुढविकाइया?, २ दुविहा पण्णत्ता, तंजहा-सण्हबायरपुढविकाइया य खरबायरपुढविकाइया य।। ५७ ।।

'से किं त'मित्यादि, अथ के ते **बादरपृथिवीकायिकाः**?, सूरिराह–**बादरपृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-श्लक्ष्णबादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाश्च** श्लक्ष्णा नाम चूर्णितलोष्टकल्पा मृदुपृथिवी तदात्मका जीवा अप्युपचारतः श्लक्ष्णाः, ते च ते बादरपृथिवीकायिकाश्च श्लक्ष्णबादरपृथिवीकायिकाः, अथवा श्लक्ष्णा चासौ[१] बादरपृथिवी च सा, कायः–शरीरं येषां ते श्लक्ष्णबादरपृथ्वीकायाः त एव स्वार्थिकेकप्रत्ययविधानात् श्लक्ष्णबादरपृथिवीकायिकाः, खरा नाम पृथिवी सङ्घातविशेषं काठिन्यविशेषं वाऽऽपन्ना तदात्मका जीवा अपि खराः, ते च ते बादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाः, अथवा पूर्ववत्प्रकारान्तरेण समासः, चशब्दौ स्वगतानेकभेदसूचकौ।।५७।।

(५८) से किं तं सण्हबायरपुढविकाइया?, २ सत्तविहा पण्णत्ता, तंजहा-कण्हमत्तिया, भेओ[२] जहा पण्णवणाए जाव ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य [→ तत्थ[३] णं जेते अपज्जत्तगा ते णं असंपत्ता । तत्थ णं जेते पज्जत्तगा एतेसिं णं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं, संखेज्जाइं जोणिप्पमुहसतसहस्साइं । पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति । जत्थ एगो तत्थ णियमा असंखेज्जा । से तं खरबादरपुढवीकाइया ।। ←] ।। ५८।।

'से किं त'मित्यादि, अथ के ते **श्लक्ष्णबादरपृथिवीकायिकाः**?, सूरिराह–श्लक्ष्णबादरपृथिवीकायिकाः **सप्तविधाः प्रज्ञप्ताः,** तदेव सप्तविधत्वं दर्शयन्ति, **तद्यथा–कृष्णमृत्तिका** इत्यादि **'भेदो भाणियव्वो जहा पण्णवणाए जाव तत्थ नियमा असंखिज्जा'** इति, भेदो बादरपृथिवीकायिकानां द्विविधानामपि तथा भणितव्यो यथा **"प्रज्ञापनायां,"** स च तावद् यावत् **'तत्थ नियमा असंखेज्जा'**

१. च सा P V।। २. भेतोसि - S **कख**। ततो से **-ग**। भेउ से - **ट** ।। ३. →←चिह्नद्वयमध्यवर्तिपाठः प्रज्ञापना (सुत्र १/२०) सूत्राधारेण स्वीकृतोऽस्ति। एतत्पाठस्थोन जे. प्रतौ - ख र बा फा पुढवी य जाव सुरकंते य जाव तत्थ णिमा असंखेज्जा- इति संक्षिप्तः पाठः ।

इति पदं, स चैवम्-"**किण्हमत्तिया नीलमत्तिया लोहियमत्तिया हालिद्दमत्तिया सुक्किलमत्तिया पंडुमत्तिया पणगमत्तिया, से तं सण्हबायरपुढविकाइया। से किं तं खरबायरपुढविकाइया?, २ अणेगविहा पण्णत्ता, तंजहा–**

पुढवी य सक्करा वालुया य उवले सिला य लोणूसे।
[२]तंबाय तउय सीसय रुप्प-सुवण्णे य वइरे य।। १।। [जीवाभिगमसं.गा.१७]

हरियाले हिंगुलए मणोसिला सासगंजण पवाले।
अब्भपडलब्भवालुय बायरकाये मणिविहाणा।।२।।

[३]गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य।
मरगयमसारगल्ले भुयमोयगइंदनीले य।।३।।

चंदणगेरुयहंसे पुलए सोगंधिए य बोद्धव्वे।
चंदप्पभवेरुलिए जलकंते सूरकंते य।।४।। [जीवसमासे. गा.२८,२७,२०]

जे यावण्णे तहप्पगारा ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसि णं वण्णादेसेणं गंधाएसेणं रसाएसेणं फ[४]ासाएसेणं सहस्सग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं। पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा"[प्रज्ञापना सू.२४-२५] इति,

अस्य व्याख्या-कृ[५]ष्णमृत्तिका–कृष्णमृत्तिकारूपा, एवं नील-लोहित-हारिद्र-शुक्लभेदा अपि वाच्याः, पाण्डुमृत्तिका नाम देशविशेषे या धूलीरूपा सती पाण्डू इति प्रसिद्धा तदात्मका जीवा अप्यभेदोपचारात्पाण्डुमृत्तिकेत्युक्ताः, **'पणगमत्ति[६]या'** इति नद्यादिपूरप्लाविते देशे नद्यादिपूरेऽपगते यो भूमौ श्लक्ष्णमृदुरूपो ज[७]लमलाऽपरपर्यायपङ्कः स पनकमृत्तिका तदात्मका जीवा अप्यभेदोपचारात्पनकमृत्तिकाः, **से त**मित्यादिनिगमनं सुगमम्।। **'से किं त'**मित्यादि।। अथ के ते खरबादरपृथिवीकायिकाः?, सूरिराह-खरबादरपृथिवीकायिका अनेकविधाः प्रज्ञप्ताः, चत्वारिंशद्भेदा मुख्यतः प्रज्ञप्ता इत्यर्थः, तानेव चत्वारिंशद्भेदानाह, तंजहा–'पुढवी'त्यादिगाथाचतुष्टयम्। पृथिवीति **'भामा सत्यभामावत्'** शुद्धपृथिवी नदीतटभित्त्यादिरूपा १, चशब्द उत्तरापेक्षया समुच्चये, शर्करा–लघूपलशकलरूपा २, वालुका–सिकता ३, उपलः–टङ्काद्युपकरणपरिकर्मणायोग्यः पाषाणः ४, शिला–घटनयोग्यो देवकुलपीठाद्युपयोगी महान् पाषाणविशेषः ५,लवणं–सामुद्रादि ६,ऊषो यद्वशादूषरं क्षेत्रम् ७,अयस्ताम्र-त्रपु-सीसक-रूप्य-सुवर्णानि

---

१. किण्हमत्तिया SVP **नास्ति।।** २. अयतंबतउय० **प्रज्ञापनायां जीवा.सं.।।** ३. **तुला-आचाराङ्गनि. गा. ७५-७६,आचाराङ्गचूर्णिः, उत्तराध्ययन ३६। ७६-७७।।** ४. फासाएसेणं– PVS **नास्ति।।** ५. **तुला-प्रज्ञापनावृत्तौ पत्र२६** B।। ६. ०मट्टिया PVS **प्रज्ञा. वृत्तौ च।।** ७. PV **प्रज्ञा. वृत्तौ ।** जलमलो०**मु.।।**

-प्रतीतानि १३, वज्रो-हीरकः १४, हरिताल-हिङ्गुल-मनःशिलाः प्रतीताः १७, सासगं-पारदः १८, अञ्जनं--सौवीराञ्जनादि १९, प्रवालं-विद्रुमः २०, अभ्रपटलं-प्रसिद्धम् २१, अभ्रवालुका-अभ्रपटलमिश्रा वालुका २२, 'बायरकाए' इति बादरपृथिवीकायेऽमी भेदा इति शेषः, 'मणिविहाणा' इति चशब्दस्य गम्यमानत्वात् मणिविधानानि च-मणिभेदाश्च बादरपृथिवीकायभेदत्वेन ज्ञातव्याः, तान्येव मणिविधानानि दर्शयति- **'गोमेज्जए य'** इत्यादि, गोमेज्जकः २३, **'चः'** समुच्चये, रुचकः २४, अङ्कः २५, स्फटिकः २६, 'चः' पूर्ववत्, लोहिताक्षः २७, मरकतः २८, मसारगल्लः २९, भुजमोचकः ३०, इन्द्रनीलश्च ३१, चन्दन(:) ३२, गैरिकः ३३, हंसगर्भः ३४, पुलकः ३५, सौगन्धिकश्च ३६, चन्द्रप्रभः ३७, वैडूर्यः ३८, जलकान्तः ३९, सूर्यकान्तश्च ४०, तदेवमाद्यया गाथया पृथिव्यादयश्चतुर्दश भेदा उक्ताः द्वितीयगाथयाऽष्टौ हरितालादयः तृतीयगाथया गोमेज्जकादयो दश[1] तुर्यगाथयाऽष्टाविति, सर्वसङ्ख्यया चत्वारिंशत्, 'जे यावण्णे तहप्पगारा' इति येऽपि चान्ये तथाप्रकारा मणिभेदाः-पद्मरागादयस्तेऽपि खरबादरपृथिवीकायिकत्वेन वेदितव्याः।

'ते समासतो' इत्यादि, [2]ते बादरपृथिवीकायिकाः **'समासतः'** सङ्क्षेपेण **द्विविधाः प्रज्ञप्ताः, तद्यथा-पर्याप्तका अपर्याप्तकाश्च, तत्र येऽपर्याप्तकास्ते** स्वयोग्याः पर्याप्तीः साकल्येना**संप्राप्ताः** अथवाऽसंप्राप्ता इति विशिष्टान् वर्णादीननुपगताः, तथाहि-वर्णादिभेदविवक्षायामेते न शक्यन्ते कृष्णादिना भेदेन व्यपदेष्टुं, किं कारणमिति चेद्, उच्यते, इह शरीरादिपर्याप्तिषु परिपूर्णासु सतीषु बादराणां वर्णादिभेदः [3]प्रकटो भवति नापरिपूर्णासु, ते चापर्याप्ता उच्छ्वासपर्याप्त्या अपर्याप्ता एव म्रियन्ते, ततो न स्पष्टो वर्णादिविभाग इत्यसंप्राप्ता इत्युक्तम् अन्ये तु व्याचक्षते-सामान्यतो वर्णादीनसंप्राप्ता इति, तच्च न युक्तं, यतः शरीरमात्रभाविनो वर्णादयः, शरीरं च शरीरपर्याप्त्या सञ्जातमिति। **'तत्थ ण'**मित्यादि, तत्र **ये ते पर्याप्तकाः**-परिसमाप्तसमस्तस्वयोग्यपर्याप्तयस्ते **वर्णादेशेन**-वर्णभेदविवक्षया एवं **गन्धादेशेन रसादेशेन स्पर्शादेशेन सहस्राग्रशः**-सहस्रसङ्ख्यया **विधानानि**-भेदाः, तद्यथा-वर्णाः कृष्णादिभेदात्पञ्च, गन्धौ सुरभीतरभेदाद् द्वौ, रसास्तिक्तादयः पञ्च, स्पर्शा मृदु-कर्कशादयोऽष्टौ, एकैकस्मिंश्च वर्णादौ तारतम्यभेदेनानेकेऽवान्तरभेदाः, तथाहि-भ्रमर-कोकिल-कज्जलादिषु तरतमभावात् कृष्णः कृष्णतरः कृष्णतम इत्यादिरूपतयाऽनेके कृष्णभेदाः, एवं नीलादिष्वप्यायोज्यं, तथा गन्ध-रस-स्पर्शेष्वपि, तथा परस्परं वर्णानां संयोगतो धूसर-कर्बुरत्वादयोऽनेकसङ्ख्या भेदाः, एवं गन्धादीनामपि परस्परं गन्धादिभिः समायोगात्, ततो भवन्ति वर्णाद्यादेशैः सहस्राग्रशो भेदाः, **'संखिज्जाइं जोणिप्पमुहसयसहस्साइं'**ति

१. नव-**इति प्रज्ञा. वृत्तौ** ।। २. ते सामान्यतो **बा०** PVS ।। ३. सं० SP **नास्ति** ।।

सङ्ख्येयानि [१]योनिप्रमुखाणि-योनिद्वाराणि शतसहस्राणि, तथाहि-एकैकस्मिन् वर्णे गन्धे रसे स्पर्शे च संवृता योनिः पृथिवीकायिकानां, सा पुनस्त्रिधा-सचित्ताऽचित्ता मिश्रा च, पुनरेकैका त्रिधा-शीता उष्णा शीतोष्णा, [२]शीतादीनामपि प्रत्येकं तारतम्यभेदादनेकभेदत्वं, केवलमेकविशिष्टवर्णादियुक्ताः [३]सङ्ख्यातीता अपि स्वस्थाने व्यक्तिभेदेन [४]योनिजातिमधिकृत्यैकैव योनिर्गण्यते, ततः सङ्ख्येयानि पृथ्वीकायिकानां योनिशतसहस्राणि भवन्ति, तानि च सूक्ष्मबादरगतसर्वसङ्ख्यया सप्त, **'पज्जत्तगनिस्साए'** इत्यादि, **पर्याप्तकनिश्रयाऽपर्याप्तका व्युत्क्रामन्ति**-उत्पद्यन्ते, कियन्तः? इत्याह-**यत्रैकः** पर्याप्तक**स्तत्र नियमा**त्तन्निश्रया **असङ्ख्येयाः**-सङ्ख्यातीता अपर्याप्तकाः ।। ५८।।

(५९) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता? गोयमा! तओ सरीरगा पं०, तंजहा-ओरालिए तेयए कम्मए, [५]तं चेव सव्वं नवरं चत्तारि लेसाओ, अवसेसं जहा [६]सुहुमपुढविकाइयाणं [७]आहारो णियमा छद्दिसि, उववातो तिरिक्खजोणियमणुस्स-देवेहिंतो, देवेहिं जाव सोधम्मेसाणेहिंतो, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं बावीसं वाससहस्साइं।।५९।। (६०) ते णं भंते! जीवा मारणंतियसमुग्घाएणं किं समोहता मरंति ? असमोहता मरंति?, गोयमा! समोहतावि मरंति असमोहतावि मरंति ।।६०।। (६१) ते णं भंते! जीवा अणंतरं उव्वट्टित्ता कहिं गच्छंति? कहिं उववज्जंति?-किं नेरइएसु उववज्जंति?०, पुच्छा, नो नेरइएसु उववज्जंति, तिरिक्ख-जोणिएसु उववज्जंति, मणुस्सेसु उव०, नो देवेसु उव०, [८]तं चेव जाव असंखेज्ज-वासाउवज्जेहिं।। ६१।। (६२) ते णं भंते! जीवा कतिगतिया कतिआगतिया पण्णत्ता?, गोयमा! दुगतिया तिआगतिया, परित्ता असंखेज्जा य समणाउसो!, से तं बायरपुढविकाइया। से तं पुढविकाइया।। ६२।।

'एएसि णं भंते! जीवाण'मित्यादिना शरीरावगाहनादिद्वारकलापचिन्तां करोति, सा च पूर्ववत्, तथा चाह-'एवं जो चेव सुहुमपुढविकाइयाणं गमो सो चेव भाणियव्वो इति, **'नवर'**मित्यादि, नवरमिदं

१. योनि० PVS **नास्ति**।। २. शीतोष्णादी० S। ३. ०लमेवं वि० **प्रज्ञा वृत्तौ** ।। ४. योनयो जा० **प्रज्ञा. वृत्तौ** ।। ५. द्रष्टव्यं-१६-२१ सूत्रे । ६. **द्र.२२-५०सूत्रे** ।। ७. L जे । आहारो जाव णियमा-पा क ख ग ट मु. ।। ८. **द्रष्टव्यं १/५५ सूत्रे** ।। ९. तहेव असं० VP **नास्ति**।

नानात्वं लेश्याद्वारे **चतस्रो लेश्या** वक्तव्याः, तेजोलेश्याया अपि सम्भवात्, तथाहि-व्यन्तरादय ईशानान्ता देवा भवनविमानादावतिमूर्च्छयाऽऽत्मीयरत्नकुण्डलादावप्युत्पद्यन्ते, ते च तेजोलेश्यावन्तोऽपि भवन्ति, यल्लेश्यश्च म्रियते अग्रेऽपि तल्लेश्य एवोपजायते **"जल्लेसे मरइ तल्लेसे उववज्जइ" [पंचसं. २५ टी.,]**इति वचनात्, ततः कियत्कालमपर्याप्तावस्थायां तेजोलेश्यावन्तोऽप्यवाप्यन्ते इति चतस्रो वक्तव्याः, **आहारो नियमात् षड्दिशि,** बादराणां लोकमध्य एवोपपातभावात्, उपपातो देवेभ्योऽपि, बादरेषु तदुत्पादविधानात्, **स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिवर्षसहस्राणि,** देवेभ्योऽप्युत्पादात् **त्र्यागतयो, द्विगतयः** पूर्ववत्, एतेऽपि च **'परीत्ता'** प्रत्येकशरीरिणोऽ**सङ्ख्येयाः** प्रज्ञप्ताः हे **श्रमण**! हे **आयुष्मन्**!, **'से त'**मित्याद्युपसंहारवाक्यम्।। ५८-६२ ।।

उक्ताः पृथ्वीकायिकाः, अधुनाऽप्कायिकानभिधित्सुरिदमाह-

(६३) से किं तं आउक्काइया?, २ दुविहा पण्णत्ता, तंजहा-सुहुमआउक्काइया य बायरआउक्काइया य, सुहुमआउ० दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।। ६३ ।। (६४) तेसिं[1] णं भंते! जीवाणं कति सरीरया पण्णत्ता?, गोयमा! तओ सरीरया पण्णत्ता, तं जहा-ओरालिए तेयए कम्मए, जहेव सुहुमपुढविक्काइयाणं, णवरं थिबुगसंठिता पण्णत्ता, सेसं तं चेव जाव[2] दुगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता। से तं सुहुमआउक्काइया।। ६४ ।।

'से किं तं' इत्यादि, **अथ के तेऽप्कायिकाः?**, सूरिराह-**अप्कायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-सूक्ष्माप्कायिकाश्च बादराप्कायिकाश्च,** तत्र सूक्ष्माः सर्वलोकव्यापिनो बादरा घनोदध्यादिभाविनः, चशब्दौ स्वगतानेकभेदसूचकौ। 'से किं तं सुहुमआउक्काइया?' इत्यादि सूक्ष्मपृथिवीकायिकवन्निरवशेषं भावनीयं, नवरमिदं संस्थानद्वारे नानात्वं, तदेवोपदर्शयति-**'तेसि णं भंते! जीवाणं सरीरया किं संठिया?'** इत्यादि पाठसिद्धम् ।।६३-६४।।

(६५) से किं तं बायरआउक्काइया?, २ अणेगविहा पण्णत्ता, तंजहा-ओसा हिमे जाव[3] जे यावन्ने तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, तं चेव सव्वं णवरं थिबुगसंठिता, चत्तारि लेसाओ, आहारो नियमा

---

१. एतस्य सूत्रस्य स्थाने 'ता' आदर्शे एवं पाठोऽस्ति-जहा-सुहुमपुढवी तहा सव्वं णवरं थिबुगसंठिता सरीरा - इति L पृ.२२२ टि.२।। २. द्र. १५-५६ सूत्रे।। ३. द्र.प्रज्ञापना सू. १/२३।।

छद्दिसिं, उववातो तिरिक्खजोणिय-मणुस्स-देवेहिं, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसं सत्तवाससहस्साइं, सेसं तं चेव जहा बायरपुढविकाइया जाव[१] दुगतिया तिआगतिया, परित्ता असंखेज्जा पन्नत्ता समणाउसो!, से तं बायरआऊ, से तं आउक्काइया ।। ६५।।

'से किं त'मित्यादि, **अथ के ते बादराप्कायिकाः**?, सूरिराह–**बादराप्कायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा-'ओसा हिमे** महिया जाव तत्थ नियमा असंखेज्जा' इति, **यावत्**करणादेवं परिपूर्णपाठो द्रष्टव्यः-"**करगे हरतणू सुद्धोदए सीओदए [उसिणोदए] खट्टोदए खारोदए अंबिलोदए लवणोदए वरुणोदए[२] खीरोदए खोओदए रसोदए[३] जे यावन्ने तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा[४] एएसि णं वण्णादेसेणं गंधादेसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा**" **[प्रज्ञापना सू. २८]**इति। अस्य व्याख्या–अवश्यायः- त्रेहः, हिमं–स्त्यानोदकं, महिका–गर्भमासेषु सूक्ष्मवर्षं[५], करको–घनोपलः, हरतनुः यो भुवमुद्भिद्य गोधूमाङ्कुरतृणाग्रादिषु बद्धो बिन्दुरुपजायते, शुद्धोदकम्--अन्तरिक्षसमुद्भवं नद्यादिगतं वा, तच्च स्पर्शरसादिभेदादनेकभेदं, तदेवानेकभेदत्वं दर्शयति–शीतोदकं--नदी-तडागा-ऽवट-वापीपुष्करिण्यादिषु शीतपरिणामम्, उष्णोदकं–स्वभावत एव क्वचिन्निर्झ्झरादावुष्ण-परिणामं, क्षारोदकम्–ईषल्लवणपरिणामं यथा लाटदेशादौ केषुचिदवटेषु, खट्टोदकम्–ईषदम्लपरिणामम्, आम्लोदकम्–अतीव[६] स्वभावत एवाम्लपरिणामं काञ्जिकवत्, लवणोदकं लवणसमुद्रे, वारुणोदकं वारुणसमुद्रे, क्षीरोदकं क्षीरसमुद्रे, क्षोदोदकमिक्षुरससमुद्रे[७], रसोदकं पुष्करवरसमुद्रादिषु, येऽपि चान्ये तथाप्रकारा रस-स्पर्शादिभेदाद् घृतोदकादयो बादरा अप्कायिकास्ते सर्वे बादराप्कायिकतया प्रतिपत्तव्याः, **'ते समासओ'** इत्यादि प्राग्वत् नवरं सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणीत्यत्रापि सप्त वेदितव्यानि। 'तेसि णं भंते! जीवाणं कइ सरीरगा'? इत्यादिद्वारकलापचिन्तायामपि बादरपृथिवीकायिकगमोऽनुगन्तव्यो, नवरं संस्थानद्वारे शरीरकाणि **स्तिबुकसंस्थानसंस्थितानि** वक्तव्यानि, स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतः सप्त वर्षसहस्राणि, शेषं तथैव, उपसंहारमाह-**'से त'**मित्यादि ।।६५।।

उक्ता अप्कायिकाः, सम्प्रति वनस्पतिकायिकानाह–

---

१. द्र. १/५९-६१ सूत्रे ।। २. ०ए खीरोदए धओदए खो० **प्रज्ञा.२८ [१]** ।। ३. रसोदए PVS **नास्ति**।। ४.अपज्जत्तगा ते णं असंपत्ता तत्थ जे णं पज्जत्तगा एएसिणं-इति **प्रज्ञापनायां पाठः** ।। ५. ०वर्षः–**प्रज्ञा.वृत्तौ** । ६. अतीव **प्रज्ञा.वृत्तौ नास्ति** ।। ७. ०रससमुद्रे PVS **नास्ति**।। -०रस०**प्रज्ञा.वृत्तौ नास्ति** ।।

(६६) से किं तं वणस्सइकाइया?, २ दुविहा पण्णत्ता, तंजहा-सुहुमवणस्सइकाइया य बायरवणस्सइकाइया य।। ६६ ।। (६७) से किं तं सुहुमवणस्सइकाइया?,२ दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य तहेव णवरं अणित्थंथ[संठाण]संठिया, दुगतिया दुआगतिया अपरित्ता अणंता, अवसेसं जहा पुढविक्काइयाणं, से तं सुहुमवणस्सइकाइया।। ६७।।

'से किं तं' इत्यादि, **अथ के ते वनस्पतिकायिकाः?**, सूरिराह–**वनस्पतिकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मवनस्पतिकायिकाश्च बादरवनस्पतिकायिकाश्च,** चशब्दौ स्वगतानेकभेदसूचकौ।।६६।। **'से किं त'**मित्यादि, **अथ के ते सूक्ष्मवनस्पतिकायिकाः?**, सूरिराह–सूक्ष्मवनस्पतिकायिका **द्विविधाः प्रज्ञप्ताः-पर्याप्ता अपर्याप्ताश्च, 'तेसि णं भंते! कति सरीरगा'** इत्यादिद्वारकलापचिन्तनं सूक्ष्मपृथिवीकायिकवद् भावनीयं, नवरं संस्थानद्वारे **'सरीरगा अणित्थंत्थसंठाणसंठिया पण्णत्ता'** इति, इत्थं तिष्ठतीति इत्थंस्थं न इत्थंस्थमनित्थंस्थम्, अनियताकारमित्यर्थः, तच्च तत्संस्थानं तेन संस्थितानि–**अनियतसंस्थानसंस्थितानि,** गत्यागतिद्वारसूत्रपर्यन्ते 'अपरित्ता अणंता पन्नत्ता' इति वक्तव्यम्, **'अपरीत्ता'** अप्रत्येकशरीरिणः अनन्तकायिका इत्यर्थः, अत एवाऽ**नन्ताः** प्रज्ञप्ताः हे **श्रमण!** हे **आयुष्मन्!** **'से त'**मित्यादि उपसंहारवाक्यम्।।६६-६७।।

(६८) से किं तं बायरवणस्सइकाइया?, २ दुविहा पण्णत्ता, तंजहा-पत्तेयसरीरबायरवणस्सतिकाइया य साधारणसरीरबायरवणस्सतिकाइया य।। ६८।।

(६९) से किं तं पत्तेयसरीरबादरवणस्सतिकाइया?, २ दुवालसविहा पण्णत्ता, तंजहा-

१ रुक्खा २ गुच्छा ३ गुम्मा ४ लता य ५ वल्ली य ६ पव्वगा चेव।
७तण ८वलय ९हरित १०ओसहि ११जलरुह १२कुहणा य बोद्धव्वा।।१।। ६९।।

(७०) से किं तं रुक्खा?, २ दुविहा पण्णत्ता, तंजहा-एगट्ठिया य बहुबीया य।।७० ।। (७१) से किं तं एगट्ठिया?, २ अणेगविहा पण्णत्ता, तंजहा-[१]निंबंब जंबु जाव पुण्णाग णागरुक्खे सीवण्णि तथा असोगे य। जे यावण्णे तहप्पगारा,

१. निंबंब जंबु कोसंब साल अंकोल्ल पीलु सेलू य जाव - **इति-** L ।

एतेसि णं मूलावि असंखेज्जजीविया, एवं कंदा खंधा तया साला पवाला । पत्ता पत्तेयजीवा । पुप्फाइं अणेगजीवाइं, फला एगट्ठिया। से तं एगट्ठिया।। ७१ ।।

(७२) से किं तं बहुबीया?, २ अणेगविधा पण्णत्ता, तंजहा-अत्थिय-तेंदुय-उंबर-कविट्ठे आमलक-फणस-दाडिम-णग्गोध-काउंबरीय-तिलय-लउय-लोद्धे धवे, जे यावण्णे तहप्पगारा, एतेसि णं मूलावि असंखेज्जजीविया जाव[1] फला बहुबीयगा, से तं बहुबीयगा। से तं रुक्खा। एवं जहा पण्णवणाए तहा भाणियव्वं, जाव जे यावन्ने तहप्पगारा, से तं कुहणा-

नाणाविधसंठाणा रुक्खाणं एगजीविया पत्ता।
खंधोवि एगजीवो ताल-सरल-नालिएरीणं।।१।।
जह सगलसरिसवाणं पत्तेयसरीराणं ।।२।।गाहा
जह वा तिलसक्कुलिया[2] ।।३।। गाहा
से तं पत्तेयसरीरबायरवणस्सइकाइया।। ७२ ।।

'से किं त'मित्यादि, **अथ के ते बादरवनस्पतिकायिकाः?**, सूरिराह-**बादरवनस्पतिकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-प्रत्येकशरीरबादरवनस्पतिकायिकाश्च साधारणशरीरबादर-वनस्पतिकायिकाश्च**, चशब्दौ पूर्ववत्।। ६८ ।। **'से किं त'**मित्यादि, **अथ के ते प्रत्येकशरीरबादरवनस्पतिकायिकाः?**, सूरिराह-**प्रत्येकशरीरबादरवनस्पतिकायिका द्वादशविधाः प्रज्ञप्ताः, तद्यथा-'रुक्खा'** इत्यादि, वृक्षाः-चूतादयः **गुच्छा**-वृन्ताकीप्रभृतयः **गुल्मानि**-नवमालिकाप्रभृतीनि **लताः**-चम्पकलतादयः, इह येषां स्कन्धप्रदेशे विवक्षितोर्ध्वशाखाव्यतिरेकेणान्यत् शाखान्तरं तथाविधं परिस्थूरं न निर्गच्छति ते लता इति व्यवहियन्ते, ते च चम्पकादय इति, **वल्ल्यः**-कूष्माण्डी-त्रपुषीप्रभृतयः **पर्वगा**-इक्ष्वादयः **तृणानि**-कुश-जुंञ्जुका[3]-ऽर्जुनादीनि **वलयानि**-केतकी-कदल्यादीनि तेषां हि त्वग् वलयाकारेण व्यवस्थितेति **हरितानि**-तन्दुलीयक-वस्तुलप्रभृतीनि **औषधयः**-फलपाकान्ताः ताश्च शाल्यादयः जले रुहन्तीति **जलरुहाः**-उदकावकपनकादयः **कुहणा**-भूमिस्फोटाभिधानास्ते चायकायप्रभृतयः, **'एवं भेदो भाणियव्वो जहा पन्नवणाए'** इत्यादि, **'एवम्'**

१. द्र.सू.१/७१ ।। २. तिलसक्कुलिया बहुहिं तिलेहिं सेत्तं - जे.।। ३. ०जुञ्जु०S मु. अञ्जु-**प्रज्ञापनावृत्तौ पत्र ३० B ।।**

उक्तेन प्रकारेण बादरप्रत्येकशरीरवनस्पतिकायिकानां भेदो वक्तव्यो **यथा प्रज्ञापनायाम्**, इह तु ग्रन्थगौरवभयान्न लिख्यते, स च किं यावद् वक्तव्यः? इत्याह-"**जह वा तिलसक्कुलिया**" [सूत्र ३९-५३] इत्यादि, अस्याश्च गाथाया अयं सम्बन्धः-इह यदि वृक्षादीनां मूलादयः प्रत्येकमनेकप्रत्येक-शरीरजीवाधिष्ठितास्ततः कथमेकखण्डशरीराकारा उपलभ्यन्ते?, तत्रेयमुत्तरगाथा-

'जह सगलसरिसवाणं सिलेसमिस्साण वट्टिया वट्टी।

पत्तेयसरीराणं तह होंति सरीरसंघाया।।१।।' [जीवाभिगमसंग्रहणी ३५ प्रज्ञापनासूत्रे ५३]

अस्या व्याख्या-यथा सकलसर्षपाणां श्लेषमिश्राणां-श्लेषद्रव्यविमिश्रितानां वलिता वर्त्तिरेकरूपा भवति, अथ च ते सकलसर्षपाः परिपूर्णशरीराः सन्तः पृथक् पृथक् स्वस्वावगाहनयाऽवतिष्ठन्ते, **'तथा'** अनयैवोपमया प्रत्येकशरीरिणां जीवानां शरीरसङ्घाताः पृथक्पृथक्स्वस्वावगाहना भवन्ति, इह श्लेषद्रव्यस्थानीयं रागद्वेषोपचितं तथाविधं स्वकर्म सकलसर्षपस्थानीयाः प्रत्येकशरीराः, सकलसर्षपग्रहणं वैविक्त्यप्रतिपत्त्या पृथक्पृथक्स्वस्वावगाहप्रत्येकशरीरवैविक्त्यप्रतिपत्त्यर्थम्। अत्रैव दृष्टान्तान्तरमाह-**'जह[२] वा तिलसक्कुलिया'** इत्यादिरधिकृतगाथा, वाशब्दो दृष्टान्तान्तरसूचने, यथा 'तिलसक्कुलिका' तिलप्रधाना पिष्टमयी अपूपिका बहुभिस्तिलैर्मिश्रिता सती यथा पृथक्पृथक्स्वस्वावगाहतिलात्मिका भवति कथञ्चिदेकरूपा च **'तथा'** अनयैवोपमया प्रत्येकशरीरिणां जीवानां शरीरसङ्घाताः कथञ्चिदेकरूपाः पृथक्पृथक्स्वस्वावगाहनाश्च भवन्ति, उपसंहारमाह-**'से त'** मित्यादि सुगमम्।। ६८-७२।।

सम्प्रति साधारणवनस्पतिकायिकप्रतिपादनार्थमाह-

(७३) से किं तं साधारणसरीरबादरवणस्सइकाइया?, २ अणेगविधा पण्णत्ता, तंजहा-आलुए[३] मूलए सिंगबेर हिरिलि सिरिलि सिस्सिरिलि किट्टिया[४] छिरिया छीरविरालिया[५] कण्हकंदे वज्जकंदे सूरणकंदे खल्लूडे[६] किमिरासि भद्दमोत्था[७] पिंडहलिद्दा लोही णीहू थिभु अस्सकण्णी सीहकन्नी सीउंढी मूसंढी जे यावण्णे तहप्पगारा ते समासओ दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य।। ७३।।

---

१. द्र. सू. ३९-५३ ।। २. L **संस्करणे ७२ तमसूत्रे प्रज्ञापनासूत्र ५३ गा. ४६ मध्ये** जह वा तिलपप्पडिया, बहुएहिं तिलेहिं संहिता संती। पत्तेयसरीराणं तह होंति सरीरसंघाया ।। ३. **तुला - भगवती०७/६६, उत्तरा० ३६/९७-९९।।** ४. किट्टिया SPL **प्रज्ञा. ५४(४८)।।** ५. L छरियवि० **मु ग ट** । छरिव०**क** छिरिवि०**ख** SP। छीरविराली - **जे.प्रज्ञा ५४(४८)** ।। ६. खेल्लडे - जे. ।। ७. L । भद्दे मोत्थपिंडे **मु.** । रुद्दमोत्था - S।।

'से किं त'मित्यादि, **अथ के ते साधारणशरीरबादरवनस्पतिकायिकाः**?, सूरिराह-**साधारणशरीरबादरवनस्पतिकायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा-'आलुए'** इत्यादि, एते **आलुक-मूलक-शृङ्गबेर-हिरिलि-सिरिलि-सिस्सिरिलि-किट्टिका(गृष्टिका?)क्षीरिका-क्षीरबिडालिका-कृष्णकन्द-वज्रकन्द-सूरणकन्द-खल्लूट[कृमिराशि]भद्रमुस्ता-पिण्डहरिद्रा-लौही-स्नुहि(स्निहु) स्तिभु-अश्वकर्णी-सिंहकर्णी-सिकुंढी(सिहुण्डी)मुषण्ढी**नामानः साधारणवनस्पति-कायिकभेदाः केचिदतिप्रसिद्धत्वात्केचिद्देशविशेषात्स्वयमवगन्तव्याः, **'जे यावण्णे तहप्पगारा'** इति येऽपि चान्ये तथाप्रकाराः-एवंप्रकारा अवक-पनक-सेवालादयस्तेऽपि साधारणशरीरबादरवनस्पतिकायिकाः प्रतिपत्तव्याः,**'ते समासतो'** इत्यादि,**'ते'** बादरवनस्पतिकायिकाः समासतो **द्विविधाः प्रज्ञप्ताः, तद्यथा-पर्याप्तका अपर्याप्तकाश्च, 'जाव[२] सिय संखेज्जा'** इति यावत्करणादेवं परिपूर्णः पाठो द्रष्टव्यः-**"तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा तेसि णं वण्णादेसेणं गंधादेसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं, [३]संखिज्जाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ सिय संखिज्जा सिय असंखेज्जा सिय अणंता"**[सू.२६] इति, एतत्प्राग्वत् । नवरं यत्रैको बादरपर्याप्तस्तत्र तन्निश्रयाऽपर्याप्ताः कदाचित्सङ्ख्येयाः कदाचिदसङ्ख्येयाः कदाचिदनन्ताः, प्रत्येकतरवः सङ्ख्येया असङ्ख्येया वा, साधारणास्तु नियमादनन्ता इति भावः।। ७३।।

(७४) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरगा पन्नत्ता, तंजहा-ओरालिए तेयए कम्मए, तहेव जहा बायरपुढविकाइयाणं, णवरं णाणासंठाणसंठिया सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं

---

१. जैन आगम वनस्पति कोष (संपादक - मुनि श्रीचन्द्र प्र. जैन विश्वभारती लाडनुं) इत्यस्यानुसारेण अत्र वनस्पतीनाम् हिन्दी-गुजरातीभाषाप्रचलितार्था प्रस्तूयते आलुक-बटाटा, मूलक– मूला, शृङ्गबेर-अदरक, आदु । हिरिलि-[कन्दविशेषः उ. ३६/९८] । सिरिलि-चीड(स्निग्धदारु, सिद्धदारु)। सिस्सिरिलि-[कन्दविशेषः उ. ३६/९८]। गृष्टिका- वाराहीकंद, डुक्करकंद । क्षीरिका-भूखर्जूर, पिंडखर्जूर, रायण । क्षीरबिडालिका-बिलाईकंद, भुईकुम्हडा, विदारीकन्द । कृष्णकन्द-रक्तउत्पल । वज्रकन्द- सकरकंद, साकरिया, रताल । सूरणकन्द-सूरण । खल्लूट- कौटुम्बकन्द, केलुट । कृमिराशि-माजूफल, कांटावाला माया । भद्रमुस्ता-मोथा, मोथ । पिण्डहरिद्रा-गोल गांठोवाली हलदी । लौही-मांसरोहिणी, रोहिणी । स्निहु-स्निहुपुष्पं (थोहरपुष्पं) इति प्रज्ञापनावृत्तौ पत्र ३७ । स्निहु-तिधार थूहर, ब्रधारियो थूहर । स्तिभु-(गुल्मविशेषः) अश्वकर्णी-साल, राल । सिंहकर्णी-अरडूसा । सिहुण्डी-छोटा थूहर, भुंगुराथोर । मुषण्ढी-काली मुसली । २. सूत्रे नायं पाठो दृश्यते ।। ३. असंखि० PV।।

सातिरेगं जोयणसहस्सं, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं दसवाससहस्साइं, जाव दुगतिया तिआगतिया अपरित्ता अणंता पण्णत्ता, से तं बायरवणस्सतिकाइया, से तं थावरा।। ७४[१]।।

'तेसि णं भंते! कइ सरीरगा?' इत्यादिद्वारकलापचिन्तनं बादरपृथिवीकायिकवत्, नवरं संस्थानद्वारे **नानासंस्थानसंस्थितानीति** वक्तव्यम्। **अवगाहनाद्वारे 'उक्कोसेणं सातिरेगं जोयणसहस्स'**मिति, तच्च सातिरेकं योजनसहस्रमवगाहनामानमेकस्य जीवस्य बाह्यद्वीपेषु वल्ल्यादीनां, समुद्रगोतीर्थेषु च पद्मनालादीनां, तदधिकोच्छ्रयमानानि तु पद्मानि पृथिवीकायपरिणाम इति **वृद्धाः**। स्थितिद्वारे **उत्कर्षतो दश वर्षसहस्राणि** वक्तव्यानि, गत्यागतिसूत्रानन्तरम् **'अपरीत्ता अणंता'** इति वक्तव्यं, तत्र 'परीत्ताः' प्रत्येकशरीरिणोऽसङ्ख्येयाः **'अपरीत्ताः'** अप्रत्येकशरीरिणोऽनन्ताः प्रज्ञप्ताः हे श्रमण! हे आयुष्मन्!, उपसंहारमाह-**'से तं बादरवणस्सइकाइया, से तं थावरा'** इति सुगमम्।।७४।।

उक्ताः स्थावराः, सम्प्रति त्रसप्रतिपादनार्थमाह–

(७५) से किं तं तसा?, २ तिविधा पण्णत्ता, तंजहा-तेउक्काइया वाउक्काइया ओराला तसा पाणा[२]।। ७५।।

'से किं तं तसा' इत्यादि, **अथ के ते त्रसाः?,** सूरिराह–**त्रसास्त्रिविधाः प्रज्ञप्ताः, तद्यथा– तेजस्कायिका वायुकायिका औदारिकत्रसाः,** तत्र तेजः–अग्निः कायः–शरीरं येषां ते तेजस्कायास्त एव स्वार्थिकेकप्रत्ययविधानात्तेजस्कायिकाः, वायुः–पवनः स कायो येषां ते वायुकायास्त एव वायुकायिकाः, उदाराः–स्फारा उदारा एव औदारिकाः प्रत्यक्षत एव स्पष्टत्रसत्वनिबन्धनाभिसन्धिपूर्वक-गतिलिङ्गतयोपलभ्यमानत्वात्, तत्र त्रसा द्वीन्द्रियादयः **'औदारिकत्रसाः'** स्थूरत्रसा इत्यर्थः।।७५।।

तत्र तेजस्कायिकप्रतिपादनार्थमाह–

(७६) से किं तं तेउक्काइया?, २ दुविहा पण्णत्ता, तंजहा-सुहुमतेउक्काइया य बादरतेउक्काइया य।। ७६।।

---

१. जे. प्रतौ ७४ सूत्र स्थाने - णाणत्तं णाणसंठाणसंठिता, ठिति दससहस्सा, ओगाहणा सातिरेगं जोयणसहस्सं अपरित्ता अणंता जाव से तं थावरा - इति पाठः ।। २. PS । पाणा -L **नास्ति । हारिभद्रीय-मलयगिरिवृत्त्योरपि** पाणा **इति पदं व्याख्यातं नास्ति इति** L **पृ. २२४ -टि. ६ ।।**

'से किं तं' इत्यादि, **अथ के ते तेजस्कायिकाः ?, तेजस्कायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-सूक्ष्मतेजस्कायिकाश्च बादरतेजस्कायिकाश्च,** चशब्दौ पूर्ववत्।।७६।।

(७७) से किं तं सुहुमतेउक्काइया?, २ जधा सुहुमपुढविक्काइया नवरं सरीरगा सूइकलावसंठिया, एगगतिया दुआगतिआ परित्ता असंखेज्जा पण्णत्ता, सेसं तं चेव, से तं सुहुमतेउक्काइया।। ७७।।

'से किं तं' इत्यादि, **अथ के ते सूक्ष्मतेजस्कायिकाः**?, सूरिराह-**सूक्ष्मतेजस्कायिका** इत्यादि सूत्रं सर्वं सूक्ष्मपृथिवीकायिकवद् वक्तव्यं, **नवरं** संस्थानद्वारे **शरीराणि सूचीकलापसंस्थितानि** वक्तव्यानि, च्यवनद्वारेऽनन्तरमुद्वृत्य[१] तिर्यग्गतावेवोत्पद्यन्ते, न मनुष्यगतौ, तेजोवायुभ्योऽनन्तरोद्वृत्तानां मनुष्यगतावुत्पादप्रतिषेधात्, तथा चोक्तम्-

"सत्तमिमहिनेरइया तेऊ वाऊ अणंतरुव्वट्टा।
नवि पावे माणुस्सं तहेवऽसंखाउया सव्वे।।१।।" [ ]

गत्यागतिद्वारे **द्व्यागतयः,** तिर्यग्गतेर्मनुष्यगतेश्च तेषूत्पादात्, **एकगतयो**ऽनन्तरमुद्वृत्तानां तिर्यग्गतावेव गमनात्, शेषं तथैव, उपसंहारवाक्यं **'से तं सुहुमतेउक्काइया'**।।७७।।

बादरतेजस्कायिकानाह-

(७८) से किं तं बादरतेउक्काइया?, २ अणेगविहा पण्णत्ता, तंजहा-इंगाले जाले[२] मुम्मुरे जाव सूरकंतमणिनिस्सिते, जे यावन्ने तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।।७८।।

(७९) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरगा पण्णत्ता, तंजहा-ओरालिए तेयए कम्मए, सेसं तं चेव, सरीरगा सूइकलावसंठिता, तिन्नि लेस्सा, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि रातिंदियाइं, तिरियमणुस्सेहिंतो उववाओ, सेसं तं चेव एगगतिया दुआगतिया, परित्ता असंखेज्जा पण्णत्ता, से तं बादरतेउक्काइया । से तं तेउक्काइया ।। ७९।।

---

१. PV ।०मुद्वृत्य० मु.एवमग्रेऽपि ।। २. जाले SP नास्ति ।।

'से किं तं' इत्यादि, **अथ के ते बादरतेजस्कायिकाः**?, सूरिराह-**बादरतेजस्कायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा-'इंगाले जाव तत्थ नियमे'**त्यादि **याव**त्करणादेवं परिपूर्णपाठः-**'इंगाले जाला मुम्मुरे अच्ची अलाए सुद्धागणी उक्का विज्जू असणि निग्घाए संघरिससमुट्ठिए सूरकंतमणिनिस्सिए, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसि णं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं, संखिज्जाइं जोणिप्पमुहसयसहस्साइं। पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा'**[प्रज्ञा. सू.१७] इति। अस्य व्याख्या-'अङ्गारः' विगतधूमज्वालो जाज्वल्यमानः खदिरादिः, 'ज्वाला' अनलसंबद्धा दीपशिखेत्यन्ये, 'मुर्मुरः' फुम्फुकाग्नौ भस्ममिश्रितोऽग्निकणरूपः, 'अर्चिः' अनलाप्रतिबद्धा ज्वाला, 'अलातम्' उल्मुकं, 'शुद्धाग्निः' अयःपिण्डादौ, 'उल्का' चुडुली 'विद्युत्' प्रतीता, 'अशनिः' आकाशे पतन्नग्निमयः कणः, 'निर्घातः' वैक्रियाशनिप्रपातः, 'संघर्षसमुत्थितः' अरण्यादिकाष्ठनिर्मथनसमुत्थः, **'सूर्यकान्तमणिनिश्रितः'** सूर्यखरकिरणसंपर्के सूर्यकान्तमणेर्यः समुपजायते, **'जे यावण्णे तहप्पगारा'** इति, येऽपि चान्ये 'तथाप्रकाराः' एवंप्रकारास्तेजस्कायिकास्तेऽपि बादरतेजस्कायिकतया वेदितव्याः, **'ते समासतो'** इत्यादि प्राग्वत्, शरीरादिद्वारकलापचिन्ताऽपि सूक्ष्मतेजस्कायिकवत्, नवरं स्थितिद्वारे **जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि रात्रिन्दिवानि(वम्)**, आहारो यथा बादरपृथ्वीकायिकानां तथा वक्तव्यः, उपसंहारमाह-**'से तं तेउक्काइया'**।।७८-७९।।

उक्तास्तेजस्कायिकाः, सम्प्रति वायुकायिकानाह–

(८०) से किं तं वाउक्काइया?, २ दुविहा पण्णत्ता, तंजहा-सुहुमवाउक्काइया य बादरवाउक्काइया य, सुहुमवाउक्काइया जहा[२] तेउक्काइया णवरं सरीरा पडागसंठिता, एगगतिया दुआगतिया परित्ता असंखिज्जा। से तं सुहुमवाउक्काइया।

(८१) से किं तं बादरवाउक्काइया?, २ अणेगविधा पण्णत्ता, तंजहा-पाईणवाए पडीणवाए, एवं जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।। ८१ ।।

---

१. अत्र सूत्र-वृत्तिपाठयोः किञ्चिद्भेदः ।। २. द्र.सू.१/७७।।

'से किं तं' इत्यादि, **अथ के ते वायुकायिकाः**?, सूरिराह-**वायुकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा-सूक्ष्मवायुकायिकाश्च बादरवायुकायिकाश्च,** चशब्दौ प्राग्वत्, तत्र **सूक्ष्मवायुकायिकाः** सूक्ष्मतेजस्कायिकवद्वक्तव्याः, **नवरं** संस्थानद्वारे तेषां **शरीराणि पताकासंस्थानसंस्थितानि** वक्तव्यानि, शेषं तथैव, बादरवायुकायिका अपि एवं चैव-सूक्ष्मतेजस्कायिकवदेव, नवरं भेदो यथा **प्रज्ञापनायां** तथा वक्तव्यः, स चैवम्-**"से किं तं बायरवाउक्काइया?, बायरवाउक्काइया अणेगविहा पण्णत्ता, तंजहा-पाईणवाए पडीणवाए दाहिणवाए उदीणवाए उड्ढवाए अहेवाए तिरियवाए विदिसिवाए वाउब्भामे वाउक्कलियां मंडलियावाए उक्कलियावाए गुंजावाए झंझावाए संवट्टगवाए घणवाए तणुवाए सुद्धवाए, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसिं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासाएसेणं सहस्सग्गसो विहाणाइं, संखेज्जाइं जोणिप्पमुहसय-सहस्साइं, पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा"** [प्रज्ञापना सू.३४] इति,

अस्य व्याख्या-**'पाईणवाए'** इति, यः प्राच्या दिशः समागच्छति वातः स प्राचीनवातः, एव[१]मपाचीनो दक्षिणवात उदीचीनवातश्च वक्तव्यः, ऊर्ध्वमुद्गच्छन् यो वाति वातः स ऊर्ध्ववातः, एवमधोवात-तिर्यग्वातावपि परिभावनीयौ, विदिग्वातो यो विदिग्भ्यो वाति,वातोद्भ्रमः-अनवस्थितो वातः, वातोत्कलिका-समुद्रस्येव वातस्योत्कलिका, वातमण्डली(उत्कलिका)वात उत्कलिकाभिः प्रचुरताभिः सम्मिश्रो यो वातः, मण्डलिकावातो मण्डलिकाभिर्मूलत आरभ्य प्रचुरताभिः सम्मिश्रो यो वातः, गुञ्जावातो यो गुञ्जन्-शब्दं कुर्वन् वाति, झञ्झावातः सवृष्टिः, अशुभनिष्ठुर इत्यन्ये, संवर्त्तकवातः तृणादिसंवर्त्तनस्वभावः, घनवातो घनपरिणामो वातो रत्नप्रभापृथिव्याद्यधोवर्त्ती, तनुवातो-विरलपरिणामो घनवातस्याधःस्थायी, शुद्धवातो मन्दस्तिमितो, बस्ति-दृत्यादिगत इत्यन्ये, **'ते समासतो'** इत्यादि प्राग्वत्, ।। ८१।।

(८२) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! चत्तारि सरीरगा पण्णत्ता, तंजहा-ओरालिए वेउव्विए तेयए कम्मए, सरीरगा पडागसंठिता। चत्तारि समुग्घाता-वेयणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए वेउव्विय-समुग्घाए। आहारो णिव्वाघातेणं छद्दिसिं, वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं। उववातो देवमणुयनेरइएसु णत्थि। ठिती जहन्नेणं अंतोमुहुत्तं

१. ० य वायमं ० प्रज्ञापनायांम् ।। २. ०मप्राचीनवातः - प्रज्ञा. वृत्तौ पत्र ३०A।।

उक्कोसेणं तिन्नि वाससहस्साइं, सेसं तं चेव एगगतिया दुआगइया परित्ता असंखेज्जा पण्णत्ता समणाउसो!, से तं बायरवाउक्काइया। से तं वाउक्काइया।। ८२ ।।

तथा शरीरादिद्वारकलापचिन्तायां शरीरद्वारे **चत्वारि शरीराणि औदारिक-वैक्रिय-तैजस-कार्मणानि, चत्वारः समुद्घाताः-वैक्रिय-वेदना-कषाय-मारणान्तिक**रूपाः, **स्थिति**द्वारे **जघन्यतोऽन्तर्मुहूर्त्तं** वक्तव्य**मुत्कर्षतस्त्रीणि वर्षसहस्राणि, आहारो निर्व्याघातेन षड्दिशि, व्याघातं प्रतीत्य स्यात्त्रिदिशि स्याच्चतुर्दिशि स्यात्पञ्चदिशि,** लोकनिष्कुटादावपि बादरवातकायस्य सम्भवात्, शेषं सूक्ष्मवातकायवद्, उपसंहारमाह-**'से तं वाउक्काइया'** इति।। ८२।।

उक्ता वातकायिकाः, सम्प्रत्यौदारिकत्रसानाह-

(८३) से किं तं ओराला तसा[1], २ चउव्विहा पण्णत्ता, तंजहा-बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया।। ८३।।

'से किं तं' इत्यादि, **अथ के ते औदारिकत्रसाः?**, सूरिराह-**औदारिकत्रसाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाः**, तत्र द्वे स्पर्शन-रसनरूपे इन्द्रिये येषां ते द्वीन्द्रियाः, त्रीणि स्पर्शन-रसन-घ्राणरूपाणि इन्द्रियाणि येषां ते त्रीन्द्रियाः, चत्वारि स्पर्शन-रसन-घ्राण-चक्षूरूपाणि इन्द्रियाणि येषां ते चतुरिन्द्रियाः, पञ्च स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्ररूपाणि इन्द्रियाणि येषां ते पञ्चेन्द्रियाः।। ८३।।

तत्र द्वीन्द्रियप्रतिपादनार्थमाह-

(८४) से किं तं बेइंदिया?, २ अणेगविधा पण्णत्ता, तंजहा-पुलाकिमिया जाव समुद्दलिक्खा, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।। ८४।।

'से किं त'मित्यादि, **अथ के ते द्वीन्द्रियाः?**, सूरिराह-**द्वीन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा-'पुलाकिमिया जाव समुद्दलिक्खा'** इति यावत्करणादेवं परिपूर्णपाठो द्रष्टव्यः-"**पुलाकिमिया कुच्छिकिमिया, गंडूयलगा, गोलोमा, नेउरा, सोमंगलगा, वंसीमुहा, सूईमुहा, गोजलोया, जलोया, जलोयुसा, संखा,**

१. जे.L। तसा पाणा - s क ख ग ट मु. ।

संखणगा, घुल्ला, खुल्ला, वराडा, सोत्तिया, मोत्तिया, कल्लुया[१], वासा, एगतोवत्ता , दुहतोवत्ता, नंदियावत्ता, संबुक्का, माइवाहा, सिप्पिसंपुडा, चंदणा, समुद्दलिक्खा" [प्रज्ञापनासूत्र -५६] इति'

अस्य व्याख्या-**'पुलाकिमिया'** नाम पायुप्रदेशोत्पन्नाः कृमयः, 'कुक्षिकृमयः' कुक्षिप्रदेशोत्पन्नाः, 'गण्डोयलकाः' प्रतीताः, 'शङ्खाः' समुद्रोद्भवास्तेऽपि प्रतीताः, 'शङ्खनकाः' त एव लघवः, 'घुल्लाः' घुल्लिकाः, 'खुल्लाः' लघवः शङ्खाः सामुद्रशङ्खाकाराः, 'वराटाः' कपर्दाः, 'मातृवाहाः' कोद्रवाकारतया ये कोद्रवा इति प्रतीताः, 'सिप्पिसंपुडा' संपुटरूपाः शुक्तयः, 'चन्दनकाः' अक्षाः, शेषास्तु यथासम्प्रदायं वाच्याः, **'जे यावण्णे तहप्पगारा'** इति येऽपि चान्ये तथाप्रकाराः-एवंप्रकाराः मृतककलेवरसम्भूतकृम्यादयस्ते सर्व्वे द्वीन्द्रिया ज्ञातव्याः, **'ते समासतो'** इत्यादि, ते द्वीन्द्रियाः 'समासतः' सङ्क्षेपेण **द्विविधाः प्रज्ञप्ताः, तद्यथा-अपर्याप्ताः पर्याप्ताश्च**।। ८४ ।।

(८५) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरगा पण्णत्ता, तंजहा-ओरालिए तेयए कम्मए।। ८५।।

(८६) तेसि णं भंते! जीवाणं केमहालिया सरीरओगाहणा पण्णत्ता?, जहन्नेणं अंगुलासंखेज्जभागं, उक्कोसेणं बारसजोयणाइं, छेवट्टसंघयणा हुंडसंठिता, चत्तारि कसाया, चत्तारि सण्णाओ, तिण्णि लेसाओ, दो इंदिया, तओ समुग्घाता-वेयणा कसाया मारणंतिया, नोसन्नी असन्नी, णपुंसकवेदगा, पंच पज्जत्तीओ, पंच अपज्जत्तीओ, सम्मद्दिट्ठीवि मिच्छदिट्ठीवि नो सम्मामिच्छदिट्ठी, णो चक्खुदंसणी, अचक्खुदंसणी णो ओहिदंसणी नो केवलदंसणी।। ८६।।

शरीरद्वारेऽमीषां **त्रीणि शरीराणि-औदारिकं तैजसं कार्मणं च,** अवगाहना **जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रा उत्कृष्टा द्वादश योजनानि,** संहननद्वारे **छेदवर्त्तिसंहननिनः**, अत्र संहननं मुख्यमेव द्रष्टव्यम्, अस्थिनिचयभावात्, संस्थानद्वारे **हुण्डसंस्थानाः,** कषायद्वारे **चत्वारः कषायाः,** सञ्ज्ञाद्वारे **चतस्र** आहारादिकाः **सञ्ज्ञाः**, लेश्याद्वारे आद्या**स्तिस्रो लेश्याः,** इन्द्रियद्वारे **द्वे इन्द्रिये,** तद्यथा-स्पर्शनं

---

१. कलुया-**प्रज्ञापनासूत्रे**।।

रसनं च, समुद्घातद्वारे **त्रयः समुद्घाताः**, तद्यथा–**वेदना**समुद्घातः **कषाय**समुद्घातो **मारणान्तिक**समुद्घातश्च, सञ्ज्ञाद्वारे **नो सञ्ज्ञिनोऽसञ्ज्ञिनः**, वेदद्वारे **नपुंसकवेदाः**, संमूर्च्छिमत्वात्, पर्याप्तिद्वारे **पञ्च पर्याप्तयः पञ्चापर्याप्तयः**, दृष्टिद्वारे **सम्यग्दृष्टयो मिथ्यादृष्टयो वा, न सम्यग्मिथ्यादृष्टयः**, कथम्? इति चेद् उच्यते, इह घण्टायां वादितायां महान् शब्द उपजायते, तत उत्तरकालं हीयमानोऽवसाने लालामात्रं भवति, एवममुना घण्टालालान्यायेन किञ्चित्सास्वादन-सम्यक्त्वशेषाः केचिद् द्वीन्द्रियेषु मध्ये उत्पद्यन्ते, ततोऽपर्याप्तावस्थायां कियत्कालं सास्वादनसम्यक्त्व-सम्भवात् सम्यग्दृष्टित्वं, शेषकालं मिथ्यादृष्टिता, यत्तु सम्यग्मिथ्यादृष्टित्वं तन्न सम्भवति, तथाभवस्वभाव-तया तथारूपपरिणामाऽयोगात्, नापि सम्यग्मिथ्यादृष्टिः सन् तत्रोत्पद्यते **'न सम्ममिच्छो कुणइ कालं' [द्र.भग.१२/१०/४७२ वृत्तिः]** इति वचनात्, दर्शनद्वारं प्राग्वत्।। ८५-८६।।

(८७) ते णं भंते! जीवा किं णाणी? अण्णाणी?, गोयमा! णाणीवि अण्णाणीवि, जे णाणी ते नियमा दुण्णाणी, तंजहा-आभिणिबोहियणाणी सुतणाणी य। जे अन्नाणी ते नियमा दुअण्णाणी-मतिअण्णाणी य सुतअण्णाणी य। नो मणजोगी वइजोगी कायजोगी। सागारोवउत्तावि अणागारोवउत्तावि। आहारो नियमा छद्दिसिं। उववातो तिरिय-मणुस्सेसु नेरइय-देवअसंखेज्जवासाउयवज्जेसु[1], ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं बारस संवच्छराणि। समोहतावि मरंति असमोहतावि मरंति, कहिं गच्छंति?, नेरइय-देवअसंखेज्जवासाउअवज्जेसु गच्छंति, दुगतिया दुआगतिया, परित्ता असंखेज्जा, से तं बेइंदिया।। ८७।।

ज्ञानद्वारे **ज्ञानिनोऽप्यज्ञानिनोऽपि**, तत्र ज्ञानित्वं सास्वादनसम्यक्त्वापेक्षया, **ते च ज्ञानिनो नियमाद् द्विज्ञानिनो**, मति-श्रुतज्ञानमात्रभावात्, **अज्ञानिनोऽपि नियमाद् द्व्यज्ञानिनो**, मत्यज्ञान-श्रुताज्ञानमात्रभावात्। योगद्वारे **न मनोयोगिनो वाग्योगिनोऽपि[2] काययोगिनोऽपि**, उपयोगद्वारं पूर्ववत्,

---

१. इदम् आगमनात्मकोपपात सूत्रमस्ति, तेनात्र पञ्चमी विभक्तिर्युज्यते । अत्र लिपिप्रमादात् अथवा संक्षिप्तीकरणप्रमादात् विभक्तेर्विपर्ययो जातः। वृत्तौ व्याख्यातः पाठः समीचीनोऽस्ति– प्राकृतव्याकरण १/१३६ पञ्चम्यास्तृतीया च इति पञ्चमीस्थाने सप्तमी विभक्तिरपि जायते । यदि एवं स्वीक्रियते तदा नास्ति लिपिप्रमादः सूत्रकारेणापि केषुचिच्च सप्तम्याः प्रयोगः कृतः । इति L पृ. २२६ टि.७ ।। २. वाग्योगिनो० PVS **नास्ति ।।**

आहारो नियमात् षड्दिशि, त्रसनाड्या एवान्तर्द्वीन्द्रियादीनां भावात्, **उपपातो देव-नारका-ऽसङ्ख्यातवर्षायुष्कवर्जेभ्यः** शेष**तिर्यग्मनुष्येभ्यः, स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वादश वर्षाणि,** समवहतद्वारं प्रागिव। च्यवनद्वारे **देव-नारकाऽसङ्ख्यातवर्षायुष्कवर्जितेषु** शेषेषु तिर्यग्मनुष्येष्वनन्तर-मुद्वृत्य गमनम्, अत एव गत्यागतिद्वारे **द्व्यागतिका द्विगतिकाः** तिर्यग्मनुष्यगत्यपेक्षया, **'परीत्ताः'** प्रत्येकशरीरिणः, **असङ्ख्येया** घनीकृतस्य लोकस्य या ऊर्ध्वाध आयता एकप्रादेशिक्यः श्रेणयोऽसङ्ख्येय-योजनकोटाकोटीप्रमाणाकाशसूचिगतप्रदेशराशिप्रमाणाः तावत्प्रमाणत्वात्, प्रज्ञप्ताः हे श्रमण! हे आयुष्मन्!, उपसंहारमाह-**'से तं बेइंदिया'**।। ८७।।

उक्ता द्वीन्द्रियाः, अधुना त्रीन्द्रियानाह-

(८८) से किं तं तेइंदिया?, २ अणेगविधा पण्णत्ता, तंजहा-ओवइया रोहिणिया [जाव] हत्थिसोंडा, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, तहेव जहा बेइंदियाणं, नवरं सरीरोगाहणा उक्कोसेणं तिन्नि गाउयाइं, तिन्नि इंदिया, ठिई जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं एगूणपण्णराइंदिया, सेसं तहेव, दुगतिया दुआगतिया, परित्ता असंखेज्जा पण्णत्ता, से तं तेइंदिया।। ८८।।

'से किं तं' इत्यादि, **अथ के ते त्रीन्द्रियाः**?, सूरिराह-**त्रीन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा-'भेदो जहा पण्णवणाए'** भेदो यथा प्रज्ञापनायां तथा वक्तव्यः, स चैवम्- **"ओवयिया रोहिणिया कुंथू पिवीलिया उद्देसगा उद्देहिया उक्कलिया तणहारा कट्ठहारा पत्ताहारा मालुया पत्तहारा तणबेंटका पत्तबेंटया फलबेंटया तेम्बुरुमिंजिया तउसमिंजिया कप्पासट्ठिमिंजियाँ झिल्लिया झिंगिरा झिंगिरिडा पाहुया, [ग्रन्थाग्रम् १०००] मुँरगा सोवत्थिया सुयबेंटा इंदकाइया इंदगोवया कोत्थलवाहगा हालाहला पिसुया तँसवाइया गोम्ही हत्थिसोंडा[प्रज्ञा.५७]।।"** इति, एते च केचिदतिप्रतीताः केचिद्देशविशेषतोऽवगन्तव्याः, नवरं 'गोम्ही' कण्हसियाली, **'जे यावण्णे तहप्पगारा'** इति येऽपि चान्ये **'तथाप्रकाराः'** एवंप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्याः, **'ते समासतो'** इत्यादि समस्तमपि सूत्रं द्वीन्द्रियवत्परिभावनीयं, **नवर**मवगाहनाद्वारे **उत्कर्षतो**ऽवगाहना **त्रीणि गव्यूतानि। इन्द्रियद्वारे त्रीणि इन्द्रियाणि। स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षत एकोनपञ्चाशद् रात्रिन्दिवानि(वं), शेषं तथैव,** उपसंहारमाह-**'से तं तेइंदिया'**।। ८८।।

---

१. ०या हिलिय झिल्लिया-**प्रज्ञापनायाम्** ।। २. किंगि ० **प्रज्ञापनायाम्** । ३. सुभगा-**प्रज्ञापनायाम्**। ४. सतवाइया-**प्रज्ञापनायाम्** ।।

उक्तास्त्रीन्द्रियाः, सम्प्रति चतुरिन्द्रियप्रतिपादनार्थमाह–

(८९) से किं तं चउरिंदिया?, २ अणेगविधा पण्णत्ता, तंजहा-अंधिया पुत्तिया जाव गोमयकीडा, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य ।। ८९ ।।

(९०) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरगा पण्णत्ता तं चेव, णवरं सरीरोगाहणा उक्कोसेणं चत्तारि गाउयाइं, इंदिया चत्तारि, चक्खुदंसणी अचक्खुदंसणी, ठिती उक्कोसेणं छम्मासा, सेसं जहा तेइंदियाणं जाव असंखेज्जा पण्णत्ता, से तं चउरिंदिया।। ९०।।

'से किं तं' इत्यादि, **अथ के ते चतुरिन्द्रियाः?**, सूरिराह–**चतुरिन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा-"अंधिया पुत्तिया मच्छिया मगसिरा[१] कीडा पयंगा टंकणा[२] कुक्कुहा कुक्कुडा नंदावत्ता झिंगिरिडा[३] किण्हपत्ता नीलपत्ता लोहियपत्ता हालिद्दपत्ता सुक्किलपत्ता चित्तपक्खा विचित्तपक्खा ओहंजलिया जलचारिया गंभीरा नीणिया तंतवा अच्छिरोडा अच्छिवेहा सारंगा नेउरा[४] डोला भमरा भरिलि जरुला[५] विच्छुया पत्तविच्छुया छाणविच्छुया जलविच्छुया सेइंगाला[६] कणगा गोमयकीडगा' [तुला-प्रज्ञापना सूत्र-५८]** एते लोकतः प्रत्येतव्याः, **'जे यावण्णे तहप्पगारा"** इति, येऽपि चान्ये **'तथाप्रकाराः'** एवंप्रकारास्ते सर्वे चतुरिन्द्रिया विज्ञेयाः, **'ते समासतो'** इत्यादि सकलमपि सूत्रं द्वीन्द्रियवद् भावनीयं, **नवर**मवगाहनाद्वारे **उत्कर्षतोऽवगाहना चत्वारि गव्यूतानि**। इन्द्रियद्वारे स्पर्शन-रसन-घ्राण-चक्षुर्लक्षणानि **चत्वारीन्द्रियाणि**। स्थितिद्वारे **उत्कर्षतः स्थितिः षण्मासाः, शेषं** तथैव, उपसंहारमाह–**'से तं चउरिंदिया'**।।८९-९०।।

सम्प्रति पञ्चेन्द्रियान् प्रतिपिपादयिषुराह-

(९१) से किं तं पंचेंदिया?, २ चउव्विहा पण्णत्ता, तंजहा-णेरतिया तिरिक्खजोणिया मणुस्सा देवा।। ९१।।

से किं तं इत्यादि, **अथ के ते पञ्चेन्द्रियाः?**, सूरिराह–**पञ्चेन्द्रियाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-नैरयिकास्तिर्यग्योनिका मनुष्या देवाः,** तत्र अयम्–इष्टफलं कर्म निर्गतमयं येभ्यस्ते

---

१. मगमिगकीडा-**प्रज्ञाप०।।** २. P V । टेंकणा-**मु.** । ढिंकुण-**प्रज्ञा०।।** ३. सिंगिरिडा-**प्रज्ञा०।।** ४. णेउला दोला-**प्रज्ञा० ।।** ५. जरुला-**प्रज्ञा०।।** ६. पियंगाला-**प्रज्ञा०।।**

निरया-नरकावासास्तेषु भवा नैरयिकाः, अध्यात्मादेराकृतिगणत्वादिकण्प्रत्ययः। तिर्यगिति प्रायस्तिर्यग्लोके योनयस्तिर्यग्योनयस्तत्र जातास्तिर्यग्योनिजाः, यदि वा तिर्यग्योनिका इति शब्दसंस्कारः, तत्र तिर्यगिति प्रायस्तिर्यग्लोके योनयः-उत्पत्तिस्थानानि येषां ते तिर्यग्योनिकाः। मनुरिति मनुष्यस्य सञ्ज्ञा, मनोरपत्यानि मनुष्याः, जातिशब्दोऽयं राजन्यादिशब्दवद्। दीव्यन्तीति देवाः।।९१।।

तत्र नैरयिकप्रतिपादनार्थमाह-

(९२) से किं तं नेरइया?, २ सत्तविहा पण्णत्ता, तंजहा-रयणप्पभापुढविनेरइया जाव अहेसत्तमपुढविनेरइया[१], ते समासतो दुविहा पण्णत्ता, तं जहा-पज्जत्ता य अपज्जत्ता य।। ९२।।

'से किं तं' इत्यादि, **अथ के ते नैरयिकाः?**, सूरिराह-**नैरयिकाः सप्तविधाः प्रज्ञप्ताः, तद्यथा-रत्नप्रभापृथिवीनैरयिका यावत्**करणात् शर्कराप्रभापृथिवीनैरयिकाः वालुकाप्रभापृथिवीनैरयिकाः पङ्कप्रभापृथिवीनैरयिकाः धूमप्रभापृथिवीनैरयिकाः तमःप्रभापृथिवीनैरयिका इति परिग्रहः, **अधःसप्तमपृथिवीनैरयिकाः, 'ते समासतो'** इत्यादिपर्याप्तापर्याप्तसूत्रं सुगमम्।। ९२।।

शरीरादिद्वारप्रतिपादनार्थमाह-

(९३) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरया पण्णत्ता, तंजहा-वेउव्विए तेयए कम्मए।। ९३ ।।

'तेसि णं भंते!' इत्यादि सुगमं, नवरं भवप्रत्ययादेव तेषां शरीरं वैक्रियं नौदारिकमिति **वैक्रिय-तैजस-कार्मणानि** त्रीणि शरीराण्युक्तानि।। ९३।।

(९४) तेसि णं भंते! जीवाणं केमहालिया सरीरोगाहणा पण्णत्ता?, गोयमा! दुविहा सरीरोगाहणा पण्णत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जासा भवधारणिज्जा सा जहण्णेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं पंचधणुसयाइं, तत्थ णं जासा उत्तरवेउव्विया सा जहण्णेणं अंगुलस्स संखेज्जतिभागं उक्कोसेणं धणुसहस्सं।। ९४ ।।

---

१. तमतमपुढवी०ग। तमतमापुढवी०ट **प्रज्ञापनासूत्रे पाठान्तरम्** । तमतमप्पभापुढवी०प्रज्ञा०।

अवगाहना तेषां द्विधा–**भवधारणीया उत्तरवैकुर्विकी च,** तत्र यया भवो धार्यते सा भवधारणीया, बहुलवचनात्करणेऽनीयप्रत्ययः, अपरा भवान्तरवैरिनारकप्रतिघातनार्थमुत्तरकालं या विचित्ररूपा वैक्रयिकी अवगाहना सा उत्तरवैकुर्विकी, **तत्र या सा भवधारणीया सा जघन्यतोऽङ्गुलासङ्ख्येयभागः,** स चोपपातकाले वेदितव्यः, तथाप्रयत्नाभावात्[1], **उत्कर्षतः पञ्चधनुःशतानि,** इदं चोत्कर्षतः प्रमाणं सप्तमपृथिवीमधिकृत्य वेदितव्यं, प्रतिपृथिवि तूत्कर्षतः प्रमाणं '**सङ्ग्रहणिटीकातो**' भावनीयं, तत्र सविस्तरमुक्तत्वात्, **उत्तरवैकुर्विकी जघन्यतोऽङ्गुलसङ्ख्येयभागो** न त्वसङ्ख्येयभागः, तथाप्रयत्नाभावात्, **उत्कर्षतो धनुःसहस्रमिति,** इदमप्युत्कर्षपरिमाणं सप्तमनरकपृथिवीमधिकृत्य वेदितव्यं, प्रतिपृथिवि तु '**सङ्ग्रहणिटीकातः**'[2] परिभावनीयम्,।। ९४।।

(९५) तेसि णं भंते! जीवाणं सरीरा किंसंघयणी पण्णत्ता?, गोयमा! छण्हं संघयणाणं असंघयणी, णेवट्ठी णेव छिरा णेव ण्हारु णेव संघयणमत्थि, जे पोग्गला अणिट्ठा अकंता अप्पिया असुभा अमणुण्णा अमणामा ते तेसिं संघातत्ताए परिणमंति।।९५।।

संहननद्वारे **'तेसि णं भंते!'** इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–**गौतम! षण्णां संहननानामन्यतमेनापि** संहननेन तेषां शरीराण्य**संहननानि,**[3] सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, कस्मादसंहननानि? इति चेद् अत आह-**'नेवट्ठी'** इत्यादि, नैव तेषां शरीराणामस्थीनि, **नैव शिरा**-धमनि-नाड्यो, **नापि स्नायूनि**-शेषशिराः, अस्थिनिचयात्मकं च संहननमतोऽस्थ्याद्यभावादसंहननानि[4] शरीराणि, इयमत्र भावना--इह तत्त्ववृत्त्या संहननमस्थिनिचयात्मकं, यत्तु प्रागेकेन्द्रियाणां सेवार्त्तसंहननमभ्यधायि तदौदारिकशरीरसम्बन्धमात्रमपेक्ष्यौपचारिकं, देवा अपि यदन्यत्र **प्रज्ञापनादौ** वज्रसंहननिन उच्यन्ते तेऽपि गौणवृत्त्या, तथाहि–इह यादृशी मनुष्यलोके चक्रवर्त्त्यादेर्विशिष्टवज्रर्षभनाराचसंहननिनः सकलशेषमनुष्यजनासाधारणी शक्तिः **"दोसोला बत्तीसा सव्वबलेणं तु संकलनिबद्ध"** [**विशेषा.९७६.**] मित्यादिका, ततोऽधिकतरा देवानां पर्वतोत्पाटनादिविषया शक्तिः श्रूयते, न च शरीरपरिक्लेश इति तेऽपि वज्रसंहननिन इव वज्रसंहननिन उक्ता न पुनः परमार्थतस्ते संहननिनः, ततो नारकाणामस्थ्यभावात्संहननाभावः, एतेन योऽपरिणतभगवत्सिद्धान्तसारो वावदूकः सिद्धान्तबाहुल्यमात्मनः ख्यापयन्नेवं प्रललाप-"**सुत्ते सत्तिविसेसो**

१. PV । ०त्न० मु.।। **ग्रहणविषयकप्रयत्नाभावाद्-इत्यर्थः** ।। २-३ द्र.ग्रा.२४५-२४९।। ४.०नीनि - S।
५. नीनि - PV।।

संघयणमिहऽट्ठिनिचयो"[ ]त्ति, इति सोऽपाकीर्णो द्रष्टव्यः, साक्षादत्रैव सूत्रे अस्थिनिचयात्मकस्य संहननस्याभिधानात्, अस्थ्यभावे संहननप्रतिषेधादिति। अपरस्त्वाह–नैरयिकाणामस्थ्यभावे कथं शरीरबन्धोपपत्तिः?, नैष दोषः, तथाविधपुद्गलस्कन्धवत् शरीरबन्धोपपत्तेः, अत एवाह-**'जे पोग्गला अणिट्ठा'** इत्यादि, ये पुद्गलाः 'अनिष्टाः' मनस इच्छामतिक्रान्ताः, तत्र किञ्चित्कमनीयमपि केषाञ्चिदनिष्टं भवति तत आह–न कान्ताः **अकान्ता**-अकमनीयाः, अत्यन्ताशुभवर्णोपेतत्वात्, अत एव न प्रियाः, दर्शनापातकालेऽपि न प्रियबुद्धिमात्मन्युत्पादयन्तीति भावः, **'अशुभाः'** अशुभरस-गन्ध-स्पर्शात्मकत्वात्, **'अमनोज्ञाः'** न मनःप्रह्लादहेतवो विपाकतो दुःखजनकत्वात्, **अमनआपाः**-न जातुचिदपि भोज्यतया जन्तूनां मनांस्याप्नुवन्तीति भावः, **ते तेषां 'सङ्घातत्वेन'** तथारूपशरीर-परिणतिभावेन **परिणमन्ति**।। ९५ ।।

(९६) तेसि णं भंते! जीवाणं सरीरा किंसंठिता पण्णत्ता?, गोयमा! दुविहा पण्णत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जेते भवधारणिज्जा ते हुंडसंठिया, तत्थ णं जेते उत्तरवेउव्विया तेवि हुंडसंठिता पण्णत्ता। चत्तारि कसाया, चत्तारि सण्णाओ, तिण्णि लेसाओ, पंचेंदिया चत्तारि समुग्घाता आइल्ला, सन्नीवि असन्नीवि, नपुंसकवेदा, छप्पज्जत्तीओ छ अपज्जत्तीओ, तिविधा दिट्ठी, तिन्नि दंसणा, णाणीवि अण्णाणीवि, जे णाणी ते नियमा तिन्नाणी, तंजहा-आभिणिबोहियणाणी सुतणाणी ओहिनाणी, जे अण्णाणी ते अत्थेगतिया दुअण्णाणी अत्थेगतिया तिअण्णाणी, जे य दुअण्णाणी ते णियमा मइअण्णाणी सुयअण्णाणी य, जे तिअण्णाणी ते नियमा मतिअण्णाणी य सुयअण्णाणी य विभंगणाणी य, तिविधे जोगे, दुविहे उवओगे, छद्दिसिं आहारो, ओसण्णकारणं पडुच्च वण्णतो कालाइं जाव आहारमाहारेंति, उववाओ तिरिय-मणुस्सेसु, ठिती जहन्नेणं दसवाससहस्साइं उक्कोसेणं तित्तीसं सागरोवमाइं, दुविहा मरंति, उव्वट्टणा भाणियव्वा जतो आगता, णवरि संमुच्छिमेसु पडिसिद्धो, दुगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता समणाउसो!, से तं नेरइया।। ९६।।

संस्थानद्वारे तेषां शरीराणि **भवधारणीयानि उत्तरवैकुर्विकाणि च हुण्डसंस्थानानि** वक्तव्यानि,

तथाहि–भवधारणीयानि तेषां शरीराणि भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोम-पक्षिशरीरकवदतिबीभत्सहुण्डसंस्थानोपेतानि, यान्यप्युत्तरवैक्रियाणि तानि यद्यपि शुभानि वयं विकुर्विष्याम इत्यभिसन्धिना विकुर्वितुमारभन्ते तथाऽपि तानि तेषामत्यन्ताशुभतथाविधनामकर्मोदयतोऽतीवा-शुभतराण्युपजायन्ते इति तान्यपि **हुण्डसंस्थानानि**। कषायद्वारं सञ्ज्ञाद्वारं च प्राग्वद्, लेश्याद्वारे आद्या**स्तिस्रो लेश्याः,** तत्राद्ययोर्द्वयोः पृथिव्योः कापोतलेश्या, तृतीयस्यां पृथिव्यां केषुचिन्नरकावासेषु कापोतलेश्या शेषेषु नीललेश्या, चतुर्थ्यां नीललेश्या, पञ्चम्यां केषुचिन्नरकावासेषु नीललेश्या, शेषेषु कृष्णलेश्या, षष्ठ्यां कृष्णलेश्या, सप्तम्यां परमकृष्णलेश्या, उक्तञ्च '**व्याख्याप्रज्ञप्तौ**'-

"काऊ य दोसु तइयाएँ मीसिया नीलिया चउत्थीए।
पंचमियाए मीसा कण्हा तत्तो परमकण्हा।।१।।" [भग. श १/उ.५/प्र.१८१,१८६]

इन्द्रियद्वारे **पञ्च इन्द्रियाणि** स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रलक्षणानि। समुद्घातद्वारे **चत्वारः समुद्घाताः**-वेदनासमुद्घातः कषायसमुद्घातो वैक्रियसमुद्घातो मारणान्तिकसमुद्घातश्च। सञ्ज्ञिद्वारे **सञ्ज्ञिनोऽसञ्ज्ञिनश्च**, तत्र ये गर्भव्युत्क्रान्तिकेभ्य उत्पन्नास्ते सञ्ज्ञिन इति व्यपदिश्यन्ते, ये तु संमूर्च्छनजेभ्यस्तेऽसञ्ज्ञिनः, ते च रत्नप्रभायामेवोत्पद्यन्ते न परतः, अनाशयाशुभक्रियाया दारुणाया अप्यनन्तरविपाकिन्या एतावन्मात्रफलत्वात्, अत एवाहुर्वृद्धाः-

"अस्सन्नी खलु पढमं दोच्चं च सिरीसवा तइय पक्खी।
सीहा जंति चउत्थिं उरगा पुण पंचमिं पुढविं।।१।।
छट्ठिं य इत्थियाओ मच्छा मणुया य सत्तमिं पुढविं।
एसो परमोवाओ बोद्धव्वो नरयपुढवीसु।।२।।"[प्रज्ञापना सू. १८३]

वेदद्वारे **नपुंसकवेदाः**। पर्याप्तिद्वारे पञ्च पर्याप्तयः पञ्चापर्याप्तयः। दृष्टिद्वारे **त्रिविधदृष्टयो**ऽपि,

---

१. कापोती च द्वयोस्तृतीयस्यां मिश्रा नीला चतुर्थ्याम् ।
पञ्चम्यां मिश्रा कृष्णा ततः परमकृष्णा ।। १ ।।

२. असञ्ज्ञिनः खलु प्रथमां, द्वितीयां च सरीसृपास्तृतीयां पक्षिणः ।
सिंहा यान्ति चतुर्थीम् उरगाः पुनः पञ्चमीं पृथ्वीम् ।। १ ।।
षष्ठीं च स्त्रियः मत्स्या, मनुष्याश्च सप्तमीं पृथ्वीम् ।
एष परम उत्पादो बोद्धव्यो नरकपृथ्वीषु ।। २ ।।

३. अत्र सूत्रे छ पज्जत्तीओ छ अपज्जत्तीओ - इति पाठः ।।

तद्यथा–मिथ्यादृष्टयः सम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयश्च। दर्शनद्वारे **त्रीणि दर्शनानि,** तद्यथा–चक्षुर्दर्शनम-चक्षुर्दर्शनमवधिदर्शनं च। ज्ञानद्वारे **ज्ञानिनोऽपि अज्ञानिनोऽपि,** तत्र **ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, तद्यथा-आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, येऽत्राज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च,** एष चात्र भावार्थः–ये नारका असञ्ज्ञिनस्तेऽपर्याप्तावस्थायां द्व्यज्ञानिनः पर्याप्तावस्थायां तु त्र्यज्ञानिनः सञ्ज्ञिनस्तूभय्यामप्यवस्थायां त्र्यज्ञानिनः, असञ्ज्ञिभ्यो ह्युत्पद्यमानास्तथा-बोधमान्द्यादपर्याप्तावस्थायां नाव्यक्तमप्यवधिमाप्नुवन्तीति। योगोपयोगा-ऽऽहारद्वाराणि प्रतीतानि। उपपातो यथा व्युत्क्रान्तिपदे '**प्रज्ञापनायां**' तथा वक्तव्यः, पर्याप्तपञ्चेन्द्रिय**तिर्यग्मनुष्येभ्यो**ऽसङ्ख्यातवर्षायुष्क-वर्जेभ्यो वक्तव्यो, न शेषेभ्य इति भावः। **स्थितिर्जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंश-त्सागरोपमाणि।** समुद्घातमधिकृत्य मरणचिन्ता प्राग्वद्। उद्वर्त्तनाचिन्ता यथा व्युत्क्रान्तिपदे '**प्रज्ञापनायां**' कृता तथा वक्तव्या, अनन्तरमुद्वृत्य सञ्ज्ञिपञ्चेन्द्रियतिर्यङ्मनुष्येष्वसङ्ख्यातवर्षायुष्कवर्जितेष्वागच्छन्तीति भावः, अत एव गत्यागतिद्वारे **द्व्यागतिका द्विगतिकाः, 'परीत्ताः'** प्रत्येकशरीरिणो**ऽसङ्ख्येयाः प्रज्ञप्ताः,** हे **श्रमण!** हे **आयुष्मन्!**, उपसंहारमाह-**"से तं नेरइया"**।। ९६।।

उक्ता नैरयिकाः, सम्प्रति तिर्यक्पञ्चेन्द्रियानाह–

(९७) से किं तं पंचेंदियतिरिक्खजोणिया?,२ दुविहा पण्णत्ता, तंजहा-संमुच्छिम-पंचेंदियतिरिक्खजोणिया य गब्भवक्कंतियपंचिंदियतिरिक्खजोणिया य।। ९७।।

'से किं तं' इत्यादि, **अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः?**, सूरिराह–**पञ्चेन्द्रियतिर्यग्योनिका द्विविधाः प्रज्ञप्ताः, तद्यथा-संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्यो-निकाश्च,** तत्र संमूर्च्छनं–संमूर्च्छो गर्भोपपातव्यतिरेकेणैव यः प्राणिनामुत्पादस्तेन निर्वृत्ताः संमूर्च्छिमाः, '**भावादिम**'[**म.त.९/१०**]इति इमप्रत्ययः, ते च ते पञ्चेन्द्रियतिर्यग्योनिकाश्च संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः, गर्भे व्युत्क्रान्तिः–उत्पत्तिर्येषां यदि वा गर्भाद्–गर्भवशाद् व्युत्क्रान्तिः–निष्क्रमणं येषां ते गर्भव्युत्क्रान्तिकाः, ते च ते पञ्चेन्द्रियतिर्यग्योनिकाश्चेति विशेषणसमासः, चशब्दौ स्वगतानेकभेदसूचकौ।।९७।।

(९८) से किं तं संमुच्छिमपंचेंदियतिरिक्खजोणिया?, २ तिविहा पण्णत्ता, तंजहा-जलयरा थलयरा खहयरा।। ९८ ।।

---

१. ०षुस० PVS।। २. ०वर्जेष्वा०PVS।।

से किं तं इत्यादि, **अथ के ते संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः?**, सूरिराह–**संमूर्च्छिम-पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-जलचराः स्थलचराः खचराः,** तत्र जले चरन्तीति जलचराः, एवं स्थलचरा खचरा अपि भावनीयाः।।९८।।

(९९) से किं तं जलयरा?, २ पंचविधा पण्णत्ता, तंजहा-मच्छगा कच्छभा मगरा गाहा सुसुमारा एंगागारा पण्णत्ता।। ९९ ।। (१००) से किं तं मच्छा?, एवं जहा पण्णवणाए जाव जे यावण्णे तहप्पगारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।। १००।।

'से किं तं' इत्यादि, **अथ के ते जलचराः?**, सूरिराह–**जलचराः पञ्चविधाः प्रज्ञप्ताः, तद्यथा-मत्स्याः कच्छपा मकरा ग्राहाः शिशुमाराः, 'एवं** भेओ भाणियव्वो **जहा पण्णवणाए जाव** सुसुमारा एगागारा पन्नत्ता' इति, **'एवम्'** उक्तेन प्रकारेण मत्स्यादीनां भेदो यथा **'प्रज्ञापनायां'** तथा वक्तव्यः, स च तावद् यावत् **'सि(सु)सुमारा' एगागारा** इति पदं, स चैवम्-**"से किं तं मच्छा?, मच्छा अणेगविहा पण्णत्ता, तंजहा-सण्हमच्छा खवल्लमच्छा जुगमच्छा विंज्झिडियमच्छा [३]हेलियमच्छा [४]मग्गरियामच्छा रोहियमच्छा हलीसागरा गोंगरा वडा वडगरा तिमी तिमिंगिलामच्छा [५]तंदुलमच्छा कणिक्कमच्छा सिलेच्छियामच्छा लंभणमच्छा पडागा पडागाइपडागा, जे यावण्णे तहप्पगारा, से तं मच्छा। से किं तं कच्छभा?, कच्छभा दुविहा पण्णत्ता, तंजहा–अट्ठिकच्छभा य मंसलकच्छभा य, से तं कच्छभा। से किं तं गाहा?, गाहा पंचविहा पण्णत्ता, तंजहा–दिली वेढगा मुदुगा पुलगा सीमागारा, सेत्तं गाहा। से किं तं मगरा?, मगरा दुविहा पण्णत्ता, तंजहा–सोंडमगरा य मट्ठमगरा य, सेत्तं मगरा। से किं तं सुंसुमारा?, २ एगागारा पण्णत्ता, से तं सुंसुमारा"**[प्रज्ञापना सू. ६३-६७] इति, एते मत्स्यादिभेदा लोकतोऽवगन्तव्याः, **'जे यावण्णे तहप्पगारा'** इति, **येऽपि चान्ये 'तथाप्रकाराः'** उक्तप्रकारा मत्स्यादिरूपाः, ते सर्वे जलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका द्रष्टव्याः। **'ते समासतो'** इत्यादि पर्याप्तापर्याप्तसूत्रं सुगमम् ।। ९९-१००।।

(१०१) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरया पण्णत्ता, तं जहा-ओरालिए तेयए कम्मए। सरीरोगाहणा जहण्णेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं जोयणसहस्सं छेवट्ठसंघयणी हुंडसंठिता, चत्तारि कसाया,

---

१. जे.। एगागारा पण्णत्ता - मु. आदिमध्ये नास्ति। २. S **प्रज्ञापनायाम्** । भिब्भियमच्छा - **मु.।।** ३. हलिमच्छा-**प्रज्ञा०।।** ४. मंजरिया**०मु.।** गग्गरिया SV।। ५. PVS **प्रज्ञा.।** मोगरावडा-**मु** ।। ६. णक्का-**प्रज्ञा०।।**

सण्णाओवि ४, लेसाओ ३, इंदिया पंच, समुग्घाता तिण्णि णो सण्णी असण्णी, णपुंसकवेदा, पज्जत्तीओ अपज्जत्तीओ य पंच, दो दिट्ठिओ, दो दंसणा, दो नाणा दो अन्नाणा, दुविधे जोगे, दुविधे उवओगे, आहारो छद्दिसिं, उववातो तिरिय-मणुस्सेहिंतो नो देवेहिंतो नो नेरइएहिंतो, तिरिएहिंतो असंखेज्जवासाउयवज्जेहिंतो अकम्मभूमगअंतरदीवगअसंखेज्जवासाउअवज्जेसु मणुस्सेसु, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, मारणंतियसमुग्घातेणं दुविहावि मरंति, अणंतरं उव्वट्टित्ता कहिं?, नेरइएसु वि तिरिक्खजोणिएसु वि मणुस्सेसु वि देवेसु वि, नेरइएसु रयणप्पहाए, सेसेसु पडिसेधो, तिरिएसु सव्वेसु उववज्जंति संखेज्जवासाउएसुवि असंखेज्जवासाउएसुवि चउप्पएसु पक्खीसुवि। मणुस्सेसु सव्वेसु कम्मभूमीसु नो अकम्मभूमीएसु अंतरदीवएसु वि संखिज्जवासाउएसुवि असंखिज्जवासाउएसु वि पज्जत्तएसु वि अपज्जत्तएसु वि देवेसु जाव वाणमंतरा, चउगइया दुआगतिया, परित्ता असंखेज्जा पण्णत्ता। से तं जलयरसंमुच्छिमपंचेंदियतिरिक्खा।। १०१।।

शरीरादिद्वारकदम्बकमपि चतुरिन्द्रियवद् भावनीयं, नवरमवगाहनाद्वारे **जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागमात्रा, उत्कर्षतो योजनसहस्रम्।** इन्द्रियद्वारे **पञ्चेन्द्रियाणि।** सञ्ज्ञिद्वारे **नो सञ्ज्ञिनोऽसञ्ज्ञिनः,** संमूर्च्छिमतया समनस्कत्वायोगात्। उपपातो यथा व्युत्क्रान्तिपदे तथा वक्तव्यः, **तिर्यग्मनुष्येभ्यो**ऽसङ्ख्यातवर्षायुष्कवर्ज्येभ्यो वाच्य इति भावः। **स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी।** च्यवनद्वारे**ऽनन्तरमुद्वृत्त्य** चतसृष्वपि गतिषूत्पद्यन्ते, तत्र **नरकेषु** रत्नप्रभायामेव, **तिर्यक्षु** सर्वेष्वेव, **मनुष्येषु** कर्मभूमिजेषु, **देवेषु** व्यन्तर-भवनवासिषु, तदन्येष्वसञ्ज्ञ्यायुष्काभावात्, अत एव गत्यागतिद्वारे **चतुर्गतिका द्व्यागतिकाः, 'परीत्ताः'** प्रत्येकशरीरिणो**ऽसङ्ख्येयाः प्रज्ञप्ताः** हे श्रमण! हे आयुष्मन्!, उपसंहारमाह–**'से तं संमुच्छिमजलयरपंचेंदियतिरिक्खजोणिया'**।।१०१।।

उक्ताः संमूर्च्छिमजलचरपञ्चेन्द्रियतिर्यग्योनिकाः, सम्प्रति संमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिक-प्रतिपादनार्थमाह–

(१०२) से किं तं थलयरसंमुच्छिमपंचेंदियतिरिक्खजोणिया?, २ दुविहा पण्णत्ता, तंजहा-चउप्पयथलयरसंमुच्छिमपंचेंदियतिरिक्खजोणिया परिसप्पसंमु०।।१०२।।

'से किं त' मित्यादि, **अथ के ते संमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः ?,** सूरिराह- **स्थलचरपञ्चेन्द्रियतिर्यग्योनिका द्विविधाः प्रज्ञप्ताः, तद्यथा-चतुष्पदस्थलचरसंमूर्च्छिमपञ्चेन्द्रिय-तिर्यग्योनिकाश्च परिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाश्च,** तत्र चत्वारि पदानि येषां ते चतुष्पदाः-अश्वादयः, ते च ते स्थलचरपञ्चेन्द्रियतिर्यग्योनिकाश्चतुष्पदस्थलचरसंमूर्च्छिमपञ्चेन्द्रिय-तिर्यग्योनिकाः, उरसा भुजाभ्यां वा परिसर्पन्तीति परिसर्पाः-अहि-नकुलादयस्ततः पूर्ववत्समासः, चशब्दौ स्वगतानेकभेदसूचकौ।।१०२।। तदेवानेकविधत्वं क्रमेण प्रतिपिपादयिषुराह-

(१०३) से किं तं चउप्पयथलयरसंमुच्छिम० ?, २ चउव्विहा पण्णत्ता, तंजहा-एगखुरा दुखुरा गंडीपया सणप्फया जाव जे यावण्णे तहप्पकारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, तेओ सरीरगा ओगाहणा जहण्णेणं अंगुलस्स असंखेज्जइभागं, उक्कोसेणं गाउयपुहुत्तं, ठिती जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं चउरासीतिवाससहस्साइं, सेसं जहा जलयराणं जाव चउगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता, से तं चउप्पदथलयरसंमु०।।१०३।।

'से किं त'मित्यादि, **अथ के ते चतुष्पदस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः ?,** सूरिराह- **चतुष्पदस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-'जहा[२] पण्णवणाए'** इति, यथा **प्रज्ञापनायां** प्रज्ञापनाख्ये प्रथमे पदे भेदास्तथा वक्तव्या यावत् **'ते समासतो दुविहा पण्णत्ता'** इत्यादि, ते चैवम्-

"एगखुरा दुखुरा गंडीपया सणप्फया। से किं तं एगखुरा ?, एगखुरा अणेगविहा पण्णत्ता, तंजहा-अस्सा अस्सतरा घोडा गद्दभा [३]गोरखुरा कंदलगा सिरिकंदलगा आवत्ता जे यावण्णे तहप्पगारा, से तं एगखुरा। से किं तं दुखुरा ?, दुखुरा अणेगविहा पण्णत्ता, तंजहा-उट्टा गोणा [४]गवया महिसा संवरा वराहा अजा एलगा रुरू सरभा चमरी कुरंगा गोकण्णमाई, से तं दुखुरा। से किं तं गंडीपया ?, गंडीपया अणेगविहा पण्णत्ता, तंजहा-हत्थी [५]हत्थिपूयणा मंकुणहत्थी खग्गा गंडा, जे यावण्णे तहप्पगारा, से तं गंडीपया। से किं तं सणप्फया ?, २ अणेगविहा पण्णत्ता, तंजहा-सीहा वग्घा दीविया अच्छा तरच्छा परस्सरा [६]सीयाला सुणगा कोकंतिया ससगा चित्तगा चित्तलगा, जे यावण्णे तहप्पगारा।।" [प्रज्ञापना सूत्र ७०-७४] इति,

---

१. सरीरा ३ जहा जलचरसंमुच्छिवा तहेव, णाणत्तं ओगाहा-जे. ।। **२. सूत्र-वृत्त्योर्भेदः दृश्यते ।। ३.** गोरक्खरा- **प्रज्ञापनायाम् ।। ४.** गवया रोज्झा पसया महिसा सिया संबरा-**प्रज्ञा० ।। ५.** हत्थि**०प्रज्ञापनायां नास्ति ।। ६.** सीयाला बिडाला सुणगा कोलसुणया कोकंतिया- **इति प्रज्ञापनायाम् ।**

तत्र प्रतिपदमेकः खुरो [शफो] येषां ते एकखुराः-अश्वादयः, प्रतिपदं द्वौ खुरौ-शफौ येषां ते द्विखुरा-उष्ट्रादयः, तथा च तेषामेकैकस्मिन् पादे द्वौ द्वौ शफौ दृश्येते, गण्डीव[सुवर्णकाराधिकरणीस्थानमिव] पदं येषां ते गण्डीपदाः-हस्त्यादयः, सनखानि-दीर्घनखपरिकलितानि पदानि येषां ते सनखपदाः-श्वादयः, प्राकृतत्वाच्च 'सणप्फया' इति सूत्रे निर्देशः, अश्वादयस्त्वेतद्भेदाः केचिदतिप्रसिद्धत्वात्स्वयमन्ये च लोकतो वेदितव्याः, नवरं सनखपदाधिकारे द्वीपकाः-चित्रका अच्छाः-ऋक्षाः परासराः-सरभाः कोकन्तिका-लोमठिकाः चित्ता चित्तलगा आरण्यजीवविशेषाः, शेषास्तु सिंह-व्याघ्र-तरक्ष-शृगाल-शुनक-कोल-शुन-शशकाः प्रतीताः, **'ते समासतो'** इत्यादि पर्याप्तापर्याप्तसूत्रं शरीरादिद्वारकलापसूत्रं च जलचरवद् भावनीयं, नवरमवगाहनाद्वारे **जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागप्रमाणा उत्कृष्टा गव्यूतपृथक्त्वं** स्थितिद्वारे **जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतश्चतुरशीतिर्वर्षसहस्राणि,** शेषं तथैव, उपसंहारमाह-**'से तं चउप्पयथलयरसंमुच्छिमपंचिंदियतिरिक्खजोणिया'**।। १०३ ।।

(१०४) से किं तं थलयरपरिसप्पसंमुच्छिमा?, २ दुविहा पण्णत्ता, तंजहा-उरगपरिसप्पसंमुच्छिमा भुयगपरिसप्पसंमुच्छिमा।।१०४।।

'से किं त' मित्यादि, **अथ के ते परिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः?, २ द्विविधाः प्रज्ञप्ताः, तद्यथा-'एवं[२] भेदो भाणियव्वो'** इति, **'एवम्'** उक्तेन प्रकारेण यथा **प्रज्ञापनायां** तथा भेदो वक्तव्यो यावत् **'पज्जत्ता य अपज्जत्ता य'** स चैवम्-

"तंजहा-उरपरिसप्पथलयर[३]संमुच्छिमपञ्चेन्दियतिरिक्खजोणिया य भुयपरिसप्पथलयरसंमुच्छिमपंचिंदियतिरिक्खजोणिया य।" [प्रज्ञा.सू.७६]

सुगमं, नवरम् उरसा परिसर्पन्तीत्युरःपरिसर्पाः-सर्पादयः, भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पा-नकुलादयः, शेषपदसमासः प्राग्वद् ।। १०४।।

(१०५) से किं तं उरगपरिसप्पसंमुच्छिमा?, २ चउव्विहा पण्णत्ता, तंजहा-अही अयगरा आसालिया महोरगा ।।१०५।। (१०६) से किं तं अही?, अही दुविहा पण्णत्ता, तंजहा-दव्वीकरा य मउलिणो य।।१०६।। (१०७) से किं तं

१. ० पाद० PV । **एवमग्रेऽपि।। २. अत्र सूत्रवृत्त्योर्भिन्नता दृश्यते । ३. प्रज्ञापनायां ०संमुच्छिम-नास्ति । एवमग्रेऽपि।**

दव्वीकरा?, २ अणेगविधा पण्णत्ता, तंजहा-आसीविसा जाव से तं दव्वीकरा ।। १०७।। (१०८) से किं तं मउलिणो?,२ अणेगविहा पण्णत्ता, तंजहा-दिव्वा गोणसा जाव से तं मउलिणो, से तं अही ।। १०८।। (१०९) से किं तं अयगरा?,२ एगागारा पण्णत्ता, से तं अयगरा ।। १०९।।

'से किं तं उरपरिसप्पथलयरसंमुच्छिमपञ्चिंदियतिरिक्खजोणिया?, उरपरिसप्पथलयरसंमुच्छिमपञ्चिंदियतिरिक्खजोणिया चउव्विहा पन्नत्ता, तंजहा-अही अयगरा आसालिया महोरगा। से किं तं अही?, अही दुविहा पण्णत्ता, तंजहा-दव्वीकरा य मउलिणो य। से किं तं दव्वीकरा?, दव्वीकरा अणेगविहा पन्नत्ता, तंजहा-आसीविसा दिट्ठीविसा उग्गविसा भोगविसा तयाविसा लालाविसा [उस्सासविसा] निस्सासविसा कण्हसप्पा सेयसप्पा काकोदरा दब्भपुप्फा कोलाहा [1]सेलेसिंदा, जे यावण्णे तहप्पगारा[2], अस्य विषमपदव्याख्या-**'दव्वीकरा य मउलिणो य'** इति, दर्व्वीव दर्वी-फणा तत्करणशीला दर्वीकराः, मुकुलं-फणाविरहयोग्या शरीरावयवविशेषाकृतिः सा विद्यते येषां ते मुकुलिनः-[3]फेणाकरणशक्तिविकला इत्यर्थः, अत्रापि चशब्दौ स्वगतानेकभेदसूचकौ, **'आसीविसा'** इत्यादि, [4]आस्यो-दंष्ट्रास्तासु विषं येषां ते [5]आसीविषाः, उक्तं च-**"आसी दाढा तग्गयविसाऽऽसीविसा मुणेयव्वा"** [वसेषा-७९१] इति, दृष्टौ विषं येषां ते दृष्टिविषाः, उग्रं विषं येषां ते उग्रविषाः, भोगः-शरीरं तत्र सर्वत्र विषं येषां ते भोगविषाः, त्वचि विषं येषां ते त्वग्विषाः, प्राकृतत्वाच्च **'तयाविसा'** इति पाठः, लाला- मुखात् स्रावस्तत्र विषं येषां ते लालाविषाः, निःश्वासे विषं येषां ते निःश्वासविषाः कृष्णसर्पादयो जातिभेदा लोकतः प्रत्येतव्याः।" [प्रज्ञापनाटीका पत्र ४७ **A**।।] **से तं अही। से किं तं अयगरा?,अयगरा एगागारा पन्नत्ता, सेत्तं अयगरा।। १०५-१०९।।**

(११०) से किं तं आसालिया?, २ जहा पण्णवणाए, से तं आसालिया।। ११०।।

---

१. मेलमिंदा-**प्रज्ञा०**। सोलमिंदा - S ।। २. **अत्र इदं प्रज्ञापनासूत्रमनुसन्धेयम् से तं दव्वीकरा । ८० से किं तं मउलिणो ? मउलिणो अणेगविहा पण्णत्ता। तं जहा-दिव्वागा गोणसा कसाहीया वइउला चित्तलिणो मंडलिणो मालिणो अही सहिसलागा पडगा जे यावण्णे तहप्पगारा से तं मउलिणो। से तं अही । ३.** स्फटाक०**मु.। फेणा० -** S । फणा० **प्रज्ञा.टीका** ।। ४. आश्यो - **प्रज्ञा.टीका**।। ५. आशी० **प्रज्ञा.टीका।**

से किं तं आसालिया?, कहि णं भंते! आसालिगा सम्मुच्छइ?, गोयमा! अंतोमणुस्सखेत्ते अड्ढाइज्जेसु दीवेसु, निव्वाघाएणं पन्नरससु कम्मभूमीसु, वाघायं पडुच्च पंचसु महाविदेहेसु, चक्कवट्टिखंधावारेसु वासुदेवखंधावारेसु बलदेवखंधावारेसु मंडलियखंधावारेसु महामण्डलियखंधावारेसु गामनिवेसेसु नगरनिवेसेसु [निगमनिवेसेसु] खेडनिवेसेसु कब्बडनिवेसेसु मडंबनिवेसेसु दोणमुहनिवेसेसु पट्टणनिवेसेसु आगरनिवेसेसु आसमनिवेसेसु [संवाहनिवेसेसु] रायहाणिनिवेसेसु, एएसि णं चेव विणासेसु, एत्थ णं आसालिया सम्मुच्छइ, जहन्नेणं अंगुलस्स असंखेज्जइभागमित्तीए ओगाहणाए, उक्कोसेणं बारस जोयणाइं, तदणुरूवं च णं विक्खंभ-बाहल्लेणं भूमिं दालित्ता समुट्ठेइ, असण्णी मिच्छद्दिट्ठी अन्नाणी अंतोमुहुत्तद्धाउया चेव कालं करेइ, से तं आसालिया। [प्रज्ञापना सूत्र ८२] **'से किं तं आसालिगा'** इत्यादि, "अथ का सा आसालिगा?, एवं शिष्येण प्रश्ने कृते सति सूत्रकृद् यदेवासालिकाप्रतिपादकं गौतमप्रश्नभगवन्निर्वचनरूपं सूत्रमस्ति तदेवागमबहुमानतः पठति–**'कहि णं भंते!'** इत्यादि, क्व णमिति वाक्यालङ्कारे **'भदन्त! परमकल्याणयोगिन्! आसालिगा संमूर्च्छति,?'** एषा हि गर्भजा न भवति किन्तु संमूर्च्छिमैव तत उक्तं संमूर्च्छति, भगवानाह–

गौतम! अन्तः-मध्ये मनुष्यक्षेत्रस्य न बहिः, एतावता मनुष्यक्षेत्राद् बहिरस्या उत्पादो न भवतीति प्रतिपादितं, तत्रापि मनुष्यक्षेत्रे सर्वत्र न भवति किन्तु अर्द्धतृतीयेषु द्वीपेषु, अर्द्धं तृतीयं येषां तेऽर्द्धतृतीयाः, अवयवेन विग्रहः, समुदायः समासार्थः, तेषु, एतावता लवणसमुद्रे कालसमुद्रे[२] वा न भवतीत्यावेदितं, **'निर्व्याघातेन'** व्याघातस्याभावो निर्व्याघातं तेन, यदि पञ्चसु भरतेषु पञ्चस्वैरावतेषु सुषमसुषमादिरूपोऽतिदुष्षमादिरूपश्च कालो व्याघातहेतुत्वाद् व्याघातो न भवति तदा पञ्चदशसु कर्मभूमिषु संमूर्च्छति, व्याघातं प्रतीत्य, किमुक्तं भवति? यदि पञ्चसु भरतेषु पञ्चस्वैरावतेषु यथोक्तरूपो व्याघातो भवति ततः पञ्चसु महाविदेहेषु संमूर्च्छति, एतावता त्रिंशत्यप्यकर्मभूमिषु नोपजायत इति प्रतिपादितं, पञ्चदशसु कर्मभूमिषु पञ्चसु महाविदेहेषु सर्वत्र न संमूर्च्छति, किन्तु चक्रवर्त्तिस्कन्धावारेषु, बलदेवस्कन्धावारेषु, वासुदेवस्कन्धावारेषु, माण्डलिकः-सामान्यराजाऽल्पर्द्धिकः, महामाण्डलिकः- स एवानेकदेशाधिपतिस्तत्स्कन्धावारेषु, ग्रामनिवेशेषु इत्यादि, ग्रसति बुद्ध्यादीन् गुणानिति यदि वा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामः, निगमः-प्रभूततरवणिग्वर्गावासः, पांसुप्राकारनिबद्धं खेटं, क्षुल्लप्राकारवेष्टितं कर्बटम्, अर्द्धतृतीयगव्यूतान्तर्ग्रामरहितं मडम्बं, 'पट्टण'त्ति पट्टनं पत्तनं वा, उभयत्रापि प्राकृतत्वेन निर्देशस्य समानत्वात्, तत्र यन्नौभिरेव गम्यं तत्पट्टनं, यत्पुनः शकटैर्घोटकैर्नोभिर्वा गम्यं तत्पत्तनं यथा भरुकच्छम्[३], उक्तं च–

---

१. **समुच्छइ - मु.** । समुट्ठेइ- **प्रज्ञापनायाम्** ।। २. कालोदस० **प्रज्ञा.टीकायाम्** ।। ३. भृगुक० **प्रज्ञा.टीका** ।

"पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च।
नौभिरेव तु यद्गम्यं, पट्टनं तत्प्रचक्षते।।१।।"

द्रोणमुखं-प्रायेण जलनिर्गमप्रवेशम्, आकरो-हिरण्याकरादिः, आश्रमः-तापसावसथोपलक्षित आश्रयः, संबाधो-यात्रासमागतप्रभूतजननिवेशः, राजधानी-राजाधिष्ठानं नगरम्, **'एएसि ण'**मित्यादि, एतेषां चक्रवर्त्तिस्कन्धावारादीनामेव विनाशेषूपस्थितेषु **'एत्थ णं'**ति एतेषु चक्रवर्त्तिस्कन्धावारादिषु स्थानेष्वासालिका संमूर्च्छति, सा च जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रयाऽवगाहनया समुत्तिष्ठतीति योगः, एतच्चोत्पाद-प्रथमसमये वेदितव्यम्, उत्कर्षतो द्वादश योजनानि-द्वादशयोजनप्रमाणयाऽवगाहनया, **'तदनुरूपं'** द्वादशयोजनप्रमाणदैर्घ्यानुरूपं **'विक्खंभ-बाहल्लेणं'**ति विष्कम्भश्च बाहल्यं च विष्कम्भबाहल्यं, समाहारो द्वन्द्वः, तेन, विष्कम्भो-विस्तारो बाहल्यं च-स्थूलता, भूमिं **'दालित्ता णं'** विदार्य समुत्तिष्ठति[१], चक्रवर्त्तिस्कन्धावारादीनामधस्ताद् भूमेरन्तरुत्पद्यत इति भावः, सा चासञ्ज्ञिनी-अमनस्का संमूर्च्छिमत्वात्, मिथ्यादृष्टिः, सासादनसम्यक्त्वस्यापि तस्या असम्भवात्, अत एवाज्ञानिनी, अन्तर्मुहूर्त्ताद्धायुरेव कालं करोति।"[प्रज्ञापना वृत्तिः पत्र ४७-४८A]।।११०।।

(१११) से किं तं महोरगा?, २ जहा पण्णवणाए, से तं महोरगा जे यावण्णे तहप्पगारा ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, तं चेव, णवरि सरीरोगाहणा जहन्नेणं अंगुलस्सऽसंखेज्ज० उक्कोसेणं जोयणपुहुत्तं, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तेवण्णं वाससहस्साइं, सेसं जहा जलयराणं, जाव चउगतिया दुआगतिया परित्ता असंखेज्जा, से तं उरगपरिसप्पा ।।१११।।

से किं तं महोरगा?, "महोरगा अणेगविहा पण्णत्ता, तंजहा-अत्थेगइया अंगुलंपि अंगुलपुहुत्तियावि विहत्थिंपि विहत्थिपुहत्तियावि रयणिंपि रयणिपुहुत्तियावि कुच्छिंपि कुच्छिपुहत्तियावि धणुहंपि धणुहपुहत्तियावि गाउयंपि गाउयपुहत्तियावि जोयणंपि जोयणपुहत्तियावि जोयणसयंपि जोयणसयपुहत्तियावि, ते णं थले जाया जलेऽवि चरंति थलेऽवि चरंति, ते णत्थि इहं बाहिरएसु दीवसमुद्देसु हवंति, जे यावण्णे तहप्पगारा, से तं महोरगा।' [प्रज्ञापनासूत्र -८३] इति।

---

१. समुपति० **प्रज्ञा.टीका** ।

'अत्थेगइया अंगुलंपी'त्यादि, अस्तीति निपातोऽत्र बहुवचनाभिधायी, ततोऽयमर्थः-सन्त्येककाः केचन महोरगा येऽङ्गुलमपि शरीरावगाहनया भवन्ति, इहाङ्गुलमुच्छ्र्याङ्गुलमवसातव्यं, शरीरप्रमाणस्य चिन्त्यमानत्वात्, सन्त्येकका येऽङ्गुलपृथक्त्विका अपि,पृथक्त्वं- द्विप्रभृतिरानवभ्य इति परिभाषा अङ्गुलपृथक्त्वं शरीरावगाहनमानमेषामस्तीत्यङ्गुलपृथक्त्विकाः, "**अतोऽनेकस्वराद्**"[म.७/१४] इति इकप्रत्ययः, एवं शेषसूत्राण्यपि भावनीयानि, नवरं द्वादशाङ्गुलप्रमाणा वितस्तिः, द्विवितस्तिप्रमाणा रत्निर्हस्तः, कुक्षिर्द्विहस्तमाना, धनुर्हस्तचतुष्टयप्रमाणं, गव्यूतं द्विधनुःसहस्रप्रमाणं, चत्वारि गव्यूतानि योजनम्, एतच्चापि वितस्त्यादिकमुच्छ्र्याङ्गुलापेक्षया प्रतिपत्तव्यं, **'ते ण'**मित्यादि, **'ते'** अनन्तरोदितस्वरूपा महोरगाः स्थलचरविशेषत्वात् स्थले जायन्ते, स्थले च जाताः सन्तो जलेऽपि स्थल इव चरन्ति, स्थलेऽपि चरन्ति, तथास्वाभाव्यात्, यद्येवं ते कस्मादिह न दृश्यन्ते? इत्याशङ्कायामाह- **'ते नत्थि इहं'** इत्यादि, **'ते'** यथोदितस्वरूपा महोरगाः **'इह'** मानुषक्षेत्रे **'नत्थि'**त्ति न सन्ति, किन्तु बाह्येषु द्वीपसमुद्रेषु भवन्ति, समुद्रेष्वपि च पर्वतदेवनगर्यादिषु स्थलेषूत्पद्यन्ते न जलेषु, [स्थूलतरत्वात्] तत इह न दृश्यन्ते। 'जे यावण्णे तहप्पगारा' इति, येऽपि चान्ये तथाप्रकारा अङ्गुलदशकादिशरीरावगाहमानास्तेऽपि महोरगा ज्ञातव्याः, उपसंहारमाह-**'से तं महोरगा, 'जे यावण्णे तहप्पगारा'** इति, येऽपि चान्ये तथाप्रकाराः उक्तरूपाह्यादिरूपास्ते सर्वेऽपि उरःपरिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका द्रष्टव्याः, **'ते समासतो'** इत्यादि पर्याप्तापर्याप्तसूत्रं शरीरादिद्वारकदम्बकं च जलचरवद् भावनीयं, नवर**मवगाहना जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा उत्कर्षतो योजनपृथक्त्वं,** स्थितिद्वारे **जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतस्त्रिपञ्चाशद्वर्षसहस्राणि,** शेषं तथैव।। ११०-१११।। भुजपरिसर्पप्रतिपादनार्थमाह-

(११२) से किं तं भुयगपरिसप्पसंमुच्छिमथलयरा?, २ अणेगविधा पण्णत्ता, तंजहा-गोहा णउला जाव जे यावन्ने तहप्पकारा, ते समासतो दुविधा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य। सरीरोगाहणा जहन्नेणं अंगुलासंखेज्जा[१], उक्कोसेणं धणुपुहत्तं। ठिती उक्कोसेणं बायालीसं वाससहस्साइं, सेसं जहा जलयराणं, जाव चउगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता। से तं भुयपरिसप्पसंमुच्छिमा, से तं थलयरा।।११२।।

१. ०ज्जइभागं - L ।

'से किं त'मित्यादि, **अथ के ते भुजपरिसर्पसंमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः?**, सूरिराह–**भुजपरिसर्पसंमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिका अनेकविधाः प्रज्ञप्ताः, '[१]तह चेव भेओ भाणियव्वो'** इति, यथा प्रज्ञापनायां तथैव भेदो वक्तव्यः, स चैवम्-**"तंजहा-गोहा नउला सरडा सम्मा[२] सरंडा सारा खारा घरोलिया विस्संभरा [३]मंसा मंगुसा पयलाइया छीरविरालिया जाहा चउप्पाइया"** [प्रज्ञापनासूत्र - ८५] एते देशविशेषतो वेदितव्याः, **'जे यावण्णे तहप्पगारा'** येऽपि चान्ये 'तथाप्रकाराः' उक्तप्रकारा गोधादिस्वरूपास्ते सर्वे भुजपरिसर्पा अवसातव्याः, **'ते समासतो'** इत्यादि सूत्रकदम्बकं प्राग्वद् भावनीयं, नवर**मवगाहना जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा उत्कर्षतो धनुःपृथक्त्वं, स्थिति**र्जघन्यतोऽन्तर्मुहूर्त्त**मुत्कर्षतो द्वाचत्वारिंशद्वर्षसहस्राणि, शेषं जलचरवद् द्रष्टव्यम्,** उपसंहारमाह–**'से त'**मित्यादि सुगमम्।। ११२।।

खचरप्रतिपादनार्थमाह–

(११३) से किं तं खहयरा?, २ चउव्विहा पण्णत्ता, तंजहा-चम्मपक्खी लोमपक्खी समुग्गपक्खी विततपक्खी।।११३।।

'से किं त' मित्यादि, **अथ के ते संमूर्च्छिमखचरपञ्चेन्द्रियतिर्यग्योनिकाः?**, सूरिराह-**संमूर्च्छिमखचरपञ्चेन्द्रियतिर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-**'[४]भेदो जहा पण्णवणाए' इति, भेदो यथा **प्रज्ञापनायां** तथा वक्तव्यः, स चैवम्-**'चम्मपक्खी लोमपक्खी समुग्गपक्खी विततपक्खी।'**।। ११३।।

(११४) से किं तं चम्मपक्खी?, २ अणेगविधा पण्णत्ता, तंजहा-वग्गुली जाव जे यावन्ने तहप्पगारा, से तं चम्मपक्खी।।११४।।

से किं तं चम्मपक्खी?, २ अणेगविहा पण्णत्ता, तंजहा- 'वग्गुली जलोया अडिला भारुंड[५]-पक्खी जीवंजीवा समुद्दवायसा कण्णत्तिया पक्खिविराली,' [प्रज्ञापनासूत्र-८७] **जे यावण्णे तहप्पगारा, से तं चम्मपक्खी** ।। ११४।।

(११५) से किं तं लोमपक्खी?, २ अणेगविहा पण्णत्ता, तंजहा-ढंका जाव जे यावन्ने तहप्पकारा, से तं लोमपक्खी।। ११५ ।।

---

१. अत्रापि सूत्र-वृत्त्योर्भिन्नता वर्तते । २ सत्ता - S। सल्ला-**प्रज्ञापनायाम्। सल्लीओ-२/९।। ३.** भूसा-**प्रज्ञा०।**
४. अत्रापि सूत्र-वृत्त्योर्भिन्नता दृश्यते । ५. भारंड० **प्रज्ञा०।।**

से किं तं लोमपक्खी?, लोमपक्खी अणेगविहा पण्णत्ता, तंजहा-ढङ्का 'कंका कुरला वायसा चक्कागा हंसा कलहंसा पायहंसा रायहंसा अडा सेडी [1]वंडा वेलागया कोंचा सारसा [2]मेसरा मयूरा [3]सेयवगा गहरा पोंडरीया कागा [4]कामेयगा वंजुलगा तित्तिरा वट्टगा लावगा कपोया कपिंजला पारेवया चिडगा चासा कुक्कुडा सुगा [5]वरहिगा मयणसलागा कोकिला [6]सेंण्हावरण्णगमादी,' **से तं लोमपक्खी** [प्रज्ञापनासूत्र-८८]।।११५।।

(११६) से किं तं समुग्गपक्खी?, २ एगागारा पण्णत्ता जहा पण्णवणाए, एवं विततपक्खी जाव जे यावन्ने तहप्पगारा ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, णाणत्तं सरीरोगाहणा जह० अंगु० असं० उक्कोसेणं धणुपुहुत्तं ठिती उक्कोसेणं बावत्तरिं वाससहस्साइं, सेसं जहा जलयराणं जाव चउगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता, से तं खहयरसंमुच्छिमतिरिक्ख-जोणिया, से तं संमुच्छिमपंचेंदियतिरिक्खजोणिया।।११६।।

से किं तं समुग्गपक्खी?, समुग्गपक्खी एगागारा पण्णत्ता, 'ते णं नत्थि इहं, बाहिरएसु दीव-समुद्देसु हवंति, से तं समुग्गपक्खी। से किं तं विततपक्खी?, विततपक्खी एगागारा पण्णत्ता, ते णं नत्थि इहं, बाहिरएसु दीव-समुद्देसु भवंति, से तं विततपक्खी'[प्रज्ञापनासूत्र ८७-९०] इति पाठसिद्धं नवरं **'चम्मपक्खी'** इत्यादि, चर्मरूपौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः, लोमात्मकौ पक्षौ लोमपक्षौ तौ विद्येते येषां ते लोमपक्षिणः, तथा गच्छतामपि समुद्गवत्स्थितौ पक्षौ समुद्गकपक्षौ तद्वन्तः समुद्गकपक्षिणः, विततौ-नित्यमनाकुञ्चितौ पक्षौ विततपक्षौ तद्वन्तो विततपक्षिणः **'ते समासतो'** इत्यादि सूत्रकदम्बकं जलचरवद् भावनीयं, नवरमत्र **अवगाहना उत्कर्षतो धनुःपृथक्त्वं, स्थितिरुत्कर्षतो द्वासप्ततिवर्षसहस्राणि**। तथा चात्र क्वचित्पुस्तकान्तरेऽवगाहनास्थित्योर्यथाक्रमं **'सङ्ग्रहणि'**गाथे-

"जोयणसहस्सगाउयपुहत्त तत्तो य जोयणपुहत्तं।
दोण्हंपि धणुपुहत्तं संमुच्छिमवियगपक्खीणं।।१।।

संमुच्छ पुव्वकोडी चउरासीई भवे सहस्साइं।
तेवण्णा बायाला बावत्तरिमेव पक्खीणं।।२।।" [अनुयोगद्वार १०१ प्रज्ञापना सू. २१६]

---

१. बगा वलागा कोंचा-**प्रज्ञा.।।** २. मेसरा मसूरा मसरा-**प्रज्ञा०।।** ३. सेयवग्गा - S । सतवच्छा-**प्रज्ञा०।।** ४. कामुंजगा-**प्रज्ञा०** ।। ५. बरहिणा-**प्रज्ञा०।।** ६. सेहा वेरल्लगमादी-**प्रज्ञा०।।**

व्याख्या-संमूर्च्छिमानां जलचराणामुत्कृष्टाऽवगाहना योजनसहस्रं, चतुष्पदानां गव्यूतपृथक्त्वम्, उरःपरिसर्पाणां योजनपृथक्त्वम्। **'दोण्हं तु'** इत्यादि, द्वयानां संमूर्च्छिमभुजग-पक्षिणां-संमूर्च्छिमभुजगपरिसर्प-पक्षिरूपाणां प्रत्येकं धनुःपृथक्त्वं, तथा संमूर्च्छिमानां जलचराणामुत्कृष्टा स्थितिः पूर्वकोटी, चतुष्पदानां चतुरशीतिर्वर्षसहस्राणि, उरःपरिसर्पाणां त्रिपञ्चाशद्वर्षसहस्राणि, भुजपरिसर्पाणां द्वाचत्वारिंशद्वर्षसहस्राणि, पक्षिणां द्वासप्ततिवर्षसहस्राणि, उपसंहारमाह-**'से तं संमुच्छिमखहयरपञ्चिंदियतिरिक्खजोणिया'**।।११६।।

उक्ताः संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनयः, सम्प्रति गर्भव्युत्क्रान्तिकान् पञ्चेन्द्रियतिर्यग्योनिकानाह-

(११७) से किं तं गब्भवक्कंतियपंचेंदियतिरिक्खजोणिया?, २ तिविधा पण्णत्ता, तंजहा-जलयरा थलयरा खहयरा।। ११७।।

'से किं त'मित्यादि, **अथ के ते गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्योनिकाः?**, सूरिराह-गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्योनिका**स्त्रिविधाः प्रज्ञप्ताः, तद्यथा-जलचराः स्थलचराः खचराश्च** ।।११७।।

तत्र जलचरप्रतिपादनार्थमाह-

(११८)से किं तं जलयरा?, जलयरा पंचविधा पण्णत्ता, तंजहा-मच्छा कच्छभा मगरा गाहा सुंसुमारा, सव्वेसिं भेदो भाणितव्वो तहेव जहा पण्णवणाए, जाव[1] जे यावण्णे तहप्पकारा, ते समासतो दुविधा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।।११८ ।।

'से किं त'मित्यादि, **'भेदो भाणियव्वो तहेव जहा पण्णवणाए'** इति भेदस्तथैव मत्स्यादीनां वक्तव्यो यथा **प्रज्ञापनायां**, स च प्रागेवोपदर्शितः, **'ते समासतो'** इत्यादि पर्याप्तापर्याप्तसूत्रं पाठसिद्धम्।। ११८।।

(११९) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! चत्तारि सरीरगा पन्नत्ता, तंजहा-ओरालिए वेउव्विए तेयए कम्मए, सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्ज० उक्कोसेणं जोयणसहस्सं। छव्विहसंघयणी पण्णत्ता, तंजहा-

१. द्र. १/५६-६० प्रज्ञापनासूत्रे ।।

वइरोसभनारायसंघयणी उसभनारायसंघयणी नारायसंघयणी अद्धनारायसंघयणी कीलियासंघयणी सेवट्टसंघयणी। छव्विहसंठिता पण्णत्ता, तंजहा-समचउरंससंठिता णग्गोधपरिमंडले साति खुज्जे वामणे हुंडे । कसाया ४, सण्णाओ ४, लेसाओ ६, पंच इंदिया, पंच समुग्घाता आदिल्ला, सण्णी नो असण्णी, तिविधवेदा, छप्पज्जत्तीओ, छअपज्जत्तीओ, दिट्ठी तिविधावि, तिण्णि दंसणा, णाणीवि अण्णाणीवि, जे णाणी ते अत्थेगतिया दुणाणी अत्थेगतिया तिन्नाणी, जे दुनाणी ते नियमा आभिणिबोहियणाणी य सुतणाणी य, जे तिन्नाणी ते नियमा आभिणिबोहियणाणी सुत० ओहिणाणी य, एवं अण्णाणीवि, जोगे तिविहे, उवओगे दुविधे, आहारो छद्दिसिं, उववातो नेरइएहिं जाव अहेसत्तमा, तिरिक्खजोणिएसु सव्वेसु असंखेज्जवासाउयवज्जेसु, मणुस्सेसु अकम्मभूमग-अंतरदीवगअसंखेज्जवासाउयवज्जेसु, देवेसु जाव सहस्सारो, ठिती जहण्णेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, दुविधावि मरंति, अणंतरं उव्वट्टित्ता नेरइएसु जाव अहेसत्तमा तिरिक्खजोणिएसु मणुस्सेसु सव्वेसु, देवेसु जाव सहस्सारो, चउगतिया चउआगतिया परित्ता असंखेज्जा पण्णत्ता, से तं जलयरा।। ११९।।

शरीरादिद्वारकदम्बकसूत्रं संमूर्च्छिमजलचरवद् भावनीयं, नवरमत्र शरीरद्वारे **चत्वारि शरीराणि** वक्तव्यानि, गर्भव्युत्क्रान्तिकानां तेषां वैक्रियस्यापि सम्भवात्, अवगाहनाद्वारे **उत्कर्षतोऽवगाहना योजनसहस्रम्**। संहननचिन्तायां **षडपि संहननानि,** तत्स्वरूपप्रतिपादकं चेदं गाथाद्वयम्-

"वज्जरिसहनारायं पढमं बीयं च रिसहनारायं।
नारायमद्धनारायं कीलिया तह य छेवट्टं।।१।। [बृहत्संग्रहणी १५९]
रिसहो य होइ पट्टो वज्जं पुण कीलिया मुणेयव्वा।
उभयो मक्कडबंधो नारायं तं वियाणाहि।।२।।" [त्रैलोक्यदीपक२६१-२६२]

---

१. वज्रर्षभनाराचं प्रथमं द्वितीयं च ऋषभनाराचम् । नाराचमर्धनाराचं कीलिकां तथा च सेवार्त्तम् ।। १ ।।
ऋषभश्च भवति पट्टः, वज्रं पुनः कीलिका ज्ञातव्या। उभयतो मर्कटबन्धो, नाराचं तत् विजानीहि ।। २।।

संस्थानचिन्तायां **षडपि संस्थानानि,** तान्यमूनि–**समचतुरस्रं, न्यग्रोधपरिमण्डलं, सादि, वामनं, कुब्जं, हुण्ड**मिति, तत्र समाः–सामुद्रिकशास्त्रोक्तप्रमाणाविसंवादिन्यश्चतस्रोऽस्रयः–चतुर्दिग्विभागोपलक्षिताः शरीरावयवा यत्र तत्समचतुरस्रं, समासान्तोऽत्प्रत्ययः, अत एवैतदन्यत्र तुल्यमिति व्यवह्रियते, तथा न्यग्रोधवत्परिमण्डलं यस्य, यथा न्यग्रोध उपरि संपूर्णप्रमाणोऽधस्तु हीनः तथा यत्संस्थानं नाभेरुपरि संपूर्णमधस्तु न तथा तन्न्यग्रोधपरिमण्डलम्, उपरि विस्तारबहुलमिति भावः, तथाऽऽदिरिहोत्सेधाख्यो नाभेरधस्तनो देहभागो गृह्यते, ततः सह आदिना–नाभेरधस्तनभागेन यथोक्तप्रमाणलक्षणेन वर्त्तत इति सादि, उत्सेधबहुलमिति भावः, इह यद्यपि सर्वं शरीरमादिना सह वर्त्तते तथाऽपि सादित्वविशेषणान्यथाऽनुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिरिह लभ्यते, तत उक्तम्–उत्सेधबहुलमिति, इदमुक्तं भवति–यत्संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत्सादीति, अपरे तु साचीति पठन्ति, तत्र साचीति प्रवचनवेदिनः शाल्मलीतरुमाचक्षते, ततः साचीव यत्संस्थानं, यथा शाल्मलीतरोः स्कन्धकाण्डमतिपुष्टमुपरि च न तदनुरूपा महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवति उपरितनभागस्तु नेति, तथा यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षणोपेतम् उर-उदरादि च मण्डलं तत्कुब्जं संस्थानं, यत्र पुनरुदरादि प्रमाणलक्षणोपेतं हस्तपादादिकं च हीनं तद्वामनं, यत्र सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तत् हुण्डम्, उक्तञ्च-

"सं[1]मचउरंसे नग्गोहमंडले साइ खुज्ज वामणए।
हुंडेवि य संठाणे जीवाणं छम्मुणेयव्वा।।१।।
तुल्लं वित्थडबहुलं उस्सेहबहुं च मडहकोट्ठं च।
हेट्ठिल्लकायमडहं सव्वत्थासंठियं हुंडं।।२।।" [द्र. आव.नि.८२१ हा.टी. तत्त्वा. सि. ५/२४]

लेश्याद्वारे **षडपि लेश्याः**, शुक्ललेश्याया अपि सम्भवात्, **समुद्घाताः पञ्च,** वैक्रियसमुद्घातस्यापि सम्भवात्, सञ्ज्ञिद्वारे **सञ्ज्ञिनो नो असञ्ज्ञिनः,** वेदद्वारे **त्रिविधवेदा** अपि, स्त्रीपुरुषयोर्वेदयोरप्यमीषां भावात्, पर्याप्तिद्वारे [2]पञ्च पर्याप्तयो, भाषा-मनःपर्याप्त्योरेकत्वेन विवक्षणात्, अपर्याप्तिचिन्तायां

१. **समचतुरस्रं न्यग्रोधपरिमण्डलं सादि कुब्जं वामनम्।**
हुण्डमपि च संस्थानं जीवानां षड् ज्ञातव्यानि ।। १।।
तुल्यं बहुविस्तारम् उत्सेधबहुलं च मडभकोष्ठं च ।
अधस्तनकायमडभं सर्वत्रासंस्थितं हुण्डम् ।। २।।

२. **सूत्रे 'छ पज्जत्तीओ छ अपज्जत्तीओ इति पाठः ।।**

पञ्चापर्याप्तयः, दृष्टिद्वारे **त्रिविधदृष्टयोऽपि,** तद्यथा-मिथ्यादृष्टयः सम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयश्च, दर्शनद्वारे **त्रिविधदर्शना** अपि, अवधिदर्शनस्यापि केषाञ्चिद् भावात्, ज्ञानद्वारे **त्रिज्ञानिनोऽपि,** अवधिज्ञानस्यापि केषाञ्चिद् भावात्, अज्ञानचिन्तायामज्ञानिनोऽपि, विभङ्गस्यापि केषाञ्चित्सम्भवात्, अवधि-विभङ्गौ च सम्यग्मिथ्यादृष्टिभेदेन प्रतिपत्तव्यौ, उक्तञ्च-"**सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यासः**" [ ] इति, उपपातद्वारे **उपपातो नैरयिकेभ्यः** सप्तपृथ्वीभाविभ्योऽपि, **तिर्यग्योनिकेभ्यो**ऽप्यसङ्ख्यात-वर्षायुष्कवर्जेभ्यः **सर्वेभ्योऽपि, मनुष्येभ्योऽकर्मभूमिजा-ऽन्तरद्वीपजासङ्ख्यातवर्षायुष्कवर्ज-कर्म-भूमिवर्जेभ्यो, देवेभ्योऽपि यावत्सहस्रारात्,** परतः प्रतिषेधः, स्थितिद्वारे **जघन्यतः स्थितिरन्त-र्मुहूर्त्तमुत्कर्षतः पूर्वकोटी,** च्यवनद्वारेऽ**नन्तरमुद्वृत्य** सहस्रारात्परे ये देवास्तान् वर्जयित्वा शेषेषु सर्वेष्वपि जीवस्थानेषु गच्छन्ति, अत एव गत्यागतिद्वारे **चतुरागतिकाश्चतुर्गतिकाः, 'परीत्ताः'** प्रत्येकशरीरिणो-**ऽसङ्ख्येयाः प्रज्ञप्ताः,** हे श्रमण! हे आयुष्मन्!, उपसंहारमाह-'**से तं जलयरा** गब्भवक्कंतियपञ्चिंदिय-तिरिक्खजोणिया'।। ११९ ।।

सम्प्रति स्थलचरप्रतिपादनार्थमाह-

(१२०) से किं तं थलयरा?, २ दुविहा पण्णत्ता, तंजहा-चउप्पदा य परिसप्पा य।।

(१२१) से किं तं चउप्पदा?, २ चउव्विधा पण्णत्ता, तंजहा-एगक्खुरा [१]सो चेव भेदो जाव जे यावन्ने तहप्पकारा, ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य, चत्तारि सरीरा, ओगाहणा जहन्नेणं अंगुलस्स असंखेज्ज० उक्कोसेणं छ गाउयाइं, ठिती उक्कोसेणं तिन्नि पलिओवमाइं, नवरं उव्वट्टित्ता नेरइएसु चउत्थपुढविं गच्छंति, सेसं जहा जलयराणं, जाव चउगतिया चउआगतिया परित्ता असंखिज्जा पण्णत्ता। से तं चउप्पदा।। १२१।।

(१२२) से किं तं परिसप्पा?, २ दुविहा पण्णत्ता, तंजहा-उरपरिसप्पा य भुयगपरिसप्पा य।। १२२।।

(१२३) से किं तं उरपरिसप्पा?, २ [२]तहेव आसालियवज्जो भेदो भाणियव्वो, [तिण्णि][३] सरीरा, ओगाहणा जहण्णेणं अंगुलस्स असंखे० उक्कोसेणं जोयणसहस्सं,

१. द्र.सू.१/१०३ ।। २. द्र.सू.१०५-१०९ ।। ३. चत्तारि L ।।

ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता नेरइएसु जाव पंचमं पुढविं ताव गच्छंति, तिरिक्खमणुस्सेसु सव्वेसु, देवेसु जाव सहस्सारो, सेसं जहा जलयराणं, जाव चउगतिया चउआगइया परित्ता असंखेज्जा। से तं उरपरिसप्पा।

(१२४) से किं तं भुयगपरिसप्पा?, २ भेदो तहेव, चत्तारि सरीरगा, ओगाहणा जहन्नेणं अंगुलासंखे० उक्कोसेणं गाउयपुहुत्तं । ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पुव्वकोडी। सेसेसु ठाणेसु जहा उरपरिसप्पा, णवरं दोच्चं पुढविं गच्छंति, से तं भुयपरिसप्पा पण्णत्ता, से तं थलयरा।।

(१२५) से किं तं खहयरा?, २ चउव्विहा पण्णत्ता, तंजहा-चम्मपक्खी तहेव भेदो, ओगाहणा जहन्नेणं अंगुलस्स असंखे० उक्कोसेणं धणुपुहुत्तं, ठिती जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पलिओवमस्स असंखेज्जतिभागो, सेसं जहा जलयराणं, नवरं जाव तच्चं पुढविं गच्छंति, जाव से तं खहयरगब्भवक्कंतियपंचेंदियतिरिक्खजोणिया, से तं तिरिक्खजोणिया।।१२५।।

(१२०-१२५) **'से किं तं'** इत्यादि, स्थलचरगर्भव्युत्क्रान्तिकानां भेदोपदर्शकं सूत्रं यथा संमूर्च्छिमस्थलचराणां, नवरमत्रासालिका न वक्तव्या, सा हि संमूर्च्छिमैव न गर्भव्युत्क्रान्तिका, तथा महोरगसूत्रे **"जोयणसयंपि जोयणसयपुहुत्तियावि जोयणसहस्संपि"** इत्येतदधिकं वक्तव्यं, शरीरादिद्वारकदम्बकसूत्रं तु सर्वत्रापि गर्भव्युत्क्रान्तिकजलचराणामिव, नवरमवगाहनास्थित्युद्वर्त्तनासु नानात्वं, तत्र चतुष्पदाना**मुत्कृष्टाऽवगाहना षड् गव्यूतानि, स्थितिरुत्कर्षतस्त्रीणि पल्योपमानि,** उद्वर्त्तना चतुर्थपृथिव्या आरभ्य यावत्सहस्रारः, एतेषु सर्वेष्वपि जीवस्थानेष्वनन्तरमुद्वृत्त्योत्पद्यन्ते, उरःपरिसर्पाणामुत्कृष्टावगाहना योजनसहस्रं, स्थितिरुत्कर्षतः पूर्वकोटी, उद्वर्त्तना पञ्चमपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेष्वनन्तरमुद्वृत्योत्पद्यन्ते। भुजपरिसर्पाणामुत्कृष्टाऽवगाहना गव्यूतपृथक्त्वं, स्थितिरुत्कर्षतः पूर्वकोटी, उद्वर्त्तनाचिन्तायां द्वितीयपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेषूत्पादः।। खचरगर्भव्युत्क्रान्तिकपञ्चेन्द्रियभेदो यथा संमूर्च्छिमखचराणां, शरीरादिद्वारकलापचिन्तनं गर्भव्युत्क्रान्तिकजलचरवत्, नवरमवगाहनास्थित्युद्वर्त्तनासु नानात्वं, तत्रोत्कर्षतोऽवगाहना धनुष्पृथक्त्वं, जघन्यतः

१. द्र.सू. ११३-११६ ।।

सर्वत्राप्यङ्गुलासङ्ख्येयभागप्रमाणा, स्थितिरपि जघन्यतः सर्वत्राप्यन्तर्मुहूर्त्तमुत्कर्षतोऽत्र पल्योपमासङ्ख्येयभागः, उद्वर्त्तना तृतीयपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेषूत्पादः, क्वचित्पुस्तकान्तरेऽवगाहना-स्थित्योर्यथाक्रमं **सङ्ग्रहणिगाथे-**

"जोयणसहस्स छग्गाउयाइ तत्तो य जोयणसहस्सं।
गाउयपुहुत्त भुयगे धणुयपुहुत्तं च पक्खीसु।।१।।
गब्भंमि पुव्वकोडी तिन्नि य पलिओवमाइं परमाउं।
उरभुयग पुव्वकोडी पलियअसंखेज्जभागो य।।२।।" [जीवाभि. संग्रहणी १५६]

अनयोर्व्याख्या-गर्भव्युत्क्रान्तिकानामेव जलचराणामुत्कृष्टावगाहना योजनसहस्रं, चतुष्पदानां षड् गव्यूतानि, उरःपरिसर्पाणां योजनसहस्रं, भुजपरिसर्पाणां गव्यूतपृथक्त्वं, पक्षिणां धनुष्पृथक्त्वं। तथा गर्भव्युत्क्रान्तिकानामेव जलचराणामुत्कृष्टा स्थितिः पूर्वकोटी, चतुष्पदानां त्रीणि पल्योपमानि, उरगाणां भुजगानां च पूर्वकोटी, पक्षिणां पल्योपमासङ्ख्येयभाग इति।। उत्पादविधिस्तु नरकेष्वस्माद्गाथाद्वयादवसेयः-

"अंस्सण्णी खलु पढमं, दोच्चं च सरीसवा तइय पक्खी।
सीहा जंति चउत्थिं, उरगा पुण पंचमिं पुढविं।।१।।
छंट्ठिं च इत्थियाओ मच्छा मणुया य सत्तमिं पुढविं।
एसो परमुववाओ बोद्धव्वो नरयपुढवीसु।।२।।"[प्रज्ञा०१८३-१८४]।।१२०-१२५।।

उक्ताः पञ्चेन्द्रियतिर्यञ्चः सम्प्रति मनुष्यप्रतिपादनार्थमाह-

(१२६) से किं तं मणुस्सा?, २ दुविहा पण्णत्ता, तंजहा-संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य।। १२६।।

'से किं तं' इत्यादि, **अथ के ते मनुष्याः?**, सूरिराह-**मनुष्या द्विविधाः प्रज्ञप्ताः, तद्यथा-संमूर्च्छिममनुष्याश्च गर्भव्युत्क्रान्तिकमनुष्याश्च,** चशब्दौ स्वगतानेकभेदसूचकौ।। १२६।। तत्र संमूर्च्छिममनुष्यप्रतिपादनार्थमाह-

---

१. असञ्ज्ञिनः खलु प्रथमां द्वितीयां च सरीसृपास्तृतीयां पक्षिणः ।
सिंहा यान्ति चतुर्थीमुरगाः पुनः पञ्चमीं पृथ्वीम् ।। १ ।।
२. षष्ठीं च स्त्रियः मत्स्या मनुष्याश्च सप्तमीं पृथ्वीं यावत् ।
एष परम् उत्पातो बोद्धव्यो नरकपृथ्वीषु ।। २ ।।

(१२७) कहि णं भंते! संमुच्छिममणुस्सा संमुच्छंति?, गोयमा! अंतो मणुस्सखेत्ते [१]जाव अंतो मुहुत्तया चेव कालं करेंति।। १२७।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! संमूर्च्छिममनुष्याः संमूर्च्छन्ति?**, भगवानाह-**गौतम! 'अंतो मणुस्सखेत्ते जाव करेंति'** इति, अत्र यावत्करणादेवं परिपूर्णः पाठः-**"अंतो मणुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीव-समुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पण्णाए अंतरदीवेसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणएसु वा वंतेसु वा पित्तेसु वा [पूएसु वा] सोणिएसु वा सुक्केसु वा सुक्कपोग्गलपरिसाडेसु वा विगयजीवकलेवरेसु वा थीपुरिससंजोगेसु वा [गामनिद्धमणेसु वा] नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु, एत्थ णं संमुच्छिममणुस्सा संमुच्छंति अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए असन्नी मिच्छादिट्ठी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहुत्ताउया चेव कालं करेंति"** [प्रज्ञापनासूत्र ९३] एतच्च निगदसिद्धम्।। १२७।। सम्प्रति शरीरादिद्वारप्रतिपादनार्थमाह-

(१२८) तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तिन्नि सरीरगा पन्नत्ता, तंजहा-ओरालिए तेयए कम्मए, [२]→संघयण-संठाण-कसाय-सण्णा-लेसा जधा बेइंदियाणं, इंदियाणि पंचि, समुग्धाया ३, असण्णी णपुंसा भवे अपज्जत्तीओ ५, दिट्ठि [दंसण-णाणऽ]ण्णाण-जोग-उवओगा जहा पुढवीकाइयाणं, आहारो जधा बेइंदियाणं, उववातो णेरइय-देव-तेउ-वाउ-असंखाउवज्जो, अंतोमुहुत्तं ठिती, समोहतावि असमोहतावि मरंति। कहिं गच्छन्ति ? णेरइय-देव-असंखेज्जाउवज्जेसु, दुआगतिया दुगतिया, परित्ता असंखेज्जा पण्णत्ता समणाउसो ।← से तं संमुच्छिममणुस्सा।। १२८।।

'तेसि णं भंते! कति सरीरगा पण्णत्ता ?' इत्यादि, **शरीराणि त्रीणि औदारिक-तैजस-कार्मणानि,** अवगाहना जघन्यत उत्कर्षतश्चाङ्गुलासङ्ख्येयभागप्रमाणा, **संहनन-संस्थान-कषाय-लेश्या**द्वाराणि **यथा द्वीन्द्रियाणाम्,** इन्द्रियद्वारे **पञ्चेन्द्रियाणि,** सञ्ज्ञिद्वार-वेदद्वारे अपि द्वीन्द्रियवत्, पर्याप्तिद्वारेऽ**पर्याप्तयः पञ्च, दृष्टि-दर्शन-ज्ञानाज्ञान-योगोपयोगद्वाराणि यथा पृथिवीकायिकानाम्, आहारो यथा द्वीन्द्रियाणाम्, उपपातो नैरयिक-देव-तेजो-वाय्वसङ्ख्यातवर्षायुष्कवर्जेभ्यः, स्थिति**र्जघन्यत उत्कर्षतोऽप्यन्त**र्मुहूर्त्त**प्रमाणा, नवरं जघन्यपदादुत्कृष्टपदमधिकं वेदितव्यं,

१. द्रष्टव्यं प्रज्ञापनासूत्र ९३ ।। २. →← चिह्नद्वयमध्यवर्तिपाठः जे. अस्ति, मु. नास्ति।।

मारणान्तिकसमुद्घातेन **समवहता अपि म्रियन्ते असमवहताऽपि,** अनन्तरमुद्वृत्य नैरयिक-देवासङ्ख्येयवर्षायुष्कवर्जेषु शेषेषु स्थानेषूत्पद्यन्ते, अत एव गत्यागतिद्वारे **द्व्यागतिका द्विगतिका**स्तिर्यग्मनुष्यगत्यपेक्षया, **'परीत्ताः'** प्रत्येकशरीरिणोऽसङ्ख्येयाः **प्रज्ञप्ताः, हे श्रमण! हे आयुष्मन्!,** उपसंहारमाह-**'से तं संमुच्छिममणुस्सा'**।। १२८।।

उक्ताः संमूर्च्छिममनुष्याः, अधुना गर्भव्युत्क्रान्तिकमनुष्यानाह–

(१२९) से किं तं गब्भवक्कंतियमणुस्सा?, २ तिविहा पण्णत्ता, तंजहा-कम्मभूमगा अकम्मभूमगा अंतरदीवजा, एवं माणुस्सभेदो भाणियव्वो जहा पण्णवणाए तहा णिरवसेसं भाणियव्वं जाव छउमत्था य केवली य। ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य।। १२९।।

'से किं तं' इत्यादि, **अथ के ते गर्भव्युत्क्रान्तिकमनुष्याः?**, सूरिराह–**गर्भव्युत्क्रान्तिकमनुष्या-स्त्रिविधाः प्रज्ञप्ताः,** तद्यथा-**कर्मभूमका अकर्मभूमका अन्तरद्वीपजाः,** तत्र कर्म–कृषिवाणिज्यादि मोक्षानुष्ठानं वा, कर्मप्रधाना भूमिर्येषां ते कर्मभूमाः, आर्षत्वात्समासान्तोऽप्रत्ययः, कर्मभूमा एव कर्म-भूमकाः, एवमकर्मा–यथोक्तकर्मविकला भूमिर्येषां तेऽकर्मभूमास्त एवाकर्मभूमकाः, अन्तरशब्दो मध्यवाची, अन्तरे-लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपास्तद्गता अन्तरद्वीपगाः, **'एवं माणुस्सभेयो भाणियव्वो जहा पण्णवणाए'** इति, 'एवम्' उक्तेन प्रकारेण मनुष्यभेदो भणितव्यो यथा प्रज्ञापनायां, स चातिबहुग्रन्थ इति तत एव परिभावनीयः, **'ते समासतो'** इत्यादि पर्याप्तापर्याप्तसूत्रं पाठसिद्धम्।। १२९ ।।

(१३०) तेसि णं भंते! जीवाणं कति सरीरा प०?, गोयमा! पंच सरीरया पण्णत्ता,तंजहा-ओरालिए जाव कम्मए। सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्ज० उक्कोसेणं तिण्णि गाउयाइं, छच्चेव संघयणा, छस्संठाणा।। १३० ।।

शरीरादिद्वारकलापचिन्तायां शरीरद्वारे **पञ्च शरीराणि, तद्यथा-औदारिकं,** वैक्रियमाहारकं, तैजसं, **कार्मणं** च, मनुष्येषु सर्वभावसम्भवात्, अवगाहनाद्वारे **जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागमात्रा उत्कर्षतस्त्रीणि गव्यूतानि,** संहननद्वारे **षडपि संहननानि,** संस्थानद्वारे **षडपि संस्थानानि,**।। १३० ।।

(१३१) ते णं भंते! जीवा किं कोहकसाई जाव लोभकसाई ? अकसाई?, गोयमा! सव्वेवि।। १३१।।

---

१. ०ताश्च-मु. ।। २. प्रज्ञापनायां सूत्र ९४ तः १३८ ।।

कषायद्वारे क्रोधकषायिणोऽपि, मानकषायिणोऽपि, मायाकषायिणोऽपि, लोभकषायिणोऽपि, अकषायिणोऽपि, वीतरागमनुष्याणामकषायित्वात्,।। १३१ ।।

(१३२) ते णं भंते! जीवा किं आहारसन्नोवउत्ता जाव नोसन्नोवउत्ता?, गोयमा! सव्वेवि।। १३२।।

सञ्ज्ञाद्वारे आहारसञ्ज्ञोपयुक्ता भयसञ्ज्ञोपयुक्ता मैथुनसञ्ज्ञोपयुक्ता लोभसञ्ज्ञोपयुक्ताः, नोसंज्ञोपयुक्ताश्च निश्चयतो वीतरागमनुष्याः, व्यवहारतः सर्व एव चारित्रिणो, लोकोत्तरचित्तलाभात्तस्य सञ्ज्ञादशकेनापि विप्रयुक्तत्वात्, उक्तञ्च—

"निर्वाणसाधकं सर्वं, ज्ञेयं लोकोत्तराश्रयम्।

सञ्ज्ञा लोकाश्रया सर्वाः, भवाङ्कुरजलं परम्।।१।।"[ ] ।। १३२ ।।

(१३३) ते णं भंते! जीवा किं कण्हलेसा जाव अलेसा?, गोयमा! सव्वेवि। सोइंदियोवउत्ता जाव नोइंदियोवउत्तावि, सत्त समुग्घाता, तंजहा-वेयणासमुग्घाते जाव केवलिसमुग्घाए, [१]सन्नीवि नोसन्नी असन्नीवि, इत्थिवेयावि जाव अवेदावि, पंच पज्जत्ती, पंच अपज्जत्ती, तिविहावि दिट्ठी, चत्तारि दंसणा, णाणीवि अण्णाणीवि, जे णाणी ते अत्थेगतिया दुणाणी अत्थेगतिया तिणाणी अत्थेगइया चउणाणी अत्थेगतिया एगणाणी, जे दुण्णाणी ते नियमा आभिणिबोहियणाणी सुतणाणी य, जे तिणाणी ते आभिणिबोहियणाणी सुतणाणी ओहिणाणी य, अहवा आभिणिबोहियणाणी सुयनाणी मणपज्जवणाणी य, जे चउणाणी ते णियमा आभिणिबोहियणाणी सुत० ओहि० मणपज्जवणाणी य, जे एगणाणी ते नियमा केवलनाणी, एवं अन्नाणीवि दुअन्नाणी तिअण्णाणी, मणजोगीवि वइकायजोगीवि अजोगीवि दुविहे उवओगे, आहारो छद्दिसिं, [२]उववातो नेरइएहिं अधेसत्तमवज्जेहिं तिरिक्खजोणिएहिंतो, [३]तेउवाउअसंखेज्जवासाउयवज्जेहिं मणुस्सेहिं अकम्मभूमग-अंतरदीवगअसंखेज्जवासाउयवज्जेहिं, देवेहिं सव्वेहिं, ठिती जहन्नेणं अंतोमुहुत्तं,

---

१. सण्णी वि असण्णी वि णो सण्णी णोअसण्णी वि-जे. ।। २. उववाओ अहेसत्तम तेउ-वाउ-असंखेज्ज वासाउयवज्जेहिं (असन्खाउवज्जे -जे.)ठिती -L जे.।। ३. उववाओ असं०मु. ।।

उक्कोसेणं तिण्णि पलिओवमाइं, दुविधावि मरंति, उव्वट्टित्ता नेरइयादिसु जाव अणुत्तरोववाइएसु, अत्थेगतिया सिज्झंति जाव अंतं करेंति।। १३३ ।।

लेश्याद्वारे कृष्णलेश्या, नीललेश्याः, कापोतलेश्यास्तेजोलेश्याः, पद्मलेश्याः, शुक्ललेश्या अलेश्याश्च, तत्रालेश्याः परमशुक्लध्यायिनोऽयोगिकेवलिनः। इन्द्रियद्वारे **श्रोत्रेन्द्रियोपयुक्ता** यावत्स्पर्शनेन्द्रियोपयुक्ता **नोइन्द्रियोपयुक्ताश्च,** तत्र नोइन्द्रियोपयुक्ताः केवलिनः, समुद्घातद्वारे **सप्तापि समुद्घाताः**, मनुष्येषु सर्वभावसम्भवात्, समुद्घातसङ्ग्राहिका चेमा गाथा-

"[१]**वेयणकसायमरणंतिए य वेउव्विए य आहारे।**
केवलियसमुग्घाए सत्त समुग्घा इमे भणिया।।१।।" [प्रज्ञापना सू. २२८]

सञ्ज्ञिद्वारे **सञ्ज्ञिनोऽपि नोसञ्ज्ञिनो असञ्ज्ञिनोऽपि,** तत्र नोसञ्ज्ञिनो असञ्ज्ञिनः केवलिनः। वेदद्वारे **स्त्रीवेदा अपि,** पुरुषवेदा अपि, नपुंसकवेदा अपि, **अवेदाः**—सूक्ष्मसम्परायादयः, पर्याप्तिद्वारे **पञ्च पर्याप्तयः पञ्चापर्याप्तयः,** भाषा-मनःपर्याप्त्योरेकत्वेन विवक्षणात्, दृष्टिद्वारे **त्रिविधदृष्टयः,** तद्यथा-केचिन्मिथ्यादृष्टयः, केचित्सम्यग्दृष्टयः, केचित्सम्यग्मिथ्यादृष्टयः, दर्शनद्वारे **चतुर्विधदर्शनाः,** तद्यथा-चक्षुर्दर्शना, अचक्षुर्दर्शना, अवधिदर्शनाः, केवलदर्शनाः, ज्ञानद्वारे **ज्ञानिनोऽज्ञानिनश्च,** तत्र मिथ्यादृष्टयोऽज्ञानिनः सम्यग्दृष्टयो ज्ञानिनः, '**[२]णाणाणि पंच तिण्णि अण्णाणाणि भयणाते**' इति, ज्ञानानि पञ्च मतिज्ञानादीनि, अज्ञानानि त्रीणि मत्यज्ञानादीनि, तानि भजनया वक्तव्यानि, सा च भजना एवम्-**केचिद् द्विज्ञानिनः केचित्त्रिज्ञानिनः केचिच्चतुर्ज्ञानिनः केचिदेकज्ञानिनः**, तत्र **ये द्विज्ञानिनस्ते नियमादाभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च, ये त्रिज्ञानिनस्ते मतिज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, अथवाऽऽभिनिबोधिकज्ञानिनः श्रुतज्ञानिनो मनःपर्यवज्ञानिनश्च,** अवधिज्ञानमन्तरेणापि मनःपर्यवज्ञानस्य सम्भवात्, '**सिद्धप्राभृतादौ**' तथाऽनेकशोऽभिधानात्, **ये चतुर्ज्ञानिनस्ते आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनो मनःपर्यवज्ञानिनश्च, ये एकज्ञानिनस्ते केवलज्ञानिनः,** केवलज्ञानसद्भावे शेषज्ञानापगमात्, '[३]**नट्ठंमि उ छाउमत्थिए नाणे**'[**अष्टकप्र.३/२ टीका**] इति वचनात्, ननु केवलज्ञानप्रादुर्भावे कथं शेषज्ञानापगमः?, यावता यानि शेषाणि मत्यादीनि ज्ञानानि स्वस्वावरणक्षयोपशमेन जायन्ते ततो निर्मूलस्वस्वावरणविलये तानि सुतरां भवेयुश्चारित्रपरिणामवत्,

उक्तञ्च-

---

१. वेदनः कषायः मारणान्तिकश्च वैक्रियश्चाहारकः । कैवलिकः समुद्घातः सप्त समुद्घाता इमे भणिताः ।। १ ।। २. नैष पाठो मूले दृश्यते ।। ३. नष्टे तु छाद्मास्थिके ज्ञाने ।

"आवरणदेसविगमे जाइं विज्जंति मइसुयाईणि।
आवरणसव्वविगमे कह ताइं न होंति जीवस्स?।।१।।" [द्र.पंचसंग्रह स्वो.वृत्तिः गा.२०]

उच्यते, इह यथा जात्यस्य मरकतादिमणेर्मलोपदिग्धस्य यावन्नाद्यापि समूलमलापगमस्तावद् यथा यथा देशतो मलविलयस्तथा तथा देशतोऽभिव्यक्तिरुपजायते, सा च क्वचित्कदाचित्कथञ्चिद् भवतीत्यनेकप्रकारा, तथाऽऽत्मनोऽपि सकलकालकलाकलापावलम्बिनिखिलपदार्थसार्थपरिच्छेदकरणैकपारमार्थिकस्वरूपस्याप्यावरणमलपटलतिरोहितस्य यावन्नाद्यापि निखिलकर्ममलापगमस्तावद् यथा यथा देशतः कर्ममलोच्छेदस्तथा तथा तस्य विज्ञप्तिरुज्जृम्भते, सा च क्वचित्कदाचित्कथञ्चिदनेकप्रकारा, उक्तञ्च–

"मलविद्धमणेर्व्यक्तिर्यथाऽनेकप्रकारतः।
कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः।।१।।" [द्र.सिद्धिविनिश्चयटीका ४/२]

सा चानेकप्रकारता मति-श्रुतादिभेदेनावसेया, ततो यथा मरकतादिमणेरशेषमलापगमसम्भवे समस्तास्पष्टदेशव्यक्तिव्यवच्छेदेन परिस्फुटरूपैकाभिव्यक्तिरुपजायते तद्वदात्मनोऽपि ज्ञान-दर्शन-चारित्रप्रभावतो निःशेषावरणप्रहाणावशेषदेशज्ञानव्यवच्छेदेनैकरूपाऽतिपरिस्फुटा सर्ववस्तुपर्यायप्रपञ्चसाक्षात्कारिणी विज्ञप्तिरुल्लसति, उक्तञ्च–

"यथा जात्यस्य रत्नस्य, निःशेषमलहानितः।
स्फुटैकरूपाऽभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः।।१।।" [ ] इति,

येऽज्ञानिनस्ते द्व्यज्ञानिनस्त्र्यज्ञानिनो वा, तत्र ये द्व्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनः, ये त्र्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च। योगद्वारे **मनोयोगिनो वाग्योगिनः काययोगिनोऽयोगिनश्च,** तत्रायोगिनः शैलेशीमवस्थां प्रतिपन्नाः, उपयोगद्वारमाहारद्वारं च द्वीन्द्रियवद्, **उपपात** एतेष्वधःसप्तमनरकादिवर्जेभ्यः, उक्तञ्च–

"संत्तममहिनेरइया तेऊ वाऊ अणंतरुव्वट्टा।
नवि पावे माणुस्सं तहेवऽसंखाउया सव्वे।।१।।" [ ] इति,

स्थितिद्वारे **जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि,** समुद्घातमधिकृत्य मरणचिन्तायां समवहता अपि म्रियन्ते असमवहता अपि, च्यवनद्वारेऽनन्तर**मुद्वृत्य** सर्वेषु नैरयिकेषु सर्वेषु च तिर्यग्योनिषु, सर्वेषु मनुष्येषु, सर्वेषु देवेष्वनुत्तरोपपातिकपर्यवसानेषु गच्छन्ति, **'अत्थेगइया सिज्झंति जाव अंतं करेंति'** इति, अस्तीति निपातोऽत्र बहुवचनार्थः, सन्त्येकका ये निष्ठितार्थाः भवन्ति यावत्करणात्

१. आवरणदेशविगमे (यदि) तानि विद्यन्ते मति-श्रुतादीनि । सर्वावरणविगमे कथं तानि न भवन्ति जीवस्य? ।।१ ।। २. सप्तममहीनैरयिकाः तेजस्कायिका वायुकायिका अनन्तरोद्वृत्ताः । नैव प्राप्नुवन्ति मानुष्यं तथैवाऽसङ्ख्येयवर्षायुष्काः सर्वे ।। १ ।।

'बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खाणमंतं करेंती'ति द्रष्टव्यं, तत्राणिमाद्यैश्वर्याप्त्या तथाविधमनुष्यकृत्यापेक्षया निष्ठितार्था इति, असर्वविदोऽपि कैश्चित्सिद्धा इष्यन्ते, ततो मा भूत्तेषु संप्रत्यय इति तदपोहायाह-**'बुध्यन्ते'** निरावरणत्वात्केवलावबोधेन समस्तं वस्तुजातम्, एते चासिद्धा अपि भवस्थकेवलिन एवंभूता वर्त्तन्ते, तत्र मा भूदेतेष्वेव प्रतीतिरित्याह-**'मुच्यन्ते'** पुण्यापुण्यरूपेण कृत्स्नेन कर्मणा, एतेऽपि चापरिनिर्वृता एव परैरिष्यन्ते-**"मुक्तिपदे प्राप्ता अपि तीर्थनिकारदर्शनादिहागच्छन्ती"** [ ] ति वचनात्, ततो मा भूत्तद्गोचरा मन्दमतीनां धीरित्याह-**'परिनिर्वान्ति'** विध्यातसमस्तकर्महुतवहपरमाणवो भवन्तीति, किमुक्तं भवति? सर्वदुःखानां शारीरमानसभेदानामन्तं-विनाशं कुर्वन्ति। १३३ ।

(१३४) ते णं भंते! जीवा कतिगतिया कइआगइया पण्णत्ता?, गोयमा! पंचगतिया चउआगतिया परित्ता संखिज्जा पण्णत्ता, से तं गब्भवक्कंतिया, से तं मणुस्सा।। १३४।।

अत एव गत्यागतिद्वारे **चतुरागतिकाः पञ्चगतिकाः,** सिद्धिगतावपि गमनात्, **'परीत्ताः'** प्रत्येकशरीरिणः **'सङ्ख्येयाः'** सङ्ख्येयकोटीप्रमाणत्वात् **प्रज्ञप्ताः,** हे श्रमण! हे आयुष्मन्!, उपसंहारमाह- **'से तं मणुस्सा'**।। १३४।।

अधुना देवानाह-

(१३५) से किं तं देवा?, देवा चउव्विधा पण्णत्ता, तं जहा-भवणवासी वाणमंतरा जोइसिया वेमाणिया। से किं तं भवणवासी?, २ दसविधा पण्णत्ता, तंजहा-असुरा जाव थणिया, से तं भवणवासी। से किं तं वाणमंतरा?, २ देवभेदो सव्वो भाणियव्वो जाव ते समासतो दुविहा पण्णत्ता, तंजहा-पज्जत्ता य अपज्जत्ता य। तओ सरीरगा-वेउव्विए तेयए कम्मए। ओगाहणा दुविधा-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं सत्त रयणीओ,तत्थ णं जा सा उत्तरवेउव्विया सा जहन्नेणं अंगुलसंखेज्जति० उक्कोसेणं जोयणसतसहस्सं, सरीरगा छण्हं संघयणाणं असंघयणी णेवट्ठी णेव छिरा णेव ण्हारू णेव संघयणमत्थि, जे पोग्गला इट्ठा कंता जाव ते तेसिं संघायत्ताए परिणमंति।१३५।

---

१. ०न्ति परि सप्तन्तात् निर्वांति विध्यात० ।।। २. सव्वो - SP कख नास्ति ।।

'से किं तं' इत्यादि, **अथ के ते देवाः**?, सूरिराह- **देवाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाश्च, 'एवं भेदो भाणियव्वो जहा पन्नवणाए'** इति, **'एवम्'** उक्तेन प्रकारेण भेदो भणितव्यो यथा **प्रज्ञापनायां**, स चैवम्-**"से किं तं भवणवासी?, भवणवासी दसविहा पन्नत्ता"** [प्रज्ञा. सू. १४०] इत्यादिरूपस्तत एव सव्याख्यानः परिभावनीयः, **'ते समासतो दुविहा पण्णत्ता- पज्जत्तगा य अपज्जत्तगा य'** एषामपर्याप्तत्वमुत्पत्तिकाल एव द्रष्टव्यं न त्वपर्याप्तिनामकर्मोदयतः, उक्तञ्च-

"नारयदेवा तिरियमणुयगब्भजा जे असंखवासाऊ।
एए उ अपज्जत्ता उववाए चेव बोद्धव्वा।।१।।" [जीवाभि. संग्रहणी १९०, श्रावक प्र.७०]

इति, शरीरादिद्वारचिन्तायां शरीरद्वारे **त्रीणि शरीराणि वैक्रियं तैजसं कार्मणं** च, **अवगाहना भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रा उत्कर्षतः सप्तहस्तप्रमाणा, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभागप्रमाणा उत्कर्षतो योजनशतसहस्रं,** संहननद्वारे **षण्णां संहननानाम**न्यतमेनापि संहननेनाऽ**संहननिनः**, कुतः? इत्याह-**'नेवट्ठी'** इत्यादि, यतो नैव तेषां देवानां शरीरेष्वस्थीनि **नैव शिरा नापि स्नायूनि** संहननं चास्थिनिचयात्मकमतोऽस्थ्यादीनामभावात्संहननाभावः, किन्तु **'जे पोग्गला'** इत्यादि, ये पुद्गला **इष्टाः**-मनस इच्छामापन्नाः, तत्र किञ्चिदकान्तमपि केषाञ्चिदिष्टं भवति तत आह-**'कान्ताः'** कमनीयाः, शुभवर्णोपेतत्वात्, **यावत्कर**णात् 'पिया मणुन्ना मणामा' इति द्रष्टव्यं, तत्र यत एव कान्ता अत एव प्रियाः-सदैवात्मनि प्रियबुद्धिमुत्पादयन्ति, तथा 'शुभाः' शुभरसगन्धस्पर्शात्मकत्वात् 'मनोज्ञाः' विपाकेऽपि सुखजनकतया मनःप्रह्लादहेतुत्वात् 'मनआपाः' सदैव भोज्यतया जन्तूनां मनांसि आप्नुवन्ति, ते इत्थम्भूताः पुद्गलास्**तेषां** शरीर**सङ्घाताय परिणमन्ति**।। १३५ ।।

(१३६) किंसंठिता?, गोयमा! दुविधा पण्णत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य। तत्थ णं जे ते भवधारणिज्जा ते णं समचउरंससंठिया पण्णत्ता, तत्थ णं जे ते उत्तरवेउव्विया ते णं नाणासंठाणसंठिया पण्णत्ता। चत्तारि कसाया, चत्तारि सण्णा, छ लेस्साओ, पंच इंदिया, पंच समुग्घाता, सन्नीवि असन्नीवि, इत्थिवेदावि पुरिसवेदावि नो नपुंसगवेदा, पज्जत्तीओ अपज्जत्तीओ पंच, दिट्ठी

---

१. अत्र सूत्र-वृत्योः पाठभेदो दृश्यते ।। २. नारका देवाः तिर्यङ्मनुजा गर्भव्युत्क्रान्ता येऽसङ्ख्यवर्षायुष्काः । एते तु अपर्याप्ता उपपात एव बोद्धव्याः ।। १ ।।

तिन्नि, तिण्णि दंसणा, णाणीवि अण्णाणीवि, जे नाणी ते नियमा तिण्णाणी, अण्णाणी भयणाए, दुविहे उवओगे, तिविहे जोगे, →आहारो[1] णियमा छद्दिसिं, ओसन्नकारणं पडुच्च वण्णतो हालिद्दसुक्किल्लाइं जाव[2] आहारमाहारेंति, उववातो तिरियमणुस्सेसु, ठिती जहन्नेणं दस वाससहस्साइं, उक्कोसेणं तेत्तीसं सागरोवमाइं, दुविधावि मरंति, उव्वट्टित्ता नो नेरइएसु गच्छंति, तिरियमणुस्सेसु जधासंभवं, नो देवेसु गच्छंति, दुगतिया दुआगतिया परित्ता असंखेज्जा पण्णत्ता, से तं देवा, से तं पंचेंदिया, से तं ओराला तसा पाणा←।। १३६ ।।

संस्थानद्वारे **भवधारणीया** तनुः सर्वेषामपि **समचतुरस्रसंस्थाना उत्तरवैक्रिया नानासंस्थानसंस्थिता,** तस्या इच्छावशतः प्रादुर्भावात्, **कषायाश्चत्वारः, सञ्ज्ञाश्चतस्रो, लेश्याः षड्, इन्द्रियाणि पञ्च, समुद्घाताः पञ्च,** वेदना-कषाय-मारणान्तिक-वैक्रिय-तैजससमुद्घातसम्भवात्। सञ्ज्ञिद्वारे **सञ्ज्ञिनोऽपि असञ्ज्ञिनोऽपि,** ते च नैरयिकवद् भावनीयाः, वेदद्वारे **स्त्रीवेदा अपि पुरुषवेदा अपि नो नपुंसकवेदाः,** पर्याप्तिद्वारं दृष्टिद्वारं दर्शनद्वारं च नैरयिकवत्। ज्ञानद्वारे **ज्ञानिनोऽपि अज्ञानिनोऽपि** चेति विकल्पोऽसञ्ज्ञिमध्यः, तत्र **ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः,** तद्यथा-आभिनिबोधिकज्ञानिनः, श्रुतज्ञानिनोऽवधिज्ञानिनश्च, तत्र **येऽज्ञानिनस्ते** सन्त्येकका ये द्व्यज्ञानिनः सन्त्येकका ये त्र्यज्ञानिनः, तत्र ये द्व्यज्ञानिनस्ते नियमान्मत्यज्ञानिनः श्रुताज्ञानिनः, ये त्र्यज्ञानिनस्ते नियमान्मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, अयं च द्व्यज्ञानिनस्त्र्यज्ञानिनो वेति विकल्पः असञ्ज्ञिमध्याद् ये उत्पद्यन्ते तान् प्रति द्रष्टव्यः, स च नैरयिकवद् भावनीयः। उपयोगाहारद्वाराणि नैरयिकवत्, उपपातः सञ्ज्ञ्यसञ्ज्ञिपञ्चेन्द्रिय-**तिर्यग्गर्भजमनुष्येभ्यो** न शेषेभ्यः। **स्थितिर्जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि,** समुद्घातमधिकृत्य मरणचिन्तायां समवहता अपि म्रियन्तेऽसमवहता अपि। च्यवनद्वारेऽनन्तरमुद्वृत्य पृथिव्यम्बुवनस्पतिकायिकगर्भव्युत्क्रान्तिकसङ्ख्यातवर्षायुष्कतिर्यक्पञ्चेन्द्रियमनुष्येषु गच्छन्ति न शेषजीवस्थानेषु, अत एव गत्यागतिद्वारे **द्व्यागतिका द्विगतिकाः,** तिर्यग्मनुष्यगत्यपेक्षया, **'परीत्ताः'**

---

१. →← चिह्नद्वयमध्यवर्तिपाठस्थाने जे. मध्ये इत्थं - आहरो जहा नेरइयाणं ठिती वि । तेणं भंते ! जीवा मारणंतियस० समो० असमोह० दोवि अणंतदव्वा तेउ वाउ विगलिंदिय संमुच्छिमवज्जेहिं णेरइयवज्जे देववज्जे सेसेवि असंखाउवज्जे पज्जत्तएसु उव० तेणं भंते । जीवा कति० दुआगतीया दुगतीया परि असंखे० पसत्थे ओसण्णकारणं वण्णतो हालिद्द-सुक्किला गं० सुब्भि रसतो अंब-मधुराइं फास-मउय-लहुय-णिद्धुण्हाणि जाव आहारमाहारेंति उववातो जहा णेरतियाणं ठिती वि पण्णत्ता समणाउसो ! सेत्तं देवा सेत्तं तसा ।। **२. प्रज्ञापनासूत्रे द्रष्टव्यम् ।।**

प्रत्येकशरीरिणोऽसङ्ख्येयाः **प्रज्ञप्ताः** हे श्रमण! हे आयुष्मन्!, उपसंहारमाह-**'से तं देवा'**, सर्वोपसंहारमाह-**'से तं पंचेंदिया, से तं ओराला तसा पाणा'**, सुगमम्।। १३६।।

सम्प्रति स्थावरभावस्य त्रसभावस्य च भवस्थितिकालमानप्रतिपादनार्थमाह-

(१३७) थावरस्स णं भंते! केवतियं कालं ठिती पण्णत्ता? गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं ठिती पण्णत्ता।। १३७।।

'थावरस्स णं भंते' इत्यादि, **जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिवर्षसहस्राणि,** एतच्च पृथिवीकायमधिकृत्यावसातव्यम्, अन्यस्य स्थावरकायस्योत्कर्षत एतावत्या भवस्थितेरभावात्।।१३८।।

(१३८) तसस्स णं भंते! केवतियं कालं ठिती पण्णत्ता? गोयमा! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं तेत्तीसं सागरोवमाइं ठिती पण्णत्ता।। १३८।।

त्रसकायस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, एतच्च देव-नारकापेक्षया द्रष्टव्यम्, अन्यस्य त्रसकायस्योत्कर्षत एतावत्प्रमाणाया भवस्थितेरसम्भवात्।। १३८।।

सम्प्रत्येतयोरेव कायस्थितिकालमानमाह-

(१३९) थावरे णं भंते! थावरत्ति कालतो केवच्चिरं होति?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं अणंताओ उस्सप्पिणिओ ओसप्पिणीओ कालतो, खेत्ततो अणंता लोया असंखेज्जा पुग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जतिभागो।। १३९ ।।

'थावरे णं भंते' इत्यादि, स्थावरे **'णम्'** इति वाक्यालङ्कारे **'स्थावर इति'** स्थावर इत्यनेन रूपेण स्थावरत्वेनेति भावः, **कालतः कियच्चिरं भवति?,** भगवानाह-गौतम! **जघन्येनान्तर्मुहूर्त्त-मुत्कर्षतोऽनन्तं कालं,** तमेवानन्तं कालं काल-क्षेत्राभ्यां निरूपयति-**अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽनन्ता लोकाः,** किमुक्तं भवति? अनन्तलोकेषु यावन्त आकाशप्रदेशास्तेषां प्रतिसमयमेकैकापहारेण यावत्योऽनन्ता अवसर्पिण्युत्सर्पिण्यो भवन्ति तावत्य इति, एतासामेव पुद्गलपरावर्त्ततो मानमाह-**असङ्ख्येयाः पुद्गलपरावर्त्ताः,** असङ्ख्येयेषु पुद्गलपरावर्तेषु क्षेत्रत इति पदसांनिध्यात्क्षेत्रपुद्गलपरावर्त्तेषु यावत्यः संभवन्ति अनन्ता उत्सर्पिण्यवसर्पिण्यस्तावत्य इति भावः,

---

१. 'ता. प्रतौ १३७,१३८ सूत्रे नैव विद्येते । कखगट P S आदर्शेषु अतः १४१ सूत्रपर्यन्तं त्रससूत्रं पूर्वं विद्यते, तदनन्तरं च स्थावरसूत्रमस्ति'। इति L पृ.२३६ टि.११।।

इहासङ्ख्येयमसङ्ख्येयभेदात्मकमतः पुद्गलपरावर्त्तगतमसङ्ख्येयत्वं निर्द्धारयति-**'ते ण'**मित्यादि, ते णमिति वाक्यालङ्कारे **पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः,** आवलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा इत्यर्थः, एतच्च वनस्पतिकायस्थितिमङ्गीकृत्य वेदितव्यं, न पृथिव्यम्बुकायस्थितिव्यपेक्षया, तयोः कायस्थितेरुत्कर्षतोऽप्यसङ्ख्येयोत्सर्पिण्यवसर्पिणीप्रमाणत्वात्, तथा चोक्तं **प्रज्ञापनायाम्-"पुढविक्काइए णं भंते! पुढविक्काइयत्ति कालओ केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तमुक्कोसेणं असंखिज्जं कालं असंखिज्जाओ उस्सप्पिणिअवसप्पिणीओ कालओ, खेत्तओ असंखिज्जा लोगा, एवं आउक्काएवि'** [सू.१२८६-७] इति, या तु वनस्पतिकायस्थितिः सा यथोक्तप्रमाणा तत्रोक्ता **"वणस्सइकाइए णं भंते! वणस्सइकायत्ति कालओ कियच्चिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं अणंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खित्तओ अणंता लोगा असंखिज्जा पुग्गलपरियट्टा आवलियाए असंखिज्जइभागो"** [प्रज्ञा.सू.१२८८] इति। एषोऽपि च वनस्पतिकायस्थितिकालः सांव्यवहारिकजीवानधिकृत्य प्रोच्यते, असांव्यवहारिकजीवानां तु कायस्थितिरनादिरवसेया, तथा चोक्तं **"विशेषणवत्याम्-"**

"अंत्थि अणंता जीवा जेहिं न पत्तो तसाइपरिणामो।
तेवि अणंताणंता निगोयवासं अणुवसंति।।१।।" [विशेषणवति गा. ५३]

साऽपि तेषामसांव्यवहारिकजीवानामनादिः कायस्थितिः केषाञ्चिदनादिरपर्यवसाना, ये न जातुचिदसांव्यवहारिकराशेरुद्वृत्य सांव्यवहारिकराशौ निपतिष्यन्ति, केषाञ्चिदनादिः सपर्यवसाना, ये असांव्यवहारिकराशेरुद्वृत्य सांव्यवहारिकराशौ निपतिष्यन्ति। अथ किमसांव्यवहारिकराशेर्विनिर्गत्य सांव्यवहारिकराशावागच्छन्ति? येनैवं प्ररूपणा क्रियते, उच्यते, आगच्छन्ति, कथमवसीयते? इति चेदुच्यते-पूर्वाचार्योपदेशात्, तथा चाह- दुःषमान्धकारनिमग्नजिनप्रवचनप्रदीपो भगवान् **"जिनभद्रगणिः"** क्षमाश्रमणो **"विशेषणवत्याम्-"**

"सिज्झंति जत्तिया किर इह, संववहारजीवरासिमज्झाओ।
इंति अणाइवणस्सइरासीओ तत्तिया तंमि।।१।।" [विशेषणवति गा. ६०]

इति कृतं प्रसङ्गेन।। १३९ ।। सम्प्रति त्रसकायस्य कायस्थितिमानमाह-

---

१. **सन्त्यनन्ता जीवा यैर्न प्राप्तस्त्रसादिपरिणामः । तेऽप्यनन्तानन्ता निगोदवासमनुभवन्ति ।। १ ।।**

२. लब्धो - **इति विशेषणवत्याम् ।।**

३. **सिध्यन्ति यावन्तः किलेह संव्यवहारराशिमध्यात् । आयान्ति अनादिवनस्पतिराशेः तावन्तस्तस्मिन् ।।१।।**

४. ० मज्झा J **विशेषणवत्यां नास्ति ।।**

(१४०) तसे णं भंते! तसत्ति कालतो केवच्चिरं होति?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं-असंखेज्जाओ उस्सप्पिणीओ ओसप्पिणीओ कालतो, खेत्ततो असंखेज्जा लोगा।।१४०।।

'तसे णं भंते' इत्यादि, **'तसे ण'**मिति पूर्ववत् **'त्रस इति'** त्रस इत्यनेन पर्यायेण **कालतः 'कियच्चिरं'** कियन्तं कालं यावद् **भवति**?, भगवानाह–**गौतम! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालम्,** एनमेवासङ्ख्येयं काल-क्षेत्राभ्यां निरूपयति–**'असंखिज्जाओ'** इत्यादि, असङ्ख्येया **उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोका** असङ्ख्येयेषु लोकेषु यावन्त आकाशप्रदेशास्तेषां प्रतिसमयमेकैकापहारे यावत्योऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्य इति भावः, इयं चैतावती कायस्थितिर्गतित्रसं तेजस्कायिकं वायुकायिकं चाधिकृत्यावसेया न तु लब्धित्रसं, लब्धित्रसस्य कायस्थितेरुत्कर्षतोऽपि कतिपयवर्षाधिकसागरोपमसहस्रद्वयप्रमाणत्वात्, तथा चोक्तं प्रज्ञापनायाम्-**"तसकाए णं भंते! तसकायत्ति कालतो कियच्चिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं'** [प्रज्ञा. सू. १२८९] तथा **'तेउक्काइए णं भंते! तेउक्काइएत्ति कालतो केवच्चिरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ असंखेज्जा लोगा, एवं वाउक्काइयावि"**[प्रज्ञा. सू. १२८६-७] इति।।१४०।। सम्प्रति स्थावरत्वस्यान्तरं विचिन्तयिषुराह–

(१४१) थावरस्स णं भंते! केवतिकालं अंतरं होति?, जहा तससंचिट्ठणाए।। १४१।।

'थावरस्स णं भंते! इत्यादि सुगमं, नवरमसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, इत्येतावत्प्रमाणमन्तरं तेजस्कायिक-वायुकायिकमध्यगमनेनावसातव्यम्, अन्यत्र गतावेतावत्प्रमाणस्यान्तरस्यासम्भवात्।। १४१ ।।

(१४२) तसस्स णं भंते! केवतिकालं अंतरं होति?, जहण्णेणं[1] अंतोमुहुत्तं उक्कोसेणं वणस्सतिकालो।। १४२ ।।

'तसस्स णं भंते! अंतर' मित्यादि सुगमं, नवरम् **'उक्कोसेणं वणस्सतिकालो'** इति, उत्कर्षतो वनस्पतिकालो वक्तव्यः, स चैवम्–**"उक्कोसेणं अणंतमणंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ**

---

१. जहण्णेणं - **मु. नास्ति** ।।

अणंता लोगा, असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो" [प्रज्ञा. १२८८] इति, एतावत्प्रमाणं चान्तरं वनस्पतिकायमध्यगमनेन प्रतिपत्तव्यम्, अन्यत्र गतावेतावतोऽन्तरस्यालभ्यमानत्वात्।। १४२ ।। सम्प्रत्यल्पबहुत्वमाह–

(१४३) एएसि णं भंते! [जीवाणं] तसाणं थावराण य कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा तसा थावरा अणंतगुणा, से तं दुविधा संसारसमावण्णगा जीवा पण्णत्ता।। १४३।। दुविहपडिवत्ती समत्ता ।।

'एएसि णं भंते ! जीवाणं तसाणं थावराण य' इत्यादि, एतेषां भदन्त! जीवानां त्रसानां स्थावराणां च मध्ये **कतरे कतरेभ्योऽल्पा वा बहवो वा** कतरे कतरैस्**तुल्या वा?**, अत्र सूत्रे विभक्तिपरिणामेन तृतीया व्याख्येया, तथा कतरे कतरेभ्यो [ऽल्पा बहुकास्तुल्या] **विशेषाधिका वा?**, भगवानाह–**गौतम! सर्वस्तोकास्त्रसाः,** असङ्ख्यातत्वमात्रप्रमाणत्वात्, **स्थावरा अनन्तगुणाः,** अजघन्योत्कृष्टानन्तानन्तसङ्ख्यापरिमाणत्वात्, उपसंहारमाह–**'से तं दुविहा संसारसमावन्ना जीवा'** इति।। १४३।।

इति श्रीमलयगिरिविरचितायां जीवाजीवाभिगमटीकायां द्विविधा प्रतिपत्तिः समाप्ता।।

अथ त्रिविधाख्या द्वितीया प्रतिपत्तिः

तदेवमुक्ता द्विविधा प्रतिपत्तिः, सम्प्रति त्रिविधा प्रतिपत्तिरारभ्यते, तत्र चेदमादिसूत्रम्–

(१) तत्थ जे ते एवमाहंसु तिविधा संसारसमावण्णगा जीवा पण्णत्ता ते एवमाहंसु, तंजहा-इत्थि पुरिसा णपुंसका ।।१।।

'तत्थ जे ते एवमाहंसु' इत्यादि, **'तत्र'** तेषु नवसु प्रतिपत्तिषु मध्ये ये आचार्या एवमाख्यातवन्तः--**त्रिविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्त एवमाख्यातवन्तः, तद्यथा-स्त्रियः पुरुषा नपुंसकानि,** इह स्त्र्यादिवेदोदयाद् योन्यादिसङ्गताः स्त्र्यादयो गृह्यन्ते, तथा चोक्तम्–

"योनिर्मृदुत्वमस्थैर्यं, मुग्धताऽबलता स्तनौ।
पुंस्कामितेति लिङ्गानि, सप्त स्त्रीत्वे प्रचक्षते।।१।।
मेहनं खरता दार्ढ्यं, शौण्डीर्यं श्मश्रु धृष्टता।
स्त्रीकामितेति लिङ्गानि, सप्त पुंस्त्वे प्रचक्षते।।२।।
स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम्।
नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम्।।३।।"

तत्र 'यथोद्देशं निर्देश' इति स्त्रीवक्तव्यतामाह–

(२) से किं तं इत्थीओ?, २ तिविधाओ पण्णत्ता, तंजहा-तिरिक्खजोणित्थीओ मणुस्सित्थीओ देवित्थीओ। (३) से किं तं तिरिक्खजोणित्थीओ?, २ तिविधाओ पण्णत्ताओ, तंजहा-जलयरीओ थलयरीओ, खहयरीओ।(४) से किं तं जलयरीओ?,

२ पंचविधाओ पण्णत्ताओ, तंजहा-मच्छीओ जाव[1] सुंसुमारीओ से तं जलयरीओ। (५) से किं तं थलयरीओ?, २ दुविधाओ पण्णत्ताओ, तंजहा-चउप्पदीओ य परिसप्पीओ य। (६) से किं तं चउप्पदीओ?, २ चउव्विधाओ पण्णत्ताओ, तंजहा-एगखुरीओ जाव[2] सणप्फईओ। [से तं चउप्पयथलयरतिरिक्खजोणित्थीओ] (७) से किं तं परिसप्पीओ?, २ दुविहा पण्णत्ताओ, तंजहा-उरपरिसप्पीओ[3] य भुजपरिसप्पीओ य। (८) से किं तं उरपरिसप्पीओ?, २ तिविधाओ पण्णत्ताओ, तंजहा-अहीओ अयगरीओ महोरगीओ, से तं उरपरिसप्पीओ। (९) से किं तं भुयपरिसप्पीओ?, २ अणेगविधाओ पण्णत्ताओ, तंजहा-गोहीओ[4] णउलीओ सेधाओ सल्लीओ[5] सरडीओ सरंधीओ भावाओ[6] खाराओ[7] पवलाइयाओ चउप्पइयाओ मूसियाओ मुगुसियाओ[8] घरोलियाओ गोव्हियाओ, जाहियाओ छिरवि[9] रालियाओ, से तं भुयपरिसप्पीओ। (१०) से किं तं खहयरीओ?, २ चउव्विधाओ पण्णत्ताओ, तंजहा-चम्मपक्खीओ जाव[10] से तं खहयरीओ, से तं तिरिक्खजोणिओ।। २-१० ।।

'से किं त'मित्यादि, **अथ कास्ताः स्त्रियः?**, सूरिराह-**स्त्रियस्त्रिविधाः प्रज्ञप्ताः, तद्यथा-तिर्यग्योनिस्त्रियो मनुष्यस्त्रियो देवस्त्रियश्च।** 'से किं त'मित्यादि, **तिर्यग्योनिस्त्रियस्त्रिविधाः, तद्यथा-जलचर्यः स्थलचर्यः खचर्यश्च**।। २-१०।।

(११) से किं तं मणुस्सित्थियाओ?, २ तिविधाओ पण्णत्ताओ, तंजहा-कम्मभूमियाओ अकम्मभूमियाओ अंतरदीवियाओ। (१२) से किं तं अंतरदीवियाओ?, २ अट्ठावीसतिविधाओ पण्णत्ताओ, तंजहा-एगूरूइयाओ आभासियाओ

---

१. द्र. सूत्रे १-९९ ।। २. द्र. १-१०३ सूत्रे ।। ३. ०सप्पीणिओ - S **एवमग्रेऽपि**।। ४. सेरडीओ सेरंधीओ गोहीओ-**मु.**। सेरडीओ सेरंधीओ - SPL **नास्ति** ।। ५. सण्णाओ सरडीओ सेरंधीओ - **मु.** ।। ६. साराओ खाराओ **प०** L। सावाओ खाराओ SP **कख** । भावाओ वासाओ खाराओ **-ट**।। ७. पवण्णाइयाओ-**मु.**। पयलाइया - १/११२ वृत्तौ ।। ८. मुगुसीओ-**मु०** । मंगु० प्राज्ञापना सू.।। ९. जोव्हियाओ-**मु.** ।। १०. बिरचिरा० **मु.**। थिरिविरा० S।। ११. **द्रष्टव्यं १-११३-११६ सूत्रे** ।।

जाव[1] सुद्धदंताओ, से तं अंतरदी०। (१३) से किं तं अकम्मभूमियाओ?, २ तीसतिविधाओ पण्णत्ताओ, तंजहा-पंचसु हेमवएसु पंचसु एरण्णवएसु पंचसु हरिवासेसु[2] पंचसु रम्मगवासेसु पंचसु देवकुरासु पंचसु उत्तरकुरासु, से तं अकम्म०। (१४) से किं तं कम्मभूमिया?, २ पण्णरसविधाओ पण्णत्ताओ, तंजहा-पंचसु भरहेसु पंचसु एरवएसु पंचसु महाविदेहेसु, से तं कम्मभूमगमणुस्सीओ । से तं मणुस्सित्थीओ।। ११-१४ ।।

'से किं त'मित्यादि। मनुष्यस्त्रियोऽपि त्रिविधास्तद्यथा-कर्मभूमिका अकर्मभूमिका अन्तरद्वीपिकाश्च।।११-१४।।

(१५) से किं तं देवित्थियाओ?, २ चउव्विधाओ पण्णत्ताओ, तंजहा-भवणवासिदेवित्थियाओ वाणमंतरदेवित्थियाओ जोतिसियदेवित्थियाओ वेमाणियदेवित्थियाओ। (१६) से किं तं भवणवासिदेवित्थियाओ?, २ दसविधाओ पण्णत्ताओ, तंजहा-असुरकुमारभवणवासिदेवित्थियाओ जाव[3] थणितकुमारभवणवासिदेवित्थियाओ, से तं भवणवासिदेवित्थियाओ। (१७) से किं तं वाणमंतरदेवित्थियाओ?, २ अट्ठविधाओ पण्णत्ताओ, तंजहा-पिसायवाणमंतरदेवित्थियाओ जाव[4] से तं वाणमंतरदेवित्थियाओ। (१८) से किं तं जोतिसियदेवित्थियाओ?, २ पंचविधाओ पण्णत्ताओ, तंजहा-चंदविमाणजोतिसियदेवित्थियाओ सूर० गह० नक्खत्त० ताराविमाणजोतिसियदेवित्थियाओ। से तं जोतिसियदेवित्थियाओ। (१९) से किं तं वेमाणियदेवित्थियाओ?, २ दुविहाओ पण्णत्ताओ, तंजहा-सोहम्मकप्पवेमाणियदेवित्थियाओ ईसाणकप्पवेमाणियदेवित्थियाओ। से तं वेमाणियदेवित्थियाओ।। १५-१९।।

'से किं त'मित्यादि, देवस्त्रियश्चतुर्विधास्तद्यथा-भवनवासिन्यो व्यन्तर्यो ज्योतिष्क्यो वैमानिक्यश्च।।१५-१९।।

१. द्रष्टव्यं प्रज्ञापनासूत्रे १/८६।। २. L। हरिवंसेसु मु. हरिवरिसेसु - S।। ३. तुला-प्रज्ञा. १/१३१ ।। ४. तुला -प्रज्ञा.२/४५।।

सम्प्रति स्त्रिया भवस्थितिमानप्रतिपादनार्थमाह–

(२०) इत्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! एगेणं आदेसेणं जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पण्णपन्नं पलिओवमाइं, एक्केणं आदेसेणं जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं णव पलिओवमाइं, एगेणं आदेसेणं जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं सत्त पलिओवमाइं, एगेणं आदेसेणं जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं पन्नासं पलिओवमाइं।। २०।।

'इत्थीणं भंते' इत्यादि, **स्त्रिया भदन्त! कियन्तं कालं स्थितिः प्रज्ञप्ता?,** भगवानाह–**गौतम! 'एकेनादेशेन'** आदेशशब्द इह प्रकारवाची **"आदेसो त्ति पगारो"** [ ] इति वचनात्, एकेन प्रकारेण, एकं प्रकारमधिकृत्येति भावार्थः, **जघन्येनान्तर्मुहूर्त्तम्,** एतत्तिर्यग्मनुष्यस्त्र्यपेक्षया द्रष्टव्यम्, अन्यत्रैतावतो जघन्यस्यासम्भवात्, **उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि,** एतदीशानकल्पापरिगृहीतदेव्यपेक्षम्। **तथैकेनादेशेन जघन्यतोऽन्तर्मुहूर्त्तम्** एतत्तथैवो**त्कर्षतो नव पल्योपमानि,** एतदीशानकल्प एव परिगृहीतदेव्यपेक्षम्। तथा **एकेनादेशेन जघन्यतोऽन्तर्मुहूर्त्तम्,** एतत्प्राग्वत्, **उत्कर्षतः सप्त पल्योपमानि,** एतत्सौधर्मकल्पे परिगृहीतदेवीरधिकृत्य। तथा **एकेनादेशेन [1]जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पञ्चाशत्पल्योपमानि,** [2]एतत्सौधर्मकल्प एवापरिगृहीतदेव्यपेक्षम्, उक्तञ्च **'सङ्ग्रहण्याम्-'**

"[3]सपरिग्गहेयराणं सोहम्मीसाण पलियसाहीयं।
उक्कोस सत्त पन्ना नव पणपन्ना य देवीणं।।१।।" [प्रवचनसारो-११४६]।।२०।।

तदेवं सामान्यतः स्त्रीणां जघन्यत उत्कर्षतश्च स्थितिमानमुक्तं, सम्प्रति तिर्यक्स्त्र्यादिभेदानधिकृत्याह–

(२१) तिरिक्खजोणित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गो० जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिण्णि पलितोवमाइं। (२२) जलयरतिरिक्खजोणित्थीणं भंते! केवइयं कालं ठिती पण्णत्ता?, गोयमा! जहन्नेणं अंतो० उक्को० पुव्वकोडी। (२३) चउप्पदथलयरतिरिक्खजोणित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गो० जहा

---

१. जघन्येनान्तर्मुहूर्त्तमित्येतद् तियग्मनुष्यस्त्र्यपेक्षं - हारि. टीका।। २. ईशानकल्पे अपरिगृहीतदेव्यपेक्षम् - हारि.टीका।। ३. परिगृहीतेतराणां सौधर्मेशानानां पल्योपमं साधिकम् । उत्कृष्टतः सप्तपञ्चाशत् नव पञ्चपञ्चाशच्च (पल्योपमानि) देवीनाम् ।।

तिरिक्खजोणित्थीओ। (२४) उरपरिसप्पथलयरतिरिक्खजोणित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता? गोयमा! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं[1] पुव्वकोडी। एवं भुयपरिसप्प०। (२५) एवं खहयरतिरिक्खित्थीणं जहन्नेणं अंतोमुहुत्त, उक्को० पलिओवमस्स असंखेज्जतिभागो।। (२६) मणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! खेत्तं पडुच्च जह० अंतो० उक्को० तिण्णि पलिओवमाइं, धम्मचरणं पडुच्च जह० अंतो० उक्कोसेणं देसूणा पुव्वकोडी।। २१-२६ ।।

'तिरिक्खजोणित्थियाणं भंते!' इत्यादि, **उत्कर्षतस्त्रीणि पल्योपमानि,** देवकुर्वादिषु चतुष्पदस्त्रीरधिकृत्य, **जलचरस्त्रीणामुत्कर्षतः पूर्वकोटी,** स्थलचरस्त्रीणां यथा औघिकी, त्रीणि पल्योपमानीत्यर्थः। **खचरीणामुत्कर्षतः पल्योपमासङ्ख्येयभागः, मनुष्यस्त्रीषु क्षेत्रं प्रतीत्य**-क्षेत्राश्रयणेनेतिभावः, **जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो** देवकुर्वादिषु भरतादिष्वपि एकान्तसुषमादिकाले **त्रीणि पल्योपमानि, 'धर्मचरणं'[2] चरणधर्मसेवनं प्रतीत्य जघन्येनान्तर्मुहूर्त्तम्,** एतच्च तद्भवस्थिताया एव परिणामवशतः प्रतिपातापेक्षया द्रष्टव्यं, चरणधर्मस्य मरणमन्तरेण सर्वस्तोकतयाऽप्येतावन्मात्र-कालावस्थानभावात्, तथाहि-काचित्स्त्री तथाविधक्षयोपशमभावतः सर्वविरतिं प्रतिपद्य तावन्मात्रक्षयोपशमभावादन्तर्मुहूर्त्तानन्तरं भूयोऽपि अविरतसम्यग्दृष्टित्वं मिथ्यात्वं वा प्रतिपद्यते इति, अथवा धर्मचरणमिह देशचरणं प्रतिपत्तव्यं न सर्वचरणं, देशचरणप्रतिपत्तिस्तु **जघन्यतोऽप्यान्तर्मुहूर्तिकी,** तस्या भङ्गबहुलत्वात्, अथोभयचरणसम्भवे किमर्थमिह देशचरणं परिगृह्यते?, उच्यते, देशचरणपूर्वकं प्रायः सर्वचरणमिति ख्यापनार्थम्, अत एवोक्तं वृद्धैः-

"[3]सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ।
चरणोवसमखयाणं सागरसंखंतरा होंति।।१।।" [प्रवचन सारो. १३८४]

एवं **'अप्परिवडिए'** इत्यादि, **उत्कर्षतो देशोना पूर्वकोटी,** अष्टसांवत्सरिक्याश्चरणधर्मप्राप्तेस्तदूर्ध्वं चरमान्तर्मुहूर्त्तं यावदप्रतिपतितपरिणामभावात्, पूर्वपरिमाणं चेदम्-

---

१. उक्कोसं -मु. ।। २. PS । धर्मचरणासे० J। मोऽपिचरणधर्म से० मु.।। ३. **सम्यक्त्वे तु लब्धे पल्योपमपृथक्त्वेन श्रावको भवति । चारित्रमोहोपशमक्षयाणां सागराः सङ्ख्याता अन्तरं भवति ।। १ ।।**

"पुव्वस्स उ परिमाणं सयरिं खलु होंति कोडिलक्खाओ।

छप्पण्णं च सहस्सा बोद्धव्वा वासकोडीणं।।१।।[७०५६०००००००००][प्र.सा.१३८७] ।।२१-२६।।

सम्प्रति कर्मभूमिकादिविशेषस्त्रीणां वक्तव्यतामाह–

(२७) कम्मभूमियमणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! खित्तं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि पलिओवमाइं । धम्मचरणं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं देसूणा पुव्वकोडी।। २७ ।।

'कम्मभूमिगमणुस्सित्थियाण' मित्यादि, अक्षरगमनिका सुगमा, भावार्थस्त्वयम्–**कर्मभूमिकमनुष्यस्त्रीणां क्षेत्रं**–कर्मभूमिकसामान्यलक्षणमधिकृत्य **जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि,** तानि च भरतैरावतेषु सुषमसुषमालक्षणेऽरके वेदितव्यानि, **धर्मचरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी,** भावना चात्र प्रागिव द्रष्टव्या, एवमुत्तरसूत्रद्वयेऽपि।। २७ ।।

अत्रैव विशेषचिन्तां चिकीर्षुराह–

(२८) भरहेरवयकम्मभूमिगमणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता? गोयमा! खेत्तं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि पलिओवमाइं । धम्मचरणं पडुच्च जहन्नेणं अंतोमु० उक्कोसेणं देसूणा पुव्वकोडी। (२९) पुव्वविदेहअवरविदेहकम्मभूमिगमणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! खेत्तं पडुच्च जहन्नेणं अंतो० उक्कोसेणं पुव्वकोडी। धम्मचरणं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं देसूणा पुव्वकोडी। (३०) अकम्मभूमिगमणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमं पलिओवमस्स असंखेज्जतिभागऊणगं, उक्कोसेणं तिन्नि पलिओवमाइं । संहरणं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं देसूणा पुव्वकोडी।। २८-३० ।।

'भरहेरवयवासकम्मभूमिगे' त्यादि सुगमं, नवरं **भरतैरावतेषु त्रीणि पल्योपमानि** सुषमसुषमायाम्, **पूर्वविदेहापरविदेहेषु क्षेत्रतः पूर्वकोटी,** तत ऊर्ध्वं तत्र तथाक्षेत्रस्वाभाव्यादायुषोऽसम्भवात्, **अकम्मभूमि**गेत्यादि, **जन्म प्रतीत्येति**-अकर्मभूमिषूत्पत्तिमाश्रित्य **जघन्यतो देशोनं पल्योपमं,**

तच्चाष्टभागाद्यूनमपि देशोनं भवति ततो विशेषस्थापनायाह–**पल्योपमस्यासङ्ख्येयभागेनोनम्,** एतच्च हैमवतहैरण्यवतक्षेत्रापेक्षया द्रष्टव्यं, तत्र जघन्यतः स्थितेरेतावत्प्रमाणायाः सम्भवात्, **उत्कर्षतस्त्रीणि पल्योपमानि,** तानि च देवकुरूत्तरकुर्वपेक्षया, **'संहरणं पडुच्चे'**त्यादि, संहरणं नाम कर्मभूमिजायाः स्त्रियोऽकर्मभूमिषु नयनं **'तत्प्रतीत्य'** तदाश्रित्य **जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी,** इयमत्र भावना–इह कर्मभूमिकाऽप्यकर्मभूमिषु संहृता अकर्मभूमिकेति व्यवह्रियते, तत्क्षेत्रसम्बन्धभावात्, यथा लोके कश्चिन्मगधादिदेशात्सुराष्ट्रान् प्रति प्रस्थितो गिरिनगरेषु निवासं कल्पयितुकामः सुराष्ट्रपर्यन्तग्रामप्राप्तः सन् समुत्पद्यमानेषु तथाविधेषु प्रयोजनेषु सौराष्ट्र इति व्यवह्रियते, तद्वदधिकृताऽपि, तत्र च संहृता सती काचिदन्तर्मुहूर्त्तं जीवति ततोऽपि वा भूयोऽपि संह्रियते, काचित्पूर्वकोट्यायुष्का यावज्जीवमपि तत्रावतिष्ठते, ततो जघन्यतोऽन्तर्मुहूर्त्तमुक्तमुत्कर्षतो देशोना पूर्वकोटीति, आह–भरतैरावतान्यपि कर्मभूमौ वर्त्तन्ते तत्र चैकान्तसुषमादौ त्रीण्यपि पल्योपमानि स्थितिरस्या भवति संहरणं च सम्भवति तत्कथं देशोना पूर्वकोटी भण्यते? इति, अत्रोच्यते, कर्मकालविवक्षयाऽभिधानात्, तस्य चैतावन्मात्रत्वादिति।। २८-३० ।।

(३१) हेमवएरण्णवए जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमं पलिओवमस्स असंखेज्जइभागेण ऊणगं, उक्कोसेणं[1] पलिओवमं। संहरणं पडुच्च जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं देसूणा पुव्वकोडी। (३२) हरिवासरम्मगवासअकम्मभूमगमणुस्सित्थीणं भंते! केवतियं कालं ठिई पण्णत्ता?, गोयमा! जम्मणं पडुच्च जहन्नेणं देसूणाइं दो पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणयाइं, उक्को० दो पलिओवमाइं। संहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी।(३३) देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सित्थीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जम्मणं पडुच्च जहन्नेणं देसूणाइं तिण्णि पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणगाइं, उक्को० तिन्नि पलिओवमाइं, संहरणं पडुच्च जहन्नेणं अंतोमुहु० उक्को० देसूणा पुव्वकोडी।। ३१-३३।।

हैमवतहैरण्यवताकर्मभूमिकमनुष्यस्त्रीणां जन्मतो जघन्येन देशोनं पल्योपमं पल्योपमास-

---

१. SPL । उक्कोसेणं - **मु. नास्ति** ।।

ङ्ख्येयभागेन न्यूनमुत्कर्षतः परिपूर्णं पल्योपमं, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भावना प्रागिव। एवं **'हरिवासरम्मए'** इत्याद्यपि सूत्रत्रयं भावनीयं, नवरं **हरिवर्षरम्यकयोर्जन्मतो जघन्येन द्वे पल्योपमे पल्योपमासङ्ख्येयभागन्यूने उत्कर्षतः** परिपूर्णे **द्वे पल्योपमे। देवकुरूत्तरकुरुषु जन्मतो जघन्येन त्रीणि पल्योपमानि पल्योपमासङ्ख्येयभागहीनानि उत्कर्षतः** परिपूर्णानि **त्रीणि पल्योपमानि, ।।३१-३३।।**

(३४) अंतरदीवगअकम्मभूमगमणुस्सित्थीणं भंते! केवतिकालं ठिती पण्णत्ता?, गोयमा! जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमस्स असंखेज्जइभागं पलिओवमस्स असंखेज्जतिभागेण ऊणयं, उक्को० पलिओवमस्स असंखेज्जतिभागं। संहरणं पडुच्च जहन्नेणं अंतोमु० उक्को० देसूणा पुव्वकोडी।। ३४ ।।

अन्तरद्वीपेषु जन्मतो जघन्येन देशोनः पल्योपमासङ्ख्येयभागः, कियता[1] देशेनोनः पल्योपमासङ्ख्येयभाग? इति चेदत आह–**पल्योपमासङ्ख्येयभागेनोनः**, किमुक्तं भवति? उत्कृष्टपल्योपमासङ्ख्येयभागप्रमाणादायुषो जघन्यमायुः पल्योपमासङ्ख्येयभागन्यूनं, नवरमूनताहेतुः पल्योपमासङ्ख्येयो भागोऽतीव स्तोको द्रष्टव्यः, **संहरणमधिकृत्य** सर्वत्रापि **जघन्यत उत्कर्षतश्च** तावदेव प्रमाणम्।। ३४ ।। सम्प्रति देवस्त्रीवक्तव्यतामाह–

(३५) देवित्थीणं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! जहन्नेणं दसवाससहस्साइं, उक्कोसेणं पणपन्नं पलिओवमाइं। (३६) भवणवासिदेवित्थीणं भंते! [2]केवतियं कालं ठिती पण्णत्ता ? गोयमा ! जहन्नेणं दसवाससहस्साइं, उक्कोसेणं अद्धपंचमाइं पलिओवमाइं। (३७) एवं असुरकुमारभवणवासिदेवित्थियाएवि, नागकुमारभवणवासिदेवित्थियाएवि जहन्नेणं दसवाससहस्साइं, उक्कोसेणं देसूणाइं पलिओवमाइं। एवं सेसाणवि जाव थणियकुमारीणं। (३८) वाणमंतरीणं जहन्नेणं दसवाससहस्साइं, [3]उक्कोसं अद्धपलिओवमं। (३९)जोइसियदेवित्थीणं भंते!

---

१. कियता भागदेशेनोनः - J।। २. केवतियं कालं ठिती पण्णत्ता ? गोयमा ! - L **अस्ति मु.S नास्ति।।** ३. उक्कोसेणं - L ।।

केवइयं कालं ठिती पण्णत्ता?, गोयमा! जहण्णेणं अट्ठभागं पलिओवमं उक्कोसेणं अद्धपलिओवमं पण्णासाए वाससहस्सेहिं अब्भहियं (४०) चंदविमाणजोतिसियदेविंत्थियाए जहन्नेणं चउभागपलिओवमं उक्कोसेणं तं चेव ।। ३५-४०।।

'देवत्थियाणं भंते !' इत्यादि, अक्षरगमनिका सुगमा, तात्पर्यमात्रमुच्यते-**देवस्त्रीणां** सामान्यतो **जघन्यतः स्थितिर्दश वर्षसहस्राणि,** तानि च भवनपतिव्यन्तरीरधिकृत्य वेदितव्यानि, **उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि,** एतानि चेशानदेवीरधिकृत्य प्रतिपत्तव्यानि। विशेषचिन्तायां भवनवासिदेव्यः सामान्यतो दश वर्षसहस्राणि, उत्कर्षतोऽर्द्धपञ्चमानि-सार्द्धानि चत्वारि पल्योपमानि, एतानि च भवनवासिविशेषासुरकुमारदेवीरधिकृत्य, अत्रापि विशेषचिन्तायामसुरकुमारदेवीनां सामान्यतो जघन्येन दश वर्षसहस्राणि उत्कर्षतोऽर्द्धपञ्चमानि पल्योपमानि, **नागकुमारभवनवासिदेवस्त्रीणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतो देशोनं पल्योपमम्, एवं शेषाणां यावत्स्तनितकुमारीणां, व्यन्तरीणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतोऽर्द्धं पल्योपमं, ज्योतिषस्त्रीणां जघन्येनाष्टभागं पल्योपममुत्कर्षतोऽर्द्धं पल्योपमं पञ्चाशता वर्षसहस्रैरभ्यधिकम्,** अत्रापि विशेषचिन्तायां **चन्द्रविमानवासिज्योतिषस्त्रीणां जघन्यतश्चतुर्भागमात्रं पल्योपममुत्कर्षतो**ऽर्द्धपल्योपमं पञ्चाशता वर्षसहस्रैरधिकम्।। ३५-४०।।

(४१) सूरविमाणजोतिसियदेविंत्थियाए[२] जहन्नेणं चउभागपलिओवमं, उक्कोसेणं अद्धपलिओवमं पंचहिं वाससएहिमब्भहियं। (४२) गहविमाणजोतिसियदेवित्थीणं जहण्णेणं चउभागपलिओवमं, उक्कोसेणं अद्धपलिओवमं । (४३) णक्खत्तविमाणजोतिसियदेवित्थीणं जहण्णेणं चउभागपलिओवमं, उक्कोसेणं चउभागपलिओवमं साइरेगं। (४४) तारविमाणजोतिसियदेविंत्थियाए[३] जहन्नेणं अट्ठभागं पलिओवमं उक्को० सातिरेगं अट्ठभागपलिओवमं।। ४१-४४।।

सूर्यविमानवासिज्योतिष्कदेवीनां जघन्यतश्चतुर्भागमात्रं पल्योपममुत्कर्षतोऽर्द्धपल्योपमं वर्षशतपञ्चकाभ्यधिकं, ग्रहविमानवासिज्योतिष्कदेवीनां जघन्यतश्चतुर्भागमात्रं पल्योपमं

---

४ S कखगटमु.। ०वित्थीणं - L ।। २-३. S कखगटमु.। ०वित्थीणं - L।।

उत्कर्षतोऽर्द्धपल्योपमं, नक्षत्रविमानज्योतिष्कदेवीनां जघन्यतश्चतुर्थभागमात्रं पल्योपममुत्कर्षतः सातिरेकं चतुर्थभागमात्रं पल्योपमं, ताराविमानज्योतिष्कदेवीनां जघन्यतोऽष्टभागमात्रं पल्योपममुत्कर्षतस्तदेवाष्टभागमात्रं पल्योपमं सातिरेकम्।।। ४१- ४४ ।।

(४५) वेमाणियदेवित्थियाए[१] जहण्णेणं पलिओवमं, उक्कोसेणं पणपन्नं पलिओवमाइं। (४६) सोहम्मकप्पवेमाणियदेवित्थीणं भंते! केवतियं कालं ठिती प० ?, जहण्णेणं पलिओवमं उक्कोसेणं सत्त पलिओवमाइं। (४७) ईसाणदेवित्थीणं जहण्णेणं सातिरेगं पलिओवमं, उक्कोसेणं णव पलिओवमाइं।। ४५-४७।।

सामान्यतो वैमानिकदेवस्त्रीणां जघन्यतः पल्योपममुत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, विशेषचिन्तायां **सौधर्मकल्पवैमानिकदेवस्त्रीणां[२] जघन्यतः पल्योपममुत्कर्षतः सप्त पल्योपमानि[३],** अत्रापीदं स्थितिपरिमाणं परिगृहीतदेवीनामवगन्तव्यम्, अपरिगृहीतदेवीनां जघन्यतः पल्योपममुत्कर्षतः पञ्चाशत्पल्योपमानि। **ईशानकल्पवैमानिकदेवीनां जघन्यतः सातिरेकं पल्योपममुत्कर्षतो नव पल्योपमानि,** अत्रापीदं स्थितिपरिमाणं परिगृहीतदेवीनामवगन्तव्यम्, अपरिगृहीतदेवीनां जघन्यतः सातिरेकं पल्योपममुत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, एतच्च सूत्रं समस्तमपि क्वापि साक्षाद् दृश्यते क्वचिच्चैवमतिदेशः-"एवं देवीणं ठिई भाणियव्वा जहा **पण्णवणाए** जाव ईसाणदेवीण" मिति।। ४५-४७।।

सम्प्रति स्त्री नैरन्तर्येण स्त्रीत्वममुञ्चन्ती कियन्तं कालमवतिष्ठते? इति जिज्ञासायां सूत्रकृत्तत्कालापेक्षया ये पञ्चादेशाः प्रवर्त्तन्ते तानुपदर्शयितुमाह-

(४८) इत्थी णं भंते! इत्थित्ति कालतो केवच्चिरं होति?, गोयमा! एक्केणादेसेणं जहन्नेणं एक्कं समयं, उक्कोसं दसुत्तरं पलिओवमसयं पुव्वकोडिपुहुत्तमब्भहियं। एक्केणादेसेणं जहन्नेणं एक्कं समयं, उक्कोसेणं अट्ठारस पलिओवमाइं पुव्वकोडी-पुहुत्तमब्भहियाइं। एक्केणादेसेणं जहण्णेणं एक्कं समयं, उक्कोसेणं चउद्दस पलिओवमाइं

---

१. कखगटमु.। ०वित्थीणं-L।। १. ०वित्थीणं-L।। १. JPS । देवीनां - मु. ।। २.०नि एतच्च परिगृहीत० JPS।।

पुव्वकोडिपुहुत्तमब्भहियाइं। एक्केणादेसेणं जह० एक्कं समयं उक्को० पलिओवमसयं पुव्वकोडीपुहुत्तमब्भहियं। एक्केणादेसेणं जहण्णं एक्कं समयं उक्को० पलिओवमपुहुत्तं पुव्वकोडीपुहुत्तमब्भहियं।। ४८।।

'एगेण आएसेण' मित्यादि, **एकेनादेशेन जघन्यत एकं समयं** यावदवस्थान**मुत्कर्षतो दशोत्तरं पल्योपमशतं पूर्वकोटीपृथक्त्वाभ्यधिकम्,** एकं समयं कथम्? इति चेदुच्यते-काचिद् युवतिरुपशमश्रेण्यां वेदत्रयोपशमनादवेदकत्वमनुभूय ततः श्रेणेः प्रतिपतन्ती स्त्रीवेदोदयमेकं समयमनुभवति, ततो द्वितीये समये कालं कृत्वा देवेषूत्पद्यते तत्र च तस्याः पुंस्त्वमेव न स्त्रीत्वं, तत एवं जघन्यतः स्त्रीत्वं समयमात्रं, सम्प्रति पूर्वकोटिपृथक्त्वाभ्यधिकदशोत्तरपल्योपमशतभावना क्रियते-कश्चिज्जन्तुर्नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पञ्चषान् भवाननुभूय ईशाने कल्पे पञ्चपञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्व-परिगृहीतदेवीषु मध्ये देवीत्वेनोत्पद्यते, ततः स्वायुःक्षये तस्मात्स्थानाद् भूयोऽपि नारीषु तिरश्चीषु वा मध्ये पूर्वकोट्यायुष्षुरुत्पन्नस्ततो भूयोऽपि द्वितीयं वारमीशानदेवलोके पञ्चपञ्चाशत्पल्योपम-प्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोपजातस्ततः परमवश्यं वेदान्तरमवगच्छति, एवं **दशोत्तरं पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकं** प्राप्यते, अत्र पर आह-ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुत्पद्यते ततोऽधिकाऽपि स्त्रीवेदस्यावस्थितिर्लभ्यते, ततः किमित्येतावदेवोपदिष्टा?, तदयुक्तम्, अभिप्रायापरिज्ञानात्, तथाहि-न तावद्देवीभ्यश्च्युत्वाऽसङ्ख्येय-वर्षायुष्कासु स्त्रीषु मध्ये स्त्रीत्वेनोत्पद्यते, देवयोनेश्च्युतानामसङ्ख्येयवर्षायुष्केषु मध्ये उत्पादप्रतिषेधात्, नाप्यसङ्ख्येयवर्षायुष्का सती उत्कृष्टायुष्कासु देवीषु जायते, यत उक्तं **प्रज्ञापनामूलटीकायाम्-"जतो असंखेज्जवासाउया उक्कोसियं ठिइं न पावेइ"** [ ] इति, ततो यथोक्तप्रमाणैव स्त्रीवेदस्योत्कृष्टा-ऽवस्थितिरवाप्यते।

द्वितीयेनादेशेन **जघन्यत एकं समयमुत्कृष्टतोऽष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधि-कानि,** तत्र समयभावना सर्वत्रापि प्राग्वत्, अष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि एवं-नारीषु तिरश्चीषु वा पूर्वकोटीप्रमाणायुष्कासु मध्ये कश्चिज्जन्तुः पञ्चषान् भवाननुभूय पूर्वप्रकारेणेशान-देवलोके वारद्वयमुत्कृष्टस्थितिकासु देवीषु मध्ये समुत्पद्यमानो नियमतः परिगृहीतास्वेवोत्पद्यते नाऽपरिगृहीतासु, तत एवं द्वितीयादेशवादिमतेन स्त्रीवेदस्योत्कृष्टमवस्थानमष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वं च।

तृतीयेनादेशेन जघन्यत एकं समयमुत्कर्षतश्चतुर्दश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तानि चैवं-पूर्वप्रकारेण सौधर्मदेवलोके परिगृहीतदेवीषु सप्तपल्योपमप्रमाणोत्कृष्टायुष्कासु मध्ये वारद्वयं समुत्पद्यते [१]तत्र(त) एवं तृतीयादेशवादिमतेन स्त्रीवेदस्योत्कृष्टमवस्थानं चतुर्दश पल्योपमानि पूर्वकोटिपृथक्त्वं च। चतुर्थेनादेशेन **जघन्यत एकं समयमुत्कर्षतः पल्योपमशतं पूर्वकोटि-पृथक्त्वाभ्यधिकं,** कथम्? इति चेदुच्यते, नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु पञ्चषान् भवाननुभूय पूर्वप्रकारेण सौधर्मदेवलोके पञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोत्पद्यते, तत एवं चतुर्थादेशवादिमतेन पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकं भवति। पञ्चमेनादेशेन **जघन्यत एकं समयमुत्कर्षतः पल्योपमपृथक्त्वं पूर्वकोटिपृथक्त्वाभ्यधिकं,** तच्चैवं-नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये सप्त भवाननुभूयाष्टमभवे देवकुर्वादिषु त्रिपल्योपमस्थितिकासु स्त्रीषु मध्ये स्त्रीत्वेन समुत्पद्यते, ततो मृत्वा सौधर्मदेवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते, तदनन्तरं चावश्यं वेदान्तरमधिगच्छति, ततः पञ्चमादेशवादिमतेन स्त्रीवेदस्यावस्थानं पूर्वकोटि-पृथक्त्वाभ्यधिकं पल्योपमपृथक्त्वं, ते ह्येवमाहुर्नानाभवप्रमाणद्वारे-यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिन्त्यते तत इत्थमेतावदेव लभ्यते, नाधिकमन्यथा चेति।

अमीषां च पञ्चानामादेशानामन्यतमादेशसमीचीनतानिर्णयोऽतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धि-संपन्नैर्वा कर्तुं शक्यते, ते च सूत्रकृत्प्रतिपत्तिकाले नासीरन्निति सूत्रकृन्न निर्णयं कृतवानिति। तदेवं सामान्यतः स्त्री स्त्रीत्वं नैरन्तर्येणामुञ्चन्ती यावन्तं कालमवतिष्ठते तावत्कालप्रमाणमुक्तम्।।४८।। इदानीं तिर्यक्स्त्रियास्तिर्यक्स्त्रीत्वमजहत्याः कालमानं विचिन्तयिषुरिदमाह-

(४९) तिरिक्खजोणित्थी णं भंते! तिरिक्खजोणित्थित्ति कालओ केवच्चिरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडी-पुहुत्तमब्भहियाइं ।। ४९ ।।

'तिरिक्खजोणिइत्थिए णं भंते!' इत्यादि, **तिर्यक्स्त्री णं**मिति वाक्यालङ्कारे **भदन्त! तिर्यक्स्त्रीति कालतः कियच्चिरं भवति?,** भगवानाह-**गौतम! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि,** तत्रान्तर्मुहूर्त्तं कस्याश्चित्तावत्प्रमाणायुष्कतया तदनन्तरं मृत्वा वेदान्तराधिगमाद्विलक्षणमनुष्यभवान्तराधिगमाद्वा, कथमुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वा-

१. तत्र एवं -P। ते एवं -J। १. भवानन्व भू० P।

भ्यधिकानि? इति चेदुच्यते-इह नराणां तिरश्चां चोत्कर्षतोऽष्टौ भवाः प्राप्यन्ते नाधिकाः, **"नरतिरियाणं सत्तट्ठभवा"** [ ] इति वचनात्, तत्र सप्त भवाः सङ्ख्येयवर्षायुषोऽष्टमस्त्वसङ्ख्येयवर्षायुरेव, तथाहि-पर्याप्तमनुष्याः पर्याप्तसञ्ज्ञिपञ्चेन्द्रियतिर्यञ्चो वा निरन्तरं यथासङ्ख्यं सप्त पर्याप्तमनुष्यभवान् सप्त पर्याप्तसञ्ज्ञिपञ्चेन्द्रियतिर्यग्भवान् वाऽनुभूय यद्यष्टमे भवे भूयः पर्याप्तमनुष्याः पर्याप्तसञ्ज्ञि-पञ्चेन्द्रियतिर्यञ्चो वा समुत्पद्यन्ते ततो नियमादसङ्ख्येयवर्षायुष एव न सङ्ख्येयवर्षायुषः, असङ्ख्येय-वर्षायुषश्च मृत्वा नियमतो देवलोकेषूत्पद्यन्ते, ततो नवमोऽपि मनुष्यभवः सञ्ज्ञिपञ्चेन्द्रियतिर्यग्भवो वा निरन्तरं न लभ्यते, अत एव च पाश्चात्याः सप्त भवा निरन्तरं भवन्तः सङ्ख्येयवर्षायुष एवोपपद्यन्ते नैकोऽप्यसङ्ख्येयवर्षायुः, असङ्ख्येयवर्षायुर्भवानन्तरं भूयो मनुष्यभवस्य तिर्यग्भवस्य वाऽसम्भवात्, तत्र यदा उत्कर्षतस्तिर्यक्स्त्रीवेदसहिताः पाश्चात्याः सप्तापि भवा पूर्वकोट्यायुषो लभ्यन्ते अष्टमस्तु भवो देवकुर्वादिषु तदा भवन्त्युत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि तिर्यक्स्त्रीत्व-स्यावस्थानम्।। ४९ ।।

अत्रैव विशेषचिन्तां चिकीर्षुराह-

(५०) जलयरीए जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं पुव्वकोडिपुहुत्तं। (५१)चउप्पदथलयरतिरिक्खजो० जहा ओहिता[1] तिरिक्खि०, (५२) उरगपरिसप्पी-भुयगपरिसप्पित्थीणं जधा जलयरीणं, (५३) खहयरि० जहण्णेणं, अंतोमुहुत्तं, उक्को० पलिओवमस्स असंखेज्जतिभागं पुव्वकोडिपुहुत्तमब्भहियं।। ५०-५३ ।।

'जलयरीए' इत्यादि, **जलचर्याः** स्त्रिया जलचरस्त्रीत्वेन निरन्तरं भवन्त्या **जघन्यतो**ऽवस्थान-**मन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं,** सप्तपूर्वकोट्यायुर्भवानन्तरं जलचरस्त्रीणामवश्यं जलचरस्त्री-त्वच्युतिभावात्, **'चउप्पयथलयरीए जहा ओहियाए'** इति, चतुष्पदस्थलचरस्त्रिया यथा औघिक्यास्तिर्य-क्स्त्रिया उक्तं तथा द्रष्टव्यं, तच्चैवम्-जघन्यतोऽन्तर्मुहूर्त्तं तत ऊर्ध्वं तद्भावपरित्यागसम्भवात्, उत्कर्षत-स्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तानि च प्रागिव भावनीयानि। **उरःपरिसर्पस्थलचरस्त्रिया भुजपरिसर्पस्थलचरस्त्रियाश्च यथा जलचरस्त्रिया**स्तथा वक्तव्यं, तच्चैवं-जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं तच्च पूर्ववद् भावनीयम् **खचरस्त्रिया जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पल्योपमा-**

१. कखगटमु । ओहियाए- L ।।

सङ्ख्येयभागः पूर्वकोटिपृथक्त्वाभ्यधिक उत्कर्षतोऽवस्थानमानमिति।। तदेवमुक्तं तिर्यक्स्त्रियाः सामान्यतो विशेषतश्च अवस्थानमानम्, ।। ५१-५३।। सम्प्रति मनुष्यस्त्रिया आह–

(५४) मणुस्सित्थी णं भंते! कालओ केवच्चिरं होति?, गोयमा! खेत्तं पडुच्च जहण्णेणं अंतोमुहुत्तं, उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं। धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी।। ५४ ।।

'मणुस्सित्थियाए' इत्यादि, मनुष्यस्त्रियाः सामान्यतो यथा औधिक्यास्तिर्यक्स्त्रियाः, तच्चैवं- **जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि,** तानि च सामान्यतस्तिर्यक्स्त्रीवद् भावनीयानि। कर्मभूमकमनुष्यस्त्रियः **क्षेत्रं प्रतीत्य** सामान्यतः कर्मक्षेत्रमधिकृत्य **जघन्यतोऽन्तर्मुहूर्त्त,** तत ऊर्ध्वं तद्भावपरित्यागसम्भवात्, **उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि,** तत्र सप्त भवा महाविदेहेषु अष्टमो भवो भरतैरावतेष्वेकान्तसुषमादौ त्रिपल्योपमप्रमाण इति, **'धर्मचरणं प्रतीत्य'** चारित्रासेवनमाश्रित्य **जघन्येनैकं समयं,** सर्वविरतिपरिणामस्य तदावरणकर्मक्षयोपशमवैचित्र्यतः समयमेकं सम्भवात्, तत ऊर्ध्वं मरणतः प्रतिपातभावात्, **उत्कर्षतो देशोना पूर्वकोटी,** समग्रचरणकालस्योत्कर्षतोऽप्येतावन्मात्रप्रमाणत्वात्।। ५४ ।।

(५५) एवं कम्मभूमियावि भरहेरवयावि, णवरं खेत्तं पडुच्च जह० अंतोमुहुत्तं, उक्को० तिन्नि पलिओवमाइं देसूणपुव्वकोडीअब्भहियाइं। धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी।। ५५ ।।

भरतैरावतकर्मभूमकमनुष्यस्त्रियाः स्त्रीत्वं **'क्षेत्रं प्रतीत्य'** भरताद्येवाश्रित्य **जघन्येनान्तर्मुहूर्त्त** तच्च प्राग्वद् भावनीयम्, **उत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोट्याऽभ्यधिकानि,** तानि चैवं-पूर्वविदेहमनुष्यस्त्री अपरविदेहमनुष्यस्त्री वा पूर्वकोट्यायुष्का केनापि भरतादावेकान्तसुषमादौ संहृता, सा च यद्यपि महाविदेहक्षेत्रोत्पन्ना तथाऽपि प्रागुक्तमागधपुरुषदृष्टान्तबलेन भारत्यैरावतीया वेति व्यपदिश्यते, ततः सा भारत्यादिव्यपदेशं प्राप्ता पूर्वकोटिं जीवित्वा स्वायुःक्षयतस्तत्रैव भरतादावेकान्तसुषमाप्रारम्भे समुत्पन्ना, तत एवं देशोनपूर्वकोट्यभ्यधिकं पल्योपमत्रयमिति। **धर्मचरणं प्रतीत्य** कर्मभूमिजस्त्रिया इव भावनीयं, **जघन्यत एकं समयमुत्कर्षतो देशोनां पूर्वकोटीं** यावत् ।।५५ ।।

(५६) पुव्वविदेहअवरविदेहित्थी णं खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडीपुहुत्तं। धम्मचरणं पडुच्च जह० एक्कं समयं, उक्कोसेणं देसूणा पुव्वकोडी ।।५६।।

पूर्वविदेहापरविदेहकर्मभूमिजमनुष्यस्त्रियास्तु क्षेत्रमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तं, तच्च सुप्रतीतं, प्राग्भावितत्वात्, **उत्कर्षतः पूर्वकोटिपृथक्त्वं,** तत्रैव भूय उत्पत्त्या, **धर्मचरणं प्रतीत्य** समागतकर्म-भूमिजस्त्रिया इव वक्तव्यं, **जघन्यत एकं समयमुत्कर्षतो देशोनां पूर्वकोटिं** यावदिति भावार्थः।।५६।। उक्ता सामान्यतो विशेषतश्च कर्मभूमिकमनुष्यस्त्रीवक्तव्यता, साम्प्रत[म]कर्मभूमकमनुष्यस्त्रीवक्तव्यतां चिकीर्षुः प्रथमतः सामान्येनाह–

(५७) अकम्मभूमिकमणुस्सित्थी णं भंते! अकम्मभूम० कालओ केवच्चिरं होइ?, गोयमा! जम्मणं पडुच्च जह० देसूणं पलिओवमं पलिओवमस्स असंखेज्जति-भागेणं ऊणं, उक्को० तिण्णि पलिओवमाइं। संहरणं पडुच्च जह० अंतो० उक्कोसेणं तिन्नि पलिओवमाइं देसूणाए पुव्वकोडिए अब्भहियाइं।। ५७।।

'अकम्मभूमिगमणुस्सित्थी णं भंते!' इत्यादि, **अकर्मभूमकमनुष्यस्त्री, ण**मिति वाक्यालङ्कारे, **अकर्मभूमिकमनुष्यस्त्रीति कालतः कियच्चिरं भवति?,** भगवानाह–**गौतम! 'जन्म'** तत्रैव सम्भूतिलक्षणं **'प्रतीत्य'** आश्रित्य **जघन्येन पल्योपमं देशोनम्,** अष्टभागाद्यूनमपि देशोनं भवति ततो विशेषस्थापनायाह–**पल्योपमस्यासङ्ख्येयभागेनोनम्, उत्कर्षतस्त्रीणि पल्योपमानि, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्त**मन्तर्मुहूर्त्तायुःशेषायाः संहृतिभावात्, **उत्कर्षेण त्रीणि पल्योपमानि देशोनया पूर्वकोट्याऽभ्यधिकानि,** कथम्? इति चेदुच्यते–काचित्पूर्वविदेहमनुष्यस्त्री अपरविदेहमनुष्यस्त्री वा देशोनपूर्वकोट्यायुःसमन्विता देवकुर्वादौ संहृता, सा च पूर्वदृष्टान्तबलेन देवकुर्वादिका जाता, ततः सा देशोनां पूर्वकोटिं जीवित्वा मृत्वा च तत्रैव त्रिपल्योपमायुष्का समजनि, तत एवं देशोनपूर्वकोट्यधिकं पल्योपमत्रयमिति, अनेन संहरणतो जघन्योत्कृष्टावस्थानकालमानप्रदर्शनेन न्यूनान्तर्मुहूर्त्तायुःशेषाया गर्भस्त्रिया वा न संहरणमिति प्रतिपादितम्, अन्यथा जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षचिन्तायां पूर्वकोट्या देशोनता न स्यादिति ।। ५७ ।। अकर्मभूमिकमनुष्यस्त्रीविषयामेव विशेषचिन्तां करोति–

---

१. भावः-JP ।। २. JP । भागोनं जघन्यतः उ० **मु.**।।

(५८) हेमवतेरण्णवते अकम्मभूमगमणुस्सित्थी णं भंते! हेम० कालतो केवच्चिरं होइ?, गोयमा! जम्मणं पडुच्च जह० देसूणं पलिओवमं पलिओवमस्स असंखेज्जतिभागेणं ऊणगं, उक्को० पलिओवमं। साहरणं पडुच्च जह० अंतोमु० उक्को० पलिओवमं देसूणाए पुव्वकोडीए अब्भहियं।। ५८।।

'हेमवये'त्यादि, हैमवतैरण्यवतहरिवर्षरम्यकवर्षदेवकुरूत्तरकुर्वन्तरद्वीपिकाणां जन्म प्रतीत्य या यस्याः स्थितिस्ततस्तस्या अवस्थानं वाच्यं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो या यस्या उत्कृष्टा स्थितिः सा तस्या देशोनया पूर्वकोट्याऽभ्यधिका वक्तव्या, सा चैवं–**हैमवतैरण्यवतयोर्मनुष्यस्त्री जन्म प्रतीत्य जघन्येन पल्योपमं पल्योपमासङ्ख्येयभागन्यूनम्, उत्कर्षतः** परिपूर्णं **पल्योपमं, संहरणमधिकृत्य जघन्येनान्तर्मुहूर्त्तम्,** अन्तर्मुहूर्त्तायुःशेषाया एव संहरणभावात्, **उत्कर्षतः पल्योपमं देशोनया पूर्वकोट्याऽभ्यधिकं,** तच्च देशोनपूर्वकोट्यायुःसमन्वितायास्तत्र संहरणे तत्रैव च मृत्वोत्पन्नाया भावनीयम्।।५८।।

(५९) हरिवासरम्मयअकम्मभूमगमणुस्सित्थी णं भंते!, ० जम्मणं पडुच्च जह० देसूणाइं दो पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणगाइं, उक्को० दो पलिओवमाइं। संहरणं पडुच्च जह० अंतोमु० उक्को० दो पलिओवमाइं देसूणपुव्वकोडिमब्भहियाइं।। ५९ ।।

हरिवर्ष-रम्यकयोर्जन्म प्रतीत्य जघन्येन पल्योपमासङ्ख्येयभागन्यूने द्वे पल्योपमे, उत्कर्षतः परिपूर्णे **द्वे पल्योपमे। संहरणं प्रतीत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोनया पूर्वकोट्याऽभ्यधिके द्वे पल्योपमे,** भावना प्रागिव।। ५९ ।।

(६०) उत्तरकुरुदेवकुरूणं०, जम्मणं पडुच्च जहन्नेणं देसूणाइं तिन्नि पलिओवमाइं पलितोवमस्स असंखेज्जइभागेणं ऊणगाइं, उक्को० तिन्नि पलिओवमाइं। संहरणं पडुच्च जह० अंतोमु० उक्को० तिन्नि पलिओवमाइं देसूणाए पुव्वकोडिए अब्भहियाइं ।।६०।।

देवकुरूत्तरकुरुषु जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनानि त्रीणि पल्योपमानि, उत्कर्षतस्त्रीणि पल्योपमानि। संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोट्याऽभ्यधिकानि।। ६०।।

(६१) अंतरदीवाकम्मभूमकमणुस्सित्थी?, २ ०जम्मणं पडुच्च जह० देसूणं पलिओवमस्स असंखेज्जतिभागं पलिओवमस्स असंखेज्जतिभागेण ऊणं, उक्को० पलिओवमस्स असंखेज्जतिभागं। संहरणं पडुच्च जह० अंतोमु० उक्को० पलिओवमस्स असंखेज्जतिभागं देसूणाए पुव्वकोडीए अब्भहियं।।६१ ।।

अन्तरद्वीपेषु जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनं पल्योपमासङ्ख्येयभागं यावत् **उत्कर्षतः पल्योपमासङ्ख्येयभागम्,** एतावत्प्रमाणस्य तत्र जघन्यत उत्कर्षतश्च मनुष्याणामायुषः सम्भवात्, मरणानन्तरं च देवयोनावुत्पादात्। **संहरणमधिकृत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोनया पूर्वकोट्याऽभ्यधिकं पल्योपमासङ्ख्येयभागं** यावत्, भावनाऽत्र प्रागिव।।६१।। उक्ता सामस्त्येन मनुष्यस्त्रीवक्तव्यता, सम्प्रति देवस्त्रीवक्तव्यतामाह-

(६२) देवित्थी णं [१]भंते! देवित्थित्ति काल०, जच्चेव संचिट्ठणा।।६२।।

'देवत्थी ण'मित्यादि, देवीनां तथाभवस्वभावतया कायस्थितेरसम्भवात् यैव प्राक् सामान्यतो विशेषतश्च भवस्थितिरुक्ता **'सेव संचिट्ठणा भाणियव्वा'** तदेवावस्थानं वक्तव्यम्, अभिलापश्च **'[२]देवित्थी णं भंते! [३]देवित्थीति कालतो केवच्चिरं होइ?'** इत्यादिरूपः सुधिया परिभावनीयः।।६२।।

तदेवमुक्तं सामान्यतो विशेषतश्च स्त्रीत्वस्यावस्थानकालमानम्, इदानीमन्तरद्वारमाह-

(६३) इत्थी णं भंते! केवतियं कालं अंतरं होति?, गोयमा! जह० अंतोमु० उक्को० अणंतं कालं- वणस्सतिकालो।। ६३।।

'इत्थि णं भंते' इत्यादि, **स्त्रिया भदन्त! अन्तरं कालतः कियच्चिरं भवति?,** स्त्री भूत्वा स्त्रीत्वाद् भ्रष्टा सती पुनः कियता कालेन स्त्री भवतीत्यर्थः, एवं गौतमेन प्रश्ने कृते सति भगवानाह- **गौतम! जघन्येनान्तर्मुहूर्त्तं,** कथमिति चेदुच्यते-इह काचित्स्त्री स्त्रीत्वान्मरणेन च्युत्वा भवान्तरे पुरुषवेदं नपुंसकवेदं वाऽन्तर्मुहूर्त्तमनुभूय ततो मृत्वा भूयः स्त्रीत्वेनोत्पद्यते तत एवं जघन्यतोऽन्तरमन्तर्मुहूर्त्तं भवति, **उत्कर्षतो वनस्पतिकालः**-असङ्ख्येयपुद्गलपरावर्त्ताख्यो वक्तव्यः, तावता कालेनामुक्तौ सत्यां नियोगतः स्त्रीत्वयोगात्, स च वनस्पतिकाल एवं वक्तव्यः-"**अणंताओ उस्सप्पिणीओसप्पिणीओ कालओ,**

---

१. भंते ! जो ट्ठिति सा सव्वासिं सण्णि० जे.।। २.-३. देवत्थी JP ।।

खेत्तओ अणंता लोगा, असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो" [.....] इति ।। ६३ ।।

(६४) एवं सव्वासिं तिरिक्खित्थीणं।। ६४।।

एवमौघिकतिर्यक्स्त्रीणां जलचरस्थलचरखचरस्त्रीणामौघिकमनुष्यस्त्रीणां च जघन्यत उत्कर्षतश्चान्तरं वक्तव्यम्, अभिलापोऽपि सुगमत्वात्स्वयं परिभावनीयः।।६४।।

(६५) मणुस्सित्थीए खेत्तं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो। धम्मचरणं पडुच्च जह० एक्कं समयं[1] उक्को० अणंतं कालं जाव अवड्ढपोग्गलपरियट्टं देसूणं, एवं जाव[2] पुव्वविदेह-अवरविदेहियाओ।। ६५ ।।

कर्मभूमिक**मनुष्यस्त्रियाः क्षेत्रं**-कर्मभूमिक्षेत्रं **प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं वनस्पतिकालप्रमाणं** यावत्, **धर्मचरणं प्रतीत्य जघन्येनैकं समयं,** सर्वजघन्यस्य समयत्वात्, **उत्कर्षेणानन्तं कालं,** देशोन**मपार्द्धं पुद्गलपरावर्त्तं यावत्,** नातो ह्यधिकतरश्चरणलब्धिपातकालः, संपूर्णस्याप्यपार्द्धपुद्गलपरावर्त्तस्य दर्शनलब्धिपातकालस्य तत्र तत्र प्रदेशे प्रतिषेधात्[3]। एवं भरतैरावतमनुष्यस्त्रियाः पूर्वविदेहापरविदेहस्त्रियाश्च क्षेत्रतो धर्मचरणं चाश्रित्य वक्तव्यम्।। ६५ ।।

(६६) अकम्मभूमगमणुस्सित्थीणं भंते! केवतियं कालं अंतरं होति?, गोयमा! जम्मणं पडुच्च जहन्नं[4] दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं, उक्को० वणस्सतिकालो, संहरणं पडुच्च जह० अंतोमु० उक्को० वणस्सतिकालो, एवं जाव अंतरदीवियाओ ।।६६।।

अकर्मभूमकमनुष्यस्त्रिया जन्म प्रतीत्यान्तरं जघन्येन दश वर्षसहस्राण्यन्तर्मुहूर्त्ताभ्यधिकानि, कथमिति चेदुच्यते-इह काचिदकर्मभूमिका स्त्री मृत्वा जघन्यस्थितिषु देवेषूत्पन्ना, तत्र दश वर्षसहस्राण्यायुः परिपाल्य तत्क्षये च्युत्वा कर्मभूमिषु मनुष्यपुरुषत्वेन मनुष्यस्त्रीत्वेन वोत्पद्यते, देवेभ्योऽनन्तरमकर्मभूमिषूत्पादाभावात्, अन्तर्मुहूर्त्तेन मृत्वा भूयोऽप्यकर्मभूमिजस्त्रीत्वेन जायत इति भवन्ति जघन्यतो दश वर्षसहस्राण्यन्तर्मुहूर्त्ताभ्यधिकानि, **उत्कर्षतो वनस्पतिकालोऽन्तरं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तम्,**

१. क । समओ SP खट।। २. द्र. २/५५ सूत्रम् ।। ३. निषेधात् JP ।। ४. जहण्णेणं - L ।।

अकर्मभूमिजस्त्रियाः कर्मभूमिषु संहृत्य तावता कालेन तथाविधबुद्धिपरावृत्त्या भूयस्तत्रैव नयनात्, **उत्कर्षतो वनस्पतिकालोऽन्तरं**, तावता कालेन कर्मभूम्युत्पत्तिवत् संहरणस्यापि नियोगतो भावात्, तथाहि- काचिदकर्मभूमिका कर्मभूमौ संहृता, सा च स्वायुःक्षयानन्तरमनन्तकालं वनस्पत्यादिषु संसृत्य भूयोऽप्यकर्मभूमौ समुत्पन्ना, ततः केनापि संहृतेति यथोक्तं संहरणस्योत्कृष्टकालमानम्। एवं हैमवत-हैरण्यवत-हरिवर्ष-रम्यकवर्ष-देवकुरूत्तरकुर्वन्तरभूमिकानामपि जन्मतः संहरणतश्च प्रत्येकं जघन्यमुत्कृष्टं चान्तरं वक्तव्यम्, सूत्रपाठोऽपि सुगमत्वात्स्वयं परिभावनीयः।। ६६ ।।

सम्प्रति देवस्त्रीणामन्तरप्रतिपादनार्थमाह-

(६७) देवित्थियाणं भंते ! अंतरं सव्वासिं जह० अंतो० उक्को० वणस्सति-कालो एवं असुरकु० जावीसाणी।। ६७।।

'देवित्थियाणं भंते!' इत्यादि, देवस्त्रिया भदन्त! अन्तरं कालतः कियच्चिरं भवति?, भगवानाह- गौतम! **जघन्येनान्तर्मुहूर्त्तं,** कस्याश्चिद्देवस्त्रिया देवीभवाच्च्युताया गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिपरिसमाप्तिसमनन्तरं तथाऽध्यवसायमरणेन पुनर्देवीत्वेनोत्पत्तिसम्भवात्, **उत्कर्षतो वनस्पतिकालः,** स च सुप्रतीत एव। एवमसुरकुमारदेव्या आरभ्य यावदीशानदेवस्त्रियामुत्कृष्टमन्तरं वक्तव्यं, पाठोऽपि सुगमत्वात्स्वयं परिभावनीयः।।६७।।

सम्प्रत्यल्पबहुत्वं वक्तव्यं, तानि च पञ्च, तद्यथा-प्रथमं सामान्येनाल्पबहुत्वं, विशेषचिन्तायां द्वितीयं त्रिविधतिर्यक्स्त्रीणां, तृतीयं त्रिविधमनुष्यस्त्रीणां, चतुर्थं चतुर्विधदेवस्त्रीणां, पञ्चमं मिश्रस्त्रीणां, तत्र प्रथममल्पबहुत्वमभिधित्सुराह-

(६८) एतासि णं भंते! तिरिक्खजोणित्थियाणं मणुस्सित्थियाणं देवित्थियाणं[१] कतरा २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवाओ मणुस्सित्थियाओ, तिरिक्खजोणित्थियाओ असंखेज्जगुणाओ, देवित्थियाओ [२]संखिज्जगुणाओ ।। ६८ ।।

सर्वस्तोका मनुष्यस्त्रियः, सङ्ख्यातकोटाकोटीप्रमाणत्वात्, ताभ्य**स्तिर्यग्योनिकस्त्रियोऽसङ्ख्येय-गुणाः,** प्रतिद्वीपं प्रतिसमुद्रं तिर्यक्स्त्रीणामतिबहुतया सम्भवात्, द्वीप-समुद्राणां चासङ्ख्येयत्वात्, ताभ्योऽपि

१. जे. कखगटमु. S। ०याण य-L ।। २. जे. । **असंखे०मु.** L । **द्रष्टव्यं २/९४-९५,६/१२,९/२२०,सूत्रे वृत्तौ च, जीवासमासे गा.१५२,२७२ वृत्तौ च, षट्खण्डागमे २/११/७-१५, धवलाटीकायां भा.७ पृ.५२३ ।।**

देवस्त्रियोऽसङ्ख्येयगुणाः(देवस्त्रियः सङ्ख्येयगुणाः), भवनवासि-व्यन्तर-ज्योतिष्क-सौधर्मेशानदेवीनां प्रत्येकमसङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्।। ६८।। द्वितीयमल्पबहुत्वमाह–

(६९) एतासि णं भंते! तिरिक्खजोणित्थियाणं जलयरीणं थलयरीणं खहयरीण य कतरा २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवाओ खहयरतिरिक्खजोणित्थियाओ, थलयरतिरिक्खजोणित्थियाओ संखेज्जगुणाओ, जलयरतिरिक्ख० संखेज्जगुणाओ।।६९।।

सर्वस्तोकाः खचरतिर्यग्योनिकस्त्रियः, ताभ्यः **स्थलचरतिर्यग्योनिकस्त्रियः सङ्ख्येयगुणाः,** खचरेभ्यः स्थलचराणां स्वभावत एव प्राचुर्येण भावात्, ताभ्यो **जलचरस्त्रियः सङ्ख्येयगुणाः,** लवणे कालोदे स्वयम्भूरमणे च समुद्रे मत्स्यानामतिप्राचुर्येण भावात्, स्वयम्भूरमणसमुद्रस्य च शेषसमस्तद्वीप-समुद्रापेक्षयाऽतिप्रभूतत्वात्।। ६९ ।। उक्तं द्वितीयमल्पबहुत्वम्, अधुना तृतीयमाह–

(७०) एतासि णं भंते! मणुस्सित्थीणं कम्मभूमियाणं अकम्मभूमियाणं अंतर-दीवियाण य कतरा २ हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवाओ अंतरदीवग-अकम्मभूमगमणुस्सित्थियाओ,देवकुरूत्तरकुरुअकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगु०,हरिवासरम्मगवासअकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगु०, हेमवतेरण्णवयअकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखि-ज्जगु०,भरहेरवतवासकम्मभूमगमणुस्सि० दोवि तुल्लाओ संखिज्जगुणाओ, पुव्वावि-देहअवरविदेहकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगुणाओ।। ७०।।

सर्वस्तोका अन्तरद्वीपकाकर्मभूमिकमनुष्यस्त्रियः, क्षेत्रस्याल्पत्वात्, ताभ्यो **देवकुरूत्तरकुरूस्त्रियः सङ्ख्येयगुणाः,** क्षेत्रस्य सङ्ख्येयगुणत्वात्, स्वस्थाने तु **द्व्योऽपि** परस्परं **तुल्याः,** समानप्रमाणक्षेत्रत्वात्, ताभ्यो **हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः,** देवकुरूत्तरकुरुक्षेत्रापेक्षया हरिवर्षरम्यकक्षेत्रस्यातिप्रचुरत्वात्, स्वस्थानेऽपि द्व्योऽपि परस्परं तुल्याः, क्षेत्रस्य समानत्वात्, ताभ्योऽपि **हैमवतैरण्यवताकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः,** क्षेत्रस्याल्पत्वेऽप्यल्पस्थितिकतया बहूनां

---

१. S मु. । ०वास० L नास्ति।।

तत्र तासां सम्भवात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः, ताभ्योऽपि **भरतैरावतकर्मभूमिकमनुष्यस्त्रियः सङ्ख्येयगुणाः,** कर्मभूमितया स्वभावत एव तत्र प्राचुर्येण सम्भवात्, स्वस्थाने तु **द्वय्यो**ऽपि परस्परं **तुल्याः,** ताभ्योऽपि **पूर्वविदेहापरविदेहकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः,** क्षेत्रबाहुल्यादजित-स्वामिकाल इव च स्वभावत एव तत्र प्राचुर्येण भावात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः।।७०।। उक्तं तृतीयमल्पबहुत्वम्, अधुना चतुर्थमाह–

(७१) एतासि णं भंते! देवित्थियाणं भवणवासीणं वाणमंतरीणं जोइसिणीणं[१] वेमाणिणीण य कयरा २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवाओ वेमाणियदेवित्थियाओ भवणवासिदेवित्थियाओ असंखेज्जगुणाओ, वाणमंतरदेवीयाओ[२] असंखेज्जगुणाओ जोतिसियदेवित्थियाओ संखेज्जगुणाओ।। ७१ ।।

'एयासि णं भंते !' इत्यादि, **सर्वस्तोका वैमानिकदेवस्त्रियः,** अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यद् द्वितीयं वर्गमूलं तस्मिन् तृतीयेन वर्गमूलेन गुणिते यावत्प्र[माणप्र]देशराशिस्तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशा द्वात्रिंशत्तमभागहीनास्तावत्प्रमाणत्वात्प्रत्येकं सौधर्मेशानदेवस्त्रीणां, ताभ्यो **भवनवासिदेवस्त्रियोऽसङ्ख्येयगुणाः,** अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यत्प्रथमं[३] वर्गमूलं तस्मिन् द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावान् प्रदेशराशिर्द्वात्रिंशत्तमभागहीनस्तावत्प्रमाणत्वात्, ताभ्यो **व्यन्तरदेवस्त्रियोऽसङ्ख्येयगुणाः,** सङ्ख्येययोजनप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेभ्योऽपि द्वात्रिंशत्तमे भागेऽपनीते यच्छेषमवतिष्ठते तावत्प्रमाणत्वात्तासां, ताभ्यः **सङ्ख्येयगुणा ज्योतिष्कदेवस्त्रियः,** षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेभ्यो द्वात्रिंशत्तमे भागेऽपसारिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणत्वात्।। ७१ ।। उक्तं चतुर्थमल्पबहुत्वम्, इदानीं समस्तस्त्रीविषयं पञ्चममल्पबहुत्वमाह–

---

१. V । जोइसियाणं S.P **कख।। २.पा १ पा २ मु. । वाणमंतरदेवित्थियाओ** L ।। ३. अत्र ग्रन्थान्तरेषु मतान्तराणि दृश्यन्ते-प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते...(प्रज्ञापना सू. १२/९११-९१२)। अङ्गुलमात्र-क्षेत्रप्रदेशराशेः प्रथमवर्गमूलस्य सइस्येयतमो भागः (प्रज्ञा.१२/९१२) प्रज्ञा. वृत्तौ प्रथमवर्गमूले तृतीयवर्गमूलेन गुणिते... इति । अत्र वृत्तौ पञ्चसङ्ग्रहानुसारं (२/१९) वर्तते । अग्रेऽपि एवमेव ध्यातव्यम् ।।

(७२) एतासि णं भंते! तिरिक्खजोणित्थियाणं जलयरीणं थलयरीणं खहयरीणं मणुस्सित्थियाणं-कम्मभूमियाणं अकम्मभूमियाणं अंतरदीवियाणं, देवित्थियाणं भवणवासिणीणं वाणमंतरीणं जोतिसिणीणं वेमाणिणीण य कयराओ २ हिंतो अप्पा वा बहुआ वा तुल्ला वा विसे० ?, गोयमा! सव्वत्थोवाओ अंतरदीवगअकम्मभूमग-मणुस्सित्थियाओ,देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सित्थियाओ [१]दोवि संखेज्जगुणाओ, हरिवासरम्मगवासअकम्मभूमगमणुस्सित्थियाओ [२]दोवि संखेज्जगु०, हेमवतेरण्णवय-वासअकम्मभूमग० [३]दोवि संखेज्जगु०, भरहेरवतवासकम्मभूमगमणुस्सित्थीओ दोवि तुल्लाओ संखेज्जगु०, पुव्वविदेहअवरविदेहवासकम्मभूमगमणुस्सित्थि० [४]दोवि संखेज्जगु०, वेमाणियदेवित्थियाओ असंखेज्जगु०, भवणवासिदेवित्थियाओ असंखेज्जगु०, खहयरतिरिक्खजोणित्थियाओ असंखेज्जगु०, थलयरतिरक्खिजोणित्थियाओ संखिज्जगु०, जलयरतिरिक्खजोणित्थियाओ संखेज्जगुणाओ, वाणमंतरदेवित्थियाओ संखेज्जगुणाओ, जोइसियदेवित्थियाओ संखेज्जगुणाओ।। ७२।।

सर्वस्तोका अन्तरद्वीपकाकर्मभूमकमनुष्यस्त्रियः, ताभ्यो **देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः**, ताभ्योऽपि **हरिवर्ष-रम्यकस्त्रियः सङ्ख्येयगुणाः**, ताभ्योऽपि **हैमवतहैरण्यवतस्त्रियः सङ्ख्येयगुणाः**, ताभ्योऽपि **भरतैरावतकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः**, ताभ्योऽपि **पूर्वविदेहापरविदेहमनुष्यस्त्रियः सङ्ख्येयगुणाः**, अत्र भावना प्राग्वत्, ताभ्यो **वैमानिकदेवस्त्रियोऽसङ्ख्येयगुणाः**, असङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्तासां, ताभ्यो **भवनवासिदेवस्त्रियोऽसङ्ख्यातगुणाः**, अत्र युक्तिः प्रागेवोक्ता, ताभ्यः खचरतिर्यग्योनिकस्त्रियोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येय-भागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्तासां, ताभ्यः स्थलचरतिर्यग्योनिकस्त्रियः [५]सङ्ख्येय-गुणाः, बृहत्तरप्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, ताभ्यो **जलचरतिर्यग्यो-निकस्त्रियः सङ्ख्येयगुणाः**, बृहत्तमप्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येय-श्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, ताभ्यो **व्यन्तरदेवस्त्रियः सङ्ख्येयगुणाः**, सङ्ख्येययोजनकोटाकोटीप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेभ्यो द्वात्रिंशत्तमे भागेऽपहृते यावान् राशिरवतिष्ठते तावत्प्रमाणत्वात्, ताभ्योऽपि **ज्योतिष्कदेवस्त्रियः सङ्ख्येयगुणाः**, एतच्च प्रागेव भावितम्।। ७२।।

१-२-३-४ दोवि तुल्लाओ सं० ।। ५. पातासंपा.१०-१, पाकाहेम १४८५४। सङ्ख्येयगुणबृ० मु.।।

इह स्त्रीत्वानुभावः स्त्रीवेदकर्मोदय इति स्त्रीवेदकर्मणो जघन्यत उत्कर्षतश्च स्थितिमानमाह–

(७३) इत्थिवेदस्स णं भंते! कम्मस्स केवतियं कालं बंधठिती पण्णत्ता?, गोयमा! जहन्नेणं सागरोवमस्स दिवड्ढो सत्तभागो पलिओवमस्स असंखेज्जतिभागेण ऊणो उक्को० पण्णरस सागरोवमकोडाकोडीओ, पण्णरस वाससयाइं अबाधा, अबाहूणिया कम्मठिती कम्मणिसेओ।। ७३।।

'स्त्रीवेदस्य' स्त्रीवेदनाम्नो **ण**मिति वाक्यालङ्कारे **भदन्त! कर्मणः कियन्तं कालं बन्धस्थितिः प्रज्ञप्ता?,** भगवानाह–**गौतम! जघन्येन सागरोपमस्य सार्द्धः सप्तभागः पल्योपमासङ्ख्येयभागन्यूनः,** कथमिति चेदुच्यते–इह स्त्रीवेदादीनां कर्मणां स्वस्मात् २ उत्कृष्टस्थितिबन्धात् मिथ्यात्वसत्कया उत्कृष्टया स्थित्या सप्ततिसागरोपमकोटाकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पल्योपमासङ्ख्येयभागन्यूनं जघन्यस्थितिः **"सेसाणुक्कोसाओ मिच्छत्तुक्कोसएण जं लद्ध"** [ ] मित्यादिवचनप्रामाण्यात्, तत्र स्त्रीवेदस्योत्कृष्टः स्थितिबन्धः **पञ्चदशसागरोपमकोटीकोट्यः,** तासां मिथ्यात्वस्थित्या भागो ह्रियते, शून्यं शून्येन पातयेत् जाता उपरि पञ्चदश अधस्तात्सप्ततिः, अनयोश्च छेद्य-च्छेदकराश्योर्दशभिरपवर्त्तना जात उपर्येकः सार्द्धः अधस्तात्सप्त आगतमेकसागरोपमस्य सार्द्धः सप्तभागः, पल्योपमासङ्ख्येयभागन्यूनः क्रियते, इयं च व्याख्या **मूलटीकाऽ**नुसारेण कृता, **पञ्चसङ्ग्रहमते**नापीदमेव जघन्यस्थितिपरिमाणं केवलं पल्योपमासङ्ख्येयभागहीनं [न] वक्तव्यं, तन्मतेन **"सेसाणुक्कोसाओ मिच्छत्तठिईएँ जं लद्धं"** इत्येतावन्मात्रस्यैव जघन्यस्थित्यानयनस्य करणस्य विद्यमानत्वात्, **कर्मप्रकृतिसङ्ग्रहणीकारस्त्वित्थं** जघन्यस्थित्यानयनाय करणसूत्रमाह–

"वग्गुक्कोसठिईणं मिच्छत्तुक्कोसगेण जं लद्धं।
सेसाणं तु जहण्णं पलियासंखेज्जगेणूणं।।१।।" [७९, पंचसङ्ग्रह आ.१]

अस्याक्षरगमनिका–इह ज्ञानावरणीयप्रकृतिसमुदायो ज्ञानावरणीयवर्ग इत्युच्यते, दर्शनावरणीयप्रकृतिसमुदायो दर्शनावरणीयवर्गः, वेदनीयप्रकृतिसमुदायो वेदनीयवर्गः, दर्शनमोहनीयप्रकृतिसमुदायो दर्शनमोहनीयवर्गः, चारित्रमोहनीयप्रकृतिसमुदायश्चारित्रमोहनीयवर्गः, नोकषायमोहनीयप्रकृतिसमुदायो नोकषायमोहनीयवर्गः, नामप्रकृतिसमुदायो नामवर्गः, गोत्रप्रकृतिसमुदायो गोत्रवर्गः, अन्तरायप्रकृतिसमुदायोऽन्तरायवर्गः, एतेषां

---

१. ०भाओ SP **क ख ग ट।।**

(च) वर्गाणां या आत्मीया आत्मीया उत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोट्यादिका तस्या मिथ्यात्वसत्कया उत्कृष्टया स्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते सति यल्लभ्यते तत्पल्योपमासङ्ख्येयभागन्यूनं सत् उक्तशेषाणां निद्रादीनां प्रकृतीनां जघन्यस्थितेः परिमाणमिति, ततस्तन्मतेन स्त्रीवेदस्य जघन्या स्थितिर्द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, तथाहि–नोकषायमोहनीयस्योत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोट्यः, तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे ह्रियमाणे शून्यं शून्येन पातयेत् लब्धौ द्वौ सागरोपमस्य सप्तभागौ तौ पल्योपमासङ्ख्येयभागहीनौ क्रियेते इति। उत्कृष्टा स्थितिः पञ्चदशसागरोपमकोटीकोट्यः, इह स्थितिर्द्विधा–कर्मरूपताऽवस्थानलक्षणा अनुभवयोग्या च, तत्रेयं कर्मरूपताऽवस्थानलक्षणा द्रष्टव्या, अनुभवयोग्या पुनरबाधाहीना, (सा) च येषां कर्मणां यावत्यः सागरोपमकोटीकोट्यस्तेषां तावन्ति वर्षशतान्यबाधा, स्त्रीवेदस्य चाधिकृतस्योत्कृष्टा स्थितिः पञ्चदश सागरोपमकोटीकोट्यस्ततः पञ्चदश वर्षशतान्यबाधा, तथा चाह–**'पण्णरस वाससयाइं अबाहा'** इति, किमुक्तं भवति? स्त्रीवेदकर्म उत्कृष्टस्थितिकं बद्धं सत्स्वरूपेण पञ्चदश वर्षशतानि यावन्न जीवस्य स्वविपाकोदयमादर्शयति तावत्कालमध्ये दलिकनिषेकस्याभावात्, तथा चाह–**'अबाहूणिया'** इत्यादि, **'अबाधोना'** अबाधाकालपरिहीना **कर्मस्थितिर**नुभवयोग्येति गम्यते, यतः 'अबाधोनः' अबाधाकालपरिहीनः **कर्मनिषेक**ः–कर्मदलिकरचनेति।। ७३ ।।

सम्प्रति स्त्रीवेदकर्मोदयजनितो यः स्त्रीवेदः स किंस्वरूपः? इत्यावेदयन्नाह–

(७४) इत्थिवेदे णं भंते! किंपगारे पण्णत्ते?, गोयमा! फुंफुअग्गिसमाणे पण्णत्ते, से तं इत्थियाओ।। ७४।।

'इत्थिवेए णं भंते!' इत्यादि, **स्त्रीवेदो ण**मिति पूर्ववत् **भदन्त! 'किंप्रकारः'** किंस्वरूपः **प्रज्ञप्तः?**, भगवानाह–**गौतम! फुम्फुकाग्निसमानः**, फुम्फुकशब्दो देशीत्वात्कारीषवचनस्ततः कारीषाग्निसमानः परिमलनमदनदाहरूप इत्यर्थः, **प्रज्ञप्तः**, उपसंहारमाह–**'से तं इत्थियाओ'**।।७४।।

तदेवमुक्ताः स्त्रियः, सम्प्रति पुरुषप्रतिपादनार्थमाह–

(७५) से किं तं पुरिसा?, पुरिसा तिविहा पण्णत्ता, तंजहा–तिरिक्खजोणियपुरिसा मणुस्सपुरिसा देवपुरिसा।। ७५ ।।

'से किं तं पुरिसा' इत्यादि, **अथ के ते पुरुषाः?, पुरुषास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–तिर्यग्योनिकपुरुषा मनुष्यपुरुषा देवपुरुषाश्च।। ७५ ।।**

(७६) से किं तं तिरिक्खजोणियपुरिसा?, २ तिविहा पण्णत्ता, तंजहा–जलयरा थलयरा खहयरा, इत्थिभेदो भाणितव्वो, जाव[1] खहयरा। से तं खहयरा, से तं खहयरतिरिक्खजोणियपुरिसा।। ७६।।

'से किं त'मित्यादि, **अथ के ते तिर्यग्योनिकपुरुषाः?, तिर्यग्योनिकपुरुषास्त्रिविधाः प्रज्ञप्तास्तद्यथा–जलचरपुरुषाः स्थलचरपुरुषाः खचरपुरुषाश्च।। ७६ ।।**

(७७) से किं तं मणुस्सपुरिसा?, २ तिविधा पण्णत्ता, [2]जहा-मणयी तंजहा--कम्मभूमगा अकम्मभूमगा अंतरदीवगा, से तं मणुस्सपुरिसा।। ७७ ।।

मनुष्यपुरुषा अपि **त्रिविधास्तद्यथा-कर्मभूमका अकर्मभूमका अन्तरद्वीपकाश्च**।। ७७।।

देवसूत्रमाह–

(७८) [3]से किं तं देवपुरिसा?, देवपुरिसा चउव्विहा पण्णत्ता, तंजहा- [4]इत्थीभेदो भाणितव्वो जाव सव्वट्ठसिद्धा।। ७८ ।।

'से किं त'मित्यादि, **अथ के ते देवपुरुषाः?, देवपुरुषाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-**भवनवासिनो वानमन्तरा ज्योतिष्का वैमानिकाश्च, भवनपतयोऽसुरादिभेदेन दशविधा वक्तव्याः, वानमन्तराः पिशाचादिभेदेनाष्टविधाः, ज्योतिष्काश्चन्द्रादिभेदेन पञ्चविधाः, वैमानिकाः कल्पोपपन्नकल्पातीतभेदेन द्विविधाः, कल्पोपपन्नाः सौधर्मादिभेदेन द्वादशविधाः, कल्पातीता ग्रैवेयकानुत्तरोपपातिकभेदेन द्विविधाः, तथा चाह–**'जाव[5] अणुत्तरोववाइया'** इति।। ७८।।

उक्तो भेदः, सम्प्रति स्थितिप्रतिपादनार्थमाह–

(७९) पुरिसस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जह० अंतोमु० उक्को० तेत्तीसं सागरोवमाइं।। ७९ ।।

'पुरिसस्स णं भंते' इत्यादि, **पुरुषस्य** स्वस्वभवमजहतो **भदन्त! कियन्तं कालं** यावत्**स्थितिः प्रज्ञप्ता?,** भगवानाह–**जघन्यतोऽन्तर्मुहूर्त्तं,** तत ऊर्ध्वं मरणभावात्, **उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि,** तान्यनुत्तरसुरापेक्षया द्रष्टव्यानि, अन्यस्यैतावत्याः स्थितेरभावात् ।। ७९।।

---

१. द्र० २/४-१० सूत्रम् ।। २. जहा मणुयी-जे अस्ति, मु. L नास्ति। द्र. २/१२-१४ ।। ३. देवा जह देवीओ जाव सव्वट्ठं - जे. ।। ४. द्रष्टव्यं २/१६-१९ सूत्रम् ।। ५. सूत्र-वृत्त्योर्भेदोऽत्राऽपि वर्तते ।।

(८०) तिरिक्खजोणियजलचर-थलचर-खहयरपुरिसाणं मणुस्सपुरिसाणं जा चेव इत्थीणं ठिती सा चेव भाणियव्वा[1]।। ८०।।

तिर्यग्योनिकानामौघिकानां **जलचराणां स्थलचराणां खचराणां** स्त्रिया या स्थितिरुक्ता तथा वक्तव्या, मनुष्यपुरुषस्याप्यौघिकस्य कर्मभूमिकस्य सामान्यतो विशेषतो भरतैरावतकस्य पूर्वविदेहाऽपरविदेहकस्य अकर्मभूमस्य सामान्यतो विशेषतो हैमवतैरण्यवतकस्य हरिवर्ष-रम्यकस्य देवकुरूत्तरकुरुकस्यान्तरद्वीपकस्य **यैवा**त्मीये आत्मीये स्थाने **स्त्रियाः स्थितिः सैव पुरुषस्यापि वक्तव्या,** तद्यथा-सामानिकतिर्यग्योनिकपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, जलचर-पुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, चतुष्पदस्थलचरपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, उरःपरिसर्पस्थलचरपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, एवं भुजपरिसर्पस्थल-चरपुरुषाणां, खचरपुरुषाणामपि जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभागः, सामान्यतो मनुष्यपुरुषाणां जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, धर्मचरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तम्, एतच्च बाह्यलिङ्गप्रव्रज्याप्रतिपत्तिमङ्गीकृत्य वेदितव्यम्, अन्यथा चरणपरिणामस्यैकसामायिकस्यापि सम्भवादेकं समयमिति ब्रूयात्, अथवा देशचरणमधिकृत्येदं वक्तव्यं, देशचरणप्रतिपत्तेर्बहुलभङ्गतया जघन्यतोऽप्यन्तर्मुहूर्त्तसम्भवात्, तत्र सर्वचरणसम्भवेऽपि यदिदं देशचरणमधिकृत्योक्तं तद्देशचरणपूर्वकं प्रायः सर्वचरणमिति प्रतिपत्त्यर्थं, तथा चोक्तम्-

"सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ।
चरणोवसमखयाणं सागर संखंतरा होंति।।१।।" [संबोध प्र. ८८६, प्रव.सारो.१३८४]इति,

अत्र यदाद्यं व्याख्यानं तत्स्त्रीवेदचिन्तायामपि द्रष्टव्यं, यच्च स्त्रीवेदचिन्तायां व्याख्यातं तदत्रापीति, उत्कर्षतो देशोना पूर्वकोटी वर्षाष्टकादूर्ध्वमुत्कर्षतोऽपि पूर्वकोट्यायुष एव चरणप्रतिपत्तिसम्भवात्, कर्मभूमकमनुष्यपुरुषाणां जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, चरणप्रतिपत्तिमङ्गीकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भरतैरावतकर्मभूमकमनुष्यपुरुषाणां क्षेत्रं प्रतीत्य जघन्य-तोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, तानि च सुषमसुषमारके वेदितव्यानि, धर्मचरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, पूर्वविदेहाऽपरविदेहकर्मभूमकमनुष्यपुरुषाणां क्षेत्रं प्रतीत्य

---

१. द्रष्टव्यं २/२१-३४ सूत्रम् । २. सम्यक्त्वे तु लब्धे पल्योपमपृथक्त्वेनैव श्रावको भवति। चरणोपशमक्षयाणां सागरोपमाणि सङ्ख्यातानि अन्तरं भवन्ति ।।

जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना(? सम्पूर्णा) पूर्वकोटी, धर्मचरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, सामान्यतोऽकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन पल्योपमासङ्ख्येय-भागन्यूनमेकं पल्योपममुत्कर्षतस्त्रीणि पल्योपमानि, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षेण देशोना पूर्वकोटी, पूर्वविदेहकस्यापरविदेहकस्य वाऽकर्म्मभूमौ संहृतस्य जघन्येनोत्कर्षत एतावदायुःप्रमाणसम्भवात्, हैमवत-हैरण्यवताकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन पल्योपमं पल्योपमासङ्ख्येयभागन्यून-मुत्कर्षतः परिपूर्णं पल्योपमं, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भावना प्रागिव, हरिवर्ष-रम्यक्वर्षाकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्यतो द्वे पल्योपमे पल्योपमास-ङ्ख्येयभागन्यूने उत्कर्षतः परिपूर्णे द्वे पल्योपमे, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, देवकुरूत्तरकुर्वकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनानि त्रीणि पल्योपमानि उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्त-मुत्कर्षतो देशोना पूर्वकोटी, अन्तरद्वीपकाकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन देशोनपल्योपमा-सङ्ख्येयभाग उत्कर्षतः परिपूर्णपल्योपमासङ्ख्येयभागः, संहरणमधिकृत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटीति।।८०।।

(८१) देवपुरिसाणवि जाव सव्वट्ठसिद्धाणं ⇢[१]ठिती जहं. दसवा० उक्को० तेत्तीसं सा० भवणव० जहं० दसवा० उक्को सातिरे सागरोवमं, सेसाणं देसूणाइं दो पलिओवमाइं, वंतराणं पलि० ते० जहं०अट्ठभागपलि० उक्को० पलि० वाससतसहस्समब्भत्तियं। वेमाणि० जहं० पलि० उक्को० स तेत्तीसंसागरो० जाव सवट्ठगत्ति[२]⇠ ।। ८१।।

देवपुरिसाणमित्यादि, देवपुरुषाणां सामान्यतो जघन्यतः स्थितिर्दश वर्षसहस्राणि उत्कर्षतस्त्रय-स्त्रिंशत्सागरोपमाणि, विशेषचिन्तायामसुरकुमारपुरुषाणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतः सातिरेकमेकं सागरोपमं, नागकुमारादिपुरुषाणां सर्वेषामपि जघन्यतो दश वर्षसहस्राणि उत्कर्षतो देशोने द्वे पल्योपमे,

---

१. जे.-~~चिह्नद्वयमध्यवर्तिपाठस्थाने~~ मु. मध्ये- 'ताव ठिती जहा पण्णवणाए तहा भाणियव्वा' इति पाठः।। २. इतोऽग्रेऽपि जे. मध्ये अधिकः पाठः इत्थम् - इत्थिणपुंसा संचिट्ठणेसु पुरिसंतरे य समोव० पुरिसा णपुंसा संचिट्ठणंतरे सागरपुवत्तं।।

व्यन्तरपुरुषाणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतः पल्योपमं, ज्योतिष्कदेवपुरुषाणां जघन्यतः पल्योपमस्याष्टमो भाग उत्कर्षतः परिपूर्णं पल्योपमं वर्षशतसहस्राभ्यधिकं, सौधर्मकल्पदेवपुरुषाणां जघन्यतः पल्योपममुत्कर्षतः द्वे सागरोपमे, ईशान-(ग्रन्थाग्रम् २०००) कल्पदेवपुरुषाणां जघन्यतः साधिकं पल्योपममुत्कर्षतो द्वे सागरोपमे सातिरेके, सनत्कुमारकल्पदेवपुरुषाणां च जघन्यतो द्वे सागरोपमे उत्कर्षतः सप्त सागरोपमाणि, माहेन्द्रकल्पदेवपुरुषाणां जघन्यतः सातिरेके द्वे सागरोपमे उत्कर्षतः सातिरेकाणि सप्त सागरोपमाणि, ब्रह्मलोकदेवानां जघन्यतः सप्त सागरोपमाणि उत्कर्षतो दश, लान्तककल्पदेवानां जघन्यतो दश सागरोपमाणि उत्कर्षतश्चतुर्दश, महाशुक्रकल्पदेवपुरुषाणां जघन्यतश्चतुर्दश सागरोपमाणि उत्कर्षतः सप्तदश, सहस्रारकल्पदेवानां जघन्येन सप्तदश सागरोपमाणि उत्कर्षतोऽष्टादश , आनतकल्पदेवानां जघन्यतोऽष्टादश सागरोपमाणि उत्कर्षत एकोनविंशतिः, प्राणतकल्पदेवानां जघन्यत एकोनविंशतिः सागरोपमाणि उत्कर्षतो विंशतिः, आरणकल्पदेवानां जघन्यतो विंशतिः सागरोपमाणि उत्कर्षत एकविंशतिः, अच्युतकल्पदेवानां जघन्यत एकविंशतिः सागरोपमाणि उत्कर्षतो द्वाविंशतिः, अधस्तनाधस्तनग्रैवेयकदेवानां जघन्यतो द्वाविंशतिः सागरोपमाणि उत्कर्षतस्त्रयोविंशतिः, अधस्तनमध्यमग्रैवेयकदेवानां जघन्यतस्त्रयोविंशतिः सागरोपमाणि उत्कर्षतश्चतुर्विंशतिः, अधस्तनोपरितनग्रैवेयकदेवानां जघन्यतश्चतुर्विंशतिः सागरोपमाणि उत्कर्षतः पञ्चविंशतिः, मध्यमाधस्तनग्रैवेयकदेवानां जघन्येन पञ्चविंशतिः सागरोपमाणि उत्कर्षतः षड्विंशतिः, मध्यममध्यमग्रैवेयकदेवानां जघन्यतः षड्विंशतिः सागरोपमाणि उत्कर्षतः सप्तविंशतिः, मध्यमोपरितनग्रैवेयकदेवानां जघन्येन सप्तविंशतिः सागरोपमाणि उत्कर्षतोऽष्टाविंशतिः, उपरितनाधस्तनग्रैवेयकदेवानां जघन्येनाष्टाविंशतिः सागरोपमाणि उत्कर्षत एकोनत्रिंशत्, उपरितनमध्यमग्रैवेयकदेवानां जघन्येनैकोनत्रिंशत्सागरोपमाणि उत्कर्षतस्त्रिंशत्, उपरितनोपरितनग्रैवेयकदेवानां जघन्यतस्त्रिंशत्सागरोपमाणि उत्कर्षत एकत्रिंशत् सागरोपमाणि, विजय-वैजयन्त-जयन्ता-ऽपराजितविमानदेवानां जघन्येनैकत्रिंशत्सागरोपमाणि उत्कर्षतस्त्रयस्त्रिंशत् सागरोपमाणि, **सर्वार्थसिद्धमहाविमानदेवानाम**जघन्योत्कृष्टं **त्रयस्त्रिंशत्सागरोपमाणि**। क्वचिदेवं सूत्रपाठः-'देवपुरिसाण ठिई जहा पण्णवणाए ठिइपए तहा भाणियव्वा' इति, तत्र स्थितिपदेऽप्येवमेवोक्ता स्थितिरिति।। ८१ ।।

उक्तं पुरुषस्य भवस्थितिमानमधुना पुरुषः पुरुषत्वममुञ्चन् कियन्तं कालं निरन्तरमवतिष्ठते इति निरूपणार्थमाह-

(८२) पुरिसे णं भंते! पुरिसे त्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं।। ८२।।

पुरुषो णमिति वाक्यालङ्कारे **भदन्त! पुरुष इति** पुरुषभावापरित्यागेन **'कियच्चिरं'** कियन्तं कालं **यावद् भवति?,** भगवानाह-**गौतम! जघन्यतोऽन्तर्मुहूर्त्तं,** तावतः कालादूर्ध्वं मृत्वा स्त्र्यादिभाव-गमनाद्, **उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वं,** सामान्येन तिर्यङ्-नरामरभवेष्वेतावन्तं कालं पुरुषेष्वेव भावसम्भवात्, सातिरेकता कतिपयमनुष्यभवैर्वेदितव्या, अत ऊर्ध्वं पुरुषनामकर्मोदयाभावतो नियमत एव स्त्र्यादिभावगमनात्।।८२।। तिर्यग्योनिकपुरुषाणां यथा तिर्यग्योनिकस्त्रीणां तथा वक्तव्यं, तच्चैवम्-

(८३) तिरिक्खजोणियपुरिसे णं भंते! कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतो० उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, एवं तहेव[1], संचिट्ठणा जधा इत्थीणं जाव[2] खहयरतिरिक्खजोणियपुरिसस्स संचिट्ठणा।। ८३।।

तिर्यग्योनिकपुरुषस्तिर्यग्योनिकपुरुषत्वमजहत् **जघन्यतोऽन्तर्मुहूर्त्तं,** तदनन्तरं मृत्वा गत्यन्तरे वेदान्तरे वा सङ्क्रमात्, **उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि,** तत्र पूर्वकोटिपृथक्त्वं सप्त भवाः पूर्वकोट्यायुषः पूर्वविदेहादौ (यतः) त्रीणि पल्योपमान्यष्टमे भवे देवकुरूत्तरकुरूषु, (यतः) विशेषचिन्तायां जलचरपुरुषो जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वं मरणभावेन तिर्यग्योन्यन्तरे गत्यन्तरे वेदान्तरे वा सङ्क्रमात्, उत्कर्षतः पूर्वकोटिपृथक्त्वं, पूर्वकोट्यायुःसमन्वितस्य भूयो भूयस्तत्रैव द्व्यादिवारोत्पत्ति-सम्भवात्। चतुष्पदस्थलचरपुरुषो जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तानि सामान्यतिर्यक्पुरुषस्येव भावनीयानि। उरःपरिसर्पस्थलचरपुरुषो भुजपरिसर्पस्थलचरपुरुषश्च जघन्यतो-ऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं, तच्च जलचरपुरुषस्येव भावनीयम्। खचरपुरुषो जघन्यतोऽन्तर्मुहूत्तम्, अन्तर्मुहूर्त्तभावना सर्वत्रापि प्रागिव, उत्कर्षतः पूर्वकोटिपृथक्त्वाभ्यधिकः पल्योपमासङ्ख्येयभागः, स च सप्त वारान् पूर्वकोटिस्थितिषूत्पद्याष्टमवारमन्तरद्वीपादिखचरपुरुषेषु पल्योपमासङ्ख्येयभागस्थिति-षूत्पद्यमानस्य वेदितव्यः।। ८३।।

---

१. तं चैव - मु. ।। २. द्र.२/ ५०-५३ सूत्राणि ।।

(८४) मणुस्सपुरिसाणं[१] भंते! कालतो केवच्चिरं होइ?, गोयमा! खेत्तं पडुच्च जहन्नेo अंतोo उक्कोo तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, धम्मचरणं पडुच्च जहo अंतोo उक्कोसेणं देसूणा पुव्वकोडी ।। ८४ ।।

(८५) एवं सव्वत्थ जाव[२] पुव्वविदेहअवरविदेहo अकम्मभूमगमणुस्सपुरिसाणं जहा अकम्मभूमकमणुस्सित्थीणं जाव[३] अंतरदीवगाणं, देवपुरिसाणां[४] जच्चेव ठिती सच्चेव संचिट्ठणा जाव सव्वट्ठसिद्धगाणं।। ८५।।

'**मणुस्सपुरिसाणं[५] जहा मणुस्सित्थीण**'मिति, मनुष्यपुरुषाणां यथा मनुष्यस्त्रीणां तथा वक्तव्यं, तच्चैवं-सामान्यतो मनुष्यपुरुषस्य **क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं,** तत ऊर्ध्वं मृत्वा गत्यन्तरे वेदान्तरे वा सङ्क्रमात्, **उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि,** तत्र सप्त भवाः पूर्वकोट्यायुषो महाविदेहेषु अष्टमस्तु देवकुर्वादिषु, **धर्मचरणं प्रतीत्य** समयमेकं[६], द्वितीयसमये मरणभावात्, **उत्कर्षतो देशोना पूर्वकोटी,** उत्कर्षतोऽपि पूर्वकोट्यायुष एव वर्षाष्टकादूर्ध्वं चरणप्रतिपत्तिभावात्।

विशेषचिन्तायां सामान्यतः कर्म्मभूमकमनुष्यपुरुषः कर्मभूमिरूपं क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्त-मुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तत्रान्तर्मुहूर्त्तभावना प्रागिव, त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि सप्त वारान् पूर्वकोट्यायुःसमन्वितेषूत्पद्याष्टमं वारमेकान्तसुषमायां भरतैरावत-योस्त्रिपल्योपमस्थितिषूत्पद्यमानस्य वेदितव्यानि, **धर्म्मचरणं प्रतीत्य जघन्यत एकं समयं,** सर्वविरति-परिणामस्यैकसामयिकस्यापि सम्भवात्, उत्कर्षतो देशोना पूर्वकोटी, समग्रचरणकालस्याप्येतावत एव भावात्। भरतैरावतकर्मभूमकमनुष्यपुरुषोऽपि भरतैरावतक्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि देशोनपूर्वकोट्यभ्यधिकानि, तानि च पूर्वकोट्यायुःसमन्वितस्य विदेहपुरुषस्य भरतादौ संहृत्यानीतस्य भरतादिवासयोगाद् भरतादिप्रवृत्तव्यपदेशस्य भवायुःक्षये एकान्तसुषमाप्रारम्भे समुत्पन्नस्य वेदितव्यानि, धर्मचरणं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी, एतच्च द्वयमपि प्रागिव भावनीयं, पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटि-पृथक्त्वं, तच्च भूयो भूयस्तत्रैव सप्तवारानुत्पत्त्या भावनीयम्, अत ऊर्ध्वं त्ववश्यं गत्यन्तरे योन्यन्तरे

---

१. जे, प्रतौ ८४-८५ सूत्रस्थाने इत्थं पाठः- मणुस्सपुरिसा जहा मणुयी । देवाणां जा ठिती सा संचिट्ठणा ।।२. द्र. २/५५, ५६, सूत्रे ।। ३. द्र.२/५७-६१ सू.।। ४. S.P । देवपुरिसाणां - मु. L नास्ति ।। ५-६. सूत्र-वृत्त्योर्भेद इति ज्ञेयम् ।।

वा सङ्क्रमभावात्, धर्मचरणं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी। तथा सामान्यतोऽकर्मभूमकमनुष्यपुरुषस्तद्भावमपरित्यजन् जन्म प्रतीत्य जघन्यत एकं पल्योपमं पल्योपमासङ्ख्येयभागन्यूनमुत्कर्षतस्त्रीणि पल्योपमानि, संहरणं प्रतीत्य जघन्येनान्तर्मुहूर्त्तं, तच्चान्तर्मुहूर्त्तायुःशेषस्याकर्म्मभूमिषु संहृतस्य वेदितव्यम्, उत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोट्याऽभ्यधिकानि, तानि च देशोनपूर्वकोट्यायुःसमन्वितस्योत्तरकुर्वादौ संहृतस्य तत्रैव मृत्वोत्पन्नस्य वेदितव्यानि, देशोनता च पूर्वकोट्या गर्भकालेन न्यूनत्वाद्, गर्भस्थितस्य संहरणप्रतिषेधात्।

हैमवत-हैरण्यवताकर्म्मभूमकमनुष्यपुरुषो जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनं पल्योपममुत्कर्षतः परिपूर्णं पल्योपमं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोनया पूर्वकोट्याऽभ्यधिकमेकं पल्योपमम्, अत्र भावना प्रागुक्तानुसारेण स्वयं कर्त्तव्या। हरिवर्ष-रम्यकवर्षाकर्मभूमकमनुष्यपुरुषो जन्म प्रतीत्य जघन्यतो द्वे पल्योपमे पल्योपमासङ्ख्येयभागन्यूने, उत्कर्षतः परिपूर्णे द्वे पल्योपमे, जघन्यत उत्कर्षतश्च तत्रैतावत आयुषः सम्भवात्, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं, न्यूनान्तर्मुहूर्त्तायुषः संहरणाऽसम्भवात्, उत्कर्षतो देशोनया पूर्वकोट्याऽभ्यधिके द्वे पल्योपमे, भावनाऽत्र प्राग्वत्। देवकुरूत्तरकुर्वकर्मभूमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनानि त्रीणि पल्योपमानि उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि देशोनपूर्वकोट्यधिकानि। अन्तरद्वीपकमनुष्यपुरुषो जन्म प्रतीत्य देशोनं पल्योपमासङ्ख्येयभागमुत्कर्षतः परिपूर्णं पल्योपमासङ्ख्येयभागं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिसमभ्यधिकः पल्योपमासङ्ख्येयभागः। **'देवाणं जा चेव ठिई सा चेव संचिट्ठणा भाणियव्वा'** देवानां यैव स्थितिः प्रागभिहिता सैव **'संचिट्ठणा'** इति कायस्थितिर्भणितव्या, नन्वनेकभवभावाश्रया कायस्थितिः सा कथमेकस्मिन् भवे भवति?, नैष दोषः, देवपुरुषो देवपुरुषत्वापरित्यागेन कियन्तं कालं यावन्निरन्तरं भवति? इत्येतावदेवात्र विवक्षितं, तत्र देवो मृत्वाऽऽनन्तर्येण भूयो देवो न भवति ततः **'देवाणं जा चेव ठिई सा चेव संचिट्ठणा भाणियव्वा'** इत्यतिदेशः कृतः।। ८५।।

तदेवमुक्तं सातत्येनावस्थानमिदानीमन्तरमाह—

(८६) पुरिसस्स णं भंते! केवतियं कालं अंतरं होइ?, गोयमा! जह० एक्कं समयं उक्को० वणस्सतिकालो ।। ८६ ।।

---

१. द्र. २/५५, ५६ सूत्र. ।।

'पुरिसस्स णं' इत्यादि, **पुरुषस्य ण**मिति वाक्यालङ्कारे पूर्ववत् **भदन्त! अन्तरं कालतः कियच्चिरं** भवति?, पुरुषः पुरुषत्वात्परिभ्रष्टः सन् पुनः कियता कालेन तदवाप्नोतीत्यर्थः, तत्र भगवानाह–**गौतम! जघन्येनैकं समयं**–समयादनन्तरं भूयोऽपि पुरुषत्वमवाप्नोतीति भावः, इयमत्र भावना–यदा कश्चित्पुरुष उपशमश्रेणिगत उपशान्ते पुरुषवेदे समयमेकं जीवित्वा तदनन्तरं म्रियते तदाऽसौ नियमाद्देवपुरुषेषूत्पद्यते इति समयमेकमन्तरं पुरुषत्वस्य, ननु स्त्री-नपुंसकयोरपि श्रेणिलाभो भवति तत्कस्मादनयोरप्येवमेकः समयोऽन्तरं न भवति?, उच्यते, स्त्रिया नपुंसकस्य च श्रेण्यारूढाववेदकभावानन्तरं मरणेन तथाविध-शुभाध्यवसायतो नियमेन देवपुरुषत्वेनोत्पादात्, **उत्कर्षतो वनस्पतिकालः,** स चैवमभिलपनीयः–**"अणंताओ उस्सप्पिणीओ ओसप्पिणीओ कालतो, खेत्ततो अणंता लोगा असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइ भागो"** [ ] इति।। ८६ ।।

तदेवं सामान्यतः पुरुषत्वस्यान्तरमभिधाय सम्प्रति तिर्यक्पुरुषविषयमतिदेशमाह–

(८७) [१]जं तिरिक्खित्थीणं तं तिरिक्खजोणितपुरिसाण वि।। ८७ ।।

'जं तिरिक्खजोणित्थीणमंतर'मित्यादि, यत्तिर्यग्योनिकस्त्रीणामन्तरं प्रागभिहितं **तदेव तिर्यग्योनिकपुरुषाणामप्य**विशेषितं वक्तव्यं, तच्चैवम्–सामान्यतस्तिर्यक्पुरुषस्य जघन्यतोऽन्तरमन्तर्मुहूर्त्तं तावत्कालस्थितिना मनुष्यादिभवेन व्यवधानात्, उत्कर्षतो वनस्पतिकालोऽसङ्ख्येयपुद्गलपरावर्त्ताख्यः, तावता कालेनामुक्तौ सत्यां नियोगतः पुरुषत्वयोगात्, एवं विशेषचिन्तायां जलचरपुरुषस्य स्थलचरपुरुषस्य खचरपुरुषस्यापि प्रत्येकं जघन्यत उत्कर्षतश्चान्तरं वक्तव्यम्।। ८७।।

सम्प्रति मनुष्यपुरुषत्वविषयान्तरप्रतिपादनार्थमतिदेशमाह–

(८८-८९) [२]जं मणुस्सित्थीणं तं मणुयपुरिसाणं ।। ८८-८९ ।।

'जं मणुस्सइत्थीणमंतरं तं मणुस्सपुरिसाण'मिति, यन्मनुष्यस्त्रीणामन्तरं प्रागभिहितं तदेव मनुष्यपुरुषाणामपि वक्तव्यं, तच्चैवम्–सामान्यतो **मनुष्यपुरुषस्य जघन्यतः क्षेत्रमधिकृत्यान्तरमन्तर्मुहूर्त्तं,**

१. जे.। ८७ सूत्रे मु. L **मध्ये** 'तिरिक्खजोणियपुरिसाणं जह० अंतोमु० उक्को० वणस्सतिकालो एवं जाव खहयरतिरिक्खजोणियपुरिसाणं' **इति पाठः** । २. जे.। ८८-८९ सूत्रे मु. L **मध्ये** 'मणुस्सपुरिसस्स णं भंते! केवतियं कालं अंतरं होइ?, गोयमा! खेत्तं पडुच्च जह० अंतोमु० उक्को० वणस्सतिकालो, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० अणंतं कालं अणंताओ उस्स० जाव अवड्ढपोग्गलपरियट्टं देसूणं कम्मभूमकाणं जाव विदेहो जाव धम्मचरणे एक्को समओ, सेसं जहित्थीणं जाव अंतरदीवकाणं' **इति पाठः**।।

तच्च प्रागिव भावनीयम्, **उत्कर्षतो वनस्पतिकालः, धर्मचरणमधिकृत्य जघन्यत एकं समयं,** चरणपरिणामात्परिभ्रष्टस्य समयानन्तरं भूयोऽपि कस्यचिच्चरणप्रतिपत्तिसम्भवात्, **उत्कर्षतो देशोनापार्द्धपुद्गलपरावर्त्तः**।। ८८ ।।

एवं भरतैरावतकर्म्मभूमकमनुष्यपुरुषस्य पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषस्य जन्म प्रतीत्य चरणमधिकृत्य च प्रत्येकं जघन्यत उत्कर्षतश्चान्तरं वक्तव्यम्। सामान्यतोऽकर्मभूमकमनुष्यपुरुषस्य जन्म प्रतीत्य जघन्यतोऽन्तरं दश वर्षसहस्राणि अन्तर्मुहूर्त्ताभ्यधिकानि, अकर्मभूमकमनुष्यपुरुषत्वेन मृतस्य जघन्यस्थितिषु देवेषूत्पद्य[ते],ततोऽपि च्युत्वा कर्मभूमिषु स्त्रीत्वेन पुरुषत्वेन वोत्पद्य कस्याप्यकर्मभूमित्वेन भूयोऽप्युत्पादात्, देवभवाच्च्युत्वाऽनन्तरमकर्म्मभूमिषु मनुष्यत्वेन तिर्यक्सञ्ज्ञिपञ्चेन्द्रियत्वेन वा उत्पादाभावादपान्तराले कर्म्मभूमिकेषु मृत्वोत्पादाभिधानम्, उत्कर्षतो वनस्पतिकालोऽन्तरं, संहरणं प्रतीत्य जघन्यतोऽन्तरमन्तर्मुहूर्त्तम्, अकर्म्मभूमेः कर्म्मभूमिषु संहृत्यान्तर्मुहूर्त्तानन्तरं तथाविधबुद्धिपरावर्त्तादिभावतो भूयस्तत्रैव नयनसम्भवात्, उत्कर्षतो वनस्पतिकालः, एतावतः कालादूर्द्ध्वमकर्मभूमिषूत्पत्तिवत् संहरणस्यापि नियोगतो भावात्। एवं हैमवतैरण्यवतादिष्वप्यकर्म्मभूमिषु जन्मतः संहरणतश्च जघन्यत उत्कर्षतश्चान्तरं वक्तव्यं **यावदन्तरद्वीपका**कर्मभूमकमनुष्यपुरुषवक्तव्यता।। ८९ ।।

सम्प्रति देवपुरुषाणामन्तरप्रतिपादनार्थमाह–

(९०) देवपुरिसाणं जह० अंतो० उक्को० वणस्सतिकालो ।। ९० ।।

(९१) एवं[१] जाव सहस्सारो, आणतो जाव गोविज्जा, अहं वासपुहुत्तं, उक्कोस वण० कालो ।। ९१-९२।।

'देवपुरिसस्स णं भंते!' इत्यादि, देवपुरुषस्य भदन्त! कालतः कियच्चिरमन्तरं भवति?, भगवानाह-गौतम! **जघन्येनान्तर्मुहूर्त्तं,** देवभवाच्च्युत्वा गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिसमाप्त्यनन्तरं तथाविधाध्यवसायमरणेन भूयोऽपि कस्यापि देवत्वेनोत्पादसम्भवात्, **उत्कर्षतो वनस्पतिकालः।** एवमसुरकुमारादारभ्य निरन्तरं **तावद्व**क्तव्यं **यावत्सहस्रार**कल्पदेवपुरुषस्यान्तरम्, **आनतकल्पदेवस्यान्तरं जघन्येन वर्षपृथक्त्वं,** कस्मादेतावदिहान्तरमिति चेदुच्यते, इह यो गर्भस्थः सर्वाभिः पर्याप्तिभिः पर्याप्तः स

---

१. जे. । ९१-९२ सूत्रयोः स्थाने मु. Lमध्ये 'भवणवासिदेवपुरिसाणं ताव जाव सहस्सारो, जह० अंतो० उक्को० वणस्सतिकालो आणतदेवपुरिसाणं भंते! केवतियं कालं अंतरं होइ?, गोयमा! जह० वासपुधत्तं उक्को० वणस्सतिकालो, एवं जाव गेवेज्जदेवपुरिसस्सवि' **इतिपाठः** ।।

शुभाध्यवसायोपेतो मृतः सन् आनतकल्पादारतो ये देवास्तेषूत्पद्यते, नानतादिषु, तावन्मात्रकालस्य तद्योग्याध्यवसायविशुद्ध्यभावात्, ततो य आनतादिभ्यश्च्युतः सन् भूयोऽप्यानतादिषूत्पत्स्यते स नियमाच्चारित्रमवाप्य, चारित्रं चाष्टमे वर्षे, तत उक्तं जघन्यतो वर्षपृथक्त्वम्, **उत्कर्षतो वनस्पतिकालः, एवं** प्राणतारणाच्युतकल्प**ग्रैवेयकदेवपुरुषाणामपि** प्रत्येकमन्तरं जघन्यत उत्कर्षतश्च वक्तव्यम्।।९०-९१-९२।।

(९३) अणुत्तरोववातियदेवपुरिसस्स जह० वासपुधत्तं उक्को० संखेज्जाइं सागरोवमाइं साइरेगाइं।। ९३ ।।

अनुत्तरोपपातिककल्पातीत**देवपुरुषस्य जघन्यतोऽन्तरं वर्षपृथक्त्वमुत्कर्षतः सङ्ख्येयानि सागरोपमाणि सातिरेकाणि,** तत्र सङ्ख्येयानि सागरोपमाणि तदन्यवैमानिकेषु सङ्ख्येयवारोत्पत्त्या, सातिरेकाणि मनुष्यभवैः, तत्र सामान्याभिधानेऽप्येतदपराजितान्तमवगन्तव्यं, सर्वार्थसिद्धे सकृदेवोत्पादतस्तत्रान्तरासम्भवाद् ।

अन्ये त्वभिदधति–भवनवासिन आरभ्य आईशानादमरस्य जघन्यतोऽन्तरमन्तर्मुहूर्त्तं, सनत्कुमारादारभ्यासहस्रारान्नव दिनानि, आनतकल्पादारभ्याच्युतकल्पं यावन्नव मासाः, नवसु ग्रैवेयकेषु सर्वार्थसिद्धमहाविमानवर्जेष्वनुत्तरविमानेषु च नव वर्षाणि, ग्रैवेयकान् यावत् सर्वत्राप्युत्कर्षतो वनस्पतिकालः, विजयादिषु चतुर्षु महाविमानेषु द्वे सागरोपमे, उक्तञ्च–

"ऑईसाणादमरस्स अंतरं हीणयं मुहुत्तंतो।
आसहसारे अच्चुयणुत्तरदिण-मास-वास नव।।१।।
थावरकालुक्कोसो सव्वट्ठे बीयओ न उववाओ।
दो अयरा विजयादिसु" इति ।।९३।। [पञ्चसङ्ग्रह ९३-९४]

तदेवमुक्तमन्तरं, साम्प्रतमल्पबहुत्वं वक्तव्यं, तानि च पञ्च, तद्यथा–प्रथमं सामान्याल्पबहुत्वं, द्वितीयं त्रिविधतिर्यक्पुरुषविषयं, तृतीयं त्रिविधमनुष्यपुरुषविषयं, चतुर्थं चतुर्विधदेवपुरुषविषयं, पञ्चमं मिश्रपुरुषविषयं, तत्र प्रथमं तावदभिधित्सुराह–

---

१. **आईशानादन्तरममराणां हीनं मुहूर्तान्तः । आ सहस्रारात् अच्युतात् अनुत्तरात् दिनमासवर्षनवकम्। १ । स्थावरकाल उत्कृष्टः सर्वार्थे द्वितीयो नोत्पादः । द्वे सागरोपमे विजयादिषु ।। २ ।।**

(९४-९५)→[1]एतेसि णं भंते तिरिक्खजोणियपुरिसाणं मणु. देवपु. कतरे क? सव्वत्थोवा मणुस्सपु. तिरि०असं. देवपुरि०संखे. । पुच्छा सव्वथोवा खह, थल. संसे.। ज.ति. संखे । मणु. पु. जधा मणुणीणं । एतेसि णं भंते! देवपु. भवण. जाव वेमाणि. कत? सव्वत्थोवा अणुत्तरोववातिया देवा पुरिसा, उवरिमगे. संखे. मज्झिमगे०संखे. हेट्ठिमगे. [संखे०] अच्चुए कप्पे देवपु. सं.आरणे सं., सहस्सारे असं. महासु. असं. लंतए असं. बंभलोए असं. माहिंदे [2]असं.←एतेसि णं भंते! देवपुरिसाणं भवणवासीणं वाणमंतराणं जोतिसियाणं वेमाणियाण य कतरे २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा वेमाणियदेवपुरिसा भवणवइदेवपुरिसा असंखे० वाणमंतरदेवपुरिसा असंखे० जोतिसिया देवपुरिसा संखेज्जगुणा।। ९४-९५।।

'पुरिसाणं भंते!' इत्यादि, **सर्वस्तोका मनुष्यपुरुषाः** सङ्ख्येयकोटीकोटीप्रमाणत्वात्, तेभ्यस्ति-**र्यग्योनिकपुरुषा असङ्ख्येयगुणाः,** प्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेश-राशिप्रमाणत्वात्तेषां, तेभ्यो देवपुरुषाः सङ्ख्येयगुणाः, बृहत्तरप्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाश-प्रदेशराशिप्रमाणत्वात्, तिर्यग्योनिकपुरुषाणां यथा तिर्यग्योनिकस्त्रीणाम्। **मनुष्यपुरुषाणां यथा मनुष्य-स्त्रीणामल्पबहुत्वं** (तथा) वक्तव्यम्। सम्प्रति देवपुरुषाणामल्पबहुत्वमाह–**सर्वस्तोका अनुत्तरौपपातिक-देवपुरुषाः,** क्षेत्रपल्योपमासङ्ख्येयभागवर्त्त्याकाशप्रदेशराशिप्रमाणत्वात्, तेभ्य **उपरितनग्रैवेयकदेवपुरुषाः सङ्ख्येयगुणाः,** बृहत्तर-क्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशि-मानत्वात्, कथमेतदवसेयमिति चेदुच्यते–विमानबाहुल्यात्, तथाहि–अनुत्तरदेवानां पञ्च विमानानि, विमानशतं तूपरितनग्रैवेयकप्रस्तटे, प्रतिविमानं चासङ्ख्येया देवाः, यथा चाधोऽधोवर्त्तीनि विमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्ते, ततोऽवसीयते-अनुत्तरविमानवासिदेवपुरुषापेक्षया बृहत्तरक्षेत्रपल्योपमासङ्ख्येयभाग-वर्त्तिनभःप्रदेशराशिप्रमाणा उपरितनग्रैवेयकप्रस्तटे देवपुरुषाः[सङ्ख्येयगुणाः], एवमुत्तरत्रापि भावना विधेया, तेभ्यो मध्यमग्रैवेयक**प्रस्तटदेवपुरुषाः सङ्ख्येयगुणाः,** तेभ्योऽप्यधस्तनग्रैवेयकप्रस्तटदेव-**पुरुषाः सङ्ख्येयगुणाः,** तेभ्योऽप्यच्युतकल्पदेवपुरुषाः **सङ्ख्येयगुणाः,** तेभ्योऽप्यारणकल्पदेवपुरुषाः

१. जे.। ←चिह्नद्वयमध्यवर्तिपाठस्थाने -L मु. पा २. मध्ये इत्थं पाठः अप्पाबहुयाणि जहेवित्थीणं जाव ।।
२. इतोऽग्रेऽपि जे.प्रतौ इत्थं पाठः- 'खहयर पंचि असं. थल सं. जल सं. वाण सं. जोति. संखे'।।

सङ्ख्येयगुणाः, यद्यप्यारणाऽच्युतकल्पौ समश्रेणीकौ समविमानसङ्ख्याकौ च तथाऽपि कृष्णपाक्षिकास्तथास्वाभाव्यात्प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते। अथ के ते कृष्णपाक्षिकाः?, उच्यते, इह द्वये जीवाः, तद्यथा–कृष्णपाक्षिकाः शुक्लपाक्षिकाश्च, तत्र येषां किञ्चिदूनोऽपार्द्धपुद्गल-परावर्त्तः संसारस्ते शुक्लपाक्षिकाः, इतरे दीर्घसंसारभाजिनः कृष्णपाक्षिकाः, उक्तञ्च–

"जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो।

ते सुक्कपक्खिया खलु अहिए पुण कण्हपक्खीया।।१।।"[श्रावकप्र. ७२, गाथासहस्री ३५०]

अत एव स्तोकाः शुक्लपाक्षिकाः, अल्पसंसाराणां स्तोकानामेव सम्भवात्, बहवः कृष्णपाक्षिकाः, दीर्घसंसाराणामनन्तानन्तानां भावात्, अथ कथमेतदवसातव्यं यथा कृष्णपाक्षिकाः प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते, उच्यते, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यमेवं पूर्वाचार्यैर्युक्तिभिरुपबृंहितं–कृष्ण-पाक्षिकाः खलु दीर्घसंसारभाजिन उच्यन्ते, दीर्घसंसारभाजिनश्च बहुपापोदयात्, बहुपापोदयाश्च क्रूरकर्माणः, क्रूरकर्माणश्च प्रायस्तथास्वाभाव्याद् तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते,यत उक्तम्–

"पायमिह कूरकम्मा, भवसिद्धीयावि दाहिणिल्लेसु।

नेरइयतिरियमणुयासुराइठाणेसु गच्छंति।।१।।"[श्रावकप्र. ७३, सम्बोधप्र. १४५६]

ततो दक्षिणस्यां दिशि प्राचुर्येण कृष्णपाक्षिकाणां सम्भवादुपपद्यतेअच्युतकल्पदेवपुरुषापेक्षयाऽऽ-रणकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽपि प्राणतकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽप्यानत-कल्पदेवपुरुषाः सङ्ख्येयगुणाः, अत्रापि प्राणतकल्पापेक्षया सङ्ख्येयगुणत्वं कृष्णपाक्षिकाणां दक्षिणस्यां दिशि प्राचुर्येण भावात्, एते च सर्वेऽप्यनुत्तरविमानवास्यादय आनतकल्पवासिपर्यन्तदेवपुरुषाः प्रत्येकं क्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणा द्रष्टव्याः, **"ओणयपाणयमाई पल्लस्सासंखभागो उ"** [ ] इति वचनात्, केवलमसङ्ख्येयो भागो विचित्र इति परस्परं यथोक्तं सङ्ख्येयगुणत्वं न विरुध्यते, आनतकल्पदेवपुरुषेभ्यः **सहस्रारकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः,** घनीकृतस्य लोकस्यैकप्रादेशिक्याः श्रेणेरसङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्योऽपि **महाशुक्रकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः,** बृहत्तरश्रेण्यसङ्ख्येयभागाकाशप्रदेशराशिप्रमाणत्वात्, कथमेतत्प्रत्येयमिति चेदुच्यते–विमानबाहुल्यात्, तथाहि–षट् सहस्राणि विमानानां सहस्रारकल्पे,

---

१. येषामपार्धः पुद्गलपरावर्तः शेष एव संसार। ते शुक्लपक्षिकाः खलु अधिके पुनः कृष्णपाक्षिकाः ।१।

२. प्राय इह क्रूरकर्माणो भवसिद्धिकाअपि दाक्षिणात्येषु । नैरयिकतिर्यग्मनुजासुरादिस्थानेषु गच्छन्ति ।। १।।

३. आनतप्राणतादयः पल्योपमस्यासङ्ख्यो भागस्तु ।

चत्वारिंशत्सहस्राणि महाशुक्रे, अन्यच्चाधोविमानवासिनो देवा बहुबहुतराः स्तोकस्तोकतरा उपरितनोपरितनविमानवासिनस्तत उपपद्यन्ते सहस्रारकल्पदेवपुरुषेभ्यो महाशुक्रकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः, **तेभ्योऽपि लान्तककल्पदेवपुरुषा असङ्ख्येयगुणाः,** बृहत्तमश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, **तेभ्योऽपि ब्रह्मलोककल्पवासिदेवपुरुषा असङ्ख्येयगुणाः,** भूयो बृहत्तमश्रेण्यसङ्ख्येयभागवर्त्त्याकाशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **माहेन्द्रकल्पदेवपुरुषा असङ्ख्येयगुणाः,** भूयस्तरबृहत्तमनभः श्रेण्यसङ्ख्येयभागगताकाशप्रदेशमानत्वात्, तेभ्यः सनत्कुमारकल्पदेवा असङ्ख्येयगुणाः, विमानबाहुल्यात्, तथाहि–द्वादश शतसहस्राणि सनत्कुमारकल्पे विमानानामष्टौ शतसहस्राणि माहेन्द्रकल्पे अन्यच्च दक्षिणदिग्भागवर्त्ती सनत्कुमारकल्पो माहेन्द्रकल्पश्चोत्तरदिग्वर्त्ती दक्षिणस्यां च दिशि बहवः समुत्पद्यन्ते कृष्णपाक्षिकाः, तत उपपद्यन्ते माहेन्द्रकल्पात्सनत्कुमारकल्पे देवा असङ्ख्येयगुणाः, एते च सर्वेऽपि सहस्रारकल्पवासिदेवादयः सनत्कुमारकल्पवासिदेवपर्यन्ताः प्रत्येकं स्वस्थाने चिन्त्यमाना घनीकृतलोकैकश्रेण्यसङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणा द्रष्टव्याः, केवलं श्रेण्यसङ्ख्येयभागोऽसङ्ख्येयभेदभिन्नस्तत इत्थमसङ्ख्येयगुणतयाऽल्पबहुत्वमभिधीयमानं न विरोधभाक्, सनत्कुमारकल्पदेवपुरुषेभ्य ईशानकल्प-देवपुरुषा असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशिसम्बन्धिनि द्वितीये वर्गमूले तृतीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्सङ्ख्याकासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यः सौधर्मकल्पवासिदेवपुरुषाः सङ्ख्येयगुणाः, विमानबाहुल्यात्, तथाहि–अष्टाविंशतिः शतसहस्राणि विमानानामीशानकल्पे द्वात्रिंशच्छतसहस्राणि सौधर्म्मकल्पे, अपि च दक्षिणदिग्वर्त्ती सौधर्म्मकल्प ईशानकल्पश्चोत्तरदिग्वर्त्ती, दक्षिणस्यां च दिशि बहवः कृष्णपाक्षिका उत्पद्यन्ते, तत ईशानकल्पवासिदेवपुरुषेभ्यः सौधर्मकल्पवासिदेवपुरुषाः सङ्ख्येयगुणाः।

नन्वियं युक्तिः सनत्कुमार-माहेन्द्रकल्पयोरप्युक्ता, परं तत्र माहेन्द्रकल्पापेक्षया सनत्कुमारकल्पे देवा असङ्ख्येयगुणा उक्ता इह तु सौधर्मे कल्पे सङ्ख्येयगुणास्तदेतत्कथम्?, उच्यते, तथावस्तुस्वाभाव्यात्, एतच्चावसीयते '**प्रज्ञापनादौ**' सर्वत्र तथाभणनात्, तेभ्योऽपि **भवनवासिदेवपुरुषा असङ्ख्येयगुणाः,** अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिरुपजायते तावत्सङ्ख्याकासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यो **व्यन्तरदेवपुरुषा असङ्ख्येयगुणाः,** सङ्ख्येययोजनकोटीकोटीप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाण-

त्वात्, तेभ्यः **सङ्ख्येयगुणा ज्योतिष्कदेवपुरुषाः,** षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणैकप्रादेशिक-श्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात् ।। ९४-९५।। सम्प्रति पञ्चममल्पबहुत्वमाह–

(९६) एतेसि णं भंते! तिरिक्खजोणियपुरिसाणं जलयराणं थलयराणं खहयराणं मणुस्सपुरिसाणं कम्मभूमकाणं अकम्मभूमकाणं अंतरदिव० देवपुरिसाणं भवण-वासीणं वाणमन्तराणं जोइसियाणं वेमाणियाणं सोधम्माणं जाव सव्वट्ठसिद्धगाण य कतरे २ हिंतो अप्पा वा बहुगा वा जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा अंतरदीवगअकम्मभूमगमणुस्सपुरिसा देवकुरूत्तरकुरु-अकम्मभूमगमणुस्सपुरिसा [1]दोवि संखेज्ज० हरिवास-रम्मगवासअक० दोवि संखेज्जगुणा, हेमवत-हेरण्णवत-वासअकम्म० दोवि संखि० भरहेरवतवासकम्मभूमगमणु० दोवि संखे० पुव्वविदेह-अवरविदेहकम्मभू० दोवि संखे० अणुत्तरोववातियदेवपुरिसा असंखे० उवरिमगेविज्ज-देवपुरिसा संखेज्ज० मज्झिमगेविज्जदेवपुरिसा संखेज्ज० हेट्ठिमगेविज्जदेवपुरिसा संखे० अच्चुयकप्पे देवपुरिसा संखे०, जाव आणतकप्पे देवपुरिसा संखेज्ज० सहस्सारे कप्पे देवपुरिसा असंखे० महासुक्के कप्पे देवपुरिसा असंखे० जाव माहिंदे कप्पे देवपुरिसा असंखे० सणंकुमारकप्पे देवपुरिसा [2]सं० ईसाणकप्पे देवपुरिसा असंखे० सोधम्मे कप्पे देवपुरिसा संखे० भवणवासिदेवपुरिसा असंखे० खहयरतिरिक्खजोणिय-पुरिसा असंखे० थलयरतिरिक्खजोणियपुरिसा संखे० जलयरतिरिक्खजोणियपुरिसा संखे० वाणमंतरदेवपुरिसा संखे०, जोतिसियदेवपुरिसा संखेज्जगुणा।।९६।।

'एएसि णं भंते!' इत्यादि, **सर्वस्तोका अन्तरद्वीपकमनुष्यपुरुषाः,** क्षेत्रस्य स्तोकत्वात्, तेभ्योऽपि **देवकुरूत्तरकुरुमनुष्यपुरुषाः सङ्ख्येयगुणाः,** क्षेत्रस्य बहुत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽपि **हरिवर्ष-रम्यकवर्षाकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः,** क्षेत्रस्यातिबहुत्वात्, स्वस्थाने

---

१. सर्वत्र तुल्या इति गम्यम् - **इति L पृ. २४७ टि.९ ।। २. पातासंपा १०-१, पाकाहेम १०१३०, पाकाभा.१२, पाकाभा.७, रासं७७३, आबोलामू.२१।** असं.मु.L **पाकाहेम १०५६१, पाकाहेम १००१४, रासं २१८, आबोलासं २१।।**

तु द्वयेऽपि परस्परं तुल्याः, क्षेत्रस्य समानत्वात्, तेभ्योऽपि **हैमवत-हैरण्यवताकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः,** क्षेत्रस्याल्पत्वेऽप्यल्पस्थितिकतया प्राचुर्येण लभ्यमानत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽपि **भरतैरावतकर्म्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः,** अजितस्वामिकाले उत्कृष्टपदे (इव) स्वभावत एव भरतैरावतेषु [च] मनुष्यपुरुषाणामतिप्राचुर्येण सम्भवात्, स्वस्थाने च द्वयेऽपि परस्परं तुल्याः, क्षेत्रस्य तुल्यत्वात्, तेभ्योऽपि **पूर्वविदेहापरविदेहकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः,** क्षेत्रबाहुल्यादजितस्वामिकाले इव स्वभावत एव मनुष्यपुरुषाणां प्राचुर्येण सम्भवात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्यो**ऽनुत्तरौपपातिकदेवपुरुषा असङ्ख्येयगुणाः,** क्षेत्रपल्योपमा-सङ्ख्येयभागवर्त्त्याकाशप्रदेशप्रमाणत्वात्, तदनन्तर**मुपरितनग्रैवेयकप्रस्तटदेवपुरुषा मध्यमग्रैवेयक-प्रस्तटदेवपुरुषा अधस्तनग्रैवेयकप्रस्तटदेवपुरुषा अच्युतकल्पदेवपुरुषा** आरणकल्पदेवपुरुषाः प्राणतकल्पदेवपुरुषा **आनतकल्पदेवपुरुषा** यथोत्तरं **सङ्ख्येयगुणाः,** भावना प्रागिव, तदनन्तरं **सहस्रारकल्पदेवपुरुषा** [महाशुक्रकल्पदेवपुरुषाः] लान्तककल्पदेवपुरुषा ब्रह्मलोककल्पदेवपुरुषा **माहेन्द्रकल्पदेवपुरुषाः सनत्कुमारकल्पदेवपुरुषा ईशानकल्पदेवपुरुषा** यथोत्तर**मसङ्ख्येयगुणाः, सौधर्म्मकल्पदेवपुरुषाः सङ्ख्येयगुणाः,** सौधर्म्मकल्पदेवपुरुषेभ्यो **भवनवासिदेवपुरुषा असङ्ख्येयगुणाः,** भावना सर्वत्रापि प्रागिव, तेभ्यः **खचरतिर्यग्योनिकपुरुषा असङ्ख्येयगुणाः,** प्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः **स्थलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः,** तेभ्योऽपि **जलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः,** युक्तिरत्रापि प्रागिव, तेभ्योऽपि **वानमन्तरदेवपुरुषाः सङ्ख्येयगुणाः,** सङ्ख्येययोजनकोटीप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यो **ज्योतिष्कदेवपुरुषाः सङ्ख्येयगुणाः,** युक्तिः प्रागेवोक्ता।। ९६ ।।

(९७) पुरिसवेदस्स णं भंते! कम्मस्स केवतियं कालं बंधट्ठिती पण्णत्ता?, गोयमा! जह० अट्ठ संवच्छराणि, उक्को० दस सागरोवमकोडाकोडीओ, दसवास-सयाइं अबाहा, अबाहूणिया कम्मठिती कम्मणिसेओ।।९७।।

(९८) पुरिसवेदे णं भंते! किंपकारे पण्णत्ते?, गोयमा! दवग्गिजालसमाणे[1] पण्णत्ते, से तं पुरिसा।। ९८।।

---

१. ता L । वणदव० **कखगटमु** । दवग्गिजालसमाणोयं - ता । तृणाग्निसदृशः - **नव्यकर्मग्रन्थे।।**

पुरुषवेदस्थितिर्जघन्यतोऽष्टौ संवत्सराणि, एतन्न्यूनस्य तन्निबन्धनविशिष्टाध्यवसायाभावतो जघन्यत्वेनासम्भवात्, **उत्कर्षतो दश सागरोपमकोटीकोटयः, दश वर्षशतान्यबाधा, अबाधोना कर्म्मस्थितिः कर्मनिषेकः,** अस्य व्याख्या प्राग्वत्। तथा **पुरुषवेदो भदन्त! किंप्रकारः प्रज्ञप्तः?,** भगवानाह–**गौतम! दवाग्निज्वालासमानः,** प्रारम्भे तीव्रमदनदाह इति भावः, **प्रज्ञप्तः**।। ९७-९८।।

व्याख्यातः पुरुषाधिकारः, सम्प्रति नपुंसकाधिकारप्रस्तावः, तत्रेदमादिसूत्रम्–

(९९) से किं तं णपुंसका?, णपुंसका तिविधा पण्णत्ता, तंजहा-नेरइयनपुंसका तिरिक्खजोणियनपुंसका मणुस्सजोणियणपुंसका।।९९।।

'से किं तं नपुंसगा' इत्यादि, **अथ के ते नपुंसकाः?, नपुंसकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–नैरयिकनपुंसकास्तिर्यग्योनिकनपुंसका मनुष्यनपुंसकाश्च**।।९९।। नैरयिकनपुंसकप्रतिपादनार्थमाह–

(१००)से किं तं नेरइयनपुंसका?, नेरइयनपुंसका सत्तविधा पण्णत्ता, तंजहा–रयणप्पभापुढविनेरइयनपुंसका सक्करप्पभापुढविनेरइयनपुंसका जाव अधेसत्तमपुढविनेरइयणपुंसका, [१]से तं नेरइयनपुंसका।। १००।।

'से किं त'मित्यादि, **अथ के ते नैरयिकनपुंसकाः?**, पृथ्वीभेदेन **सप्तविधाः प्रज्ञप्ताः, तद्यथा–रत्नप्रभापृथ्वीनैरयिकनपुंसकाः शर्कराप्रभापृथ्वीनैरयिकनपुंसकाः यावदधःसप्तमपृथिवीनैरयिकनपुंसकाः,** उपसंहारमाह–**'से तं नेरइयनपुंसका'**।।१००।। सम्प्रति तिर्यग्योनिकनपुंसकप्रतिपादनार्थमाह–

(१०१) से किं तं तिरिक्खजोणियणपुंसका?, २ पंचविधा पण्णत्ता, तंजहा-एगिंदियतिरिक्खजोणियनपुंसका, बेइंदि० तेइंदि० चउ० पंचेंदियतिरिक्खजोणियणपुंसका।। १०१ ।।

'से किं त' मित्यादि प्रश्नसूत्रं सुगमम्, भगवानाह–**तिर्यग्योनिकनपुंसकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा-एकेन्द्रियतिर्यग्योनिकनपुंसका** यावत्**पञ्चेन्द्रियतिर्यग्योनिकनपुंसकाः**।। १०१।।

(१०२) से किं तं एगिंदियतिरिक्खजोणियनपुंसका?, २ [२]पंचविधा पण्णत्ता, तं० पु० आ० ते० वा० व० से तं एगिंदियतिरिक्खजोणियणपुंसका।। १०२।।

---

१. मु. । से तं नेरइयनपुंसका L **नास्ति** ।। २. अणेगवि० SP **कग**।।

एकेन्द्रियनपुंसकप्रश्नसूत्रं सुगमं, भगवानाह–**एकेन्द्रियतिर्यग्योनिकनपुंसकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा-पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अप्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका-स्तेजस्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका वायुकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका वनस्पति-कायिकैकेन्द्रियतिर्यग्योनिकनपुंसकाः,** उपसंहारमाह–**'से तं एगिंदियतिरिक्खजोणियनपुंसका'**।। १०२।। द्वीन्द्रियनपुंसकप्रतिपादनार्थमाह–

(१०३) से किं तं बेइंदियतिरिक्खजोणियणपुंसका?, २ अणेगविधा पण्णत्ता[1]०, से तं बेइंदियतिरिक्खजोणिया, एवं तेइंदियावि, चउरिंदियावि।। १०३।।

'बेइंदिए'त्यादि, द्वीन्द्रियतिर्यग्योनिकनपुंसका भदन्त! कतिविधाः प्रज्ञप्ताः?, भगवानाह–गौतम! **अनेकविधाः प्रज्ञप्ता**स्तद्यथा–**'पुलाकिमिया'** इत्यादि पूर्ववत्तावद्वक्तव्यं यावच्चतुरिन्द्रियभेदपरिसमाप्तिः।। १०३।।

(१०४) से किं तं पंचेंदियतिरिक्खजोणियणपुंसका?, २ तिविधा पण्णत्ता, तंजहा–जलयरा थलयरा खहयरा।। १०४।। (१०५) से किं तं जलयरा?, २ [2]सो चेव इत्थिभेदो आसालियसहितो भाणियव्वो, से तं पंचेंदियतिरिक्खजोणियण-पुंसका।। १०५।। (१०६) से किं तं मणुस्सनपुंसका?, २ तिविधा पण्णत्ता, तंजहा-कम्मभूमगा अकम्मभूमगा अंतरदीवका, भेदो[3] ।। १०६।।

पञ्चेन्द्रियतिर्यग्योनिकनपुंसका भदन्त! कतिविधाः प्रज्ञप्ताः?, गौतम! **त्रिविधाः प्रज्ञप्ताः, तद्यथा-जलचराः स्थलचराः खचराश्च,** एते च प्राग्वत्सप्रभेदा वक्तव्याः, उपसंहारमाह–**'से तं पंचिंदियतिरिक्खजोणियणपुंसगा'**। **'से किं त'**मित्यादि, **अथ के ते मनुष्यनपुंसकाः?, मनुष्यनपुंसकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-कर्मभूमका अकर्मभूमका अन्तरद्वीपकाश्च**, एतेऽपि प्राग्वत्सप्रभेदा वक्तव्याः।।१०४-१०५-१०६।।

उक्तो भेदः, सम्प्रति स्थितिप्रतिपादनार्थमाह–

---

१. अत्र सूत्र-वृत्तिसम्मतपाठयोर्भेदः अनेन प्रतीयते वृत्तिकारस्य सम्मुखे कश्चित् विस्तृतपाठादर्शः आसीत् इति L पृ.२४८ टि.५ ।। २. L । सो चेव पुव्वुत्तभेदो आसालियवज्जितो भाणियव्वो-**मु.ग।। ३.** भेदो जाव - **मु.। इतोऽग्रे** S P **कखग आदर्शेषु एते वर्णाः लिखिताः दृश्यन्ते** - लृ तृ ला ध ह्रा। **ट प्रतौ** जाव भाणियव्वो **इति पाठोऽस्ति। ता प्रतौ पाठसङ्क्षेपो विद्यते।**

(१०७)णपुंसकस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जह० अंतो० उक्को० तेत्तीसं सागरोवमाइं।। १०७।।

'नपुंसगस्स णं भंते!' इत्यादि सुगमं, नवर**मन्तर्मुहूर्त्तं** तिर्यग्मनुष्यापेक्षया द्रष्टव्यं, **त्रयस्त्रिंशत्सागरोपमाणि** सप्तमपृथिवीनारकापेक्षया।।१०७।। तदेवं सामान्यतः स्थितिरुक्ता, सम्प्रति विशेषतस्तां विचिचिन्तयिषुः प्रथमतः सामान्यतो विशेषतश्च नैरयिकनपुंसकविषयामाह–

(१०८) नेरइयनपुंसगस्स णं भंते! केवतियं कालं ठिती पण्णता?, गोयमा! जह० दसवाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं, रयणाए जहं० दसवा० उक्को० सागरं, सक्कर०३, वालु०३ ग्रा, पंक०ग्रा द० धूम० द० दग्रा, तमाए सत्तदस बावीसा, तमतमा बावीस तेत्तीसा।। १०८।।

'नेरइयनपुंसगस्स ण'मित्यादि, सामान्यतो **नैरयिकनपुंसकस्य जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि,** विशेषचिन्तायां **रत्नप्रभा**पृथिवीनैरयिकनपुंसकस्य **जघन्यतः** स्थिति**र्दश** वर्षसहस्राणि **उत्कर्षत** एकं **सागरोपमं, शर्करा**पृथिवीनैरयिकनपुंसकस्य जघन्यत एकं सागरोपममुत्कर्षत**स्त्रीणि** सागरोपमाणि, **वालुका**प्रभापृथिवीनैरयिकनपुंसकस्य जघन्यत**स्त्रीणि** सागरोपमाणि उत्कर्षतः **सप्त, पङ्कप्रभा**पृथिवीनैरयिकनपुंसकस्य जघन्यतः **सप्त** सागरोपमाणि उत्कर्षतो **दश, धूमप्रभा**पृथिवी-नैरयिकनपुंसकस्य जघन्यतो **दश** सागरोपमाणि उत्कर्षतः **सप्तदश, तमःप्रभा**-पृथिवीनैरयिकनपुंसकस्य जघन्यतः **सप्तदश** सागरोपमाणि उत्कर्षतो **द्वाविंशतिः, अधःसप्तमपृथिवी**-नैरयिकनपुंसकस्य जघन्यतो **द्वाविंशतिः** सागरोपमाणि उत्कर्षत**स्त्रयस्त्रिंशत्,** क्वचिदतिदेशसूत्रं 'जहा पण्णवणाए ठिइपदे तहे'त्यादि, तत्राप्येवमेवातिदेशव्याख्याऽपि कर्त्तव्या।। १०८ ।।

(१०९) तिरिक्खजोणियणपुंसकस्स णं भंते! केवइयं कालं ठिती प०, गोयमा!, जह० अंतो० उक्को० पुव्वकोडी (११०) एगिंदियतिरिक्खजोणियणपुंसक० जह० अंतो० उक्को० बावीसं वाससहस्साइं (१११) पुढविकाइयएगिंदियतिरिक्ख-

१. ता. । मु. →← **मध्ये चिह्नद्वयमध्यवर्तिपाठस्थाने** 'सव्वेसिं ठिती भाणियव्वा जाव अधेसत्तमापुढविनेरइया' **इति पाठः** ।।

जोणियणपुंसकस्स णं भंते! केवतियं कालं ठिती पन्नत्ता?, जह० अंतो० उक्को० बावीसं वाससहस्साइं, सव्वेसिं एगिंदियणपुंसकाणं ठिती भाणियव्वा-मुढवी[1] एवं विधा, आउ० णपुंस० ग्रा, तेउ० ३ रातिंदिया, वाउ० ३ वाससह० वण० दसवाससह० ←।।१०९-१११।।

सामान्यत**स्तिर्यग्योनिकनपुंसकस्य स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी,** सामान्यत **एकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि**, विशेषचिन्तायां **पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि, अप्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य** जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः **सप्त** वर्षसहस्राणि, **तेजः**कायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षत**स्त्रीणि रात्रिन्दिवानि, वातकायिकै**केन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षत**स्त्रीणि वर्षसहस्राणि, वनस्पतिकायिकै**केन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो **दश वर्षसहस्राणि**।। १०९-१११ ।।

(११२) →[2]बेंदि० बार वासा, तेंदि० अउणपण्णं रातिं० चतु० छम्मास← (११३) पंचिंदियतिरिक्खजोणियणपुंसकस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जह० अंतो० उक्को० पुव्वकोडी, एवं जलयरतिरिक्ख०चउप्पदथलयर-उरगपरिसप्प-भुयगपरिसप्प-खहयरतिरिक्ख० सव्वेसिं जह० अंतो० उक्को० पुव्वकोडी। (११४) मणुस्सणपुंसकस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडी, धम्मचरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी।।११२-११४।।

द्वीन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो **द्वादश वर्षाणि**। **त्रीन्द्रिय**तिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षत **एकोनपञ्चाशद् रात्रिन्दिवानि**। **चतुरिन्द्रिय**तिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः **षण्मासाः**। सामान्यतः **पञ्चेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्त-**

---

१. →~~चिह्नद्वयमध्यवर्तिपाठः ता-मध्ये वर्तते~~ । २. ता.। →~~चिह्नद्वमध्यवर्तिपाठस्थाने~~ मु. **मध्ये** 'बेइंदिय-तेइंदिय-चउरिंदिय-णपुंसकाणं ठिती भाणितव्वा' **इति पाठः** ।।

र्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, विशेषचिन्तायां **जलचरस्य, स्थलचरस्य खचरस्यापि पञ्चेन्द्रियतिर्यग्यो-निकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी।** सामान्यतो **मनुष्यनपुंसकस्यापि जघन्य-तोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी,** कर्म्मभूमकमनुष्यनपुंसकस्य क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, **'धर्मचरणं'** बाह्यवेषपरिकरितप्रव्रज्याप्रतिपत्तिमङ्गीकृत्य **जघन्येनान्तर्मुहूर्त्तं** तत ऊर्ध्वं मरणादिभावात्, **उत्कर्षतो देशोना पूर्वकोटी,** संवत्सराष्टकादूर्ध्वं प्रतिपद्याऽऽजन्मपालनात्।। ११२-११४।।

(११५) कम्मभूमगभरहेरवय-पुव्वविदेह-अवरविदेह-मणुस्सणपुंसकस्सवि तहेव।। ११५।।

भरतैरावतकर्मभूमकमनुष्यनपुंसकस्य पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकस्य च क्षेत्रं धर्म्मचरणं च प्रतीत्य जघन्यत उत्कर्षतश्चै**वमेव वक्तव्यम्**।। ११५ ।।

(११६) अकम्मभूमगमणुस्सणपुंसकस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जम्मणं पडुच्च जह० अंतो० उक्को० अंतोमु०, साहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी, एवं जाव अंतरदीवकाणं।। ११६ ।।

अकर्म्मभूमकमनुष्यनपुंसकस्य जन्म प्रतीत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षेणाप्यन्तर्मुहूर्त्तम्, अकर्म्मभूमौ हि मनुष्या नपुंसकाः संमूर्च्छिमा एव भवन्ति, न गर्भव्युत्क्रान्तिकाः, युगलधर्मिणां नपुंसकत्वा-भावात्, संमूर्च्छिमाश्च जघन्यत उत्कर्षतो वाऽन्तर्मुहूर्त्तायुषः, केवलं जघन्यादुत्कृष्टमन्तर्मुहूर्त्तं बृहत्तरमवसेयं, **संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी,** संहरणादूर्ध्वमामरणान्तमवस्थान-सम्भवात्, उत्कर्षतो देशोनता च पूर्वकोट्या गर्भान्निर्गतस्य संहरणसम्भवात्, एवं विशेषचिन्तायां हैमवत-हैरण्यवताकर्म्मभूमकमनुष्यनपुंसकस्य हरिवर्ष-रम्यकवर्षाकर्म्मभूमकमनुष्यनपुंसकस्य देवकुरूत्तरकुर्वकर्म्म-भूमकमनुष्यनपुंसकस्य अन्तरद्वीपकमनुष्यनपुंसकस्य च जन्म संहरणं च प्रतीत्यैवमेव वक्तव्यम्।। ११६।।

सम्प्रति कायस्थितिमाह–

(११७) णपुंसए णं भंते! णपुंसएत्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं एक्कं समयं उक्को० तरुकालो[1]।। ११७।।(११८) णेरइयाणं[2] जधा ठिती।।११८।।

'णपुंसगे णं भंते!' इत्यादि, **नपुंसको भदन्त! नपुंसक इत्यादि,** सामान्यतस्तद्भेदापरित्यागेन कालतः कियच्चिरं भवति?, भगवानाह– **गौतम! जघन्यत एकं समयमुत्कर्षतो वनस्पतिकालं,** तत्रैकसमयता उपशमश्रेणिसमाप्तौ सत्यामवेदकत्वे सति उपशमश्रेणीतः प्रतिपततो नपुंसकवेदोदयसमयानन्तरं कस्यचिन्मरणात्, तथा मृतस्य चावश्यं देवोत्पादे पुंवेदोदयभावात्, वनस्पतिकालः–आवलिकासङ्ख्येयभागगतसमयराशिप्रमाणासङ्ख्येयपुद्गलपरावर्त्तप्रमाणः[3]। **नैरयिकनपुंसककायस्थिति**चिन्तायां यदेव सामान्यतो विशेषतश्च स्थितिमानं जघन्यत उत्कर्षतश्चोक्तं तदेवावसातव्यं, भवस्थितिव्यतिरेकेण तत्रान्यस्याः कायस्थितेरसम्भवात् ।। ११७-११८।।

(११९) तिरिक्खजोणियणपुंसए[4] णं भंते! ति०?, २ गोयमा! जह० अंतो० उक्को० वणस्सतिकालो।। (१२०) एवं एगिंदियणपुंसकस्स, वणस्सतिकाइयस्सवि एवमेव, सेसाणं जह० अंतो० उक्को० असंखिज्जं कालं असंखेज्जाओ उस्सप्पिणि-ओसप्पिणीओ कालतो, खेत्तओ असंखेज्जा लोया।। ११९-१२०।।

सामान्यत**स्तिर्यग्योनिकनपुंसककायस्थितिचिन्तायां जघन्यतोऽन्तर्मुहूर्त्तं,** तदनन्तरं मृत्वा गत्यन्तरे वेदान्तरे वा सङ्क्रमात्, **उत्कर्षतो वनस्पतिकालः।** विशेषचिन्तायां**मेकेन्द्रियतिर्यग्योनिकनपुंसक-कायस्थिता**वपि **जघन्यतोऽन्तर्मुहूर्त्तं,** भावना प्राग्वत्, **उत्कर्षतो वनस्पतिकालो** यथोदितरूपः, तत्रापि विशेषचिन्तायां पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ **जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो-ऽसङ्ख्येयकालोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीप्रमाणः,** तथा चाह–**"उक्कोसेणमसंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालतो, खेत्ततो असंखिज्जा लोगा"** [ ], एवमप्कायिक-तेजःकायिक-वायुकायिक-कायस्थितिष्वपि वक्तव्यं, वनस्पतिकायिककायस्थितौ तथा वक्तव्यं यथा सामान्यत एकेन्द्रियकायस्थितौ।। ११९-१२०।।

---

१. **कखगट मु.** वणस्सइकालो L ।। २. **जे. । सूत्र ११८ स्थाने मु. मध्ये** 'णेरइयणपुंसए णं भंते!, २ गोयमा! जह० दस वाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं, एवं पुढवीए २ ठिती भाणियव्वा' **इति पाठः । द्र. प्रज्ञापना सू. ४/४-२२।। ३. व्यवहारराश्यन्तर्गतनपुंसकत्वमाश्रित्य इयं विवक्षा, एवमग्रेऽपि ।। ४. सूत्र ११९-१२० स्थाने जे. मध्ये-**एगिंदिवि णपुंसए पुढवी आउ वा० जणय पुढवीकालो, वणस्सतीणं वण०कालो, विगलाणं संखेज्जकालं **-इति पाठः ।।**

(१२१) बेइंदियतेइंदियचउरिंदियनपुंसकाण य जह० अंतो० उक्को० संखेज्जं कालं।। (१२२) पंचिंदियतिरिक्खजोणियणपुंसए णं भंते!२, गोयमा! जह० अंतो० उक्को० पुव्वकोडिपुहुत्तं। एवं जलयरतिरिक्खचउप्पदथलचरउरगपरिसप्पभुयग-परिसप्पमहोरगाण(खचराण) वि।। १२१-१२२ ।।

द्वीन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सङ्ख्येयः कालः, स च सङ्ख्येयानि वर्षसहस्राणि प्रतिपत्तव्यः। एवं त्रीन्द्रियचतुरिन्द्रियतिर्यग्योनिकनपुंसककायस्थित्योरपि वक्तव्यम्। **पञ्चेन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं,** तच्च निरन्तरं सप्तभवान् पूर्वकोट्यायुषो नपुंसकत्वेनानुभवतो वेदितव्यं, तत ऊर्ध्वं त्ववश्यं वेदान्तरे विलक्षणभवान्तरे वा सङ्क्रमात्, **एवं जलचरस्थलचरखचर**सामान्यतो मनुष्यनपुंसककायस्थितिष्वपि वेदितव्यम्, ।। १२१-१२२।।

(१२३) मणुस्सणपुंसकस्स णं भंते! ० खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडिपुहुत्तं, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी। एवं कम्मभूमगभरहेरवयपुव्वविदेहअवरविदेहेसुवि भाणियव्वं।। १२३।। (१२४) अकम्मभूमकमणुस्सणपुंसए णं भंते! ० जम्मणं[३] पडुच्च जह० अंतो० उक्को० मुहुत्तपुहुत्तं, साहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी। एवं सव्वेसिं जाव अंतरदीवगाणं।।१२४ ।।

कर्मभूमक**मनुष्यनपुंसक**कायस्थितौ **क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटीपृथक्त्वं,** भावना प्रागिव, **धर्म्मचरणं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी,** अत्रापि भावना पूर्ववत्। एवं **भरतैरावतकर्म्मभूमक**मनुष्यनपुंसककायस्थितौ **पूर्वविदेहापरविदेह**कर्म्मभूमकमनुष्य-नपुंसककायस्थितौ च वाच्यम्, सामान्यतो**ऽकर्म्मभूमकमनुष्यनपुंसककायस्थितिचिन्तायां जन्म[३] प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तम्,** एतावत्यपि कालेऽसकृदुत्पादात्, **उत्कर्षतोऽन्तर्मुहूर्त्तपृथक्त्वं,**[४] तत ऊर्ध्वं तत्र तथोत्पादाभावात्, **संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं** तत ऊर्ध्वं मरणादिभावात् **उत्कर्षतो देशोना**

१. एवं जाव सहचर०जे । २. द्र. २/११९ । ३. संमूर्च्छिमापेक्षया इदमधिकम् इति ज्ञेयम् ।। ४. अत्र सूत्र-वृत्त्योर्भेदो दृश्यते ।।

पूर्वकोटी। एवं हैमवत-हैरण्यवत-हरिवर्ष-रम्यकवर्ष-देवकुरूत्तरकुर्वन्तरद्वीपकमनुष्यनपुंसककायस्थितिष्वपि वक्तव्यम्।। १२३-१२४।। तदेवमुक्ता कायस्थितिः, साम्प्रतमन्तरमभिधित्सुरिदमाह–

(१२५) णपुंसकस्स णं भंते! केवतियं कालं अंतरं होइ?, गोयमा! जह० अंतो० उक्को० सागरोवमसयपुहुत्तं सातिरेगं।। १२५ ।।

'नपुंसगस्स ण'मित्यादि, **नपुंसकस्य ण**मिति वाक्यालङ्कारे **भदन्त! अन्तरं कालतः कियच्चिरं भवति?,** नपुंसको भूत्वा नपुंसकत्वात्परिभ्रष्टः पुनः कियता कालेन नपुंसको भवतीत्यर्थः, भगवानाह– **गौतम! जघन्यतोऽन्तर्मुहूर्त्तम्,** एतावता पुरुषादिकालेन व्यवधानात्, **उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं,** पुरुषादिकालस्यैतावत एव सम्भवात्, तथा चात्र **'सङ्ग्रहणि'**गाथा-

"इत्थिनपुंसा संचिट्ठणेसु पुरिसंतरे य समओ उ।
पुरिसनपुंसा संचिट्ठणंतरे सागरपुहुत्तं।।१।।"

अस्या अक्षरगमनिका–संचिट्ठणा नाम सातत्येनावस्थानं, तत्र स्त्रिया नपुंसकस्य च सातत्येनावस्थाने पुरुषान्तरे च जघन्यत एकः समयः तथा यथा प्रागभिहितम्–'इत्थीए णं भंते! इत्थीत्ति कालतो कियच्चिरं होइ?, गोयमा! एगेणं आदेसेणं जह० एगं समयं' [२/४८] इत्यादि, तथा-'नपुंसगे णं भंते! नपुंसगत्ति कालतो कियच्चिरं होइ?, गोयमा! जह० एक्कं समयं' [२/११७] इत्यादि, तथा–'पुरिसस्स णं भंते! अंतरं कालतो कियच्चिरं होइ?, गोयमा! जहन्नेणं एक्कं समयं' [२/८६] इत्यादि। तथा पुरुषस्य नपुंसकस्य यथाक्रमं संचिट्ठणा–सातत्येनावस्थानमन्तरं चोत्कर्षतः 'सागरपृथक्त्वं' पदैकदेशे पदसमुदायोपचारात्, सागरोपमशतपृथक्त्वं, तथा च प्रागभिहितम्–'पुरिसे णं भंते! पुरिसेत्ति कालतो कियच्चिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं'[२/८२] नपुंसकान्तरोत्कर्षप्रतिपादकं चेदमेवाधिकृतं तत्सूत्रमिति।। १२५।।

(१२६) णेरइयणपुंसकस्स णं भंते! केवतियं कालं अंतरं होइ?, जह० अंतो० उक्को० तरुकालो[१]। (१२७) रयणप्पभापुढवीनेरइयणपुंसकस्स जह० अंतो० उक्को० तरुकालो[२], एवं सव्वेसिं जाव[३] अधेसत्तमा। (१२८) तिरिक्खजोणियणपुंसकस्स जह० अंतो० उक्को० सागरोवमसयपुहुत्तं सातिरेगं। (१२९) एगिंदियतिरिक्खजोणियण-

१-२. वणकालो -जे.। वणस्सइकालो - L ।। ३. द्र. २/११९ सू.।।

पुंसकस्स जह० अंतो० उक्को० दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं। (१३०) पुढविआउतेउवाऊणं जह० अंतो० उक्को० वणस्सइकालो।। १२६-१३०।।

तथा सामान्यतो **नैरयिकनपुंसकस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तं,** सप्तमनरकपृथिव्या उद्वृत्य तन्दुलमत्स्यादिभवेष्वन्तर्मुहूर्त्तं स्थित्वा भूयः सप्तमनरकपृथिवीगमनस्य श्रवणात्, **उत्कर्षतो वनस्पतिकालः,** नरकभवादुद्वृत्य पारम्पर्येण निगोदेषु मध्ये गत्वाऽनन्तं कालमवस्थानात्, एवं विशेषचिन्तायां प्रतिपृथिव्यपि वक्तव्यम्।। तथा सामान्यचिन्तायां **तिर्यग्योनिकनपुंसकस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सागरोपमशतपृथक्त्वं,** सातिरेकत्वभावना प्रागिव।। विशेषचिन्तायां सामान्यत **एकेन्द्रियतिर्यग्योनिकनपुंसकस्यान्तरमन्तर्मुहूर्त्तं** तावता द्वीन्द्रियादिकालेन व्यवधानात्, **उत्कर्षतो द्वे सागरोपमसहस्रे** [अभ्यधिकानि]सङ्ख्येयवर्षाणि, त्रसकायस्थितिकालस्य एकेन्द्रियत्वव्यवधायकस्योत्कर्षतोऽप्येतावत एव सम्भवात्। **पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः।** एव**मप्कायिकतेजःकायिकवायुका**यिकैकेन्द्रियतिर्यग्योनिकनपुंसकानामपि वक्तव्यम्।। १२६-१३०।।

(१३१) वणस्सतिकाइयाणं[1] जह० अंतो० उक्को० असंखेज्जं कालं जाव असंखेज्जा लोया, सेसाणं[2] बेइंदियादीणं जाव खहयराणं जह० अंतो० उक्को० वणस्सतिकालो।। १३१ ।।

वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालं यावत्, स चासङ्ख्येयः कालोऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतो**ऽसङ्ख्येया लोकाः,** किमुक्तं भवति? असङ्ख्येयलोकाकाशप्रदेशानां प्रतिसमयमेकैकापहारे यावत्य उत्सर्प्पिण्यवसर्पिण्यो भवन्ति तावत्य इत्यर्थः, वनस्पतिभवात्प्रच्युतस्यान्यत्रोत्कर्षत एतावन्तं कालमवस्थानसम्भवात्, तदनन्तरं संसारिणो नियमेन भूयो वनस्पतिकायिकत्वेनोत्पादभावात्। **द्वीन्द्रिय**त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियतिर्यग्योनिकनपुंसकानां जलचरस्थलचर**खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसकानां** सामान्यतो मनुष्यनपुंसकस्य च **जघन्यतोऽन्तरमन्तर्मुहूर्त्तमुत्कर्षतो**ऽनन्तं कालं, स चानन्तः कालो **वनस्पतिकालो** यथोक्तस्वरूपः प्रतिपत्तव्यः ।। १३१ ।।

---

१. वणस्सतीणं पुढवीकालो बे० L।। २. कखगट मु.। सेसाणं - L **नास्ति** ।।

(१३२) मणुस्सणपुंसकस्स खेत्तं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो, धम्मचरणं पडुच्च जह० एगं समयं उक्को० अणंतं कालं जाव अवड्ढपोग्गलपरियट्टं देसूणं, एवं कम्मभूमकस्सवि भरतेरवतस्स पुव्वविदेहअवरविदेहकस्सवि।।१३२।।
(१३३) अकम्मभूमकमणुस्सणपुंसकस्स णं भंते! केवतियं कालं०?, जम्मणं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो, संहरणं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो एवं जाव अंतरदीवगत्ति।। १३२-१३३ ।।

कर्मभूमक**मनुष्यनपुंसकस्यान्तरं क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, धर्म्मचरणं प्रतीत्य जघन्यत एकं समयं** यावत्, लब्धिपातस्य सर्वजघन्यस्यैकसामयिकत्वात्, **उत्कर्षतोऽनन्तं कालं,** तमेवानन्तं कालं निर्द्धारयति-'अणंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ अणंता लोगा **अवड्ढं पुग्गलपरियट्टं देसूण**'मिति।। **एवं भरतैरावतपूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकानामपि** क्षेत्रं धर्म्मचरणं च प्रतीत्य जघन्यमुत्कृष्टं चान्तरं प्रत्येकं वक्तव्यम्। **अकर्म्मभूमकमनुष्यनपुंसकस्य जन्म प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तम्,** एतावता गत्यन्तरादिकालेन व्यवधानभावात्, **उत्कर्षतो वनस्पतिकालः, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं,** तच्चैवं-कोऽपि कर्म्मभूमकमनुष्यनपुंसकः केनाप्यकर्मभूमौ संहृतः, स च मागधपुरुषदृष्टान्तबलादकर्म्मभूमक इति व्यपदिश्यते, ततः कियत्कालानन्तरं तथाविधबुद्धिपरावर्त्तनभावतो भूयोऽपि कर्म्मभूमौ संहृतः, तत्र चान्तर्मुहूर्त्तं धृत्वा पुनरप्यकर्मभूमावानीतः, **उत्कर्षतो वनस्पतिकालः**। एवं विशेषचिन्तायां हैमवतहैरण्यवत-हरिवर्ष-रम्यक-देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसकानामन्तरद्वीपकमनुष्यनपुंसकस्य च जन्म **संहरणं च प्रतीत्य जघन्यत उत्कर्षत**श्चान्तरं वक्तव्यम्।। १३२-१३३।।

तदेवमुक्तमन्तरमधुनाऽल्पबहुत्वमाह-

(१३४) एतेसि णं भंते! णेरइयणपुंसकाणं तिरिक्खजोणियनपुंसकाणं मणुस्सणपुंसकाण य कयरे कयरेहिन्तो जाव विसेसाहिया वा?, गोयमा! सव्वथोवा मणुस्सणपुंसका नेरइयनपुंसगा असंखेज्जगुणा, तिरिक्खजोणियणपुंसका अणंतगुणा ।१३४।

'एएसि ण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह- **गौतम! सर्वस्तोका मनुष्यनपुंसकाः,** श्रेण्यसङ्-

ख्येयभागवर्त्तिप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **नैरयिकनपुंसका असङ्ख्येयगुणाः,** अङ्गुलमात्रक्षेत्र-प्रदेशराशौ [१]तद्गतप्रथमवर्गमूलगुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैक-प्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्यस्ति**र्यग्योनिकनपुंसका अनन्तगुणाः,** निगोदजीवानामनन्तत्वात्।।१३४।। सम्प्रति नैरयिकनपुंसकविषयमल्पबहुत्वमाह–

(१३५) एतेसि णं भंते! [२]नेरइयनपुंसकाणं-रयणप्पहापुढविणेरइयणपुंसकाणं जाव अहेसत्तमपुढविणेरइयणपुंसकाण य कयरे कयरेहिंतो जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा अहेसत्तमपुढविनेरइयणपुंसका छट्ठपुढविणेरइयणपुंसका असंखेज्जगुणा जाव दोच्चपुढविणेरइयणपुंसका असंखेज्जगुणा इमीसे रयणप्पभाए पुढवीए णेरइयणपुंसका असंखेज्जगुणा।।१३५।।

'एएसि ण'मित्यादि, **सर्वस्तोका अधःसप्तमपृथिवीनैरयिकनपुंसकाः,** [३]अल्पतरश्रेण्यसङ्ख्येय-भागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **षष्ठपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः,** तेभ्योऽपि पञ्चमपृथ्वीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि चतुर्थपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि तृतीयपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि **द्वितीयपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः,** सर्वेषामप्येतेषां पूर्वपूर्वनैरयिकपरिमाणहेतुश्रेण्यसङ्ख्येयभागापेक्षयाऽसङ्ख्येयगुणा-सङ्ख्येयगुणश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, द्वितीयपृथिवीनैरयिकनपुंसकेभ्यो**ऽस्यां रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः,** अङ्गुलमात्रक्षेत्रप्रदेशराशौ [४]तद्गतप्रथमवर्गमूल-गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्, प्रतिपृथिवि च पूर्वोत्तरपश्चिमदिग्भाविनो नैरयिकाः सर्वस्तोकाः, तेभ्यो दक्षिणदिग्भाविनोऽसङ्ख्येयगुणाः, पूर्वपूर्वपृथिवीगतदक्षिणदिग्भाविभ्योऽप्युत्तरस्यामुत्तरस्यां पृथिव्याम-सङ्ख्येयगुणाः पूर्वोत्तरपश्चिमदिग्भाविनः, तथा चोक्तं **प्रज्ञापनायाम्**-**"दिसाणुवाएणं सव्वथोवा अहेसत्त-मपुढविनेरइया पुरत्थिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दाहिणेहिंतो अहेसत्तम-पुढविनेरइएहिंतो छट्ठाए**

१. पातासंपा १०-१, पाकाभा १३, पाकाहेम१४८५४ बाबूसंस्करण पृ.१९०। तद्गतप्रथमवर्गमूले द्वितीयवर्गमूलेन **-मु. । एतत्पञ्चसङ्ग्रहमतानुसारि (२/१९), द्रष्टव्यं पृ.१०९ टि.२ ।। २.** कख। नेरइयनपुंसकाणं **- गटतामु नास्ति।। ३ बाबू । अभ्यतरश्रे० मु. । प्रज्ञापनावृत्तौ** अभ्यन्तरं **पदं नास्ति ।। ४. स्वीकृतपाठः पञ्चसङ्ग्रहमतानुसारी (२/१९), पातासंपा १०-१, पाकाभा१३, पाकाहेम १४८५४, बाबूसंस्करण पृ.१९१ मध्ये च वर्तते । तद्गतप्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते - मु. ।।**

तमाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो तमापुढविनेरइएहिंतो पंचमाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो धूमप्पभापुढविनेरइएहिंतो चउत्थीए पंकप्पभाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो पंकप्पभापुढविनेरइएहिंतो तइयाए वालुयप्पभाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो वालुयप्पभापुढविनेरइएहिंतो दुइयाए सक्करप्पभाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो सक्करप्पभापुढवीनेरइएहिंतो इमीसे रयणप्पभाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा" (३/२१७)।।१३५।।

सम्प्रति तिर्यग्योनिकनपुंसकविषयमल्पबहुत्वमाह–

(१३६) एतेसि णं भंते! तिरिक्खजोणियणपुंसकाणं एगिंदियतिरिक्खजोणियणपुंसकाणं पुढविकाइय० जाव वणस्सतिकाइयएगिंदियतिरिक्खजोणियणपुंसकाणं बेइंदियतेइंदियचउरिंदियतिरिक्खजोणियणपुंसकाणं पंचेंदियजलयराणं थलयराणं खहयराण य कतरे २ हिन्तो जाव विसेसाहिया वा?, गोयमा! सव्वथोवा खहयरतिरिक्खजोणियणपुंसका, थलयरतिरिक्खजोणियनपुंसका संखेज्ज० जलयरतिरिक्खजोणियनपुंसका संखेज्ज० चतुरिंदियतिरि० विसेसाहिया तेइंदियति० विसेसाहिया बेइंदियति० विसेसा० तेउक्काइयएगिंदियतिरिक्खा असंखेज्जगुणा पुढविक्काइयएगिंदियतिरिक्खजोणिया विसेसाहिया, एवं आउ विसेसाहिया वाउ विसेसाहिया, वणस्सतिकाइयएगिंदियतिरिक्खजोणियणपुंसका अणंतगुणा।।१३६।।

'**एएसि ण**'मित्यादि, **सर्वस्तोकाः खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसकाः,** प्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः **स्थलचरतिर्यग्योनिकनपुंसकाः सङ्ख्येयगुणाः,** बृहत्तरप्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **जलचरतिर्यग्योनिकनपुंसकाः सङ्ख्येयगुणाः,** बृहत्तमप्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिमानत्वात्, तेभ्योऽपि **चतुरिन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः,** असङ्ख्येययोजनकोटीकोटीप्रमाणाकाशप्रदेशराशिप्रमाणासु घनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात्, तेभ्य**स्त्रीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः,** प्रभूततरश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **द्वीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः,** प्रभूततमश्रेणिगताकाशप्रदेश-

राशिमानत्वात्, तेभ्य**स्तेजस्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः,** सूक्ष्म-बादरभेदभिन्नानां तेषामसङ्ख्येयलोकाकाशप्रदेशपरिमाणत्वात्, तेभ्यः **पृथिवीकायिकैकेन्द्रियतिर्यग्योनिक-नपुंसका विशेषाधिकाः,** प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽ**प्कायिकैके**न्द्रियतिर्यग्योनिक-नपुंसका **विशेषाधिकाः**, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्योऽपि **वायुकायिकै**केन्द्रिय-तिर्यग्योनिकनपुंसका **विशेषाधिकाः**, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि **वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अनन्तगुणाः,** अनन्तलोकाकाशप्रदेशराशिप्रमाण-त्वात्।।१३६।।

अधुना मनुष्यनपुंसकविषयमल्पबहुत्वमाह–

(१३७) एतेसि णं भंते! मणुस्सणपुंसकाणं कम्मभूमिणपुंसकाणं अकम्म-भूमिणपुंसकाणं अंतरदीवकाण य कतरे कयरेहिंतो अप्पा वा ४?, गोयमा! सव्व-त्थोवा अंतरदीवगअकम्मभूमगमणुस्सणपुंसका देवकुरुउत्तरकुरुअकम्मभूमगा दोवि[1] संखेज्जगुणा एवं जाव पुव्वविदेहअवरविदेहकम्म० दोवि संखेज्जगुणा।।१३७।।

'एएसि ण'मित्यादि, **सर्वस्तोका अन्तरद्वीपजमनुष्यनपुंसकाः,** एते च संमूर्च्छनजा द्रष्टव्याः, गर्भव्युत्क्रान्तिकमनुष्यनपुंसकानां तत्रासम्भवात्, संहृतास्तु कर्म्मभूमिजास्तत्र भवेयुरपि, तेभ्यो **देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः,** तद्गतगर्भजमनुष्याणामन्तरद्वीपजगर्भज-मनुष्येभ्यः सङ्ख्येयगुणत्वात्, गर्भजमनुष्योच्चाराद्याश्रयेण च संमूर्च्छिममनुष्याणामुत्पादात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, एवं तेभ्यो हरिवर्ष-रम्यकवर्षाकर्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः तेभ्योऽपि हैमवत-हैरण्यवतवर्षाकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्यो भरतैरावतवर्षकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्यः **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः,** स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, युक्तिः सर्वत्रापि तथैवानुसर्त्तव्या।। १३७।। सम्प्रति नैरयिकतिर्यग्मनुष्यविषयमल्पबहुत्वमाह–

---

१. दोवि असंखेज्जा एवं P ।।

(१३८) एतेसि णं भंते! णेरइयणपुंसकाणं रयणप्पभापुढविनेरइयनपुंसकाणं जाव अधेसत्तमापुढविणेरइयणपुंसकाणं, तिरिक्खजोणियणपुंसकाणं-एगिंदियतिरिक्खजोणियाणं पुढविकाइयएगिंदियतिरिक्खजोणियणपुंसकाणं जाव वणस्सतिकाइय० बेइंदियतेइंदियचतुरिंदियपंचिंदियतिरिक्खजोणियणपुंसकाणं जलयराणं थलयराणं खहयराणं, मणुस्सणपुंसकाणं कम्मभूमिकाणं अकम्मभूमिकाणं अंतरदीवकाण य कतरे कतरेहिंतो अप्पा ४, गोयमा! सव्वत्थोवा अधेसत्तमपुढविणेरइयणपुंसका छट्ठपुढविनेरइयनपुंसका असंखेज्ज० जाव दोच्चपुढविणेरइयणपुं० असंखे० अंतरदीवगमणुस्सणपुंसका असंखेज्जगुणा, देवकुरुउत्तरकुरुअकम्मभूमिक० दोवि संखेज्जगुणा जाव पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सणपुंसका दोवि संखेज्जगुणा, रयणप्पभापुढविणेरइयणपुंसका असंखे० खहयरपंचेंदियतिरिक्खजोणियनपुंसका असं० थलयर० संखिज्ज० जलयर० संखिज्जगुणा चतुरिंदियतिरिक्खजोणिय० विसेसाहिया तेइंदिय० विसे० बेइंदिय० विसे० तेउक्काइयएगिंदिय० असं० पुढविकाइयएगिंदिय० विसेसाहिया आउक्काइय० विसे० वाउकाइय० विसेसा० वणस्सइकाइयएगिंदियतिरिक्खजोणियणपुंसका अणंतगुणा।।१३८ ।।

'**एएसि णं भंते!**' इत्यादि, **सर्वस्तोका अधःसप्तमपृथिवीनैरयिकनपुंसकाः**, तेभ्यः **षष्ठ**-पञ्चम-चतुर्थ-तृतीय-**द्वितीयपृथिवीनैरयिकनपुंसका** यथोत्तर**मसङ्ख्येयगुणाः, द्वितीयपृथिवीनैरयिकनपुंसकेभ्योऽन्तरद्वीपजमनुष्यनपुंसका असङ्ख्येयगुणाः**, एतदसङ्ख्येयगुणत्वं संमूर्च्छनजमनुष्यापेक्षं, तेषां नपुंसकत्वादेतावतां च तत्र संमूर्च्छनसम्भवात्, तेभ्यो **देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसका** हरिवर्ष-रम्यकवर्षाकर्म्मभूमकमनुष्यनपुंसका हैमवत-हैरण्यवताकर्म्मभूमकमनुष्यनपुंसका भस्तैरावतकर्म्मभूमकमनुष्यनपुंसकाः **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसका** यथोत्तरं **सङ्ख्येयगुणाः**, स्वस्थानचिन्तायां तु द्वयेऽपि परस्परं तुल्याः, पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकेभ्योऽस्यां प्रत्यक्षत उपलभ्यमानायां **रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः**, तेभ्यः **खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः**, तेभ्यः **स्थलचरपञ्चेन्द्रिय**-

तिर्यग्योनिकनपुंसका जलचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका यथोत्तरं **सङ्ख्येयगुणाः,** जलचरपञ्चेन्द्रियनपुंसकेभ्य**श्चतुरिन्द्रिय-त्रीन्द्रिय-द्वीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः,** द्वीन्द्रियतिर्यग्योनिकनपुंसकेभ्य**स्तेजस्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः,** तेभ्यः **पृथिव्यम्बु-वायु-तिर्यग्योनिकनपुंसका यथोत्तरं विशेषाधिकाः,** वाय्वेकेन्द्रियतिर्यग्योनिकनपुंसकेभ्यो **वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अनन्तगुणाः,** युक्तिः सर्वत्रापि प्रागुक्तानुसारेण स्वयं भावनीया।। १३८।। सम्प्रति नपुंसकवेदकर्म्मणो बन्धस्थितिं नपुंसकवेदस्य प्रकारं चाह–

(१३९) णपुंसकवेदस्स णं भंते! कम्मस्स केवइयं कालं बंधठिई पन्नत्ता?, गोयमा! जह० सागरोवमस्स दोन्नि सत्तभागा पलिओवमस्स असंखेज्जतिभागेण ऊणगा उक्को० वीसं सागरोवमकोडाकोडीओ, [१]दोण्णि य वाससहस्साइं अबाधा, अबाहूणिया कम्मठिती कम्मणिसेगो।।१३९।।(१४०)णपुंसकवेदे णं भंते! किंपगारे पण्णत्ते?, गोयमा! महाणगरदाहसमाणे पण्णत्ते समणाउसो!, से तं णपुंसका। १४०।

'नपुंसकवेयस्स णं भंते! कम्मस्स' इत्यादि, प्राग्वद् भावनीयं, नवरं **महानगरदाहसमान**मिति सर्वावस्थासु सर्वप्रकारं मदनदाह इत्यर्थः।। १३९-१४०।।

सम्प्रत्यष्टावल्पबहुत्वानि वक्तव्यानि, तद्यथा–प्रथमं सामान्येन तिर्यक्स्त्रीपुरुषनपुंसकप्रतिबद्धम्, एवमेव मनुष्यप्रतिबद्धं द्वितीयं, देवस्त्रीपुरुषनारकनपुंसकप्रतिबद्धं तृतीयं, सकलसम्मिश्रं चतुर्थं, जलचर्यादिविभागतः पञ्चमं, कर्म्मभूमिजादिमनुष्यस्त्र्यादिविभागतः षष्ठं, भवनवास्यादिदेव्यादिविभागतः सप्तमं, जलचर्यादिविजातीयव्यक्तिव्यापकमष्टमं, तत्र प्रथममभिधित्सुराह–

(१४१)[२]एतासि णं भंते! इत्थीणं पुरिसाणं नपुंसकाण य कतरे कतरेहिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा पुरिसा, इत्थीओ संखि० णपुंसका अणंत०। १४१। (१४२) एतासि णं भंते! तिरिक्खजोणिइत्थीणं तिरिक्खजोणियपुरिसाणं तिरिक्खजोणियणपुंसकाण य कयरे कयरेहिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा तिरिक्खजोणियपुरिसा तिरिक्खजोणिइत्थीओ [३]संखे० तिरिक्खजो० णपुंसगा अणंतगुणा।। १४२।।

१. वीस वाससया - **ता.** ।। २. एतासि L । एगासि - ता.। एतेसि - **मु.** । **एवमग्रेऽपि।। ३.** SP । असंखे०**मु**।।

'एयासि णं भंते! तिरिक्खजोणियइत्थीणं' इत्यादि, **सर्वस्तोकास्तिर्यक्पुरुषाः,** तेभ्य**स्तिर्यक्स्त्रियः सङ्ख्येयगुणा**स्त्रिगुणत्वात्, ताभ्य**स्तिर्यग्नपुंसका अनन्तगुणाः,** निगोदजीवानामनन्तानन्तत्वात्।। १४१-१४२।। सम्प्रति द्वितीयमल्पबहुत्वमाह–

(१४३) एतासि णं भंते! मणुस्सित्थीणं मणुस्सपुरिसाणं मणुस्सणपुंसकाण य कयरे कयरेहिन्तो अप्पा वा ४?, गोयमा! सव्वत्थोवा मणुस्सपुरिसा, मणुस्सित्थीओ संखे० मणुस्सणपुंसका असंखेज्जगुणा।।१४३।।

'एयासि णं भंते!' इत्यादि, **सर्वस्तोका मनुष्यपुरुषाः** सङ्ख्येयकोटीकोटीप्रमाणत्वात्, तेभ्यो **मनुष्यस्त्रियः सङ्ख्येयगुणाः** सप्तविंशतिगुणत्वात्, ताभ्यो **मनुष्यनपुंसका असङ्ख्येयगुणाः** श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणत्वात्।।१४३।। सम्प्रति तृतीयमल्पबहुत्वमाह–

(१४४) एतासि णं भंते! देवित्थीणं देवपुरिसाणं णेरइयणपुंसकाण य कयरे२हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा णेरइयणपुंसका देवपुरिसा असं० देवित्थीओ संखेज्जगुणाओ।। १४४।।

'एयासि णं भंते! देवित्थीण' मित्यादि, **सर्वस्तोका नैरयिकनपुंसका** अङ्गुलमात्रक्षेत्रप्रदेशराशौ स्वप्रथमवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो **देवपुरुषा असङ्ख्येयगुणा** असङ्ख्येययोजनकोटी-कोटीप्रमाणायां सूचौ यावन्तो नभःप्रदेशास्तावत्प्रमाणासु घनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो **देवस्त्रियः सङ्ख्येयगुणा** द्वात्रिंशद्गुणत्वात्।। १४४।। सम्प्रति सकलसम्मिश्रं चतुर्थमल्पबहुत्वमाह–

(१४५) एतासि णं भंते! तिरिक्खजोणित्थीणं तिरिक्खजोणियपुरिसाणं तिरिक्खजो० णपुंसकाणं, मणुस्सित्थीणं मणुस्सपुरिसाणं मणुस्सनपुंसकाणं, देवित्थीणं देवपुरिसाणं णेरइयणपुंसकाण य कतरे कतरेहिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा मणुस्सपुरिसा मणुस्सित्थीओ संखे०, मणुस्सणपुंसका असं०, णेरइयणपुंसका असं०, तिरिक्खजोणियपुरिसा असं०, तिरिक्खजोणित्थियाओ संखेज्ज०, देवपुरिसा [1]सं०, देवित्थियाओ संखि०, तिरिक्खजोणियणपुंसका अणंतगुणा।। १४५ ।।

१. L जे। असंखे०मु. कखट।।

'**एयासि ण**'मित्यादि, **सर्वस्तोका मनुष्यपुरुषा**स्तेभ्यो **मनुष्यस्त्रियः सङ्ख्येयगुणाः**, ताभ्यो **मनुष्यनपुंसका असङ्ख्येयगुणाः**, अत्र युक्तिः प्रागुक्ता, तेभ्यो **नैरयिकनपुंसका असङ्ख्येयगुणा,** असङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्, तेभ्य**स्तिर्यग्योनिकपुरुषा असङ्ख्येयगुणाः**, प्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्य**स्तिर्यग्योनिकस्त्रियः सङ्ख्येयगुणा**स्त्रिगुणत्वात्, ताभ्यो **देवपुरुषाः सङ्ख्येयगुणाः**, प्रभूततरप्रतरासङ्ख्येयभागवर्त्त्य-सङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यो **देवस्त्रियः सङ्ख्येयगुणा,** द्वात्रिंशद्गुणत्वात्, ताभ्य**स्तिर्यग्योनिकनपुंसका अनन्तगुणा,** निगोदजीवानामनन्तानन्तत्वात्।।१४५।। सम्प्रति जलचर्यादिविभागतः पञ्चममल्पबहुत्वमाह–

(१४६) एतासि णं भंते! तिरिक्खजोणित्थीणं-जलयरीणं थलयरीणं खहयरीणं, तिरिक्खजोणियपुरिसाणं-जलयराणं थलयराणं खहयराणं, तिरिक्खजो० णपुंसकाणं -एगिंदियतिरिक्खजोणियणपुंसकाणं पुढविकाइयएगिंदियतिरिक्खजो० णपुंसकाणं जाव वणस्सतिकाइय० बेइंदियतिरिक्खजोणियणपुंसकाणं तेइंदिय० चउरिंदिय० पंचेंदियतिरिक्खजोणियणपुंसकाणं जलयराणं थलयराणं खहयराणं कतरे २ हिंतो जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा खहयरतिरिक्खजोणियपुरिसा खहयर-तिरिक्खजोणित्थियाओ संखेज्ज० थलयरपंचिंदियतिरिक्खजोणियपुरिसा संखे० थलयरपंचिंदियतिरिक्खजोणित्थियाओ संखे० जलयरतिरिक्खजो० पुरिसा संखि० जलयरतिरिक्खजोणित्थियाओ संखेज्जगु० खहयरपंचिंदियतिरिक्खजो० णपुंसका असंखे० थलयरपंचिंदियतिरिक्खजोणि० नपुंसगा संखि० जलयरपंचेंदियतिरिक्ख-जोणियनपुंसका संखे० चउरिंदियतिरि० विसेसाहिया, तेइंदियणपुंसका विसेसाहिया, बेइंदियनपुंसका विसेसा० तेउक्काइयएगिंदियतिरिक्खजोणियणपुंसका असं० पुढवि० णपुंसका० विसेसाहिया, आउ० विसेसाहिया वाउ० विसेसा० वणप्फति० एगिंदियणपुंसका अणंतगुणा।। १४६।।

'एयासि णं भंते!' इत्यादि, **सर्वस्तोकाः खचरपञ्चेन्द्रियतिर्यग्योनिकपुरुषाः**, तेभ्यः **खचर-तिर्यग्योनिकस्त्रियः सङ्ख्येयगुणा**स्त्रिगुणत्वात्, ताभ्यः **स्थलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः**, तेभ्यस्त**स्त्रियः सङ्ख्येयगुणा**स्त्रिगुणत्वात्, ताभ्यो **जलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः**, तेभ्यो **जलचरतिर्यग्योनिकस्त्रियः सङ्ख्येयगुणा**स्त्रिगुणत्वात्, ताभ्यः **खचरपञ्चेन्द्रियतिर्यग्योनिक-नपुंसका असङ्ख्येयगुणाः**, तेभ्यः **स्थलचर-जलचरतिर्यग्योनिकनपुंसका** यथाक्रमं **सङ्ख्येयगुणाः**, ततश्च**तुरिन्द्रिय-त्रीन्द्रिय-द्वीन्द्रिया** यथोत्तरं **विशेषाधिकाः**, तत**स्तेजःकायिकैकेन्द्रियतिर्यग्यो-निकनपुंसका असङ्ख्येयगुणाः**, ततः **पृथिव्यम्बु-वायुकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका** यथोत्तरं **विशेषाधिकाः**, ततो **वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अनन्तगुणाः**।।१४६।। सम्प्रति कर्म्मभूमिजादिमनुष्यस्त्र्यादिविभागतः षष्ठमल्पबहुत्वमाह–

(१४७) एतासि णं भंते! मणुस्सित्थीणं-कम्मभूमियाणं अकम्मभूमियाणं अंतर-दीवियाणं, मणुस्सपुरिसाणं-कम्मभूमकाणं अकम्मभूमकाणं अंतरदीवकाणं, मणुस्सणपुंसकाणं-कम्मभूमाणं अकम्म० अंतरदीविकाण य कयरे२हिन्तो अप्पा वा ४?, गोयमा! अंतरदीवगा मणुस्सित्थियाओ मणुस्सपुरिसा य एते णं दोन्नि वि तुल्ला सव्वत्थोवा देवकुरु-उत्तरकुरुअकम्मभूमगमणुस्सित्थियाओ मणुस्सपुरिसा य एते णं दोन्निवि तुल्ला संखे० हरिवास-रम्मवासअकम्मभूमकमणुस्सित्थियाओ मणुस्स-पुरिसा य एत णं दोन्निवि तुल्ला संखे० हेमवत-हेरण्णवतअकम्मभूमकमणु-स्सित्थियाओ मणुस्सपुरिसा य दोवि तुल्ला संखे० भरहेरवतकम्मभूमगमणुस्सपुरिसा दोवि संखे०भरहेरवतकम्म०मणुस्सित्थियाओ दोवि संखे०। पुव्वविदेह-अवर-विदेहकम्मभूमगमणुस्सपुरिसा दोवि संखे० पुव्वविदेह-अवरविदेहकम्मभूमगमणु-स्सित्थियाओ दोवि संखे०।अंतरदीवगमणुस्सणपुंसका असंखे० देवकुरु-उत्तर-कुरुअकम्मभूमकमणुस्सणपुंसका दोवि संखेज्जगुणा एवं तहेव जाव पुव्वविदेह-कम्मभूमकमणुस्सणपुंसका दोवि संखेज्जगुणा।। १४७।।

१. जे. L । असंखे० SP ।।

'एयासि णं भंते!' इत्यादि, **सर्वस्तोका अन्तरद्वीपकमनुष्यस्त्रियोऽन्तरद्वीपकमनुष्यपुरुषाश्च, एते च द्वयेऽपि परस्परं तुल्याः,** तत्रत्यस्त्री-पुंसानां युगलधर्मोपेतत्वात्, तेभ्यो **देवकुरूत्तरकुर्वकर्म्म-भूमकमनुष्यस्त्रियो मनुष्यपुरुषाश्च सङ्ख्येयगुणाः,** युक्तिरत्र प्रागेवोक्ता, स्वस्थाने तु परस्परं **तुल्याः,** एवं **हरिवर्ष-रम्यकपुरुषस्त्रियो हैमवत-हैरण्यवतमनुष्यपुरुषस्त्रियश्च** यथोत्तरं **सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं **तुल्याः,** ततो **भरतैरावतकर्म्मभूमकमनुष्या द्वयेऽपि सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं **तुल्याः,** तेभ्यो **भरतैरावतकर्म्मभूमकमनुष्यस्त्रियो द्वय्यो**ऽपि **सङ्ख्येयगुणाः,** सप्तविंशति-गुणत्वात्, स्वस्थाने तु परस्परं तुल्याः, ताभ्यः **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः,** स्वस्थाने परस्परं तुल्याः, तेभ्यः **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः,** सप्तविंशतिगुणत्वात्, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो**ऽन्तरद्वीपकमनुष्यनपुंसका असङ्ख्येयगुणाः,** श्रेण्यसङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यो **देवकुरूत्तरकुर्वकर्म्म-भूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः, ततो हरिवर्ष-रम्यकवर्षाकर्म्म-भूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो हैमवत-हैरण्यवताकर्म्म-भूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो भरतैरावतकर्म्म-भूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्योऽपि **पूर्वविदेहापर-विदेहकर्म्मभूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः।।१४७।।

सम्प्रति भवनवास्यादिदेव्यादिविभागतः सप्तममल्पबहुत्वमाह–

(१४८)एतासि णं भंते! देवित्थीणं-भवणवासीणीणं वाणमन्तरीणं जोइसिणीणं वेमाणिणीणं, देवपुरिसाणं-भवणवासिणं जाव वेमाणियाणं, सोधम्मकाणं जाव गेवेज्जकाणं अणुत्तरोववातियाणं,णेरइयणपुंसकाणं-रयणप्पभापुढविणेरइयणपुंसगाणं जाव अहेसत्तमपुढविनेरइय० कतरे २ हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा अणुत्तरोववातियदेवपुरिसा, उवरिमगेवेज्जदेवपुरिसा संखेज्जगुणा तहेव जाव आणते कप्पे देवपुरिसा संखेज्जगुणा, अहेसत्तमाए पुढवीए णेरइयणपुंसका असंखेज्जगुणा, छट्ठीए पुढवीए नेरइय० असंखेज्जगुणा, सहस्सारे कप्पे देवपुरिसा असंखेज्जगुणा, महासुक्के कप्पे देवपुरिसा असंखेज्जगुणा, पंचमाए पुढवीए नेरइयणपुंसका

असंखेज्जगुणा, लंतए कप्पे देवा असंखेज्जगुणा, चउत्थीए पुढवीए नेरइया असंखेज्जगुणा, बंभलोए कप्पे देवपुरिसा असंखेज्जगुणा, तच्चाए पुढवीए नेरइय० असंखेज्जगुणा, माहिंदे कप्पे देवपुरिसा असंखेज्जगुणा, सणंकुमारे कप्पे देवपुरिसा [१]संखेज्जगुणा, दोच्चाए पुढवीए नेरइया असंखेज्जगुणा, ईसाणे कप्पे देवपुरिसा असंखेज्जगुणा, ईसाणे कप्पे देवित्थियाओ संखेज्जगुणाओ, सोधम्मे कप्पे देवपुरिसा संखेज्ज० सोधम्मे कप्पे देवित्थियाओ संखे० भवणवासिदेवपुरिसा असंखेज्जगुणा, भवणवासिदेवित्थियाओ संखेज्जगुणाओ, इमीसे रयणप्पभापुढवीए नेरइया असंखेज्जगुणा, वाणमंतरदेवपुरिसा असंखेज्जगुणा, वाणमंतरदेवित्थियाओ संखेज्जगुणाओ, जोतिसियदेवपुरिसा संखेज्जगुणा, जोतिसियदेवित्थियाओ संखेज्जगुणाओ।। १४८।।

'**एयासि णं भंते! देवित्थीणं भवणवासिणीण**'मित्यादि, **सर्वस्तोका अनुत्तरोपपातिका देवपुरुषाः**, तत **उपरितनग्रैवेयक**-मध्यमग्रैवेयकाधस्तनग्रैवेयकाच्युतारणप्राणता**नतकल्पदेवपुरुषा** यथोत्तरं **सङ्ख्येयगुणाः**, ततोऽध**ःसप्तमषष्ठपृथिवीनैरयिकनपुंसक-सहस्त्रारमहाशुक्रकल्पदेवपुरुष-पञ्चमपृथिवीनैरयिकनपुंसक-लान्तककल्पदेवपुरुष-चतुर्थपृथिवीनैरयिकनपुंसक-ब्रह्मलोक-कल्पदेवपुरुष-तृतीयपृथिवीनैरयिकनपुंसक-माहेन्द्रसनत्कुमारकल्पदेवपुरुष-द्वितीयपृथिवी-नैरयिकनपुंसका** यथोत्तर**मसङ्ख्येयगुणाः**, तत **ईशानकल्पदेवपुरुषा असङ्ख्येयगुणाः**, तेभ्य **ईशानकल्पदेवस्त्रियः सङ्ख्येयगुणाः**, द्वात्रिंशद्गुणत्वात्, ततः **सौधर्म्मकल्पदेवपुरुषाः सङ्ख्येयगुणाः**, तेभ्योऽपि **सौधर्म्मकल्पदेवस्त्रियः सङ्ख्येयगुणाः**, द्वात्रिंशद्गुणत्वात्, तेभ्यो **भवनवासिदेवपुरुषा असङ्ख्येयगुणाः**, तेभ्यो **भवनवासिदेव्यः सङ्ख्येयगुणाः**, द्वात्रिंशद्गुणत्वात्, ताभ्यो **रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः**, तेभ्यो **वानमन्तरदेवपुरुषा असङ्ख्येयगुणाः**, तेभ्यो **वानमन्तरदेव्यः सङ्ख्येयगुणाः**, ताभ्यो **ज्योतिष्काः सङ्ख्येयगुणाः**, तेभ्यो **ज्योतिष्कदेवस्त्रियः सङ्ख्येयगुणाः**, द्वात्रिंशद्गुणत्वात्।। १४८ ।।

---

१. जेताजि २५-१, पातासंपा १०-१, पाकाहेम १०१३०, पाकाभा.७, पाकाभा.१२, रासं७७३, रासं२१६, रासं२१६, रासं२१८, बाबुसंस्करणे च स्वीकृतपाठः वर्तते । असंखे. मु. L पाकाहेम१०५६१, पाकाहेम १००१४।

सम्प्रति विजातीयव्यक्तिव्यापकमष्टममल्पबहुत्वमाह–

(१४९) एतासि णं भंते! तिरिक्खजोणित्थीणं-जलयरीणं थलयरीणं खहयरीणं, तिरिक्खजोणियपुरिसाणं-जलयराणं थलयराणं खहयराणं, तिरिक्खजोणियणपुंसकाणं-एगिंदियतिरिक्खजोणियणपुंसकाणं पुढविक्काइयएगिंदियति० जो० णपुंसकाणं आउक्काइयएगिंदिय[ति]० जो० णपुंसकाणं जाव वणस्सतिकाइयएगिंदियति० जो० णपुंसकाणं बेइंदियति० जो० णपुंसकाणं तेइंदियति० जो० णपुंसकाणं चउरिंदियति० जो० नपुंसकाणं पंचेंदियति० जो० णपुंसकाणं जलयराणं थलयराणं खहयराणं, मणुस्सित्थीणं-कम्मभूमियाणं अकम्मभूमियाणं अंतरदीवियाणं, मणुस्सपुरिसाणं-कम्मभूमकाणं अकम्म० अंतरदीवकाणं मणुस्सणपुंसकाणं-कम्मभूमिकाणं अकम्मभूमिकाणं अंतरदीवकाणं, देवित्थीणं-भवणवासिणीणं वाणमंतरीणं जोतिसिणीणं वेमाणिणीणं, देवपुरिसाणं-भवणवासिणं वाणमंतराणं जोतिसियाणं वेमाणियाणं सोधम्मकाणं जाव गेवेज्जकाणं अणुत्तरोववातियाणं, नेरइयणपुंसकाणं-रयणप्पभापुढविनेरइयनपुंसकाणं जाव अहेसत्तमपुढविणेरइयणपुंसकाण य कयरे २ हिन्तो अप्पा वा ४?, गोयमा! अंतरदीवअकम्मभूमकमणुस्सित्थीओ मणुस्सपुरिसा य, एते णं दोवि तुल्ला सव्वत्थोवा, देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सइत्थीओ पुरिसा य एते णं दोवि तुल्ला संखे० एवं हरिवासरम्मगवास० एवं हेमवत-हेरण्णवय० भरहेरवयकम्मभूमगमणुस्सपुरिसा दोवि संखे० भरहेरवतकम्म० मणुस्सित्थीओ दोवि संखे० पुव्वविदेहअवरविदेहकम्मभूमकमणुस्सपुरिसा दोवि संखे०, पुव्वविदेहअवरविदेहकम्म० मणुस्सित्थियाओ दोवि संखे० अणुत्तरोववातियदेवपुरिसा असंखेज्जगुणा उवरिमगेवेज्जा देवपुरिसा संखे० जाव आणते कप्पे देवपुरिसा संखे० अधेसत्तमाए पुढवीए नेरइयणपुंसका असंखे० छट्ठीए पुढवीए नेरइयनपुंसका असं० सहस्सारे

कप्पे देवपुरिसा असंखे० महासुक्के कप्पे देव० असं० पंचमाए पुढवीए नेरइयनपुंसका असं० लंतए कप्पे देवपु० असं० चउत्थीए पुढवीए नेरइयनपुंसका असं० बंभलोए कप्पे देवपुरिसा असं० तच्चाए पुढवीए नेरइयण० असं० माहिंदे कप्पे देवपु० असंखे० सणंकुमारे कप्पे देवपुरिसा [1]सं० दोच्चाए पुढवीए नेरइयनपुंसका असं० अंतरदीवगअकम्मभूमगमणुस्सणपुंसका असंखे० देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सणपुंसका दोवि संखे० एवं जाव विदेहत्ति, ईसाणे कप्पे देवपुरिसा असं० ईसाणे कप्पे देवित्थियाओ संखे० सोधम्मे कप्पे देवपुरिसा संखे० सोहम्मे कप्पे देवित्थियाओ संखेज्ज० भवणवासिदेवपुरिसा असंखे० भवणवासिदेवित्थियाओ संखिज्जगुणाओ इमीसे रयणप्पभाए पुढवीए नेरइयणपुंसका असं० खहयरतिरिक्खजोणियपुरिसा [2]असंखेज्जगुणा, खहयरतिरिक्खजोणित्थियाओ संखे० थलयरतिरिक्खजोणियपुरिसा [3]असंखे० थलयरतिरिक्खजोणित्थियाओ संखे० जलयरतिरिक्खपुरिसा संखे० जलयरतिरिक्खजोणित्थियाओ संखे०, वाणमंतरदेवपुरिसा संखे० वाणमंतरदेवित्थियाओ संखे० जोतिसियदेवपुरिसा संखे० जोतिसियदेवित्थियाओ संखे० खहयरपंचेंदियतिरिक्खजोणियणपुंसा [4]असंखे० थलयरणपुंसका संखे० जलयरणपुंसका संखे० चतुरिंदियणपुंसका विसेसाहिया तेइंदिय० विसेसा० बेइंदिय० विसेसा० तेउक्काइयएगिंदियतिरिक्खजोणियणपुंसका असं० पुढवी० विसेसा० आऊ० विसेसा० वाऊ० विसेसा० वणप्फतिकाइयएगिंदियतिरिक्खजो० णपुंसका अणंतगुणा।। १४९ ।।

'**एयासि णं भंते!**' इत्यादि, **सर्वस्तोका अन्तरद्वीपका मनुष्यस्त्रियो मनुष्यपुरुषाश्च,** स्वस्थाने

---

१. कखगता जेतिजि २५-१, पाकाहेम१०१३०, पाकाभा७, पाकाभा१२, आबोला२१, रासं ७७३, रासं२१६, रासं२१८। असंखे०मु.L। पाता संपा१०-१, पाकाहेम १०५६१, पाकाहेम १००१४। असं. मु.L।। २. संखे० मु.L। द्र. प्रज्ञा.३/२२५,२२६,३३४, जीवा. ९/२३१, २/१४४,१४५,१४६,१४८ ।। ३ असंखे० SP द्र.२/१४६। संखे०मु.L।। ४. L जे. । संखे. मु. ।।

तु **द्वयेऽपि तुल्याः,** युगलधर्मोपेतत्वात्, एवं **देवकुरूत्तरकुर्वकर्म्मभूमकहरिवर्ष-रम्यकवर्षाकर्म-भूमकहैमवत-हैरण्यवताकर्म्मभूमकमनुष्यस्त्रीपुरुषा** यथोत्तरं **सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः, तेभ्योऽपि **भरतैरावतकर्म्मभूमकमनुष्यपुरुषा** द्वयेऽपि **सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः, तेभ्यो **भरतैरावतकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः, ताभ्यः **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः,** स्वस्थाने तु परस्परं तुल्याः, तेभ्यो **पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः,** सप्तविंशतिगुणत्वात्, स्वस्थाने तु परस्परं तुल्याः, ताभ्योऽ**नुत्तरौपपातिकोपरितनग्रैवेयक-**मध्य-मग्रैवेयकाधस्तनग्रैवेयकाच्युतारणप्राणता**नतकल्पदेवपुरुषा** यथोत्तरं **सङ्ख्येयगुणाः,** ततोऽ**धःसप्तमषष्ठपृथिवीनैरयिक**[न०] **सहस्रारकल्पदेवपुरुष-महाशुक्रकल्पदेवपुरुष-पञ्चमपृथिवीनैरयिक**[न०] **लान्तककल्पदेवपुरुष-चतुर्थपृथिवीनैरयिकनपुंसक-ब्रह्मलोककल्पदेव-पुरुष-तृतीयपृथिवीनैरयिकनपुंसक-माहेन्द्रकल्पसनत्कुमारकल्पदेवपुरुष-द्वितीयपृथिवीनैरयिक-नपुंसकान्तरद्वीपकमनुष्यनपुंसका** यथोत्तरम**सङ्ख्येयगुणाः,** ततो **देवकुरूत्तरकुर्वकर्म्मभूमकहरिवर्ष-रम्यकवर्षाकर्म्मभूमक-हैमवत-हैरण्यवताकर्मभूमकभरतैरावतकर्म्मभूमकपूर्वविदेहापरविदेहकर्म्म-भूमकमनुष्यनपुंसका यथोत्तरं सङ्ख्येयगुणाः,** स्वस्वस्थानेषु तु द्वये परस्परं तुल्याः, तत **ईशानकल्प-देवपुरुषा असङ्ख्येयगुणाः,** तत **ईशानकल्पदेवस्त्रियः सौधर्मकल्पदेवपुरुषाः सौधर्म्मकल्पदेवस्त्रियो** यथोत्तरं **सङ्ख्येयगुणाः,** ततो **भवनवासिदेवपुरुषा असङ्ख्येयगुणाः,** तेभ्यो **भवनवासिदेवस्त्रियः सङ्ख्येयगुणाः,** तेभ्योऽ**स्यां रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः,** ततः **खचरतिर्यग्योनिकपुरुषाः [असंङ्ख्येयगुणाः, ततः]खचरतिर्यग्योनिकस्त्रियः स्थलचरतिर्यग्यो-निकपुरुषाः स्थलचरतिर्यग्योनिकस्त्रियो जलचरतिर्यग्योनिकपुरुषा जलचरतिर्यग्योनिकस्त्रियो वानमन्तरा देवपुरुषा वानमन्तरदेवस्त्रियो ज्योतिष्कदेवपुरुषा ज्योतिष्कदेवस्त्रियो** यथोत्तरं **सङ्ख्येयगुणाः,** ततः **खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः,** ततः **स्थलचर-जलचरपञ्चेन्द्रिय-तिर्यग्योनिकनपुंसकाः** क्रमेण **सङ्ख्येयगुणाः,** ततश्च**तुरिन्द्रिय-त्रीन्द्रिय-द्वीन्द्रियतिर्यग्योनिकनपुंसका** यथोत्तरं **विशेषाधिकाः,** ततस्**तेजःकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः,** ततः **पृथिव्यब्वायुकायिकतिर्यग्योनिकनपुंसका यथोत्तरं विशेषाधिकाः,** ततो **वनस्पतिकायिकैकेन्द्रिय-तिर्यग्योनिकनपुंसका अनन्तगुणाः,** निगोदजीवानामनन्तत्वात्।।१४९।।

सम्प्रति स्त्रीपुरुषनपुंसकानां भवस्थितिमानं कायस्थितिमानं च क्रमेणाभिधातुकाम आह–

(१५०) इत्थीणं भंते! केवइयं कालं ठिती पण्णत्ता?, गोयमा! एगेणं आएसेणं जहा पुव्विं[1] भणियं, एवं पुरिसस्सवि नपुंसकस्सवि, संचिट्ठणा पुनरवि तिण्हंपि जहा पुव्विं[2] भणिया, अंतरंपि तिण्हंपि जहा पुव्विं[3] भणियं तहा नेयव्वं।। १५०।।

'इत्थीणं भंते! केवइयं कालं ठिई पण्णत्ता?', इत्यादि, एतत्सर्वं प्रागुक्तवद् भावनीयम्, अपुनरुक्तता च प्राक् स्त्र्यादीनां पृथक् स्वस्वाधिकारे स्थित्यादि प्रतिपादितमिदानीं तु समुदायेनेति।। सम्प्रति स्त्री-पुरुष-नपुंसकानामल्पबहुत्वमाह–(एयासि णं भंते! इत्थीणं पुरिसाणं नपुंसकाण य कयरे कयरेहिंतो अप्पा वा ४?, सव्वथोवा पुरिसा इत्थीओ संखेज्जगुणा नपुंसका अणंतगुणा) 'एयासि णं भंते! इत्थीण'मित्यादि, सर्वस्तोकाः पुरुषाः, स्त्र्यादिभ्यो हीनसङ्ख्याकत्वात्, तेभ्यः स्त्रियः सङ्ख्येयगुणाः, ताभ्यो नपुंसका अनन्तगुणाः, एकेन्द्रियाणामनन्तानन्तसङ्ख्योपेतत्वात्।।१५०।।

इह पुरुषेभ्यः स्त्रियः सङ्ख्येयगुणा इत्युक्तं, तत्र काः स्त्रियः स्वजातिपुरुषापेक्षया कतिगुणा इति प्रश्नावकाशमाशङ्क्य तन्निरूपणार्थमाह–

(१५१) तिरिक्खजोणित्थियाओ तिरिक्खजोणियपुरिसेहिंतो तिगुणाओ तिरूवाधियाओ मणुस्सित्थियाओ मणुस्सपुरिसेहिंतो सत्तावीसतिगुणाओ सत्तावीसयरूवाहियाओ, देवित्थियाओ देवपुरिसेहिंतो बत्तीसइगुणाओ बत्तीसइरूवाहियाओ से तं तिविधा संसारसमावण्णगा जीवा पण्णत्ता।।

तिविहेसु होइ भेयो ठिई य संचिट्ठणंतरऽप्पबहुं।
वेदाण य बंधठिई वेओ तह किंपगारो उ।।१।।
तिरिया सम्मत्ता १५१।।

'तिरिक्खजोणित्थीओ तिरिक्खजोणियपुरिसेहिंतो' इत्यादि, **तिर्यग्योनिकस्त्रियस्तिर्यग्योनिकपुरुषेभ्यस्त्रिगुणास्त्रिरूपाधिकाः, मनुष्यस्त्रियो मनुष्यपुरुषेभ्यः सप्तविंशतिगुणाः सप्तविंशतिरूपाधिकाः, देवपुरुषेभ्यो देवस्त्रियो द्वात्रिंशद्गुणा द्वात्रिंशद्रूपाधिकाः,** उक्तं च वृद्धाचार्यैरपि-

१. द्र. २/२०-४७, ७९-८१,१०७-११६ सूत्र ।। २. द्र. २/४८-६२,८२-८५,११७-११२ सू.।। ३. द्र.२/६३-६७,८६-९३,१२४-१३३ सू. ।।

"तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा।
सत्तावीसगुणा पुण मणुयाणं तदहिया चेव।।१।। [प्रज्ञापना तृ. पद सं. ५८]
बत्तीसगुणा बत्तीसरूवअहिया उ होंति देवाणं।
देवीओ पण्णत्ता जिणेहिं जियरागदोसेहिं।।२।।" [प्रव. सारो.८८३]

प्रतिपत्त्युपसंहारमाह-**'से तं तिविहा संसारसमावन्नगा जीवा पण्णत्ता'** इति।। सम्प्रत्यधिकृतप्रतिपत्त्यर्थाधिकारसङ्ग्रहगाथामाह-**'तिविहेसु होइ भेओ'** इत्यादि, त्रिविधेषु वेदेषु वक्तव्येषु भवति प्रथमोऽधिकारो भेदः १, ततः **स्थितिः** २, तदनन्तरं **'संचिट्ठणं'**ति सातत्येनावस्थानं ३, तदनन्तर**मन्तरं** ४, ततोऽ**ल्पबहुत्वं** ५, ततो **वेदानां बन्धस्थितिः** ६, तदनन्तरं **किंप्रकारो वेद** ७, इति।।१५१।।

इति श्रीमलयगिरिविरचितायां जीवाजीवाभिगमटीकायां द्वितीया प्रतिपत्तिः समाप्ता।।२।।

इति वेदत्रैविध्यनिरूपिका द्वितीया प्रतिपत्तिः।।

अथ त्रिविधाख्या तृतीया प्रतिपत्तिः - ३

तदेवमुक्ता द्वितीया प्रतिपत्तिः, सम्प्रति तृतीयप्रतिपत्त्यवसरः, तत्रेदमादिसूत्रम्–

(१) तत्थ जे ते एवमाहंसु चउव्विधा संसारसमावण्णगा जीवा पण्णत्ता ते एवमाहंसु, तंजहा-नेरइया तिरिक्खजोणिया मणुस्सा देवा।। १ ।।

'तत्थ जे ते एवमाहंसु चउव्विहा' इत्यादि, **'तत्र'** तेषु दशसु प्रतिपत्तिमत्सु मध्ये **ये ते** आचार्या **एवमाख्यातवन्तश्चतुर्विधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमाख्यातवन्तस्तद्यथा– नैरयिकास्तिर्यग्योनिका मनुष्या देवाः।।** १ ।।

(२) से किं तं नेरइया?, २ सत्तविधा पण्णत्ता, तंजहा-पढमापुढविनेरइया दोच्चापुढविनेरइया तच्चापुढविनेर० चउत्थापुढवीनेर० पंचमापु० नेरइ० छट्ठापु० नेर० सत्तमापु० नेरइया।। २ ।।

'से किं त'मित्यादि, **अथ के ते नैरयिकाः?,** सूरिराह–**नैरयिकाः सप्तविधाः प्रज्ञप्ताः, तद्यथा–** प्रथमायां पृथिव्यां नैरयिकाः **प्रथमपृथिवीनैरयिका** इत्यर्थः, एवं सर्वत्र भावनीयम्।। २ ।। सम्प्रति प्रतिपृथिवि नाम-गोत्रं वक्तव्यं, तत्र नामगोत्रयोरयं विशेषः–अनादिकालसिद्धमन्वर्थरहितं नाम सान्वर्थं तु नाम गोत्रमिति, तत्र नाम-गोत्रप्रतिपादनार्थमाह–

(३) पढमा णं भंते! पुढवी किंनामा किंगोत्ता पण्णत्ता?, गोयमा! घम्मा णामेणं रयणप्पभा गोत्तेणं।। ३ ।।

---

१. पढम० **कगट** ।।

(४) दोच्चा णं भंते! पुढवी किंनामा किंगोत्ता पण्णत्ता?, गोयमा! वंसा णामेणं, सक्करप्पभा गोत्तेणं, एवं एतेणं अभिलावेणं सव्वासिं पुच्छा, णामाणि इमाणि सेला तच्चा, अंजणा चउत्थी, रिट्ठा पंचमी, मघा छट्ठी, माघवती सत्तमा, जाव[1] तमतमागोत्तेणं पण्णत्ता।।४।।

'इमा णं (पढमा णं) भंते!' इत्यादि, **इयं भदन्त!** रत्नप्रभापृथिवी **'किंनामा'** किमनादिकाल-प्रसिद्धान्वर्थरहितनामा? **'किंगोत्रा?'** किमन्वर्थयुक्तनामा?, भगवानाह–**गौतम! नाम्ना घर्म्मेति** प्रज्ञप्ता **गोत्रेण रत्नप्रभा,** तथा चान्वर्थमुपदर्शयन्ति पूर्वसूरयः–रत्नानां प्रभा–बाहुल्यं यत्र सा रत्नप्रभा रत्नबहुलेति भावः, एवं शेषसूत्राण्यपि प्रतिपृथिवि प्रश्ननिर्वचनरूपाणि भावनीयानि, नवरं शर्कराप्रभादीनामियमन्वर्थ-भावना–शर्कराणां प्रभा–बाहुल्यं यत्र सा शर्कराप्रभा, एवं वालुका प्रभा पङ्कप्रभा इत्यपि भावनीयं, तथा धूमस्येव प्रभा यस्याः सा धूमप्रभा, तथा तमसः प्रभा–बाहुल्यं यत्र सा तमःप्रभा, तमस्तमस्य-प्रकृष्टतमसः प्रभा–बाहुल्यं यत्र सा तमस्तमप्रभा, अत्र केषुचित्पुस्तकेषु[2] सङ्ग्रहणिगाथे–

"घम्मा वंसा सेला अंजण रिट्ठा मघा य माघवती।
सत्तण्हं पुढवीणं एए नामा उ नायव्वा।।१।। [प्रवचन सारो.१०७१]
रयणा सक्कर वालुय पंका धूमा तमा [य] तमतमा य।
सत्तण्हं पुढवीणं एए गोत्ता मुणेयव्वा।।२।।" ३-४।।

अधुना प्रतिपृथिवि बाहल्यमभिधित्सुराह–

(५) इमा णं भंते! रयणप्पभापुढवी केवतिया बाहल्लेणं पण्णत्ता?, गोयमा! इमा णं रयणप्पभापुढवी असिउत्तरं[3] जोयणसयसहस्सं बाहल्लेणं पण्णत्ता, एवं एतेणं अभिलावेणं इमा गाहा अणुगंतव्वा-

आसीतं बत्तीसं, अट्ठावीसं चं[4] होति वीसं च।
अट्ठारस सोलसगं, अट्ठुत्तरमेव हिट्ठिमिया।।१।। ।। ५।।

---

१. द्रष्टव्यं - प्रज्ञापना १/५३।। २. ता. प्रतौ सूत्र ४ स्थाने एवं पाठोऽस्ति– एवं धम्मा वंसा सेला, अंजणरिट्ठा मघा य माघवती । सत्तण्हं पुढवीणं एते णामा मुणेतव्वा । जाव सत्तमा माधवती णामेणं तमतमा गोत्तेणं पण्णत्ता।।
३. *आसीउत्तरं* - जे. ।। ४ ता. । तहेव - मु.L।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी कियद्बाहुल्येन प्रज्ञप्ता?,** अत्र गोत्रेण प्रश्नो नाम्नो गोत्रं प्रधानतरं प्रधानेन च प्रश्नाद्युपपन्नमिति न्यायप्रदर्शनार्थः, उक्तञ्च–**"न हीना वाक् सदा सता" [ ]** मिति, भगवानाह-**'अशीत्युत्तरम्'** अशीतियोजनसहस्राभ्यधिकं **योजनशतसहस्रं बाहुल्येन प्रज्ञप्ता।** एवं सर्वाण्यपि सूत्राणि भावनीयानि, अत्र **सङ्ग्रहणि**गाथा-

"आसीयं बत्तीसं अट्ठावीसं च होइ वीसं च।
अट्ठारस सोलसगं अट्ठोत्तरमेव हिट्ठिमिया।।१।।" ।। ५।।

(६) इमा णं भंते! रयणप्पभा पुढवी कतिविधा पण्णत्ता?, गोयमा! तिविधा पण्णत्ता, तं जहा-खरकंडे पंकबहुले कंडे आवबहुले कंडे।। ६।।

'इमा णं भंते' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी 'कतिविधा'** कतिप्रकारा कतिविभागा **प्रज्ञप्ता?,** भगवानाह–**गौतम! 'त्रिविधा'** त्रिविभागा **प्रज्ञप्ता, तद्यथा-'खरकाण्ड'**मित्यादि, काण्डं नाम विशिष्टो भूभागः, खरं–कठिनं, **पङ्कबहुलं** ततोऽब्बहुलं चान्वर्थतः प्रतिपत्तव्यं, क्रमश्चैतेषामेवमेव, तद्यथा–प्रथमं खरकाण्डं, तदनन्तरं पङ्कबहुलं, ततोऽब्बहुलमिति।। ६ ।।

(७) इमीसे णं भंते! रय० पुढ० खरकंडे कतिविधे पण्णत्ते?, गोयमा! सोलसविधे पण्णत्ते, तंजहा-[1]रयणकंडे १ वइरे २ वेरुलिए ३ लोहितक्खे ४ मसारगल्ले ५ हंसगब्भे ६ पुलए ७ सोयंधिए ८ जोतिरसे ९ अंजणे १० अंजणपुलए ११ रयते १२ जातरूवे १३ अंके १४ फलिहे १५ रिट्ठे १६ कंडे।। ७।।

'इमीसे णं भंते' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां खरकाण्डं कतिविधं प्रज्ञप्तं?,** भगवानाह–**गौतम! 'षोडशविधं'** षोडशविभागं **प्रज्ञप्तं, तद्यथा-'रयणे'** इति, पदैकदेशे पदसमुदायोपचाराद् **रत्नकाण्डं** तच्च प्रथमं, द्वितीयं **वज्र**काण्डं, तृतीयं **वैडूर्य**काण्डं, चतुर्थं **लोहित**काण्डं, पञ्चमं **मसारगल्ल**काण्डं, षष्ठं **हंसगर्भ**काण्डं, सप्तमं **पुलक**काण्डम्, अष्टमं **सौगन्धिक**काण्डं, नवमं **ज्योतीरस**काण्डं, दशम**मञ्जन**काण्डम्, एकादश**मञ्जनपुलक**काण्डं, द्वादशं **रजत**काण्डं, त्रयोदशं **जातरूप**काण्डं, चतुर्दश**मङ्क**काण्डं, पञ्चदशं **स्फटिक**काण्डं, षोडशं **रिष्टरत्नकाण्डं,** तत्र रत्नानि–कर्केतनादीनि तत्प्रधानं काण्डं रत्नकाण्डं, वज्ररत्नप्रधानं काण्डं वज्रकाण्डम्, एवं शेषाण्यपि, एकैकं च काण्डं योजनसहस्रबाहल्यम्।। ७ ।।

---

१. मु. खट । रतणकंडे - कग । रयणामए कंडे - जे. । रयणे-व० L।।

(८) इमीसे णं भंते! रयणप्पभाए पुढवीए रयणकंडे कतिविधे पण्णत्ते?, गोयमा! एगागारे पण्णत्ते, एवं जाव रिट्ठे।। ८।।

'इमीसे णं भंते' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां रत्नकाण्डं 'कतिविधं'** कतिप्रकारं कतिविभागमिति भावः **प्रज्ञप्तं?**, भगवानाह–**एकाकारं प्रज्ञप्तम्**।। ८ ।।

(९) इमीसे णं भंते! रयणप्पभाए पुढवीए पंकबहुले कंडे कतिविधे पण्णत्ते?, गोयमा! एकागारे पण्णत्ते।। ९ ।। (१०) एवं आवबहुले कंडे कतिविधे पण्णत्ते?, गोयमा! एकागारे पण्णत्ते।।१०।।

एवं शेषकाण्डविषयाण्यपि प्रश्ननिर्वचनसूत्राणि क्रमेण भावनीयानि।। एवं पङ्कबहुलाब्बहुल-विषयाण्यपि।। ९-१० ।।

(११) सक्करप्पभा णं भंते! पुढवी कतिविधा पण्णत्ता?, गोयमा! एकागारा पण्णत्ता, एवं जाव अहेसत्तमा।। ११ ।।

'दोच्चा[1] णं भंते' इत्यादि, द्वितीयादिपृथिवीविषयाणि सूत्राणि पाठसिद्धानि।। ११ ।।

सम्प्रति प्रतिपृथिवि नरकावाससङ्ख्याप्रतिपादनार्थमाह–

(१२) इमीसे णं भंते! रयणप्पभाए पुढवीए केवतिया निरयावाससयसहस्सा पण्णत्ता?, गोयमा! तीसं णिरयावाससयसहस्सा पण्णत्ता[2], एवं एतेणं अभिलावेणं सव्वासिं पुच्छा, इमा गाहा अणुगंतव्वा-

तीसा य पण्णवीसा पण्णरस दसेव तिण्णि य हवंति।
पंचूणसयसहस्सं पंचेव अणुत्तरा णरगा।।१।।

जाव अहेसत्तमाए पंच अणुत्तरा महतिमहालया महाणरगा[3] पण्णत्ता, तंजहा-काले महाकाले रोरुए महारोरुए अपतिट्ठाणे।।१२।।

---

१. अत्र सूत्र-वृत्त्योः पाठे भेदः ।। २. इतोऽग्रे ता. प्रतौ इत्थं पाठः दृश्यते- तीसा य पण्णवीसा पण्णरस दसेव सतसहस्साइं। तिण्णेगं पंचूणं पंचेव अणुत्तरा णरता। जावधेसत्तमाए णं भंते! केवति णिरयावाससतसहस्सा? गो. पंचदिसि पंच अणुत्तरा महमहालया महाणिरया पं.तं. काले महकाले रोउए महारोउए अप्पतिट्ठाणे णाम पंचमए ।। ३. महा० SP **नास्ति** ।।

'इमीसे णं भंते' इत्यादि सुगमं, नवरमियमत्र **सङ्ग्रहणि**गाथा-

"तीसा य पण्णवीसा, पणरस दस चेव सयसहस्साइं।
तिण्णेगं पंचूणं, पंचेव अणुत्तरा निरया।।१।।" [देवेन्द्रनरकेन्द्रप्र.५६, भग.सू.१,५। बृ.सं.२५५]

अधःसप्तम्यां च पृथिव्यां कालादयो **महानरका** अप्रतिष्ठानाभिधस्य नरकस्य पूर्वादिक्रमेण, उक्तञ्च-

"पुव्वेण होइ कालो अवरेणं अप्पइट्ठ महकालो।
रोरू दाहिणपासे उत्तरपासे महारोरू।।१।।" [बृहत्सङ्ग्रहणी - २३०]

रत्नप्रभादिषु च तमःप्रभापर्यन्तासु षट्सु पृथिवीषु प्रत्येकं नरकावासा द्विविधाः,तद्यथा-आवलिका-प्रविष्टाः प्रकीर्णकरूपाश्च, तत्र रत्नप्रभायां पृथिव्यां त्रयोदश प्रस्तटाः, प्रस्तटा नाम वेश्मभूमिकाकल्पाः, तत्र प्रथमप्रस्तटे पूर्वादिषु चतसृषु दिक्षु प्रत्येकमेकोनपञ्चाशत् नरकावासाः, चतसृषु विदिक्षु प्रत्येकमष्ट-चत्वारिंशत्, मध्ये च सीमन्तकाख्यो नरकेन्द्रकः, सर्वसङ्ख्यया प्रथमप्रस्तटे नरकावासानामावलिका-प्रविष्टानामेकोननवत्यधिकानि त्रीणि शतानि ३८९, शेषेषु च द्वादशसु प्रस्तटेषु प्रत्येकं यथोत्तरं दिक्षु विदिक्षु चैकैकनरकावासहानिभावाद् अष्टकाऽष्टकहीना नरकावासा द्रष्टव्याः, ततः सर्वसङ्ख्यया रत्नप्रभायां पृथिव्यामावलिकाप्रविष्टा नरकावासाश्चतुश्चत्वारिंशच्छतानि त्रयस्त्रिंशदधिकानि ४४३३, शेषास्त्वेकोनत्रिंशल्लक्षाणि पञ्चनवतिसहस्राणि पञ्च शतानि सप्तषष्ट्यधिकानि २९९५५६७ प्रकीर्णकाः, तथा चोक्तम्-

"सत्तट्ठी पंचसया, पणनउइसहस्स लक्खगुणतीसं।
रयणाए सेढिगया, चोयालसया उ तित्तीसं।।१।।" [त्रैलोक्यदीपक ३७४]

उभयमीलने त्रिंशल्लक्षा नरकावासानां भवन्ति ३०००००। शर्कराप्रभायामेकादश प्रस्टटाः, **"नरकपटलान्यधोऽधो द्वन्द्वहीनानी"**[ ]ति वचनात्, तत्र प्रथमे प्रस्टटे चतसृषु दिक्षु षट्त्रिंशद् आवलिकाप्रविष्टा नरकावासाः, विदिक्षु पञ्चत्रिंशत्, मध्ये चैको नरकेन्द्रकः, सर्वसङ्ख्यया द्वे शते पञ्चाशीत्यशिके २८५, शेषेषु तु दशसु प्रस्टटेषु प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानिः, प्रतिदिक्-प्रतिविदिक्षु(क् च) एकैकनरकावासहानेः, ततस्तत्र सर्वसङ्ख्ययाऽऽवलिकाप्रविष्टा नरकावासाः षड्विंशतिशतानि पञ्चनवत्यधिकानि २६९५, शेषाश्चतुर्विंशतिलक्षाः सप्तनवतिः सहस्राणि त्रीणि शतानि पञ्चोत्तराणि २४९७३०५ पुष्पावकीर्णकाः, उक्तञ्च-

---

१. पइट्ठिओ - **बृ.सं.।।**

"सत्ताणउइ सहस्सा, चउवीसं लक्ख तिसय पंचऽहिया।
बीयाए सेढिगया, छव्वीससया उ पणनउया।।१।।"[त्रैलोक्यदीपक ३७५,देवेन्द्रन.प्र.५८]

उभयमीलने पञ्चविंशतिर्लक्षा नरकावासानाम् २५०००००। वालुकाप्रभायां नव प्रस्तटाः, प्रथमे च प्रस्तटे एकैकस्यां दिशि आवलिकाप्रविष्टा नरकावासाः पञ्चविंशतिः विदिशि चतुर्विंशतिः मध्ये चैको नरकेन्द्रक इति सर्वसङ्ख्यया सप्तनवतं शतं १९७, शेषेषु चाष्टसु प्रस्तटेषु प्रत्येकं क्रमेणाधोऽधोऽष्टकहानिः, तत्र च कारणं प्रागेवोक्तं, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासाश्चतुर्दश शतानि पञ्चाशीत्यधिकानि १४८५, शेषास्तु पुष्पावकीर्णकाश्चतुर्दश लक्षा अष्टनवतिः सहस्राणि पञ्च शतानि पञ्चदशाधिकानि १४९८५१५, उक्तञ्च–

"पंचसया पन्नारा अडनवइसहस्स लक्ख चोद्दस य ।
तइयाए सेढिगया पणसीया चोद्दससया उ।।१।।" [त्रैलोक्यदीपक-३७६,देवेन्द्रन.प्र.५९]

उभयमीलने पञ्चदश लक्षा नरकावासानाम् १५०००००। पङ्कप्रभायां सप्त प्रस्तटाः, प्रथमे च प्रस्तटे प्रत्येकं दिशि षोडश षोडश आवलिकाप्रविष्टा नरकावासाः विदिशि पञ्चदश पञ्चदश मध्ये चैको नरकेन्द्रकः सर्वसङ्ख्यया पञ्चविंशतिशतं १२५, शेषेषु षट्सु प्रस्तटेषु पूर्ववत् प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानिः, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासाः सप्त शतानि सप्तोत्तराणि ७०७, शेषास्तु पुष्पावकीर्णका नव लक्षा नवनवतिः सहस्राणि द्वे शते त्रिनवत्यधिके ९९९२९३, उक्तञ्च–

"तेणउया दोण्णि सया, नवनउइ सहस्स नव य लक्खा य।
पंकाए सेढिगया, सत्त सया हुंति सत्तहिया।।१।।"[देवेन्द्रन.६०, त्रैलोक्यदी.३७७]

उभयमीलने नरकावासानां दश लक्षाः १०००००। धूमप्रभायां पञ्च प्रस्तटाः, प्रथमे च प्रस्तटे एकैकस्यां दिशि नव नव आवलिकाप्रविष्टा नरकावासाः, विदिशि अष्टौ अष्टौ मध्ये चैको नरकेन्द्रक इति सर्वसङ्ख्यया एकोनसप्ततिः ६९, शेषेषु चतुर्षु प्रस्तटेषु पूर्ववत्प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानिः, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासा द्वे शते पञ्चषष्ट्यधिके २६५, शेषाः पुष्पावकीर्णका द्वे लक्षे नवनवतिः सहस्राणि सप्त शतानि पञ्चत्रिंशदधिकानि २९९७३५, उक्तञ्च–

''सत्तसया पणतीसा नवनवइ [य] सहस्स दो य लक्खा य।
धूमाए सेढिगया पंणसट्ठा[1] दो सया होंति।।१।।" [देवेन्द्रन.६१, त्रैलोक्यदी.३७८]

---

१. पण्णट्ठा - **इति देवेन्द्रनरकेन्द्र प्र. त्रैलोक्यदीपके च ।।**

सर्वसङ्ख्यया तिस्रो लक्षाः ३००००० नरकावासानाम्। तमःप्रभायां त्रयः प्रस्तटाः, तत्र प्रथमे प्रस्तटे प्रत्येकं दिशि चत्वारश्चत्वार आवलिकाप्रविष्टा नरकावासा विदिशि त्रयस्त्रयो मध्ये चैको नरकेन्द्रक इति सर्वसङ्ख्यया एकोनत्रिंशत् २९, शेषयोस्तु प्रस्तटयोः प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानिः, ततः सर्वसङ्ख्ययाऽऽवलिकाप्रविष्टा नरकावासास्त्रिषष्टिः ६३, शेषास्तु नवनवतिः सहस्राणि नव शतानि द्वात्रिंशदधिकानि पुष्पावकीर्णकाः ९९९३२, उक्तञ्च–

"नवनउई य सहस्सा, नव चेव सया हवंति बत्तीसा।
पुढवीए छट्ठीए, पइण्णगाणेस संखेवो।।१।।" [त्रैलोक्यदी.३७९]

उभयमीलने पञ्चोनं नरकावासानां लक्षम् ९९९९५।। १२ ।। सम्प्रति प्रतिपृथिवि घनोदध्याद्यस्तित्व-प्रतिपादनार्थमाह–

(१३) अत्थि णं भंते! इमीसे रयणप्पभाए पुढवीए अहे घणोदधीति वा घणवातेति वा तणुवातेति वा ओवासंतरेति वा?, हंता अत्थि, एवं जाव अहेसत्तमाए।। १३।।

'अत्थि णं भंते!' इत्यादि, **अस्ति भदन्त! अस्याः** प्रत्यक्षत उपलभ्यमानाया **रत्नप्रभायाः पृथिव्या अधो** घनः–स्त्यानीभूतोदक उदधि**र्घनोदधिरिति वा** घनः–पिण्डीभूतो वातः **घनवात इति वा तनुवात इति वा अवकाशान्तरमिति वा?,** अवकाशान्तरं नाम शुद्धमाकाशं, भगवानाह–**हन्त! अस्ति, एवं** प्रतिपृथिवि तावद्वाच्यं **यावदधःसप्तम्याः**।। १३ ।।

१४ इमीसे णं भंते! रयणप्पभाए पुढवीए खरकंडे केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! सोलसजोयणसहस्साइं बाहल्लेणं पन्नत्ते।। १४ ।।

'इमीसे णं भंते!' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्याः** सम्बन्धि यत्प्रथमं **खरं**-खराभिधानं **काण्डं** तत् **कियद्बाहल्येन प्रज्ञप्तम्?,** भगवानाह–**गौतम! षोडश योजनसहस्राणि**।। १४।।

१५ इमीसे णं भंते! रयणप्पभाए पुढवीए रयणकंडे केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! एक्कं जोयणसहस्सं बाहल्लेणं पण्णत्ते, एवं जाव रिट्ठे।।। १५ ।। (१६) इमीसे णं भंते! रय० पु० पंकबहुले कंडे केवतियं बाहल्लेणं पन्नत्ते?, गोयमा!

चतुरासीतिजोयणसहस्साइं बाहल्लेणं पण्णत्ते।। १६ ।। (१७) इमीसे णं भंते! रय० पु० आवबहुले कंडे केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! असीतिजोयणसहस्साइं[1] बाहल्लेणं पन्नत्ते।। १७ ।। (१८) इमीसे णं भंते! रयणप्पभाए पु० घणोदही केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! वीसं जोयणसहस्साइं बाहल्लेणं पण्णत्ते।। १८ ।। (१९) इमीसे णं भंते! रय० पु० घणवाए केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! असंखेज्जाइं जोयणसहस्साइं बाहल्लेणं पण्णत्ते, एवं तणुवातेऽवि ओवासंतरेऽवि ।। १९ ।। (२०) सक्करप्प० भंते! पु० घणोदही केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! वीसं जोयणसहस्साइं बाहल्लेणं पण्णत्ते।। २० ।। (२१) सक्करप्प० पु० घणवाते केवइए बाहल्लेणं पण्णत्ते?, गोयमा! असंखे० जोयणसहस्साइं बाहल्लेणं पण्णत्ते, एवं तणुवातेवि, ओवासंतरेवि जहा सक्करप्प० पु० एवं जाव अधेसत्तमा।। २१ ।।

'**इमीसे ण**'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नं**-रत्नाभिधानं **काण्डं** तत् **कियद् बाहल्येन प्रज्ञप्तम्?**, भगवानाह-**गौतम! एकं योजनसहस्रम्**। एवं शेषाण्यपि काण्डानि वक्तव्यानि **यावद् रिष्ठं**-रिष्ठाभिधानं काण्डम्। एवं पङ्कबहुलाब्बहुलकाण्डसूत्रे अपि व्याख्येये, **(१६)पङ्कबहुलं काण्डं चतुरशीतिर्योजनसहस्राणि बाहल्येन,** (१७) **अब्बहुलं काण्डमशीतिर्योजनसहस्राणि,** सर्वसङ्ख्यया रत्नप्रभाया बाहल्यमशीतिसहस्राधिकं लक्षं, (१८) तस्या अधो **घनोदधिः विंशतिर्योजनसहस्राणि** बाहल्येन, (१९) **तस्याप्यधो घनवातोऽसङ्ख्येयानि योजनसहस्राणि बाहल्येन,** तस्याप्यधोऽसङ्ख्येयानि योजनसहस्राणि **तनुवातो** बाहल्येन, तस्याप्यधोऽसङ्ख्येयानि योजनसहस्राणि बाहल्येना**वकाशान्तरम्**। एवं शेषाणामपि पृथिवीनां घनोदध्यादयः प्रत्येकं तावद्वक्तव्या **यावदधःसप्तम्याः**।।१५-२१।।

(२२) इमीसे णं भंते! रयणप्प० पु० असीउत्तरजोयणसतसहस्सबाहल्लाए खेत्तच्छेएणं छिज्जमाणीए अत्थि दव्वाइं वण्णतो काल-नील-लोहित-हालिद्द-सुक्किल्लाइं, गंधतो सुरब्भिगंधाइं[2] दुब्भिगंधाइं, रसतो तित्त-कडुय-कसाय-अंबिल-

१. आसीति० SP ।। २. जे. S। सुरभि० मु. L।।

महुराइं, फासतो कक्खड-मउय-गरुय-लहु-सीत-उसिण-णिद्ध-लुक्खाइं, संठाणतो परिमंडल-वट्ट-तंस-चउरंस-आययसंठाणपरिणयाइं, अन्नमन्नबद्धाइं, अण्णमण्णपुट्ठाइं, अण्णमण्णओगाढाइं अण्णमण्णसिणेहपडिबद्धाइं, अण्णमण्णघडत्ताए चिट्ठंति?, हंता अत्थि।।२२।।

'इमीसे णं भंते' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यामशीत्युत्तरयोजनशतसहस्त्र-बाहल्यायां क्षेत्रच्छेदेन**-बुद्ध्या प्रतरकाण्डविभागेन छिद्यमानायाम्, **अस्ती**ति निपातोऽत्र बहुलवचनार्थगर्भः, सन्ति **द्रव्याणि वर्णतः कालानि नीलानि लोहितानि हारिद्राणि शुक्लानि, गन्धतः सुरभिगन्धीनि दुरभिगन्धीनि** च, **रसतस्तिक्त**करसानि **कटुकानि कषायाणि अम्लानि मधुराणि, स्पर्शतः कर्कशानि मृदूनि गुरुकाणि लघूनि शीतानि उष्णानि स्निग्धानि रूक्षाणि, संस्थानतः परिमण्डलानि वृत्तानि त्र्यस्त्राणि चतुरस्त्राणि आयतानि,** कथम्भूतान्येतानि सर्वाण्यपि? इत्यत आह-**'अन्नमन्नपुट्ठाइं'** इत्यादि, अन्योऽन्यं-परस्परं स्पृष्टानि-स्पर्शमात्रोपेतानि, तथा**ऽन्योऽन्यं**-परस्पर**मवगाढानि** यत्रैकं द्रव्यमवगाढं तत्रान्यदपि देशतः क्वचित्सर्वतोऽवगाढमित्यर्थः, तथा**ऽन्योऽन्यं**-परस्परं **स्नेहेन प्रतिबद्धानि** येनैकस्मिन् चाल्यमाने गृह्यमाणे वाऽपरमपि चलनादिधर्मोपेतं भवति, एवम् **'अन्नोन्नघडत्ताए चिट्ठंति'** इति, अन्योऽन्यं-परस्परं घटन्ते-सम्बध्नन्तीति अन्योऽन्यघटास्तद्भावोऽन्योऽन्यघटता तया-परस्परसम्बद्धतया **तिष्ठन्ति?**, भगवानाह-**'हंता अत्थि'** 'हन्त!' इति प्रत्यवधारणे सन्त्येवेत्यर्थः।। २२ ।।

(२३) इमीसे णं भंते! रयणप्पभाए पु० खरकंडस्स सोलसजोयणसहस्सबाहल्ल-स्स खेत्तच्छेएणं छिज्जमाणस्स अत्थि दव्वाइं[१] वण्णओ काल जाव परिणयाइं?, हंता अत्थि।।२३।।(२४) इमीसे णं रयणप्प० पु० रयणनामगस्स कंडस्स जोयण-सहस्सबाहल्लस्स खेत्तच्छेएणं छिज्ज० तं चेव जाव? हंता अत्थि, एवं जाव [प्रि]दुस्स।।२४।।(२५) इमीसे णं भंते! रयणप्प० पु० पंकबहुलस्स कंडस्स चउरासी-तिजोयणसहस्सबाहल्लस्स खेत्ते तं चेव, एवं आवबहुलस्सवि असीतिजोयण-सहस्सबाहल्लस्स।। २५।। (२६) इमीसे णं भंते! रयणप्प० पु० घणोदधिस्स वीसं

१. मु. कखगट । दव्वाई जाव हंता अत्थि। L दव्वा जाव हंता अत्थि - जे.।।

जोयणसहस्सबाहल्लस्स खेत्तच्छेदेण तहेव। एवं घणवातस्स असंखेज्जजोयण-सहस्सबाहल्लस्स तहेव, तणुवातस्स[1] ओवासंतरस्सवि तं चेव।।२६।।

एव**मस्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डस्य षोडशयोजनसहस्रप्रमाणबाहल्यस्य** ।।२३।। तदनन्तरं **रत्नकाण्डस्य योजनसहस्रबाहल्यस्य,** ततो वज्रकाण्डस्य **यावद्रिष्टकाण्डस्य**।।२४।। तदनन्तर**मस्यामेव रत्नप्रभायां पृथिव्यां पङ्कबहुलकाण्डस्य चतुरशीतियोजनसहस्रबाहल्यस्य,** तदनन्तर**मब्बहुलकाण्डस्याशीतियोजनसहस्रबाहल्यस्य** ।। २५ ।। तदनन्तर**मस्या एव रत्नप्रभाया घनोदधेर्योजनविंशतिसहस्रप्रमाणबाहल्यस्य,** ततोऽ**सङ्ख्यातयोजनसहस्रप्रमाणबाहल्यस्य घनवातस्य,** तत एतावत्प्रमाणबाहल्यस्य **तनुवातस्य,** ततोऽ**वकाशान्तरस्य** तावत्प्रमाणस्य।।२६।।

(२७) सक्करप्पभाए णं भंते! पु० बत्तीसुत्तरजोयणसतसहस्सबाहल्लाए खेत्तच्छेएण छिज्जमाणीए अत्थि दव्वाइं वण्णतो जाव[2] घडत्ताए चिट्ठंति?, हंता अत्थि, एवं घणोदहिस्स वीसजोयणसहस्सबाहल्लस्स घणवातस्स असंखेज्जजोयण-सहस्सबाहल्लस्स, एवं जाव ओवासंतरस्स, जहा सक्करप्पभाए एवं जाव अहेसत्त-माए।। २७।।

ततः **शर्कराप्रभायाः पृथिव्या द्वात्रिंशत्सहस्रोत्तरयोजनशतसहस्रबाहल्यपरिमाणायाः,** तस्या एवाधस्ताद्यथोक्तप्रमाणबाहल्यानां **घनोदधि-घनवात-तनुवातावकाशान्तराणाम्,** एवं **यावदधःसप्तम्याः पृथिव्या** अष्टसहस्राधिकयोजनशतसहस्रपरिमाणबाहल्यायाः, ततस्तस्या एवाधःसप्तमपृथिव्या अधस्तात्क्रमेण घनोदधि-घनवात-तनुवातावकाशान्तराणां प्रश्ननिर्वचनसूत्राणि यथोक्तद्रव्यविषयाणि भावनीयानि।। २७।।

सम्प्रति संस्थानप्रतिपादनार्थमाह—

(२८) इमा णं भंते! रयणप्प० पु० किंसंठिता पण्णत्ता?, गोयमा! झल्लरि-संठिता पण्णत्ता। (२९) इमीसे णं भंते! रयणप्प० पु० खरकंडे किंसंठिते पण्णत्ते?, गोयमा! झल्लरिसंठिते पण्णत्ते। (३०) इमीसे णं भंते! रयणप० पु० रयणकंडे किंसंठिते पण्णत्ते?, गोयमा! झल्लरिसंठिए पण्णत्ते। एवं जाव रिट्ठे। एवं पंकबहुलेवि,

१. तणुवातोवासंतराणं असंखजोयण सह० बाहल्लेणं जस्स जं पमाणं तस्स तं भाणितव्वं - जे. ।।२. जाव अण्णमण्णघडत्ता - L ।।

एवं आवबहुलेवि घणोदधीवि घणवाएवि तणुवाएवि ओवासंतरेवि, सव्वे झल्लरि-संठिता पण्णत्ता। (३१) सक्करप्पभा णं भंते! पुढवी किंसंठिता पण्णत्ता?, गोयमा! झल्लरिसंठिता पण्णत्ता, (३२) सक्करप्पभाए पुढवीए घणोदधी किंसंठिते पण्णत्ते?, गोयमा! झल्लरिसंठिते पण्णत्ते, एवं जाव ओवासंतरे, जहा सक्करप्पभाए वत्तव्वया एवं जाव अहेसत्तमाएवि।। ३२।।

'इमा णं भंते' इत्यादि, **'इयं'** प्रत्यक्षत उपलभ्यमाना **ण**मिति वाक्यालङ्कृतौ **रत्नप्रभापृथिवी** किमिव संस्थिता **किंसंस्थिता प्रज्ञप्ता?**, भगवानाह–**गौतम!** झल्लरीव संस्थिता **झल्लरीसंस्थिता प्रज्ञप्ता,** विस्तीर्णवलयाकारत्वात्।।२८।। एवम**स्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डं,** तत्रापि **रत्नकाण्डं,** ततो वज्रकाण्डं, ततो **यावद् रिष्ठकाण्डं,** तदनन्तरं **पङ्कबहुलकाण्डं,** ततो **जलकाण्डं,** तदनन्तरमस्या एव रत्नप्रभायाः पृथिव्या अधस्तात्क्रमेण **घनोदधि-घनवात-तनुवातावकाशान्तराणि यावदधःसप्तमीपृथिवी,** तस्याश्चाधस्तात्क्रमेण घनोदधि-घनवात-तनुवातावकाशान्तराणि झल्लरीसंस्थानानि वक्तव्यानि।। २९-३२।।

ननु चैताः सप्तापि पृथिव्यः सर्वासु दिक्षु किमलोकस्पर्शिन्य उत न? इति, उच्यते, नेति ब्रूमः, यद्येवं ततः–

(३३) इमीसे णं भंते! रयणप्प० पुढवीए पुरत्थिमिल्लातो चरिमंताओ केवतियं अबाधाए लोयंते पण्णत्ते?, गोयमा! दुवालसहिं जोयणेहिं[१] अबाधाए लोयंते पण्णत्ते, एवं दाहिणिल्लातो पच्चत्थिमिल्लातो उत्तरिल्लातो।। ३३ ।।

'इमीसे णं भंते' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्याः 'पुरत्थिमिल्लाओ'** इति पूर्वदिग्भाविनश्च**रमान्तात् 'केवइयाए'**[२] इति कियत्याऽबाधया–अपान्तरालरूपया लोकान्तोऽलोकावधि-परिच्छिन्नः प्रज्ञप्तः?, भगवानाह–द्वादश योजनानि, द्वादशयोजनप्रमाणयेत्यर्थः, अबाधया लोकान्तः प्रज्ञप्तः, किमुक्तं भवति? रत्नप्रभायाः पृथिव्याः पूर्वस्यां दिशि चरमपर्यन्तात्परतोऽलोकादर्वाग् अपान्तरालं द्वादश योजनानि, एवं दक्षिणस्यामपरस्यामुत्तरस्यां चापान्तरालं वक्तव्यं, दिग्ग्रहणं चोपलक्षणं तेन सर्वासु विदिक्ष्वपि यथोक्तमपान्तरालमवसातव्यम्।। ३३ ।।

---

१. आबा० SP **कखट । एवमग्रेऽपि क्वचित् ।। २. सूत्र-वृत्त्योः पाठे भेदः ।।**

(३४) सक्करप्प[१]० पु० पुरत्थिमिल्लातो चरिमंतातो केवतियं अबाधाए लोयंते पण्णत्ते?, गोयमा! तिभागूणेहिं तेरसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते, एवं चउद्दिसिंपि।। ३४ ।। (३५) वालुयप्प० पु० पुरत्थिमिल्लातो पुच्छा, गोयमा! सतिभागेहिं तेरसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते, एवं चउद्दिसिंपि ।। ३५ ।। (३६) एवं सव्वासिं चउसुवि दिसासु पुच्छितव्वं। पंकप्प० चोद्दसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते। धूमप्पभाए[२] तिभागूणेहिं पन्नरसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते। छट्ठीए सतिभागेहिं पन्नरसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते। सत्तमीए सोलसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते, एवं जाव उत्तरिल्लातो।।३६।।

शेषाणां तु पृथिवीनां सर्वासु दिक्षु विदिक्षु च चरमपर्यन्तादलोकः क्रमेणाधोऽध**स्त्रिभागोनेन योजनेनाधिकैर्द्वादशभिर्योजनै**रवगन्तव्यः, तद्यथा–शर्कराप्रभायाः पृथिव्याः सर्वासु दिक्षु विदिक्षु च चरमपर्यन्तादलोकादर्वागपान्तरालं **त्रिभागोनानि त्रयोदश योजनानि, वालुकाप्रभायाः सत्रिभागानि त्रयोदश योजनानि, पङ्कप्रभायाः** परिपूर्णानि **चतुर्दश योजनानि, धूमप्रभायास्त्रिभागोनानि पञ्चदश योजनानि,** तमःप्रभायाः **सत्रिभागानि पञ्चदश योजनानि,** अधः**सप्तमपृथिव्याः** परिपूर्णानि **षोडश योजनानि,** सूत्राक्षराणि पूर्ववद्योजनीयानि।। ३४-३६ ।।

अथामूनि रत्नप्रभादीनां द्वादशयोजनप्रमाणादीनि अपान्तरालानि किमाकाशरूपाणि उत घनोदध्यादिव्याप्तानि?, उच्यते, घनोदध्यादिव्याप्तानि, तत्र कस्मिन्नपान्तराले कियान् घनोदध्यादिः? इति प्रतिपादनार्थमाह–

(३७) इमीसे णं भंते! रयण० पु० पुरत्थिमिल्ले चरिमंते कतिविधे पण्णत्ते?, गोयमा! तिविहे पण्णत्ते, तंजहा-घणोदधिवलए घणवायवलए तणुवातवलए।। ३७।।

(३८) एवं[३] चउद्दिसिं, एवं सेसाण वि पुढ०।। ।। ३८।।

---

१. दोच्चाए - **जे । एवमग्रेपि।। २.** SP **क ट** । पंचमाए - **मु.** L।। **३. जे. सूत्र-३८ स्थाने मु. Lमध्ये इत्थं पाठः-** इमीसे णं भंते! रयणप्प० पु० दाहिणिल्ले चरिमंते कतिविधे पण्णत्ते?, गोयमा! तिविधे पण्णत्ते, तंजहा-[घणोदधिवलए घणवायवलए तणुवायवलए] -एवं जाव उत्तरिल्ले, एवं सव्वासिं जाव अधेसत्तमाए उत्तरिल्ले ।

'इमीसे णं भंते' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्याः पूर्वदिग्भावी 'चरमान्तः'** अपान्तराललक्षणः **'कतिविधः'** कतिप्रकारः कतिविभाग इत्यर्थः **प्रज्ञप्तः**?, भगवानाह–**गौतम! त्रिविधः प्रज्ञप्तः, तद्यथा-'घनोदधिवलयः'** वलयाकारघनोदधिरूप इत्यर्थः, एवं **घनवातवलयस्तनुवातवलयश्च,** इयमत्र भावना–सर्वासां पृथिवीनामधो यत्प्राग् बाहल्येन घनोदध्यादीनां परिमाणमुक्तं तन्मध्यभागे द्रष्टव्यं, ते हि मध्यभागे यथोक्तप्रमाणबाहल्यास्ततः प्रदेशहान्या प्रदेशहान्या हीयमानाः स्वस्वपृथिवीपर्यन्तेषु तनुतरा भूत्वा स्वां स्वां पृथिवीं वलयाकारेण वेष्टयित्वा स्थिताः, अत एवामूनि वलयान्युच्यन्ते, तेषां च वलयानामुच्चैस्त्वं सर्वत्र स्वस्वपृथिव्यनुसारेण परिभावनीयं, तिर्यग्बाहल्यं पुनरग्रे वक्ष्यते, इदानीं तु विभागमात्रमेवापान्तरालस्य प्रतिपादयितुमिष्टमिति तदेवोक्तम्,एवमस्या रत्नप्रभायाः पृथिव्याः शेषासु दिक्षु, एवं शेषाणामपि पृथिवीनां चतसृष्वपि दिक्षु प्रत्येकं २ विभागसूत्रं भणितव्यम्।। ३७-३८।।

सम्प्रति घनोदधिवलयस्य तिर्यग्बाहल्यमानमाह–

(३९) इमीसे णं भंते! रयणप्प० पुढवीए घणोदधिवलए केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! छ जोयणाणि बाहल्लेणं पण्णत्ते।।३९।। (४०) सक्करप्प० पु० घणोदधिवलए केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! सतिभागाइं छजोयणाइं बाहल्लेणं पण्णत्ते।। ४० ।। (४१) वालुयप्पभाए पुच्छा गोयमा! तिभागूणाइं सत्त जोयणाइं बाहल्लेणं प०। एवं एतेणं अभिलावेणं पंकप्पभाए सत्त जोयणाइं बाहल्लेणं पण्णत्ते। धूमप्पभाए सतिभागाइं सत्त जोयणाइं । तमप्पभाए तिभागूणाइं अट्ठ जोयणाइं। अहेसत्तमाए[1] अट्ठ जोयणाइं।। ४१।।

'इमीसे ण'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्याः** सर्वासु दिक्षु विदिक्षु च चरमान्ते **घनोदधिवलयः कियद्बाहल्येन**–तिर्यग्बाहल्येन **प्रज्ञप्तः**?, भगवानाह–**गौतम! षड् योजनानि बाहल्येन**-तिर्यग्बाहल्येन **प्रज्ञप्तः,** तत ऊर्ध्वं प्रतिपृथिवि योजनस्य त्रिभागो वक्तव्यः, तद्यथा– **शर्कराप्रभायाः सत्रिभागानि षड् योजनानि, वालुकाप्रभायास्त्रिभागोनानि सप्त योजनानि, पङ्कप्रभायाः** परिपूर्णानि **सप्त योजनानि, धूमप्रभायाः सत्रिभागानि सप्त योजनानि,**

---

१. SP । तमतमप्पभाए अट्ठ- मु.L ।।

तमःप्रभायास्त्रिभागोनान्यष्टौ योजनानि, अधःसप्तमपृथिव्याः परिपूर्णान्यष्टौ **योजनानि,** सूत्राक्षराणि तु सर्वत्र पूर्ववद्योजनीयानि।। ३९-४१।। सम्प्रति घनवातवलयस्य तिर्यग्बाहल्यपरिमाणप्रतिपादनार्थमाह–

(४२) इमीसे णं रयणप्प० पु० घणवायवलए केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! अद्धपंचमाइं जोयणाइं बाहल्लेणं।। ४२ ।। (४३) सक्करप्पभाए पुच्छा, गोयमा! कोसूणाइं पंच जोयणाइं बाहल्लेणं पण्णत्ताइं[1], एवं एतेणं अभिलावेणं वालुयप्पभाए पंच जोयणाइं बाहल्लेणं पण्णत्ताइं, पंकप्पभाए सक्कोसाइं पंच जोयणाइं बाहल्लेणं पण्णत्ताइं। धूमप्पभाए अद्धछट्ठाइं जोयणाइं बाहल्लेणं पन्नत्ताइं, तमप्पभाए कोसूणाइं छजोयणाइं बाहल्लेणं पण्णत्ताइं, अहेसत्तमाए छजोयणाइं बाहल्लेणं पण्णत्ताइं।। ४३ ।।

'इमीसे णं भंते!' इत्यादि, **अस्या रत्नप्रभायाः पृथिव्या घनवातवलय**स्तिर्यग्**बाहल्येनार्द्धपञ्चमानि-**सार्द्धानि चत्वारि **योजनानि प्रज्ञप्तः**, अत ऊर्ध्वं तु प्रतिपृथिवि गव्यूतं वर्द्धनीयं, तथा चाह– **द्वितीयस्याः[2] पृथिव्याः क्रोशोनानि पञ्च योजनानि, तृतीयस्याः पृथिव्याः** परिपूर्णानि **पञ्च योजनानि, चतुर्थ्याः पृथिव्याः सक्रोशानि पञ्च योजनानि, पञ्चम्याः पृथिव्या अर्द्धषष्ठानि-**सार्द्धानि पञ्च **योजनानि, षष्ठ्याः पृथिव्याः क्रोशोनानि षड् योजनानि, सप्तम्याः पृथिव्याः** परिपूर्णानि **षड् योजनानि**।। ४२-४३ ।। सम्प्रति तनुवातवलयस्य तिर्यग्बाहल्यपरिमाणप्रतिपादनार्थमाह–

(४४) इमीसे णं भंते! रयणप्प० पु० तणुवायवलए केवतियं बाहल्लेणं पण्णत्ते?, गोयमा! छक्कोसेणं बाहल्लेणं पण्णत्ते, एवं एतेणं अभिलावेणं सक्करप्पभाए सतिभागे छक्कोसे बाहल्लेणं पण्णत्ते। वालुयप्पभाए तिभागूणे सत्तकोसं बाहल्लेणं पण्णत्ते। पंकप्पभाए पुढवीए सत्तकोसं बाहल्लेणं पण्णत्ते। धूमप्पभाए सतिभागे सत्तकोसे बाहल्लेण। तमप्पभाए तिभागूणे अट्ठकोसे बाहल्लेणं पन्नत्ते। अधेसत्तमाए पुढवीए अट्ठकोसे बाहल्लेणं पण्णत्ते।। ४४।।

---

१. SP मु.। पण्णत्ताइं L नास्ति, एवमग्रेऽपि ।। २. सूत्र-वृत्त्योः पाठभेदः । एवमग्रेऽपि ।।

'इमीसे णं भंते!' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्यास्तनुवातवलयः 'कियत्'** किंप्रमाणं **'बाहल्येन'** तिर्यग्बाहल्येन **प्रज्ञप्तः**?, भगवानाह–**षट्क्रोशबाहल्येन प्रज्ञप्तः**, अत ऊर्ध्वं तु प्रतिपृथिवि क्रोशस्य त्रिभागो वर्द्धनीयः, तथा चाह–**द्वितीयस्याः पृथिव्याः सत्रिभागान् षट् क्रोशान् बाहल्येन प्रज्ञप्तः, तृतीयस्याः पृथिव्यास्त्रिभागोनान् सप्त क्रोशान्, चतुर्थ्याः पृथिव्याः** परिपूर्णान् **सप्त क्रोशान्, पञ्चम्याः पृथिव्याः सत्रिभागान् सप्त क्रोशान्, षष्ठ्याः पृथिव्यास्त्रिभागोनान् अष्टौ क्रोशान्, अधःसप्तम्याः** परिपूर्णान् **अष्टौ क्रोशान्,** उक्तञ्च–

"छच्चेव अद्धपंचमजोयणसङ्कं च होइ रयणाए।
उदही घणतणुवाया (उ) जहासंखेण निद्दिट्ठा।।१।। [त्रैलोक्यदीपक.३३७]
संतिभागगाउगाउयं च तिभागो गाउयस्स बोद्धव्वो।
आइधुवे पक्खेवो अहो अहो जाव सत्तमिया।।२।।" [तुला-त्रैलोक्यदी.३३८]

एतेषां च त्रयाणामपि घनोदध्यादिविभागानामेकत्र मीलने प्रतिपृथिवि यथोक्तमपान्तरालमानं भवति।। ४४।। सम्प्रत्येतेष्वेव घनोदध्यादिवलयेषु क्षेत्रच्छेदेन कृष्णवर्णाद्युपेतद्रव्यास्तित्वप्रतिपादनार्थमाह–

(४५) इमीसे णं भंते! रयणप्प० पु० घणोदधिवलयस्स छज्जोयणबाहल्लस्स खेत्तच्छेएणं छिज्जमाणस्स अत्थि दव्वाइं वण्णतो कालं[२] जाव? हंता अत्थि।।४५।।
(४६) सक्करप्पभाए णं भंते! पु० घणोदधिवलयस्स सतिभागछजोयणबाहल्लस्स खेत्तच्छेदेणं छिज्जमाणस्स जाव? हंता अत्थि, एवं जाव अधेसत्तमाए जं जस्स बाहल्लं।।४६।।(४७) इमीसे णं भंते! रयणप्प० पु० घणवातवलयस्स अद्धपंचम-जोयणबाहल्लस्स खेत्तछेदेणं छि० जाव? हंता अत्थि, एवं जाव अहेसत्तमाए जं जस्स बाहल्लं। एवं तणुवायवलयस्सवि जाव अधेसत्तमा जं जस्स बाहल्लं ।।४७।।

'इमीसे णं भंते!' इत्यादि, पूर्ववद् भावनीयं, बाहल्यपरिमाणमपि घनोदध्यादीनां प्रतिपृथिवि प्रागुक्तमुपयुज्य वक्तव्यम्।। ४५-४७।। सम्प्रति घनोदध्यादिसंस्थानप्रतिपादनार्थमाह–

(४८) इमीसे णं भंते! रयणप्पभाए पुढवीए घणोदधिवलए किंसंठिते पण्णत्ते?, गोयमा! वट्टे वलयागारसंठाणसंठिते पण्णत्ते। जेणं[३] इमं रयणप्पभं पुढविं सव्वतो

१. तिभागो गाउयं चेव तिभागो गाउअस्स य **-त्रै.दी.३३८ ।। २. द्र. ३/२२ सू.।। ३.** जेणिमं **- जे ।।**

संपरिक्खित्ता णं चिट्ठति,→ एवं[1] जाव अधेसत्तमाए पु० घणोदधिवलए, णवरं अप्पणप्पणं पुढविं संपरिक्खिवित्ता णं चिट्ठति←।। ४८ ।।

'इमीसे णं भंते!' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या घनोदधिवलयः** किमिव संस्थितः **किंसंस्थितः प्रज्ञप्तः**?, भगवानाह- **गौतम! 'वृत्तः'** चक्रवालतया परिवर्त्तुलो वलयस्य-मध्यशुषिरस्य वृत्तविशेषस्याकारः-आकृतिर्वलयाकारः स इव संस्थानं वलयाकारसंस्थानं तेन संस्थितो **वलयाकारसंस्थानसंस्थितः**। कथमेवमवगम्यते वलयाकारसंस्थानसंस्थित इति?, तत आह- **'जेण'**मित्यादि, येन कारणे**नेमां रत्नप्रभां पृथिवीं 'सर्वतः'** सर्वासु दिक्षु विदिक्षु च **'संपरिक्षिप्य'** सामस्त्येन वेष्टयित्वा **'तिष्ठति'** वर्त्तते तेन कारणेन वलयाकारसंस्थानसंस्थितः प्रज्ञप्तः।। ४८।।

(४९) इमीसे णं रयणप्प० पु० घणवातवलए किंसंठिते पण्णत्ते?, गोयमा! वट्टे वलयागारे तहेव जाव जेणं इमीसे णं रयणप्प० पु० घणोदधिवलयं सव्वतो समंता संपरिक्खिवित्ताणं चिट्ठइ, एवं जाव अहेसत्तमाए घणवातवलए।।४९।।
(५०) इमीसे णं रयणप्प० पु० तणुवातवलए किंसंठिते पण्णत्ते?, गोयमा! वट्टे वलयागारसंठाणसंठिए जाव जेणं इमीसे रयणप्प० पु० घणवातवलयं सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठइ, एवं जाव अधेसत्तमाए तणुवातवलए।।५०।।

एवं घनवातवलयसूत्रं तनुवातवलयसूत्रं च परिभावनीयं, नवरं **घनवातवलयो घनोदधिवलयं संपरिक्षिप्येति** वक्तव्यः, तनुवातवलयो घनवातवलयं संपरिक्षिप्येति। एवं शेषास्वपि पृथिवीषु प्रत्येकं त्रीणि त्रीणि सूत्राणि भावनीयानि।। ४९-५०।।

(५१) इमा णं भंते! रयणप्प० पु० केवतियं आयामविक्खंभेणं? केवतियं परिक्खेवेणं पं० गोयमा! असंखेज्जाइं जोयणसहस्साइं आयामविक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ते, एवं जाव अधेसत्तमा।।५१।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी कियद् 'आयाम-विष्कम्भेन'** समाहारो द्वन्द्वः, आयाम-विष्कम्भाभ्यां **प्रज्ञप्ता**?, भगवानाह-**असङ्ख्येयानि योजनसहस्राणि आयाम-विष्कम्भेन,** किमुक्तं भवति? असङ्ख्येयानि योजनसहस्राणि आयामेन, असङ्ख्येयानि योजनसहस्राणि

१.→←**चिह्नद्वयमध्यवर्तिपाठस्थाने जे. मध्ये.** एवं जाव अधे सत्तमं **इति पाठः, ∟ मध्ये नास्ति एवं पाठः ।।**

विष्कम्भेन च, आयाम-विष्कम्भयोस्तु परस्परमल्पबहुत्वचिन्तने तुल्यत्वं, तथाऽ**सङ्ख्येयानि योजनसहस्राणि 'परिक्षेपेण'** परिधिना प्रज्ञप्ता, **एव**मेकैका पृथिवी तावद्वक्तव्या **यावदधःसप्तमी** पृथिवी।। ५१।।

(५२) इमा णं भंते! रयणप्प० पु० अंते य मज्झे य सव्वत्थ समा बाहल्लेणं पण्णत्ता?, हंता गोयमा! इमा णं रयण० पु० अंते य मज्झे य सव्वत्थ समा बाहल्लेणं, एवं जाव अधेसत्तमा।। ५२।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी अन्ते मध्ये च सर्वत्र समा 'बाहल्येन'** पिण्डभावेन **प्रज्ञप्ता**?, भगवानाह- **गौतमे**त्यादि, सुगमम्। एवं क्रमेणैकैका पृथिवी तावद्वक्तव्या **यावत्सप्तमी**।।५२।।

(५३) इमीसे णं भंते! रयणप्प० पु० सव्वजीवा उववण्णपुव्वा? सव्वजीवा उववण्णा?, गोयमा! इमीसे णं रय० पु० सव्वजीवा उववण्णपुव्वा नो चेव णं सव्वजीवा उववण्णा, एवं जाव अहेसत्तमाए पुढवीए।।५३।।[1]

'इमीसे णं भंते!' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां सर्वजीवाः** सामान्येन **उपपन्नपूर्वा** इति-उत्पन्नपूर्वाः कालक्रमेण, तथा सर्वजीवाः **'उपपन्नाः'** उत्पन्ना युगपद्?, भगवानाह-**गौतम! अस्यां रत्नप्रभायां पृथिव्यां सर्वजीवाः** सांव्यवहारिकजीवराश्यन्तर्गताः प्रायोवृत्तिमाश्रित्य सामान्येन **'उपपन्नपूर्वाः'** उत्पन्नपूर्वाः कालक्रमेण, संसारस्यानादित्वात्, **न पुनः सर्वजीवाः 'उपपन्ना'** उत्पन्ना युगपत्, सकलजीवानामेककालं रत्नप्रभापृथिवीत्वेनोत्पादे सकलदेवनारकादिभेदाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यात्, **एव**मेकैकस्याः पृथिव्यास्तावद्वक्तव्यं **यावदधःसप्तम्याः**।। ५३ ।।

(५४) इमा णं भंते! रयण० पु० सव्वजीवेहिं विजढपुव्वा? सव्वजीवेहिं विजढा?, गोयमा! इमा णं रयण० पु० सव्वजीवेहिं विजढपुव्वा, नो चेव णं सव्वजीवविजढा, एवं जाव अधेसत्तमा।।५४।।

'इमा णं भंते!' इत्यादि, **इयं च भदन्त! रत्नप्रभापृथिवी 'सव्वजीवेहिं विजढपुव्वा'** इति सर्वजीवैः कालक्रमेण परित्यक्तपूर्वा, तथा **सर्वजीवै**र्युगपद् **'विजढा'** परित्यक्ता?, भगवानाह-**गौतम!**

१. त्र च मु. । पुढवीए ∟ ता. नास्ति ।।

इयं रत्नप्रभा पृथिवी प्रायोवृत्तिमाश्रित्य **सर्वजीवैः** सांव्यवहारिकैः कालक्रमेण **परित्यक्तपूर्वा, न तु** युगपत्**परित्यक्ता**, सर्वजीवैः एककालपरित्यागस्यासम्भवात् तथानिमित्ताभावात्, **एवं** तावद्वक्तव्यं **यावदधःसप्तमी पृथ्वी**।। ५४।।

(५५) इमीसे णं भंते! रयण० पु० सव्वपोग्गला पविट्ठपुव्वा? सव्वपोग्गला पविट्ठा? गोयमा! इमीसे णं रयण० पुढवीए सव्वपोग्गला पविट्ठपुव्वा, नो चेव णं सव्वपोग्गला पविट्ठा, एवं जाव अधेसत्तमाए पुढवीए।। ५५।।

'इमीसे ण'मित्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां सर्वे पुद्गला** लोकोदरविवरवर्त्तिनः कालक्रमेण **'प्रविष्टपूर्वाः'** तद्भावेन परिणतपूर्वाः, तथा **सर्वे पुद्गलाः 'प्रविष्टाः'** एककालं तद्भावेन परिणताः?, भगवानाह-**गौतम! अस्यां रत्नप्रभायां पृथिव्यां सर्वे पुद्गलाः** लोकवर्त्तिनः **'प्रविष्टपूर्वाः'** तद्भावेन परिणतपूर्वाः, संसारस्यानादित्वात्, **न पुनरे**ककालं **सर्वपुद्गलाः 'प्रविष्टाः'** तद्भावेन परिणताः, सर्वपुद्गलानां तद्भावेन परिणतौ रत्नप्रभाव्यतिरेकेणान्यत्र सर्वत्रापि पुद्गलाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यात्। **एवं** सर्वासु पृथिवीषु क्रमेण वक्तव्यं **यावदधःसप्तम्यां पृथिव्या**मिति।।५५।।

(५६) इमा णं भंते! रयणप्पभा पुढवी सव्वपोग्गलेहिं विजढपुव्वा? सव्वपोग्गला विजढा?, गोयमा! इमा णं रयणप्पभा पु० सव्वपोग्गलेहिं विजढपुव्वा, नो चेव णं सव्वपोग्गलेहिं विजढा, एवं जाव अधेसत्तमा।। ५६ ।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी सर्वपुद्गलैः** कालक्रमेण **'विजढपुव्वा'** इति परित्यक्तपूर्वा तथैव **सर्वैः पुद्गलै**रेककालं **परित्यक्ता**?, भगवानाह-**गौतम! इयं रत्नप्रभा पृथिवी सर्वपुद्गलैः** कालक्रमेण **परित्यक्तपूर्वा,** संसारस्यानादित्वात्, **न पुनः सर्वपुद्गलै**रेककालं **परित्यक्ता,** सर्वपुद्गलैरेककालपरित्यागे तस्याः सर्वथा स्वरूपाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यतः शाश्वतत्वात्, एतच्चानन्तरमेव वक्ष्यति। **एव**मेकैका पृथिवी क्रमेण तावद्वाच्या **यावदधःसप्तमी** पृथिवी ।।५६।।

(५७) इमा[१] णं भंते! रयणप्पभा पुढवी किं सासया? असासया[२]?, गोयमा! सिय सासता सिय असासया।। ५७ ।।

१. तुला-राजप्रश्नीयसूत्रे सू. १९८-१९९ ।। २. असासया SP **नास्ति** ।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी किं शाश्वती अशाश्वती?**, भगवानाह-**गौतम! स्यात्**-कथञ्चित्कस्यापि नयस्याभिप्रायेणेत्यर्थः **शाश्वती, स्यात्**- कथञ्चि**दशाश्वती**।। ५७ ।। एतदेव सविशेषं जिज्ञासुः पृच्छति-

(५८) से केणट्ठेणं भंते! एवं वुच्चइ-सिय सासया सिय असासया?, गोयमा! दव्वट्ठयाए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं[1] असासता, से तेणट्ठेणं गोयमा! एवं वुच्चति-तं चेव जाव सिय असासता, एवं जाव अधेसत्तमा।। ५८ ।।

'से केणट्ठेण'मित्यादि, **से**शब्दोऽथशब्दार्थः स च प्रश्ने, **'केन अर्थेन'** कारणेन **भदन्त! एवमुच्यते** यथा **स्यात् शाश्वती स्यादशाश्वतीति?**, भगवानाह-**गौतम! 'दव्वट्ठयाए'** इत्यादि, **द्रव्यार्थतया शाश्वती**ति, तत्र द्रव्यं सर्वत्रापि सामान्यमुच्यते, द्रवति-गच्छति तान् तान् पर्यायान् विशेषानिति वा द्रव्यमितिव्युत्पत्तेर्द्रव्यमेवार्थः-तात्त्विकः पदार्थो यस्य न तु पर्यायाः स द्रव्यार्थः- द्रव्यमात्रास्तित्वप्रतिपादको नयविशेषस्तद्भावो द्रव्यार्थता तया द्रव्यमात्रास्तित्वप्रतिपादकनयाभिप्रायेणेतियावत् शाश्वती, द्रव्यार्थिकनयमतपर्यालोचनायामेवंविधस्य रत्नप्रभायाः पृथिव्या आकारस्य सदा भावात्, **'वर्णपर्यायैः'** कृष्णादिभिः **'गन्धपर्यायैः'** सुरभ्यादिभिः **'रसपर्यायैः'** तिक्तादिभिः **'स्पर्शपर्यायैः'** कठिनत्वादिभिः **'अशाश्वती'** अनित्या, तेषां वर्णादीनां प्रतिक्षणं कियत्कालानन्तरं वाऽन्यथाभवनात्, अतादवस्थ्यस्य चानित्यत्वात्, न चैवमपि भिन्नाधिकरणे नित्यत्वानित्यत्वे, द्रव्य-पर्याययोर्भेदाभेदोपगमात्, अन्यथोभयोरप्यसत्त्वापत्तेः, तथाहि-शक्यते वक्तुं परपरिकल्पितं द्रव्यमसत्, पर्यायव्यतिरिक्तत्वात्, बालत्वादिपर्यायशून्यवन्ध्यासुतवत्, तथा परपरिकल्पिताः पर्याया असन्तः, द्रव्यव्यतिरिक्तत्वात्, वन्ध्यासुतगतबालत्वादिपर्यायवत्, उक्तञ्च-

"द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः।
क्व कदा केन किंरूपा?, दृष्टा मानेन केन वा?।।१।।" [**द्र.जल्पकल्पलता-२० जैनस्याद्वादमुक्तावली-२४**]

इति कृतं प्रसङ्गेन, विस्तरार्थिना च **धर्मसङ्ग्रहणिटीका** निरूपणीया। **'से तेणट्ठेण'** मित्याद्युपसंहारमाह, सेशब्दोऽथशब्दार्थः स चात्र वाक्योपन्यासे अथ **'एतेन'** अनन्तरोदितेन कारणेन **गौतम! एवमुच्यते**-स्यात् शाश्वती स्यादशाश्वती, एवं प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी पृथिवी**।।५८।। इह यद् यावत्सम्भवास्पदं तच्चेत्तावन्तं कालं शश्वद् भवति तदा तदपि शाश्वतमुच्यते यथा तन्त्रान्तरेषु

---

१. फासपज्जवेहिं संठाणपज्जेवहिं असासता-इति।। **नयचक्र (पृ.४५०) नयचक्रवृत्तौ(पृ.३) उद्धृतजीवाभिगमपाठे।**

"**आकप्पट्ठाई पुढवी सासया**" [ ] इत्यादि, ततः संशयः–किमेषा रत्नप्रभा पृथिवी सकलकालावस्थायितया शाश्वती उतान्यथा यथा तन्त्रान्तरीयैरुच्यत इति?, ततस्तदपनोदार्थं पृच्छति–

(५९) इमा[१] णं भंते! रयणप्पभा पु० कालतो केवच्चिरं होइ?, गोयमा! न कयाइ ण आसि, ण कयाइ णत्थि, ण कयाइ ण भविस्सति। भुविं च भवइ य भविस्सति य धुवा णियया सासया अक्खया अव्वया अवट्ठिता णिच्चा, एवं जाव अधेसत्तमा।। ५९।।

'इमा णं भंते' इत्यादि, **इयं भदन्त! रत्नप्रभा पृथिवी कालतः 'कियच्चिरं'** कियन्तं कालं यावद् **भवति**?, भगवानाह–**गौतम! न कदाचिन्नासीत्,** सदैवासीदिति भावः, अनादित्वात्, तथा **न कदाचिन्न भवति,** सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, अत्रापि स एव हेतुः, सदा भावादिति, तथा **न कदाचिन्न भविष्यति,** भविष्यच्चिन्तायां सर्वदैव भविष्यतीति भावः, अपर्यवसितत्वात्। तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति–**'भुविं चे'**त्यादि, **अभूत् भवति भविष्यति च,** एवं त्रिकालभावित्वेन **'ध्रुवा'** ध्रुवत्वादेव **'नियता'** नियतावस्थाना, धर्म्मास्तिकायादिवत्, नियतत्वादेव च **शाश्वती,** शश्वद्भावः प्रलयाभावात्, शाश्वतत्वादेव च सततगङ्गासिन्धुप्रवाहप्रवृत्तावपि पद्मपौण्डरीकह्रद इवान्यतरपुद्गलविचटनेप्यन्यतरपुद्गलोपचयभावाद्, **अक्षया** अक्षयत्वादेव च **अव्यया,** मानुषोत्तराद् बहिः समुद्रवत्, अव्ययत्वादेव **'अवस्थिता'** स्वप्रमाणावस्थिता, सूर्यमण्डलादिवत्, एवं सदाऽवस्थानेन चिन्त्यमाना **नित्या** जीवस्वरूपवत्, यदि वा ध्रुवादयः शब्दा इन्द्रशक्रादिवत्पर्यायशब्दा नानादेशजविनेयानुग्रहार्थमुपन्यस्ता इत्यदोषः, **एव**मेकैका पृथिवी क्रमेण तावद्वक्तव्या **यावदधःसप्तमी** ।।५९।।

सम्प्रति प्रतिपृथिवीषु (वि)विभागतोऽन्तरं विचिन्तयिषुरिदमाह[२]–

---

१. तुला-राजप्र. सू.२००।। २. इतोऽग्रे कोष्ठक मध्ये । 'इमीसे णं भंते! रयणप्पभाए पुढवीए उवरिल्लातो चरिमंतातो हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! असिउत्तरं जोयणसतसहस्सं अबाधाए अंतरे पण्णत्ते। इमीसे णं भंते! रयण० पु० उवरिल्लातो चरिमंताओ खरस्स कंडस्स हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! सोलस जोयणसयसहस्साइं अबाधाए अंतरे पण्णत्ते' **इति पाठः मु. SP क ख ग ट आदर्शेषु अस्ति । ता प्रतौ नैतद् विद्यते, मलयगिरिवृत्तावपि नास्ति व्याख्यातम्। वृत्तिकृता पाठभेदसूचनापि नास्ति कृता। एतत् सूत्रद्वयं नावश्यकं प्रतीयते, अस्य विषयः ६२,६३ सूत्रयोः प्रतिपादितोऽस्ति । तत् सूत्रद्वयस्वीकारे पौनरुक्त्यमेव भवेत । इति L प्र. २६३ टि.३।।**

(६०) इमीसे णं भंते! रयणप्पभाए पुढवीए रयणस्स[1] कंडस्स उवरिल्लातो चरिमंताओ हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! एक्कं जोयणसहस्सं अबाधाए अंतरे पण्णत्ते।। ६०।।

'इमीसे णं भंते!' इत्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्य** प्रथमस्य खरकाण्डस्य विभागस्य **'उवरिल्लात्'** इति उपरितनाच्चरमान्तात्परतो योऽधस्तनः **'चरमान्तः'** चरमपर्यन्तः **'एस ण'**मिति एतत्, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, **अन्तरं 'कियत्'** कियद्योजनप्रमाणम् **'अबाधया'** अन्तरत्वव्याघातरूपया **प्रज्ञप्तम्**?, भगवानाह- **गौतम! 'एकं योजनसहस्रम्'** एकं योजनसहस्र-प्रमाण**मन्तरं प्रज्ञप्तम्**।।६०।।

(६१) इमीसे णं भंते! रयण० पु० उवरिल्लातो चरिमंतातो वइरस्स कण्डस्स उवरिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! एक्कं जोयणसहस्सं अबाधाए अंतरे प०।।६१ ।।

'इमीसे ण'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या** रत्नकाण्डस्यो**परितनाच्चर-मान्ता**त्परतो यो **वज्रकाण्डस्योपरितनश्चरमान्त एतदन्तरं 'कियत्'** किंप्रमाण**मबाधया प्रज्ञप्तम्?,** भगवानाह-**गौतम! एकं योजनसहस्रमबाधयाऽन्तरं प्रज्ञप्तं,** रत्नकाण्डाधस्तनचरमान्तस्य वज्रकाण्डोपरितनचरमान्तस्य च परस्परसंलग्नतया उभयत्रापि तुल्यप्रमाणत्वभावात्।।६१।।

(६२) इमीसे णं भंते ! रयण० पु० रयणस्स कंडस्स उवरिल्लाओ चरिमंताओ वइरस्स कंडस्स हेट्ठिल्ले चरिमंते एस णं भंते! केवतियं अबाधाए अंतरे प०?, गोयमा! दो जोयणसहस्साइं अबाधाए अंतरे पण्णत्ते,-एवं कंडे कंडे दो दो आलावगा जाव रिट्ठस्स कंडस्स हेट्ठिले चरिमंते सोलस जोयणसहस्साइं अबाधाए अंतरे पण्णत्ते ←।। ६२।।

---

१. रयणमयस्स - **जे.** । **रयणस्स मु. कखगट नास्ति** ।। २. **जे.** । →← **चिह्नद्वयमध्यवर्तिपाठस्थाने कखगटमु. मध्ये** 'एवं जाव रिट्ठस्स उवरिल्ले पन्नरस जोयणसहस्साइं, हेट्ठिल्ले चरिमंते सोलस जोयणसहस्साइं' **इति पाठः** ।।

'इमीसे ण'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्ताद् वज्रकाण्डस्य** योऽ**धस्तनश्चरमान्तः एतदन्तरं कियद् अबाधया प्रज्ञप्तम्?,** भगवानाह–**गौतम! द्वे योजनसहस्रे अबाधयाऽन्तरं प्रज्ञप्तम्, एवं काण्डे काण्डे द्वौ द्वावालापकौ वक्तव्यौ,** काण्डस्य चाधस्तने चरमान्ते चिन्त्यमाने योजनसहस्रपरिवृद्धिः कर्त्तव्या **यावद् रिष्ठस्य काण्डस्याधस्तने चरमान्ते** चिन्त्यमाने **षोडश योजनसहस्राणि अबाधयाऽन्तरं प्रज्ञप्तमिति** वक्तव्यम्।। ६२।।

(६३) इमीसे णं भंते! रयणप्प० पु० रयणस्स कंडस्स उवरिल्लाओ चरिमंताओ पंकबहुलस्स कंडस्स उवरिल्ले चरिमंते एस णं अबाधाए केवतियं अंतरे पण्णत्ते?, गोयमा! सोलस जोयणसहस्साइं अबाधाए अंतरे पण्णत्ते। [१]हेट्ठिल्ले चरिमंते एक्कं जोयणसयसहस्सं आवबहुलस्स उवरिल्ले एक्कं जोयणसयसहस्सं हेट्ठिल्ले चरिमंते असीउत्तरं जोयणसयसहस्सं। घणोदहिस्स उवरिल्ले असिउत्तरजोयणसयसहस्सं हेट्ठिल्ले चरिमंते दो जोयणसयसहस्साइं।।६३।।

'इमीसे ण'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्ता**त्परतो यः **पङ्कबहुलस्य काण्डस्योपरितनश्चरमान्तः एतत् 'कियत्'** किंप्रमाणमबाधयाऽ**न्तरं प्रज्ञप्तम्?,** भगवानाह–**गौतम! षोडश योजनसहस्राणि अबाधयाऽन्तरं प्रज्ञप्तम्!** 'इमीसे ण'मित्यादि, तस्यैव पङ्कबहुलस्य काण्डस्या**धस्तनश्चरमान्त एकं योजनशतसहस्रम**बाधयाऽन्तरं प्रज्ञप्तम्। 'इमीसे ण'मित्यादि, अस्य भदन्त! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्तात्परतोऽ**ब्बहुलस्य**

---

१. अतः सूत्रस्य पूर्तिपर्यन्तं मलयगिरिवृत्तौ त्रयाणां सूत्राणां पूर्णपाठस्य सङ्केतो व्याख्या च विद्यते, तदनुसारेण पाठसंरचना इत्थं भवति -

'इमीसे णं भंते ! रयणप्पभाए पुढवीए रयणकंडस्स उवरिल्लातो चरिमंताओ पंकबहलस्स कंडस्स हट्ठिल्ले चरिमंते एस णं अबाधाए केवतियं अंतरं पण्णत्ते?, गोयमा ! एक्कं जोयणसयसहस्सं । इमीसे णं भंते रयणप्पभाए पुढवीए रयणकंडस्स उवरिल्लातो चरिमंताओ आवबहुलस्स कंडस्स उवरिल्ले चरिमंते एस णं अबाधाए केवतियं अंतरे पण्णत्ते ? गोयमा ! एकं जोयणसयसहस्सं । इमीसे णं भंते रयणप्पभाए पुढवीए रयणकंडस्स उवरिल्लातो चरिमंताओ आवबहुलस्स हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णते?, गोयमा असीउत्तरं जोयणसयसहस्सं अबाधाए अंतरे पण्णते ।" इति L पृ. २६३-६४ टि.१२।।

काण्डस्य य **उपरितन**श्चरमान्त एतदन्तरं कियद् अबाधया प्रज्ञप्तम्?, भगवानाह–गौतम! एकं **योजनशतसहस्रम**बाधयाऽन्तरं प्रज्ञप्तम्। 'इमीसे ण'मित्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्तात्परतोऽब्बहुलस्य काण्डस्य योऽ**धस्तनश्चरमान्त** एतदन्तरं कियद् अबाधया प्रज्ञप्तम्?, भगवानाह–गौतम! **अशीत्युत्तरं योजनशतसहस्रम्। घनोदधेरुपरितने चरमान्ते** पृष्टे एतदेव निर्वचन**मशीत्युत्तरयोजनशतसहस्रम्, अधस्तने** पृष्टे इदं निर्वचनं–**द्वे योजनशतसहस्रे** अबाधयाऽन्तरं प्रज्ञप्तम्।। ६३ ।।

(६४) इमीसे णं भंते! रयण० पुढ० घणवातस्स -[1]ठ्ठवरिमे एवं चेव-हेट्ठिल्ले चरिमंते असंखेज्जाइं [2]जोयणसयसहस्साइं।। ६४।। (६५) इमीसे णं भंते! रयण० पु० तणुवातस्स उवरिल्ले चरिमंते असंखेज्जाइं जोयणसयसहस्साइं अबाधाए अंतरे, हेट्ठिल्लेवि असंखेज्जाइं जोयणसयसहस्साइं, एवं ओवासंतरेवि।।६५।। (६६) [3]दोच्चाए णं भंते! पुढवीए उवरिल्लातो चरिमंताओ हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! बत्तीसुत्तरं जोयणसयसहस्सं अबाहाए अंतरे पण्णत्ते।। ६६।।

घनवातस्योपरितने चरमान्ते पृष्टे इदमेव निर्वचनं, घनोदध्यधस्तनचरमान्तस्य घनवातोपरितन-चरमान्तस्य च परस्परं संलग्नत्वात्। घनवातस्या**धस्तने चरमान्ते** पृष्टे एतन्निर्वचनम्–**असङ्ख्येयानि योजनशतसहस्राण्य**बाधयाऽन्तरं प्रज्ञप्तम्। (६५) एवं **तनुवातस्योपरितने चरमान्ते अधस्तने चरमान्ते अवकाशान्तरस्या**प्युपरितनेऽधस्तने च चरमान्ते इत्थमेव निर्वचनं वक्तव्यम्, **असङ्ख्येयानि योजनशतसहस्राण्य**बाधयाऽन्तरं प्रज्ञप्तमिति, सूत्रपाठस्तु प्रत्येकं सर्वत्रापि पूर्वानुसारेण स्वयं परिभावनीयः सुगमत्वात्।।(६६) **'दोच्चाए णं'** इत्यादि, **द्वितीयस्या भदन्त! पृथिव्या उपरितनाच्चरमान्ता**त्परतो **थोऽधस्तनश्चरमान्त एतत् 'कियत्'** किंप्रमाण**मबाधयाऽन्तरं प्रज्ञप्तम्**?, भगवानाह–**गौतम! 'द्वात्रिंशदुत्तरं'** द्वात्रिंशत्सहस्राधिकं **योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तम्**।। ६४-६६।।

---

१. **जे** ।–*–**चिह्नद्वयमध्यवर्तिपाठ स्थाने - मु.** ⊥ **मध्ये** उवरिल्ले चरिमंते दो जोयणसयसहस्साइं **इति पाठः**।।
२. **३/१९ सूत्रे** घणवाए... असंखेज्जाइं जोयणसहस्साइं - **इति पाठः** ।। **३. जे.**। सक्करपभाए **SP कखगट**।।

(६७) →[१]दोच्चाए धणोदधिस्सुवलिल्ले [चरिमंते] एवं चेव, हेट्ठिल्ले चरिमंते बावण्णुत्तरं जोयणसतसहस्सं । घणतुणुवातोवासंतराणं जहा रयणाए←।६७ ।

घनोदधेरुपरितने चरमान्ते पृष्टे **एतदेव** निर्वचनं द्वात्रिंशदुत्तरं योजनशतसहस्रम्, **अधस्तने चरमान्ते** पृष्टे इदं निर्वचनं–**द्विपञ्चाशदुत्तरं योजनशतसहस्रम्**। एतदेव घनवातस्योपरितनचरमान्त-पृच्छायामपि, **घनवातस्या**धस्तनचरमान्तपृच्छायां **तनुवातावकाशान्तर**योरुपरितनाधस्तनचरमान्तपृच्छासु च **यथा रत्नप्रभायां** तथा वक्तव्यम्, असङ्ख्येयानि योजनशतसहस्राण्यबाधयाऽन्तरं प्रज्ञप्तमिति वक्तव्यमिति भावः।। ६७ ।।

(६८) →[२]तच्चाए अट्ठावीसुत्तरं जोयणसतसहस्सं, धणोदधिस्स उवरिल्ले चरिमंते एवं चेव। हेट्ठिल्ले अडयालीसुत्तरं जोयणसतसहस्सं । सेसं जधा रयणाए ।।६८।। (६९) चउत्थीए हेट्ठिल्लातो उवरिल्ले वीसुत्तरं जोयणसतसहस्सं अबाधाए अंतरे पण्णत्ते। धणोदधिस्स उवरिल्ले एवं चेव, हेट्ठिल्ले चत्तालीसुत्तरं जोयणसतसहस्सं। सेसं जहा रयणाए ।।६९।।(७०) पंचमाए उवरिल्लातो हेट्ठिल्ले अट्ठारसुत्तरं जोयणसतसहस्सं, धणोदधिस्सुवरिमं एवं चेव, हेट्ठिमं अट्ठतीसुत्तरं जोयणसतसहस्सं, सेसं जधा रयणाए ।।७०।। (७१) छट्ठीए उवरिमातो हेट्ठिमं सोलसुत्तरं जोयणसत-सहस्सं, धणोदधिस्स उवरिमं एवं चेव । हेट्ठिले छत्तीसुत्तरं जोयणसतसहस्सं, सेसं जहा रयणाए ।।७१।। (७२) सत्तमाए हेट्ठिल्लातो उवरिल्ले अट्ठुत्तरं जोयणसतसहस्सं, धणोददिस्स उवरिमं एवं चेव। हेट्ठिमं अट्ठावीसुत्तरं जोयणसत-सहस्सं । सेसं जहा रयणाए ←।। ७२ ।।

---

१ जे. L । **सूत्र ६७ स्थाने कखगटमु.** SP **मध्ये** सक्करप्प० पु० उवरि घणोदधिस्स हेट्ठिल्ले चरिमंते बावण्णुत्तरं जोयणसयसहस्सं अबाधाए। घणवातस्स असंखेज्जाइं जोयणसयसहस्साइं पण्णत्ताइं। एवं जाव उवासंतरस्सवि जावऽधेसत्तमाए, णवरं जीसे जं बाहल्लं तेण घणोदधी संबंधेतव्वो बुद्धीए। सक्करप्पभाए अणुसारेणं घणोदहिसहिताणं इमं पमाणं **इति पाठः ।। २. जे.** L । **सूत्र ६८-७२ स्थाने कखगटमु.** SP **मध्ये** तच्चाए णं भंते! अडयालीसुत्तरं जोयणसतसहस्सं। पंकप्पभाए पुढवीए चत्तालीसुत्तरं जोयणसयसहस्सं। धूमप्पभाए पु० अट्ठतीसुत्तरं जोयणसतसहस्सं। तमाए पु० छत्तीसुत्तरं जोयणसतसहस्सं। अधेसत्तमाए पु० अट्ठावीसुत्तरं जोयणसतसहस्सं जाव अधेसत्तमाए। [एस] णं भंते! पुढवीए उवरिल्लातो चरिमंतातो उवासंतरस्स हेट्ठिल्ले चरिमंते केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! असंखेज्जाइं जोयणसयसहस्साइं अबाधाए अंतरे पण्णत्ते।। **६८-७२।इति पाठः** ।।

'तच्चाए णं भंते!' इत्यादि, **तृतीयस्या भदन्त!** पृथिव्या उपरितनाच्चरमान्ताद् अधस्तनश्चरमान्त एतदन्तरं कियद् अबाधया प्रज्ञप्तम्?, भगवानाह–गौतम! **अष्टाविंशत्युत्तरं शत[सहस्र]म्**-अष्टाविंशति-सहस्राधिकं योजनशतसहस्रम**बाधयाऽन्तरं प्रज्ञप्तम्**। **एतदेव घनोदधेरुपरितनचरमान्त**पृच्छायामपि निर्वचनम्। **अधस्तन**चरमान्तपृच्छाया**मष्टाचत्वारिंशदुत्तरं योजनशतसहस्र**मबाधयाऽन्तरं प्रज्ञप्तमिति वक्तव्यम्। एतदेव घनवातस्योपरितनचरमान्तपृच्छायामपि। अधस्तनचरमान्तपृच्छायां तनुवातावकाशान्तरयोरुपरितनाऽधस्तनचरमान्तपृच्छासु च यथा रत्नप्रभायां तथा वक्तव्यम् एवं चतुर्थ-पञ्चम-षष्ठ-सप्तमपृथिवीविषयाणि सूत्राण्यपि भावनीयानि।। ६८-७२।।

(७३) इमा णं भंते! रयणप्पभा पुढवी दोच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला ? विसेसाहिया संखेज्जगुणा? वित्थारेणं[1] किं तुल्ला ? विसेसहीणा? संखेज्जगुणहीणा?, गोयमा! इमा णं रयण० पु० दोच्चं पुढवीं पणिहाय बाहल्लेणं नो तुल्ला, विसेसाहिया, नो संखेज्जगुणा, वित्थारेणं नो तुल्ला विसेसहीणा णो संखेज्जगुणहीणा ।।७३।। (७४) दोच्चा णं भंते! पुढवी तच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला? एवं चेव भाणितव्वं। एवं तच्चा चउत्थी पंचमी छट्ठी।। ७४।। (७५) छट्ठी णं भंते! पुढवी सत्तमं पुढविं पणिहाय बाहल्लेणं किं तुल्ला? विसेसाहिया ? संखेज्जगुणा?, एवं चेव भाणियव्वं। सेवं भंते! २।।७५।।

नेरइयउद्देसओ पढमो।।

'इमा णं भंते!' इत्यादि, **इयं भदन्त! रत्नप्रभापृथिवी द्वितीयां पृथिवीं** शर्कराप्रभां **'प्रणिधाय'** आश्रित्य **'बाहल्येन'** पिण्डभावेन **किं तुल्या ? विशेषाधिका ? सङ्ख्येयगुणा?**, बाहल्यमधिकृत्येदं प्रश्नत्रयम्, ननु एका अशीत्युत्तरयोजनलक्षमाना अपरा द्वात्रिंशदुत्तरयोजनलक्षमानेत्युक्तं ततस्तदर्थावगमे सत्युक्तलक्षणं प्रश्नत्रयमयुक्तं, विशेषाधिकेति स्वयमेवार्थपरिज्ञानात्, सत्यमेतत्, केवलं ज्ञप्रेश्नोऽयं[2]

१. PS । वित्थ०ता.।। २. प्रश्नोऽयं - **हारि. वृत्तिः** ।।

तदन्यमोहापोहार्थः, एतदपि कथमवसीयते? इति चेत्स्वावबोधाय प्रश्नान्तरोपन्यासात्, तथा चाह- **विस्तरेण**-विष्कम्भेण **किं तुल्या ? विशेषहीना ? सङ्ख्येयगुणहीना**? इति, भगवानाह-**गौतम! इयं रत्नप्रभा पृथिवी द्वितीयां** शर्कराप्रभा**पृथिवीं प्रणिधाय बाहल्येन न** [च] **तुल्या** किन्तु **विशेषाधिका, नापि सङ्ख्येयगुणा,** कथमेतदेवम्? इति चेदुच्यते-इह रत्नप्रभा पृथिवी अशीत्युत्तरयोजनलक्षमाना, शर्कराप्रभा द्वात्रिंशदुत्तरयोजनलक्षमाना, तदत्रान्तरमष्टाचत्वारिंशद् योजनसहस्राणि ततो विशेषाधिका घटते न तुल्या नापि सङ्ख्येयगुणा, विस्तरेण न तुल्या किन्तु विशेषहीना नापि सङ्ख्येयगुणहीना, प्रदेशादिवृद्ध्या प्रवर्द्धमाने तावति क्षेत्रे शर्कराप्रभाया एवं [च] वृद्धिसम्भवात्, एवं सर्वत्र भावनीयम्।।७३-७५।।

उद्देश - २

[तृतीयप्रतिपत्तौ समाप्तः प्रथमोद्देशकः, साम्प्रतं द्वितीयः प्रारभ्यते, तस्य चेदमादिसूत्रम्-] सम्प्रति कस्यां पृथिव्यां कस्मिन् प्रदेशे नरकावासाः? इत्येतत्प्रतिपादनार्थं प्रथमं तावदिदमाह-

(७६) कइ णं भंते! पुढवीओ पण्णत्ताओ?, गोयमा! सत्त पुढवीओ पण्णत्ताओ, तंजहा-रयणप्पभा जाव अहेसत्तमा।।७६।।

'कइ णं भंते!' इत्यादि, **कति भदन्त! पृथिव्यः प्रज्ञप्ताः?** इति, विशेषाभिधानार्थमेतदभिहितम्, उक्तञ्च-

"पुव्वभणियंपि जं पुण भन्नई तत्थ कारणं अत्थि।
पडिसेहो य अणुण्णा कारण(हेउ)विसेसोवलंभो वा।।१।।" [ ]

भगवानाह-**गौतम! सप्त पृथिव्यः प्रज्ञप्ताः, तद्यथा-रत्नप्रभा यावत्तमस्तमप्रभा।। ७६।।**

(७७) इमीसे णं रयणप्प० पु० असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवतियं ओगाहित्ता हेट्ठा केवतियं वज्जित्ता मज्झे केवतिए केवतिया निरयावाससय-सहस्सा पण्णत्ता?, गोयमा! इमीसे णं रयण० पु० असीउत्तरजोयणसयसहस्सबा-हल्लाए उवरि एगं जोयणसहस्सं ओगाहित्ता हेट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अंडहत्तरे[1] जोयणसयसहस्से, एत्थ णं रयणप्पभाए पु० नेरइयाणं तीसं निरया-वाससयसहस्साइं[2] भवंतित्ति मक्खाया। ते णं णरगा अंतो वट्टा बाहिं चउरंसा -अंधे[3] खुरप्पसंठाणसंठिता णिच्चंधकारतमसा ववगतगहचंद-सूर-णक्खत्तजोतिसपथा

१. SPL । अडसत्तरी-मु.ग. ।। अट्ठुत्तरे - ता.। २.०इं SP ता. नास्ति ।। ३.⟷ चिह्नद्वयमध्यवर्तिपाठः जे. मध्ये वर्तते, मु. L नास्ति ।।

मेयवसा।[पूय]रुधिरपडलमंस[चिक्खिल्ल]पुव्वाणुलेवणतला असुयी विस्सा परमदुब्भिगंधा कक्खडफासा दुरहियासा काताणि(काऊअ)अगणिवण्णाभा असुभा णरगा ←जाव[1] असुभा णरएसु →वेयणा[2], एवं एएणं अभिलावेणं उवजुंजिऊण भाणियव्वं ठाणप्पयाणुसारेणं, जत्थ जं बाहल्लं जत्थ जत्तिया वा नरयावाससय-सहस्सा जाव अहेसत्तमाए पुढवीए, अहेसत्तमाए मज्झिमं केवतिए कति अणुत्तरा महइमहालता महाणिरया पण्णत्ता एवं पुच्छितव्वं वागरेयव्वंपि तहेव छट्ठी-सत्तमासु काऊअगणिवण्णाभा ण भाणितव्वा ←।। ७७।।

'इमीसे ण'मित्यादि, **अस्या भदन्त! रत्नप्रभायाः पृथिव्या उपरि 'कियत्'** किंप्रमाण**मवगाह्य**-उपरितनभागात् कियद् अतिक्रम्येत्यर्थः **अधस्तात् 'कियत्'** किंप्रमाणं **वर्जयित्वा मध्ये 'कियति'** किंप्रमाणे **कियन्ति नरकावासशतसहस्राणि प्रज्ञप्तानि**?, भगवानाह–**गौतम! अस्या रत्नप्रभायाः पृथिव्या अशीत्युत्तरयोजनशतसहस्रबाहल्याया उपर्येकं योजनसहस्रमवगाह्याधस्तादेकं योजनसहस्रं वर्जयित्वा 'मध्ये'** मध्यभागे **'अष्टसप्तत्युत्तरे'** अष्टसप्ततिसहस्राधिके **योजनशतसहस्रे 'अत्र'** एतस्मिन् **रत्नप्रभापृथिवीनैरयिकाणां** योग्यानि **त्रिंशन्नरकावासशतसहस्राणि** प्रज्ञप्तानि **भवन्तीत्याख्यातं** मया शेषैश्च तीर्थकृद्भिः, अनेन सर्वतीर्थकृतामविसंवादिवचनता प्रवेदिता। **'ते णं नरगा'** इत्यादि, ते नरका **'अन्तः'** मध्यभागे **'वृत्ताः'** वृत्ताकाराः **'बहिः'** बहिर्भागे **'चतुरस्राः'** चतुरस्राकाराः, इदं च पीठोपरिवर्त्तिनं मध्यभागमधिकृत्य प्रोच्यते, सकलपीठाद्यपेक्षया तु आवलिकाप्रविष्टा वृत्त-त्र्यस्र-चतुरस्रसंस्थानाः, पुष्पावकीर्णास्तु नानासंस्थानाः प्रतिपत्तव्याः, एतच्चाग्रे स्वयमेव वक्ष्यति, **'अहे खुरप्प-संठाणसंठिया'** इति, 'अधः' भूमितले क्षुरप्रस्येव–प्रहरणविशेषस्य (इव) यत् संस्थानम्–आकार-विशेषस्तीक्ष्णतालक्षणस्तेन संस्थिताः क्षुरप्रसंस्थानसंस्थिताः, तथाहि–तेषु नरकावासेषु भूमितले मसृणत्वा-भावतः शर्करिले पादेषु न्यस्यमानेषु शर्करामात्रसंस्पर्शेऽपि क्षुरप्रेणेव पादाः कृत्यन्ते, तथा **'निच्चंध-यारतमसा'** नित्यान्धकाराः उद्द्योताभावतो यत्तमस्तेन–तमसा नित्यं–सर्वकालमन्धकारो येषु ते

---

१. द्र. प्रज्ञापनासूत्रे २/२१-२७। २. →← **चिह्नमध्यमवर्ति पाठ स्थाने जे मध्ये-** तत्थ ण बहवे णेरइया परिवसंति, काला णिच्चं भीता णिच्चं तच्छा णिच्चं तधिता णिच्चं उव्विग्गा णिच्चं परममसुभमणुबद्धं णिरयभयपच्चणुभवमाणा विहरंति समासु वि णरगा। आसीतं बत्तीसं अट्ठावीसं तधे वीसं च। अट्ठारस सोलसगं अट्ठुत्तरमेवहेट्ठमिता।। १ ।। छट्ठीसत्तवीसु कागणिअगणिवण्णाभा ण भण्णंति **इति पाठः** ।।

नित्यान्धकाराः, तत्रापवरकादिष्वपि तमोऽन्धकारोऽस्ति केवलं स बहिः सूर्यप्रकाशे मन्दतमो भवति। नरकेषु तु तीर्थकर-जन्मदीक्षादिकालव्यतिरेकेणान्यदा सर्वकालमप्युद्द्योतलेशस्याप्यभावतो जात्यन्धस्येव मेघच्छन्नकालार्द्धरात्र इवातीव बहलतरो भवति, तत उक्तं तमसा नित्यान्धकाराः, तमश्च तत्र सदाऽवस्थितमुद्द्योतकारिणामभावात्, तथा चाह–**'ववगयगहचंदसूरनक्खत्तजोइसपहा'** व्यपगतः–परिभ्रष्टो ग्रह-चन्द्र-सूर्य-नक्षत्ररूपाणाम्, उपलक्षणमेतत्तारारूपाणां च ज्योतिष्काणां पन्था–मार्गो यत्र ते व्यपगतग्रह-चन्द्र-सूर्य-नक्षत्र-ज्योतिष्कपथाः, तथा **'मेयवसापूयरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला'** इति स्वभावतः सम्पन्नैर्मेदोवसापूतिरुधिरमांसैर्यश्चिक्खिल्लः–कर्दमस्तेन लिप्तम्–उपदिग्धम् अनुलेपनेन–सकृल्लिप्तस्य पुनः पुनरुपलेपनेन तलं–भूमिका येषां ते मेदोवशापूतिरुधिरमांसचिक्खिल्ललिप्तानुलेपनतला, अत **एवाशुचयः**–अपवित्रा **बीभत्सा** दर्शनेऽप्यतिजुगुप्सोत्पत्तेः, **परमदुरभिगन्धाः**–मृतगवादिकडेवरेभ्योऽप्यती-वानिष्टदुरभिगन्धाः, **'काऊअगणिवन्नाभा'** इति लोहे धम्यमाने यादृक् कपोतो–बहुकृष्णरूपोऽग्नेर्वर्णः, किमुक्तं भवति? – यादृशी बहुकृष्णवर्णरूपाऽग्निज्वाला विनिर्गच्छतीति, तादृशी आभा–वर्णस्वरूपं येषां ते कपोताग्निवर्णाभाः, तथा कर्कशः–अतिदुस्सहोऽसिपत्रस्येव स्पर्शो येषां ते **कर्कशस्पर्शाः,** अत एव **'दुरहियासा'** इति दुःखेनाध्यास्यन्ते–सह्यन्ते इति दुरध्यासा अशुभा दर्शनतो **नरकाः,** तथा गन्ध-रस-स्पर्श-शब्दै**रशुभा**–अतीवासातरूपा **नरकेषु वेदना**। एवं सर्वास्वपि पृथिवीष्वालापको वक्तव्यः, स चैवम्–

"सक्करप्पभाए णं भंते! पुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जेत्ता मज्झे चेव केवइए केवइया णिरयावाससयसहस्सा पण्णत्ता?, गोयमा! सक्करप्पभाए णं पुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहित्ता हेट्ठा एगं जोयणसहस्सं वज्जेत्ता मज्झे तीसुत्तरजोयणसयसहस्से, एत्थ णं सक्करप्पभापुढविनेरइयाणं पणवीसा नरयावाससयसहस्सा भवंतीति मक्खायं। ते णं णरगा अंतो वट्टा जाव असुभा नरएसु वेयणा[१६९]। वालुयप्पभाए णं भंते! पुढवीए अट्ठावीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइया निरयावाससयसहस्सा पण्णत्ता?, गोयमा! वालुयप्पभाए पुढवीए अट्ठावीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठं एगं जोयणसहस्सं वज्जित्ता मज्झे छव्वीसुत्तरे जोयणसयसहस्से, एत्थ णं वालुयप्पभापुढविनेर-इयाणं पण्णरस निरयावाससयसहस्सा भवन्तीति मक्खायं। ते णं नरगा जाव असुभा नरगेसु वेयणा [१७०]। पंकप्पभाए णं भंते! पुढवीए वीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइया निरयावाससयसहस्सा पण्णत्ता?, गोयमा! पंकप्पभाए णं पुढवीए वीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एवं जोयणसहस्सं ओगाहित्ता हिट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठारसुत्तरे जोयणसयसहस्से, एत्थ णं पंकप्पभापुढ-विणेरइयाणं दस निरयावाससयसहस्सा निरयावासा भवंतीति

मक्खायं । ते णं णरगा जाव असुभा नरगेसु वेयणा [१७१] । धूमप्पभाए णं भंते! पुढवीए अट्ठारसुत्तरजोयणसय-सहस्सबाहल्लाए उवरिं केवइयं ओगाहेत्ता, हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइया निरयावाससयसहस्सा पण्णत्ता?, गोयमा! धूमप्पभाए णं पुढवीए अट्ठारसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हेट्ठा एगं जोयणसहस्सं वज्जेत्ता मज्झे सोलसुत्तरे जोयणसयसहस्से, एत्थ णं धूमप्पभापुढविनेरइयाणं तिन्नि नेरइयावाससयसहस्सा भवंतीति मक्खायं। ते णं णरगा अंतो वट्टा जाव असुभा नरगेसु वेयणा इति [ग्रन्थाग्रम्-३०००][१७२]। तमप्पभाए णं भंते! पुढवीए सोलसुत्तरजोयणसयसहस्सबाहल्लाए उवरि केवतियं ओगाहेत्ता हेट्ठा केवतियं वज्जेत्ता मज्झे केवतिए केवतिया नरगावाससयसहस्सा पण्णत्ता?, गोयमा! तमप्पभाए णं पुढवीए सोलसुत्तरजोयण-सयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हेट्ठा एगं जोयणसहस्सं वज्जेत्ता मज्झे चोद्दसुत्तरे जोयणसयसहस्से, एत्थ णं तमापुढविनेरइयाणं एगे पंचूणे नरगावाससयसहस्से भवन्तीति मक्खायं। ते णं णरगा अंतो वट्टा जाव असुभा नरगेसु वेयणा [१७३]। अहेसत्तमाए णं भंते! पुढवीए अट्ठोत्तरजोयणसयसहस्स-बाहल्लाए उवरिं केवइयं ओगाहेत्ता हेट्ठा केवइयं वज्जेत्ता मज्झे केवइए केवइया अणुत्तरा महइमहालया महानरगावासा पण्णत्ता?, गोयमा! अहेसत्तमाए पुढवीए अट्ठुत्तरजोयणसयसहस्सबाहल्लाए उवरिं अद्धतेवण्णं जोयणसहस्साइं ओगाहेत्ता हेट्ठावि अद्धतेवण्णं जोयणसहस्साइं वज्जित्ता मज्झे तिसु जोयणसहस्सेसु, एत्थ णं अहेसत्तमपुढविनेरइयाणं पंच अणुत्तरा महइमहालया महानिरया पण्णत्ता, तंजहा-काले महाकाले रोरुए महारोरुए मज्झे अप्पइट्ठाणे, ते णं महानरगा अंतो वट्टा जाव असुभा महानरगेसु वेयणा" **[प्रज्ञा. १७४]**। इति। इदं च सकलमपि सूत्रं सुगमं, तत्र बाहल्यपरिमाणनरकावासयोग्य-मध्यभागपरिमाणनरकावाससङ्ख्यानामिमाः सङ्ग्रहणिगाथाः-

"आसीयं बत्तीसं अट्ठावीसं तहेव वीसं च।
अट्ठारस सोलसगं अट्ठुत्तरमेव हेट्ठिमया।।१।।
अट्ठुत्तरं च तीसं छव्वीसं चेव सयसहस्सं तु।
अट्ठारस सोलसगं चोद्दसमहियं तु छट्ठीए।।२।।
अद्धतिवण्णसहस्सा उवरिमऽहे वज्जिऊण तो भणिया।
मज्झे तिसु सहस्सेसु होंति निरया तमतमाए।।३।।
तीसा य पण्णवीसा, पण्णरस दस चेव सयसहस्साइं।
तिन्नि य पंचूणेगं पंचेव अणुत्तरा निरया।।४।।" [प्रज्ञापना १७४/१३३-६, दे. न. प्र. ५६]

पाठसिद्धाः।।७७।।

सम्प्रति नरकावाससंस्थानप्रतिपादनार्थमाह–

(७८) इमीसे णं भंते! रयणप्पभाए पुढवीए णरका किंसंठिया पण्णत्ता?, गोयमा! दुविहा पण्णत्ता, तंजहा-आवलियपविट्ठा य आवलियबाहिरा य, तत्थ णं जे ते आवलियपविट्ठा ते तिविहा पण्णत्ता, तंजहा-वट्टा तंसा चउरंसा, तत्थ

१. तिण्णेगं पंचूणं पंचेव - **देवेन्द्रनरकेन्द्रप्र.** ।।

णं जे ते आवलियबाहिरा ते णाणासंठाणसंठिया पण्णत्ता, तंजहा-अयकोट्ठसंठिता पिट्ठपयणगसंठिता[1] कंडूसंठिता लोहीसंठिता कडाहसंठिता थालीसंठिता पिहडगसंठिता किमियडसंठिता किन्नपुडगसंठिआ उडवसंठिया मुरवसंठिता मुयंगसंठिया नंदिमुयंगसंठिया आलिंगकसंठिता सुघोससंठिया दद्दरयसंठिता पणवसंठिया पडहसंठिया भेरिसंठिआ झल्लरीसंठिया कुतुंबकसंठिया नालिसंठिया, एवं जाव पंचमी[2] - छट्ठी।। ७८ ।।

'इमीसे णं भंते'! इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः** किमिव संस्थिताः **किंसंस्थिताः प्रज्ञप्ताः**?, भगवानाह-**गौतम**! नरका **द्विविधाः प्रज्ञप्ताः, तद्यथा-आवलिकाप्रविष्टाश्च आवलिकाबाह्याश्च,** चशब्दावुभयेषामप्यशुभतातुल्यतासूचकौ, आवलिकाप्रविष्टा नामाष्टासु दिक्षु समश्रेण्यवस्थिताः, आवलिकासु-श्रेणिषु प्रविष्टा-व्यवस्थिता **आवलिकाप्रविष्टाः, ते** संस्थानमधिकृत्य **त्रिविधाः प्रज्ञप्ताः, तद्यथा-वृत्तास्त्र्यस्त्राश्चतुरस्त्राः, तत्र ये ते आवलिकाबाह्यास्ते नानासंस्थानसंस्थिताः प्रज्ञप्ताः, तद्यथा**-अयःकोष्ठो-लोहमयः कोष्ठस्तद्वत्संस्थिता **अयःकोष्ठसंस्थिताः, 'पिट्ठपयणगसंठिया'** इति यत्र सुरासन्धानाय पिष्टं पच्यते तत्पिष्टपचनकं तद्वत्संस्थिताः **'पिट्ठपयणगसंठिया'** अत्र **सङ्ग्रहणि**गाथे-

"अयकोट्ठ-पिट्ठपयणग-कंडू-लोहीकडाहसंठाणा।
थाली पिहडग किण्ह(ग) उडए मुरवे मुयंगे य।।१।।
नंदिमुइंगे आलिंग सुघोसे दद्दरे य पणवे य।
पडहग-झल्लरि-भेरी-कुत्तुंबग-नाडिसंठाणा।।२।।"

कण्डुः-पाकस्थानं **लोही-कटाहौ** प्रतीतौ तद्वत्**संस्थानाः, स्थाली**-उखा, **पिहडं**-यत्र प्रभूतजनयोग्यं धान्यं पच्यते, **उटजः**-तापसाश्रमो **मुरजो**-मर्दलविशेषः **नन्दीमृदङ्गो**-द्वादशविधतूर्यान्तर्गतो मृदङ्गः, स च द्विधा, तद्यथा-मुकुन्दो मर्दलश्च, तत्रोपरि सङ्कुचितोऽधो विस्तीर्णो मुकुन्दः उपर्यधश्च समो मर्दलः **आलिङ्गो**-मृन्मयो मुरजः **सुघोषो**-देवलोकप्रसिद्धो घण्टाविशेष आतोद्यविशेषो वा **दर्दरो**--वाद्यविशेषः **पणवो**-भाण्डानां **पटहः,** पटहः-प्रतीतः, **भेरी**-ढक्का, **झल्लरी**-चर्मावनद्धा विस्तीर्णव-

---

१. **इतोऽग्रे जे. प्रतौ** अयकोट्ठ पिट्ठपयणग, कंदूलोही-कडाहसंठाणा । थाली-पिहडग-किण्हउडमय मुरवे मुतिंगे य ।।१।। वें (नं) दि - मुतिंगे आलिगु सुघोसे दद्दरे य पणवे य । पडहा भेरी झल्लरी धत्तु वा णालि संठाणा ।। २।। **इति पाठः ।। २. जे. । तमाए - मु.** L ।।

लयाकारा, **कुस्तुम्बकः**—सम्प्रदायगम्यः, **नाडी**—घटिका, एवं शेषास्वपि पृथिवीषु तावद्वक्तव्यं **यावत्षष्ठ्यां,** सूत्रपाठोऽप्येवम्-'सक्करप्पभाए णं भंते! पुढवीए नरका किंसंठिया पन्नत्ता?, गोयमा! दुविहा पन्नत्ता, तंजहा-आवलिकापविट्ठा य आवलियाबाहिरा य' इत्यादि।। ७८ ।। अधःसप्तमीविषयं सूत्रं साक्षादुपदर्शयति-

(७९) अहेसत्तमाए णं भंते! पुढवीए णरका किंसंठिता पण्णत्ता?, गोयमा! दुविहा पण्णत्ता, तंजहा-वट्टे य तंसा य।। ७९।।

'अहेसत्तमाए णं भंते!' इत्यादि, **अधःसप्तम्यां भदन्त! पृथिव्यां नरकाः 'किंसंस्थिताः'** किमिव संस्थिताः **प्रज्ञप्ताः**?, भगवानाह-**गौतम! द्विविधाः प्रज्ञप्ताः, तद्यथा-'वट्टे य तंसा य'** इति, अधःसप्तम्यां हि पृथिव्यां नरका आवलिकाप्रविष्टा एव न आवलिकाबाह्याः, आवलिकाप्रविष्टा अपि पञ्च, नाधिकाः, तत्र मध्येऽप्रतिष्ठानाभिधानो नरकेन्द्रो वृत्तः, सर्वेषामपि नरकेन्द्राणां वृत्तत्वात्, शेषास्तु चत्वारः पूर्वादिषु दिक्षु, ते च त्र्यस्राः, तत उक्तं वृत्तश्च त्र्यस्राश्च।। ७९।। सम्प्रति नरकावासानां बाहल्यप्रतिपादनार्थमाह-

(८०) इमीसे णं भंते! रयणप्पभाए पुढवीए नरका केवतियं बाहल्लेणं पण्णत्ता?, गोयमा! तिण्णि जोयणसहस्साइं बाहल्लेणं पण्णत्ता, तंजहा-हेट्ठा[1] घणा सहस्सं मज्झे झुसिरा सहस्सं उप्पिं संकुइया[2] सहस्सं, एवं जाव अहेसत्तमाए।।८०।।

'इमीसे ण'मित्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः कियद्बाहल्येन**-बहलस्य भावो बाहल्यं-पिण्डभाव उत्सेध इत्यर्थः तेन **प्रज्ञप्ताः**?, भगवानाह-**गौतम! त्रीणि योजनसहस्राणि बाहल्येन प्रज्ञप्ताः, तद्यथा-अधस्तने** पादपीठे **घना**-निचिताः **सहस्रं**-योजनसहस्रं, **मध्ये**-पीठस्योपरि मध्यभागे **सुषिराः सहस्रं**-योजनसहस्रं, तत **'उप्पिं'**ति उपरि **सङ्कुचिताः** शिखराकृत्या सङ्कोचमुपगता योजनसहस्रं, तत एवं सर्वसङ्ख्यया नरकावासानां त्रीणि योजनसहस्राणि बाहल्यतो भवन्ति, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तम्यां,** तथा चोक्तमन्यत्रापि-

"[1]हेट्ठा घणा सहस्सं उप्पिं [2]संकोचतो सहस्सं तु।
मज्झे सहस्स सुसिरा तिन्नि सहस्सूसिया नरया।।१।।" ।। ८० ।।

सम्प्रति नरकावासानामायाम-विष्कम्भप्रतिपादनार्थमाह-

१.हेट्ठिले चरिमंते धणं सहस्सं-SP **क ख**। हेट्ठिल्लि धणो सहस्सं-**ट**।। २.संकुय सहस्समेगं तु-**देवेन्द्रनरकेन्द्र प्र.** ।।

(८१) इमीसे णं भंते! रयणप्प० पु० नरगा केवतियं आयाम-विक्खंभेणं? केवइयं परिक्खेवेणं पण्णत्ता?, गोयमा! दुविहा पण्णत्ता, तंजहा-संखेज्जवित्थडा य असंखेज्जवित्थडा य। तत्थ णं जे ते संखेज्जवित्थडा ते णं संखेज्जाइं जोयण-सहस्साइं आयामविक्खंभेणं, संखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता, तत्थ णं जे ते असंखेज्जवित्थडा ते णं असंखेज्जाइं जोयणसहस्साइं आयाम-विक्खंभेणं, असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पण्णत्ता, एवं जाव तमाए ।।८१।।

'इमीसे णं भंते!' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः किंप्रमाणमाया-मविष्कम्भेन,** समाहारो द्वन्द्वस्तेनायाम-विष्कम्भाभ्यामित्यर्थः, **कियत् 'परिक्षेपेण'** परिरयेण **प्रज्ञप्ताः?**, भगवानाह–**गौतम! द्विविधाः प्रज्ञप्ताः, तद्यथा-सङ्ख्येयविस्तृताश्च असङ्ख्येयविस्तृताश्च,** सङ्ख्येययोजनप्रमाणं विस्तृतं–विस्तरो येषां ते सङ्ख्येयविस्तृताः, एवमसङ्ख्येयं विस्तृतं येषां ते असङ्ख्येयविस्तृताः, चशब्दौ स्वगतानेकसङ्ख्याभेदप्रकाशनपरौ, **तत्र ये ते सङ्ख्येयविस्तृतास्ते सङ्ख्येयानि योजनसहस्राणि आयाम-विष्कम्भेन सङ्ख्येयानि योजनसहस्राणि परिक्षेपेण, तत्र ये तेऽसङ्ख्येयविस्तृतास्तेऽसङ्ख्येयानि योजनसहस्राण्यायाम-विष्कम्भेन असङ्ख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्तानि, एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावत्षष्ठी** पृथिवी, सूत्रपाठस्त्वेवम्–

'सक्करप्पभाए णं भन्ते! पुढवीए नरगा केवइयं आयाम-विक्खंभेणं केवइयं परिरयेणं पण्णत्ता?, गोयमा! दुविहा पण्णत्ता, तंजहा–'संखेज्जवित्थडा य, असंखेज्जवित्थडा य' इत्यादि।। ८१ ।।

(८२) अहेसत्तमाए णं भंते! पुच्छा, गोयमा! दुविहा पण्णत्ता, तंजहा-संखेज्ज-वित्थडे य असंखेज्जवित्थडा य, तत्थ णं जे से संखेज्जवित्थडे से णं एक्कं जोयण-सयसहस्सं आयाम-विक्खंभेणं, तिन्नि जोयणसयसहस्साइं सोलस सहस्साइं दोन्नि य सत्तावीसे जोयणसए तिन्नि कोसे य अट्ठावीसं च धणुसतं तेरस य अंगुलाइं अद्धंगुलयं च किंचिविसेसाधिए परिक्खेवेणं पण्णत्ते, तत्थ णं जे ते असंखेज्जवित्थडा ते णं असंखेज्जाइं जोयणसयसहस्साइं[1] आयाम-विक्खंभेणं, असंखेज्जाइं जाव[2] परिक्खेवेणं पण्णत्ता ।। ८२।।

१. ०सय० L **नास्ति** ।। २. जाव - L **नास्ति**। जोयणाइं - **जे.** ।।

'अहेसत्तमाए णं भंते!' इत्यादि, **अधःसप्तम्यां भदन्त! पृथिव्यां** नरकाः कियदायाम-विष्कम्भेन कियत्परिक्षेपेण प्रज्ञप्ताः?, भगवानाह-**गौतम! द्विविधाः प्रज्ञप्ताः, तद्यथा-सङ्ख्येयविस्तृत** एकः, स चाप्रतिष्ठानाभिधानो नरकेन्द्रकोऽवसातव्यः, **असङ्ख्येयविस्तृताः** शेषाश्चत्वारः, **तत्र योऽसौ सङ्ख्येयविस्तृतो**ऽप्रतिष्ठानाभिधानो नरकेन्द्रकः **स एकं योजनशतसहस्रमायाम-विष्कम्भेन त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तम्,** इदं च परिक्षेपपरिमाणं गणितभावनया जम्बूद्वीपपरिक्षेपपरिमाणवद् भावनीयं, **तत्र ये ते** शेषाश्चत्वारोऽ**सङ्ख्येय-विस्तृतास्तेऽसङ्ख्येयानि योजनसहस्राण्यायाम-विष्कम्भेनासङ्ख्येयानि** योजनसहस्राणि **परिक्षेपेण प्रज्ञप्तानि**।। ८२ ।।

सम्प्रति नरकावासानां वर्णप्रतिपादनार्थमाह–

(८३) इमीसे णं भंते! रयणप्पभाए पुढवीए नरया केरिसया वण्णेणं पण्णत्ता?, गोयमा! काला [१]कालोभासा गंभीरलोमहरिसा भीमा उत्तासणया परमकिण्हा वण्णेणं पण्णत्ता, एवं जाव अधेसत्तमाए।। ८३।।

'इमीसे णं भंते!' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः कीदृशा वर्णेन प्रज्ञप्ताः?,** भगवानाह-**गौतम! कालाः,** तत्र कोऽपि निष्प्रतिभतया मन्दकालोऽप्याशङ्क्येत ततस्तदाश-ङ्काव्यवच्छेदार्थं विशेषणान्तरमाह-**'कालावभासाः'** कालः-कृष्णोऽवभासः-प्रतिभाविनिर्गमो येभ्यस्ते कालावभासाः, कृष्णप्रभापटलोपचिता इति भावः, अत एव **'गम्भीररोमहर्षाः'** गम्भीरः-अतीवोत्कटो रोमहर्षो-रोमोद्धर्षो भयवशाद् येभ्यस्ते गम्भीररोमहर्षाः, किमुक्तं भवति? एवं नाम ते कृष्णावभासा यद्दर्शनमात्रेणापि नारकजन्तूनां भयसम्पादनेन अनर्गलं रोमहर्षमुत्पादयन्तीति, अत एव **भीमा**-भयानका, भीमत्वादेव **उत्त्रासनकाः**, उत्त्रास्यन्ते नारका जन्तव एभिरिति उत्त्रासना, उत्त्रासना एव उत्त्रासनकाः, किं बहुना? **'वर्णेन'** वर्णमधिकृत्य **परमकृष्णाः प्रज्ञप्ताः,** यत ऊर्ध्वं न किमपि भयानकं कृष्णमस्तीति भावः, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तम्याम्**।। ८३ ।। गन्धमधिकृत्याह–

---

१. जे. -L) कालावभासा - मु. कगट))

(८४) इमीसे णं भंते! रयणप्पभाए पुढवीए णरका केरिसका गंधेणं पण्णत्ता?, गोयमा! से जहाणामए अहिमडेति वा गोमडेति वा सुणमडेति[१] वा मज्जारमडेति वा मणुस्समडेति वा महिसमडेति वा मूसगमडेति वा आसमडेति वा हत्थिमडेति वा सीहमडेति वा वग्घमडेति वा विगमडेति वा दीवियमडेति वा मयकुहिय-विणट्ठकुणिमवावण्णदुरभिगंधे असुइविलीणविगयबीभच्छदरिसणिज्जे किमिजा-लाउलसंसत्ते, भवेयारूवे सिया?, णो इणट्ठे समट्ठे, गोयमा! इमीसे णं रयणप्पभाए पुढवीए णरगा एत्तो अणिट्ठतरका चेव अकंततरका चेव जाव अमणामतरा चेव गंधेणं पण्णत्ता, एवं जाव अधेसत्तमाए पुढवीए।। ८४ ।।

'इमीसे णं भंते!' इत्यादि, प्रश्नसूत्रं सुगमं, भगवानाह-**गौतम! तद्यथा नाम-'अहिमृत इति वा'** अहिमृतो नाम मृताहिदेहः, एवं सर्वत्र भावनीयं, **गोमृत इति वा अश्वमृत इति वा मार्जारमृत इति वा हस्तिमृत इति वा सिंहमृत इति वा व्याघ्रमृत इति वा द्वीपः-चित्रकः,** सर्वत्र अहिश्चासौ मृतश्च अहिमृत इत्येवं विशेषणसमासः, इह मृतकं सद्यःसंपन्नं न विगन्धि भवति तत आह-**'मयकुहिय-विणट्ठकुणिमवावण्णे'**त्यादि, मृतः सन् कुथितः-पूतिभावमुपगतो मृतकुथितः, स चोच्छूनावस्थामात्रगतोऽ-पि भवति, न च स तथा विगन्धस्तत आह-विनष्टः-उच्छूनावस्थां प्राप्य स्फुटित इति भावः, सोऽपि तथा दुरभिगन्धो न भवति तत आह-'कुणिमवावण्ण'त्ति व्यापन्नं-विशरारुभूतं कुणिमं-मांसं यस्य स तथा, ततो विशेषणसमासः, **'दुरभिगन्धः'** इति दुरभिः-सर्वेषामाभिमुख्येन दुष्टो गन्धो यस्यासौ दुरभिगन्धः, अशुचिश्च विलीनो-मनसः कलिमलपरिणामहेतुः 'विगय' इति विगतं प्रनष्टं यदभिमुखतया प्राणिनां गतं-गमनं यस्मिन्, तथा बीभत्सया-निन्दया दर्शनीयो बीभत्सादर्शनीयः, ततो विशेषणसमासः **अशुचि[विलीन]विगतबीभत्सादर्शनीयः 'किमिजालाउलसंसत्ते'** इति संसक्तः सन् कृमिजालाकुलो जातः कृमिजालाकुलसंसक्तः, मयूरव्यंसकादित्वात्समासः संसक्तशब्दस्य च परनिपातः, एतावत्युक्ते गौतम आह-**'भवे एयारूवे सिया?'** इति, स्याद् भवेद्-भवेयुरेतद्रूपाः-यथोक्तविशेषणविशिष्टा अहिमृतादिरूपा गन्धेनाधिकृता नरकाः, सूत्रे च बहुवचनेऽप्येकवचनं प्राकृतत्वात्, भगवानाह-**गौतम! 'नायमर्थः समर्थो'** नायमर्थ उपपन्नो, यतोऽ**स्यां रत्नप्रभायां पृथिव्यां नरका इतो**-यथोक्तविशेषण-

१. साणम०जे.। सुणगमेडतिवा-मु. ।।

विशिष्टाहिमृतादे**रनिष्टतरा एव,** तत्र किञ्चिद्रम्यमपि कस्याप्यनिष्टतरं भवति तत आह-**अकान्ततरा एव**-स्वरूपतोऽप्यकमनीयतरा एव, अभव्या एवेति भावः, तत्राकान्तमपि कस्यापि प्रियं भवति यथा गर्त्ताशूकरस्याशुचिः, तत आह-अप्रियतरा एव न कस्यापि प्रिया इति भावः, अत एवामनोज्ञतरा एव, **अमनआपतरा एव गन्धमधिकृत्य प्रज्ञप्ताः,** तत्र मनोज्ञं-मनोऽनुकूलमात्रं, यत्पुनः स्वविषये मनोऽत्यन्तमासक्तं करोति तन्मनआपम्, एकार्थिका वा एते सर्वे शब्दाः शक्रेन्द्र-पुरन्दरादिवत् नानादेशजविनेयजनानुग्रहार्थमुपात्ताः, **एवं** पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तम्याम्**।।८४।। स्पर्शमधिकृत्याह-

(८५) इमीसे णं भंते! रयणप्प० पु० णरया केरिसया फासेणं पण्णत्ता?, गोयमा! से जहानामए असिपत्तेइ वा खुरपत्तेइ वा कलंबचीरियापत्तेइ वा सत्तिअग्गेति वा कुंतग्गेइ वा तोमरग्गेति वा नारायग्गेति वा सूलग्गेति वा लउलग्गेति वा भिंडिमालग्गेति वा सूचिकलावेति वा कवियच्छूति वा [१]विच्छुयडक्केति वा इंगालेति वा जालेति वा मुम्मुरेति वा, अच्चिति वा अलाएति वा सुद्धागणीइ वा, भवे एतारूवे सिया?, णो तिणट्ठे समट्ठे, गोयमा! इमीसे णं रयणप्पभाए पुढवीए णरगा एत्तो अणिट्ठतरा चेव जाव अमणामतरका चेव फासे णं पण्णत्ता, एवं जाव अधेसत्तमाए पुढवीए।। ८५।।

'इमीसे ण'मित्यादि, प्रश्नसूत्रं सुगमं, भगवानाह-**गौतम! तद्यथा नाम-'असिपत्रमिति वा'** असिः-खड्गं तस्य पत्रमसिपत्रं **क्षुरप्रमिति वा कदम्बचीरिकापत्रमिति वा,** कदम्बचीरिका-तृणविशेषः, स च दर्भादप्यतीव छेदकः, **शक्तिः**-प्रहरणविशेषस्तद**ग्रमिति वा, कुन्ताग्रमिति वा, तोमराग्रमिति वा, भिण्डिमालः**-प्रहरणविशेषस्तद**ग्रमिति वा, सूचीकलाप इति वा, वृश्चिकदंश इति वा, कपिकच्छूरिति वा,** कपिकच्छूः-कण्डूविजनको वल्लीविशेषः, **अङ्गार इति वा,** अङ्गारो-निर्धूमाग्निः, **ज्वालेति वा,** ज्वाला-अनलसम्बद्धा, **मुर्मुर इति वा,** मुर्मुरः-फुम्फुकादौ मसृणोऽग्निः, **अर्चिरिति वा,** अर्चिः-अनलविच्छिन्ना ज्वाला, **अलातम्**-उल्मुकं, **शुद्धाग्निः**-अयस्पिण्डाद्यनुगतोऽग्निर्विद्युदादिर्वा, इतिशब्दः सर्वत्रापि उपमाभूतवस्तुस्वरूपपरिसमाप्तिद्योतकः, वाशब्दः परस्परसमुच्चये, इह कस्यापि नरकस्य स्पर्शः

---

१. **जे.** । विच्छुयकंटएतिवा - **मु. L** । विच्छुयकंटेतिवा - **कगट** ।।

शरीरावयवच्छेदकोऽपरस्य भेदकोऽन्यस्य व्यथाजनकोऽपरस्य दाहक इत्यादि ततः साम्यप्रतिपत्त्यर्थमसि-पत्रादीनां नानाविधानामुपमानानामुपादानं, **'भवे एयारूवे सिया?'** इत्यादि प्राग्वत्।। ८५।।

सम्प्रति नरकावासानां महत्त्वमभिधित्सुराह–

(८६) इमीसे णं भंते! रयणप्पभाए पुढवीए नरका केमहालया पण्णत्ता?, गोयमा! अयण्णं जंबुद्दीवे २ सव्वदीवसमुद्दाणं सव्वब्भंतरए सव्वखुड्डाए वट्टे तेल्लापूव[1]-संठाणसंठिते वट्टे रथचक्कवालसंठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिते वट्टे पडिपुण्णचंदसंठाणसंठिते एक्कं जोयणसतसहस्सं आयामविक्खंभेणं जाव[2] किंचिवि-सेसाहिए परिक्खेवेणं। देवे णं महिड्ढीए जाव महाणुभागे जाव इणामेव इणामेवत्तिकट्टु इमं केवलकप्पं जंबूद्दीवं २ तिहिं अच्छरानिवाएहिं तिसत्तक्खुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्जा, से णं देवे ताए उक्किट्ठाए तुरिताए चवलाए चंडाए सिग्घाए उद्धुयाए जयणाए [छेगाए] दिव्वाए दिव्वगतीए वीतिवयमाणे २ जहण्णेणं एगाहं वा दुयाहं वा तिआहं वा उक्कोसेणं छम्मासेणं वीतिवएज्जा, अत्थेगतिए वीइवएज्जा अत्थेगतिए नो वीतिवएज्जा, एमहालता णं गोयमा! इमीसे णं रयणप्पभाए पुढवीए णरगा पण्णत्ता, एवं जाव अधेसत्तमाए, णवरं अधेसत्तमाए अत्थेगतियं नरगं वीइवइज्जा, अत्थेगइए नरगे नो वीतिवएज्जा।। ८६ ।।

'इमीसे ण'मित्यादि, अस्यां **भदन्त! रत्नप्रभायां पृथिव्यां नरकाः 'किंमहान्तः'** किंप्रमाणा महान्तः **प्रज्ञप्ताः?**, पूर्वं ह्यसङ्ख्येयविस्तृता इति कथितं, तच्चासङ्ख्येयत्वं नावगम्यत इति भूयः प्रश्नः, अत एवात्र निर्वचनं भगवानुपमयाऽभिधत्ते, **गौतम! अय**मिति यत्र संस्थिता वयं **ण**मिति वाक्यालङ्कारे अष्टयोजनोच्छ्रितया रत्नमय्या जम्ब्वा उपलक्षितो द्वीपो **जम्बूद्वीपः सर्वद्वीपसमुद्राणां**-धातकीखण्ड-लवणादीनां **सर्वाभ्यन्तर**:–आदिभूतः **'सर्वक्षुल्लकः'** सर्वेभ्यो द्वीप-समुद्रेभ्यः क्षुल्लको-ह्रस्वः सर्वक्षुल्लकः, तथाहि–सर्वे लवणादयः समुद्राः सर्वे धातकीखण्डादयो द्वीपा अस्माज्जम्बूद्वीपादारभ्य प्रवचनोक्तेन क्रमेण द्विगुणद्विगुणायाम-विष्कम्भपरिधयः ततोऽयं शेषसर्वद्वीपसमुद्रापेक्षया सर्वलघुरिति,

---

१. ०पूतसं० क ख ग ।। २. द्र. स्थानाङ्गे १/२४८ ।।

तथा **वृत्तो** यतः **'तैलापूपसंस्थानसंस्थितः'** तैलेन पक्वोऽपूपस्तैलापूपः, तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतेन पक्व इति तैलविशेषणं, तस्येव संस्थानं तैलापूपसंस्थानं, तेन संस्थितस्तैलापूप-संस्थानसंस्थितः, तथा **वृत्तो** यतः **पुष्करकर्णिकासंस्थानसंस्थितः**, तथा **वृत्तो** यतो **रथचक्रवाल-संस्थानसंस्थितः,** तथा **वृत्तो** यतः **परिपूर्णचन्द्रसंस्थानसंस्थितः**, अनेकधोपमानोपमेयभावो नानादेश-जविनेयप्रतिपत्त्यर्थः, **एकं योजनशतसहस्रमायाम-विष्कम्भेन** त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशे त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्द्धाङ्गुलं च **किञ्चिद्वि-शेषाधिकं परिक्षेपेण** प्रज्ञप्तः, परिक्षेपपरिमाणगणितभावना **'क्षेत्रसमासटीकातो जम्बूद्वीपप्रज्ञप्तिटीकातो'** वा वेदितव्या।

'देवे ण'मित्यादि, **देव**श्च **ण**मिति वाक्यालङ्कारे, **'महर्द्धिकः'**[1] महती ऋद्धिर्विमानपरिवारादिका यस्य स महर्द्धिकः, महती द्युतिः शरीराभरणविषया यस्य स महाद्युतिकः, महद् बलं-शारीरः प्राणो यस्य स महाबलः, महद् यशः-ख्यातिर्यस्य स महायशाः, तथा **'महेसक्खे'** इति महेश इति महान् ईश्वर इत्याख्या यस्य स महेशाख्यः, अथवा ईशनमीशो, भावे घञ्प्रत्यय ऐश्वर्यमित्यर्थः, **"ईशम् ऐश्वर्ये"** [ ] इति वचनात्, तत ईशम्-ऐश्वर्यमात्मनः ख्याति-अन्तर्भूतण्यर्थतया ख्यापयति-प्रथयति ईशाख्यः, महांश्चासावीशाख्यश्च महेशाख्यः, क्वचित् **'महासोक्खे'** इति पाठः, तत्र महत् सौख्यं यस्य प्रभूतसद्वेदोदयवशात्स महासौख्यः, अन्ये पठन्ति-**'महासक्खे'** इति तत्रायं शब्दसंस्कारो-महाश्वाक्षः, इयं चात्र पूर्वाचार्यप्रदर्शिता व्युत्पत्तिः-आशुगमनादश्वो-मनः अक्षाणि-इन्द्रियाणि, स्वविषयव्यापकत्वात्, अश्वश्चाक्षाणि च अश्वाक्षाणि महान्ति अश्वाक्षाणि यस्यासौ महाश्वाक्षः, तथा **'महाणुभागे'** इति अनुभागो-विशिष्टवैक्रियादिकरणविषयाऽचिन्त्या शक्तिः **"भागोऽचिंता सत्ती"**[ ] इति वचनात्, महान् अनुभागो यस्य स महानुभागः, अमूनि महर्द्धिक इत्यादीनि विशेषणानि तत्सामर्थ्यातिशयप्रतिपादकानि **याव**दिति चप्पुटिकात्रयकरणकालावधिप्रदर्शनपरम् **'इणामेव इणामेवेतिकट्टु'** एवमेव मुधिकया एवमेव **"मोरकुल्ला मुहा य मुहियत्ति नायव्वा"** [ ] इति वचनाद् अवज्ञयेति भावः, उक्तञ्च **मूलटीकायाम्** **"इणामेव इणामेवेति कट्टु एवमेव मुधिकयाऽवज्ञयेति"** [ ] **'इतिकृत्वे'** ति हस्तदर्शितचप्पुटिकात्रयकरणसूचकं **केवलकल्पं**-परिपूर्णं **जम्बूद्वीपं त्रिभिरप्सरोनिपातैः**, अप्सरोनिपातो नाम चप्पुटिका, तत्र

---

१. सूत्र-वृत्त्योः पाठभेदः ।।

तिसृभिश्चप्पुटिकाभिरिति द्रष्टव्यं, चप्पुटिकाश्च कालोपलक्षणं, ततो यावता कालेन तिस्रश्चप्पुटिकाः पूर्यन्ते तावत्कालमध्य इत्यर्थः, **त्रिसप्तकृत्वः**-एकविंशतिवारान् **अनुपरिवर्त्त्य**-सामस्त्येन परिभ्रम्य **'हव्वं'** शीघ्र**मागच्छेत्, स** इत्थम्भूतगमनशक्तियोग्यो **देवः तया** देवजनप्रसिद्धया **उत्कृष्टया** प्रशस्तविहायोगतिनामोदयात्प्रशस्तया शीघ्रसञ्चरणा**त्त्वरितया** त्वरा सञ्जाताऽस्यामिति त्वरिता तया त्वरितया शीघ्रतरमेव तया प्रदेशान्तराक्रमणमिति, चपलेव **चपला तया**, क्रोधाविष्टस्येव श्रमासंवेदनात् चण्डेव **चण्डा तया**, निरन्तरं शीघ्रत्वगुणयोगात् शीघ्रा तया **शीघ्रया,** परमोत्कृष्टवेगपरिणामोपेता **जवना तया,** अन्ये तु जितया विपक्षजेतृत्वेनेति व्याचक्षते, **'छेकया'** निपुणया, वातोद्धूतस्य दिगन्तव्यापिनो रजस इव या गतिः सा **उद्धूता तया,** अन्ये त्वाहुः-उद्धतया दर्प्पातिशयेनेति, **'दिव्यया'** दिवि-देवलोके भवा दिव्या तया **देवगत्या व्यतिव्रजन् जघन्यतः 'एकाहं वा'** एकमहर्यावत्, एवं **द्व्यहं त्र्यहमुत्कर्षतः षण्मासान् यावद् व्यतिव्रजेत्,** तत्रास्त्येतद् यदुत **एककान्** कांश्चन नरकान् **'व्यतिव्रजेत्'** उल्लङ्घ्य परतो गच्छेत्, तथाऽस्त्येतद् यदुत इत्थंभूतयापि गत्या षण्मासानपि यावन्निरन्तरं गच्छन् **एककान्** कांश्चन नरकान् **'न व्यतिव्रजेत्'** नोल्लङ्घ्य परतो गच्छेत्, अतिप्रभूताऽऽयामतया तेषामन्तस्य प्राप्तुमशक्यत्वात्, **एतावन्तो महान्तो गौतम! अस्यां रत्नप्रभायां पृथिव्यां नरकाः प्रज्ञप्ताः, एव**मेकैकस्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तम्यां,** नवर**मधःसप्तम्या**मेवं वक्तव्यम्-**'अत्थेगइयं नरगं वीइवएज्जा अत्थेगइए नरगे नो वीइवएज्जा'** अप्रतिष्ठानाभिधस्यैकस्य नरकस्य लक्षयोजनायाम-विष्कम्भतयाऽन्तस्य प्राप्तुं शक्यत्वात् शेषाणां च चतुर्णामतिप्रभूतासङ्ख्येययोजनकोटीकोटीप्रमाणत्वेनान्तस्य प्राप्तुमशक्यत्वात्।। ८६।।

सम्प्रति किंमया नरका इति निरूपणार्थमाह-

(८७) इमीसे णं भंते! रयणप्पभाए पुढवीए णरगा किंमया पण्णत्ता?, गोयमा! सव्ववइरामया पण्णत्ता, तत्थ णं नरएसु बहवे जीवा य पोग्गला य[२] अवक्कमंति विउक्कमंति चयंति उववज्जंति, सासता णं ते णरगा दव्वट्ठयाए वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासया, एवं जाव अहेसत्तमा[३]।। ८७।।

---

१. हारि.वृत्तौ - जितया - इति ।। २. य २ वक्क० SP ।। ३. कट। ०माए - Lमु. ।।

'इमीसे णं भंते!' इत्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः 'किंमयाः'** किंविकाराः **प्रज्ञप्ताः**?, भगवानाह–**गौतम! 'सव्ववइरामया'** इति सर्वात्मना वज्रमयाः **प्रज्ञप्ताः,** वज्रशब्दस्य सूत्रे दीर्घान्तता प्राकृतत्वात्, **'तत्र' च** तेषु **नरकेषु ण**मिति वाक्यालङ्कारे **बहवो जीवाश्च** खरबादर-पृथिवीकायिकरूपाः **पुद्गलाश्च 'अपक्रामन्ति'** च्यवन्ते **'व्युत्क्रामन्ति'** उत्पद्यन्ते, एतदेव शब्दद्वयं यथाक्रमं पर्यायद्वयेन व्याचष्टे–**'चयंति उववज्जंति'** च्यवन्ते उत्पद्यन्ते, किमुक्तं भवति? एके जीवाः पुद्गलाश्च यथायोगं गच्छन्ति अपरे त्वागच्छन्ति, यस्तु प्रतिनियतसंस्थानादिरूप आकारः स तदवस्थ मएवेति, अत एवाह–**शाश्वता ण**मिति पूर्ववत् **ते नरका द्रव्यार्थतया** तथाविधप्रतिनियतसंस्थानादि-रूपतया **वर्णपर्यायैर्गन्धपर्यायै रसपर्यायैः स्पर्शपर्यायैः** पुनर**शाश्वताः,** वर्णादीनामन्यथाऽन्यथाभवनात्, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी** पृथिवी।। ८७।।

साम्प्रतमुपपातं विचिचिन्तयिषुराह–

(८८) इमीसे णं भंते! रयणप्पभाए पुढवीए नेरइया कतोहिंतो उववज्जंति[१] किं असण्णीहिंतो उववज्जंति ? सरीसिवेहिंतो उववज्जंति ? पक्खीहिंतो उववज्जंति? चउप्पएहिंतो उववज्जंति? उरगेहिंतो उववज्जंति ? इत्थियाहिंतो उववज्जंति? मच्छमणुएहिंतो उववज्जंति?, गोयमा! असण्णीहिंतो उववज्जंति जाव मच्छमणुए-हिंतोवि उववज्जंति- सेसासु[२] इमाए गाधाए णातव्या।

असण्णी खलु पढमं दोच्चं च सरीसिवा ततिय पक्खी।
सीहा जंति चउत्थीं उरगा पुण पंचमीं जंति।।१।।
छट्ठिं च इत्थियाओ मच्छा मणुया य सत्तमिं जंति।
एसो[३] खलु उववाता, नेरइयाणं तु नातव्वो।। २ ।।←जाव अधेसत्तमाए पुढवीए

---

१. **इतोऽग्रे** SP **आदर्शयोः**- उववातो सव्वो भाणिऊणं ततो पच्छा - **इत्यधिकम्** ।। **२.जे.**। एवमेतेणं अभिलावेणं इमा गाधा घोसेयव्वा - SPL। एवमेतेण... घोसेयव्वा-**मु. नास्ति** । **३.जे.L**। ~~→चिह्नद्वयमध्यवर्तिपाठः कखगट~~ **मु. नास्ति** ।।

नेरइया णो असण्णीहिंतो उववज्जंति जाव णो इत्थियाहिंतो उववज्जंति मच्छमणुस्सेहिंतो उववज्जंति।।८८।।

'इमीसे ण'मित्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नैरयिकाः कुत उत्पद्यन्ते?, किमसञ्ज्ञिभ्य उत्पद्यन्ते ? सरीसृपेभ्य उत्पद्यन्ते ? पक्षिभ्य उत्पद्यन्ते ? चतुष्पदेभ्य उत्पद्यन्ते? उरगेभ्य उत्पद्यन्ते ? स्त्रीभ्य उत्पद्यन्ते ? मत्स्यमनुष्येभ्य उत्पद्यन्ते?,** भगवानाह–**गौतम! असञ्ज्ञिभ्योऽप्युत्पद्यन्ते यावन्मत्स्यमनुष्येभ्योऽप्युत्पद्यन्ते, 'सेसासु इमाए गाहाए अणुगंतव्वा'** इति, 'शेषासु' शर्कराप्रभादिषु पृथिवीष्वनया गाथया, जातावेकवचनं गाथाद्विकेनेत्यर्थः, उत्पद्यमाना अनुगन्तव्याः, तदेव गाथाद्विकमाह–**'अस्सण्णी खलु पढम'**मित्यादि, असञ्ज्ञिनः–संमूर्च्छिमपञ्चेन्द्रियाः खलु प्रथमां नरकपृथिवीं गच्छन्ति, खलुशब्दोऽवधारणे, तथा अवधारणमेवम्–असञ्ज्ञिनः प्रथमामेव यावद् गच्छन्ति न परत इति, न तु त एव प्रथमामिति गर्भजसरीसृपादीनामपि उत्तरपृथिवीषट्कगामिनां तत्र गमनात्, एवमुत्तरत्राप्यवधारणं भावनीयम्। **'दोच्चं च सरीसिवा'** इति द्वितीयामेव शर्कराप्रभाख्यां पृथिवीं यावद् गच्छन्ति सरीसृपाः–गोधा-नकुलादयो गर्भव्युत्क्रान्ता, न परतः, **तृतीयामेव** गर्भजाः **पक्षिणो** गृध्रादयः, **चतुर्थीमेव सिंहाः, पञ्चमीमेव** गर्भजा **उरगाः, षष्ठीमेव स्त्रियः** स्त्रीरत्नाद्या महाक्रूराध्यवसायिन्यः, **सप्तमीं** यावद् गर्भजा **मत्स्या मनुजा** अतिक्रूराध्यवसायिनो महापापकारिणः, आलापकश्च प्रतिपृथिवि एवम्–

"सक्करप्पभाए णं भंते! पुढवीए नेरइया किं असण्णीहिंतो उववज्जंति जाव मच्छमणुएहिंतो उववज्जंति?, गोयमा! नो असन्नीहिंतो उववज्जंति सरीसिवेहिंतो उववज्जंति जाव मच्छमणुस्सेहिंतो उववज्जंति। वालुयप्पभाए णं भंते! पुढवीए नेरइया किं असण्णीहिंतो उववज्जंति जाव मच्छमणुएहिंतो उववज्जंति?, गोयमा! नो असण्णीहिंतो उववज्जंति नो सरीसिवेहिंतो उववज्जंति पक्खीहिंतो उववज्जंति जाव मच्छमणुस्सेहिंतो उववज्जंति"[प्रज्ञापना सू. ६/१२९] एवमुत्तरोत्तरपृथिव्यां पूर्वपूर्वप्रतिषेधसहितोत्तरप्रतिषेधस्तावद्वक्तव्यो **यावदधःसप्तम्यां** स्त्रीभ्योऽपि प्रतिषेधः, तत्सूत्रं चैवम्– **'अहेसत्तमाए णं** भंते! **पुढवीए नेरइया** किं असण्णीहिंतो उववज्जंति जाव मच्छमणुस्सेहिंतो उववज्जंति?, गोयमा! **नो असण्णीहिंतो उववज्जंति जाव नो इत्थीहिंतो उववज्जंति, मच्छमणुस्सेहिंतो उववज्जंति**।। ८८ ।। सम्प्रत्येकस्मिन् समये कियन्तोऽस्यां रत्नप्रभायां पृथिव्यां नारका उत्पद्यन्ते? इति निरूपणार्थमाह–

(८९) इमीसे णं भंते! रयणप्प० पु० णेरतिया एक्कसमएणं केवतिया उववज्जंति?, गोयमा! जहण्णेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं संखेज्जा वा असंखिज्जा वा उववज्जंति, एवं जाव अधेसत्तमाए।। ८९ ।।

[इमीसे णं] 'रयणप्पभापुढविए नेरइया णं भंते!' इत्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! एकसमयेन कियन्त उत्पद्यन्ते?,** भगवानाह–**गौतम! जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया वा,** एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तम्याम्**।। ८९ ।। सम्प्रति प्रतिसमयमेकैकनारकापहारे सकलनारकापहारकालमानं विचिचिन्तयिषुरिदमाह–

(९०) इमीसे णं भंते! रयणप्प० पुढवीए णेरतिया समए समए अवहीरमाणा अवहीरमाणा केवतिकालेणं[1] अवहिता सिता?, गोयमा! ते णं असंखेज्जा समए समए अवहीरमाणा अवहीरमाणा असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति नो चेव णं अवहिता सिता जाव अधेसत्तमा।।९०।।

'रयणप्पभापुढविनेरइया णं भंते!' इत्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! समये समये** एकैकसङ्ख्यया **अपहियमाणाः २ कियता कालेन** सर्वात्मनाऽपहियन्ते?, भगवानाह–**गौतम! 'ते णं असंखेज्जा समए २ अवहीरमाणा'** इत्यादि, ते रत्नप्रभापृथिवीनैरयिका असङ्ख्येयास्ततः समये समये एकैकसङ्ख्यया अपहियमाणा **असङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपहियन्ते,** इदं च नारकपरिमाणप्रतिपत्त्यर्थं कल्पनामात्रं, **'नो चेव णं अवहिया सिया'** इति न पुनरपहृताः स्युः, किमुक्तं भवति? न पुनरेवं कदाचनाप्यपहृता अभवन् नाप्यपहियन्ते नाप्यपहरिष्यन्त इति, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तम्याम्**।। ९० ।। सम्प्रति शरीरपरिमाणप्रतिपादनार्थमाह–

(९१) इमीसे णं भंते! रयणप्प० पु० णेरतियाणं केमहालिया सरीरोगाहणा पण्णत्ता?, गोयमा! दुविहा सरीरोगाहणा पण्णत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य। तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखेज्जतिभागं, उक्कोसेणं सत्त धणूइं तिण्णि य रयणीओ छच्च अंगुलाइं।

१. केवतिया केवतिकालेण - जे. ।

[१]**तत्थ णं जे से उत्तरवेउव्विए से जह० अंगुलस्स संखेज्जतिभागं उक्को० पण्णरस धणूइं अड्ढाइज्जाओ रयणीओ। दोच्चाए भवधारणिज्जे जहण्णओ अंगुलासंखेज्जभागं उक्को० पण्णरस धणूइं अड्ढाइज्जातो रयणीओ, उत्तरवेउव्विया जह० अंगुलस्स संखेज्जभागं, उक्को० एक्कतीसं धणूइं एक्का रयणी। तच्चाए भवधारणिज्जे एक्कतीसं धणूइं एक्का रयणी, उत्तरवेउव्विया बासट्ठिं धणूइं दोण्णि रयणीओ। चउत्थीए भवधारणिज्जे बावट्ठिं धणूइं दोण्णि य रयणीओ, उत्तरवेउव्विया पणवीसं धणुसयं। पंचमीए भवधारणिज्जे पणवीसं धणुसयं, उत्तरवे० अड्ढाइज्जाइं धणुसयाइं। छट्ठीए भवधारणिज्जा अड्ढाइज्जाइं धणुसयाइं, उत्तरवेउव्विया पंचधणुसयाइं। सत्तमाए भवधारणिज्जा पंचधणुसयाइं, उत्तरवेउव्विए धणुसहस्सं।। ९१।।**

'रयणप्पभापुढवी' इत्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! 'किंमहती'** किंप्रमाणा महती **शरीरावगाहना प्रज्ञप्ता**?, [२]**जहा 'पण्णवणाए' ओगाहणसंठाणपदे** इति, यथा प्रज्ञापनायामवगाहना-संस्थानाख्यपदे तथा वक्तव्या, सा चैवं-**द्विविधा** रत्नप्रभापृथिवीनैरयिकाणां **शरीरावगाहना-भवधारणीया उत्तरवैक्रिया च, तत्र या सा भवधारणीया सा जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सप्त धनूंषि त्रयो हस्ताः षट्** परिपूर्णान्यङ्गुलानि, **उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः पञ्चदश धनूंषि द्वौ हस्तावेका वितस्तिः,** शर्कराप्रभायां **भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः पञ्चदश धनूंषि द्वौ हस्तावेका वितस्तिः, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षत एकत्रिंशद्धनूंषि एको हस्तः,** वालुकाप्रभायां **भवधारणीया** जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षत **एकत्रिंशद्धनूंषि एको हस्तः, उत्तरवैक्रिया** जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः **सार्द्धानि द्वाषष्टिधनूंषि,** पङ्कप्रभायां **भवधारणीया** जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः **सार्द्धानि द्वाषष्टिधनूंषि, उत्तरवैक्रिया** जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः **पञ्चविंशं धनुःशतं,** धूमप्रभायां **भवधारणीया** जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः **पञ्चविंशं धनुःशतम्,** उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतो**ऽर्द्धतृतीयानि धनुःशतानि,** तमःप्रभायां **भवधारणीया**

---

१. **इतोऽग्रे जे. प्रतौ संक्षिप्तः पाठः इत्थम्** - उत्तरवे. दुगुणं, एवं दुगुणा दुगुणं जावधेस. भवधा. पंचधणुसया, उत्तरवे. धणुसहस्सं ।। २. **नैष पाठः सूत्रे दृश्यते** ।।

जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रा उत्कर्षतोऽर्द्धतृतीयानि **धनुःशतानि, उत्तरवैक्रिया** जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः **पञ्चधनुःशतानि,** तमस्तमःप्रभायां **भवधारणीया** जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः **पञ्च धनुःशतानि, उत्तरवैक्रिया** जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतो **धनुःसहस्र**मिति।

यदि पुनः प्रतिप्रस्तटे चिन्ता क्रियते तदैवमवगन्तव्या–तत्र जघन्या भवधारणीया सर्वत्राप्यङ्गुलासङ्ख्येयभागः, उत्तरवैक्रिया तु अङ्गुलसङ्ख्येयभागः, उक्तं च **'मूलटीकाकारेणा'**न्यत्र-**"उत्तरवैक्रिया तु तथाविधप्रयत्नाभावादाद्यसमयेऽप्यङ्गुलसङ्ख्येयभागमात्रैवे"**[ ]ति, उत्कृष्टा तु भवधारणीया रत्नप्रभायाः प्रथमे प्रस्तटे त्रयो हस्ता अत ऊर्ध्वं क्रमेण प्रतिप्रस्तटं सार्द्धानि षट्पञ्चाशदङ्गुलानि प्रक्षिप्यन्ते, तत एवं परिमाणं भवति, द्वितीये प्रस्तटे धनुरेकमेको हस्तः सार्द्धानि चाष्टावङ्गुलानि, तृतीये धनुरेकं त्रयो हस्ताः सप्तदशाङ्गुलानि, चतुर्थे द्वे धनुषी द्वौ हस्तौ सार्द्धमेकमङ्गुलं, पञ्चमे त्रीणि धनूंषि दशाङ्गुलानि, षष्ठे त्रीणि धनूंषि द्वौ हस्तौ सार्द्धान्यष्टादशाङ्गुलानि, सप्तमे चत्वारि धनूंषि एको हस्तस्त्रीणि चाङ्गुलानि, अष्टमे चत्वारि धनूंषि त्रयो हस्ताः सार्द्धान्येकादशाङ्गुलानि, नवमे पञ्च धनूंषि एको हस्तो विंशतिरङ्गुलानि, दशमे षड् धनूंषि सार्द्धानि चत्वार्यङ्गुलानि, एकादशे षड् धनूंषि द्वौ हस्तौ त्रयोदशाङ्गुलानि, द्वादशे सप्त धनूंषि सार्द्धान्येकविंशतिरङ्गुलानि, त्रयोदशे सप्त धनूंषि त्रयो हस्ताः षट् च परिपूर्णान्यङ्गुलानि, उक्तञ्च–

"रयणाए पढमपयरे हत्थतियं देह उस्सए भणियं।
छप्पन्नंगुलसड्ढा पयरे पयरे हवइ वुड्ढी।।१।।" [तुला बृहत्सङ्ग्रहणी २४५]

प्र.	१	२	३	४	५	६	७	८	९	१०	११	१२	१३
ध.	०	१	१	२	३	३	४	४	५	६	६	७	७
ह.	३	१	३	२	०	२	१	३	१	०	२	०	३
अं.	०	८।।	१७	१।।	१०	१८।।	३	११।।	२०	४।।	१३	२१।।	६

शर्कराप्रभायां प्रथमे प्रस्तटे सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि, अत ऊर्ध्वं तु प्रतिप्रस्तटं त्रयो हस्तास्त्रीणि चाङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति–द्वितीये प्रस्तटेऽष्ट धनूंषि द्वौ हस्तौ नव चाङ्गुलानि, तृतीये नव धनूंषि एको हस्तो द्वादश चाङ्गुलानि, चतुर्थे दश धनूंषि पञ्चदशाङ्गुलानि, पञ्चमे दश धनूंषि त्रयो हस्ता अष्टादशाङ्गुलानि, षष्ठे एकादश धनूंषि द्वौ

हस्तावेकविंशतिरङ्गुलानि, सप्तमे द्वादश धनूंषि द्वौ हस्तौ, अष्टमे त्रयोदश धनूंषि एको हस्तस्त्रीणि चाङ्गुलानि, नवमे चतुर्दश धनूंषि षट् चाङ्गुलानि, दशमे चतुर्दश धनूंषि त्रयो हस्ता नव चाङ्गुलानि, एकादशे पञ्चदश धनूंषि द्वौ हस्तौ एका वितस्तिः, उक्तञ्च–

"सो चेव य बीयाए पढमे पयरंमि होइ उस्सेहो।
हत्थ तिय तिन्नि अङ्गुल पयरे पयरे य वुड्ढी य"।।१।। [त्रैलोक्यदीपक ३८४]
"एक्कारसमे पयरे पन्नरस धणूणि दोण्णि रयणीओ।
बारस य अंगुलाइं देहपमाणं तु विन्नेयं।।२।।"

अत्र **'सो चेव य बीयाए'** इति य एव प्रथमपृथिव्यां त्रयोदशे प्रस्तटे उत्सेधो भणितो यथा सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानीति स एव द्वितीयस्यां शर्कराप्रभायां पृथिव्यां प्रथमे प्रस्तटे उत्सेधो भवति, शेषं सुगमम्।

१	२	३	४	५	६	७	८	९	१०	११	प्र.
७	८	९	१०	१०	११	१२	१३	१४	१४	१५	ध.
३	२	१	०	३	२	२	१	०	३	२	ह.
६	९	१	१५	१८	२१	०	३	६	९	१२	अं.

वालुकाप्रभायाः प्रथमे प्रस्तटे पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि, अत ऊर्ध्वं तु प्रतिप्रस्तटं सप्त हस्ताः सार्द्धानि चैकोनविंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति–द्वितीये प्रस्तटे सप्तदश धनूंषि द्वौ हस्तौ सार्द्धानि सप्ताङ्गुलानि, तृतीये एकोनविंशतिर्धनूंषि द्वौ हस्तौ त्रीण्यङ्गुलानि, चतुर्थे एकविंशतिर्धनूंषि एको हस्तः सार्द्धानि च द्वाविंशतिरङ्गुलानि, पञ्चमे त्रयोविंशतिर्धनूंषि एको हस्तोऽष्टादश चाङ्गुलानि, षष्ठे पञ्चविंशतिर्धनूंषि एको हस्तः सार्द्धानि त्रयोदशाङ्गुलानि, सप्तमे सप्तविंशतिर्धनूंषि एको हस्तो नव चाङ्गुलानि, अष्टमे एकोनत्रिंशद् धनूंषि एको हस्तः सार्द्धानि चत्वार्यङ्गुलानि, नवमे एकत्रिंशद्धनूंषि एको हस्तः, उक्तञ्च–

"सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो।
सत्त य रयणी अंगुल गुणवीसं सड्ढ वुड्ढी य।।१।। [त्रैलोक्यदीपक ३८६]
पयरे पयरे य तहा नवमे पयरंमि होइ उस्सेहो।
धणुयाणि एगतीसं एक्का रयणी य नायव्वा।।२।।"

अत्रापि **'सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो'** इति य एव द्वितीयस्यां शर्कराप्रभायामेकादशे प्रस्तटे उत्सेधः स एव तृतीयस्यां वालुकाप्रभायां प्रथमे प्रस्तटे भवति, शेषं सुगमम्। पङ्कप्रभायाः प्रथमे प्रस्तटे एकत्रिंशद्धनूंषि एको हस्तः, तत ऊर्ध्वं तु प्रतिप्रस्तटं पञ्च धनूंषि विंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति–द्वितीये प्रस्तटे षट्त्रिंशद्धनूंषि एको हस्तो विंशतिरङ्गुलानि, तृतीये एकचत्वारिंशद्धनूंषि द्वौ हस्तौ षोडशाङ्गुलानि, चतुर्थे षट्चत्वारिंशद्धनूंषि त्रयो हस्ता द्वादशाङ्गुलानि, पञ्चमे द्विपञ्चाशद्धनूंषि अष्टावङ्गुलानि, षष्ठे सप्तपञ्चाशद्धनूंषि एको हस्तश्चत्वार्यङ्गुलानि, सप्तमे द्वाषष्टिः धनूंषि द्वौ हस्तौ, उक्तञ्च–

"सो चेव चउत्थीए पढमे पयरंमि होइ उस्सेहो।
पञ्च धणु वीस अंगुल पयरे पयरे य वुड्ढी य।।१।। [त्रैलोक्यदीपक ३८८]
जा सत्तमए पयरे नेरइयाणं तु होइ उस्सेहो।
बासट्ठी धणुयाइं दोण्णि य रयणी य बोद्धव्वा।।२।।"

अत्रापि **'सो चेवे'**त्यस्यार्थः पूर्वानुसारेण भावनीयः। धूमप्रभायाः प्रथमे प्रस्तटे द्वाषष्टिर्धनूंषि द्वौ हस्तौ, तत ऊर्ध्वं तु प्रतिप्रस्तटं पञ्चदश धनूंषि सार्द्धहस्तद्वयाधिकानि क्रमेण प्रक्षेप्तव्यानि, तेनेदं परिमाणं भवति–द्वितीये प्रस्तटेऽष्टसप्ततिर्धनूंषि एका वितस्तिः, तृतीये त्रिनवतिर्धनूंषि त्रयो हस्ताः, चतुर्थे नवोत्तरं धनुःशतमेको हस्त एका वितस्तिः, पञ्चमे पञ्चविंशं धनुःशतं, उक्तञ्च–

"सो चेव पंचमीए पढमे पयरंमि होइ उस्सेहो।
पनरस धणूणि दो हत्थ सड्ढ पयरेसु वुड्ढी य।।१।।
तह पंचमए पयरे उस्सेहो धणुसयं तु पणवीसं।"

'सो चेव य' इत्यस्यार्थोऽत्रापि पूर्ववत्। तमःप्रभायाः प्रथमे प्रस्तटे पञ्चविंशं धनुःशतं ततः परतरे तु प्रस्तटद्वये क्रमेण प्रत्येकं सार्द्धानि द्वाषष्टिर्धनूंषि प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति–द्वितीये सार्द्धसप्ताशीत्यधिकं धनुःशतं, तृतीयेऽर्द्धतृतीयानि धनुःशतानि, उक्तञ्च–

"सो चेव य छट्ठीए पढमे पयरंमि होइ उस्सेहो।
बासट्ठि धणु य सड्ढा पयरे पयरे य वुड्ढी य।।१।।
(सड्ढा य सत्तसीइ बीए पयरंमि होइ धणुयसयं।)
छट्ठीएँ तइयपयरे दो सय पण्णासया होंति।।२।।"

सप्तमपृथिव्यां पञ्च धनुःशतानि, उत्तरवैक्रिया तु सर्वत्रापि भवधारणीयापेक्षया द्विगुणप्रमाणाऽवसातव्या।।९१।।

सम्प्रति संहननप्रतिपादनार्थमाह–

(९२) इमीसे णं भंते! रयणप्प० पु० णेरइयाणं सरीरया किंसंघयणी पण्णत्ता?, गोयमा! छण्हं संघयणाणं असंघयणा[1], णेवट्ठी णेव छिरा णवि ण्हारू [2]णेव संघयणमत्थि, जे पोग्गला अणिट्ठा जाव अमणामा ते तेसिं सरीरसंघायत्ताए परिणमंति, एवं जाव अधेसत्तमाए।। ९२।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! 'किंसंहननिनः'** केन संहननेन संहननवन्तः **प्रज्ञप्ताः**?, भगवानाह–**गौतम! 'छण्हं संघयणाण'**मित्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी**।। ९२ ।। सम्प्रति संस्थानप्रतिपादनार्थमाह–

(९३) इमीसे णं भंते! रयण० पु० नेरतियाणं सरीरा किंसंठिता पण्णत्ता?, गोयमा! दुविहा पण्णत्ता तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जे ते भवधारणिज्जा ते हुंडसंठिया पण्णत्ता, तत्थ णं जे ते उत्तरवेउव्विया तेवि हुंडसंठिता पण्णत्ता, एवं जाव अहेसत्तमाए।।९३।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! शरीरकाणि 'किंसंस्थितानि'** केन संस्थानेन संस्थानवन्ति **प्रज्ञप्तानि**?, भगवानाह–**गौतम**! रत्नप्रभापृथिवीनैरयिकाणां शरीराणि **द्विविधानि प्रज्ञप्तानि, तद्यथा-भवधारणीयानि उत्तरवैक्रियाणि च, तत्र यानि भवधारणीयानि तानि** तथाभवस्वाभाव्यादवश्यं हुण्डनामकर्मोदयतो **हुण्डसंस्थानानि, यान्यपि चोत्तरवैक्रियरूपाणि तान्यपि** यद्यपि शुभमहं वैक्रियं करिष्यामीति चिन्तयति तथाऽपि तथाभवस्वाभाव्यतो हुण्डसंस्थाननामकर्मोदयत उत्पाटितसकलरोमपिच्छकपोतपक्षिण इव **हुण्डसंस्थानानि** भवन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तम्याम्**।। ९३ ।। सम्प्रति नारकाणां शरीरेषु वर्णप्रतिपादनार्थमाह–

(९४) इमीसे णं भंते! रयण० पु० णेरतियाणं सरीरगा केरिस[3]गा वण्णेणं पण्णत्ता?, गोयमा! काला कालोभासा जाव परमकिण्हा वण्णेणं पण्णत्ता, एवं जाव अहेसत्तमाए।। ९४ ।।

---

१. ०णी L । २. **कखगटमु. । णेव संघयणमत्थि** - L **नास्ति** ।। ३. ०सगा L **जे.**। ०सता **कखगमु.**।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां** भदन्त! **शरीरकाणि कीदृशानि वर्णेन प्रज्ञप्तानि?**, भगवानाह–**गौतम! 'काला कालोभासा'** इत्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावद**धःसप्तमपृथिव्याम्**।। ९४ ।। अधुना गन्धप्रतिपादनार्थमाह–

(९५) इमीसे णं भंते रयण० पु० नेरइयाणं सरीरया केरिसया गंधेणं पण्णत्ता?, गोयमा! से जहानामए अहिमडे इ वा तं चेव जाव अहेसत्तमा।।

रत्नप्रभापृथिवीनैरयिकाणां भदन्त! शरीरकाणि कीदृशानि गन्धेन प्रज्ञप्तानि?, भगवानाह- **गौतम! 'से जहानामए अहिमडे इ वा'** इत्यादि प्राग्वत्, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधः-सप्तम्याम्**।। ९४ ।। सम्प्रति स्पर्शप्रतिपादनार्थमाह–

(९६) इमीसे णं रयण० पु० नेरइयाणं सरीरया केरिसया फासेणं पण्णत्ता?, गोयमा! फुडितच्छविविच्छविया खरफरुसझामझुसिरा फासेणं पण्णत्ता, एवं जाव अधेसत्तमाए।। ९६।।

'रयणप्पभापुढविनेरइयाणं भंते!' इत्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! शरीरकाणि कीदृशानि स्पर्शेन प्रज्ञप्तानि?**, भगवानाह– **गौतम! स्फटितच्छविविच्छवयः**, इहैकत्र छविशब्दस्त्वग्वाची अपरत्र छायावाची, ततोऽयमर्थः–स्फटितया–राजिशतसङ्कुलया त्वचा विच्छवयो-विगतच्छायाः स्फटितच्छविविच्छवयः, तथा खरम्(राणि)–अतिशयेन परुषाणि **खरपरुषाणि ध्यामानि-**-दग्धच्छायानि शुषिराणि–शुषिरशतकलितानि, ततः पदत्रयस्यापि पदद्वयपदद्वयमीलनेन विशेषणसमासः, सुपक्वेष्टकाध्यामतुल्यानीतिभावः, **स्पर्शेन प्रज्ञप्तानि,** एवं प्रतिपृथिवि तावद् **यावदधःसप्तम्याम्**।।९६।।

सम्प्रत्युच्छ्वासप्रतिपादनार्थमाह–

(९७) इमीसे णं भंते! रयणप्पभाए पुढवीए णेरतियाणं केरिसया पोग्गला ऊसा-सत्ताए परिणमंति?, गोयमा! जे पोग्गला अणिट्ठा जाव अमणामा ते तेसिं ऊसासत्ताए परिणमंति, एवं जाव अहेसत्तमाए, एवं णेरइयाणं केरिसया पोग्गला आहारत्ताए परिणमंति? गो. जे पो. अणिट्ठा फ्रा ते तेसिं आधा० परि० जावधे स०।।९७।।

---

१. द्र. ३/८३ सू. ।। २.जे.–~~चिह्नद्वयमध्यवर्तिपाठस्थाने~~ - आहारस्सवि सत्तसुवि-मु. L। ०सत्तण्हवि - कगट।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! कीदृशाः पुद्गला उच्छ्वासतया परिणमन्ति?**, भगवानाह–**गौतम! ये पुद्गला अनिष्टा** अकान्ता अप्रिया अशुभा अमनोज्ञा **अमनआपाः,** अमीषां पदानां व्याख्यानं प्राग्वत्, **ते तेषां** रत्नप्रभापृथिवीनैरयिकाणा**मुच्छ्वासतया परिणमन्ति, एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तम्याम्**। साम्प्रतमाहारप्रतिपादनार्थमाह– **'रयणे'**त्यादि, रत्नप्रभापृथिवी**नैरयिकाणां** भदन्त! **कीदृशाः पुद्गला आहारतया परिणमन्ति?**, भगवानाह–**गौतम! ये पुद्गला अनिष्टा अकान्ता अप्रिया अशुभा अमनोज्ञा अमनआपास्ते तेषामाहारतया परिणमन्ति, एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तम्याम्।** इह पुस्तकेषु बहुधाऽन्यथापाठो दृश्यते, अत एव वाचनाभेदोऽपि समग्रो दर्शयितुं न शक्यते, केवलं बहुषु पुस्तकेषु योऽविसंवादी पाठस्तत्प्रतिपत्त्यर्थं सुगमान्यप्यक्षराणि संस्कारमात्रेण विव्रियन्तेऽन्यथा सर्वमेतदुत्तानार्थं सूत्रमिति।।९७।। सम्प्रति लेश्याप्रतिपादनार्थमाह–

(९८) इमीसे णं भंते! रयण० पु० नेरतियाणं कति लेसाओ पण्णत्ताओ?, गोयमा! एक्का काउलेसा पण्णत्ता, एवं सक्करप्पभाएऽवि।।९८।। (९९) वालुयप्पभाए पुच्छा, दो लेसाओ पण्णत्ताओ तं०-नीललेसा काउलेसा य ते बहुतरा जे काउलेसा, ते थोवतरका जे नीललेसा ।।९९।। (१००)पंकप्पभाए पुच्छा, एक्का नीललेसा पण्णत्ता,।।१००।। (१०१)धूमप्पभाए पुच्छा, गोयमा! दो लेस्साओ पण्णत्ताओ, तंजहा-किण्हलेस्सा य नीललेस्सा य, ते बहुतरका जे नीललेस्सा, ते थोवतरका जे किण्हलेसा।।१००-१०१।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! कति लेश्याः प्रज्ञप्ताः?**, भगवानाह– **गौतम! कापोतलेश्या प्रज्ञप्ता, एवं शर्कराप्रभानैरयिकाणामपि,** नवरं तेषां कापोतलेश्या सङ्क्लिष्टतरा वेदितव्या, **वालुकाप्रभानैरयिकाणां द्वे लेश्ये,** तद्यथा–**नीललेश्या च कापोतलेश्या च,** तत्र **ते बहुतरा ये कापोतलेश्याः,** उपरितनप्रस्तटवर्त्तिनां नारकाणां कापोतलेश्याकत्वात् तेषां चातिभूयस्कत्वात्, **ते स्तोकतरा ये नीललेश्याकाः, पङ्कप्रभा**पृथिवीनैरयिकाणा**मेका नीललेश्या,** सा च तृतीयपृथिवीगतनीललेश्याऽपेक्षयाऽविशुद्धतरा, **(१०१) धूमप्रभापृथिवी**नैरयिकाणां **द्वे लेश्ये, तद्यथा-कृष्णलेश्या च नीललेश्या च,** तत्र **ते बहुतरा ये नीललेश्याकाः, ते स्तोकतरा ये कृष्णलेश्याकाः,** भावनाऽत्रापि प्राग्वत्।। ९८-१०१।।

(१०२) तमाए पुच्छा, गोयमा! एक्का किण्हलेस्सा, अधेसत्तमाए एक्का परम-किण्हलेस्सा।।१०२।।

तमःप्रभापृथिवीनैरयिकाणां **कृष्णलेश्या,** सा च पञ्चमपृथिवीगतकृष्णलेश्याऽपेक्षयाऽविशुद्धतरा, **अधःसप्तमपृथिवी**नैरयिकाणा**मेका परमकृष्णलेश्या,** उक्तं च **'व्याख्याप्रज्ञप्तौ'**–

'काऊ दोसु तइयाएँ मीसिया नीलिया चउत्थीए।
पंचमियाए मीसा कण्हा तत्तो परमकण्हा।।१।।' ।। १०२।।

सम्प्रति सम्यग्दृष्टित्वादिविशेषप्रतिपादनार्थमाह–

(१०३) इमीसे णं भंते! रयण० पु० नेरइया किं सम्मदिट्ठी? मिच्छदिट्ठी ? सम्मामिच्छदिट्ठी?, गोयमा! सम्मदिट्ठीवि मिच्छदिट्ठीवि सम्मामिच्छदिट्ठीवि, एवं जाव अहेसत्तमाए।। १०३ ।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त!** किं **सम्यग्दृष्टयो ? मिथ्यादृष्टयः ? सम्यग्मिथ्यादृष्टयो** वा?, भगवानाह– **गौतम! सम्यग्दृष्टयोऽपि मिथ्यादृष्टयोऽपि सम्यग्मिथ्यादृष्टयोऽपि, एवं** पृथिव्यां पृथिव्यां तावद्वाच्यं **यावत्तमस्तमायाम्**।।१०३।। सम्प्रति ज्ञान्यज्ञानिचिन्तां कुर्वन्नाह–

(१०४) इमीसे णं भंते! रयण० पु० णेरतिया किं नाणी अण्णाणी?, गोयमा! णाणीवि अण्णाणीवि, जे णाणी ते णियमा तिणाणी, तंजहा-आभिणिबोधितणाणी सुयणाणी अवधिणाणी। जे अण्णाणी ते अत्थेगतिया दुअण्णाणी अत्थेगइया तिअन्नाणी, जे दुअन्नाणी ते णियमा मतिअन्नाणी य सुयअण्णाणी य, जे तिअन्नाणी ते नियमा मतिअण्णाणी सुयअण्णाणी विभंगणाणीवि, सेसा णं णाणीवि अण्णाणीवि तिण्णि जाव अधेसत्तमाए।। १०४।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! किं ज्ञानिनोऽज्ञानिनः?,** भगवानाह–**गौतम! ज्ञानिनोऽपि अज्ञानिनोऽपि,** सम्यग्दृशां ज्ञानित्वान्मिथ्यादृशामज्ञानित्वात्, तत्र **ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः,** अपर्याप्तावस्थायामपि तेषामवधिज्ञानसम्भवात्, सञ्ज्ञिपञ्चेन्द्रियेभ्यस्तेषामुत्पादात्,

त्रिज्ञानित्वमेव भावयति, **तद्यथा-आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनः, येऽज्ञानिनस्ते 'अत्थेगइया'** इति अस्तीतिनिपातोऽत्र बहुवचनगर्भः सन्त्येकका **द्व्यज्ञानिनः सन्त्येककास्त्र्यज्ञानिनः,** तत्र येऽसञ्ज्ञिपञ्चेन्द्रियेभ्य उत्पद्यन्ते तेषामपर्याप्तावस्थायां विभङ्गासम्भवाद् द्व्यज्ञानिनः, शेषकालं तु तेषामपि त्र्यज्ञानिता, सञ्ज्ञिपञ्चेन्द्रियेभ्य उत्पन्नानां तु सर्वकालमपि त्र्यज्ञानितैव, अपर्याप्तावस्थायामपि तेषां विभङ्गभावात्, तत्र **ये द्व्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनः, ये त्र्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च। 'सक्करप्पभापुढवी'**त्यादि, शर्कराप्रभापृथिवीनैरयिका भदन्त! किं ज्ञानिनोऽज्ञानिनः?, भगवानाह-गौतम! ज्ञानिनोऽप्यज्ञानिनोऽपि, तत्रापि सम्यग्दृशां मिथ्यादृशां च भावात्, तत्र ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, तद्यथा-आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, येऽज्ञानिनस्ते नियमात्त्र्यज्ञानिनः, सञ्ज्ञिपञ्चेन्द्रियेभ्य एव तत्रोत्पादात्, त्र्यज्ञानित्वमेव दर्शय[ती]ति, तद्यथा—मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, एवं शेषास्वपि पृथिवीषु वक्तव्यं, तत्रापि सञ्ज्ञिपञ्चेन्द्रियेभ्य एवोत्पादात्।। १०४ ।। सम्प्रति योगप्रतिपादनार्थमाह—

(१०५) इमीसे णं भंते! रयण० किं मणजोगी ? वइजोगी ? कायजोगी?, तिण्णिवि, एवं जाव अहेसत्तमाए।।१०५।। (१०६) इमीसे णं भंते! रयणप्पभा पु० नेरइया किं सागारोवउत्ता अणागारोवउत्ता?, गोयमा! सागारोवउत्तावि अणागारोवउत्तावि, एवं जाव अहेसत्तमाए पुढवीए।। १०६।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! किं मनोयोगिनो ? वाग्योगिनः ? काययोगिनः?,** भगवानाह—**गौतम! त्रिविधा अपि, एवं** प्रतिपृथिवि तावद् **यावदधःसप्तम्याम्**। अधुना साकारानाकारोपयोगचिन्तां कुर्वन्नाह— **'रयणे'**त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! किं साकारोपयुक्ता ? अनाकारोपयुक्ताः?**, भगवानाह—**साकारोपयुक्ता अपि अनाकारोपयुक्ता अपि, एवं** तावद् **यावदधःसप्तम्याम्**।।१०५-१०६।। अधुना समुद्घातचिन्तां करोति—

---

१. **अत्रापि सूत्र-वृत्त्योः भिन्नता ।। "टीकाकृद्भिः अत्र** सक्करपभापुढवीनेरइया किं नाणी अन्नाणी? गोयमा! नाणी वि अन्नाणी वि जे नाणी ते नियमा तिन्नाणी आभि० सुप. ओहि., जे अन्नाणी ते नियमा तिअन्नाणी मतिअन्नाणी सुअअ. विभंगनाणी, एवं' **इति पाठ इतः प्राक् वाचनान्तरगतोऽनुसृतः।।"**

(१०७) इमीसे णं भंते! रयणप्प० पु० नेरइया ओहिणा केवतियं खेत्तं जाणंति पासंति?, गोयमा! जहण्णेणं अद्धट्ठगाउताइं उक्कोसेणं चत्तारि गाउयाइं। सक्करप्पभाए पु० जह० तिन्नि गाउयाइं उक्को० अद्धट्ठाइं, एवं अद्धद्धगाउयं परिहायति जाव अधेसत्तमाए जह० अद्धगाउयं उक्कोसेणं गाउयं।।१०७ ।। (१०८) इमीसे णं भंते! रयणप्पभाए पुढवीए नेरतियाणं कति समुग्घाता पण्णत्ता?, गोयमा! चत्तारि समुग्घाता पण्णत्ता, तंजहा-वेदणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए वेउव्वियसमुग्घाए, एवं जाव अहेसत्तमाए।। १०८।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! कति समुद्घाताः प्रज्ञप्ताः?**, भगवानाह– **गौतम! चत्वारः समुद्घाताः प्रज्ञप्ताः, तद्यथा-वेदनासमुद्घातः कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घातश्च, एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तम्याम्**।।१०७-१०८।।

सम्प्रति क्षुत्पिपासे चिन्तयति–

(१०९) इमीसे णं भंते! रयणप्पभा० पु० नेरतिया केरिसयं खुहप्पिवासं पच्चणुब्भवमाणा विहरंति?, गोयमा! एगमेगस्स णं रयणप्पभापुढविनेरतियस्स असब्भावपट्ठवणाए सव्वोदधी वा सव्वपोग्गले वा आसगंसि पक्खिवेज्जा णो चेव णं से रयणप्प० पु० णेरतिए तित्ते वा सिता वितण्हे वा सिता, एरिसया णं गोयमा! रयणप्पभाए णेरतिया खुधप्पिवासं पच्चणुब्भवमाणा विहरंति, एवं जाव अधेसत्तमाए।। १०९।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! कीदृशीं क्षुधं पिपासां** [च] **प्रत्यनुभवन्तः** प्रत्येकं वेदयमानाः **'विहरन्ति'** अवतिष्ठन्ति?, भगवानाह–**गौतम! 'एगमेगस्स ण'**मित्यादि, **एकैकस्य रत्नप्रभापृथिवीनैरयिकस्य 'असद्भाव[प्र]स्थापनया'** असद्भावकल्पनया ये केचन पुद्गला उदधयश्चेति शेषः तान् **'आस्यके'** मुखे **सर्वपुद्गलान् सर्वोदधीन् प्रक्षिपेत्,** तथाऽपि **'नो चेव ण'**मित्यादि, **नैव रत्नप्रभापृथिवीनैरयिकः तृप्तो वा वितृष्णो वा स्यात्** लेशतः, अत्र प्रबलभस्मकव्याध्युपेतः पुरुषो दृष्टान्तः। **'एरिसिया ण'**मित्यादि, **ईदृशी ण**मिति वाक्यालङ्कृतौ

गौतम! रत्नप्रभापृथिवीनैरयिकाः क्षुधं पिपासां प्रत्यनुभवन्तो विहरन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी**।। १०९ ।। सम्प्रति वैक्रियशक्तिं विचिचिन्तयिषुरिदमाह–

(११०) इमीसे णं भंते! रयणप्पभाए पु० नेरतिया किं एकत्तं पभू विउव्वित्तए ? पुहुत्तंपि पभू विउव्वित्तए?, गोयमा! एगत्तंपि पभू विउव्वित्तए, पुहुत्तंपि पभू विउव्वित्तए, एगत्तं विउव्वेमाणा एगं महं मोग्गररूवं वा मुसुंढिरूवं वा, एवं

मोग्गर-मुसुंढि-[1]करकत्त-असि-सत्ती-हल-गता-मुसल-चक्का ।
णाराय-कुंत-तोमर-सूल-लउड-भिंडमाला य ।।

जाव भिंडमालरूवं वा पुहुत्तं विउव्वेमाणा मोग्गररूवाणि वा जाव भिंडमालरूवाणि वा ताइं संखेज्जाइं णो असंखेज्जाइं संबद्धाइं नो असंबद्धाइं सरिसाइं नो असरिसाइं विउव्वंति, विउव्वित्ता अण्णमण्णस्स कायं अभिहणमाणा अभिहणमाणा वेदणं उदीरेंति उज्जलं विउलं पगाढं कक्कसं कडुयं फरुसं निट्ठुरं चंडं तिव्वं दुक्खं दुग्गं दुरहियासं, एवं जाव धूमप्पभाए पुढवीए।। ११०।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिका** भदन्त! प्रत्येकं **किम् 'एकत्वम्'** एकं रूपं **विकुर्वितुं प्रभवः** उत **'पृथक्त्वं'** पृथक्त्वशब्दो बहुवाची, आह च **"कर्म्मप्रकृतिसङ्ग्रहणि-चूर्णिकारोऽपि-" "पुहुत्तशब्दो बहुत्तवाई"** [ ] इति, **प्रभूतानि** रूपाणि **विकुर्वितुं प्रभवः**?, **"विकुर्व विक्रियायाम्"** [ ] इत्यागमप्रसिद्धो धातुरस्ति यस्य विकुर्वाण इति प्रयोगस्ततो विकुर्वितुमित्युक्तं, भगवानाह–**एकत्वमपि प्रभवो विकुर्वितुं पृथक्त्वमपि प्रभवो विकुर्वितुं,** तत्रैकं **रूपं विकुर्वतो मुद्गररूपं वा** मुद्गरः–प्रतीतः **मुषण्ढिरूपं वा** मुषण्ढिः–प्रहरणविशेषः, **करपत्र**रूपं वा **असि**रूपं वा **शक्ति**रूपं वा **हल**रूपं वा **गदा**रूपं वा **मुशल**रूपं वा **चक्र**रूपं वा **नाराच**रूपं वा **कुन्त**रूपं वा **तोमर**रूपं वा **शूल**रूपं वा **लकुट**रूपं वा **भिण्डमाल**रूपं वा विकुर्वन्ति, करपत्रादयः प्रतीताः, भिण्डमालः–शस्त्रजातिविशेषः, अत्र **सङ्ग्रहणिगाथा** क्वचित्पुस्तकेषु–

---

१. SP । करवत्त-**म.** ।। करवत L।।

"मुग्गर-मुसुंढि-करकय-असि-सत्ति हलं गया-मुसल-चक्का।
नाराय-कुंत-तोमर-सूल-लउड-भिंडिमाला य।।१।।" [ ]

गतार्था, नवरं '**करकय**'त्ति क्रकचं करपत्रमित्यर्थः, **पृथक्त्वं विकुर्वन्तो मुद्गररूपाणि वा यावत् भिण्डमालरूपाणि वा, तान्यपि सदृशानि,** [समानरूपाणि] '**नोऽसदृशानि**' [अ]समानरूपाणि, तथा '**सङ्ख्येयानि**' परिमितानि **न** '**असङ्ख्येयानि**' सङ्ख्यातीतानि, विसदृशकरणेऽसङ्ख्येयकरणे वा शक्त्यभावात्, तथा '**सम्बद्धानि**' स्वात्मनः शरीरसंलग्नानि '**नासम्बद्धानि**' न स्वशरीरात्पृथग्भूतानि, स्वशरीरात्पृथग्भूतकरणे शक्त्यभावात्, **विकुर्वन्ति, विकुर्वित्वाऽन्योऽन्यस्य कायमभिघ्नन्तो वेदनामुदीरयन्ति,** किंविशिष्टामित्याह–'**उज्ज्वलां**' दुःखरूपतया जाज्वल्यमानां सुखलेशेनाप्यकलङ्कितामिति भावः, '**विपुलां**' सकलशरीरव्यापितया विस्तीर्णां '**प्रगाढां**' प्रकर्षेण मर्मप्रदेशव्यापितयाऽतीवसमवगाढां, कर्कशामिव **कर्कशां,** किमुक्तं भवति? यथा कर्कशः पाषाणसङ्घर्षः शरीरस्य खण्डानि त्रोटयति एवमात्मप्रदेशान् त्रोटयन्तीव या वेदनोपजायते सा कर्कशा तां, कटुकामिव **कटुकां** पित्तप्रकोपपरिकलितवपुषो रोहिणीं–कटुद्रव्यमिवोपभुज्यमानमतिशयेनाप्रीतिजनिकामिति भावः, तथा '**परुषां**' मनसोऽतीव रौक्ष्यजनिकां '**निष्ठुराम्**' अशक्यप्रतीकारतया दुर्भेदां '**चण्डां**' रुद्रां रौद्राध्यवसायहेतुत्वात् '**तीव्राम्**' अतिशायिनीं '**दुःखां**' दुःखरूपां '**दुर्गां**' दुर्ल्लङ्घ्यामत एव **दुरधिसह्याम्, एवं** पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावत्पञ्चम्याम्** ।। ११०।।

(१११) छट्ठ-सत्तमासु णं पुढवीसु नेरइया बहू[1] महंताइं लोहियकुंथुरूवाइं वइरामयतुंडाइं गोमयकीडसमाणाइं विउव्वंति, विउव्वित्ता अन्नमन्नस्स कायं समतुरंगेमाणा २ खायमाणा खायमाणा सयपोरागकिमिया विव चालेमाणा[2] २ अंतो अंतो अणुप्पविसमाणा २ वेदणं उदीरंति उज्जलं जाव दुरहियासं ।।१११।।

'**छट्ठसत्तमीसु ण**'मित्यादि, **षष्ठसप्तम्योः** पुनः **पृथिव्योर्नैरयिकाः बहूनि महान्ति** गोमयकीटप्रमाणत्वात्, '**लोहितकुन्थुरूपाणि**' आरक्तकुन्थुरूपाणि **वज्रमयतुण्डानि, गोमयकीटसमानानि विकुर्वन्ति, विकुर्वित्वा** '**अन्योऽन्यस्य**' परस्परस्य '**कायं**' शरीरं समतुरङ्गा इवाचरन्तः **समतुरङ्गायमाणाः,** अश्वा इवान्योऽन्यमारुहन्त इत्यर्थः, '**खायमाणा खायमाणा**' भक्षयन्तो

१. पभू P **क ख** । पहू - **ट** ।।। २. दालेमाणा २ SP **क ख ग** ।।

भक्षयन्तोऽन्तरन्तः **'अनुप्रवेशयन्तः' अनुप्रविशन्तः 'सयपोरागकिमिया इव'** शतपर्वकृमय इव इक्षुपर्वकृमय इव **'चालेमाणा चालेमाणा'** शरीरस्य मध्यभागेन सञ्चरन्तः सञ्चरन्तो **वेदनामुदीरयन्त्युज्ज्वला**मित्यादि प्राग्वत्।।१११।। सम्प्रति क्षेत्रस्वभावजां वेदनां प्रतिपादयति–

(११२) इमीसे णं भंते! रयणप्प० पु० नेरइया किं सीतवेदणं वेदेंति ? उसिणवेदणं वेदंति ? सीओसिणवेदणं वेदेंति?, गोयमा! णो सीयं वेदणं वेदेंति, उसिणं वेदणं वेदेंति, नो सीतोसिणं [वेदणं वेदेंति,] एवं जाव वालुयप्पभाए।।११२।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! किं शीतां वेदनां वेदयन्ते ? उष्णां वेदनां वेदयन्ते ? शीतोष्णां वा?,** भगवानाह–**गौतम! न शीतां वेदनां वेदयन्ते** किन्तु **उष्णां वेदनां वेदयन्ते,** ते हि शीतयोनिका योनिस्थानानां केवलहिमानीप्रख्यशीतप्रदेशात्मकत्वात्, योनिस्थानव्यतिरेकेण चान्यत् सर्वमपि भूम्यादि खादिराङ्गारादपि महाप्रतप्तमतस्ते उष्णवेदनामनुभवन्ति, **नापि शीतोष्णां वेदनां वेदयन्ते,** शीतोष्णस्वभावतया वेदनाया नरकेषु मूलतोऽप्यसम्भवात्, **एवं** शर्कराप्रभा-**वालुकाप्रभा**नैरयिका अपि वक्तव्याः।। ११२ ।।

(११३) पंकप्पभाए पुच्छा, गोयमा! सीयंपि वेदणं वेदेंति, उसिणंपि वेयणं वेदेंति, नो सीओसिणवेयणं वेदेंति, ते बहुतरगा जे उसिणं वेदणं वेदेंति, ते थोवतरगा जे सीतं वेदणं वेदेंति।।११३।। (११४) धूमप्पभाए पुच्छा, गोयमा! सीतंपि वेदणं वेदेंति, उसिणंपि वेदणं वेदेंति, णो सीतो०, ते बहुतरगा जे सीतवेदणं वेदेंति, ते थोवतरका जे उसिणवेदणं वेदेंति।।११४।। (११५) तमाए पुच्छा, गोयमा! सीयं वेदणं वेदेंति नो उसिणं वेदणं वेदेंति नो सीतोसिणं वेदणं वेदेंति, एवं अहेसत्तमाए णवरं परमसीयं।।११५।।

पङ्कप्रभापृथिवीनैरयिक**पृच्छायाम्** भगवानाह–**गौतम! शीतामपि वेदनां वेदयन्ते** नरकावासभेदे**नोष्णामपि वेदनां वेदयन्ते** नरकावासभेदेनैव, **न** तु **शीतोष्णां,** तत्र **ते बहुतरा ये उष्णां वेदनां वेदयन्ते,** प्रभूततराणां शीतयोनित्वात्, **ते स्तोकतरा ये शीतां वेदनां वेदयन्ते,**

अल्पतराणामुष्णयोनित्वात् । एवं **धूमप्रभा**यामपि वक्तव्यं, नवरं **ते बहुतरा ये शीतवेदनां वेदयन्ते,** बहूनामुष्णयोनित्वात्, **ते स्तोकतरा ये उष्णवेदनां वेदयन्ते,** अल्पतराणां शीतयोनित्वात्। **तमःप्रभा**पृथिवीनैरयिक**पृच्छायां** भगवानाह–**गौतम! शीतां वेदनां वेदयन्ते नोष्णां नापि शीतोष्णां,** तत्रत्यानां सर्वेषामुष्णयोनित्वात्, योनिस्थानव्यतिरेकेण चान्यस्य सर्वस्यापि नरकभूम्यादेर्महाहिमानीप्रख्यत्वात्, **एवं तमस्तमाप्रभा**पृथिवीनैरयिका अपि वक्तव्याः, **नवरं परमां शीत**वेदनां वेदयन्ते इति वक्तव्यं, तमःप्रभापृथिवीतः तमस्तमप्रभापृथिव्यां शीतवेदनाया अतिप्रबलत्वात्।। ११३-११५।। सम्प्रति भवानुभवप्रतिपादनार्थमाह–

(११६) इमीसे णं भंते! रयणप्प० पु० णेरइया केरिसयं णिरयभवं पच्चणुभवमाणा विहरंति?, गोयमा! ते णं तत्थ णिच्चं भीता णिच्चं छुहिया णिच्चं तसिता णिच्चं उव्विग्गा निच्चं उपप्पुआ निच्चं परममसुभमउलमणुबद्धं निरयभवं पच्चणुभवमाणा विहरंति, एवं जाव अधेसत्तमाए ।। ११६ ।।

'रयणे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! कीदृशं नरकभवं प्रत्यनुभवन्तः** प्रत्येकं वेदयमानाः **'विहरन्ति'** अवतष्ठिन्ते?, भगवानाह–**गौतम!** रत्नप्रभापृथिवीनैरयिका **'नित्यं'** सर्वकालं क्षेत्रस्वभावजमहानिबिडान्धकारदर्शनतो **भीताः,** सर्वत उपजातशङ्कत्वात्, तथा **'नित्यं'** सर्वकालं स्वत एवाग्रेऽपि **'त्रस्ताः'** परमाधार्मिकदेवपरस्परोदीरितदुःखसम्पातभयात्त्रासमुपपन्नाः, तथा **'नित्यं'** सर्वकालं परमाधार्मिकैः परस्परं वा **'त्रासिताः'** त्रासं ग्राहिताः, तथा **'नित्यमुद्विग्नाः'** यथोक्तरूपदुःखानुभवतस्तद्गतावासपराङ्मुखचित्ताः, तथा **'नित्यं'** सर्वकालम् **'उपप्लुताः'** उपप्लवेनोपेता न तु मनागपि रतिमासादयन्ति, एवं **'नित्यं'** सर्वकालं **परममशुभम्** '**अतुलम्**' अशुभत्वेनानन्यसदृशम् '**अनुबद्धम्**' अशुभत्वेन निरन्तरमुपचितं **निरयभवं** '**प्रत्यनुभवन्तः**' प्रत्येकं वेदयमाना **विहरन्ति, एवं** पृथिव्यां पृथिव्यां तावद्वक्तव्यं **यावदधःसप्तमी**।। ११६।। अस्यां चाधःसप्तम्यां क्रूरकर्माणः पुरुषा उत्पद्यन्ते नान्ये, तथा चास्यैवार्थस्य प्रदर्शनार्थं पञ्च पुरुषान् उपन्यस्यति–

(११७) अहेसत्तमाए णं पुढवीए पंच अणुत्तरा महतिमहालया महाणरगा पण्णत्ता, तंजहा-काले महाकाले रोरुए महारोरुए अप्पतिट्ठाणे । तत्थ इमे पंच महापुरिसा

अणुत्तरेहिं दंडसमादाणेहिं कालमासे कालं किच्चा अप्पतिट्ठाणे णरए[१] णेरतियत्ताए उववण्णा, तंजहा-रामे जमदग्गिसुते[२] १, दढाऊ[३] लच्छतिपुत्ते २, वसू उवरिचरे ३, सुभूमे कोरव्वे ४, बंभदत्ते चुलणिसुते ५, → तें[४] णं तत्थ नेरतिया जाया काला कालो० जाव परमकिण्हा वण्णेणं पण्णत्ता, ← ते णं तत्थ वेदणं वेदेंति उज्जलं विउलं जाव[५] दुरहियासं।।११७।।

'अहेसत्तमाए ण'मित्यादि, **अधःसप्तम्यां पृथिव्यामप्रतिष्ठाने नरके 'इमे'** अनन्तरं वक्ष्यमाणस्वरूपाः **पञ्च महापुरुषाः 'अनुत्तरैः'** सर्वोत्तमप्रकर्षप्राप्तैः **'दण्डसमादानैः'** समादीयते कर्म्म एभिरिति समादानानि-कर्म्मोपादानहेतवः दण्डा एव-मनोदण्डादयः प्राणव्यपरोपणाध्यवसायरूपाः समादानानि दण्डसमादानानि तैः **कालमासे कालं कृत्वोत्पन्नाः, तद्यथा-रामो जामदग्निसुतः** पर्शुराम इत्यर्थः, **दाढादालः छातीसुतः, वसू** राजा **उपरिचरः,** स हि देवताऽधिष्ठिताकाशस्फटिकसिंहासनोपविष्टः सन्नाकाशस्फटिकमयस्य सिंहासनस्यादर्शनतो लोकेष्वेवं प्रसिद्धिमगमत्-सत्यवादी किलैष वसुराजा न प्राणात्ययेऽप्यलीकं भाषते, ततः सत्त्वाऽऽवर्जितदेवताकृतप्रातिहार्य एवमुपर्याकाशे चरतीति, स चान्यदा हिंस्रवेदार्थप्ररूपकस्य 'पर्वतस्य' पक्षमभिगृह्य सम्यग्दृष्टेर्नारदस्य पक्षमनभिगृह्णन्नलीकवादित्वात्प्रकुपितदेवताचपेटाहतः सिंहासनात्परिभ्रष्टो रौद्रध्यानमभिरूढः सप्तमपृथिव्यामप्रतिष्ठाननरकमयासीत्, **सुभूमो**ऽष्टमश्चक्रवर्त्ती **कौरव्यः** कौरव्यगोत्रो **ब्रह्मदत्तश्चुलनीसुतः, 'ते णं तत्थ वेयणं वेयंती'**त्यादि, **'ते'** परशुरामादयस्**तत्र**-अप्रतिष्ठाने नरके **वेदनां वेदयन्ते उज्ज्वलां यावद् दुरध्यासामिति** प्राग्वत्।। ११७ ।। सम्प्रति नरकेषूष्णवेदनायाः स्वरूपमभिधित्सुराह-

(११८-A) उसिणवेदणिज्जेसु णं भंते! णरएसु णेरतिया केरिसयं उसिणवेदणं पच्चणुब्भवमाणा विहरंति?, गोयमा! से जहाणामए कम्मारदारए सिता[६] तरुणे

१. ०ए महानेरईयत्ताए - **ता** ।। २. जे. । जमदग्गिपुत्ते -मु.L ।। ३. **कमु.** । दाढाऊलेच्छतिपुत्ते - मु.L । दढजो लेच्छईपुत्ते-**जे** । **स्तबके दाढादाल छातीसुत अपरनाम दत्त लक्ष्मीनो पुत्र इति विद्यते वृत्तिस्तबकयोराधारेण** दाढादाले छातीसुते **तथा स्तबकनिर्दिष्टविकल्पानुसारेण दत्ते लच्छीपुत्ते इति पाठो निष्पाद्यते इति** L **पृ. २७२ टि.९** ।। ४. **क ख ट मु.** । →← **चिह्नद्वयमध्यवर्तिपाठः** L **संस्करणे नास्ति** ।। ५. द्र. ३/११० सू.।। ६. तुला-**राजप्र. सू. ७५९।।**

बलवं जुगवं अप्पायंके थिरग्गहत्थे दढपाणि-पाद-पास-पिट्ठंतरोरुपरिणए[१] लंघण[२]-पवण-जवण-वग्गण-पमद्दणसमत्थे तलजमलजुयलबाहू[३] घणणिचितवलियवट्टखंधे ।। ११८-A ।।

'उसिणवेदणिज्जेसु णं भंते!' इत्यादि, **उष्णवेदनेषु ण**मिति पूर्ववत् **भदन्त! नरकेषु नैरयिकाः कीदृशीमुष्णवेदनां प्रत्यनुभवन्तः**-प्रत्येकं वेदयमाना **विहरन्ति?,** भगवानाह-**गौतम! स 'यथानामकः'** अनिर्दिष्टनामकः कश्चित् **'कर्म्मारदारकः'** लोहकारदारकः **स्यात्,** किंविशिष्टः? इत्याह-**'तरुणः'** प्रवर्द्धमानवयाः, आह-दारकः प्रवर्द्धमानवया एव भवति ततः किमनेन विशेषणेन?, न, आसन्नमृत्योः प्रवर्द्धमानवयस्त्वाभावात्, न ह्यासन्नमृत्युः प्रवर्द्धमानवया भवति, न च तस्य विशिष्टसामर्थ्यसम्भवः, आसन्नमृत्युत्वादेव, विशिष्टसामर्थ्यप्रतिपादनार्थश्चैष आरम्भस्ततोऽर्थवद्विशेषणम्, अन्ये तु व्याचक्षते-इह यद्द्रव्यं विशिष्टवर्णादिगुणोपेतमभिनवं च तत्तरुणमिति लोके प्रसिद्धं, यथा तरुणमिदमश्वत्थपत्रमिति, ततः स कर्मारदारकस्तरुण इति किमुक्तं भवति? अभिनवो विशिष्टवर्णादिगुणोपेतश्चेति, बलं-सामर्थ्यं तदस्यास्तीति **बलवान्,** तथा युगं-सुषमदुष्षमादिकालः स स्वेन रूपेण यस्यास्ति, न दोषदुष्टः स **युगवान्,** किमुक्तं भवति? कालोपद्रवोऽपि सामर्थ्यविघ्नहेतुः स चास्य नास्तीति प्रतिपत्त्यर्थमेतद्विशेषणं, युवा-यौवनस्थः, युवावस्थायां हि बलातिशय इत्येतदुपादानम्, **'अप्पायंके'** इति अल्पशब्दोऽभाववाची, अल्पः-सर्वथाऽविद्यमान आतङ्को-ज्वरादिर्यस्यासावल्पातङ्कः, **'थिरग्गहत्थे'** स्थिरौ अग्रहस्तौ यस्य स स्थिराग्रहस्तः, **'दढपाणि-पाय-पास-पिट्ठंतरोरुपरिणए'** इति दृढानि-अतिनिबिडचयापन्नानि पाणि-पाद-पार्श्व-पृष्ठान्तरोरूणि परिणतानि यस्य स दृढपाणिपादपार्श्वपृष्ठान्तरोरुपरिणतः, सुखादिदर्शनात्पाक्षिको निष्ठान्तस्य परनिपातः, तथा घनम्-अतिशयेन निचितौ-निबिडतरचयमापन्नौ वलिताविव वलितौ वृत्तौ स्कन्धौ यस्य स **घननिचितवलितवृत्तस्कन्धः,** ।। ११८-A ।।

(११८-B)चम्मेट्ठग-दुघण-मुट्ठिय-समाहयणिचितगायगत्ते उरस्सबलसमण्णागए छेए दक्खे पट्ठे[४] कुसले णिउणे मेहावी णिउणसिप्पोवगए एगं महं अयपिंडं उदगवा[५]-

---

१. जे.L । ० रुसंघायपरिएण - SP **क ख ग घ।। २. अतोऽग्रे आदर्शेषु पाठस्य क्रमभेदः शब्दभेदश्च दृश्यते, वृत्तावपि क्रमभेदादि वर्तते ।। ३. L जे.।** ०ल फलिहणिभबाहू **- मु. राजप्र. सू. ७५९।। ४.** पत्तट्ठे **- अणु० ४१६, राय०सू.१२-इति** L **पृ.२७३ टि. ४।। ५.** L । वारस० **मु. कखगट ०वारास०जे।।**

रगसमाणं गहाय तं ताविय ताविय कोट्टित[१] कोट्टित जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं अद्धमासं[२] संहणेज्जा, से णं तं सीतं सीतीभूतं अओमएणं संडासएणं गहाय असब्भावं[३] पट्ठवणाए उसिणवेदणिज्जेसु णरएसु पक्खिवेज्जा, से णं तं उम्मिसियणिमिसियंतरेणं पुणरवि पच्चुद्धरिस्सामित्तिकट्टु पविरायमेव पासेज्जा पविलीणमेव पासेज्जा पविद्धत्थमेव पासेज्जा णो चेव णं संचाएति अविरायं वा अविलीणं वा अविद्धत्थं वा पुणरवि पच्चुद्धरित्तए।११८-B।

'चम्मेट्ठगदुघणमुट्ठियसमाहयनिचियगायगत्ते' चर्मेष्टकेन द्रुघणेन मुष्टिकया च-मुष्ट्या च समाहत्य ये निचितीकृतगात्रास्ते चर्मेष्टकद्रुघणमुष्टिकसमाहतनिचितगात्रास्तेषामिव गात्रं यस्य स चर्मेष्टकद्रुघणमुष्टिक-समाहतनिचितगात्रगात्रः, **'उरस्सबलसमन्नागए'** इति उरसि भवमुरस्यं तच्च तद्बलं च उरस्यबलं तच्च समन्वागतः-समनुप्राप्त उरस्यबलसमन्वागतः, आन्तरोत्साहवीर्ययुक्त इति भावः, **'तलजमलजुयल-बाहू'** इति, तलौ-तालवृक्षौ तयोर्यमलयुगलं-समश्रेणीकं युगलं तलयमलयुगलं, तद्वदतिसरलौ पीवरौ च बाहू यस्य स तलयमलयुगलबाहुः, **'लंघणपवणजवणपमद्दणसमत्थे'** इति, लङ्घने-अतिक्रमणे प्लवने मनाक् पृथुतरविक्रमगतिगमने जवने-अतिशीघ्रगतौ प्रमर्दने-कठिनस्यापि वस्तुनश्चूर्णनकरणे समर्थः लङ्घनप्लवनजवनप्रमर्दनसमर्थः, क्वचित् **'लंघणपवणजवणवायामणसमत्थे'** इति पाठस्तत्र व्यायामने व्यायामकरणे इति व्याख्येयं, **'छेकः'** द्वासप्ततिकलापण्डितः, **'दक्षः'** कार्याणामविलम्बितकारी, **'प्रष्ठः'** वाग्मी **'कुशलः'** सम्यक्क्रियापरिज्ञानवान्, **'मेधावी'** परस्पराव्याहतपूर्वापरानुसन्धानदक्षः, अत एव **'निपुणसिप्पोवगए'** इति निपुणं यथा भवति एवं शिल्पक्रियासु कौशलमुपगतः-प्राप्तो निपुणशिल्पोपगतः, **एकं महान्तमयस्पिण्डम्** **'उदकवारकसमानं'** लघुपानीयघटसमानं **गृहीत्वा 'तम्'** अयस्पिण्डं **तापयित्वा तापयित्वा** ततो घनेन **कुट्टयित्वा कुट्टयित्वा यावदेकाहं वा द्व्यहं वा** याव**दुत्कर्षतोऽर्द्धमासं संहन्यात्,** ततो **ण**मिति वाक्यालङ्कारे **'तम्'** अयस्पिण्डं **शीतं**, स च शीतो बहिर्मनाग्मात्रेणापि स्यादत आह-**'शीतीभूतं'** सर्वात्मना शीतत्वेन परिणतं **अयोमयेन संदंशकेन गृहीत्वा 'असद्भावस्थापनया'** असद्भावकल्पनया नैतदभूत् न भवति भविष्यति वा केवलमसद्भूतमिदं

---

१. **जे.**L। कोट्टिय उब्भिंदिय उब्भिंदिय चुण्णिय चुण्णिय-जाव - **कखगटमु.**।। २. **साहणेज्जा** - Lमु.। **साहण्णेज्जा** - **क** ।। ३. ०वणय० SP **ख** । ०वणाप०**क**।।

कल्प्यत इति, **उष्णवेदनेषु नरकेषु प्रक्षिपेत्,** प्रक्षिप्य च **स** पुरुषो **ण**मिति वाक्यालङ्कारे **'उम्मिसिय-निमिसियंतरेणं'** उन्मिषितनिमिषितान्तरेण यावताऽन्तरेण-यावता व्यवधानेन उन्मेषनिमेषौ क्रियेते तावदन्तरप्रमाणेन कालेनातिक्रान्तेन **पुनरपि प्रत्युद्धरिष्यामीतिकृत्वा** यावद् द्रष्टुं प्रवर्त्तते तावत् **'प्रवितरमेव'** प्रस्फुटितमेव, यदि वा **'प्रविलीनमेव'** नवनीतमिव सर्वथा गलितमेव, यदि वा **'प्रविध्वस्तमेव'** सर्वथा भस्मसाद्भूतमेव **पश्येत्, न** पुनः **शक्नुयाद्** अचिरात्तम् **अप्रस्फुटितं अविलीनं वा अविध्वस्तं वा पुनरपि प्रत्युद्धर्त्तुम्,** एवंरूपा नाम तत्रोष्णवेदना।। ११८-B।।

अस्यैवार्थस्य स्पष्टतरभावनार्थं दृष्टान्तान्तरमाह-

(११८-C) से जहा वा मत्तमातंगे दुपाए कुंजरे सट्ठिहायणे पढमसरय-कालसमयंसि वा चरमनिदाघकालसमयंसि वा उण्हाभिहए तण्हाभिहए दवग्गिजाला-भिहए आउरे सुसिए[१] पिवासिए दुब्बले किलंते एक्कं महं पुक्खरिणिं पासेज्जा चाउक्कोणं समतीरं अणुपुव्वसुजायवप्पगंभीरसीतलजलं ।।११८-C।।

'से जहानामए'[२] इत्यादि, **'से'** सकलजनप्रसिद्धो **यथे**ति दृष्टान्तत्वोपदर्शने **वा**शब्दो विकल्पने, अयं वा दृष्टान्तो विवक्षितार्थप्रतिपत्तये बोद्धव्य इति विकल्पनभावना, **'मत्तः'** मदकलितः **'मातङ्गः'** हस्ती, इह मातङ्गोऽन्त्यजोऽपि सम्भवति ततस्तदाशङ्काव्युदासार्थं नानादेशजविनेयजनानुग्रहाय (वा) पर्यायद्वयमाह-**'द्विपः'** द्वाभ्यां मुखेन करेण चेत्यर्थः पिबतीति द्विपः, **"मूलविभुजादय"**[ ] इति कप्रत्ययः, कौ जीर्यतीति **कुञ्जरः**, यदिवा कुञ्जे-वनगहने रमति-रतिमाबध्नातीति कुञ्जरः, **'क्वचिदि'**[ ]ति डप्रत्ययः, षष्टिर्हायनाः-संवत्सरा यस्य स **षष्टिहायनः 'प्रथमशरत्कालसमये'** कार्त्तिकमाससमये, इह प्राय ऋतवः सूर्यर्त्तवो गृह्यन्ते ते चाषाढादयो द्विद्विमासप्रमाणाः, प्रवचने च क्रमेणैवंनामानः, तद्यथा--प्रथमः प्रावृट् द्वितीयो वर्षारात्रः तृतीयः शरत् चतुर्थो हेमन्तः पञ्चमो वसन्तः षष्ठो ग्रीष्मः, तथा चाह **'पादलिप्तसूरि':-**

"पाउस वासारत्तो, सरओ हेमंत वसन्त गिम्हो य।
एए खलु छप्पि रिऊ, जिणवरदिट्ठा मए सिट्ठा।।१।।" [ज्योतिष्करण्ड० गा. २६५]

ततः प्रथमशरत्कालसमयः कार्त्तिकसमय इति विवृतम्, आह च **मूलटीकाकृत्-"प्रथमशरत्-कार्त्तिकमासः"**

---

१. झुज्झिते-**जे.** ।। २. **अत्र सूत्र-वृत्त्योर्भेदः** ।।

[ ] तस्मिन्, वाशब्दो विकल्पने, **'चरमनिदाघकालसमये वा'** चरमनिदाघकालसमयो-ज्येष्ठमासपर्यन्तस्तस्मिन्, वाशब्दो विकल्पने, **'उष्णाभिहतः'** सूर्यखरकिरणप्रतापाभिभूतः, अत एवोष्णैः सूर्यकिरणैः सर्वतः प्रतप्ताङ्गतया शोषभावतस्तृ**षाभिहतः**, तत्रापि पानीयगवेषणार्थमितस्ततः स्वेच्छया परिभ्रमतः कथञ्चिद्दवाग्निप्रत्यासत्तौ गमनतो **दवाग्निज्वालाभिहतः**, अत एव **'आतुरः'** क्वचिदपि स्वास्थ्यमलभमानः सन् आकुलः, सर्वाङ्गपरितापसम्भवेन गलतालुशोषभावात् **शुषितः**, क्वचित् 'झिज्जिए' इति पाठस्तत्र 'क्षितः' क्षीणशरीर इति व्याख्येयम्, असाधारणतृड्वेदनासमुच्छलना**त्पिपासितः**, अत एव **दुर्बलः** शारीरमानसावष्टम्भरहितत्वात्, **'क्लान्तः'** ग्लानिमुपगतः **'क्लमू ग्लानौ'** [है.धा.१२३७] इति वचनात्, **एकां महतीं 'पुष्करिणीं'** पुष्कराण्यस्यां विद्यन्ते इति पुष्करिणी तां, किंविशिष्टामित्याह-**'चतुष्कोणां'** चत्वारः कोणा-अश्रयो यस्याः सा तथा तां, समं-विषमोन्नतिवर्जितं सुखावतारं तीरं-तटं यस्याः सा **समतीरा** ताम्, आनुपूर्व्येण-नीचैर्नीचैस्तरभावरूपेण न त्वेकहेलयैव क्वचिद्गर्त्तारूपा क्वचिदुन्नतिरूपा इति भावः, सुष्ठु-अतिशयेन यो जातो वप्रः-केदारो जलस्थानं तत्र गम्भीरम्-अलब्धस्ताघं शीतलं जलं यस्यां सा **आनुपूर्व्यसुजातवप्रगम्भीरशीतलजला** ताम् ।। **११८-C**।।

(११८-D) संछण्णपउमपत्तभिसमुणालं[1] बहुउप्पल-कुमुद-णलिण-सुभग-सोगंधिय-पुंडरीय-[महापुंडरीय]-सयपत्त-सहस्सपत्त-केसरफुल्लोवचियं छप्पयपरि-भुज्जमाणकमलं अच्छविमलसलिलपुण्णं[2] परिहत्थभमंतमच्छकच्छभं अणेगसउण-गणमिहुणय-विचरियसद्दुन्नइयमहुरसरनाइयं तं पासइ, तं पासित्ता तं ओगाहइ, ओगाहित्ता से णं तत्थ उण्हंपि पविणेज्जा तिण्हंपि पविणेज्जा खुहंपि पविणिज्जा जरंपि पवि० दाहंपि पवि० णिद्दाएज्ज वा पयलाएज्ज वा सतिं वा रतिं वा धितिं वा मतिं वा उवलभेज्जा, सीए सीयभूए संकसमाणे संकसमाणे सायासोक्खबहुले यावि विहरिज्जा,।।११८-D।।

---

१. संछण्णपमत्त - मु.। संछण्णपउमपत्त० SP **क ख ग ट ता।** **'सर्वेष्वपि आदर्शेषु** पउम **इति पदं विद्यते, किन्तु मलयगिरिवृत्तौ नास्ति व्याख्यातमिदम्।नायाधम्मकहाओ(१३/३७)तथा रायपसेणइय(सू.१७४) सूत्रेऽपि नैतत्पदम् उपलभ्यते' इति** L **पृ, २७३ टि.१२** ।। २. ०लपच्छपुण्णं-SP **क ख।** ०पच्छसलीलपुण्णं-ता.।।

'संछण्णपत्तभिसमुणाल' मिति संछन्नानि-जलेनान्तरितानि पत्र-बिस-मृणालानि यस्यां सा संछन्नपत्रबिसमृणाला ताम्, इह बिसमृणालसाहचर्यात् पत्राणि-पद्मिनीपत्राणि द्रष्टव्यानि, बिसानि-कन्दाः मृणालानि-पद्मनालाः, तथा बहुभिरुत्पल-कुमुद-नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापुण्डरीक-शतपत्र-सहस्रपत्रैः केसरैः-केसरप्रधानैः फुल्लैः-विकसितैरुपचिता **बहूत्पल-कुमुद-नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापुण्डरीक-शतपत्र-सहस्र-पत्रकेसरफुल्लोपचिता** तां, तथा षट्पदैः-भ्रमरैः परिभुज्यमानानि कमलानि, उपलक्षणमेतत् कुमुदादीनि यस्याः सा **षट्पदपरिभुज्यमानकमला** तां, तथाऽच्छेन-स्वरूपतः स्फटिकवच्छुद्धेन विमलेन-आगन्तुकमलरहितेन सलिलेन पूर्णा **अच्छविमल-सलिलपूर्णा** तां, तथा पडिहत्था-अतिरेकता (तः) अतिप्रभूता इत्यर्थः भ्रमन्तो मत्स्य-कच्छपा यस्यां सा **पडिहत्थभ्रमन्मत्स्य-कच्छपा,** तथा अनेकैः शकुनिगणमिथुनकैः, गणशब्दस्य प्राकृतत्वादस्थानेऽप्यु-पनिपातः, शकुनिमिथुनकैर्विचरितैः-इतस्ततः स्वेच्छया प्रवृत्तैः शब्दोन्नतिकम्-उन्नतशब्दं मधुरस्वरं नादितं यस्यां सा **अनेकशकुनिगणमिथुनकविचरित-शब्दोन्नतिकमधुरस्वरनादिता,** ततः पूर्वपदेन विशेषणसमासः, **तां दृष्ट्वाऽवगाहेत, अवगाह्य** च **'उष्णमपि'** परिदाहमपि शरीरस्य तत्र **'प्रविनयेत्'** प्रकर्षेण सर्वात्मना स्फोटयेत्, तथा **क्षुधामपि प्रविनयेत्** प्रत्यासन्नतटवर्त्तिशल्लक्यादिकिसलयभक्षणात्, **तृषमपि प्रविनयेत्** जलपानात्, **ज्वरमपि** परिसन्तापसमुत्थं **प्रविनयेत्** परिदाघक्षुत्पिपासाऽपगमात्, एवं सकलक्षुदादिदोषापगमतः सुखासिकाभावेन **निद्रायेत प्रचलायेत,** तत्र अनिद्रावान् निद्रावान् भवतीति च्व्यर्थविवक्षायां निद्रादिभ्यो **धर्मिणि क्यबि [ ]** ति कर्म्मणि क्यप्प्रत्ययः, एवं प्रचलाशब्दादपि निद्रादेराकृतिगणत्वात्, निद्रा-प्रचलयोस्त्वयं विशेषः-सुखप्रबोधा स्वापावस्था निद्रा, ऊर्द्ध्वस्थितस्यापि या पुनश्चैतन्यमस्फुटीकुर्वती समुपजायते निद्रा सा प्रचला, एवं च क्षणमात्रनिद्रालाभतोऽतिस्वस्थीभूतः **'स्मृतिं वा'** पूर्वानुभूतस्मरणं **'रतिं वा'** तदवस्थाऽऽसक्तिरूपां **'धृतिं वा'** चित्तस्वास्थ्यं **'मतिं वा'** सम्यगीहापोहरूपाम् **'उपलभेत'** प्राप्नुयात्, ततः **'शीतः'** बाह्यशरीरप्रदेशशीतीभावात्, **'शीतीभूतः'** शरीरान्तरपि निर्वृतीभूतः सन् **'संकसमाणे'** इति सम्-एकीभावेन कसन्-गच्छन् 'सातसौख्यबहुलश्चापि' सातम्-आह्लादस्तत्प्रधानं सौख्यं सातसौख्यं, न त्वभिमानमात्रजनितमाह्लादविरहितं सातसौख्येन बहुलो-व्याप्तः **सातसौख्यबहुलश्चापि 'विहरेत्'** स्वेच्छया परिभ्रमेत्, ।।११८-D।।

(११८-E) एवामेव गोयमा! असब्भावपट्ठवणाए उसिणवेदणिज्जेहिंतो णरएहिंतो णेरइए उव्वट्टिए समाणे जाइं इमाइं मणुस्सलोयंसि भवंति तं जहा - गोलियालिंछाणि

वा सोंडियालिंछाणि वा भिंडियालिंछाणि[१] वा तिलागणी ति वा तुसागणी ति वा, णलागणी ति वा, अयागराणि वा तंबागराणि वा तउयागरा० सीसाग० रुप्पागरा० सुवन्नागराणि वा हिरण्णागरा० कुंभागराणि[२] इ वा मुसागणी ति वा इट्टयागणी वा कवेल्लुयागणी वा लोहारंबरिसे इ वा जंतवाड-चुल्ली ति वा हंडियलित्थाणि वा सोंडियलि० ।। ११८-E।।

'एवमेव' अनेनैवानन्तरोदितदृष्टान्तप्रकारेण हे **गौतम! 'असद्भावप्रस्थापनया'** असद्भावकल्पनया नेदं वक्ष्यमाणमभूत् केवलं नरकगतोष्णवेदनायाथात्म्यप्रतिपत्तयेऽसत्कल्प्यत इति भावः, **उष्णवेदनेभ्यो नरकेभ्यो नैरयिको**ऽनन्तर**मुद्वर्त्तितो** विनिर्गतः **सन् 'यानि' इमानि** प्रत्यक्षत उपलभ्यमानानि 'इह' **मनुष्यलोके** स्थानानि **भवन्ति,** तद्यथा–**'गोलियालिंगाणि वा, सोंडियालिंगाणि वा, भिंडियालिंगाणि वा,** एते अग्नेराश्रयविशेषाः, **अन्ये** तु देशभेदनीत्या पिष्टपाचनकाग्न्यादिभेदेनैतेषां स्वरूपं कथयन्ति, तदप्यविरुद्धमेवेति, **तैलाग्निरिति[३] वा तुषाग्निरिति वा बुसाग्निरिति वा नडाग्निरिति वा,** नडः–तृणविशेषः, **'अयागराणीति वा'** आर्षत्वान्नपुंसकनिर्देशः अयआकरा इति वा, येषु निरन्तरं महामूषास्वयोदलं प्रक्षिप्याऽय उत्पाट्यते ते अयआकराः, एवं **ताम्राकरा इति वा त्रप्वाकरा इति वा सीसकाकरा इति वा रूप्याकरा इति वा सुवर्णाकरा इति वा हिरण्याकरा इति वा,** सुवर्णहिरण्ययोरत्र विशेषो वर्णादिकृतो वेदितव्यः, **इष्टकापाक इति वा कुम्भकारापाक इति वा कवेल्लुकापाक इति वा लोहकाराम्बरीष इति वा,** अम्बरीषः–कोष्टकः, **यन्त्रवाडचुल्ली इवेति,** यन्त्रम्–इक्षुपीडनयन्त्रं, तत्प्रधानः पाटको यन्त्रपाटकः, तत्र चुल्ली यत्रेक्षुरसः पच्यते, इत्थम्भूतानि **यानि मनुष्यलोके स्थानानि।। ११८-E।।**

(११८-F) तत्ताइं समज्जोतीभूयाइं फुल्लकिंसुयसमाणाइं उक्कासहस्साइं विणिम्मुयमाणाइं जालासहस्साइं पमुच्चमाणाइं इंगालसहस्साइं पविक्खरमाणाइं अंतो २ हुहुयमाणाइं चिट्ठंति ताइं पासइ, ताइं पासित्ता ताइं ओगाहइ ताइं ओगाहित्ता से णं तत्थ उण्हंपि पविणेज्जा तण्हंपि पविणेज्जा खुहंपि पविणेज्जा जरंपि

१. भंडिय० जे. । भंडिया० L।। २. कुंभागराणि वा भुसागणी वा - क ग ट । स्थानाङ्गे ८/१० द्रष्टव्यम् ।। ३. सूत्र- वृत्त्योः पदन्यासे भिन्नक्रमता दृश्यते । एवमग्रेऽपि ।।

पविणेज्जा दाहंपि पविणेज्जा णिद्दाएज्ज वा पयलाएज्ज वा सतिं वा रतिं वा धिइं वा[१] मतिं वा उवलभेज्जा, सीए सीयभूए संकसमाणे संकसमाणे सायासोक्खबहुले यावि विहरेज्जा, भवेयारूवे सिया?, णो इणट्ठे समट्ठे, गोयमा! उसिणवेदणिज्जेसु णरएसु नेरतिया एत्तो अणिट्ठतरियं चेव उसिणवेदणं पच्चणुभवमाणा विहरंति।११८-F।

(११८-F)'तप्तानि' वह्निसम्पर्कतस्तप्तीभूतानि, तानि च कानिचिद् अयआकरप्रभृतीनि कदाचिदुष्णस्पर्शमात्राण्यपि सम्भवन्ति ततो विशेषप्रतिपादनार्थमाह-**'समजोईभूयाइ'** प्राकृतत्वात्समशब्दस्य पूर्वनिपातः, 'ज्योतिःसमभूतानि' साक्षादग्निवर्णानि जातानीति भावः, एतदेवोपमया स्पष्टयति- **'फुल्लकिंशुकसमानानि'** प्रफुल्लपलाशकुसुमकल्पानि **'उक्कासहस्साइं'** इति ये मूलाग्नितो विन्नुट्य विन्नुट्याग्निकणाः प्रसर्पन्ति ते उल्का इत्युच्यन्ते तासां सहस्राणि उल्कासहस्राणि मुञ्चन्ति **ज्वालासहस्राणि** विनिर्मुञ्चन्ति **अङ्गारसहस्राणि प्रविक्षरन्ति 'अन्तरन्तर्हूहूयमानानि'** अतिशयेन जाज्वल्यमानानि, क्वचित् 'अंतो अंतो सुहुयहुयासणा' इति पाठः, 'अन्तरन्तः सुहुतहुताशनानि' सुष्ठु हुतो हुताशनो येषु तानि तथा **तिष्ठन्ति तानि पश्येत् दृष्ट्वा चावगाहेत, अवगाह्य** च **'उष्णमपि'** नरकोष्णवेदनाजनितं बहिःशरीरस्य परितापमपि प्रविनयेत्, नरकगतादुष्णस्पर्शादयआकरादिषूष्णस्पर्शस्यातीव मन्दत्वात्, एवं च सुखासिकाभावत**स्तृषामपि क्षुधमपि दाहमपि** अन्तःशरीरसमुत्थं **प्रविनयेत्,** तथा च सति तृडादिदोषापगमतो **निद्रायेत वा प्रचलायेत वा स्मृतिं वा रतिं वा [मतिं वा] धृतिं वा उपलभेत, ततः शीतः शीतीभूतः** सन् **'संकसन् संकसन्'** सङ्क्रामन् सङ्क्रामन् **सातसौख्यबहुलो विहरेत्,** अमीषां पदानामर्थः प्राग्वद् भावनीयः। एतावत्युक्ते भगवान् गौतमः पृच्छति-**'भवे एयारूवे सिया?'** 'स्यात्' सम्भाव्यते एतद् यथा भवेद् उष्णवेदनीयेषु नरकेषु एतद्रूपा उष्णवेदना?, भगवानाह-**गौतम! नायमर्थः समर्थो यदुष्णवेदनीयेषु नरकेषु नैरयिका** इति, अनन्तरं प्रतिपादितस्वरूपाया उष्णवेदनायाः **अनिष्टतरिकामेव** अप्रियतरिकामेव अमनोज्ञतरिकामेव अमनआपतरिकामेव **वेदनां 'प्रत्यनुभवन्तः'** प्रत्येकं वेदयमाना **विहरन्ति**।। ११८ ।।

सम्प्रति शीतवेदनीयेषु नरकेषु शीतवेदनास्वरूपं प्रतिपादयति-

---

१. वा ऊहं वा S **क ख ट** ।।

(११९) सीयवेदणिज्जेसु णं भंते णरएसु णेरतिया केरिसयं सीयवेदणं पच्चणुब्भवमाणा विहरंति?, गोयमा! से जहाणामए कम्मारदारए सिया तरुणे जुगवं बलवं जाव[1] सिप्पोवगते एगं महं अयपिंडं दगवारसमाणं गहाय ताविय ताविय कोट्टिय कोट्टिय जह० एक्काहं वा दुआहं वा तियाहं वा उक्कोसेणं मासं संहणेज्जा[2], से णं तं उसिणं उसिणभूतं अयोमएणं संडासएणं गहाय असब्भावपट्ठवणाए सीयवेदणिज्जेसु णरएसु पक्खिवेज्जा, से तं [उमिसियनिमिसियंतरेण पुणरवि पच्चुद्धरिस्सामीतिकट्टु पविरायमेव पासेज्जा, पविलीणमेव पासेज्जा, पविद्धत्थमेव पासेज्जा, तं चेव णं जाव णो चेव णं संचाएज्जा पुणरवि पच्चुद्धरित्तए, से जहाणामए मत्तमायंगे तहेव जाव सोक्खबहुले यावि विहरेज्जा] एवामेव गोयमा! असब्भावपट्ठवणाए सीतवेदणेहिंतो णरएहिंतो नेरतिए उव्वट्टिए समाणे जाइं इमाइं इहं[3] माणुस्सलोए हवंति, तंजहा-हिमाणि[4] वा हिमपुंजाणि वा हिमपडलाणि वा हिमपडलपुंजाणि वा तुसाराणि वा तुसारपुंजाणि वा हिमकुं(कू)डाणि वा हिमकुं(कू)डपुंजाणि वा सीताणि वा सी० ४ ताइं पासति, पासित्ता ताइं ओगाहति ओगाहित्ता से णं तत्थ सीतंपि पविणेज्जा तण्हंपि प० खुहंपि प० जरंपि प० दाहंपि प० निद्दाएज्ज वा पयलाएज्ज वा जाव उसिणे उसिणभूए संकसमाणे संकसमाणे सायासोक्खबहुले यावि विहरेज्जा, भवेतारूवेसिया? गोयमा! नो तिण० सीयवेयणिज्जेसु नरएसु नेरतिया एत्तो अणिट्ठयरियं चेव सीतवेदणं पच्चणुभवमाणा विहरंति।। ११९ ।।

'**सीयवेयणिज्जेसु ण**'मित्यादि, **शीतवेदनीयेषु भदन्त! निरयेषु नैरयिकाः कीदृशीं शीतवेदनां प्रत्यनुभवन्तो विहरन्ति?,** स **यथानामकः कर्म्मकरदारकः स्यात् तरुण** इत्यादिविशेषणकदम्बकं

१. द्र. ३/११८ ।। सू. २. हणेज्जा-**कटतामु.** । साहणेज्जा- L।। ३. **पूर्वस्मिन् सूत्रे** 'इहं' **इति पदं नास्ति** मणुस्सलोयंसि **इति पदमस्ति । अत्र ता प्रतिं मुक्त्वा सर्वेषु आदर्शेषु** इहं माणुस्सलोए इति पाठो **लभ्यते इति** L **२७५ टि. ७।।** ४. जे. । हिमाणि - **क ख ग ट नास्ति ।।**

प्राग्वत्तावद् **यावत्संहन्यात्** नवर**मुत्कर्षतो मास**मित्यत्र ब्रूयात्, ततः **'सः'** कर्म्मकरदारकः **'तम्'** अयस्पिण्ड**मुष्णं** स चोष्णो बाह्यप्रदेशमात्रापेक्षयाऽपि स्यादत आह-**'उष्णीभूतं'** सर्वात्मनाऽग्निवर्णीभूतमिति भावः, **अयोमयेन संदंशकेन गृहीत्वाऽसद्भावप्रस्थापनया शीतवेदनीयेषु नरकेषु प्रक्षिपेत्,** ततः **'स'** पुरुषः **'तम्'** अयस्पिण्डमित्यादि प्राग्वत्तावद्वक्तव्यं **यावद्विहरति**, तच्चैवम्-'से णं तं उम्मिसियनिमिसियंतरेण पुणरवि पच्चुद्धरिस्सामित्तिकट्टु पविरायमेव पासेज्जा पविलीणमेव पासेज्जा पविद्धत्थमेव पासेज्जा नो चेव णं संचाएइ अविरायं अविलीणं अविद्धत्थं पुणरवि पच्चुद्धरित्तए से जहानामए मत्तमायंगे जाव सायासोक्खबहुले यावि विहरइत्ति' **'एवामेवे'**त्यादि, अनेनैवाधिकृतदृष्टान्तोक्तेन प्रकारेण **गौतम! असद्भावप्रस्थापनया शीतवेदनीयेभ्यो नरकेभ्योऽनन्तरमुद्वृत्तः सन् यानीमानि मनुष्यलोके** स्थानानि **भवन्ति, तद्यथा-हिमानि वा हिमपुञ्जानि वा,** सूत्रे नपुंसकनिर्देशः प्राकृतत्वात्, **हिमपटलानि वा हिमकूटानि वा,** एतान्येव पदानि नानादेशजविनेयानुग्रहाय पर्यायैर्व्याचष्टे-**'सीयाणि वा सीयपुंजाणि वा'** इत्यादि, **तानि पश्येत्, दृष्ट्वा तान्यवगाहेत, अवगाह्य 'शीतमपि'** नरकजनितं शीतत्वमपि **प्रविनयेत्,** ततः सुखासिकाभावत**स्तृषमपि क्षुधमपि ज्वरमपि** नरकवेदनीयनरकसम्पर्कसमुत्थं जाड्यमपि **प्रविनयेत्,** ततः शीतत्वादिदोषापगमतोऽनुत्तरं स्वास्थ्यं लभमानो **निद्रायेत वा प्रचलायेत वा** स्मृतिं वा रतिं वा धृतिं वा लभेत, ततो नरकगतजाड्यापगमाद् **उष्णः**, स च बहिःप्रदेशमात्रतोऽपि स्यात्तत आह-**'उष्णीभूतः'** अन्तरपि नरकगतजाड्यापगमात् जातोत्साह इत्यर्थः, स एवंभूतः सन् यथास्वसुखं (**संकसन्**) सङ्क्रामन् **सातसौख्यबहुलो विहरेत्,** एवमुक्ते गौतम आह-**'भवेयारूवे सिया?'** इत्यादि प्राग्वत्।। ११९।।

सम्प्रति नैरयिकाणां स्थितिप्रतिपादनार्थमाह-

(१२०) इमीसे णं भंते! रयणप्प० पु० णेरतियाणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! -जहं[1] दस वा उक्को साग०। दोच्चाए ज० ए उ० ३ । तच्चा ज० ३/७, चउ० उ० १०/७, पंच उ० १७ ज० १०। छट्ठी उ० २२ ज. १७। सत्त ३३←। १२०।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिकाणां भदन्त! कियन्तं कालं स्थितिः प्रज्ञप्ता?**, भगवानाह-**गौतम! जघन्येन दश वर्षसहस्राणि उत्कर्षतः सागरोपमम्,** एवं शर्कराप्रभापृथिवी-

१. जे.। →← **चिह्नद्वयमध्यवर्तिपाठस्थाने मु. L मध्ये** जहण्णेणवि उक्कोसेणवि ठिती भाणितव्वा जाव अधेसत्तमाए **इति पाठः** ।।

नैरयिकाणां **जघन्यत एकं सागरोपममुत्कर्षतस्त्रीणि सागरोपमाणि, वालुकाप्रभापृथिवीनैरयिकाणां जघन्यतस्त्रीणि सागरोपमाणि उत्कर्षतः सप्त,** पङ्कप्रभापृथिवीनैरयिकाणां **जघन्यतः सप्त सागरोपमाणि उत्कर्षतो दश,** धूमप्रभापृथिवीनैरयिकाणां **जघन्यतो दश सागरोपमाणि उत्कर्षतः सप्तदश,** तमःप्रभापृथिवीनैरयिकाणां **जघन्यतः सप्तदश सागरोपमाणि उत्कर्षतो द्वाविंशतिः,** तमस्तमःप्रभायां **जघन्यतो द्वाविंशतिसागरोपमाणि उत्कर्षतस्त्रयस्त्रिंशत्, क्वचित्** 'जहा पण्णवणाए ठिइपदे' इत्यतिदेशः सोऽप्येवमेवार्थतो भावनीयः, तदेवं प्रतिपृथिवि स्थितिपरिमाणमुक्तं, यदा तु प्रतिप्रस्तटं स्थितिपरिमाणं चिन्त्यते तदैवमवगन्तव्यम्– रत्नप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिर्दशवर्षसहस्राणि १०००० उत्कृष्टा नवतिः ९००००, द्वितीये प्रस्तटे एषैव शतगुणिता जघन्या उत्कृष्टा च वैदितव्या, तद्यथा–जघन्या दशवर्षलक्षा १०००००० उत्कृष्टा नवतिवर्षलक्षाः ९०००००, तृतीये प्रस्तटे जघन्यतो नवतिवर्षलक्षा उत्कृष्टा पूर्वकोटी, चतुर्थे जघन्या पूर्वकोटी उत्कृष्टा सागरोपमस्य दशमो भागः, पञ्चमे जघन्या सागरोपमस्यैको दशभाग उत्कृष्टा द्वौ दशभागौ, षष्ठे जघन्या सागरोपमस्य द्वौ दशभागावुत्कृष्टा त्रयः, सप्तमे जघन्या त्रयः सागरोपमस्य दशभागा उत्कृष्टाश्चत्वारः, अष्टमे जघन्या चत्वारः सागरोपमस्य दशभागा उत्कृष्टा पञ्च, नवमे जघन्या पञ्च सागरोपमस्य दशभागा उत्कृष्टा षट्, दशमे जघन्या षट् सागरोपमस्य दशभागा उत्कृष्टा सप्त, एकादशे जघन्या सप्त उत्कृष्टाऽष्टौ, द्वादशे जघन्याऽष्टौ उत्कृष्टा नव, त्रयोदशे जघन्या नव सागरोपमस्य दशभागा उत्कृष्टा दश, परिपूर्णमेकं सागरोपममिति भावः।

शर्कराप्रभायां प्रथमे प्रस्तटे जघन्या एकं सागरोपमं उत्कृष्टा एकं सागरोपमं द्वौ च सागरोपमस्यैकादशभागौ, द्वितीये प्रस्तटे जघन्या एकं सागरोपमं द्वौ सागरोपमस्यैकादशभागौ उत्कृष्टा एकं सागरोपमं चत्वारः सागरोपमस्यैकादशभागाः, तृतीये जघन्या एकं सागरोपमं चत्वारः सागरोपम-स्यैकादशभागा उत्कृष्टा एकं सागरोपमं षट् सागरोपमस्यैकादशभागाः, चतुर्थे जघन्या एकं सागरोपमं षट् सागरोपमस्यैकादशभागा उत्कृष्टा एकं सागरोपमम् अष्टौ सागरोपमस्यैकादशभागाः, पञ्चमे जघन्या एकं सागरोपमं अष्टौ सागरोपमस्यैकादशभागाः उत्कृष्टा एकं सागरोपमं दश सागरोपमस्यैकादश भागाः, षष्ठे जघन्या एकं सागरोपमं दश सागरोपमस्यैकादशभागा उत्कृष्टा द्वे सागरोपमे एकः सागरोपमस्यैकादशभागः, सप्तमे जघन्या द्वे सागरोपमे एकः सागरोपमस्यैकादशभाग उत्कृष्टा द्वे सागरोपमे त्रयः सागरोपमस्यैकादशभागाः, अष्टमे जघन्या द्वे सागरोपमे त्रयः सागरोपमस्यैकादशभागाः उत्कृष्टा

द्वे सागरोपमे पञ्च सागरोपमस्यैकादशभागाः, नवमे जघन्या द्वे सागरोपमे पञ्च सागरोपमस्यैकादशभागाः उत्कृष्टा द्वे सागरोपमे सप्त सागरोपमस्यैकादशभागाः, दशमे जघन्या द्वे सागरोपमे सप्त सागरोपमस्यैकादशभागाः उत्कृष्टा द्वे सागरोपमे नव सागरोपमस्यैकादशभागाः, एकादशे जघन्या द्वे सागरोपमे नव सागरोपमस्यैकादशभागाः उत्कृष्टानि परिपूर्णानि त्रीणि सागरोपमाणि।

वालुकाप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिस्त्रीणि सागरोपमाणि उत्कृष्टा त्रीणि सागरोपमाणि चत्वारः सागरोपमस्य नवभागाः, द्वितीये जघन्या त्रीणि सागरोपमाणि चत्वारः सागरोपमस्य नवभागाः उत्कृष्टा त्रीणि सागरोपमाणि अष्टौ सागरोपमस्य नवभागाः, तृतीये जघन्या त्रीणि सागरोपमाणि अष्टौ सागरोपमस्य नवभागाः उत्कृष्टा चत्वारः सागरोपमाणि त्रयः सागरोपमस्य नवभागाः, चतुर्थे जघन्या चत्वारि सागरोपमाणि त्रयः सागरोपमस्य नवभागाः उत्कृष्टा चत्वारि सागरोपमाणि सप्त सागरोपमस्य नवभागाः, पञ्चमे जघन्या चत्वारि सागरोपमाणि सप्त सागरोपमस्य नवभागाः उत्कृष्टा पञ्च सागरोपमाणि द्वौ सागरोपमस्य नवभागौ, षष्ठे जघन्येन पञ्च सागरोपमाणि द्वौ सागरोपमस्य नवभागौ उत्कृष्टा पञ्च सागरोपमाणि षट् सागरोपमस्य नवभागाः, सप्तमे जघन्या पञ्च सागरोपमाणि षट् सागरोपमस्य नवभागाः उत्कृष्टा षट् सागरोपमाणि एकः सागरोपमस्य नवभागः, अष्टमे जघन्या षट् सागरोपमाणि एकः सागरोपमस्य नवभागः उत्कृष्टा षट् सागरोपमाणि पञ्च सागरोपमस्य नवभागाः, नवमे जघन्या षट् सागरोपमाणि पञ्च सागरोपमस्य नवभागाः उत्कृष्टा परिपूर्णानि सप्त सागरोपमाणि, एषोऽत्र तात्पर्यार्थः- सागरोपमत्रयस्योपरि प्रतिप्रस्तटं क्रमेण चत्वारः सागरोपमस्य नवभागा वर्द्धयितव्यास्ततो यथोक्तपरिमाणं भवति।

पङ्कप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिः सप्त सागरोपमाणि उत्कृष्टा सप्त सागरोपमाणि त्रयः सागरोपमस्य सप्तभागाः, द्वितीये जघन्या सप्त सागरोपमाणि त्रयः सागरोपमस्य सप्तभागाः उत्कृष्टा सप्त सागरोपमाणि षट् सागरोपमस्य सप्तभागाः, तृतीये जघन्या सप्त सागरोपमाणि षट् सागरोपमस्य सप्तभागाः उत्कृष्टाऽष्टौ सागरोपमाणि द्वौ सागरोपमस्य सप्तभागौ, चतुर्थे जघन्याऽष्टौ सागरोपमाणि द्वौ सागरोपमस्य सप्तभागौ उत्कृष्टाऽष्टौ सागरोपमाणि पञ्च सागरोपमस्य सप्तभागाः, पञ्चमे जघन्याऽष्टौ सागरोपमाणि पञ्च सागरोपमस्य सप्तभागाः उत्कृष्टा नव सागरोपमाणि एकः सागरोपमस्य सप्तभागः, षष्ठे जघन्या नव सागरोपमाणि एकः सागरोपमस्य सप्तभागः उत्कृष्टा नव सागरोपमाणि चत्वारः सागरोपमस्य सप्तभागाः सप्तमे जघन्या नव सागरोपमाणि चत्वारः सागरोपमस्य सप्तभागाः उत्कृष्टा

परिपूर्णानि दश सागरोपमाणि, अत्रापीयं भावना—सागरोपमसप्तकस्योपरि त्रयस्त्रयः सागरोपमस्य सप्तभागाः, प्रतिप्रस्तटं क्रमेण वर्द्धयितव्यास्ततो भवति यथोक्तं परिमाणमिति।

धूमप्रभायाः प्रथमे प्रस्तटे जघन्या स्थितिर्दश सागरोपमाणि उत्कृष्टा एकादश सागरोपमाणि द्वौ सागरोपमस्य पञ्चभागौ, द्वितीये जघन्या एकादश सागरोपमाणि द्वौ सागरोपमस्य पञ्चभागौ उत्कृष्टा द्वादश सागरोपमाणि चत्वारः सागरोपमस्य पञ्चभागाः, तृतीये जघन्या द्वादश सागरोपमाणि चत्वारः सागरोपमस्य पञ्चभागाः उत्कृष्टा चतुर्दश सागरोपमाणि एकः सागरोपमस्य पञ्चभागः, चतुर्थे जघन्या चतुर्दश सागरोपमाणि एकः सागरोपमस्य पञ्चभागः उत्कृष्टा पञ्चदश सागरोपमाणि त्रयः सागरोपमस्य पञ्चभागाः, पञ्चमे जघन्या पञ्चदश सागरोपमाणि त्रयः सागरोपमस्य पञ्चभागाः उत्कृष्टा परिपूर्णानि सप्तदश सागरोपमाणि, एष चात्र भावार्थः—सागरोपमदशकस्योपरि प्रतिप्रस्तटं क्रमेणैकं सागरोपमं द्वौ च सागरोपमस्य पञ्चभागाविति वर्द्धयितव्यं ततो यथोक्तं परिमाणं भवति।

तमःप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिः सप्तदश सागरोपमाणि उत्कृष्टाऽष्टादश सागरोपमाणि द्वौ च सागरोपमस्य त्रिभागौ, द्वितीये जघन्याऽष्टादश सागरोपमाणि द्वौ च सागरोपमस्य त्रिभागौ उत्कृष्टा विंशतिः सागरोपमाणि एकः सागरोपमस्य त्रिभागः, तृतीये जघन्या विंशतिः सागरोपमाणि एकः सागरोपमस्य त्रिभागः उत्कृष्टा द्वाविंशतिः सागरोपमाणि, अत्राप्येष तात्पर्यार्थः—सप्तदश सागराणामुपरि प्रतिप्रस्तटं क्रमेणैकं सागरोपमं द्वौ च सागरोपमस्य त्रिभागाविति वर्द्धयितव्यं, ततो यथोक्तं परिमाणं भवति।

सप्तम्यां तु पृथिव्यामेक एव प्रस्तट इति तत्र पूर्वोक्तमेव परिमाणं द्रष्टव्यम्।। १२०।। सम्प्रति नैरयिकाणामुद्वर्त्तनामाह—

(१२१) इमीसे णं भंते! रयणप्पभाए णेरतिया अणंतरं उव्वट्टिय कहिं गच्छंति? कहिं उववज्जंति? किं नेरतिएसु उववज्जंति? किं तिरिक्खजोणिएसु उववज्जंति?, ~~[1]एवं~~ उव्वट्टणा भाणितव्वा ~~[2]जहा~~ वक्कंतीए तहा इहवि जाव अहेसत्तमाए।।१२१।।

'रयणप्पभापुढवि' इत्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! अनन्तरमुद्वृत्त्य क्व गच्छन्ति?,**

१.~~*~~ **चिह्नमध्यमध्यवर्तिपाठस्थाने जे. मध्ये-** गोयमा ! णो णेर० तिरि० मणू० णो दे. एगिंदिय विगलिंदिय असंखाउवज्ज - **इति पाठः ।। २. द्र. प्रज्ञापनायां ६/९९,१००।।**

एतदेव व्याचष्टे–**क्वोत्पद्यन्ते** इत्यादि, यथा **प्रज्ञापनायां व्युत्क्रान्तिपदे तथा** वक्तव्यं **यावत्तमस्तमायां,** तच्चातिप्रभूतमिति तत एवावधार्यम्, एष च सङ्क्षेपार्थः रत्नप्रभापृथिवीनैरयिका यावत्तमःप्रभापृथिवीनैरयिका अनन्तरमुद्वृत्ता नैरयिकदेवैकेन्द्रियविकलेन्द्रियसंमूर्च्छिमपञ्चेन्द्रियासङ्ख्येयवर्षायुष्कवर्जेषु शेषेषु तिर्यङ्मनुष्येषूत्पद्यन्ते, सप्तमपृथिवीनैरयिकास्तु गर्भजतिर्यक्पञ्चेन्द्रियेष्वेव, न शेषेषु।। १२१ ।।

सम्प्रति नरकेषु पृथिव्यादिस्पर्शस्वरूपमाह–

(१२२) इमीसे णं भंते! रयण० पु० नेरतिया केरिसयं पुढविफासं पच्चणुब्भवमाणा विहरंति?, गोयमा! अणिट्ठं जाव अमणामं, एवं जाव अहेसत्तमाए।। १२२।।

'रयणप्पभे'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! कीदृशं पृथिवीस्पर्शं प्रत्यनुभवन्तो विहरन्ति?,** भगवानाह–**गौतम! 'अणिट्ठं** अकंतं अप्पियं अमणुन्नं **अमणामं'** अस्यार्थः प्राग्वत्, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावत्तमस्तमायाम्**।। १२२।।

(१२३) इमीसे णं भंते! रयण० पु० नेरइया केरिसयं आउफासं पच्चणुब्भवमाणा विहरंति?, गोयमा! अणिट्ठं जाव अमणामं, एवं जाव अहेसत्तमाए, एवं जाव वणप्फतिफासं अधेसत्तमाए पुढवीए।।१२३।। (१२४) इमा णं भंते! रयणप्पभापुढवी दोच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं सव्वक्खुड्डिया सव्वंतेसु? हंता! गोयमा! इमा णं रयणप्पभापुढवी दोच्चं पुढविं पणिहाय जाव सव्वक्खुड्डिया सव्वंतेसु ।। १२४ ।। (१२५) दोच्चा णं भंते! पुढवी तच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं पुच्छा, हंता गोयमा! दोच्चा णं पुढवी जाव सव्वक्खुड्डिया सव्वंतेसु, एवं एएणं अभिलावेणं जाव छट्ठिया पुढवी अहेसत्तमं पुढविं पणिहाय सव्वक्खुड्डिया सव्वंतेसु।। १२५।। (१२६)[२] इमीसे णं भंते! रयणप्पभाए पु० निरयपरिसामंतेसु जे पुढविक्काइया जाव वणप्फतिकाइया ते णं भंते! जीवा महाकम्मतरा चेव महाकिरियतरा चेव महाआसवतरा चेव महावेयणतरा चेव?,

---

१. द्र. ३/९२ सू. ।। २. वृत्तौ अस्य सूत्रस्य व्याख्या १२७ सूत्रानन्तरं वर्तते ।।

हंता गोयमा! इमीसे णं [भंते!] रयणप्पभाए पुढवीए निरयपरिसामंतेसु तं चेव जाव महावेदणतरका चेव, एवं जाव अधेसत्तमा।। १२६।। (१२७) इमीसे णं भंते! रयणप्प० पु० तीसाए नरयावाससयसहस्सेसु इक्कमिक्कंसि निरयावासंसि सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता पुढवीकाइयत्ताए जाव वणस्सइकाइयत्ताए नेरइयत्ताए उववन्नपुव्वा?, हंता गोयमा! असतिं अदुवा अणंतखुत्तो, एवं जाव अहेसत्तमाए पुढवीए णवरं [1]जत्थ जत्तिया णरका।।१२७A।।

एवमप्तेजो-वायु-वनस्पतिस्पर्शसूत्राण्यपि भावनीयानि, नवरं तेजःस्पर्शः-उष्णरूपतापरिणतनरक-कुड्यादिस्पर्शः परोदीरितवैक्रियरूपो वा वेदितव्यो न तु साक्षाद् बादराग्निकायस्पर्शः, तत्रासम्भवात् ।। १२३-१२५।। **'इमीसे ण'**मित्यादि, **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां त्रिंशति नरकावासशतसहस्रेषु एकैकस्मिन् नरकावासे 'सर्वे प्राणाः'** द्वीन्द्रिया **'सर्वे भूताः'** वनस्पतिकायिकाः **'सर्वे सत्त्वाः'** पृथिव्यादयः **'सर्वे जीवाः'** पञ्चेन्द्रियाः, उक्तञ्च–

'प्राणा द्वित्रिचतुः प्रोक्ता, भूताश्च तरवः स्मृताः।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा उदीरिताः।।१।।'

पृथिवीकायिकतया अप्कायिकतया वायुकायिकतया **वनस्पतिकायिकतया नैरयिकतया** उत्पन्नाः **उत्पन्नपूर्वाः?**, भगवानाह–**'हंते'**त्यादि, हन्तेति प्रत्यवधारणे **गौतम! 'असकृत्'** अनेकवारम्, **अथवा 'अनन्तकृत्वः'** अनन्तान् वारान्, संसारस्यानादित्वात्, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी, नवरं यत्र यावन्तो नरका**स्तत्र तावन्त उपयुज्य वक्तव्याः। क्वचिदिदमपि सूत्रं दृश्यते–

'इमीसे णं भंते! रयणप्पभाए पुढवीए निरयपरिसामंतेसु णं जे बायरपुढविक्काइया जाव वणस्सइकाइया ते णं भंते! जीवा! महाकम्मतरा चेव महाकिरियतरा चेव महासवतरा चेव महावेयणतरा चेव?, हंता गोयमा! जाव महावेयणतरा चेव, एवं जाव अहेसत्तमा।।' **अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकपरिसामन्तेषु**–नरकावासपर्यन्तवर्त्तिषु प्रदेशेषु बादर**पृथिवीकायिकाः 'जाव वणप्फइकाइय'**त्ति बादराप्कायिका बादरवायुकायिका बादरवनस्पतिकायिका**स्ते भदन्त! जीवाः 'महाकम्मतरा चेव'** महत्-प्रभूतमसातवेदनीयं कर्म्म येषां ते महाकर्म्माणः, अतिशयेन महाकर्म्माणो महाकर्म्मतराः, 'चेवे'त्यवधारणे,

१. जहिं जत्तिया णिरयावासा-**जे.** ।।

महाकर्म्मतरा एव कुतः? इत्याह-**'महाकिरियतरा चेव'** महती क्रिया-प्राणातिपातादिकाऽऽसीत् प्राग् जन्मनि तद्भवेषु तदध्यवसायानिवृत्त्या येषां ते महाक्रियाः, अतिशयेन महाक्रिया महाक्रियतराः, **'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'** [ ]मिति न्यायाद्धेतावत्र प्रथमा, ततोऽयमर्थः-यतो महाक्रियतरा एव ततो महाकर्म्मतरा एव, महाक्रियतरत्वमपि कुतः? इत्याह-**'महाश्रवतरा एव'** महान्त आश्रवाः-पापोपादानहेतव आरम्भादयो येषामासीरन् ते महाश्रवाः, अतिशयेन महाश्रवा महाश्रवतराः, 'चेवे'ति पूर्ववत्, तदेवं यतो महाकर्म्मतरा एव ततो **महावेदनतरा एव,** नरकेषु क्षेत्रस्वभावजाया अपि वेदनाया अतिदुःसहत्वात्, भगवानाह-**हंता गौतम!** 'ते णं जीवा महाकम्मतरा चेवे'त्यादि प्राग्वत्, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी।।** १२६-१२७ **A**।। सम्प्रत्युद्देशकार्थ**सङ्ग्रहणि**गाथाः प्राह-

पुढवीं ओगाहित्ता, नरगा संठाणमेव बाहल्लं।
विक्खंभ-परिक्खेवे वण्णो गंधो य फासो य।।१।।

तेसिं महालयत्तं उवमा देवेण होइ कायव्वा।
जीवा य पोग्गला वक्कमंति तह सासया निरया।।२।।

उववायपरीमाणं अवहारुच्चत्तमेव संघयणं।
संठाणवण्णगंधे फासा ऊसासमाहारे।।३।।

लेसा दिट्ठी नाणे जोगुवओगे तहा समुग्घाया।
तत्तो खुप्पिवासा विउव्वणा वेयणा य भए।।४।।

उववाओ पुरिसाणं ओवम्मं वेयणाएँ दुविहाए।
उव्वट्टणठिति पुढवी, उववाओ सव्वजीवाणं।।५।।

एयाओ संगहणिगाहाओ।। १२७ B ।।

।।बीओ उद्देसओ समत्तो।।

आसामक्षरमात्रगमनिका-प्रथमं **'पुढवीओ'** इति पृथिव्योऽभिधेयास्तद्यथा-'कइ णं भंते! पुढवीओ पण्णत्ताओ?' इत्यादि। तदनन्तरम् **'ओगाहित्ता नरगा'** इति, यस्यां पृथिव्यां यदवगाह्य यादृशाश्च नरकास्तदभिधेयं, यथा-'इमीसे णं भंते! रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए

उवरिं केवइयं ओगाहित्ता' इत्यादि। ततो नरकाणां **संस्थानं** ततो **बाहल्यं** तदनन्तरं **विष्कम्भ-परिक्षेपौ** ततो **वर्ण**स्ततो **गन्ध**स्तदन्तरं **स्पर्श**स्तत**स्तेषां** नरकाणां **महत्तायामुपमा देवेन भवति कर्त्तव्या**। ततो **जीवाः पुद्गलाश्च** तेषु नरकेषु **व्युत्क्रामन्तीति, तथा शाश्वता**शाश्वता **नरका** इति वक्तव्यं, तत **उपपातो** वक्तव्यः, तद्यथा–'इमीसे णं भंते! रयणप्पभाए पुढवीए कतो उववज्जंति?' इत्यादि, तत एकसमयेनोत्पद्यमानानां **परिमाणं** ततोऽ**पहार**स्तत **उच्चत्वं** तदनन्तरं **संहननं** ततः **संस्थानं** ततो **वर्ण**स्तदनन्तरं **गन्ध**स्ततः **स्पर्श**स्तत **उच्छ्वास**वक्तव्यता तदनन्तर**माहार**स्ततो **लेश्या** ततो **दृष्टि**स्तदनन्तरं **ज्ञानं** ततो **योग**स्ततोऽ**प्युपयोग**स्तदनन्तरं **समुद्घातस्ततः क्षुत्पिपासे** ततो **विकुर्वणा,** तद्यथा–'रयणप्पभापुढविनेरइया णं भंते! किं एगत्तं पभू विउव्वित्तए पुहुत्तं पहू विउव्वित्तए' इत्यादि, ततो **वेदना** ततो **भयं** तदनन्तरं पञ्चानां **पुरुषाणामधः**सप्तम्या**मुपपात**स्तत **औपम्यं वेदनाया द्विविधायाः,** उष्णवेदनायाः शीतवेदनायाश्चेत्यर्थः, ततः **स्थिति**र्वक्तव्या तदनन्तर**मुद्वर्त्तना** ततः स्पर्शः **पृथिव्या**दिस्पर्शो वक्तव्यः, ततः **सर्वजीवानामुपपातः**, तद्यथा–'इमीसे णं भंते! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि सव्वे पाणा सव्वे भूया' इत्यादि।। ।। १२७ **B**।। तृतीयप्रतिपत्तौ समाप्तो द्वितीयो नरकोद्देशकः ।।

उद्देश - ३

सम्प्रति तृतीय आरभ्यते, तत्र चेदमादिसूत्रम्—

(१२८) इमीसे णं भंते! रयणप्पभाए पुढवीए नेरतिया केरिसयं पोग्गलपरिणामं पच्चणुभवमाणा विहरंति?, गोयमा! अणिट्ठं जाव[1] अमणामं, एवं जाव अहेसत्तमाए -एवं वेदणपरिणामं लेस्सापo णामपo गोत्तपo अरतिपo भयपo सोगपo खुहापo पिवासापo वाधिपo उस्सासपo अणुवातपरिo कोवपo४ आहारसण्णापo४।। १२८ A ।।

(१२८) '**रयणप्पभे**'त्यादि, **रत्नप्रभापृथिवीनैरयिका भदन्त! कीदृशं** 'पुद्गलपरिणामम्' आहारादिपुद्गलविपाकं '**प्रत्यनुभवन्तः**' प्रत्येकं वेदयमाना **विहरन्ति?**, भगवानाह–**गौतम! अनिष्ट**मित्यादि प्राग्वत्, **एवं** प्रतिपृथिवि तावद्वक्तव्यं **यावदधःसप्तमी, एवं वेदना-लेश्या-नाम-गोत्रा-ऽरति-भय-शोक-क्षुत्पिपासा-व्याधि-उच्छ्वासा-ऽनुताप-क्रोध-मान-माया-लोभा-ऽऽहार-भय-मैथुन-परिग्रह**-सञ्ज्ञासूत्राणि वक्तव्यानि, अत्र **सङ्गहणिगाथे**-

'पोग्गलपरिणामे वेयणा य लेसा य नाम गोए य।
अरई भए य सोगे, खुहा पिवासा य वाही य।।१।।
उस्सासे अणुतावे[3], कोहे माणे य मायलोभे य।
चत्तारि य सण्णाओ, नेरइयाणं तु परिणामे।।२।।" ।। १२८ B।।

---

१. द्र. ३/९२ सू.।। २. जे. L। –*– चिह्नद्वयमध्यवर्तिपाठस्थाने कखगटमु. मध्ये-एवं नेयव्वं-इति पाठः।।
३. अणुभावे - क ट ।।

सम्प्रति सप्तमनरकपृथिव्यां ये गच्छन्ति तान् प्रतिपादयति-इह परिग्रहसञ्ज्ञापरिणामवक्तव्यतायां चरमसूत्रं सप्तमनरकपृथ्वीविषयं तदनन्तरं चेयं गाथा - ततः

(१२९) एत्थ किर अतिवयंती, नरवसभा केसवा जलचरा य।
रायाणो मंडलिया, जे य महारंभकोडुंबी।।१।।

'एत्थे'त्यनन्तरमुक्ताऽधःसप्तमी पृथिवी परामृश्यते, **'अत्र'** अधःसप्तमनरकपृथिव्यां **'किल'** इत्याप्तवादसूचने आप्तवचनमेतदिति भावः, **'अतिव्रजन्ति'** अतिशयेन-बाहुल्येन गच्छन्ति **नरवृषभाः 'केशवाः'** वासुदेवाः **'जलचराश्च'** तन्दुलमत्स्यप्रभृतयः **'माण्डलिकाः'** वसुप्रभृतय इव **'राजानः'** चक्रवर्त्तिनः सुभूमादय इव **ये च महारम्भाः कुटुम्बिनः**-कालसौकरिकादय इव।। १।। सम्प्रति नरकेषु प्रस्तावात्तिर्यगादिषु चोत्तरवैक्रियावस्थानकालमानमाह-

भिन्नमुहुत्तो नरएसु, तिरियमणुएसु होंति चत्तारि।
देवेसु अद्धमासो, उक्कोस विउव्वणा भणिया।।२।।

भिन्नः-खण्डो मुहूर्त्तो **भिन्नमुहूर्त्तः** अन्तर्मुहूर्त्तमित्यर्थः, **नरकेषूत्कर्षतो** विकुर्वणास्थितिकालः, **तिर्यङ्मनुष्येषु चत्वार्यन्तर्मुहूर्त्तानि, देवेष्वर्द्धमास उत्कर्षतो विकुर्वणाऽवस्थानकालः भणितः** एवं उत्कर्षतो विकुर्वणाऽवस्थानकालो भणितस्तीर्थकर-गणधरैः।। २ ।। सम्प्रति नरकेष्वाहारादिस्वरूपमाह-

जे पोग्गला अणिट्ठा, नियमा सो तेसि होइ आहारो।
संठाणं तु जहण्णं[१], नियमा हुंडं तु नायव्वं।।३।।

ये पुद्गला अनिष्टा नियमात्स तेषां भवत्याहारः, 'संस्थानं तु' संस्थानं पुनस्तेषां **हुण्डं** हुण्डमपि **जघन्य**मतिनिकृष्टमनिष्टं **वेदितव्यम्,** एतच्च भवधारणीयशरीरमधिकृत्य वेदितव्यम्, उत्तरवैक्रियसंस्थानस्याग्रे वक्ष्यमाणत्वात्, इयं च प्रागुक्तार्थसङ्ग्रहगाथा ततो न पुनरुक्तदोषः।। ३ ।।

सम्प्रति विकुर्वणास्वरूपमाह-

असुभा विउव्वणा खलु, नेरइयाणं तु होइ सव्वेसिं।
वेउव्वियं सरीरं, असंघयणँ हुंडसंठाणं।।४।।

---

१. अणिट्ठं L।।

सर्वेषां नैरयिकाणां विकुर्वणा 'खलु' निश्चित**मशुभा भवति,** यद्यपि शुभं विकुर्विष्याम इति ते चिन्तयन्ति तथाऽपि तथाविधप्रतिकूलकर्मोदयतस्तेषामशुभैव विकुर्वणा भवति, तदपि च **वैक्रियम्**-उत्तरवैक्रिय**शरीरमसंहननम्,** अस्थ्यभावात्, उपलक्षणमेतत् भवधारणीयं च वैक्रियशरीरमसंहननं, तथा **हुण्डसंस्थानं** तत् उत्तरवैक्रियशरीरं, हुण्डसंस्थाननाम्न एव भवप्रत्ययत उदयभावात्।।४।।

अस्साओ उववण्णो, अस्साओ चेव चयइ निरयभवं।
सव्वपुढवीसु जीवो, सव्वेसु ठिइविसेसेसुं।।५।।

कश्चित् **जीवः 'सर्वास्व**पि **पृथिवीषु'** रत्नप्रभादिषु तमस्तमापर्यन्तासु **सर्वेष्व**पि च **'स्थितिविशेषेषु'** जघन्यादिरूपेषु **'असातः'** असातोदयकलित **उपपन्नः,** उत्पत्तिकालेऽपि प्राग्भवमरणकालानुभूतमहा-दुःखानुवृत्तिभावात्, उत्पत्त्यनन्तरमपि **'असात एव'** असातोदयकलित एव सकलमपि **निरयभवं 'त्यजति'** क्षपयति, न तु जातुचिदपि सुखलेशमप्यास्वादयति।।५।।

आह–किं तत्र कदाचित्सातोदयोऽपि भवति येनेदमुच्यते?, उच्यते, भवति, तथा चाह–

उववाएण व सायं, नेरइओ देवकम्मुणा वावि।
अज्झवसाणनिमित्तं, अहवा कम्माणुभावेणं।।६।।

'उववाएण' इत्यत्र सप्तम्यर्थे तृतीया, उपपातकाले **'सातं'** सातवेदनीयकर्मोदयं कश्चिद्वेदयते, यः प्राग्भवे दाघच्छेदादिव्यतिरेकेण मरणमुपगतोऽनतिसङ्क्लिष्टाध्यवसायी समुत्पद्यते, तदानीं हि न तस्य प्राग्भवानुबद्धमाधिरूपं दुःखं नापि क्षेत्रस्वभावजं नापि परमाधार्म्मिककृतं नापि परस्परोदीरितं, तत एवंविधदुःखाभावादसौ सातं कश्चित् वेदयते इत्युच्यते, **'देवकम्मुणा वावि'** इति देवकर्म्मणा पूर्वसाङ्गति-कदेवप्रयुक्तया क्रियया, तथाहि–गच्छति पूर्वसाङ्गतिको देवः पूर्वपरिचितस्य नैरयिकस्य वेदनोपशमनार्थं यथा **'बलदेवः कृष्णवासुदेवस्य,'** स च वेदनोपशमो देवकृतो मनाक्कालमात्र एव भवति, तत ऊर्ध्वं नियमात्क्षेत्रस्वभावजाऽन्योऽन्या वा वेदना प्रवर्त्तते, तथास्वाभाव्यात्, **'अज्झवसाणनिमित्त'**मिति अध्य-वसाननिमित्तं सम्यक्त्वोत्पादकाले तत ऊर्ध्वं कदाचित्तथाविधविशिष्टशुभाध्यवसायप्रत्ययं कश्चिद् नैरयिको बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽपि सातोदयमेवानुभवति, सम्यक्त्वोत्पादकाले हि जात्यन्धस्य चक्षुर्लाभ इव महान् प्रमोद उपजायते, तदुत्तरकालमपि कदाचित्तीर्थकरगुणानुमोदनाद्यनुगतां विशिष्टां भावनां भावयतः, ततो बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽप्यन्तः सातोदयो विजृम्भमाणो न विरुध्यते, **'अहवा कम्माणुभावेण'**

मिति अथवा 'कर्म्मानुभावेन' बाह्यतीर्थकरजन्म-दीक्षा-ज्ञाना-ऽपवर्ग्गकल्याणसम्भूतिलक्षण-बाह्यनिमित्तमधिकृत्य तथाविधस्य च सातवेदनीयस्य कर्म्मणोऽनुभावेन–विपाकोदयेन कश्चित्सातं वेदयते, न चैतद्व्याख्यानमनार्षं यत उक्तं **'वसुदेवचरिते,'** इह नैरयिकाः कुम्भ्यादिषु पच्यमानाः कुन्तादिभिर्भिद्यमाना वा भयोत्त्रस्तास्तथाविधप्रयत्नवशादूर्ध्वमुत्प्लवन्ते।। ६ ।।

ततस्तदुत्पातपरिमाणप्रतिपादनार्थमाह–

नेरइयाणुप्पाओ, उक्कोसं पंचजोयणसयाइं।
दुक्खेणभिद्दुयाणं, वेयणसयसंपगाढाणं।।७।।

नैरयिकाणां दुःखेनाभिद्रुतानां–सर्वात्मना व्याप्तानां **'वेदनाशतसंप्रगाढानां'** वेदनाशतानि–अपरिमिता वेदनाः संप्रगाढानि–अवगाढानि येषां ते वेदनाशतसंप्रगाढाः, सुखादिदर्शनात् निष्ठान्तस्य परनिपातः, तेषां हेतुहेतुमद्भावश्चात्र, यतो वेदनाशतसंप्रगाढास्ततो दुःखेनाभिद्रुताः, तेषां जघन्यत उत्पातो गव्यूतमात्रम्, एतच्च संप्रदायादवसीयते, तथा च दृश्यते क्वचिदेवमपि पाठः–**'नेरइयाणुप्पाओ गाउय उक्कोस पंचजोयणसयाइं'** इति, उत्कर्षतः पञ्च योजनशतानि इति।।७।।

दुःखेनाभिहतानामित्युक्तं ततो दुःखमेव निरूपयति–

अच्छिनिमीलियमेत्तं, नत्थि सुहं दुक्खमेव अणुबद्धं।[1]
नरए नेरइयाणं, अहोनिसं पच्चमाणाणं।।८।।

नरके नैरयिकाणामुष्णवेदनया शीतवेदनया वाऽ**हर्निशं पच्यमानानां न 'अक्षिनिमीलनमात्रमपि'** अक्षिनिकोचकालमात्रमपि अस्ति **सुखं,** किन्तु **दुःखमेव** केवलं 'प्रतिबद्धम्' **अनुबद्धं** सदाऽनुगतमिति भावः।।८।।

अथ यत्तेषां वैक्रियशरीरं तत्तेषां मरणकाले कथं भवति? इति तन्निरूपणार्थमाह–

तेयाकम्मसरीरा, सुहुमसरीरा य जे अपज्जत्ता।
जीवेण मुक्कमेत्ता, वच्चंति सहस्ससो भेदं।।९।।
अतिसीतं[2] अतिउण्हं अतितण्हा अतिखुहा अतिभयं वा।
निरए नेरइयाणं दुक्खसयाइं अविस्सामं।।१०।।

---

१. V। पडिबद्धं - मु. ।। २. एषा गाथा कखगट मु. अस्ति, L नास्ति ।।

तैजस-कार्म्मणशरीराणि यानि **'सूक्ष्मशरीराणि' (च)** सूक्ष्मनामकर्म्मोदयवतां पर्याप्तानामपर्याप्तानां चौदारिकशरीराणि वैक्रियाहारकशरीराणि च तेषामपि प्रायो मांसचक्षुरग्राह्यतया सूक्ष्मत्वात् तथा यानि **'अपर्याप्तानि'** अपर्याप्तशरीराणि तानि **जीवेन मुक्तमात्राणि** सन्ति **सहस्रशो भेदं व्रजन्ति** विसकलितास्तत्परमाणुसङ्घाता भवन्तीत्यर्थः।। ९-१० ।।

एतासामेव गाथानां सङ्ग्राहिकां गाथामाह–

एत्थ य भिन्नमुहुत्तो पोग्गल असुहा य होइ अस्साओ।
उववाओ उप्पाओ अच्छि सरीरा उ बोद्धव्वा।।११।।
नारयउद्देसओ तइओ।। से तं नेरतिया।। १२९।।

'एत्थ' इति पदोपलक्षिता प्रथमा द्वितीया **'भिन्नमुहुत्तो'** इति तृतीया **'पोग्गला'** इति 'जे पोग्गला अणिट्ठा' इत्यादि चतुर्थी **'अशुभा'** इति (जे) 'असुभा विउव्वणा खलु' इत्यादि, एवं शेषपदान्यपि भावनीयानि।।

तृतीयप्रतिपत्तौ तृतीयो नरकोद्देशकः समाप्तः।। १२९।।

तदेवमुक्तो नारकाधिकारः, सम्प्रति तिर्यगधिकारो वक्तव्यः, तत्र चेदमादिसूत्रम्–

(१३०) से किं तं तिरिक्खजोणिया?, तिरिक्खजोणिया पंचविधा पण्णत्ता, तंजहा-एगिंदियतिरिक्खजोणिया बेइंदियतिरिक्खजोणिया तेइंदियतिरिक्खजोणिया चउरिंदियतिरिक्खजोणिया पंचिंदियतिरिक्खजोणिया य।। १३० ।।

'से किं त'मित्यादि, **अथ के ते तिर्यग्योनिकाः?**, सूरिराह–**तिर्यग्योनिकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा-एकेन्द्रिया** इत्यादि सूत्रं प्रायः सुगमं केवलं भूयान् पुस्तकेषु वाचनाभेद इति यथाऽवस्थितवाचना-क्रमप्रदर्शनार्थमक्षरसंस्कारमात्रं क्रियते–एकेन्द्रिया यावत्पञ्चेन्द्रियाः।। १३०।।

(१३१)से किं तं एगिंदियतिरिक्खजोणिया?,२ पंचविहा पण्णत्ता, तंजहा-पुढविकाइयएगिंदियतिरिक्खजोणिया जाव वणस्सइकाइयएगिंदियतिरिक्खजोणिया ।।१३१ ।।

अथ के ते एकेन्द्रियाः?, एकेन्द्रियाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा-पृथिवीकायिका याव**द्वनस्पतिकायिकाः**।। १३१।।

(१३२) से किं तं पुढविक्काइयएगिंदियतिरिक्खजोणिया?, २ दुविहा पण्णत्ता, तंजहा-सुहुमपुढविकाइयएगिंदियतिरिक्खजोणिया बादरपुढविकाइयएगिंदिय-तिरिक्खजोणिया य।।१३२।।

अथ के ते पृथिवीकायिकाः?, पृथिवीकायिका **द्विविधाः प्रज्ञप्ताः, तद्यथा-सूक्ष्मपृथिवी-कायिकाश्च बादरपृथिवीकायिकाश्च**।। १३२।।

(१३३) से किं तं सुहुमपुढविकाइयएगिंदियतिरि०?, २ दुविहा पण्णत्ता, तंजहा-पज्जत्तसुहुम० अपज्जत्तसुहुम० से तं सुहुमा।।१३३ ।।

अथ के ते सूक्ष्मपृथिवीकायिकाः ?, सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्तास्तद्यथा-पर्याप्तका अपर्याप्तकाश्च।। १३३।।

(१३४) से किं तं बादरपुढविकाइय० ?, २ दुविहा पण्णत्ता, तंजहा-पज्जत्त-बादरपु० अपज्जत्तबादरपु०, से तं बायरपुढविकाइयएगिंदिय०से तं पुढवीकाइय-एगिंदिया ।। १३४ ।। (१३५) से किं तं आउक्काइयएगिंदिय० ?, २ दुविहा पण्णत्ता, एवं जहेव पुढविकाइयाणं तहेव आउकायभेदो एवं जाव वणस्सतिकाइया से तं वणस्सइकाइयएगिंदियतिरिक्ख०।। १३५।।(१३६) से किं तं बेइंदियतिरिक्ख० ?, २ दुविधा पण्णत्ता, तंजहा-पज्जत्तबेइंदियति० अपज्जत्तबेइंदियति०, से तं बेइंदि-यतिरि० एवं जाव चउरिंदिया।। १३६ ।।(१३७) से किं तं पंचेंदियतिरिक्खजोणिया ?, २ तिविहा पण्णत्ता, तंजहा- जलयरपंचेंदियतिरिक्खजोणिया थलयरपंचेंदियति-रिक्खजो० खहयरपंचेंदियतिरिक्खजोणिया।। १३७।।(१३८) से किं तं जलयर-पंचेंदियतिरिक्खजोणिया ?, २, दुविहा पण्णत्ता, तंजहा-संमुच्छिमजलयरपंचेंदिय-तिरिक्खजोणिया य गब्भवक्कंतियजलयरपंचेंदियतिरिक्खजोणिया य।। १३८।। (१३९) से किं तं संमुच्छिमजलयरपंचिंदियतिरिक्खजोणिता ?, २ दुविहा पण्णत्ता, तंजहा-पज्जत्तगसंमुच्छिम० अपज्जत्तगसंमुच्छिम० जलयरा, से तं संमुच्छिम० पंचिंदियतिरिक्ख०।। १३९।।

अथ के ते बादरपृथिवीकायिकाः ?, बादरपृथिवीकायिका द्विविधाः प्रज्ञप्तास्तद्यथा-पर्याप्तका अपर्याप्तकाश्च, एवं तावद्वक्तव्यं यावद्वनस्पतिकायिकाः। अथ के ते द्वीन्द्रियाः ?, द्वीन्द्रिया द्विविधाः प्रज्ञप्ताः-पर्याप्तका अपर्याप्तकाश्च, एवं त्रीन्द्रिय-चतुरिन्द्रिया अपि वक्तव्याः। अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः, पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्तास्तद्यथा-जलचराः स्थलचराः खचराश्च। अथ के ते जलचराः ?, जलचरा द्विविधाः प्रज्ञप्तास्तद्यथा-संमूर्च्छिमा गर्भव्युत्क्रान्तिकाश्च। अथ के ते संमूर्च्छिमाः ?, संमूर्च्छिमा द्विविधाः प्रज्ञप्तास्तद्यथा-पर्याप्तका अपर्याप्तकाश्च।।१३४-१३९।।

---

१. वणप्फतिका० SP ।।

(१४०) से किं तं गब्भवक्कंतियजलयरपंचेंदियतिरिक्खजोणिया?, २ दुविधा पण्णत्ता, तंजहा-पज्जत्तगगब्भवक्कंतिय० अपज्जत्तगब्भ० से तं गब्भवक्कंतिय-जलयर०, से तं जलयरपंचेंदियतिरि०।।१४०।। (१४१) [१]से किं तं थलयरपंचेंदिय-तिरिक्खजोणिता?, २ दुविधा पण्णत्ता, तंजहा-चउप्पयथलयरपंचेंदिय० परिसप्प-थलयरपंचेंदियतिरिक्खजोणिता।। १४१।। (१४२) से किं तं चउप्पदथलयर-पंचिंदिय०? चउप्पय० दुविहा पण्णत्ता, तंजहा-संमुच्छिमचउप्पयथलयरपंचेंदिय० गब्भवक्कंतियचउप्पयथलयरपंचेंदियतिरिक्खजोणिता य, जहेव जलयराणं तहेव चउक्कतो भेदो, से तं चउप्पदथलयरपंचेंदिय०।। १४२।।(१४३) से किं तं परिसप्प-थलयरपंचेंदियतिरिक्ख०?, २ दुविहा पण्णत्ता, तंजहा-उरपरिसप्पथलयरपंचेंदिय-तिरिक्खजोणिता भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता।।१४३।। (१४४) से किं तं उरपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता?, उरगपरि० दुविहा पण्णत्ता, तंजहा-जहेव जलयराणं तहेव चउक्कतो भेदो, एवं भुयगपरिसप्पाणवि भाणितव्वं, से तं भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता, से तं थलयरपंचेंदियतिरिक्ख-जोणिता।।१४४।।(१४५)से किं तं खहयरपंचेंदियतिरिक्खजोणिया?, खह० २ दुविहा पण्णत्ता, तंजहा-संमुच्छिमखहयरपंचेंदियतिरिक्खजोणिता गब्भवक्कं-तियखहयरपंचेंदियतिरिक्खजोणिता य।। १४५ ।।(१४६) से किं तं संमुच्छिमखहयर-पंचेंदियतिरिक्खजोणिता?, संमु० २ दुविहा पण्णत्ता, तंजहा-पज्जत्तगसंमुच्छिम-खहयरपंचेंदियतिरिक्खजोणिया अपज्जत्तगसंमुच्छिमखहयरपंचेंदियतिरिक्खजोणिया य, एवं गब्भवक्कंतियावि जाव पज्जत्तगगब्भवक्कंतियावि अपज्जत्तगगब्भवक्कं-तियावि ।। १४६ ।।

अथ के ते गर्भव्युत्क्रान्तिकाः?, गर्भव्युत्क्रान्तिका द्विविधाः प्रज्ञप्तास्तद्यथा-पर्याप्तका

१.सूत्र १४१-९ स्थाने ता. प्रतौ इत्थं संक्षिप्तः पाठः वर्तते- एवं चतुपदा उरप० भुयप० पक्खी वि- इति ।।

अपर्याप्तकाश्च, एवं चतुष्पदा उरःपरिसर्प्पा भुजपरिसर्पाः पक्षिणश्च प्रत्येकं चतुष्प्रकारा वक्तव्याः।। १४०-१४६।। सम्प्रति पक्षिणां प्रकारान्तरेण भेदप्रतिपादनार्थमाह-

(१४७) पक्खीणं[1] भंते! कतिविधे जोणिसंगहे पण्णत्ते?, गोयमा! तिविहे जोणिसंगहे पण्णत्ते, तंजहा-अंडया पोयया संमुच्छिमा ।। १४७ ।। (१४८) अंडया तिविधा पण्णत्ता, तंजहा-इत्थी पुरिसा णपुंसगा ।। १४८ ।। (१४९) पोतया तिविधा पण्णत्ता, तंजहा-इत्थी पुरिसा णपुंसया, तत्थ णं जे ते संमुच्छिमा ते सव्वे णपुंसका।। १४९।।

'**पक्खिणं भंते!**' इत्यादि, पक्षिणां **भदन्त!** '**कतिविधः**' कतिप्रकारः '**योनिसङ्ग्रहः**' योन्या सङ्ग्रहणं योनिसङ्ग्रहो योन्युपलक्षितं ग्रहणमित्यर्थः **[प्रज्ञप्तः?]**, भगवानाह- **गौतम! त्रिविधो योनिसङ्ग्रहः प्रज्ञप्तस्तद्यथा-अण्डजा-**मयूरादयः **पोतजा-**वागुल्यादयः **संमूर्च्छिमाः** खञ्जरीटादयः, **अण्डजास्त्रिविधाः प्रज्ञप्तास्तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, पोतजास्त्रिविधाः प्रज्ञप्तास्तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः,** संमूर्च्छिमानामवश्यं नपुंसकवेदोदयभावात्।। १४७-१४९।।

(१५०) एतेसि णं भंते! जीवाणं कति लेसाओ पण्णत्ताओ?, गोयमा! छल्लेसाओ पण्णत्ताओ, तंजहा-कण्हलेसा[2] जाव सुक्कलेसा।। १५०।।

'**एएसि ण**'मित्यादि, '**एतेषां**' पक्षिणां **भदन्त! जीवानां कति लेश्याः प्रज्ञप्ताः?**, भगवानाह- **गौतम! षड् लेश्याः प्रज्ञप्ताः, तद्यथा-कृष्णलेश्या यावत् शुक्ललेश्या,** तेषां द्रव्यतो भावतो वा सर्वा लेश्याः, परिणामसम्भवात्।। १५० ।।

(१५१) ते णं भंते! जीवा किं सम्मदिट्ठी ? मिच्छदिट्ठी ? सम्मामिच्छदिट्ठी?, गोयमा! सम्मदिट्ठीवि मिच्छदिट्ठीवि सम्मामिच्छदिट्ठीवि।। १५१ ।।

---

१. जे. खहयरपंचेंदियतिरिक्खजोणियाणं भंते - **मु. L** ।। २. इतः १५९ सूत्रपर्यन्तं **जे. प्रतौ इत्थं संक्षिप्तः पाठः-** कण्हादि ६ दिट्ठीओ ३ णाणा भयणो अण्णाणा ३, भयणाए जोगो ३ उवयोगो २ तेणं भंते ! कतो उवव० जधा दुविधेसु । जहं अंतो. मु. उक्कोस पलित असंखेज्जति ताउ धणुसमुग्धाता ता । ते णं भंते मारणंतिय किं समो- असं. दोसु वि मरंति । ते णं भंते ! अणंतर चयं च. जहा दुविधेसु- ।।

'ते णं भंते!' इत्यादि, **ते भदन्त!** पक्षिणो **जीवाः किं सम्यग्दृष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयश्च?,** भगवानाह–**गौतम!** त्रिविधा अपि।। १५१ ।।

(१५२) ते णं भंते! जीवा किं णाणी अण्णाणी?, गोयमा! णाणीवि अण्णाणीवि तिण्णि णाणाइं तिण्णि अण्णाणाइं भयणाए।। १५२।।

'ते णं भंते!' इत्यादि, **ते भदन्त! जीवाः किं ज्ञानिनोऽज्ञानिनः?,** भगवानाह–**गौतम!** द्वयेऽपि, **ज्ञानिनोऽज्ञानिनोऽपी**त्यर्थः, तत्र ये ज्ञानिनस्ते द्विज्ञानिनस्त्रिज्ञानिनो वा येऽप्यज्ञानिनस्तेऽपि द्व्यज्ञानिनस्त्र्यज्ञानिनो वा।। १५२।।

(१५३) ते णं भंते! जीवा किं मणजोगी ? वइजोगी ? कायजोगी?, गोयमा! तिविधावि।। १५३ ।।

'ते ण'मित्यादि, **ते भदन्त! जीवाः किं मनोयोगिनो वाग्योगिनः काययोगिनः?,** भगवानाह–**गौतम! त्रयोऽपि**।। १५३ ।।

(१५४) ते णं भंते! जीवा किं सागारोवउत्ता ? अणागारोवउत्ता?, गोयमा! सागारोवउत्तावि अणागारोवउत्तावि।। १५४।। (१५५) ते णं भंते! जीवा कओ उववज्जंति ? किं नेरतिएहिंतो उव० ? तिरिक्खजोणिएहिंतो उव० ? पुच्छा, गोयमा! असंखेज्जवासाउयअकम्मभूमगअंतरदीवगवज्जेहिंतो उववज्जंति।।१५५।। (१५६) तेसि णं भंते! जीवाणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! जहण्णेणं अंतोमुहुत्तं उक्कोसेणं पलिओवमस्स असंखेज्जतिभागं।।१५६।। (१५७) तेसि णं भंते! जीवाणं कति समुग्घाता पण्णत्ता?, गोयमा! पंच समुग्घाता पण्णत्ता, तंजहा- वेदणासमुग्घाए जाव[1] तेयासमुग्घाए।। १५७।।

'ते णं भंते!' इत्यादि, **ते भदन्त! जीवाः किं साकारोपयुक्ताः? अनाकारोपयुक्ताः?,** भगवानाह– द्वयेऽपि, **साकारोपयुक्ता अनाकारोपयुक्ता**श्चेत्यर्थः।। **'ते णं भंते!'** इत्यादि, **ते भदन्त!** पक्षिणो **जीवाः कुत उत्पद्यन्ते? नैरयिकेभ्य** इत्यादि यथा **प्रज्ञापनायां** व्युत्क्रान्तिपदे तथा द्रष्टव्यम्।। **'तेसि**

१. द्र. प्रज्ञापनायां ३६/१ ।।

ण'मित्यादि, **तेषां भदन्त!** पक्षिणां **कियन्तं कालं स्थितिः प्रज्ञप्ता?**, भगवानाह–**गौतम! जघन्येनान्तर्मुहूर्तमुत्कर्षतः पल्योपमासङ्ख्येयभागः।। 'तेसि ण**'मित्यादि, **तेषां भदन्त! जीवानां कति** समुद्घाताः **प्रज्ञप्ताः?**, भगवानाह–**गौतम! पञ्च समुद्घाताः प्रज्ञप्ताः, तद्यथा-वेदनासमुद्घातः** कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घात**स्तैजससमुद्घातश्च**।। १५४-१५७।।

(१५८) ते णं भंते! जीवा मारणांतियसमुग्घाएणं किं समोहता मरंति असमोहता मरंति?, गोयमा! समोहतावि म० असमोहयावि मरंति।।१५८।।(१५९) ते णं भंते! जीवा अणंतरं उव्वट्टित्ता कहिं गच्छंति? कहिं उववज्जंति? किं नेरतिएसु उववज्जंति? तिरिक्ख० पुच्छा, गोयमा! एवं उव्वट्टणा भाणियव्वा जहा[1] वक्कंतीए तहेव ।। १५९।। (१६०) तेसि णं भंते! जीवाणं कति जातीकुलकोडिजोणीपमुहसयसहस्सा पण्णत्ता?, गोयमा! बारस जातीकुलकोडीजोणीपमुहसयसहस्सा।। १६०।।

'ते णं भंते!' इत्यादि, **ते भदन्त! जीवा मारणान्तिकसमुद्घातेन किं समवहता म्रियन्ते असमवहता म्रियन्ते?**, भगवानाह–**गौतम! समवहता अपि म्रियन्ते असमवहता अपि म्रियन्ते।। 'ते णं भंते!'** इत्यादि, **ते भदन्त! जीवा अनन्तरमुद्वृत्त्य क्व गच्छन्ति?**, एतदेव व्याचष्टे–**'एवं उव्वट्टणा'** इत्यादि, यथा द्विविधप्रतिपत्तौ[2] तथा द्रष्टव्यम्।। **'तेसि ण**'मित्यादि, **तेषां भदन्त! जीवानां 'कति'** किंप्रमाणानि जातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवाहानि शतसहस्राणि योनिप्रमुखशतसहस्राणि **जातिकुलकोटियोनिप्रमुखशतसहस्राणि** भवन्ति?, भगवानाह–**द्वादश जातिकुलकोटीयोनिप्रमुख-शतसहस्राणि** प्रज्ञप्तानि, तत्र जातिकुलयोनीनामिदं परिस्थूरमुदाहरणं पूर्वाचार्यैरुपादर्शि–जातिरिति किल तिर्यग्जातिस्तस्याः कुलानि-कृमि-कीट-वृश्चिकादीनि, इमानि च कुलानि योनिप्रमुखाणि, तथाहि–एकस्यामेव योनौ अनेकानि कुलानि भवन्ति, तथाहि–छगणयोनौ कृमिकुलं कीटकुलं वृश्चिककुलमित्यादि, अथवा जातिकुलमित्येकं पदं, जातिकुलयोन्योश्च परस्परं विशेषः एकस्यामेव योनावनेकजातिकुलसम्भवात्, तद्यथा–एकस्यामेव छगणयोनौ कृमिजातिकुलं कीटजातिकुलं वृश्चिकजातिकुलमित्यादि, एवं चैकस्यामेव

---

१. द्र. प्रज्ञापनायाम् ६/१०५-१०९।। २. व्युत्क्रान्तिपदवत्तत्र भणितत्वात् वृत्तौ यथायथं, मूले तु प्रज्ञापनायां व्युत्क्रान्तिपद एव यथायथं सूत्रमिति वक्कंतीएत्ति सूत्रम् ।।

योनावपवान्तरजातिभेदभावादनेकानि योनिप्रवाहाणि जातिकुलानि सम्भवन्तीत्युपपद्यते, खचरपञ्चेन्द्रियतिर्यग्योनिजानां द्वादश जातिकुलकोटिशतसहस्राणि, अत्र **'सङ्ग्रहणि'**गाथा-

"जोणीसंगहलेस्सादिट्ठी नाणे य जोग उवओगे।
उववायठिईसमुग्घाय चयणं जाई कुलविही उ।।१।।" [ ]

अस्या अक्षरगमनिका-प्रथमं योनिसङ्ग्रहद्वारं ततो लेश्याद्वारं ततो दृष्टिद्वारमित्यादि।।१५८-१६०।।

(१६१) भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणियाणं भंते! कतिविधे जोणीसंगहे पण्णत्ते?, गोयमा! तिविहे जोणीसंगहे पण्णत्ते, तंजहा-अंडया पोयया संमुच्छिमा, एवं जहा खहयराणं तहेव, णाणत्तं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता दोच्चं पुढविं गच्छंति, णव जातीकुलकोडीजोणीपमुहसतसहस्सा भवंतीति मक्खायं, सेसं तहेव।।१६१।। (१६२) उरगपरिसप्पथलयरपंचेंदियतिरिक्खजोणियाणं भंते! पुच्छा, जहेव भुयगपरिसप्पाणं तहेव, णवरं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता जाव पंचमिं पुढविं गच्छंति, दस जातीकुलकोडी०।। १६२।। (१६३) चउप्पयथलयरपंचेंदियतिरिक्ख० पुच्छा, गोयमा! दुविधे जोणीसंगहे पण्णत्ते, तंजहा-जराउया[1] (पोयया) य संमुच्छिमा य ।।१६३।।

'भुयगाणं भंते!' इत्यादि, **भुजगानां भदन्त! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः?**, इत्यादि पक्षिवत् सर्वं-निरवशेषं वक्तव्यं, नवरं स्थिति-च्यवन-कुलकोटिषु **नानात्वं,** तद्यथा-स्थिति**र्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी,** च्यवनम्-उद्वर्त्तना, तत्र नरकगतिचिन्तायामधो यावद् **द्वितीया पृथिवी** उपरि यावत्सहस्रारः कल्पस्तावदुत्पद्यते, **नव** तेषां **जातिकुलकोटियोनिप्रमुखशतसहस्राणि** प्रज्ञप्तानि।। एव**मुरःपरिसर्पाणामपि वक्त**व्यं, नवरं तत्र च्यवनद्वारेऽधश्चिन्तायां **यावत्पञ्चमी पृथिवी**ति वक्तव्यं, कुलकोटिचिन्तायां **दश जातिकुलकोटियोनिप्रमुखशतसहस्राणि** प्रज्ञप्तानि।। **'चउप्पयाण'**मित्यादि, **चतुष्पदानां भदन्त!** कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः?, भगवानाह-

---

१. जराउया संमु० **कखगट** । **"ठाणं (३/३६,३९,४२,४५) सूत्रेषु क्रमशः मत्स्यानां पक्षिणां उरःपरिसर्पाणां भुजपरिसर्पाणां च अण्डज-पोतज-सम्मुर्च्छिमरूपेण त्रिविधत्वं प्रज्ञापितमस्ति, एवं चतुष्पदजलचराणां त्रिविधत्वं नास्ति तत्र प्रज्ञापितम् । अत्र विवक्षाभेद एव कारणम्"। इति ⌊ पृ.२८२ टि.२।।**

गौतम! **द्विविधो योनिसङ्ग्रहः प्रज्ञप्तः, तद्यथा-पोतजाः संमूर्च्छिमाश्च,** इह येऽण्डजव्यतिरिक्ता गर्भव्युत्क्रान्तास्ते सर्वे जरायुजा अजरायुजा वा पोतजा इति [पूर्वमपि विवक्षिताः परमत्र तु सर्वेऽपि गर्भव्युत्क्रान्तिकाः पोतजतया] विवक्षितमतोऽत्र द्विविधो यथोक्तस्वरूपो योनिसङ्ग्रह उक्तः, अन्यथा गवादीनां जरायुजत्वात् [सर्पादीनामण्डजत्वात्] तृतीयोऽपि जरायु(अण्डज)लक्षणो योनिसङ्ग्रहो वक्तव्यः स्यादिति।।१६१-१६३।।

(१६४)[से किं तं] जराउया (पोयया)?, २ तिविधा पण्णत्ता, तंजहा-इत्थी पुरिसा णपुंसका, तत्थ णं जे ते संमुच्छिमा ते सव्वे णपुंसया।। १६४।।(१६५) तेसि णं भंते! जीवाणं कति लेस्साओ पण्णत्ताओ?, सेसं जहा पक्खीणं, णाणत्तं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, उव्वट्टित्ता चउत्थिं पुढविं गच्छंति, दस जातीकुलकोडी।।१६५।।(१६६) जलयरपंचेंदियतिरिक्खजोणियाणं पुच्छा, जहा भुयगपरिसप्पाणं णवरं उव्वट्टित्ता जाव अधेसत्तमिं पुढविं अद्धतेरस जातीकुलकोडीजोणीपमुह० जाव[1] प०।। १६६।।

तत्र ये ते **पोतजास्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः, शेषद्वारकलापः** पूर्ववत्, नवरं **स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि,** च्यवनद्वारेऽधश्चिन्तायां याव**च्चतुर्थी पृथिवी** ऊर्ध्वं यावत्सहस्रारः, **जातिकुलकोटियोनिप्रमुखशतसहस्राण्यत्रापि दश**।। **'जलचराणा'**मित्यादि, **जलचराणां** भदन्त! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः?, भगवानाह-गौतम! त्रिविधो योनिसङ्ग्रहः प्रज्ञप्तः, तद्यथा-अण्डजाः पोतजाः संमूर्च्छिमाश्च, अण्डजास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, पोतजास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः, शेषद्वारकलापचिन्ता प्राग्वत्, नवरं स्थिति-च्यवन-जातिकुलकोटिषु नानात्वं, स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, च्यवनद्वारेऽधश्चिन्तायां **यावत्सप्तमी** ऊर्ध्वं यावत्सहस्रारः, **कुलकोटियोनिप्रमुखशतसहस्राणि अर्द्धत्रयोदश** सार्द्धानि द्वादशेत्यर्थः।।१६४-१६६।।

---

१. द्र. सू. ३/१६०।।

(१६७) चउरिंदियाणं भंते! कति जातीकुलकोडीजोणीपमुहसतसहस्सा पण्णत्ता?, गोयमा! नव जाईकुलकोडीजोणीपमुह०[जाव] समक्खाया।।१६७।। (१६८) तेइंदियाणं पुच्छा, गोयमा! अट्ठजाईकुल जाव समक्खाया।।१६८।। (१६९) बेइंदियाणं भंते! कइ जाई०?, पुच्छा, गोयमा! सत्त जाईकुलकोडीजोणीपमुह० ।।१६९।।

'**चउरिंदियाण**'मित्यादि, **चतुरिन्द्रियाणां भदन्त! कति जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि?,** भगवानाह–**नव जातिकुलकोटियोनिप्रमुखशतसहस्राणि** प्रज्ञप्तानि, एवं **त्रीन्द्रियाणामष्टौ जातिकुलकोटियोनिप्रमुखशतसहस्राणि, द्वीन्द्रियाणां सप्त जातिकुलकोटियोनिप्रमुखशतसहस्राणि** प्रज्ञप्तानि।। १६७-१६८-१६९।।

इह जातिकुलकोट्यो योनिजातीयास्ततो भिन्नजातीयाभिधानप्रसङ्गतो गन्धाङ्गानि भिन्नजातीयत्वात् प्ररूपयति–

(१७०) कइ णं भंते! [१]गंधंगा पण्णत्ता? कइ णं भंते! [२]गंधंगसया पण्णत्ता?, गोयमा! सत्त गंधंगा सत्त गंधंगसया पण्णत्ता।। १७० ।।

'**कइ ण**'मित्यादि, **कति भदन्त! गन्धाङ्गानि,** क्वचिद् गन्धा इति पाठस्तत्र पदैकदेशे पदसमुदायोपचाराद् गन्धा इति गन्धाङ्गानीति द्रष्टव्यं **प्रज्ञप्तानि?**, तथा कति **गन्धाङ्गशतानि प्रज्ञप्तानि?,** भगवानाह–**गौतम! सप्त गन्धाङ्गानि सप्त गन्धाङ्गशतानि प्रज्ञप्तानि,** इह सप्त गन्धाङ्गानि परिस्थूरजातिभेदादमूनि, तद्यथा–मूलं त्वक् काष्ठं निर्यासः पत्रं पुष्पं फलं च, तत्र मूलं– मुस्ता-वालुकोशीरादि, त्वक्– सुवर्णछल्लीत्वचाप्रभृति, काष्ठं– चन्दनागुरुप्रभृति, निर्यासः– कर्पूरादिः, पत्रं– जातिपत्र-तमालपत्रादि, पुष्पं– प्रियङ्गुनागरपुष्पादि, फलं– जातिफलककोलकैलालवङ्गप्रभृति, एते च वर्णमधिकृत्य प्रत्येकं कृष्णादिभेदात्पञ्च पञ्च भेदा इति वर्णपञ्चकेन गुण्यन्ते जाताः पञ्चत्रिंशत्, गन्धचिन्तायामेते सुरभिगन्धय एवेत्येकेन गुणिताः पञ्चत्रिंशत् जाताः पञ्चत्रिंशदेव '**एकेन गुणितं तदेव भवती**' [ ] ति न्यायात्, तत्राप्येकैकस्मिन् वर्णभेदे रसपञ्चकं द्रव्यभेदेन विवित्तं प्राप्यते इति

---

१. गंधा-मु. ।। २. गंधसया - **मु.** ।।

सा पञ्चत्रिंशत् रसपञ्चकेन गुण्यते जाताः पञ्चसप्ततिशतं, स्पर्शाश्च यद्यप्यष्टौ भवन्ति तथाऽपि गन्धाङ्गेषु यथोक्तरूपेषु प्रशस्या व्यवहारतश्चत्वार एव मृदु-लघु-शीतोष्णरूपास्ततः पञ्चसप्ततं शतं स्पर्शचतुष्टयेन गुण्यते जातानि सप्त शतानि, उक्तञ्च–

"मूल-तय-कट्ठ-निज्जास-पत्त-पुप्फ-प्फलमेय गंधंगा।
वण्णादुत्तरभेया गंधंगसया मुणेयव्वा।।१।।"

अस्य व्याख्यानरूपं गाथाद्वयम्–

"मुत्थासुवण्णछल्ली अगुरू वाला तमालपत्तं च।
तह य पियंगू जाईफलं च जाईऍ गंधंगा।।१।।
गुणणाए सत्त सया पंचहिं वण्णेहिं सुरभिगंधेणं।
रसपणएणं तह फासेहि य चउहिं मित्ते(पसत्थे)हिं।।२।।"

अत्र 'जाईए गंधंगा' इति जात्या जातिभेदेनामूनि गन्धाङ्गानि, शेषं भावितम्।।१७०।।

(१७१) कइ णं भंते! पुप्फजातीकुलकोडीजोणिपमुहसयसहस्सा पण्णत्ता?, गोयमा! सोलस पुप्फजातीकुलकोडीजोणीपमुहसयसहस्सा पण्णत्ता, तंजहा-चत्तारि जलजाणं चत्तारि थलजाणं चत्तारि महारुक्खियाणं[१] चत्तारि महागुम्मिताणं।। १७१।।

'कइ ण'मित्यादि, **कति भदन्त! पुष्पजातिकुलकोटिशतसहस्राणि प्रज्ञप्तानि?**, भगवानाह- **गौतम! षोडश पुष्पजातिकुलकोटिशतसहस्राणि प्रज्ञप्तानि, तद्यथा-चत्वारि 'जलजानां'** पद्मानां जातिभेदेन, तथा **चत्वारि 'स्थलजानां'** कोरण्टकादीनां जातिभेदेन, **चत्वारि महागुल्मिकादीनां** जात्यादीनां, **चत्वारि 'महावृक्षाणां'** मधुकादीनामिति।।१७१।।

(१७२) कति णं भंते! वल्लीओ? कति वल्लिसता पण्णत्ता?, गोयमा! चत्तारि वल्लीओ चत्तारि वल्लीसता पण्णत्ता।। १७२ ।।

'कइ ण'मित्यादि, **कति भदन्त! वल्लयः? कति वल्लिशतानि प्रज्ञप्तानि?**, भगवानाह- **गौतम! चतस्रो वल्लय**स्त्रपुष्यादिमूलभेदेन, ताश्च **'मूलटीकाकृता'** वैविक्त्येन न व्याख्याता इति सम्प्रदायादवसेयाः, **चत्वारि वल्लिशतान्ये**वावान्तरजातिभेदेन।। १७२ ।।

---

१. महारुक्खाणं L ।।

(१७३) कति णं भंते! लताओ ? कति लतासता पण्णत्ता?, गोयमा! अट्ठ लयाओ अट्ठ लतासता पण्णत्ता।। १७३।।

'कइ ण'मित्यादि, **कति भदन्त! लताः कति लताशतानि प्रज्ञप्तानि?,** भगवानाह-**गौतम! अष्टौ लता** या मूलभेदेन ता अपि संप्रदायादवसातव्याः, **'मूलटीकाकारेणा'**व्याख्यानात्, **अष्टौ लताशतानि प्रज्ञप्तानि,** अवान्तरजातिभेदेन।।१७३ ।।

(१७४) कति णं भंते! हरियकाया ? हरियकायसया पण्णत्ता?, गोयमा! तओ हरियकाया तओ हरियकायसया पण्णत्ता, फलसहस्सं च बिंटबद्धाणं फलसहस्सं च णालबद्धाणं, ते वि सव्वे हरितकायमेव समोयरंति। ते एवं समणुगम्ममाणा २ एवं समणुगाहिज्जमाणा २ एवं समणुपेहिज्जमाणा २ एवं समणुचिंतिज्जमाणा २ एएसु चेव दोसु काएसु समोयरंति, तंजहा-तसकाए चेव थावरकाए चेव, एवमेव सपुव्वावरेणं आजीवयदिट्ठंतेणं चउरासीति जातिकुलकोडीजोणीपमुहसतसहस्सा भवंतीति मक्खाया।। १७४ ।।

'कइ ण'मित्यादि, **कति भदन्त! हरितकायाः कति हरितकायशतानि प्रज्ञप्तानि?,** भगवानाह-**गौतम! त्रयो हरितकायाः प्रज्ञप्ताः**-जलजाः स्थलजा उभयजाः, एकैकस्मिन् शतमवान्तरभेदानामिति, **त्रीणि हरितकायशतानि। 'फलसहस्सं चे'**त्यादि, **फलसहस्रं च 'वृन्तबन्धानां'** वृन्ताकप्रभृतीनां **फलसहस्रं च नालबद्धानां, 'तेऽवि सव्वे'** इत्यादि, तेऽपि सर्वे भेदा अपिशब्दादन्येऽपि तथाविधाः **'हरितकायमेव समवतरन्ति'** हरितकायेऽन्तर्भवन्ति हरितकायोऽपि वनस्पतौ वनस्पतिरपि स्थावरेषु, स्थावरा अपि जीवेषु, **तत एवं समनुगम्यमाना२**स्तथा जात्यन्तर्भावेन स्वत एव सूत्रतः, तथा **समनुग्राह्यमाणाः समनुग्राह्यमाणाः** परेण सूत्रत एव, तथा **समनुप्रेक्ष्यमाणाः समनुप्रेक्ष्यमाणा** अनुप्रेक्षया अर्थालोचनरूपया, तथा **समनुचिन्त्यमानाः समनुचिन्त्यमानास्**तथा तथा तन्त्रयुक्तिभिः, **एतयोरेव द्वयोः कायोः समवतरन्ति, तद्यथा-त्रसकाये च स्थावरकाये च, 'एवामेव'** इत्यादि, **'एवमेव'** उक्तेनैव प्रकारेण **'सपुव्वावरेणं'** पूर्वं चापरं च पूर्वापरं सह पूर्वापरं येन स सपूर्वापरः उक्तप्रकारस्तेन, उक्तविषयपौर्वापर्यालोचनयेति भावार्थः, **'आजीवगदिट्ठंतेणं'**ति आ-सकलजगदभिव्याप्त्या

जीवानां यो दृष्टान्तः-परिच्छेदः स आजीवदृष्टान्तस्तेन सकलजीवदर्शनेनेत्यर्थः, आह च मूलटीकाकारः- "आजीवदृष्टान्तेन सकलजीवनिदर्शनेने" [ ]ति, **चतुरशीतिजातिकुलकोटियोनिप्रमुखशतसहस्राणि भवन्तीत्याख्यातं** मयाऽन्यैश्च ऋषभादिभिरिति, अत्र चतुरशीतिसङ्ख्योपादानमुपलक्षणं, तेनान्यान्यपि जातिकुलकोटियोनिप्रमुखशतसहस्राणि वेदितव्यानि, तथाहि-पक्षिणां द्वादश जातिकुलकोटियोनिप्रमुखशतसहस्राणि, भुजगपरिसर्पाणां नव, उरगपरिसर्पाणां दश, चतुष्पदानां दश, जलचराणामर्द्धत्रयोदशानि, चतुरिन्द्रियाणां नव, त्रीन्द्रियाणामष्टौ, द्वीन्द्रियाणां सप्त, पुष्पजातीनां षोडश, एतेषां चैकत्र मीलने त्रिनवतिजातिकुलकोटियोनिप्रमुखशतसहस्राणि सार्द्धानि भवन्ति, ततश्चतुरशीतिसङ्ख्योपादानमुपलक्षणमवसेयं, न चैतद् व्याख्यानं स्वमनीषिकाविजृम्भितं, यत उक्तं चूर्णौ-"आजीवगदिट्ठंतेणं" [ ]ति अशेषजीवनिदर्शनेन चउरासीजातिकुलकोडियोनिप्रमुखशतसहस्रा एतत्प्रमुखा अन्येऽपि विद्यन्ते इति।। १७४।।

कुलकोटिविचारणे विशेषाधिकाराद्विमानान्यप्यधिकृत्य विशेषप्रश्नमाह-

(१७५) अत्थि णं भंते! विमाणाइं[1] अच्चीणि अच्चियावत्ताइं अच्चिप्पभाइं अच्चिकंताइं अच्चिवण्णाइं अच्चिलेस्साइं अच्चिज्झयाइं अच्चिसिंगाइं अच्चिसिट्ठाइं अच्चिकूडाइं अच्चुत्तरवडिंसगाइं ? हंता अत्थि।। १७५ ।।

'**अत्थि णं भंते**' इत्यादि, अस्तीति निपातो बह्वर्थे '**सन्ति**' विद्यन्ते **ण**मिति वाक्यालङ्कारे '**विमानानि**' विशेषतः पुण्यप्राणिभिर्मन्यन्ते-तद्गतसौख्यानुभवनेनानुभूयन्ते इति विमानानि, तान्येव नामग्राहमाह-**अचीँषि**-अर्चिर्नामानि, एव**मर्चिरावर्त्तानि अर्चिःप्रभाणि अर्चिःकान्तानि अर्चिर्वर्णानि अर्चिर्लेश्यानि अर्चिर्ध्वजानि अर्चिःशृङ्गा(णि) अर्चिःसृ**(शि)**ष्टानि अर्चिःकूटानि अर्चिरुत्तरावतंसकानि** सर्वसङ्ख्यया एकादश नामानि, भगवानाह-'**हंता अत्थि**' हंतेति प्रत्यवधारणे अस्तीति निपातो बह्वर्थे सन्त्येवैतानि विमानानीति भावः।। १७५ ।।

(१७६) ते णं भंते! विमाणा केमहालया प०? गोयमा! जावतिए णं सूरिए उदेति जावइएणं च सूरिए अत्थमेति एवतियाइं तिण्णोवासंतराइं अत्थेगतियस्स देवस्स एगे विक्कमे सिता । से णं देवे ताए उक्किट्ठाए तुरियाए जाव दिव्वाए

---

१. विमाणाइं सोत्थियाणि सोत्थियावत्ताइं सोत्थियपभाइं सोत्थियकंताइं सोत्थियवन्नाइं सोत्थियलेसाइं सोत्थियज्झयाइं सोत्थिसिंगाराइं सोत्थिकूडाइं सोत्थिसिट्ठाइं सोत्थुत्तरवडिंसगाइं हंता अत्थि-मु. SP ।।

देवगतीए वीतीवयमाणे २ जाव [जहन्नेणं] एकाहं वा दुयाहं वा उक्कोसेणं छम्मासे वितीवएज्जा, अत्थेगतियं[1] विमाणं वितीवइज्जा अत्थेगतियं[2] विमाणं नो वीतीवएज्जा, एमहालता णं गोयमा! ते विमाणा पण्णत्ता ।। १७६।।

'केमहालया ण'मित्यादि, **किंमहान्ति** कियत्प्रमाणमहत्त्वानि **ण**मिति पूर्ववत् **भदन्त**! तानि विमानानि **प्रज्ञप्तानि?**, भगवानाह-**गौतम! 'जाव[3] य उएइ सूरो'** इत्यादि, जम्बूद्वीपे सर्वोत्कृष्टे दिवसे सर्वाभ्यन्तरे मण्डले वर्त्तमानः सूर्यो यावति क्षेत्रे उदेति **यावति** च क्षेत्रे **सूर्योऽस्तमुपयाति, एतावन्ति त्रीणि अवकाशान्तराणि,** उदयास्तमितप्रमितमधिकृतं क्षेत्रं त्रिगुणमित्यर्थः, **अस्त्येतद्**-बुद्ध्या परिभावनीयमेतद् यथैकस्य विवक्षितस्य **देवस्यैको विक्रमः स्यात्,** तत्र जम्बूद्वीपे सर्वोत्कृष्टे दिवसे सूर्य उदेति सप्तचत्वारिंशत्सहस्राणि द्वे शते त्रिषष्ट्यधिके योजनानामेकस्य च योजनस्यैकविंशतिः षष्टिभागा एतावति क्षेत्रे, उक्तञ्च-

'सीयालीससहस्सा, दोण्णि सया जोयणाण तेवट्ठी।
इगवीस सट्ठिभागा कक्कडमाइंमि पेच्छ नरा।।१।।'

४७ २१/६०, एतावत्येव क्षेत्रे तस्मिन् सर्वोत्कृष्टे दिवसेऽस्तमुपयाति, तत एतत्क्षेत्रं द्विगुणीकृतमुदयास्तापान्तरालप्रमाणं भवति, तच्चैतावत्-चतुर्नवतिः सहस्राणि पञ्च शतानि षड्विंशत्यधिकानि योजनानामेकस्य च योजनस्य [च] द्वाचत्वारिंशत्षष्टिभागाः ९४५२६ ४२/६० एतावस्त्रिगुणीकृतं यथोक्तविमानपरिमाणकरणाय देवस्यैको विक्रमः परिकल्प्यते, स चैवंप्रमाणः-द्वे लक्षे त्र्यशीतिः सहस्राणि पञ्च शतानि अशीत्यधिकानि योजनानाम् एकस्य च योजनस्य षष्टिभागाः षट् २८३५८० ६/६० इति।। **'से णं देवे'** इत्यादि, **'सः'** विवक्षितो **देवः 'तया'** सकलदेवजनप्रसिद्धया **उत्कृष्टया त्वरितया** चपलया चण्डया शीघ्रया उद्धतया जवनया छेकया **दिव्यया देवगत्या,** अमीषां पदानामर्थः प्राग्वद्भावनीयः, **व्यतिव्रजन् व्यतिव्रजन् जघन्यत एकाहं वा द्व्यहं वा** याव**दुत्कर्षतः षण्मासान्** यावद् **'व्यतिव्रजेत्'** गच्छेत्, तत्रैवं गमने अ[ग्रन्थाग्रम् ४०००] **स्त्येतद् यथैकं** किञ्चन **विमानं** पूर्वोक्तानां विमानानां मध्ये **'व्यतिव्रजेत्'** अतिक्रामेत्, तस्य पारं लभेतेति भावः, तथा**ऽस्त्येतद् यथैककं विमानं न व्यतिव्रजेत्,** न तस्य पारं लभेत, उभयत्रापि जातावेकवचनं, ततोऽयं भावार्थः-

---

१-२. अत्थेगतिया - **मु.** ।। ३. **अत्र सूत्र-वृत्त्योः भेदः** ।।

उक्तप्रमाणेनापि क्रमेण यथोक्तरूपयाऽपि च गत्या षण्मासानपि यावदधिकृतो देवो गच्छति तथापि केषाञ्चिद्विमानानां पारं लभते केषाञ्चित्पारं न लभते इति, **एतावन्महान्ति** तानि **विमानानि प्रज्ञप्तानि** हे श्रमण! हे आयुष्मन्!।। १७६।।

(१७७) अत्थि णं भंते! विमाणाइं[१] अच्चीणि अच्चिरावत्ताइं तहेव जाव[२] अच्चुत्तरवडिंसगातिं?, हंता अत्थि, (१७८) ते विमाणा केमहालता पण्णत्ता?, गोयमा! एवं जहा सोत्थी(याई)णि णवरं एवतियाइं पंच ओवासंतराइं अत्थेगतियस्स देवस्स एगे विक्कमे सिता [३]सेसं तं चेव।। १७८।।

'अत्थि णं भंते!' इत्यादि, **सन्ति भदन्त! विमानानि** स्वस्तिकानि स्वस्तिकावर्त्तानि स्वस्तिकप्रभाणि स्वस्तिककान्तानि स्वस्तिकवर्णानि स्वस्तिकलेश्यानि स्वस्तिकध्वजानि स्वस्तिकशृङ्गाराणि स्वस्तिकशिष्टानि स्वस्तिककूटानि स्वस्तिकोत्तरावतंसकानि?, **'हंता अत्थि'** इत्यादि, समस्तं प्राग्वत्, **नवरमत्र 'एवइयाइं पंच ओवासंतराइं'** इति कण्ठ्यं, उदयास्तापान्तरालक्षेत्रं पञ्चगुणं क्रियत इति भावः।।१७७-१७८।।

(१७९)अत्थि णं भंते! विमाणाइं कामाइं कामावत्ताइं जाव कामुत्तरवडिंसयाइं?, हंता अत्थि, (१८०) ते णं भंते! विमाणा केमहालया पण्णत्ता?, गोयमा! जहा [४]सोत्थीणि णवरं सत्त ओवासंतराइं विक्कमे सेसं तहेव।।१८०।। (१८१) अत्थि णं भंते! विमाणाइं विजयाइं वेजयंताइं जयंताइं अपराजिताइं?, हंता अत्थि, (१८२) ते णं भंते! विमाणा के०?, गोयमा! जावतिए सूरिए उदेइ० एवइयाइं नव ओवासंतराइं, सेसं तं चेव, नो चेव णं ते विमाणे वीईवएज्जा एमहालया णं विमाणा पण्णत्ता, समणाउसो!।। १८२ ।।

तिरिक्खजोणियउद्देसओ पढमो।।

'अत्थि णं भंते!' इत्यादि, **सन्ति भदन्त! विमानानि कामानि कामावर्तानि** कामप्रभाणि कामकान्तानि कामवर्णानि कामलेश्यानि कामध्वजानि कामशृङ्गाराणि कामशिष्टानि कामकूटानि

१. सूत्र १७७-१८२ जे. नास्ति ।। २. द्र.३/१७५ सूत्र. ।। ३. द्र. ३/१७६ सूत्र ।। ४. अच्चीणि-मु.।।

कामोत्तरावतंसकानि?, 'हंता अत्थि' इत्यादि सर्वं पूर्ववत् नवरमत्रोदयास्तापान्तरालक्षेत्रं सप्तगुणं कर्त्तव्यं, शेषं तथैव।। **'अत्थि णं भंते!'** इत्यादि, **सन्ति भदन्त! विजयवेजयन्तजयन्तापराजितानि विमानानि?, 'हंता अत्थी'**त्यादि प्राग्वत्, नवरमत्र **'एवइयाइं नव ओवासंतराइं'** इति वक्तव्यं शेषं तथैव, उक्तञ्च–

"जावइ उदेइ सूरो जावइ सो अत्थमेइ अवरेणं।
तियपणसत्तनवगुणं काउं पत्तेय पत्तेयं।।१।।
सीयालीस सहस्सा दो य सया जोयणाण तेवट्ठा।
इगवीस सट्ठिभागा कक्खडमाइंमि पेच्छ नरा।।२।।
एयं दुगुणं काउं गुणिज्जए तिपणसत्तमाईहिं।
आगयफलं च जं तं कमपरिमाणं वियाणाहि।।३।। [त्रैलोक्यदीपक २०६-२०७]
चत्तारिवि सकमेहिं चंडादिगईहिं जंति छम्मासं।
तहवि य न जंति पारं केसिंचि सुरा विमाणाणं।।४।।" ।।१७९-१८२।।

अस्यां तृतीयप्रतिपत्तौ तिर्यग्योन्यधिकारे प्रथमोद्देशकः।।

उक्तः प्रथमोद्देशकः, इदानीं द्वितीयस्यावसरः, तत्रेदमादिसूत्रम्-

(१८३) कतिविहा णं भंते! संसारसमावण्णगा जीवा पण्णत्ता?, गोयमा! छव्विहा संसारसमावण्णगा पण्णत्ता, तंजहा-पुढविकाइया जाव तसकाइया।।१८३।।

(१८४) से किं तं पुढविकाइया?, पुढविकाइयाऽ → पण्णवणाए पदं निरवसेसं जाव सवट्ठसिद्धा देवा ←।। १८४।।

'कइविहा ण'मित्यादि, **कतिविधा भदन्त! संसारसमापन्नका जीवाः प्रज्ञप्ताः?**, भगवानाह- **गौतम! षड्विधाः प्रज्ञप्तास्तद्यथा-पृथिवीकायिका** अप्कायिका **यावत्त्रसकायिकाः**। **अथ के ते पृथिवीकायिकाः?**, इत्यादि **प्रज्ञापना**गतं प्रथमं **प्रज्ञापनापदं निरवशेषं** वक्तव्यं यावदन्तिमं **'से तं देवा'** इति पदम्।।१८३-१८४।।

सम्प्रति विशेषाभिधानाय भूयोऽपि पृथिवीकायविषयं सूत्रमाह-

(१८५) कतिविधा णं भंते! पुढवी पण्णत्ता?, गोयमा! छव्विहा पुढवी पण्णत्ता, तंजहा-सण्हापुढवी सुद्धपुढवी वालुयापुढवी मणोसिलापु० सक्करापु० खरपुढवी।।१८५।। (१८६)सण्हपुढवीणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जह० अंतोमु० उक्कोसेणं एगं वाससहस्सं।।१८६।। (१८७-१९१)

---

१. L जे. । →←**चिह्नद्वयमध्यवर्तिपाठस्थाने कखगटत्रिमु. मध्ये** 'दुविहा पण्णत्ता, तंजहा-सुहुमपुढविकाइया बादरपुढविकाइया य। से किं तं सुहुमपुढविकाइया?, २ दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, से तं सुहुमपुढविकाइया। से किं तं बादरपुढविक्काइया?, २ दुविहा पण्णत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, एवं जहा पण्णवणापदे, सण्हा सत्तविधा पण्णत्ता, खरा अणेगविहा पन्नत्ता, जाव असंखेज्जा, से तं बादरपुढविक्काइया। से तं पुढविक्काइया। एवं चेव जहा पण्णवणाए तहेव निरवसेसं भाणितव्वं जाव वणप्फ-तिकाइया, एवं जत्थेको तत्थ सिय संखेज्जा सिय असंखेज्जा सित अणंता, से तं बादरवणप्फतिकाइया, से तं वणप्फतिकाइया। से किं तं तसकाइया?, २ चउव्विहा पण्णत्ता, तंजहा-बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया। से किं तं बेइंदिया?, २ अणेगविधा पण्णत्ता, एवं जहेव पण्णवणाए तहेव निरवसेसं भाणितव्वं ति जाव सव्वट्ठसिद्धगदेवा, से तं अणुत्तरोववाइया, से तं देवा, से तं पंचेंदिया, से तं तसकाइया' **इति विस्तृतः पाठः** ।।

→[1]सण्हा य सुद्धवालुय, मणोसिला सक्करा य खरपुढवी ।

एक्कं बारस चोद्दस, सोलस अट्ठारस बावीसा←।। १८७-१९१।।

'कइविहा ण'मित्यादि, **कतिविधा** णमिति पूर्ववत्, **भदन्त! पृथिवी प्रज्ञप्ता?**, भगवानाह– **गौतम! षड्विधा प्रज्ञप्ता, तद्यथा-'श्लक्ष्णपृथिवी'** मृद्वी चूर्णितलोष्टकल्पा, **'शुद्धपृथिवी'** पर्वतादिमध्ये, **मनःशिला–** लोकप्रतीता, **वालुका**सिकतारूपा, **शर्करा–** मुरुण्डपृथिवी, **'खरापृथिवी'** पाषाणादिरूपा।। अधुना एतासामेव स्थितिनिरूपणार्थमाह– **'सण्हपुढवीकाइयाण'**मित्यादि, **श्लक्ष्णपृथिवीकायिकानां भदन्त! कियन्तं कालं स्थितिः प्रज्ञप्ता?**, भगवानाह– **गौतम! जघन्येनान्तर्मुहूर्त्तमुत्कर्षत एकं वर्षसहस्रम्।।१८५-१८६।।** एवमनेनाभिलापेन शेषाणामपि पृथिवीनामनया गाथया उत्कृष्टमनुगन्तव्यं, तामेव गाथामाह–**'सण्हा य'** इत्यादि, **श्लक्ष्णपृथिव्या एकं वर्ष**सहस्रमुत्कर्षतः स्थितिः, **शुद्धपृथिव्या द्वादश वर्षसहस्राणि, वालुकापृथिव्याश्चतुर्दश सहस्राणि, मनःशिलापृथिव्याः षोडश वर्षसहस्राणि, शर्करापृथिव्या अष्टादश वर्षसहस्राणि, खरपृथिव्या द्वाविंशतिवर्षसहस्राणि,** सर्वासामपि चामीषां पृथिवीनां जघन्येन स्थितिरन्तर्मुहूर्त्तं वक्तव्या।। ।। १८७- १९१।।

सम्प्रति स्थितिनिरूपणाप्रस्तावान्नैरयिकादीनां चतुर्विंशतिदण्डकक्रमेण स्थितिं निरूपयितुकाम आह–

(१९२) नेरइयाणं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! →[2]चउव्वीसा दंडएणं जाव सव्वट्ठंति←।।१९२।।

'नेरइयाणं भंते!' इत्यादि, **नैरयिकाणां भदन्त! कियन्तं कालं स्थितिः प्रज्ञप्ता?,** इत्येवं **प्रज्ञापना**गतस्थितिपदानुसारेण **चतुर्विंशतिदण्डक**क्रमेण तावद्वक्तव्यं यावत्**सर्वार्थसिद्ध**विमानदेवानां स्थितिनिरूपणा, इह तु ग्रन्थगौरवभयान्न लिख्यते ।। १९२।।

---

१. जे । १८७-१९१ सूत्र स्थाने मु. L आदिमध्ये सुद्धपुढवीए पुच्छा, गोयमा! जह० अंतोमु० उक्को० बारस वाससहस्साइं।१८७। (१८८)वालुयापुढवीपुच्छा, गोयमा! जह० अंतोमु० उक्को० चोद्दस वाससहस्साइं (१८९) मणोसिलापुढवीणं पुच्छा, गोयमा! जह० अंतोमु० उक्को० सोलस वाससहस्साइं (१९०)सक्करापुढवीए पुच्छा, गोयमा! जह० अंतोमु० उक्को० अट्ठारस वाससहस्साइं (१९१)खरपुढविपुच्छा, गोयमा! जह० अंतोमु० उक्को० बावीस वाससहस्साइं **इति पाठः। २. ता. । चिह्नद्वयमध्यवर्तिपाठस्थाने मु. L आदि मध्ये** जह० दस वाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं। ठितीपदं सव्वं भाणियव्वं जाव सव्वट्ठसिद्धदेवत्ति **इति पाठः ।।**

तदेवं भवस्थितिनिरूपणा कृता, सम्प्रति कायस्थितिनिरूपणार्थमाह-

(१९३) जीवे णं भंते! जीवेत्ति कालतो केवच्चिरं होइ?, गोयमा! सव्वद्धा →कायट्ठिती जहा णेतव्वं इमेहिं पदेहिं - जीवगतिंदियकाए जाव सुहुम बादरा सव्वं अपरिसेसे तं उवरिल्लं णत्थि ←।।१९३।।

'जीवे णं भंते!' इत्यादि, अथ कायस्थितिरिति कः शब्दार्थः?, उच्यते, कायो नाम जीवस्य विवक्षितः सामान्यरूपो विशेषरूपो वा पर्यायविशेषस्तस्मिन् स्थितिः कायस्थितिः, किमुक्तं भवति? यस्य वस्तुनो येन पर्यायेण- जीवत्वलक्षणेन पृथिवीकायादित्वलक्षणेन वाऽऽदिश्यतेऽव्यवच्छेदेन यद्भवनं सा कायस्थितिः, तत्र जीव इति **"जीव प्राणधारणे"** [हे.धातु.१-४६५]जीवति-प्राणान् धारयतीति जीवः, प्राणाश्च द्विधा-द्रव्यप्राणा भावप्राणाश्च, तत्र द्रव्यप्राणा आयुःप्रभृतयः, उक्तञ्च-

"पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः।

प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा।।१।।"

भावप्राणा ज्ञानादयः, यैर्मुक्तोऽपि जीवतीति व्यपदिश्यते, उक्तञ्च-

'ज्ञानादयस्तु भावप्राणा मुक्तोऽपि जीवति स तैर्हीति, इह च विशेषानुपादानादुभयेषामपि ग्रहणं णमिति वाक्यालङ्कारे भदन्त! जीव इति-जीवनपर्यायविशिष्टः कालतः- कालमधिकृत्य कियच्चिरं भवति?, भगवानाह- सर्वाद्धां, संसार्यवस्थायां द्रव्यभावप्राणानधिकृत्य मुक्त्यवस्थायां भावप्राणानधिकृत्य सर्वत्रापि जीवनस्य विद्यमानत्वात्, अथवा जीव इति न एकः प्रतिनियतो जीवो विवक्ष्यते किन्तु जीवसामान्यं, ततः प्राणधारणलक्षणजीवनाभ्युपगमेऽपि न कश्चिद्दोषः, तथाहि-

'जीवे णं भंते!' इत्यादि, **जीवो णं**मिति पूर्ववद् **भदन्त! जीव इति-**जीवन्निति प्राणान् धारयन्नित्यर्थः **कालतः कियच्चिरं भवति?,** भगवानाह-**गौतम! सर्वाद्धां,** जीवसामान्यस्यानाद्यनन्तत्वात्, न चैतद् व्याख्यानं स्वमनीषिकाविजृम्भितं, यत उक्तं **मूलटीकायां-"जीवे णं भंते इत्यादि, एषा ओघकायस्थितिः सामान्यजीवापेक्षिणीति सर्वाद्धया निर्वचनम्"**[ ]। एवं च पृथिवीकायादिष्वप्यदोषः, एतत्सामान्यस्य सर्वदैव भावादिति। एवं **गतीन्द्रियकाया**दिद्वारैर्यथा **प्रज्ञापनाया**मष्टादशे कायस्थितिनामके पदे

---

१. कता । सव्वद्धं - मु. L।। २. जे. ।→← चिह्नद्वयमध्यवर्तिपाठः मु. L आदि मध्ये नास्ति।।

कायस्थितिरुक्ता तथाऽत्र **सर्वं निरवशेषं** वक्तव्यं यथा **उपरि** तत्पदगतं **न** किमपि तिष्ठति, गतीन्द्रिय-कायादिद्वारसङ्ग्राहके चेमे गाथे–

"गइ इंदिए य काए जोगे वेए कसाय लेसा य।
सम्मत्तनाणदंसणसंजयउवओगआहारे।।१।।
भासगपरित्तपज्जत्तसुहुम सण्णी भवऽत्थि चरिमे य।
एएसिं तु पयाणं कायठिई होइ नायव्वा।।२।।"

सूत्रपाठस्तु लेशतो दर्श्यते–*'नेरइया णं भंते! णेरइयत्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं। तिरिक्खजोणिए णं भंते! तिरिक्खजोणियत्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तमुक्कोसेणमणंतं कालं अणंता उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो अणंता लोगा असंखेज्जा पुग्गलपरियट्टा आवलियाए असंखेज्जइभागो'* इत्यादि।। १९३।।

सम्प्रति सामान्यपृथिवीकायादिगतकायस्थितिनिरूपणार्थमाह–

(१९४) पुढविकाइए णं भंते! पुढविकाइएत्ति- कालतो केवच्चिरं होति?, गोयमा! सव्वद्धा, एवं जाव तसकाइए[१]।। १९४।।

'पुढविक्काइए णं भंते!' इत्यादि, **पृथिवीकायिको भदन्त!,** सामान्यरूपोऽत एव जातावेकवचनं न व्यक्त्येकत्वे, **पृथिवीकाय इति कालतः कियच्चिरं भवति?,** भगवानाह–**गौतम! सर्वाद्धां,** पृथिवीकायसामान्यस्य सर्वदैव भावात्। एवमप्तेजो-वायु-वनस्पति-त्रसकायसूत्राण्यपि भावनीयानि।। १९४।। सम्प्रति विवक्षिते काले जघन्यपदे उत्कृष्टपदे वा कियन्तोऽभिनवा उत्पद्यमानाः पृथिवीकायिकादयः? इत्येतन्निरूपणार्थमाह–

(१९५) पडुप्पन्नपुढविकाइया णं भंते! केवतिकालस्स णिल्लेवा सिता?, गोयमा! जहण्णपदे असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं उक्कोसपदेवि[२] असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं, जहन्नपदातो उक्कोसपए असंखेज्जगुणा, एवं जाव पडुप्पन्नवाउक्काइया।। १९५।।

१.०ए वि सव्वद्धा - **जे . ।। २. जे. L । ०पए-कखगटत्रिमु. ।।**

'पडुप्पन्नपुढविक्काइया णं भंते! केवइकालस्स निल्लेवा सिया' इत्यादि, **प्रत्युत्पन्नपृथिवीकायिकाः–** तत्कालमुत्पद्यमानाः **पृथिवीकायिका भदन्त! 'केवइकालस्स'**त्ति तृतीयार्थे षष्ठी कियता कालेन **निर्लेपाः स्युः**?, प्रतिसमयमेकैकापहारेणापह्रियमाणाः कियता कालेन सर्व एव निष्ठामुपयान्तीति भावः, भगवानाह-**गौतम! जघन्यपदे** यदा सर्वस्तोका भवन्ति तदेत्यर्थः, **असङ्ख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभिरुत्कृष्टपदे**ऽपि यदा सर्वबहवो भवन्ति तदाऽपीति भावः **असङ्ख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभि**र्नवरं **जघन्यपदादुत्कृष्टपदिनोऽसङ्ख्येयगुणाः। एवम**प्तेजो**वायु**सूत्राण्यपि भावनीयानि।। १९५ ।। वनस्पतिसूत्रमाह–

(१९६) पडुप्पन्नवणप्फइकाइया णं भंते! केवतिकालस्स निल्लेवा सिता?, गोयमा! पडुप्पन्नवण० जहण्णपदे अपदा उक्कोसपदे अपदा, पडुप्पन्नवणप्फतिकाइयाणं णत्थि निल्लेवणा।। १९६।।

'पडुप्पण्णे'त्यादि, **प्रत्युत्पन्नवनस्पतिकायिका भदन्त! कियता कालेन निर्लेपाः स्युः?,** भगवानाह-**गौतम! प्रत्युत्पन्नवनस्पतिकायिका जघन्यपदेऽपदा**-इयता कालेनापह्रियन्ते इत्येतत्पदविरहिता, अनन्तानन्तत्वात्, **उत्कृष्टपदेऽप्यपदा,** अनन्तानन्ततया निर्लेपनाऽसम्भवात्, तथा चाह–**'पडुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा'** इति सुगमं, नवरमनन्तानन्तत्वादिति हेतुपदं स्वयमभ्यूह्यम्।।१९६।।

(१९७) पडुप्पन्नतसकाइया णं भंते! केवतिकालस्स णिल्लेवा सिया? गोयमा! जहण्णपदे सागरोवमसतपुहुत्तस्स उक्कोसपदे सागरोवमसतपुहुत्तस्स, जहण्णपदा उक्कोसपदे विसेसाहिया।। १९७।।

'पडुप्पण्णतसकाइया ण'मित्यादि, **प्रत्युत्पन्नत्रसकायिका भदन्त! कियता कालेन निर्लेपाः स्युः?,** भगवानाह- **गौतम! जघन्यपदे सागरोपमशतपृथक्त्वस्य**-तृतीयार्थे षष्ठी प्राकृतत्वात् सागरोपमशतपृथक्त्वेन, **उत्कृष्टपदेऽपि सागरोपमशतपृथक्त्वेन** नवरं **जघन्यपदादुत्कृष्टपदं विशेषाधिकमवसेयम्**।। १९७।।

इदं च सर्वमुच्यमानं विशुद्धलेश्यसत्त्वमभिप्राप्तं यथाऽवस्थिततया सम्यगवभासते नान्यथेत्यविशुद्ध-विशुद्धलेश्यविषयं किञ्चिद्विवक्षुराह–

(१९८) अविसुद्धलेस्से णं भंते! अणगारे असमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अणगारं जाणइ पासइ?, गोयमा! नो इणट्ठे समट्ठे।।१९८।।(१९९) अविसुद्धलेस्से णं भंते! अणगारे असमोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अणगारं जाणइ पासइ?, गोयमा! नो इणट्ठे समट्ठे।।१९९।।(२००) अविसुद्धलेस्से अणगारे समोहएणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अणगारं जाणति पासति?, गोयमा! नो इणट्ठे समट्ठे।। २००।।(२०१) अविसुद्धलेस्से अणगारे समोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अणगारं जाणति पासति?, नो तिणट्ठे समट्ठे।। २०१।।(२०२) अविसुद्धलेस्से णं भंते! अणगारे समोहतासमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अणगारं जाणति पासति?, नो तिणट्ठे समट्ठे।।२०२।। (२०३)अविसुद्धलेस्से अणगारे समोहतासमोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अणगारं जाणति पासति?, नो तिणट्ठे समट्ठे ।।२०३।। (२०४)विसुद्धलेस्से णं भंते! अणगारे असमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अणगारं जाणति पासति?, हंता जाणति पासति।। २०४।। (२०५-२०८) जहा अविसुद्धलेस्सेणं छ आलावगा एवं विसुद्धलेस्सेणवि छ आलावगा भाणितव्वा, जाव ।। २०५-२०८ ।। (२०९) विसुद्धलेस्से णं भंते! अणगारे समोहतासमोहतेणं अप्पाणेणं अविसुद्धलेस्सं[1] देवं देविं अणगारं जाणति पासति?, हंता जाणति पासति।। २०९।।

'**अविसुद्धलेस्से ण**'मित्यादि, '**अविशुद्धलेश्यः**' कृष्णादिलेश्यो **भदन्त!** '**अनगारः**' न विद्यते अगारं– गृहं यस्यासौ अनगारः–साधुः '**असमवहतः**' वेदनादिसमुद्घातरहितः '**समवहतः**' वेदनादिसमुद्घाते गतः। एवमिमे द्वे सूत्रे असमवहत-समवहताभ्यामात्मभ्यामविशुद्धलेश्यपरविषये प्रतिपादिते, एवं समवहता-समवहताभ्यामात्मभ्यां विशुद्धलेश्यपरविषये द्वे सूत्रे भावयितव्ये। तथाऽन्ये अविशुद्धलेश्यविशुद्धलेश्य-परविषये द्वे सूत्रे समवहतासमवहतेनात्मनेति पदेन, समवहतासमवहतो नाम वेदनादिसमुद्घातक्रियाविष्टो न तु परिपूर्णं समवहतो नाप्यसमवहतः सर्वथा। तदेवमविशुद्धलेश्ये ज्ञातरि साधौ षट् सूत्राणि प्रवृत्तानि,

१. विसु० L।।

एवमेव विशुद्धलेश्येऽपि साधौ ज्ञातरि षट् सूत्राणि भावनीयानि, नवरं सर्वत्र जानाति पश्यतीति वक्तव्यं, विशुद्धलेश्याकतया यथाऽवस्थितज्ञानदर्शनभावात्, आह च **मूलटीकाकारः-"शोभनमशोभनं वा वस्तु यथावद्विशुद्धलेश्यो जानाती"**[ ] ति, समुद्घातोऽपि च तस्याप्रतिबन्धक एव, न च तस्य समुद्घातोऽत्यन्ताशोभनो भवति, उक्तं च **मूलटीकायाम्-'समुद्घातोऽपि तस्याप्रतिबन्धक एवे'** [ ]त्यादीति ।। १९८-२०९।।

तदेवं यतोऽविशुद्धलेश्यो न जानाति विशुद्धलेश्यो जानाति ततः सम्यग्मिथ्याक्रिययोरेकदा निषेधमभिधित्सुराह-

(२१०) अण्णउत्थिया णं भंते! एवमाइक्खंति एवं भासेन्ति एवं पण्णवेंति एवं परूवेंति-एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेति, तंजहा-सम्मत्तकिरियं च मिच्छत्तकिरियं च, जं समयं संमत्तकिरियं पकरेति तं समयं मिच्छत्तकिरियं पकरेति, जं समयं मिच्छत्तकिरियं पकरेइ तं समयं संमत्तकिरियं पकरेइ, समत्तकिरियापकरणताए मिच्छत्तकिरियं पकरेति मिच्छत्तकिरियापकरणताए संमत्तकिरियं पकरेति, एवं खलु एगे जीवे एगेणं समएणं दो किरितातो पकरेति, तंजहा-संमत्तकिरियं च मिच्छत्तकिरियं च ।। २१०।।

स'अन्नउत्थिया णं भंते!' इत्यादि, **'अन्ययूथिकाः'** अन्यतीर्थिका **भदन्त!** चरकादय **एवमाचक्षते** सामान्येन **'एवं भाषन्ते'** स्वशिष्यान् श्रवणं प्रत्यभिमुखानवबुध्य विस्तरेण व्यक्तं कथयन्ति, **एवं 'प्रज्ञापयन्ति'** प्रकर्षेण ज्ञापयन्ति यथा स्वात्मनि व्यवस्थितं ज्ञानं तथा परेष्वप्यापादयन्तीति, **एवं 'प्ररूपयन्ति'** तत्त्वचिन्तायामसन्दिग्धमेतदिति निरूपयन्ति, **इह खल्वेको जीव एकेन समयेन** युगपद् **द्वे क्रिये प्रकरोति, तद्यथा-'सम्यक्त्वक्रियां च'** सुन्दराध्यवसायात्मिकां **'मिथ्यात्वक्रियां च'** असुन्दराध्यवसायात्मिकां, **'जं समय'**मिति प्राकृतत्वात्सप्तम्यर्थे द्वितीया यस्मिन् समये **सम्यक्त्वक्रियां प्रकरोति 'तं समय'**मिति तस्मिन् समये **मिथ्यात्वक्रियां प्रकरोति, यस्मिन् समये मिथ्यात्वक्रियां प्रकरोति तस्मिन् समये सम्यक्त्वक्रियां प्रकरोति,** अन्योऽन्यसंवलितोभयनियमप्रदर्शनार्थमाह- **सम्यक्त्वक्रियाप्रकरणेन मिथ्यात्वक्रियां प्रकरोति मिथ्यात्वक्रियाप्रकरणेन सम्यक्त्वक्रियां प्रकरोति,**

---

१. ते चेव सव्वं उच्चारेयव्वं जाव - **जे.** ।।

तदुभयकरणस्वभावस्य तत्तत्क्रियाकरणात्सर्वात्मना प्रवृत्तेः, अन्यथा क्रियाऽयोगादिति, **'एवं खल्वि'**त्यादि निगमनं प्रतीतार्थम् ।। २१०।।

(२११) से कहमेतं भंते! एवं?, गोयमा! जन्नं ते अन्नउत्थिया एवमाइक्खंति एवं भासेंति एवं पण्णवेंति एवं परूवेंति एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेंति, तहेव[1] जाव सम्मत्तकिरियं च मिच्छत्तकिरियं च, जे ते एवमाहंसु तं णं मिच्छा, अहं पुण गोयमा! एवमाइक्खामि जाव परूवेमि-एवं खलु एगे जीवे एगेणं समएणं एगं किरियं पकरेति, तंजहा-सम्मत्तकिरियं वा मिच्छत्तकिरियं वा जं समयं सम्मत्तकिरियं पकरेति णो तं समयं मिच्छत्तकिरियं पकरेति। जं समयं मिच्छत्तकिरियं पकरेति नो तं समयं सम्मत्तकिरियं पकरेति, सम्मत्तकिरियापकरणयाए नो मिच्छत्तकिरियं पकरेति । मिच्छत्तकिरियापकरणाए णो सम्मत्तकिरियं पकरेति। एवं खलु एगे जीवे एगेणं समएणं एगं किरियं पकरेति, तंजहा-सम्मत्तकिरियं वा मिच्छत्तकिरियं वा।। २११।।

से तं तिरिक्खजोणियउद्देसओ बीओ समत्तो।।

'से कहमेयं भंते!' इत्यादि, **तत् कथमेतद् भदन्त! एवम्?,** तदेवं गौतमेन प्रश्ने कृते सति भगवानाह– **गौतम! यत् ण**मिति वाक्यालङ्कारे **'अन्ययूथिकाः'** अन्यतीर्थिका **एवमाचक्षते** इत्यादि प्राग्वत् यावत्**तत् मिथ्या** ते एवमाख्यातवन्तः, **अहं पुनर्गौतम! एवमाचक्षे** एवं भाषे एवं प्रज्ञापयामि एवं **प्ररूपयामि, इह खल्वेको जीव एकेन समयेनैकां क्रियां प्रकरोति, तद्यथा-सम्यक्त्वक्रियां वा मिथ्यात्वक्रियां वा,** अत एव **यस्मिन् समये सम्यक्त्वक्रियां प्रकरोति न तस्मिन् समये मिथ्यात्वक्रियां प्रकरोति, यस्मिन् समये मिथ्यात्वक्रियां प्रकरोति न तस्मिन् समये सम्यक्त्वक्रियां प्रकरोति,** परस्परवैविक्त्यनियमप्रदर्शनार्थमाह–**सम्यक्त्वक्रियाप्रकरणेन न मिथ्यात्वक्रियां प्रकरोति, मिथ्यात्वक्रियाप्रकरणेन न सम्यक्त्वक्रियां प्रकरोति,** सम्यक्त्वक्रिया-मिथ्यात्वक्रिययोः परस्परपरिहारावस्थानात्मकतया जीवस्य तदुभयकरणस्वभावत्वायोगात्, अन्यथा सर्वथा मोक्षाभावप्रसक्तेः, कदाचिदपि मिथ्यात्वानिवर्त्तनात्।। २११।।

अस्यां तृतीयप्रतिपत्तौ तिर्यग्योन्यधिकारे द्वितीयोद्देशकः समाप्तः।।



मनुष्याधिकारः

व्याख्यातस्तिर्यग्योनिजाधिकारः, सम्प्रति मनुष्याधिकारव्याख्यावसरः, तत्रेदमादिसूत्रम्–

(२१२) से[१] किं तं मणुस्सा?, मणुस्सा दुविहा पण्णत्ता, तंजहा-संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य।।२१२।। (२१३) से किं तं संमुच्छिममणुस्सा?, २ एगागारा पण्णत्ता।।२१३।। (२१४) कहि णं भंते! संमुच्छिममणुस्सा संमुच्छंति?, गोयमा! अंतोमणुस्सखेत्ते जहा पण्णवणाए[२] जाव[३] →अंतोमुहुत्तद्धाउया चेव कालं पकरेंति← तं संमुच्छिममणुस्सा।। २१४।।

'से किं त'मित्यादि, **अथ के ते मनुष्याः?**, सूरिराह–**मनुष्या द्विविधाः प्रज्ञप्तास्तद्यथा-संमूर्च्छिममनुष्याश्च गर्भव्युत्क्रान्तिकमनुष्याश्च,** चशब्दौ द्वयानामपि मनुष्यत्वजातितुल्यतासूचकौ **'से किं त'**मित्यादि, **अथ के ते संमूर्च्छिममनुष्याः**?, सूरिराह–**संमूर्च्छिममनुष्याः 'एकाकाराः'** एकस्वरूपाः **प्रज्ञप्ताः**। अथ क्व तेषां सम्भवः? इति जिज्ञासिषुर्गौतमः पृच्छति–**'कहि णं भंते!'** इत्यादि, **क्व भदन्त! संमूर्च्छिममनुष्याः संमूर्च्छन्ति?,** भगवानाह–**अन्तर्मनुष्यक्षेत्रे** इत्यादि सूत्रं प्राग्वद् भावनीयं **यावत् अंतोमुहुत्तद्धाउया चेव कालं पकरेंति,** उपसंहारमाह–**'से तं संमुच्छिममणुस्सा'**।। २१२-२१४।।

सम्प्रति गर्भव्युत्क्रान्तिकमनुष्यप्रतिपादनार्थमाह–

---

१. द्र. १/१२६-१२७ ।। २. द्र. प्रज्ञापनायाम् १/८४।। ३. जे.L । →←चिह्नद्वयमध्यवर्तिपाठः मु. नास्ति।

(२१५) से किं तं गब्भवक्कंतियमणुस्सा?, २ तिविधा पण्णत्ता, तंजहा-कम्मभूमगा अकम्मभूमगा अंतरदीवगा।। २१५।। (२१६) से किं तं अंतरदीवगा?, २ अट्ठावीसतिविधा पण्णत्ता, तंजहा-एगोरूया आभासिता वेसाणिया [१]णंगूलीया [२]हयकण्णा गयकण्णा गोकण्णा सक्कुलीकण्णा आयंसमुहा मेंढमुहा अयोमुहा गोमुहा आसमुहा हत्थिमुहा सीहमुहा वग्घमुहा आसकण्णा सीहकण्णा अकण्णा कण्णपाउरणा उक्कामुहा मेहमुहा विज्जुजिब्भा विज्जुदंता घणदंता लट्ठदंता गूढदंता सुद्धदंता।।२१६।।

'से किं त'मित्यादि, **अथ के ते गर्भव्युत्क्रान्तिकमनुष्याः?**, सूरिराह–**गर्भव्युत्क्रान्तिकमनुष्यास्त्रिविधाः प्रज्ञप्तास्तद्यथा-कर्मभूमका अकर्म्मभूमका आन्तरद्वीपकाः**, तत्र "अस्त्यनानुपूर्व्यपी" [ ] ति न्यायप्रदर्शनार्थमान्तरद्वीपकप्रतिपादनार्थमाह-**'से किं त'**मित्यादि,**अथ के ते आन्तरद्वीपकाः?**, लवणसमुद्रमध्ये अन्तरे अन्तरे द्वीपा अन्तरद्वीपा अन्तरद्वीपेषु भवा आन्तरद्वीपकाः,'राष्ट्रेभ्यः'[ ] इति वुञ्, सूरिराह–**आन्तरद्वीपका अष्टाविंशतिविधाः प्रज्ञप्ताः**, तानेव **तद्यथे**त्यादिना नामग्राहमुपदर्शयति–**एकोरुकाः** १ **आभाषिकाः** २ **वैषाणिकाः** ३ **नाङ्गोलिकाः** ४ **हयकर्णाः** ५ **गजकर्णाः** ६ **गोकर्णाः** ७ **शष्कुलीकर्णाः** ८ **आदर्शमुखाः** ९ **मेण्ढमुखाः** १० **अयोमुखाः** ११ **गोमुखाः** १२ **अश्वमुखाः** १३ **हस्तिमुखाः** १४ **सिंहमुखाः** १५ **व्याघ्रमुखाः** १६ **अश्वकर्णाः** १७ **सिंहकर्णाः** १८ **अकर्णाः** १९ **कर्णप्रावरणाः** २० **उल्कामुखाः** २१ **मेघमुखाः** २२ **विद्युद्दन्ताः** २३ **विद्युज्जिह्वाः** २४ **घनदन्ताः** २५ **लष्टदन्ताः** २६ **गूढदन्ताः** २७ **शुद्धदन्ताः** २८, इह एकोरुकादिनामानो द्वीपाः परं "तात्स्थ्यात्तद्व्यपदेश" [ ] इति न्यायान्मनुष्या अप्येकोरुकादय उक्ता यथा पञ्चालदेशनिवासिनः पुरुषाः पञ्चाला इति।।२१५-२१६।।

तथा चैकोरुकमनुष्याणामेकोरुकद्वीपं पिपृच्छिषुराह–

(२१७) कहि णं भंते! दाहिणिल्लाणं एगोरूयमणुस्साणं एगोरूयदीवे णामं

---

१. जे. L। णंगोली- SP । णांगोली -मु०। णंगोलिया-ठाणं ४/३२१ ।। २. जे. L। हयकण्णगा ह्व - SP कखगटत्रि। ह्व इति चतुःसंख्यासूचको वर्णोऽस्ति । अग्रिमपदेष्वपि दृश्यते - L पृ.२८९ टि.३।।

दीवे पण्णत्ते?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासधरपव्वयस्स उत्तरपुरत्थिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं एगोरुयमणुस्साणं एगुरुयदीवे णामं दीवे पण्णत्ते तिन्नि जोयणसयाइं आयाम-विक्खंभेणं णव एकूणपण्णे जोयणसए किंचि विसेसेण[३] परिक्खेवेणं । से णं एगाए पउमवरवेदियाए एगेणं च वणसंडेणं सव्वओ समंता संपरिक्खित्ते।→ 'वण्णतो[१] पउमवरवेइया-वणसंडाणं जाव तत्थ णं वहवे वाणमंतरा देवा च देवीओ य आसायंति जाव विहरंति'।। ←।। २१७।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! दाक्षिणात्यानां** इह एकोरुकादयो मनुष्याः शिखरिण्यपि पर्वते विद्यन्ते ते च मेरोरुत्तरदिग्वर्त्तिन इति तद्व्यवच्छेदार्थं दाक्षिणात्यानामित्युक्तम्, **एकोरुकमनुष्याणामेकोरुकद्वीपः प्रज्ञप्तः?,** भगवानाह–**गौतम! जम्बूद्वीपे द्वीपे** मन्दरपर्वतस्यान्यत्रासम्भवात् अस्मिन् जम्बूद्वीपे द्वीपे इति प्रतिपत्तव्यं, **'मन्दरपर्वतस्य'** मेरो**र्दक्षिणेन**-दक्षिणस्यां दिशि **क्षुल्लहिमवद्वर्षधरपर्वतस्य,** क्षुल्लग्रहणं महाहिमवद्वर्षधरपर्वतस्य व्यवच्छेदार्थं, पूर्वस्मात् पूर्वरूपा**च्चरमान्ताद् उत्तरपूर्वेण**-उत्तरपूर्वस्यां दिशि **लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे** क्षुल्लहिमवद्दंष्ट्राया उपरि **दाक्षिणात्यानामेकोरुकमनुष्याणामेकोरुकद्वीपो नाम द्वीपः प्रज्ञप्तः,** स च **त्रीणि योजनशतान्यायामविष्कम्भेण** समाहारो द्वन्द्वः आयामेन विष्कम्भेन चेत्यर्थः, **नव 'एकोनपञ्चाशानि'** एकोनपञ्चाशदधिकानि **योजनशतानि** ९४९ **परिक्षेपेण,** परिमाणगणितभावना–**'विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ'** [लघु सं.गा.७]इति करणवशात्स्वयं कर्त्तव्या सुगमत्वात्।।

---

१. **विसेसूणे - S P।। २. ता L →← चिह्नद्वयमध्यवर्तिपाठस्थाने मु. मध्ये इत्थं पाठः** 'सा णं पउमवरवेदिया अद्ध जोयणाइं उड्ढं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं एगूरुयदीवं समंता परिक्खेवेणं पण्णत्ता। तीसे णं पउमवरवेदियाए अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-वइरामया निम्मा एवं वेतियावण्णओ जहा रायपसेणईए तहा भाणियव्वो।

सा णं पउमवरवेतिया एगेणं वणसंडेणं सव्वओ समंता संपरिक्खित्ता। से णं वणसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं वेतियासमेणं परिक्खेवेणं पण्णत्ते, से णं वणसंडे किण्हे किण्होभासे, एवं जहा रायपसेणइयवणसंडवण्णओ तहेव निरवसेसं भाणियव्वं, तणाण य वण्णगंधफासो सद्दो तणाणं वावीओ उप्पायपव्वया पुढविसिलापट्टगा य भाणितव्वा जाव तत्थ णं बहवे वाणमंतरा देवा य देवीओ य आसयंति जाव विहरंति' ।।

'से ण'मित्यादि, स एकोरुकनामा द्वीप **एकया पद्मवरवेदिकया एकेन वनषण्डेन 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **परिक्षिप्तः,** तत्र **पद्मवरवेदिका**वर्णको **वनषण्ड**वर्णकश्च वक्ष्यमाणजम्बूद्वीपजगत्युपरिपद्मवरवेदिकावनषण्डवर्णकवद् भावनीयः, स च तावद् **याव**च्चरमं **'आसयंती'**ति पदम्।।२१७।।

(२१८) एगोरुयदीवस्स णं भंते ! केरिसए आगारभावपडोयारे पण्णत्ते ? गोयमा ! बहुसमरमणिज्जे भूमिभागे पण्णत्ते । से जहाणामए आलिंगपुक्खरेति

---

१. अतोऽग्रे वाचनाद्वयं लभ्यते, ताडपत्रीयादर्शे वृत्ति द्वये च एकोरुकवक्तव्यता अत्र संक्षिप्ताऽस्ति उत्तरकुरुवक्तव्यतायै (प्रतिपत्ति ३/५७८-६३१) समर्पिताऽस्ति । 'ता'प्रतेर्वृत्तिद्वयस्य चाधारेण पूर्ववर्तिसूत्रवत् संक्षिप्तवाचनाऽत्र स्वीकृताऽस्ति । विस्तृतवाचनापाठः मु.मध्ये शेषादर्शेषु च इत्थं दृश्यते—> एगोरूयदीवस्स णं दीवस्स अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते, से जहाणामए आलिंगपुक्खरेति वा, एवं सयणिज्जे भाणितव्वे जाव पुढविसिलापट्टगंसि तत्थ णं बहवे एगुरूयदीवया मणुस्सा य मणुस्सीओ य आसयंति जाव विहरंति, एगुरूयदीवे णं दीवे तत्थ तत्थ देसे तहिं २ बहवे उद्दालका कोद्दालका कतमाला णयमाला णट्टमाला सिंगमाला संखमाला दंतमाला सेलमालगा णाम दुमगणा पण्णत्ता समणाउसो! कुसविकुसविसुद्धरुक्खमूला मूलमंतो कंदमंतो जाव बीयमंतो पत्तेहि य पुप्फेहि य अच्छण्णपडिच्छण्णा सिरीए अतीव २ उवसोभेमाणा उवसोहेमाणा चिट्ठंति। एक्कोरुयदीवे णं दीवे रुक्खा बहवे हेरुयालवणा भेरुयालवणा मेरुयालवणा सेरुयालवणा सालवणा सरलवणा सत्तवण्णवणा पूतफलिवणा खज्जूरिवणा णालिएरिवणा कुसविकुसवि० जाव [१. द्र.जम्बूद्वीप प्र. २/९, भगवतीसूत्र २२/५, प्रज्ञापनासूत्र १/३८,जीवा.३/५८१.।] चिट्ठंति, एगुरूयदीवे णं तत्थ २ बहवे तिलया लवया नग्गोधा जाव रायरुक्खा णंदिरुक्खा कुसविकुसवि० जाव [२. द्र. सू.३/५८३।] चिट्ठंति एगुरूयदीवे णं तत्थ बहूओ पउमलयाओ जाव [३. द्र.सू. ३/५८४ ।] सामलयाओ निच्चं कुसुमिताओ एवं लयावण्णओ जहा उववाइए जाव पडिरूवाओ, एकोरूयदीवे णं तत्थ २ बहवे सेरियागुम्मा जाव[४. द्र.जंबूद्वीप प्र.२/१० ।] महाजातिगुम्मा । ते णं गुम्मा दसद्धवण्णं कुसुमं कुसुमंति विधूयग्गसाला जेण वायविधूयग्गसाला एगुरूयदीवस्स बहूसमरमणिज्जभूमिभागं मुक्कपुप्फपुंजोवयारकलियं करेंति, एकोरूयदीवे णं तत्थ २ बहूओ वणरातीओ पण्णत्ताओ, ताओ णं वणरातीतो किण्हातो किण्होभासाओ जाव[५. द्र.औप. सू.४।] रम्माओ महामेहणिकुरंबभूताओ जाव[६. द्र. औप .सू.७।]महतीं गंधद्धणिं मुयंतीओ पासादीताओ ४। एगुरूयदीवे तत्थ २ बहवे मत्तंगा णाम दुमगणा पण्णत्ता समणाउसो! जहा से चंदप्पभ-मणिसिलाग-वरसीधु-पवरवारुणि-सुजातफल-पत्त-पुप्फचोयणिज्जा संसारबहुदव्वजुत्तसंभारकालसंधयासवा महुमेरग-रिट्ठाभ-दुद्धजाती-पसन्न-मेल्लग-सताउ-खज्जूरमुद्दियासार-काविसायणसुपक्कखोयरसवरसुरावण्णरसगंधफरिसजुत्त-बलवीरियपरिणामा मज्जविहित्थ-बहुप्पगारा तदेवं ते मत्तंगयावि दुमगणा अणेगबहुविविहवीससापरिणयाए मज्जविहीए उववेदा फलेहिं पुण्णा वीसंदंति कुसविकुसविसुद्धरुक्खमूला जाव चिट्ठंति १।

वा, उत्तरकुरुगमो णेतव्वो जाव मणुस्साणं अणुसज्जाणा, णाणत्तं -अट्ठधणुसय उसिता, चोउट्ठिं पिट्ठिकरंडगा, एगुणासीतिं रातिंदियाइं अणुपालेंति, ठिती जहण्णेणं

एक्कोरुए दीवे तत्थ २ बहवो भिंगंगया णाम दुमगणा पण्णत्ता समणाउसो!, जहा से वारग-घडकरगकलस-कक्करि-पायंचणि-उदंक-वद्धणि-सुपइट्ठकपारी-चसक-भिंगार-करोडि-सरग-परग-पत्ती-थाल-णत्थग-चवलिय-अवपदग-वारक-विचित्तवट्टक-मणिवट्टक-सुत्तिचारुपिणया कंचणमणिरयणभत्तिविचित्ता भायणविधीए बहुप्पगारा तहेव ते भिंगंगयावि दुमगणा अणेगबहुगविविहवीससाए परिणताए भाजणविधीए उववेया फलेहिं पुन्नाविव विसट्टंति कुसविकुस० जाव चिट्ठंति २।

एगोरुगदीवे णं दीवे तत्थ २ बहवे तुडियंगा णाम दुमगणा पण्णत्ता समणाउसो!, जहा से आलिंग-मुयंग-पणव-पडह-दद्दरग-करडि-डिंडिम-भंभा-होरंभ-कणिय-खरमुहि-मुगुंद-संखिय-परिली-वच्चग-परिवाइणि-वंस-वेणु-वीणा-सुघोस-विपंचि-महति-कच्छभि-रगसगा-तल-ताल-कंसतालसुसंपउत्ता आतोज्जविधीणिउणगंधव्वसमयकुसलेहिं फंदिया तिट्ठाणसुद्धा तहेव ते तुडियंगयावि दुमगणा अणेगबहुविविधवीससापरिणामाए तत-वितत-घण-सुसिराए चउव्विहाए आतोज्जविहीए उववेया फलेहिं पुण्णा विसट्टन्ति कुसविकुसविसुद्धरुक्खमूला जाव चिट्ठंति ३।

एगोरुयदी० तत्थ २ बहवे दीवसिहा णाम दुमगणा पण्णत्ता समणाउसो!, जहा से संझाविरागसमए नवणिहिपतिणो दीविया-चक्कवालविंदे पभूयवट्टिपलित्तणेहिं धणिउज्जालियतिमिरमद्दए कणगणिगरकुसुमित-पालियातयवणप्पगासे कंचणमणिरयण-विमलमहरिहतवणिज्जुज्जलविचित्तदंडाहिं दीवियाहिं सहसा पज्जालिऊ-सवियणिद्धतेय-दिप्पंतविमलगहगणसमप्पहाहिं वितिमिरकरसूरपसरिउज्जोयचिल्लियाहिं जालुज्जलपहसियाभिरामाहिं सोभेमाणा तहेव ते दीवसिहावि दुमगणा अणेगबहुविविहवीससापरिणामाए उज्जोयविधीए उववेदा फलेहिं पुण्णा विसट्टंति कुसविकुसवि० जाव चिट्ठंति ४।

एगुरूयदीवे तत्थ २ बहवे जोतिसिया णाम दुमगणा पण्णत्ता समणाउसो!, जहा से अचिरुग्गयसरय-सूरमंडलपडंतउक्कासहस्सदिप्पंतविज्जुज्जलहुयवहनिद्धूमजलिय-निद्धंतधोयतत्ततवणिज्जकिंसुयासोयज-वासुयणकुसुमविमउलियपुंजमणिरयणकिरणजच्चहिंगुलुयणिगररूवाइरेगरूवा तहेव ते जोतिसियावि दुमगणा अणेगबहुविविहवीससापरिणयाए उज्जोयविहीए उववेदा सुहलेस्सा मंदलेस्सा मंदायवलेस्सा कूडा इव ठाणठिया अन्नमन्नसमोगाढाहिं लेस्साहिं साए पभाए सपदेसे सव्वओ समंता ओभासंति उज्जोवेंति पभासेंति कुसविकुसवि० जाव चिट्ठंति ५।

एगुरुयदीवे तत्थ २ बहवे चित्तंगा णाम दुमगणा पण्णत्ता समणाउसो!, जहा से पेच्छाघरे विचित्ते रम्मे वरकुसुमदाममालुज्जले भासंतमुक्कपुप्फपुंजोवयारकलिए विरल्लिविचित्तमल्लसिरिदाममल्लसिरिसमुदयप्पगब्भे गंथिमवेढिमपूरिमसंघाइमेण मल्लेण छेयसिप्पियविभागरतिएण सव्वतो चेव समणुबद्धे पविरल-लंबंत-विप्पइट्ठेहिं

पलिओवमस्स असंखज्जतिभागं पलिओवमस्स असंखेज्जतिभागेणं ऊणगं, उक्कोसेणं पलिओवमस्स असंखेज्जतिभागं ।। २१८ ।।

पंचवण्णेहिं कुसुमदामेहिं सोभमाणे सोभमाणे वणमालतग्गए चेव दिप्पमाणे तहेव ते चित्तंगयावि दुमगणा अणेगबहुविविहवीससापरिणयाए मल्लविहीए उववेया कुसविकुसवि० जाव चिट्ठंति ६।

एगुरूयदीवे तत्थ २ बहवे चित्तरसा णाम दुमगणा पण्णत्ता समणाउसो!, जहा से सुगंधवरकल-मसालिविसिट्ठणिरुवहतदुद्धरद्धे सारयघय-गुड-खंड-महुमेलिए अतिरसे परमण्णे होज्ज उत्तमवण्णगंधमंते रण्णो जहा वा चक्कवट्टिस्स होज्ज णिउणेहिं सूतपुरिसेहिं संज्जिए [१. सज्जिएहिं- मु.।] चउकप्पसेअसित्ते इव ओदणे कलमसालिणिज्जत्तिए विपक्के सव्वप्फ-मिउ-वसय-सगलसित्थे अणेगसालणगसंजुत्ते अहवा पडिपुण्णदव्वुवक्खडे सुसक्कए वण्णगंधरसफरिसजुत्तबलविरियपरिणामे इंदियबलपुट्ठिवद्धणे खुप्पिवासमहणे पहाणगुलकढियखंडमच्छंडिघओवणीए व्व मोयगे सण्हसमियगब्भे हवेज्ज परमइट्ठगसंजुत्ते तहेव ते चित्तरसावि दुमगणा अणेगबहुविविहवीससापरिणयाए भोजणविहीए उववेदा कुसविकुसवि० जाव चिट्ठंति ७।

एगुरूए दीवे णं तत्थ २ बहवे मणियंगा नाम दुमगणा पण्णत्ता समणाउसो!, जहा से हारद्धहार-वेढणग-मउड-कुंडल-वामुत्तगहेमजाल-मणिजाल-कणगजालग-सुत्तग-उच्चिइयकडग-खुड्डिय-एकावलि-कंठसुत्त-मगरिग-उरत्थगेवेज्ज-सोणिसुत्तग-चूलामणि-कणगतिलग-फुल्लग-सिद्धत्थय-कण्णवालि-ससि-सूर-उसभ-चक्कग-तलभंगय-तुडिय-हत्थमालग-वलक्खदीणारमालिता चंदसूरमालिता हरिसय-केयूर-वलय-पालंब-अंगुलेज्जग-कंचीमेहला-कलाव-पयरग-पायजाल-घंटिय-खिंखिणि-रयणोरुजालखुड्डिय-वरणेउर-चलणमालिया कणगणिगरमालिया कंचणमणिरयणभत्तिचित्ता भूसणविधी बहुप्पगारा तहेव ते मणियंगावि दुमगणा अणेगबहुविविहवीससापरिणताए भूसणविहीए उववेया कुसवि० जाव चिट्ठंति ।। ८।।

एगुरूयए दीवे तत्थ २ बहवे गेहागारा नाम दुमगणा पण्णत्ता समणाउसो!, जहा से पागार-ऽट्टालग-चरिय-दार-गोपुर-पासायाकासतल-मंडव-एगसालग-बिसालग-तिसालग-चउसालग-गब्भघर-मोहणघर-वलभिघर-चित्तसालमालय-भत्तिघर-वट्ट-तंस-चतुरंस-णंदियावत्तसंठियायत-पंडुरतलमुंडमालहम्मियं अहव णं धवलहर-अद्धमागहविब्भम-सेलद्धसेलसंठिय-कूडागारट्ठ-सुविहिकोट्ठग-अणेगघर-सरण-लेण-आवण-विडंग-जालवंद-णिज्जूह-अपवरक-वोतालिचंदसा-लिय-रूवविभत्तिकलिता भवणविही बहुविकप्पा तहेव ते गेहागारावि दुमगणा अणेगबहुविविधवीससापरिणयाए सुहारुहणे सुहोत्ताराए सुहनिक्खमणप्पवेसाए दद्दरसोपाणपंतिकलिताए पइरिक्काए सुहविहाराए मणोऽणुकूलाए भवणविहीए उववेया कुसवि० जाव चिट्ठंति ।। ९।।

एगोरुयदीवे तत्थ २ बहवे अणिगणा णामं दुमगणा पण्णत्ता समणाउसो! जहा से आइणग- खोम-तणुय-कंबल-दुगुल्ल-कोसेज्ज-कालमिगपट्ट-चीणंसुयवतत्तावरणा तवार वाणग पच्छुन्न आभरणचित्त-सहिणग-कल्लाणग-भिंगिणील-कज्जल-बहुवण्णरत्त-पीत-सुक्किलमक्खयमिगलोमहेप्फरल्लगअवरुत्तरा-सिंधु-उसभ-दामिल-वंग-कलिंग-नलिणतंतुमयभत्तिचित्ता वत्थविही बहुप्पकारा हवेज्ज वरपट्टणुग्गता वण्णरागकलिता

'एगोरुयदीवस्स णं भंते!' इत्यादि, **एकोरुकद्वीपस्य णं**मिति पूर्ववत् **भदन्त! 'कीदृशः'** क इव दृश्यः **'आकारभावप्रत्यवतारः'** भूम्यादिस्वरूपसम्भवः **प्रज्ञप्तः**?, भगवानाह-**गौतम!** एकोरुकद्वीपे

तहेव ते अणिगणावि दुमगणा अणेगबहुविविहवीससापरिणताए वत्थविधीए उववेया कुसविकुसवि० जाव चिट्ठंति १०।

एगोरुयद्दीवे णं भंते! दीवे मणुयाणं केरिसए आगारभावपडोयारे पण्णत्ते?, गोयमा! ते णं मणुया अणुवमतरसोमचारुरूवा भोगुत्तमगयलक्खणा भोगसस्सिरीया सुजायसव्वंगसुंदरंगा सुपतिट्ठियकुम्मचारुचलणा रत्तुप्पलपत्तमउयसुकुमालकोमलतला नग-नगर-सागर-मगर-चक्कंकहरंक-लक्खणंकियचलणा अणुपुव्वसुसाहतंगुलीया उण्णयतणुतंबणिद्धणखा संठियसुसिलिट्ठगूढगुप्फा एणीकुरुविंदा-वत्त-वट्टाणुपुव्वजंघा समुग्गणिमग्गगूढजाणू गतससण-सुजात-सण्णिभोरू वरवारणमत्त-तुल्लविक्कम-विलासितगती सुजातवरतुरगगुज्झदेसा आइण्णहतोव्व णिरुवलेवा पमुइयवरतुरग-सीहअतिरेगवट्टियकडी साहयसोणंदमुसलदप्पणणिगरितवरकणगच्छरु सरिसवरवइरवलितमज्झा उज्जुय-सम-संहित-सुजात-जच्चतणु-कसिण-णिद्ध-आदेज्जलडहसुकुमाल-मउय-रमणीज्जरोमराती गंगावत्तय-पयाहिणावत्त-तरंगभंगुर-रविकिरणतरुणबोधितआकोसायंतपउम-गंभीरवियडणाभा झस-विहग-सुजातपीणकुच्छी झसोदरा सुइकरणा पम्हवियडणाभा सण्णयपासा संगतपासा सुंदरपासा सुजातपासा मितमाइयपीणरतियपासा अकरंडुयकणगरुयगनिम्मलसुजायनिरुवहयदेहधारी पसत्थबत्तीसलक्खणधरा कणगसिलातलुज्जल-पसत्थसमतलोवचिय-वित्थिन्नपिहुलवच्छा सिरिवच्छंकियवच्छा पुरवरफलिहवट्टियभुया भुयगीसरविपुलभोग-आयाणफलिहउच्छूढदीहबाहू जुयसन्निभपीणरतियपीवरपउट्ठसंठियसुसिलिट्ठविसिट्ठघणथिरसुबद्धसुनिगूढपव्वसंधी रत्ततलोवइत-मउय-मंसल-पसत्थलक्खणसुजायअच्छिद्दजालपाणी पीवरवट्टियसुजायकोमलवरंगुलीया तंब-तलिण-सुचि-रुइर-णिद्ध-णक्खा चंदपाणिलेहा सूरपाणिलेहा संखपाणिलेहा चक्कपाणिलेहा दिसासोवत्थियपाणिलेहा चंदसूरसंखचक्कदिसासोवत्थियपाणिलेहा अणेगवरलक्खणुत्तमपसत्थसुविरतियपाणिलेहा वरमहिस-वराह-सीह-सद्दूल-उसभ-णागवर-पडिपुन्नविउलउन्नतमइंदखंधा चउरंगुलसुप्पमाणकंबुवरसरिसगीवा अवट्टित-सुविभत्त-सुजातचित्तमंसू मंसलसंठियपसत्थसद्दूलविपुलहणुया ओतवितसिलप्पवाल-बिंबफलसन्निभाहरोट्ठा पंडुरससिसगल-विमलनिम्मलसंख-गोखीरफेण-दगरयमुणालियाधवलदंतसेढी अखंडदंता अफुडियदंता अविरलदंता सुजातदंता एगदंतसेढिव्व अणेगदंता हुतवहनिद्धंतधोततत्ततवणिज्ज-रत्ततलतालुजीहा गरुलाययउज्जुतुंगणासा अवदालियपोंडरीयणयणा कोकासित-धवलपत्तलच्छा आणामियचावरुइलकिण्हपूराइयसंठियसंगतआयतसुजाततणुकसिणनिद्धभुमया अल्लीण-प्पमाणजुत्तसवणा सुसवणा पीणमंसलकवोलदेसभागा अचिरुग्गयबालचंदसंठियपसत्थवित्थिन्नसमणिडाला उडुवतिपडिपुण्णसोमवदणा छत्तागारुत्तमंगदेसा घणणिचियसुबद्धलक्खणुण्णय-कूडागारणिभपिंडियसिरा दाडिमपुप्फपगास-तवणिज्जसरिसनिम्मल-सुजाय-केसंतकेसभूमी सामलिबोंडघणणिचियछोडिय-मिउविसयपसत्थसुहुमलक्खण-सुगंधसुंदर-

'बहुसमरमणीयः' प्रभूतसमः सन् रम्यो **भूमिभागः प्रज्ञप्तः। 'से जहानामए आलिंगपुक्खरेइ वा'** इत्यादि**रुत्तरकुरुगम**स्तावदनुसर्त्तव्यो याव**दनुसञ्जना**सूत्रं, नवरमत्र **नानात्व**मिदं-मनुष्या **अष्टौ**

भुयमोयगभिंगिणील-कज्जलपहट्ठभमरगणणिद्ध-णिकुरुंबनिचिय-कुंचियपदाहिणावत्तमुद्धसिरया लक्खणवंजण-गुणोववेया सुजायसुविभत्तसुरूवगा पासाइया दरिसणिज्जा अभिरूवा पडिरूवा।

ते णं मणुया ओहस्सरा हंसस्सरा कोंचस्सरा नंदिघोसा सीहस्सरा सीहघोसा मंजुस्सरा मंजुघोसा सुस्सरा सुस्सरणिग्घोसा छायाउज्जोतियंगमंगा वज्जरिसभनारायसंघयणा समचउरंससंठाणसंठिया सिणिद्धछवी णिरायंका उत्तमपसत्थअइसेसनिरुवमतणू जल्ल-मल-कलंक-सेय-रय-दोसवज्जियसरीरा निरुवमलेवा अणुलोमवाउवेगा कंकग्गहणी कवोतपरिणामा सउणिव्व पोसपिट्ठंतरोरुपरिणता विग्गहियउन्नयकुच्छी पउमुप्पलसरिसगंधणिस्साससुरभिवदणा अट्ठधणुसयं ऊसिया, तेसिं मणुयाणं चउसट्ठि पिट्ठिकरंडगा पण्णत्ता समणाउसो!। ते णं मणुया पगतिभद्दगा पगतिविणीतगा पगतिउवसंता पगतिपयणुकोहमाणमायालोभा मिउमद्दवसंपण्णा अल्लीणा भद्दगा विणीता अप्पिच्छा असंनिहिसंचया अचंडा विडिमंतरपरिवसणा जहिच्छियकामगामिणो य ते मणुयगणा पण्णत्ता समणाउसो!।

तेसि णं भंते! मणुयाणं केवतिकालस्स आहारट्ठे समुप्पज्जति?, गोयमा! चउत्थभत्तस्स आहारट्ठे समुप्पज्जति।

एगोरुयमणुईणं भंते! केरिसए आगारभावपडोयारे पण्णत्ते?, गोयमा! ताओ णं मणुईओ सुजायसव्वंग-सुंदरीओ पहाणमहिलागुणेहिं जुत्ता अच्चंतविसप्पमाणपउमसूमालकुम्मसंठितविसिट्ठचलणा उज्जुमउय जुम्मिओ पीवर-निरंतर-पुट्ठसाहतंगुलीओ उण्णय-रतिय-तलिणतंबसुइणिद्धणखा रोमरहिय-वट्ट-लट्ठसंठिय-अजहण्णप-सत्थलक्खणअकोप्पजंघजुयला सुणिम्मिय-सुगूढ-जाणूमंडल सुबद्धसंधी कयलिक्खंभातिरेगसंठिय-णिव्वणसुकुमाल-मउय-कोमल-अविरल-सम-संहत-सुजात-वट्ट-पीवर-णिरंतरोरू अट्ठावयवीचीपट्टसंठियपसत्थ-वित्थिन्न-पिहुल-सोणी वदणायामप्पमाणदुगुणितविसालमंसलसुबद्धजहणवरधारणीतो वज्जविराइयपसत्थलक्खणणिरोदरा तिवलिवलीयतणुणमियमज्झिनातो उज्जुय-सम-संहित-जच्चतणु-कसिण-णिद्ध-आदेज्ज-लडह-सुविभत्त-सुजातसोभंतरुइल-रमणिज्जरोमराई गंगावत्तय-पदाहिणावत्त-तरंगभंगुर-रविकिरणतरुणबोधित-आकोसायंतपउम-वणगंभीरवियडणाभी अणुब्भड-पसत्थ-पीणकुच्छी सण्णयपासा संगयपासा सुजायपासा मितमातियपीणरइयपासा अकरंडुय-कणगरुयगनिम्मल-सुजाय-णिरुवहयगातलट्ठी कंचणकलससमपमाण-सम-संहित-सुजात-लट्ठचूचुय-आमेलग-जमलजुगल-वट्टिय-अब्भुण्णयरतियसंठियपयोधराओ भुयंगणुपुव्वतणुय-गोपुच्छवट्टसम-सहियणमिय-आएज्जललियबाहा तंबणहा मंसलग्गहत्था पीवरकोमलवरंगुलीओ णिद्धपाणिलेहा रवि-ससि-संख-चक्क-सोत्थिय-विभत्त-सुविरतियपाणिलेहा पीणुण्णयकक्खवत्थिप्पदेसा पडिपुण्णगलकवोला चउरंगुलसुप्पमाण-कंबुवरसरिसगीवा मंसल-संठिय-पसत्थहणुया दाडिमपुप्फप्पगास-पीवरकुंचियवराधरा सुंदरोत्तरोट्ठादधिदगरय

धनुःशतान्युच्छ्रिता वक्तव्याश्चतुःषष्टिः **पृष्ठकरण्डकाः**-पृष्ठवंशाः, बृहत्प्रमाणानां हि ते बहवो भवन्ति, **एकोनाशीतिं च रात्रिन्दिवानि** स्वापत्यान्यनुपालयन्ति, **स्थिति**स्तेषां **जघन्येन** देशोनः

चंदकुंदवासंतिमउल-अच्छिद्दविमलदसणा रत्तुप्पलपत्त-मउयसुकुमालतालुजीहा कणयरमुउलअकुडिलअब्भुग्गत-उज्जुतुंगणासा सारदणवकमलकुमुद-कुवलयविमुक्कदलणिगरसरिस-लक्खणअंकियकंतणयणा पत्तल-चवलायंत-तंबलोयणाओ आणामितचावरुइलकिण्हब्भराइसंठिय-संगत-आयय-सुजात-कसिण-णिद्धभमुया अल्लीण-पमाणजुत्त-सवणा पीण-मट्ठ-रमणिज्जगंडलेहा चउरंस-पसत्थ-समणिडाला कोमुतिरयणिकर-विमलपडिपुन्नसोमवयणा छत्तुन्नयउत्तमंगा कुडिल-सुसिणिद्ध-दीहसिरया छत्त-ज्झय-जुग-थूभ-दामिणि-कमंडलु-कलस-वावि-सोत्थिय-पडाग-जव-मच्छ-कुम्म-रहवर-मगर-सुक-थाल-अंकुस-अट्ठावय-वीइ-सुपइट्ठक-मयूर-सिरिदामाभिसेय-तोरण-मेइणि-उदधि-वरभवण-गिरि-वरआयंस-ललियगत-उसभ-सीह-चमर-उत्तमपसत्थबत्तीसलक्खणधरीतो हंससरिसगतीतो कोइलमधुरगिरसुस्सराओ कंताओ सव्वस्स अणुमतातो ववगतवलिपलिया वंग-दुव्वण्ण—वाही-दोभग्ग-सोगमुक्काओ उच्चत्तेण य नराण थोवूणमूसियाओ सभावसिंगाराचारुवेसा संगत-गत-हसित-भणिय-चेट्ठिय-विलास-संलाव-णिउणजुत्तोवयारकुसला सुंदरथण-जहण-वदण-कर-चलण-णयणलावण्ण-वण्ण-जोवण-विलासकलिया नंदणवणविवरचारिणीउव्व अच्छराओ अच्छेरगपेच्छणिज्जा पासाईतातो दरिसणिज्जातो अभिरूवाओ पडिरूवाओ। तासि णं भंते! मणुईणं केवतिकालस्स आहारट्ठे समुप्पज्जति?, गोयमा! चउत्थभत्तस्स आहारट्ठे समुप्पज्जति। ते णं भंते! मणुया किमाहारमाहारेंति?, गोयमा! पुढविपुप्फफलाहारा ते मणुयगणा पण्णत्ता समणाउसो!। तीसे णं भंते! पुढवीए केरिसए आसाए पण्णत्ते?, गोयमा! से जहाणामए गुलेति वा खंडेति वा सक्करेति वा मच्छंडियाति वा भिसकंदेति वा पप्पडमोयएति वा पुप्फउत्तराइ वा पउमुत्तराइ वा अकोसिताति वा विजताति वा महाविजयाइ वा उवमाइ वा अणोवमाइ वा चाउरक्के गोखीरे चउठाणपरिणए गुडखंडमच्छंडिउवणीए मंदग्गिकढीए वण्णेणं उववेए जाव फासेणं, भवेतारूवे सिता?, नो इणट्ठे समट्ठे, तीसे णं पुढवीए एत्तो इट्ठयराए चेव जाव मणामतराए चेव आसाए णं पण्णत्ते,

तेसि णं भंते! पुप्फफलाणं केरिसए आसाए पण्णत्ते?, गोयमा! से जहानामए रण्णो चाउरंतचक्क-वट्टिस्स कल्लाणे पवरभोयणे सतसहस्सनिप्फन्ने वण्णेणं उववेते गंधेणं उववेते रसेणं उववेते फासेणं उववेते आसाइणिज्जे वीसाइणिज्जे दीवणिज्जे बिंहणिज्जे दप्पणिज्जे मयणिज्जे सव्विंदियगातपल्हायणिज्जे, भवेतारूवे सिता?, णो तिणट्ठे समट्ठे, तेसि णं पुप्फफलाणं एत्तो इट्ठतराए चेव जाव आस्साए णं पण्णत्ते।

ते णं भंते! मणुया तमाहारमाहारित्ता कहिं वसहिं उवेंति?, गोयमा! रुक्खगेहालता णं ते मणुयगणा पण्णत्ता समणाउसो!।

ते णं भंते! रुक्खा किंसंठिया पण्णत्ता?, गोयमा! कूडागारसंठिता पेच्छाघरसंठिता सत्तागारसंठिया झयसंठिया थूभसंठिया तोरणसंठिया गोपुरवेतियपालगसंठिया अट्टालगसंठिया पासादसंठिया हम्मतलसंठिया

पल्योपमासङ्ख्येयभागः, एतदेव व्याचष्टे—**पल्योपमासङ्ख्येयभागन्यूनः, उत्कर्षतः परिपूर्णः पल्योपमासङ्ख्येयभागः**।।२१८।।

गवक्खसंठिया वालग्गपोतियसंठिता वलभीसंठिता अण्णे तत्थ बहवे वरभवणसयणासणविसिट्ठसंठाणसंठिता सुहसीयलच्छाया णं ते दुमगणा पण्णत्ता समणाउसो!।

अत्थि णं भंते! एगोरूयद्दीवे दीवे गेहाणि वा गेहाययणाणि वा?, णो तिणट्ठे समट्ठे, रुक्खगेहालया णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगूरूयदीवे २ गामाति वा णगराति वा जाव सन्निवेसाति वा?, णो तिणट्ठे समट्ठे, जहिच्छितकामगामिणो ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगूरुयदीवे असीति वा मसीइ वा कसीइ विवणीति वा पणीइ वा वणिज्जाति वा?, नो तिणट्ठे समट्ठे, ववगयअसिमसिकिसिपणियवाणिज्जा णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगूरुयद्दीवे हिरण्णेति वा सुवन्नेति वा कंसेति वा दूसेति वा मणीति वा मुत्तिएति वा विपुलधणकणगरयण-मणिमोत्तियसंखसिलप्पवाल-संतसारसावएज्जेति वा?, हंता अत्थि, णो चेव णं तेसिं मणुयाणं तिव्वे ममत्तभावे समुप्पज्जति। अत्थि णं भंते! एगोरुयदीवे रायाति वा जुवरायाति वा ईसरेति वा तलवरेइ वा माडंबिएति वा कोडुंबिएति वा इब्भेति वा सेट्ठीति वा सेणावतीति वा सत्थवाहेति वा?, णो तिणट्ठे समट्ठे, ववगयइड्ढीसक्कारा णं ते मणुयगणा पण्णत्ता समणाउसो!।

अत्थि णं भंते! एगूरूयदीवे २ दासाति वा पेसाइ वा सिस्साति वा भयगाति वा भाइल्लगाइ वा कम्मगरपुरिसाति वा?, नो तिणट्ठे समट्ठे, ववगतआभिओगिता णं ते मणुयगणा पण्णत्ता समणाउसो!।

अत्थि णं भंते! एगोरुयदीवे दीवे मातति वा पियाति वा भायाति वा भइणीति वा भज्जाति वा पुत्ताति वा धूयाइ वा सुण्हाति वा?, हंता अत्थि, नो चेव णं तेसि णं मणुयाणं तिव्वे पेज्जबंधणे समुप्पज्जति, पयणुपेज्जबंधणा णं ते मणुयगणा पण्णत्ता समणाउसो!।

अत्थि णं भंते! एगुरुयदीवे अरीति वा वेरिएति वा घातकाति वा वहकाति वा पडिणीताति वा पच्चमित्ताति वा?, णो तिणट्ठे समट्ठे, ववगतवेराणुबंधा णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगोरूए दीवे मित्ताति वा वतंसाति वा घडिताति वा सहीति वा सुहियाति वा महाभागाति वा संगतियाति वा?, णो तिणट्ठे समट्ठे, ववगतपेम्मा ते मणुयगणा पण्णत्ता समणाउसो!।

अत्थि णं भंते! एगोरूयदीवे आवाहाति वा वीवाहाति वा जण्णाति वा सद्धाति वा थालिपाकाति वा चूलोवणतणाति वा सीमंतोवणयणाइ वा पितिपिंडनिवेदणाति वा?,णो तिणट्ठे समट्ठे, ववगतआवाहविवाह-जण्णसद्धथालिपागचूलोवणतणसीमंतोवणयणपितिपिंडनिवेदणा णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगोरुयदीवे २ इंदमहाति वा खंदमहाति वा रुद्दमहाति वा सिवमहाति वा वेसमणमहाइ वा मुगुंदमहाति वा णागमहाति वा जक्खमहाति वा भूतमहाति वा कूवमहाति वा तलाय-णदिमहाति वा दहमहाति वा पव्वयमहाति वा

(२१९) कहि णं भंते! दाहिणिल्लाणं आभासियमणुस्साणं आभासियदीवे णामं दीवे पण्णत्ते?, गोयमा! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं

रुक्खरोवणमहाति वा चेइयमहाइ वा थूभमहाति वा?, णो तिणट्ठे समट्ठे, ववगतमहमहिमा णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगोरुयदीवे दीवे णडपेच्छाति वा णट्टपेच्छाति वा मल्लपेच्छाति वा मुट्ठियपेच्छाइ वा विडंबगपेच्छाइ वा कहगपेच्छाति वा पवगपेच्छाति वा अक्खायगपेच्छाति वा लासगपेच्छाति वा लंखपे० मंखपे० तूणइल्लपे० तुंबवीणपे० कावपे० मागहपे० जल्लपे०?, णो तिणट्ठे समट्ठे, ववगतकोउहल्ला णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगुरूयदीवे सगडाति वा रहाति वा जाणाति वा जुग्गाति वा गिल्लीति वा थिल्लीति वा पिल्लीइ वा पवहणाइ वा सिवियाति वा संदमाणियाति वा?, णो तिणट्ठे समट्ठे, पादचारविहारिणो णं ते मणुस्सगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगूरुयदीवे आसाति वा हत्थीति वा उट्टाति वा गोणाति वा महिसाति वा खराति वा घोडाति वा अजाति वा एलाति वा?, हंता अत्थि, नो चेव णं तेसिं मणुयाणं परिभोगत्ताए हव्वमागच्छंति। अत्थि णं भंते ! एगोयरुगदीवे गावीइ वा महिसीइ वा उट्टीइ वा अयाइ वा एलगाइ वा ? हंता अत्थि । णो चेव णं तेसिं मणुयाणं परिभोगत्ताए हव्वमागच्छति । अत्थि णं भंते! एगूरुयगदीवे दीवे सीहाति वा वग्घाति वा विगाति वा दीवियाइ वा अच्छाति वा परस्सराति वा सियालाइ वा बिडालाइ वा सुणगाति वा कोलसुणगाति वा कोकंतियाति वा ससगाति वा चित्तलाति वा चिल्ललगाति वा?, हंता अत्थि, नो चेव णं ते अण्णमण्णस्स तेसिं वा मणुयाणं किंचि आबाहं वा पबाहं वा उप्पायंति वा छविच्छेदं वा करेंति, पगतिभद्दका णं ते सावयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगुरूयदीवे दीवे सालीति वा वीहीति गोधूमाति वा जवाति वा तिलाति वा इक्खूति वा?, हंता अत्थि, नो चेव णं तेसिं मणुयाणं परिभोगत्ताए हव्वमागच्छंति। अत्थि णं भंते! एगूरुयदीवे दीवे गत्ताइ वा दरीति वा घंसाति वा भिगूति वा उवाएति वा विसमेति वा विज्जलेति वा धूलीति वा रेणूति वा पंकेइ वा चलणीति वा?, णो तिणट्ठे समट्ठे, एगूरुयदीवे णं दीवे बहुसमरमणिज्जे भूमिभागे पण्णत्ते समणाउसो!। अत्थि णं भंते! एगूरुयदीवे दीवे खाणूति वा कंटएति वा हीरएति वा सक्कराति वा तणकयवराति वा पत्तकयवराइ वा असुतीति वा पूतियाति वा दुब्भिगंधाइ वा अचोक्खाति वा?, णो तिणट्ठे समट्ठे, ववगयखाणु-कंटक-हीर-सक्कर-तणकयवर-पत्तकयवर-असुति-पूतिय-दुब्भिगंधमचोक्खपरिवज्जिए णं एगुरुयदीवे पण्णत्ते समणाउसो!। अत्थि णं भंते! एगुरुयदीवे दीवे दंसाति वा मसगाति वा पिसुयाति वा जूताति वा लिक्खाति वा ढंकुणाति वा?, णो तिणट्ठे समट्ठे, ववगतदंस-मसग-पिसुत-जूत-लिक्ख-ढंकुणपरिवज्जिए णं एगुरुयदीवे पण्णत्ते समणाउसो!। अत्थि णं भंते! एगुरुयदीवे अहीइ वा अयगराति वा महोरगाति वा?, हंता अत्थि, नो चेव णं ते अन्नमन्नस्स तेसिं वा मणुयाणं किंचि आबाहं वा पबाहं वा छविच्छेयं वा करेंति, पगइभद्दगा णं ते वालगगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगुरुयदीवे गहदंडाति वा गहमुसलाति वा गहगज्जिताति

चुल्लहिमवंतस्स वासधरपव्वतस्स पुरत्थिमिल्लातो[1] चरिमंतातो दाहिणपुरत्थिमिल्लेणं लवणसमुद्दं तिन्नि जोयणसताइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं आभासियमणुस्साणं आभासियदीवे णामं दीवे पण्णत्ते, सेसं जहा एगुरूयाणं।।२१९।।

वा गहजुद्धाति वा गहसंघाडगाति वा गहअवसव्वाति वा अब्भाति वा अब्भरुक्खाति वा संझाति वा गंधव्वनगराति वा गज्जिताति वा विज्जुताति वा उक्कापाताति वा दिसादाहाति वा णिग्घाताति वा पंसुविट्ठीति वा जुवगाति वा जक्खालित्ताति वा धूमिताति वा महिताति वा रउग्घाताति वा चंदोवरागाति वा सूरोवरागाति वा चंदपरिवेसाइ वा सूरपरिवेसाति वा पडिचंदाति वा पडिसूराति वा इंदधणूति वा उदगमच्छाति वा अमोहाइ वा कविहसियाइ वा पाईणवायाइ वा पडीणवायाइ वा जाव [१. द्र. १/८१ सू.।] सुद्धवाताति वा गामदाहाति वा नगरदाहाति वा जाव[2] [२.द्र स्थानाङ्गे २/६९०।] सण्णिवेसदाहाति वा पाणक्खत-जणक्खय-कुलक्खय-धणक्खय-वसणभूतमणारिताति वा?, णो तिणट्ठे समट्ठे। अत्थि णं भंते! एगुरुयदीवे दीवे डिंबाति वा डमराति वा कलहाति वा बोलाति वा खाराति वा वेराति वा विरुद्धरज्जाति वा?, णो तिणट्ठे समट्ठे, ववगतडिंब-डमर-कलह-बोल-खार-वेर-विरुद्धरज्जविवज्जिता णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगुरुयदीवे दीवे महाजुद्धाति वा महासंगामाति वा महासत्थनिवयणाति वा महापुरिसवाणाति वा महारुधिरवाणाति वा नागवाणाति वा खेणवाणाइ वा तामसवाणाइ वा दुब्भूतियाइ वा कुलरोगाति वा गामरोगाति वा णगररोगाति वा मंडलरोगाति वा सिरोवेदणाति वा अच्छिवेदणाति वा कण्णवेदणाति वा णक्कवेदणाइ वा दंतवेदणाइ वा नखवेदणाइ वा कासाति वा सासाति वा जराति वा दाहाति वा कच्छूति वा खसराति वा कुट्ठाति वा दगराति वा अरिसाति वा अजीरगाति वा भगंदराइ वा इंदग्गहाति वा खंदग्गहाति वा कुमारग्गहाति वा णागग्गहाति वा जक्खग्गहाति वा भूतग्गहाति वा उव्वेयग्गहाति वा धणुग्गहाति वा एगाहियग्गहाति वा बेयाहियगहिताति वा तेयाहियगहियाइ वा चाउत्थगाहियाति वा हिययसूलाति वा मत्थगसूलाति वा पाससूलाइ वा कुच्छिसूलाइ वा जोणिसूलाइ वा गाममारीति वा जाव सन्निवेसमारीति वा पाणक्खय जाव वसणभूतमणारिताति वा?, णो तिणट्ठे समट्ठे, ववगतरोगायंका णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगूरुयदीवे दीवे अतिवासाति वा मंदवासाति वा सुवुट्ठीइ वा मंदवुट्ठीति वा उद्दवाहाति वा पवाहाति वा दगुब्भेयाइ वा दगुप्पीलाइ वा गामवाहाति वा जाव सन्निवेसवाहाति वा पाणक्खय० जाव वसणभूतमणारिताति वा?, णो तिणट्ठे समट्ठे, ववगतदगोवद्दवा णं ते मणुयगणा पण्णत्ता समणाउसो!। अत्थि णं भंते! एगुरूयदीवे दीवे अयागराति वा तम्बागराइ वा सीसागराति वा सुवण्णागराति वा रतणागराति वा वइरागराइ वा वसुहाराति

---

१. जे. । दाहिणपुरत्थिमिल्लातो चरिमंतातो लवण० कखगटमु.।

'**कहि णं भंते!**' इत्यादि, **क्व भदन्त! दाक्षिणात्यानामाभाषिकमनुष्याणामाभाषिकद्वीपो नाम द्वीपः प्रज्ञप्तः?**, भगवानाह-**गौतम! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य दक्षिणेन**-दक्षिणस्यां दिशि **क्षुल्लहिमवतो वर्षधरपर्वतस्य पूर्वस्माच्चरमान्तात् 'दक्षिणपूर्वेण'** दक्षिणपूर्वस्यां दिशि **लवणसमुद्रं** क्षुल्लहिमवद्दंष्ट्राया उपरि **त्रीणि योजनशतान्यवगाह्यात्रान्तरे** दंष्ट्राया उपरि **दाक्षिणात्यानामाभाषिकमनुष्याणामाभाषिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेष**वक्तव्यता **एकोरुक**वद्वक्तव्या यावत्स्थितिसूत्रम् । २१९।।

(२२०) कहि णं भंते!! दाहिणिल्लाणं णंगोलिमणुस्साणं →[१]णंगोलियदीवे णामं दीवे पण्णत्ते?← पुच्छा, गोयमा! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासधरपव्वयस्स [२]पच्चत्थिमिल्लातो चरिमंतातो दाहिणपच्चत्थिमिल्लेणं लवणसमुद्दं तिण्णि जोयणसताइं आगोहित्ता एत्थ णं दाहिणिल्लाणं णंगोलियमणुस्साणं णंगोलियदीवे णामं दीवे पण्णत्ते। सेसं जहा एगुरुयाणं ।।२२०।।

वा हिरण्णवासाति वा सुवण्णवासाति वा रयणवासाति वा वइरवासाति वा आभरणवासाति वा पत्तवासाति वा पुप्फवासाति वा फलवासाति वा बीयवासा० मल्लवासा० गंधवासा० वण्णवासा० चुण्णवासा० खीरवुट्ठीति वा रयणवुट्ठीति वा हिरण्णवुट्ठीति वा सुवण्ण० तहेव जाव चुण्णवुट्ठीति वा सुकालाति वा दुकालाति वा सुभिक्खाति वा दुभिक्खाति वा अप्पग्घाति वा महग्घाति वा कयाइ वा महाविक्कयाइ वा सण्णिहीइ वा संचयाइ वा निधीइ वा निहाणाति वा चिरपोराणाति वा पहीणसामियाति वा पहीणसेउयाइ वा पहीणगोत्तागाराइं वा जाइं इमाइं गामागरणगरखेडकब्बडमडंबदोणमुहपट्टणासमसंवाहसन्निवेसेसु सिंघाडगतिगचउक्कचच्चरचउमुहमहापहपहेसु णगरणिद्धमणसुसाणगिरिकंदरसन्तिसेलोवट्ठाणभवणगिहेसु सन्निक्खित्ताइं चिट्ठंति, नो तिणट्ठे समट्ठे। एगुरुयदीवे णं भंते! दीवे मणुयाणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! जहन्नेणं पलिओवमस्स असंखेज्जइभागं असंखेज्जतिभागेण ऊणगं उक्कोसेण पलिओवमस्स असंखेज्जतिभागं। ते णं भंते! मणुया कालमासे कालं किच्चा कहिं गच्छंति कहिं उववज्जंति?, गोयमा! ते णं मणुया छम्मासावसेसाउया मिहुणताइं पसवंति अउणासीइं राइंदियाइं मिहुणाइं सारक्खंति संगोविंति य, सारक्खित्ता २ उस्ससित्ता निस्ससित्ता कासित्ता छीतित्ता अक्किट्ठा अव्वहिता अपरियाविया सुहंसुहेणं कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवन्ति, देवलोयपरिग्गहा णं ते मणुयगणा पण्णत्ता समणाउसो!← ।। २१८।।

---

१. जे. । →← चिह्नद्वयमध्यवर्तिपाठस्थाने - कखगटमु- मध्ये-पुच्छा-इति पाठः । एवमग्रेऽपि ।। २. उत्तरपुरत्थिमिल्लाओ चरिमंताओ लवण० कखगटमु.। प्रवचनसारोद्धार (गा.१४२१) एवंप्रकार उल्लेखोऽस्ति-यद् -"उत्तरपश्चिमेन नाङ्गोलिकमनुष्याः दक्षिण-पश्चिमेन च वैशालिकमनुष्याः सन्ति, तथा तत्र वैषाणिक-द्वीपः इति अभिधानमस्ति ।" अत्र विषये अग्रेऽपि पाठभेदो दृश्यते ।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! दाक्षिणात्यानां नाङ्गोलिकमनुष्याणां नाङ्गोलिकद्वीपो नाम द्वीपः प्रज्ञप्तः ?,** भगवानाह–**गौतम! जम्बूद्वीपे द्वीपे मंदरस्य पर्वतस्य 'दक्षिणेन'** दक्षिणस्यां दिशि **क्षुल्लहिमवतो वर्षधरपर्वतस्य पाश्चात्याच्चरमान्ताद् 'दक्षिणपश्चिमेन'** दक्षिणपश्चिमायां दिशि **लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे** दंष्ट्राया उपरि **दाक्षिणात्यानां नाङ्गोलिकमनुष्याणां नाङ्गोलिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेषं यथैकोरुकाणां** तथा वक्तव्यं यावत्स्थितिसूत्रम्।। २२०।।

(२२१) कहि णं भंते! दाहिणिल्लाणं वेसाणियमणुस्साणं वेसाणियदीवे णाणं दीवे पण्णत्ते ? गोयमा! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासधरपव्वयस्स पं[1]च्चत्थिमिल्लाओ चरिमंताओ उत्तरपच्चत्थिमिल्लेणं लवणसमुद्दं तिण्णि जोयणसताइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं वेसाणियमणुस्साणं वेसाणियदीवे णामं दीवे पण्णत्ते । सेसं जहा एगुरुयाणं।। २२१।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! वैशालिकमनुष्याणां** वैशालिकद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–**गौतम! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य 'दक्षिणेन'** दक्षिणस्यां दिशि **क्षुल्लहिमवतो वर्षधरपर्वतस्य पाश्चात्याच्चरमान्ताद् 'उत्तरपश्चिमेन'** उत्तरपश्चिमायां दिशि **लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे** दंष्ट्राया उपरि **वैशालिकमनुष्याणां वैशालिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेषमेकोरुकवद्** वक्तव्यं यावत्स्थितिसूत्रम्।। २२१।।

(२२२) कहि णं भंते! दाहिणिल्लाणं हयकण्णमणुस्साणं हयकण्णदीवे णामं दीवे पण्णत्ते?, गोयमा! एगुरूयदीवस्स पु[2]रत्थिमिल्लातो चरिमंतातो उत्तरपुरत्थिमिल्लेणं लवणसमुद्दं चत्तारि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं हयकण्णमणुस्साणं हयकण्णदीवे णामं दीवे पण्णत्ते, चत्तारि जोयणसयाइं आयामविक्खंभेणं बारस जोयणसया [3]पण्णट्ठ किंचिविसेसाहिया परिक्खेवेणं, [4]सेसं जहा एगुरूयाणं।।२२२।।

---

१. **जे. L।** दाहिणपच्चत्थिमिल्लाओ चरिमंताओ लवण०. **कखगटमु.।। २. जे. L।** उत्तरपुरत्थिमिल्लातो चरिमंतातो लवण० **कखगटमु. ।। ३. जे. L।** जोयणसया पन्नट्ठी किंचिविसेसूणा परि० **कखगमु. ।। ४. जे. L।** से णं एगाए पउमवरवेतियाए अवसेसं जहा - **कखगटमु.।।**

'कहि णं भंते!' इत्यादि, **क्व भदन्त! हयकर्णमनुष्याणां हयकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः?,** भगवानाह–**गौतम! एकोरुकद्वीपस्य पूर्वस्माच्चरमान्ताद् उत्तरपूर्वस्यां** दिशि **लवणसमुद्रं चत्वारि योजनशतान्यवगाह्यात्रान्तरे** क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्तादपि चतुर्योजनशतान्तरे **दाक्षिणात्यानां हयकर्णमनुष्याणां हयकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः,** स च **चत्वारि योजनशतान्यायाम-विष्कम्भेन द्वादश पञ्चषष्ठानि योजनशतानि किञ्चिद्विशेषाधिकानि परिक्षेपेण, शेषं यथैकोरुकमनुष्याणाम्**।।२२२।।

(२२३) →[१]गयकण्णए एवं चेव णवरं← आभासियदीवस्स [२]पुरत्थिमिल्लातो चरिमंतातो दाहिणपुरित्थिमिल्लेणं लवणसमुद्दं चत्तारि जोयणसताइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं गयकण्णमणुस्साणं गयकण्णदीवे णामं दीवे पण्णत्ते । सेसं जहा हयकण्णाणं।।२२३।। (२२४) एवं गोकण्णमणुस्स[३]ाण वि णंगूलियदीवस्स पच्चत्थिमिल्लातो चरिमंतातो दाहिणपुरत्थिमिल्लेणं लवणसमुद्दं चत्तारि जोयणसताइं आगोहित्ता, एत्थ णं गोकण्णमणुस्साणं गोकण्णदीवे णामं दीवे पण्णत्ते। सेसं जहा हयकण्णाणं।। २२४।।

एवमाभाषिकद्वीपस्य पूर्वस्माच्चरमान्ताद्दक्षिणपूर्वस्यां दिशि चत्वारि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्ताच्चतुर्योजनशतान्तरे **गजकर्णमनुष्याणां गजकर्णो द्वीपो नाम द्वीपः प्रज्ञप्तः,** आयामविष्कम्भपरिधिपरिमाणं **हयकर्णद्वीपवत्।। नाङ्गोलिकद्वीपस्य पश्चिमाच्चरमान्ताद्दक्षिणपश्चिमेन चत्वारि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे** क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्ताच्चतुर्योजनशतान्तरे **गोकर्णमनुष्याणां गोकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः,** आयामविष्कम्भपरिधिपरिमाणं **हयकर्णद्वीपवत्**।।२२३-२२४।।

---

१. जे.। →← **चिह्नद्वेयमध्यवर्तिपाठस्थाने L मु. मध्ये** कहि णं भंते ! दाहिणिल्लाणं गजकण्णमणुस्साणं पुच्छा, गोयमा ! **इति पाठः** ।। २. जे. L। दाहिणपुरत्थिमिल्लातो चरिमंतातो लवण - **कखगटमु.** ।। ३. जे. L। ०स्साणं पुच्छा । वेसाणितदीवस्स, दाहिण पच्चत्थिमिल्लातो चरिमंतातो लवण० **कखगटमु** ।।

(२२५) सक्कुलिकण्णाणं[१] वेसाणियदीवस्स पच्चत्थिमिल्लातो चरिमंतातो उत्तरपच्चत्थिमेणं लवणसमुद्दं चत्तारि जोयणसताइं आगोहित्ता एत्थणं दाहिणिल्लाणं सुक्कुलिमणुस्साणं सुक्कुलिकण्णदीवे णामं दीवे पण्णत्ते। सेसं जहा हयकण्णाणं ।।२२५ ।।

वैशालिकद्वीपस्य पश्चिमाच्चरमान्ताद् उत्तरपश्चिमायां दिशि लवणसमुद्रमवगाह्य चत्वारि योजनशतानि अत्रान्तरे क्षुल्लहिमवद्वंष्ट्राया उपरि जम्बूद्वीपवेदिकान्ताच्चतुर्योजनशतान्तरे **दाक्षिणात्यानां शष्कुलीकर्णमनुष्याणां शष्कुलीकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः,** आयामविष्कम्भपरिधिपरिमाणं **हयकर्णद्वीपवत्,** पद्मवरवेदिकावनषण्डमनुष्यादिस्वरूपं च समस्तमेकोरुकद्वीपवत्।। २२५।।

(२२६) →एवं[२] एएण अभिलावेणं आदंसमुहादीणं लवणसमुद्दं पंच जोयण-सयाइं ओगाहित्ता, पंचजोयणसयाइं आयामविक्खंभेणं। आसमुहादीणं छ जोयण-

---

१. जे. L। ०ण पुच्छा, गोयमा ! णंगोलियदीवस्स उत्तरपच्चत्थिमिल्लातो चरिमंतातो लवण० **कखगटमु.।। २. जे. L । सूत्र २२६ स्थाने कखगटमु स्थाने इत्थं पाठः-** आतंसमुहाणं पुच्छा, हतकण्णयदीवस्स उत्तरपुरत्थिमिल्लातो चरिमंतातो पंच जोयणसताइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं आयंसमुहमणुस्साणं आयंसमुहदीवे णामं दीवे पण्णत्ते, पंच जोयणसयाइं आयामविक्खंभेणं, आसमुहाईणं छ सया, आसकन्नाईणं सत्त, उक्कामुहाईणं अट्ठ, घणदंताइणं जाव नव जोयणसयाइं-

एगूरुयपरिक्खेवो नव चेव सयाइं अउणपन्नाइं। बारसपन्नट्ठाइं हयकण्णाईणं परिक्खेवो।।१।।

आयंसमुहाईणं पन्नरसेकासीए जोयणसते किंचिविसेसाधिए परिक्खेवेणं, एवं एतेणं कमेणं उवउज्जिऊण णेतव्वा चत्तारि चत्तारि एगपमाणा, णाणत्तं ओगाहे, विक्खंभे परिक्खेवे पढमबीततितियचउक्काणं उग्गहो विक्खंभो परिक्खेवो भणितो, चउत्थचउक्के छजोयणसयाइं आयामविक्खंभेणं अट्ठारसत्ताणउते जोयणसते विक्खंभेणं। पंचमचउक्के सत्त जोयणसताइं आयामविक्खंभेणं बावीसं तेरसोत्तरे जोयणसए परिक्खेवेणं। छट्ठचउक्के अट्ठजोयणसताइं आयामविक्खंभेणं पणुवीसं गुणतीसजोयणसए परिक्खेवेणं। सत्तमचउक्के नवजोयणसताइं आयामविक्खंभेणं दो जोयणसहस्साइं अट्ठ पणयाले जोयणसए परिक्खेवेणं।

जस्स य जो विक्खंभो उग्गहो तस्स तत्तिओ चेव। पढमाइयाण परिरतो जाण सेसाण अहिओ उ।।१।।

एवं एएणं अभिलावेणं आदंसमुहादीणं लवणसमुद्दं पंच जोयणसयाइं ओगाहित्ता पंच जोयणसयाइं आयाम-विक्खंभेणं। आसमुहदीणं छ जोयणसयाइं । आसकण्णा-दीणं सत्तजोयणसयाइं । उक्कामुहादीणं अट्ठ जोयणसयाइं । घणदंताणं नव जोयणसायाइं। सेसा जहा एगुरूयदीवस्स जाव सुद्धदंतदीवे देवलोकपरिग्गहा णं ते मणुयगणा पण्णत्ता समणाउसो !।।

सयाइं। आसकण्णादीणं सत्त जोयणसयाइं। उक्कामुहादीणं अट्ठ जोयण सयाइं। घणदंताणं नव जोयणसयाइं। एगूरुयपरिक्खेवो, नव चेव सताइं अउणापण्णाइं। बारस पण्णट्ठाइं, हयकण्णाण परिक्खेवो।।१।। पण्णरसेक्कासीया, आदंसमुहाण परिक्खेवो अट्ठारस सत्तणउया, आदंसमुहाण परिरयो होति।।२।। बावीसं तेराइं परिरयो होति आसकण्णाणं। पणूवीस अउणतीसा, उक्कामुहाणं परिक्खेवो।।३।। दोच्चेव सहस्साइं अट्ठेव सत्ता हवंति पणताला। घणदंतदीवस्स तु विसेसाधिओ परिक्खेवो।।४।।अट्ठसया चोवट्ठा, संकातीता य पलियभागा तु। उच्चत्तं पिट्ठकरंडगा य आउं च सव्वेसिं ।।५।। पढमंमि तिण्णि उ सता, सेसाण सउत्तरं णव उ जाव। ओगहणविक्खंभं दीवाणं परिरयं वोच्छं।।६।। पढमचउक्कपरिरया बितितचउक्कस्स परिरयो अहितो। सोलेहिं तिहिं जोयणसतेहिं एमेव सेसाणं ←।।७।। ।।२२६।।

एवमेतेनाभिलापेनामीषां **हयकर्णादीनां** चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु **पञ्च योजनशतानि लवणसमुद्रमवगाह्य पञ्चयोजनशतायाम-विष्कम्भा एकाशीत्यधिकपञ्चदश-योजनशतपरिक्षेपाः** पद्मवरवेदिकावनषण्डमण्डितबाह्यप्रदेशा जम्बूद्वीपवेदिकान्तात्पञ्चयोजनशत-प्रमाणान्तरा आदर्शमुख-मेण्ढमुखा-ऽयोमुख-गोमुखनामानश्चत्वारो द्वीपा वक्तव्याः, तद्यथा–हयकर्णस्य परत आदर्शमुखो गजकर्णस्य परतो मेण्ढमुखो गोकर्णस्य परतोऽयोमुखः शष्कुलीकर्णस्य परतो गोमुखः।

एतेषामप्या**दर्शमुखादीनां** चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं लवणसमुद्रं **षट् षड् योजनशतान्यवगाह्य षड् योजनशतायाम-विष्कम्भाः सप्तनवत्यधिकाष्टादश-योजनशतपरिक्षेपाः** पद्मवरवेदिकावनषण्डमण्डितपरिसरा जम्बूद्वीपवेदिकान्तात् षड् योजनशतप्रमाणान्तरा अश्वमुख-हस्तिमुखसिंहमुख-व्याघ्रमुखनामानश्चत्वारो द्वीपा वक्तव्याः, तद्यथा–आदर्शमुखस्य परतोऽश्वमुखः, मेण्ढमुखस्य परतो हस्तिमुखः, अयोमुखस्य परतः सिंहमुखः, गोमुखस्य परतो व्याघ्रमुखः।

एतेषामश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं **सप्त सप्त योजनशतानि लवणसमुद्रमवगाह्य सप्तयोजनशतायामविष्कम्भास्त्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाः** पद्मवरवेदिकावनषण्डसमवगूढाः जम्बूद्वीपवेदिकान्तात्सप्तयोजनशतप्रमाणान्तरा **अश्वकर्ण**-हरिकर्णा-

ऽकर्ण-कर्णप्रावरणनामानश्चत्वारो द्वीपा बोध्याः, तद्यथा–अश्वमुखस्य परतोऽश्वकर्णः, हस्तिमुखस्य परतो हरिकर्णः, सिंहमुखस्य परतोऽकर्णः, व्याघ्रमुखस्य परतः कर्णप्रावरणः, तत एतेषामप्यश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येक**मष्टौ अष्टौ योजनशतानि लवणसमुद्र-मवगाह्याष्टयोजनशतायाम-विष्कम्भा एकोनत्रिंशदधिकपञ्चविंशतियोजनशतपरिक्षेपाः** पद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकान्तादष्टयोजनशतप्रमाणान्तरा **उल्कामुख**-मेघमुख-विद्युन्मुख-विद्युद्दन्ताभिधानाश्चत्वारो द्वीपा वक्तव्याः, तद्यथा–अश्वकर्णस्य परत उल्कामुखः हरिकर्णस्य परतो मेघमुखः अकर्णस्य परतो विद्युन्मुखः कर्णप्रावरणस्य परतो विद्युद्दन्तः, एतेषामप्युल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं **नव नव योजनशतानि लवणसमुद्रमवगाह्य नवनवयोजनशतायाम-विष्कम्भाः पञ्चचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपाः** पद्मवर-वेदिका-वनखण्डसमवगूढा जम्बूद्वीपवेदिकान्तात् नवयोजनशतप्रमाणान्तरा **घनदन्त**-लष्टदन्त-गूढदन्त-शुद्धदन्तनामानश्चत्वारो द्वीपाः, तद्यथा–उल्कामुखस्य परतो घनदन्तः मेघमुखस्य परतो लष्टदन्तः विद्युन्मुखस्य परतो गूढदन्तः, विद्युद्दन्तस्य परतः शुद्धदन्तः। एतेषामेव द्वीपानामवगाहा-ऽऽयाम-विष्कम्भ-परिरयपरिमाणसङ्ग्रहगाथाषट्कमाह–

"पढमंमि तिन्नि उ सया सेसाण सउत्तरा नव उ जाव।
ओगाहं विक्खंभं दीवाणं परिरयं वोच्छं।।१।।

पढमचउक्कपरिरया बीयचउक्कस्स परिरओ अहिओ।
सोलेहिं तिहि उ जोयणसएहिं एमेव सेसाणं।।२।।

एगोरुयपरिखेवो, नव चेव सयाइं अउणपण्णाइं।
बारस पण्णट्ठाइं, हयकण्णाणं परिक्खेवो।।३।।

पणरस एक्कासीया आयंसमुहाण परिरओ होइ।
अट्ठार सत्तनउया आसमुहाणं परिक्खेवो।।४।।

बावीसं तेराइं परिखेवो होइ आसकन्नाणं।
पणुवीस अउणतीसा उक्कामुहपरिरओ होइ।।५।।
दो चेव सहस्साइं अट्ठेव सया हवंति पणयाला।
घणदंतदीवाणं विसेसमहिओ परिक्खेवो।।६।।" [तुला-बृहत्क्षेत्रसमास ४६२-४६६]

व्याख्या–**प्रथमे** द्वीपचतुष्के चिन्त्यमाने **त्रीणि** योजन**शतान्यवगाहनां**-लवणसमुद्रावगाहं **विष्कम्भं** च, विष्कम्भग्रहणादायामोऽपि गृह्यते तुल्यपरिमाणत्वात्, जानीहि इति क्रियाशेषः, **शेषाणां** द्वीपचतुष्कानां

शतोत्तराणि त्रीणि त्रीणि शतानि अवगाहनाविष्कम्भं तावज्जानीयाद् यावन्**नव** शतानि, तद्यथा–द्वितीयचतुष्के चत्वारि शतानि, तृतीये पञ्च शतानि, चतुर्थे षट् शतानि, पञ्चमे सप्त शतानि, षष्ठेऽष्टौ शतानि, सप्तमे नव शतानि, अत ऊर्ध्वं **द्वीपानामे**कोरुकप्रभृतीनां **'परिरयं'** परिरयप्रमाणं **वक्ष्ये।** प्रतिज्ञातमेव निर्वाहयति–**'पढमचउक्के'**त्यादि, **'प्रथमचतुष्के परिरयात्'** प्रथमद्वीपचतुष्के परिरयपरिमाणात् **'द्वितीयचतुष्कस्य'**-द्वितीयद्वीपचतुष्टयस्य **परिरयः**–परिरयपरिमाण**मधिकः षोडशैः** षोडशोत्तरै**स्त्रिभिर्योजनशतैः, 'एवमेव'** अनेनैव प्रकारेण **शेषाणां** 'द्वीपानां' द्वीपचतुष्कानां परिरयपरिमाणमधिकं पूर्वपूर्वचतुष्कपरिरयपरिमाणादवसातव्यम्।

एतदेव चैतेन दर्शयति–**'एकोरुये'**त्यादि **'एकोरुकपरिक्षेपे'** एकोरुकोपलक्षितप्रथमद्वीपचतुष्कपरिक्षेपे **नव शतानि एकोनपञ्चाशानि**–एकोनपञ्चाशदधिकानि। ततस्त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'हयकण्णाण'**मिति वचनात् हयकर्णप्रमुखाणां द्वितीयानां चतुर्णां द्वीपानां **परिक्षेपो** भवति, स च **द्वादश** योजनशतानि **पञ्चषष्टानि**–पञ्चषष्ट्यधिकानि। तत्रापि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'आयंसमुहाणं'** ति आदर्शमुखप्रमुखाणां तृतीयानां चतुर्णां द्वीपानां परिरयपरिमाणं भवति, तच्च **पञ्चदश** योजनशता**न्येकाशीत्यधिकानि**। ततो भूयोऽपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'आसमुहाणं'**ति अश्वमुखप्रभृतीनां चतुर्थानां चतुर्णां द्वीपानां **परिक्षेपः,** तद्यथा–**अष्टादश** योजनशतानि **सप्तनवतानि**–सप्तनवत्यधिकानि। तेष्वपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'आसकण्णाणं'**ति अश्वकर्णप्रमुखाणां पञ्चानां चतुर्णां द्वीपानां **परिक्षेपो** भवति, तद्यथा–**द्वाविंशति**योजनशतानि **त्रयोदशानि**-त्रयोदशाधिकानि। ततो भूयोऽपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'उल्कामुखपरिरयः'** उल्कामुखषष्ठद्वीपचतुष्क**परिरय**परिमाणं भवति, तद्यथा–**पञ्चविंशति**योजनशतानि **एकोनत्रिंशानि**-एकोनत्रिंशदधिकानि। ततः पुनरपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु **'घनदन्तद्वीपस्य'** घनदन्तप्रमुखसप्तमद्वीपचतुष्कस्य परिक्षेपः, तद्यथा–**द्वे सहस्रे अष्टौ शतानि पञ्चचत्वारिंशानि**–पञ्चचत्वारिंशदधिकानि **'विसेसमहिओ'** इति किञ्चिद्विशेषाधिकः अधिकृतः **परिक्षेपः,** पञ्चचत्वारिंशानि किञ्चिद्विशेषाधिकानीति भावार्थः, इदं च पदमन्तेऽभिहितत्वात्सर्वत्राप्यभिसम्बन्धनीयं, तेन सर्वत्रापि किञ्चिद्विशेषाधिकमुक्तरूपं परिरयपरिमाणमवसातव्यम्। तदेवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसङ्ख्ययाऽष्टाविंशतिः, एवं हिमवत्तुल्यवर्णप्रमाणपद्महृदप्रमाणायामविष्कम्भावगाहपुण्डरीक-ह्रदोपशोभिते शिखरिण्यपि पर्वते लवणोदार्णवजलसंस्पर्शादारभ्य

यथोक्तप्रमाणान्तराश्चतसृषु विदिक्षु एकोरुकादिनामानोऽक्षूणापान्तरालाऽऽयाम-विष्कम्भा अष्टाविंशतिसङ्ख्या द्वीपा वेदितव्याः ।।२२५-२२६।। तथा चाह–

(२२७) कहि णं भंते! उत्तरिल्लाणं एगूरूयमणुस्साणं एगुरुयदीवे णामं दीवे पण्णत्ते?, →[१]तं चेव सिहरिपव्वतसमं णेयव्वं । उत्तरेणं विभासा भाणितव्वा।← से तं अंतरदीवका।। २२७।। (२२८) से किं तं अकम्मभूमगमणुस्सा?, २ तीसविधा पण्णत्ता, →[२]तंजहा-पंचहिं हेमवएहिं, एवं जहा [३]पण्णवणापदे जाव पंचहिं उत्तरकुरूहिं, से तं अकम्मभूमगा।। २२८।। (२२९) से किं तं ←कम्मभूमगा?, २ पण्णरसविधा पण्णत्ता, →[४]तंजहा-पंचहिं भरहेहिं पंचहिं एरवएहिं पंचहिं महाविदेहेहिं,← ते समासतो दुविहा पण्णत्ता, तंजहा-आरिया मिलेच्छा, एवं [५]जहा पण्णवणापदे जाव [६]अहक्खातचरिय से त्तं मणुस्सा।।२२९।।

'कहि णं भंते! उत्तरिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे णामं दीवे पण्णत्ते?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं सिहरिपव्वयस्स पुरत्थिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसयाइं ओगाहित्ता तत्थ णं उत्तरिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे नामं दीवे पण्णत्ते' इत्यादि सर्वं **तदेव,** नवर**मुत्तरेण विभाषा कर्त्तव्या,** सर्वसङ्ख्यया षट्पञ्चाशदन्तरद्वीपाः, उपसंहारमाह-**'से तमंतरदीवगा'**ते **एतेऽन्तरद्वीपकाः**। अकर्म्मभूमकाः कर्म्मभूमकाश्च यथा **प्रज्ञापनायां** प्रथमे प्रज्ञापनाख्ये पदे तथैव वक्तव्या यावत् 'से तं चरित्तारिया से तं मणुस्सा' इति पदम्, इह तु ग्रन्थगौरवभयान्न लिख्यत इति, उपसंहारमाह- **'से तं मणुस्सा'** त एते मनुष्याः।। २२७-२२८-२२९।।

तदेवमुक्ता मनुष्याः, सम्प्रति देवानभिधित्सुराह–

---

१. जे.। →← **चिह्नद्वयवर्तिपाठस्थाने क ख ग ट मु. मध्ये** गोयमा! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं सिहरिस्स वासहरपव्वयस्स उत्तरपुरत्थिमिल्लाओ चरिमंताओ लवणसमुद्दं तिण्णि जोयणसताइं ओगाहित्ता एवं जहा दाहिणिल्लाण तहा उत्तरिल्लाण भाणितव्वं, णवरं सिहरिस्स वासहरपव्वयस्स विदिसासु, एवं जाव सुद्धदंतदीवेत्ति जाव से तं आरिया **इति पाठः** ।। २. **चिह्नद्वयमध्यवर्तिपाठः जे. नास्ति, मु.L आदिमध्ये अस्ति** ।। ३. **द्र. प्रज्ञापनायां १/८६** ।। ४. **चिह्नद्वयमध्यवर्तिपाठः जे. नास्ति, मु.L आदिमध्ये अस्ति** ।। ५. **द्र. प्रज्ञापनायां सू. १/८८-१२९** ।। ६. **जे.। अहक्खातचरिय स्थाने मु. L आदिमध्ये** से तं गब्भवक्कंतिया इति पाठः ।।

(२३०) से किं तं देवा?, देवा चउव्विहा पण्णत्ता, तंजहा-भवणवासी वाणमंतरा जोइसिया वेमाणिया ।। २३०।।

'से किं त'मित्यादि, **अथ के ते देवाः**?, सूरिराह–**देवाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-भवनवासिनो वानमन्तरा ज्योतिष्का वैमानिकाः,** अमीषां च शब्दानां व्युत्पत्तिर्यथा **प्रज्ञापनाटीकायां** तथा वेदितव्या।। २३०।।

(२३१) से किं तं भवणवासी?, २ दसविहा पण्णत्ता, जहा पण्णवणापदे देवाणं भेओ तहा भाणितव्वो →[१]जाव सवट्ठसिद्धगा←।। २३१ ।।

'से किं त'मित्यादि, **अथ के ते भवनवासिनः?**, सूरिराह–**भवनवासिनो दशविधाः प्रज्ञप्ताः,** एवं देवानां **प्रज्ञापना**गतप्रथम**प्रज्ञापनाख्यपद** इव तावद् **भेदो** वक्तव्यो **यावत्सर्वार्थदेवा** इति।। २३१।। सम्प्रति भवनवासिनां देवानां भवनवसनप्रतिपादनार्थमाह–

(२३२) कहि णं भंते! भवणवासिदेवाणं भवणा पन्नत्ता?, कहि णं भंते! भवणवासी देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तर-जोयणसयसहस्सबाहल्लाए, उवरिं एगं जोयणसहस्सं हेट्ठा वि जोयणसहस्सं वज्जित्ता एवं जहा [२]पण्णवणाए जाव भवणा पासादीया, त(ए)त्थ णं भवणवासीणं देवाणं सत्त भवणकोडीओ बावत्तरि भवणावाससयसहस्सा [३]भवंतित्तिमक्खाता, भवणवण्णतो जहा ठाणपदे जाव तत्थ णं बहवे भवणवासी देवा परिवसंति-असुरा नाग सुवन्ना य जहा [४]पण्णवणाए जाव विहरंति।। २३२।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! भवनवासिनां देवानां भवनानि प्रज्ञप्तानि?, क्व भदन्त! भवनवासिनो देवाः परिवसन्ति?,** भगवानाह–**गौतम! 'इमीसे ण'**मित्यादि, **'अस्याः'** प्रत्यक्षत उपलभ्यमानाया यत्र वयमास्महे **रत्नप्रभायाः पृथिव्याः 'अशीत्युत्तरयोजनशत-**

---

१. जे. L। →← **चिह्नद्वयमध्यवर्तिपाठस्थाने कखगटमु. मध्ये** जाव अणुत्तरोववाइया पंचविधा पण्णत्ता, तंजहा-विजयवेजयंत जाव सव्वट्ठसिद्धगा, से तं अणुत्तरोववातिया **इति पाठः** ।। २. द्र. **प्रज्ञापनायां सू. २/३०।।** ३. जे.। भवंतित्तिमक्खाता तत्थ णं-**मु.। जाव-ता.** ।। ४. द्र. **प्रज्ञापना सू. २/३०।।**

सहस्रबाहल्यायाः' अशीत्युत्तरम्–अशीतिसहस्राधिकं योजनशतसहस्रं बाहल्यं-पिण्डभावो यस्याः सा तथा, तस्या **उपर्येकं योजनसहस्रमवगाह्याधस्तादेकं योजनसहस्रं वर्जयित्वा मध्ये** 'अष्टसप्तते' अष्टसप्ततिसहस्राधिके योजनशतसहस्रे, **'अत्र'** एतस्मिन् स्थाने **भवनवासिनां देवानां सप्त भवनकोटयो द्विसप्ततिर्भवनावासशतसहस्राणि भवन्तीति आख्यातानि** मया शेषैश्च तीर्थकृद्भिः, **तत्र** सप्तकोट्यादिभावनैवं–चतुःषष्टिः शतसहस्राणि भवनानामसुरकुमाराणां, चतुरशीतिः शतसहस्राणि नागकुमाराणां, द्विसप्ततिः शतसहस्राणि सुवर्णकुमाराणां, षण्णवतिः शतसहस्राणि वायुकुमाराणां, द्वीपकुमारादीनां षण्णां प्रत्येकं षट्सप्ततिः शतसहस्राणि भवनानां, ततः सर्वसङ्ख्यया यथोक्तं भवनसङ्ख्यानं भवति। 'ते णं भवणा' इत्यादि, तानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, णमिति वाक्यालङ्कारे भवनानि बहिः 'वृत्तानि' वृत्ताकाराणि अन्तः समचतुरस्राणि अधस्तलभागेषु पुष्करकर्णिकासंस्थानसंस्थितानि, **'भवणवण्णओ भाणियव्वो जहा ठाणपदे** जाव पडिरूवा' इति, उक्तप्रकारेण भवनवर्णको भणितव्यो यथा **'प्रज्ञापनायां'** द्वितीये स्थानाख्ये पदे, स च तावद् यावत् 'पडिरूवा' इति पदं, स चैवम्- **"उक्किण्णंतरविउलगंभीरखायपरिखा पागारट्टालयकवाडतोरणपडिदुवार-देसभागा जंत-सयग्घि-मुसल-मुसंढिपरिवारिया अजोज्झा सयाजया सयागुत्ता अडयालकोट्ठरइया अडयालकयवणमाला खेमा सिवा किंकरअमरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदण-दद्दरदिण्णपंचंगुलितला उवचियवंदणकलसा चंदणघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्ल-दामकलावा पंचवण्णसरसमुक्कपुप्फ-पुंजोवयारकलिया कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामा सुगन्धवरगंधगंधिया गंधवट्टिभूया अच्छरगणसंघसंविकिण्णा दिव्वतुडियसद्दसंपणदिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरसणिज्जा अभिरूवा पडिरूवा'** [प्रज्ञा. १८८] इति,

अस्य व्याख्या-उत्कीर्णमिव उत्कीर्णम् अतीव व्यक्तमिति भावः, उत्कीर्णमन्तरं यासां खात-परिखानां ता उत्कीर्णान्तराः किमुक्तं भवति? खातानां परिखाणां च स्पष्टवैविक्त्योन्मीलनार्थमपान्तराले महती पाली समस्तीति, खातानि च परिखाश्च खातपरिखाः उत्कीर्णान्तरा विपुला–विस्तीर्णा गम्भीरा–अलब्धमध्यभागाः खात-परिखा येषां भवनानां परितस्तानि उत्कीर्णान्तरविपुलगम्भीरखातपरिखानि, खात-परिखाणां चायं प्रतिविशेषः–परिखा उपरि विशालाऽधः सङ्कुचिता, खातं तूभयत्रापि सममिति, 'पागारट्टालककवाडपडिदुवारदेसभागा' इति प्रतिभवनं प्राकारेषु अट्टालककपाटतोरणप्रतिद्वाराणि–अट्टालककपाटतोरणप्रतिद्वाररूपा देशभागादेशविशेषा येषु तानि प्राकारा-ऽट्टालक-कपाट-तोरण-

प्रतिद्वारदेशभागानि, तत्राट्टालकाः–प्राकारस्योपरि भृत्याश्रयविशेषाः कपाटानि–प्रतोलीद्वारसत्कानि, एतेन प्रतोल्यः सर्वत्र सूचिता अन्यथा कपाटानामसम्भवात्, तोरणानिप्रतीतानि, तानि च प्रतोलीद्वारेषु, प्रतिद्वाराणि–मूलद्वारापान्तरालवर्त्तीनि लघुद्वाराणि। तथा 'जंत-सयग्घि-मुसल-मुसंढिपरिवारिया' इति यन्त्राणि–नानाप्रकाराणि शतघ्नयो–महायष्टयो महाशिला वा याः पातिताः सत्यः पुरुषाणां शतानि घ्नन्ति मुशलानि–प्रतीतानि मुषण्ढयः–शस्त्रविशेषास्तैः परिवारितानि–समन्ततो वेष्टितानि अत एवायोध्यानि–परैर्योद्धुमशक्यानि अयोध्यत्वादेव 'सदाजयानि' सदा-सर्वकालं जयो येषु तानि सदाजयानि सर्वकालं जयवन्तीति भावः, तथा सदा–सर्वकालं गुप्तानि प्रहरणैः पुरुषैश्च योद्धृभिः सर्वतः–समन्ततो निरन्तरं परिवारिततया परेषामसहमानानां मनागपि प्रवेशासम्भवात् 'अडयालकोट्ठरइया' इति अष्टाचत्वारिंशद्भेदभिन्नविच्छित्तिकलिताः कोष्ठका–अपवरका रचिताः स्वयमेव रचनां प्राप्ता येषु तान्यष्टाचत्वारिंशत्कोष्ठकरचितानि, सुखादिदर्शनात्पाक्षिको निष्ठान्तस्य परनिपातः, तथाऽष्टाचत्वारिंशद्भेदभिन्नविच्छित्तयः कृता वनमाला येषु तानि अष्टचत्वारिंशत्कृतवनमालानि, अन्ये त्वभिदधति–अडयालशब्दो देशीवचनात् प्रशंसावाची, ततोऽयमर्थः–'प्रशस्तकोष्ठकरचितानि प्रशस्तकृतवनमालानी'ति तथा 'क्षेमाणि' परकृतोपद्रवरहितानि, 'शिवानि' सदा मङ्गलोपेतानि, तथा किङ्कराः-किङ्करभूता येऽमरास्तैर्दण्डैः कृत्वा उपरक्षितानि–सर्वतः समन्ततो रक्षितानि किङ्करामर-दण्डोपरक्षितानि, 'लाउल्लोइयमहिया' इति लाइयं नाम यद्भूमेर्गोमयादिना उपलेपनम् 'उल्लोइयं' कुड्यानां मालस्य सेटिकादिभिः संमृष्टीकरणं लाइयोल्लोइयाभ्यां महितानि-पूजितानि लाइयोल्लोइयमहितानि, तथा गोशीर्षेण-गोशीर्षनामकेन चन्दनेन सरसरक्तचन्दनेन च दर्दरेण-बहलेन चपेटाप्रकारेण वा दत्ताः पञ्चाङ्गुलयस्तला-हस्तका येषु तानि गोशीर्षसरसरक्तचन्दनदर्दरदत्त-पञ्चाङ्गुलितलानि, तथा उपचिता-निवेशिताः वन्दनकलशा-मङ्गल्यकलशा येषु तानि उपचितवन्दनकलशानि, 'चंदणघडसुकयतोरणपडिदुवारदेसभागा' इति चन्दनघटैः-चन्दनकलशैः सुकृतानि शोभितानीति तात्पर्यार्थः यानि तोरणानि तानि चन्दनघटसुकृतानि तोरणानि प्रतिद्वारदेशभागं-द्वारदेशभागे येषु तानि चन्दनघटसुकृततोरणप्रतिद्वारदेशभागानि, तथा 'आसत्तोसत्तविपुलवट्टवग्घारियमल्लदामकलावा' इति आ-अवाङ् अधोभूमौ सक्त-आसक्तो भूमौ लग्न इत्यर्थः ऊर्द्ध्वं सक्त उत्सक्तः उल्लोचतले उपरि संबद्ध इत्यर्थः विपुलो-विस्तीर्णो वृत्तो-वर्त्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः-

पुष्पमालासमूहो येषु तानि आसक्तोत्सक्तविपुलवृत्तप्रलम्बितमाल्यदामकलापानि, तथा पञ्चवर्णेन सुरभिणा-सुरभिगन्धेन मुक्तेन-क्षिप्तेन पुष्पपुञ्जलक्षणेनोपचारेण-पूजया कलितानि पञ्चवर्णसुरभि-मुक्तपुष्पपुञ्जोपचारकलितानि, तथा कालागुरुः-प्रसिद्धः प्रवरः-प्रधानः कुन्दुरुष्कः-चीडा तुरुष्कं-सिल्हकं कालागुरुश्च प्रवरकुन्दुरुष्कतुरुष्के च कालागुरुप्रवरकुन्दुरुष्कतुरुष्काणि तेषां धूपस्य यो मघमघायमानो गन्ध उद्धूत-इतस्ततो विप्रसृतस्तेनाभिरामाणि-रमणीयानि कालागुरुप्रवरकुन्दुरुष्कतुरुष्कधूप-मघमघायमानगन्धोद्धुताभिरामाणि, तथा शोभनो गन्धो येषां ते सुगन्धाः ते च ते वरगन्धाश्च-वासाः सुगन्धवरगन्धास्तेषां गन्धः स एष्वस्तीति सुगन्धवरगन्धगन्धिकानि '**अतोऽनेकस्वरा**' दितीकप्रत्ययः, अत एव गन्धवर्त्तिभूतानि, सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पानीति भावः, तथाऽप्सरोगणानां सङ्घः-समुदायस्तेन सम्यग्-रमणीयतया विकीर्णानि-व्याप्तानि अप्सरोगणसङ्घविकीर्णानि, तथा दिव्यानामातोद्यानां-वेणुवीणामृदङ्गानां ये शब्दास्तैः संप्रणदितानि-सम्यक्श्रोत्रमनोहारितया प्रकर्षेण सर्वकालं नदितानि-शब्दवन्ति दिव्यत्रुटितशब्दसंप्रणदितानि सर्वरत्नमयानि-सर्वात्मना सामस्त्येन रत्नमयानि न त्वेकदेशेन सर्वरत्नमयानि-समस्तरत्नमयानि अच्छानि-आकाशस्फटिकवदतिस्वच्छानि श्लक्ष्णानि-श्लक्ष्णपुद्गलस्कन्धनिष्पन्नानि श्लक्ष्णदलनिष्पन्नपटवत् लण्हानि-मसृणानि घुण्टितपटवत् 'घट्ठा' इति घृष्टानीव घृष्टानि खरशानया पाषाणप्रतिमावत्, 'मट्ठा' इति मृष्टानीव मृष्टानि सुकुमारशानया पाषाणप्रतिमावदेव, अत एव नीरजांसि स्वाभाविकरजोरहितत्वात् 'निर्मलानि' आगन्तुकमलासम्भवात् 'निष्पङ्कानि' कलङ्कविकलानि कर्दमरहितानि वा 'निक्कंकडच्छाया' इति निष्कङ्कटा-निष्कवचा निरावरणा निरुपघातेति भावार्थः छाया-दीप्तिर्येषां तानि निष्कङ्कटच्छायानि 'सप्रभाणि' स्वरूपतः प्रभावन्ति 'समरीचीनि' बहिर्विनिर्गतकिरणजालानि 'सोद्द्योतानि' बहिर्व्यवस्थितवस्तुस्तोमप्रकाशकराणि 'प्रासादीयानि' प्रसादाय-मनःप्रसत्तये हितानि मनःप्रसत्तिकारीणीति भावः, तथा 'दर्शनीयानि' दर्शनयोग्यानि यानि पश्यतश्चक्षुषी न श्रमं गच्छत इति भावः, 'अभिरूवा' इति अभि-सर्वेषां द्रष्टृणां मनःप्रसादानुकूलत-याऽभिमुखं रूपं येषां तानि अभिरूपाणि-अत्यन्तकमनीयानीत्यर्थः अत एव 'पडिरूवा' इति प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपाणि, अथवा प्रतिक्षणं नवं नवमिव रूपं येषां तानि प्रतिरूपाणि।

तदेवं भवनस्वरूपमुक्तमिदानीं यत्पृष्टं ।। **'क्व भदन्त! भवनवासिनो देवाः परिवसन्ती'**ति तत्रोत्तरमाह–

'तत्थ णं बहवे भवणवासी देवा परिवसंति असुरा नागा भेदो भाणियव्वो **जाव विहरंति** एवं जा **ठाणपदे** वत्तव्वया सा भाणियव्वा जाव चमरेणं असुरकुमारिंदे असुरकुमारराया परिवसइ' इति, 'तत्र' तेष्वनन्तरोदितस्वरूपेषु भवनेषु बहवो भवनवासिनो देवाः परिवसन्ति, तानेव जातिभेदत आह–

'असुरा नागा' इत्यादि यावत्करणादेवं परिपूर्णः पाठः–

"असुरा नाग सुवण्णा विज्जू अग्गी य दीव उदही य।

दिसि-पवण-थणियनामा दसहा एए भवणवासी।।१।।[तुला-बृहत्सं. १९]

चूडामणिमउडरयणा १ भूसणनागफण २ गरुल ३ वइर ४ पुण्णकलसअंकउप्फेस ५ सीह ६ हयवर ७ गय ८ मगरंक ९ वरवद्धमाण १० निजुत्तचित्तचिंधगया सुरूवा महिड्ढीया महज्जुइया महायसा महाबला महाणुभागा महासोक्खा हारविराइयवच्छा कडगतुडियथंभियभुया अंगयकुंडलमट्ठ-गंडतलकण्णपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली(मउडा) कल्लाणगपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणवरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वण्णेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पहाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेस्साए दस दिसाओ उज्जोवेमाणा, ते णं तत्थ साणं २ भवणावाससयसहस्साणं साणं साणं सामाणियसाहस्सीणं साणं साणं तायत्तीसगाणं साणं साणं लोगपालाणं साणं २ अग्गमहिसीणं साणं २ अणीयाणं साणं साणं अणियाहिवईणं साणं २ आयरक्खदेवसाहस्सीणं अण्णेसिं च बहूणं भवणवासीणं देवाणं देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महयरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महयाऽऽहयनट्टगीयवाइयतंतीतलतालघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति।"[प्रज्ञापना सू. १७७]

अस्य व्याख्या-'असुराः' असुरकुमाराः, एवं नागकुमाराः सुवर्णकुमारा विद्युत्कुमारा अग्निकुमारा द्वीपकुमारा उदधिकुमारा दिक्कुमाराः पवनकुमाराः स्तनितकुमाराः, 'दशधा' दशप्रकाराः 'एते' अनन्तरोदिता असुरकुमारादयो भवनवासिनो यथाक्रमं चूडामणिमुकुटरत्न-भूषणनियुक्तनागस्फटादिविचित्रचिह्नगताश्च, तथाहि–असुरकुमारा भवनवासिनश्चूडामणिमुकुटरत्नाः, चूडामणिर्नाम मुकुटे रत्नं चिह्नभूतं येषां ते तथा। नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः, सुवर्णकुमाराः भूषणनियुक्तगरुडरूपचिह्नधराः, विद्युत्कुमाराः भूषणनियुक्तवज्ररूपचिह्नधराः, वज्रं नाम शक्रस्यायुधम्, अग्निकुमारा भूषणनियुक्त-पूर्णकलशरूपचिह्नधराः, द्वीपकुमारा भूषणनियुक्तसिंहरूपचिह्नधराः, उदधिकुमारा भूषणनियुक्तहय-वररूपचिह्नधारिणः, दिक्कुमारा भूषणनियुक्तगजरूपचिह्नधारिणः, वायुकुमारा भूषणनियुक्तमकररू-

---

१. नागा - S।।

पचिह्नधराः, स्तनितकुमारा भूषणनियुक्तवर्द्धमानकरूपचिह्नधारिणः, भूषणमत्र मुकुटो द्रष्टव्योऽन्यत्र 'मउडवरवद्धमाणनिजुत्तचित्तचिंधगया' इति पाठदर्शनाद्, वर्द्धमानकं–शरावसम्पुटं, पुनः सर्वे कथम्भूताः? इत्याह–'सुरूपाः' शोभनं रूपं येषां ते तथा, अत्यन्तकमनीयरूपा इत्यर्थः, 'महिड्ढिया महज्जुइया महायसा महाबला महाणुभागा महासोक्खा' इति प्राग्वत्, 'हारविराइयवच्छा' इति हारैर्विराजितं वक्षो येषां ते हारविराजितवक्षसः, 'कडगतुडियथंभियभुया' इति कटकानि–कलाचिकाभरणानि त्रुटितानि–बाहुरक्षकास्तैः स्तम्भितावित्र स्तम्भितौ भुजौ येषां ते कटकत्रुटितस्तम्भितभुजाः, तथाऽङ्गदानि–बाहुशीर्षाभरणविशेषरूपाणि कुण्डले-कर्णाभरणविशेषरूपे, तथा मृष्टौ–मृष्टीकृतौ गण्डौ–कपोलौ यैस्तानि मृष्टगण्डानि कर्णपीठानि–आभरणविशेषरूपाणि धारयन्तीत्येवंशीला अङ्गदकुण्डलमृष्टगण्डकर्णपीठ-धारिणः, तथा विचित्राणि–नानारूपाणि हस्ताभरणानि येषां ते विचित्रहस्ताभरणाः, तथा 'विचित्तमालामउलिमउडा' इति, विचित्रा माला–कुसुमस्रग् मौलौ–मस्तके मुकुटं च येषां ते विचित्रमाला-मौलिमुकुटाः, तथा कल्याणकं–कल्याणकारि प्रवरं वस्त्रं परिहितं यैस्ते कल्याणकवस्त्रपरिहिताः, सुखादिदर्शनान्निष्ठान्तस्यात्र पाक्षिकः परनिपातः, तथा कल्याणकं–कल्याणकारि यत् प्रवरं माल्यं–पुष्पदाम यच्चानुलेपनं तद्धरन्तीति कल्याणकप्रवरमाल्यानुलेपनधराः, तथा भास्वरा–देदीप्यमाना बोन्दिः–शरीरं येषां ते भास्वरबोन्दयः, तथा प्रलम्बत इति प्रलम्बा या वनमाला तां धरन्तीति प्रलम्बवनमालाधराः, दिव्येन 'वर्णेन' कृष्णादिना 'दिव्येन गन्धेन' सुरभिणा 'दिव्येन स्पर्शेन' मृदुस्निग्धादिरूपेण दिव्येन शक्तिविशेषमपेक्ष्य संहननेनेव संहननेन न तु साक्षात्संहननेन, देवानां संहननासम्भवात्, संहननं हि अस्थिरचनात्मकं, न च देवानामस्थीनि सन्ति, तथा चोक्तं प्रागेव–**"देवा असंघयणी तेसिं नेव सिरा"** [ ] इत्यादि, 'दिव्येन संस्थानेन' समचतुरस्ररूपेण भवधारणीयशरीरस्य, तेषामन्यसंस्थानासम्भवात्, 'दिव्यया ऋद्ध्या' परिवारादिकया 'दिव्यया द्युत्या' इष्टार्थसंप्रयोगलक्षणया, **"द्यु अभिगमने"** [हे.धातु १०७७,२/१९] इतिवचनात् 'दिव्यया प्रभया' भवनावासगतया 'दिव्यया छायया' समुदायशोभया 'दिव्येनार्चिषा' स्वशरीरगतरत्नादितेजोज्वालया 'दिव्येन तेजसा' शरीरप्रभवेन 'दिव्यया लेश्यया' देहवर्णसुन्दरतया दश दिशः 'उद्द्योतयन्तः' प्रकाशयन्तः 'पभासेमाणा' इति शोभयन्तस्ते भवनवासिनो देवा णमिति वाक्यालङ्कारे 'तत्र' स्वस्थाने 'साणं साणं'ति स्वेषां स्वेषामात्मीयात्मीयानां भवनावासशतसहस्राणां स्वेषां स्वेषां सामानिकसहस्राणां स्वेषां स्वेषां त्रायस्त्रिंशकानां स्वेषां स्वेषां लोकपालानां

स्वासां स्वासाम् 'अग्रमहिषीणां' पट्टराज्ञीनां स्वेषां स्वेषामनीकानां स्वेषां स्वेषामनीकाधिपतीनां स्वेषां स्वेषामात्मरक्षदेवसहस्राणाम्, अन्येषां च बहूनां स्वस्वभवनावासनगरीवास्तव्यानां भवनवासिनां देवानां देवीनां च 'आहेवच्च'मित्यादि, अधिपतेः कर्म्म आधिपत्यं रक्षेत्यर्थः, सा च रक्षा सामान्येनापि (आ)रक्षकेणेव क्रियते तत आह–पुरस्य पतिः पुरपतिस्तस्य कर्म्म पौरपत्यं, सर्वेषामात्मीयानामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि नायकनियुक्ततथाविधगृहचिन्तकसामान्यपुरुषस्येव भवति ततो नायकत्वप्रतिपत्त्यर्थमाह–'स्वामित्वं' स्वमस्यास्तीति स्वामी तद्भावो नायकत्वमित्यर्थः, तदपि च नायकत्वं कथञ्चित्पोषकत्वमन्तरेणापि भवति यथा हरिणयूथाधिपतेर्हरिणस्य, तत आह–'भर्तृत्वं' पोषकत्वमत एव 'महत्तरकत्वं', तदपि महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि सम्भवति यथा कस्यचिद्वणिजः स्वदासदासीवर्गं प्रति, तत आह–'आणाईसरसेणावच्चं' आज्ञया ईश्वर आज्ञेश्वरः सेनायाः पतिः सेनापतिः आज्ञेश्वरश्चासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म्म आज्ञेश्वरसेनापत्यं स्वस्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः कारयन्तोऽन्यैर्नियुक्तकैः पुरुषैः पालयन्तः स्वयमेव, महता रवेणेति योगः, 'आहय' इति आख्यानकप्रतिबद्धानि यदिवा 'अहतानि' अव्याहतानि नित्यानुबन्धीनीति भावः ये नाट्य-गीते नाट्यं–नृत्यं गीतं–गानं यानि च वादितानि तन्त्री-तल-ताल-त्रुटितानि तन्त्री–वीणा तलौ–हस्ततलौ तालः–कंसिका त्रुटितानि-वादित्राणि, तथा यश्च घनमृदङ्गः पटुना पुरुषेण प्रवादितः, तत्र घनमृदङ्गो नाम घनसमानध्वनिर्यो मृदङ्गः, तत एतेषां द्वन्द्वस्तेषां रवेण 'दिव्यान्' दिवि भवान् प्रधानानिति भावः, भोगार्हा भोगाः–शब्दादयो भोगभोगास्तान् भुञ्जमानाः 'विहरन्ति' आसते।।२३२।।

(२३३) कहि णं भंते! असुरकुमाराणं देवाणं भवणा प०?, पुच्छा, एवं जहा पण्णवणाठाणपदे[१] जाव विहरंति।। २३३।। (२३४) कहि णं भंते! दाहिणिल्लाणं असुरकुमारदेवाणं भवणा पुच्छा, एवं जहा ठाणपदे[२] जाव चमरे, तत्थ असुरकुमारिंदे[३] असुरकुमारराया परिवसति जाव विहरति।। २३४।।

"कहि णं भंते! असुरकुमाराणं देवाणं भवणा पन्नत्ता?, कहि णं भंते! असुरकुमारा देवा परिवसंति?, एवं जा ठाणपए वत्तव्वया सा भाणियव्वा जाव चमरे एत्थ असुरकुमारिंदे असुरकुमारराया परिवसति जाव विहरति"

---

१. द्र. प्रज्ञापनासूत्र २/३१।। २.द्र. प्रज्ञापनासूत्र २/३२ । ३. असुरिंदे जाव महताहतण० दिव्वाइं भोगभोगाइं भुंजमाणे विहरति, उववात समुग्धात संठाणा य भाणियव्वा - जे. ।।

क्व भदन्त! असुरकुमाराणां देवानां भवनानि प्रज्ञप्तानि?, तथा क्व भदन्त! असुरकुमारा देवाः परिवसन्ति?, 'एवम्' उक्तेन प्रकारेण या **स्थानपदे** वक्तव्यता सा भणितव्या **यावच्चमरः असुरकुमारेन्द्रः असुरकुमारराजा परिवसति यावद्विहरतीति,** सा चैवम्–

"गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हिट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं असुरकुमाराणं देवाणं चोसट्ठी भवणावास-सयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिता उक्किन्नंतरविउल-गम्भीरखायपरिहा जाव पडिरूवा, एत्थ णं असुरकुमाराणं देवाणं भवणा पण्णत्ता, एत्थ णं बहवे असुरकुमारा देवा परिवसंति काला लोहियक्खबिंबोट्ठा धवलपुप्फदंता असियकेसा वामेयकुंडलधरा अद्दचंदणाणुलित्तगत्ता ईसिसिलिंध-पुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया पढमं वयं च समइक्कंता बिइयं च असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियवरभूसणनिम्मलमणिरयणमंडियभुया दसमुद्दामंडियग्गहत्था चूडामणिचित्तचिंधगया सुरूवा महिड्ढिया महज्जुइया महाजसा महब्बला महाणुभागा महासोक्खा हारविराइयवच्छा कडगतुडियथंभियभुया जाव दस दिसाओ उज्जोवेमाणा पभासेमाणा, ते णं तत्थ साणं साणं भवणावाससयसहस्साणं जाव दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति, चमरबलिणो य एत्थ दुवे असुरकुमारिंदा असुरकुमाररायाणो परिवसंति काला महानील-सरिसा नीलगुलियगवलपगासा वियसियसयवत्तनिम्मलईसिसियरत्ततंबनयणा गरुलाययउज्जुतुंगनासा उवचियसिलप्पवा-लबिंबफलसन्निभाधरोट्ठा पंडुरससिसगलविमलनिम्मल(दहिघण)-संख-गोखीर-कुंदधवल-मुणालियादंतसेढी हुयवहनिद्धंत-धोयतत्ततवणिज्जरत्ततलतालुजीहा अंजणघणमसिणरुयगरमणिज्जनिद्धकेसा वामेयकुंडलधरा जाव पभासेमाणा, ते णं तत्थ साणं साणं भवणावाससयसहस्साणं जाव भुंजमाणा विहरंति।।

कहि णं भंते! दाहिणिल्लाणं असुरकुमाराणं देवाणं भवणा पण्णत्ता?, कहि णं भंते! दाहिणिल्ला असुरकुमारा देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयण-सयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं असुरकुमाराणं देवाणं चोत्तीसं भवणावाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा तहेव जाव पडिरूवा, तत्थ णं बहवे दाहिणिल्ला असुरकुमारा देवा परिवसंति काला लोहियक्खा तहेव भुंजमाणा विहरंति, चमरे य एत्थ असुरकुमारिंदे असुरकुमारराया परिवसइ काले महानीलसरिसे जाव पभासेमाणे, से णं तत्थ चोत्तीसाए भवणावाससयसहस्साणं चउसट्ठीए सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं चउण्हं चउसट्ठीणं आदरक्खदेवसाहस्सीणं, अण्णेसिं च बहूणं दाहिणिल्लाणं देवाणं देवीण य आहेवच्चं पोरेवच्चं जाव विहरइ"[पन्नवणा सू. १७८-१७९]।। इति,

इदं प्रायः समस्तमपि सुगमं नवरं 'काला लोहियक्ख' इत्यादि, 'कालाः' कृष्णवर्णाः 'लोहियक्ख-बिंबोट्ठा' लोहिताक्षरत्नवद् बिम्बवच्च–बिम्बीफलवद् ओष्ठौ येषां ते लोहिताक्षबिम्बौष्ठाः आरक्तौष्ठा इति भावः, धवलाः पुष्पवत् सामर्थ्यात्कुन्दकलिका इव दन्ता येषां ते धवलपुष्पदन्ताः, असिताः–

कृष्णाः केशा येषां ते असितकेशाः, दन्ताः केशाश्चामीषां वैक्रिया द्रष्टव्या न स्वाभाविकाः, वैक्रिय-शरीरत्वात्, 'वामेयकुण्डलधराः' एककर्णावसक्तकुण्डलधारिणः, तथाऽऽर्द्रेण–सरसेन चन्दनेनानुलिप्तं गात्रं यैस्ते आर्द्रचन्दनानुलिप्तगात्राः, तथा ईषत्–मनाक् 'शिलिन्ध्रपुष्पप्रकाशानि' शिलिन्ध्रपुष्पसदृशवर्णानि 'असङ्क्लिष्टानि' अत्यन्तसुखजनकतया मनागपि सङ्क्लेशानुत्पादकत्वात् 'सूक्ष्माणि' मृदुलघुस्पर्शानि अच्छानि चेति भावः वस्त्राणि प्रवरं सुशोभं यथा भवति एवं परिहिताः–परिहितवन्तः प्रवरवस्त्रपरिहिताः, तथा वयः प्रथमं–कुमारत्वलक्षणमतिक्रान्तास्तत्पर्यन्तवर्तिन इत्यर्थः, यत आह–द्वितीयं च–मध्यलक्षणं वयोऽसम्प्राप्ताः, एतदेव व्यक्तीकरोति–'भद्रे' अतिप्रशस्ये यौवने वर्त्तमानाः 'तलभंगयतुडियवरभूसण-निम्मलमणिरयणमंडियभुया' तलभङ्गका–बाह्वाभरणविशेषाः त्रुटितानि–बाहुरक्षकाः, अन्यानि च यानि वराणि भूषणानि बाह्वाभरणानि तेषु ये निर्म्मला मणयः–चन्द्रकान्ताद्या यानि रत्नानि–इन्द्रनीलादीनि तैर्मण्डितौ भुजौ येषां ते तथा, तथा दशभिर्मुद्राभिर्मण्डितौ अग्रहस्तौ येषां ते (दशमुद्रा)मण्डिताग्रहस्ताः, 'चूडामणिचित्तचिंधगया' चूडामणिः–चूडामणिनामकं चित्रम्–अद्भुतं चिह्नं गतं-स्थितं येषां ते चूडामणिचित्रचिह्नगताः, चमरबलिसामान्यसूत्रे 'कालाः' कृष्णवर्णाः, एतदेवोपमानतः प्रतिपादयति–'महानीलसरिसा' महानीलं यत्किमपि वस्तुजातं लोके प्रसिद्धं तेन सदृशाः, एतदेव व्याचष्टे–नीलगुटिका–नील्या गुटिका गवलं–माहिषं शृङ्गं तयोरिव प्रकाशः–प्रतिभा येषां ते नीलगुटिकागवलप्रकाशाः, तथा विकसितशतपत्रमिव निर्मले ईषद्देशविभागेन सिते रक्ते ताम्रे च नयने येषां ते विकसितशतपत्र-निर्म्मलेषत्सित-रक्ततामनयनाः, तथा गरुडस्येवायता–दीर्घा ऋज्वी–अकुटिला तुङ्गा–उन्नता नासा–नासिका येषां ते गरुडायतर्जुतुङ्गनासाः, तथा ओयवियं–तेजितं यत् शिलाप्रवाहं–विद्रुमं रत्नं यच्च बिम्बफलं तत्सन्निभोऽधरः–ओष्ठो येषां ते तथा, तथा पाण्डुरं न तु सन्ध्याकालभावि आरक्तं शशिशकलं–चन्द्रखण्डं, तदपि च कथम्भूतमित्याह–विमलं–रजसा रहितं कलङ्कविकलं वा तथा निर्म्मलो यो दधिघनः शङ्खो गोक्षीरं यानि कुन्दानि–कुन्दकुसुमानि दकरजः–पानीयकणा मृणालिका च तद्वद् धवला दन्तश्रेणिर्येषां ते तथा, विमलशब्दस्य विशेष्यात्परनिपातः प्राकृतत्वात्, तथा हुतवहेन–वैश्वानरेण निर्ध्मातं सत् यद् जायते धौतं–निर्म्मलं तप्तम्–उत्तप्तं तपनीयम् आरक्तं सुवर्णं तद्वद्रक्तानि तलानि–हस्तपादतलानि तालु–जिह्वे च येषां ते हुतवहनिर्ध्मातधौततप्ततपनीयरक्ततलतालु-जिह्वाः, तथाऽञ्जनं–सौवीराञ्जनं घनः–प्रावृट्कालभावी मेघस्तद्वत् कृष्णाः रुचकवद्–रुचकरत्नवद् रमणीयाः स्निग्धाश्च केशा येषां ते अञ्जनघनकृष्णरुचक-रमणीयस्निग्धकेशाः, शेषं प्राग्वत्।। २३३-२३४।।

चमरसूत्रे 'तिण्हं परिसाण'मित्युक्तं ततः पर्षद्विशेषपरिज्ञानाय सूत्रमाह–

(२३५) चमरस्स णं भंते! असुरिंदस्स असुरकुमाररन्नो कति परिसातो पं०?, गो०! तओ परिसातो पं०, तं०-समिता चंडा जाता, अब्भिंतरिता समिता, मज्झिमिया चंडा, बाहिरिया च जाया।।२३५।।

'चमरस्स ण'मित्यादि, **चमरस्य भदन्त! असुरेन्द्रस्य असुरकुमारराजस्य 'कति'** कियत्सङ्ख्याकाः **पर्षदः प्रज्ञप्ताः?**, भगवानाह–**गौतम! तिस्रः पर्षदः प्रज्ञप्ताः, तद्यथा-समिता चण्डा जाता,** तत्राभ्यन्तरिका पर्षत् **'समिता'** समिताभिधाना, एवं **मध्यमिका चण्डा, बाह्या जाता**।। २३५।।

(२३६) चमरस्स णं भंते! असुरिंदस्स असुरकुमाररन्नो अब्भिंतरियाए परिसाए कति देवसाहस्सीतो पण्णत्ताओ?, मज्झिमियाए परिसाए कति देवसाहस्सीओ पण्णत्ताओ?, बाहिरियाए परिसाए कति देवसाहस्सीओ पण्णत्ताओ?, गोयमा! चमरस्स णं असुरिंदस्स २ अब्भिंतरपरिसाए चउवीसं देवसाहस्सीतो पण्णत्ताओ, मज्झिमिताए परिसाए अट्ठावीसं देव०, बाहिरिताए परिसाए बत्तीसं देवसा०।।२३६।।

'चमरस्स ण'मित्यादि, **चमरस्य भदन्त! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि कति देवसहस्राणि प्रज्ञप्तानि?, मध्यमिकायां पर्षदि कति देवसहस्राणि प्रज्ञप्तानि?, बाह्यायां पर्षदि कति देवसहस्राणि प्रज्ञप्तानि?**, भगवानाह–**गौतम! चमरस्यासुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि चतुर्विंशतिर्देवसहस्राणि प्रज्ञप्तानि, मध्यमिकायामष्टाविंशतिर्देवसहस्राणि, बाह्यायां द्वात्रिंशद्देवसहस्राणि प्रज्ञप्तानि**।।२३६।।

(२३७) चमरस्स णं भंते! असुरिंदस्स असुरकुमाररण्णो अब्भिंतरिताए [परिसाए] कति देविसता पण्णत्ता?, मज्झिमियाए परिसाए कति देविसया पण्णत्ता?, बाहिरियाए परिसाए कति देविसता पण्णत्ता?, गोयमा! चमरस्स णं

१-२-३ L।. असुररण्णो - कखटता ।।

असुरिंदस्स असुररण्णो अब्भिंतरियाए परिसाए अंद्धुट्ठा[1] देविसता पं० मज्झिमियाए परिसाए तिन्नि देवि० बाहिरियाए अंड्ढाइज्जा[2] देवि०।। २३७।।

'चमरस्स णं भंते'! इत्यादि, चमरस्य भदन्त! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि कति देवीशतानि प्रज्ञप्तानि? मध्यमिकायां पर्षदि कति देवीशतानि प्रज्ञप्तानि? बाह्यायां पर्षदि कति देवीशतानि प्रज्ञप्तानि?, भगवानाह–गौतम! अभ्यन्तरिकायां पर्षदि अर्द्धतृतीयानि (अर्द्धचतुर्थानि) देवीशतानि प्रज्ञप्तानि, मध्यमिकायां पर्षदि त्रीणि देवीशतानि प्रज्ञप्तानि, बाह्यायां पर्षदि अर्द्धचतुर्थानि (अर्द्धतृतीयानि) देवीशतानि प्रज्ञप्तानि।।२३७।।

(२३८) चमरस्स णं भंते! असुरिंदस्स असुरकुमाररण्णो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता?, मज्झिमियाए परिसाए० बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता?, अब्भिंतरियाए परिसाए देवीणं केवतियं कालं ठिती पण्णत्ता?, मज्झिमियाए परिसाए देवीणं केवतियं० बाहिरियाए परिसाए देवीणं के०?, गोयमा! चमरस्स णं असुरिंदस्स २ अब्भिंतरियाए परिसाए देवाणं अड्ढाइज्जाइं पलिओवमाइं ठिई पं०, मज्झिमाए परिसाए देवाणं दो पलिओवमाइं ठिई पण्णत्ता, बाहिरियाए परिसाए देवाणं दिवड्ढं पलि०, अब्भिंतरियाए परिसाए देवीणं दिवड्ढं पलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवीणं पलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवीणं अद्धपलिओवमं ठिती पण्णत्ता।।२३८।।

'चमरस्स णं भंते!' इत्यादि, चमरस्य भदन्त! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां

---

१. L जे.। अड्ढाइज्जा - त्रि, मवृ । २. L जे.। अद्धुट्ठा- त्रि. मवृ.। "मलयगिरिवृत्तौ 'अर्धतृतीयानि, त्रीणि, अर्धचतुर्थतानि' अनेन क्रमेण व्याख्यातमस्ति । हस्तलिखितवृत्तेः त्रिपाठ्यां प्रतावपि वृत्त्यनुसारीपाठः उपलब्धः । किन्तु मलयगिरिवृत्तौ द्वे संग्रहणीगाथे उद्धृते स्तः, तत्राऽपि स्वीकृतपाठस्य संवादित्वं लभ्यते– चउवीसा अट्ठवीसा बत्तीसस्स देवचरमस्स । अद्धुट्ठा तिण्णि तहा अड्ढाइज्जा य देवसया । प्रस्तुताधिकारस्य २४२ सूत्रेऽपि 'अद्धपंचमा चत्तारी अद्धुट्ठा' एष क्रमो विद्यते, अनेनाऽपि स्वीकृतपाठस्य पुष्टिर्जायते । भगवती (वृत्ति पत्र २०२) वृत्तौ असुरेन्द्रस्य देवीशतानि स्वीकृतपाठक्रमेण उपलभ्यते– तथा देवीशतानि क्रमेणाध्युष्टानि त्रीणि सार्द्धे च द्वे इति ।" इति L पृ. ३०२ टि. २ ।।

पर्षदि देवानां कियन्तं कालं स्थितिः प्रज्ञप्ता? मध्यमिकायां पर्षदि देवानां कियन्तं कालं स्थितिः प्रज्ञप्ता?, एवं **बाह्यपर्षद्विषयमपि** प्रश्नसूत्रं वक्तव्यं, तथाऽ**भ्यन्तरिकायां पर्षदि देवीनां कियन्तं कालं स्थितिः प्रज्ञप्ता?, एवं मध्यमिका-बाह्य**पर्षद्विषये अपि प्रश्नसूत्रे वक्तव्ये, भगवानाह–**गौतम! चमरस्यासुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि देवानामर्द्धतृतीयानि पल्योपमानि स्थितिः प्रज्ञप्ता, मध्यमिकायां पर्षदि देवानां द्वे पल्योपमे स्थितिः प्रज्ञप्ता, बाह्यायां पर्षदि देवानां द्व्यर्द्धं पल्योपमं स्थितिः प्रज्ञप्ता,** तथाऽ**भ्यन्तरिकायां पर्षदि देवीनां द्व्यर्द्धपल्योपमं स्थितिः प्रज्ञप्ता, मध्यमिकायां पर्षदि देवीनां पल्योपमं स्थितिः प्रज्ञप्ता, बाह्यायां पर्षदि देवीनामर्द्धपल्योपमं स्थितिः प्रज्ञप्ता,** इह भूयान् वाचनाभेद इति यथाऽवस्थितसूत्रे पाठनिर्णयार्थं सुगममपि सूत्रमक्षरसंस्कारमात्रेण विव्रियते।। २३८।। सम्प्रत्यभ्यन्तरिकादिव्यपदेशकारणं पिपृच्छिषुरिदमाह–

(२३९) से केणट्ठेणं भंते! एवं वुच्चति?-चमरस्स असुरिंदस्स तओ परिसातो पण्णत्ताओ, तंजहा-समिया चंडा जाया, अब्भिंतरिया समिया मज्झिमिया चंडा बाहिरिया जाया?, गोयमा! चमरस्स णं असुरिंदस्स असुरकुमाररन्नो अब्भिंतरपरिसा देवा वाहिता हव्वमागच्छंति णो अव्वाहिता, मज्झिमपरिसा देवा वाहितावि हव्वमागच्छंति अव्वाहितावि, बाहिरपरिसा देवा अव्वाहिता हव्वमागच्छंति, अदुत्तरं च णं गोयमा! चमरे असुरिंदे असुरकुमारराया अन्नयरेसु उच्चावएसु कज्जकोडुंबेसु समुप्पन्नेसु अब्भिंतरियाए परिसाए सद्धिं संमइसंपुच्छणाबहुले विहरइ मज्झिमियाए परिसाए सद्धिं पयं एवं पवंचेमाणे २ विहरति, बाहिरियाए परिसाए सद्धिं पयं पंचडेमाणे २ विहरति, से तेणट्ठेणं गोयमा! एवं वुच्चइ-चमरस्स णं असुरिंदस्स असुरकुमाररण्णो तओ परिसाओ पण्णत्ताओ समिया चंडा जाता, अब्भिंतरिया समिया, मज्झिमिया चंडा, बाहिरिया जाता।। २३९।।

'**से केणट्ठेण**'मित्यादि, **अथ केनार्थेन भदन्त! एवमुच्यते? चमरस्य असुरकुमारराजस्य तिस्रः पर्षदः प्रज्ञप्ताः, तद्यथा– समिता चण्डा जाता, अभ्यन्तरा समिता मध्यमिका चण्डा बाह्या जाता–** भगवानाह–**गौतम! चमरस्यासुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरपर्षत्का देवाः 'वाहिता'** आहूताः '**हव्वं**' शीघ्रमा**गच्छन्ति नो 'अव्वाहिता'** अनाहूताः, अनेन गौरवमाह, **मध्यमपर्षद्गा**

देवा आहूता अपि शीघ्र**मागच्छन्ति अनाहूता अपि,** मध्यमप्रतिपत्तिविषयत्वात्, **बाह्यपर्षद्गा देवा अनाहूताः शीघ्रमागच्छन्ति**, तेषामाकारणलक्षणगौरवानर्हत्वात्, **'अदुत्तरं च ण'**मित्यादि, **अथोत्तरम्'** अथान्यद् अभ्यन्तरत्वादिविषये कारणं **गौतम! चमरोऽसुरेन्द्रोऽसुरकुमारराजोऽन्यतरेषु 'उच्चावचेषु'** शोभनाशोभनेषु **'कज्जकोडुंबेसु'** इति कौटुम्बिकेषु कार्येषु कुटुम्बे भवानि कौटुम्बानि स्वराष्ट्रविषयाणीत्यर्थः तेषु कार्येषु **समुत्पन्नेषु अभ्यन्तरिकया पर्षदा सार्द्धं संमतिसंप्रश्नबहुलश्चापि विहरति,** सन्मत्या–उत्तमया मत्या यः संप्रश्नः–पर्यालोचनं तद्बहुलश्चापि 'विहरति' आस्ते, स्वल्पमपि प्रयोजनं प्रथमतस्तया सह पर्यालोच्य विदधातीति भावः, **मध्यमिकया पर्षदा सार्द्धं** यदभ्यन्तरिकया पर्षदा सह पर्यालोच्य कर्त्तव्यतया निश्चितं **पदं 'तत्प्रपञ्चयन् विहरति'** एवमिदमस्माभिः पर्यालोचितमिदं कर्त्तव्यमन्यथा दोष इति विस्तारयन्नास्ते, **बाह्यया पर्षदा सह** यदभ्यन्तरिकया पर्षदा सह पर्यालोचितं मध्यमिकया सह गुण-दोषप्रपञ्चकथनतो विस्तारितं **पदं** तत् **'प्रचण्डयन् प्रचण्डयन् विहरति'** आज्ञाप्रधानः सन्नवश्यं कर्त्तव्यतया निरूपयन् तिष्ठति, यथेदं युष्माभिः कर्त्तव्यमिदं न कर्त्तव्यमिति, तदेवं या एकान्ते गौरवमेव केवलमर्हति यया च सहोत्तममतित्वात्स्वल्पमपि कार्यं प्रथमतः पर्यालोचयति सा गौरवविषये पर्यालोचनायां चात्यन्तमभ्यन्तरा वर्त्तते इत्यभ्यन्तरिका, या तु गौरवार्हा पर्यालोचितं चाभ्यन्तरिकया पर्षदा सह अवश्यकर्त्तव्यतया निश्चितं न तु प्रथमतः सा किल गौरवे पर्यालोचनायां च मध्यमे भागे वर्त्तत इति मध्यमिका, या तु गौरवं न जातुचिदप्यर्हति न च यया सह कार्यं पर्यालोचयति केवलमादेश एव यस्मै दीयते सा गौरवानर्हा पर्यालोचनायाश्च बहिर्भावे वर्त्तत इति बाह्या। तदेवमभ्यन्तरिकादिव्यपदेश-निबन्धनमुक्तं, सम्प्रत्येतदेवोपसंहरन्नाह–**'से एएण(तेण)ट्ठेण'**मित्यादि पाठसिद्धं, यानि तु **समिया चंडा जाता** इति नामानि तानि कारणान्तरनिबन्धनानि, कारणान्तरं च ग्रन्थान्तरादवसातव्यं, अत्र सङ्ग्रहणिगाथे–

"चउवीस अट्ठवीसा बत्तीससहस्स देव चमरस्स।
अद्धट्ठा तिन्नि तहा अड्ढाइज्जा य देविसया।।१।।
अड्ढाइज्जा य दोन्नि य दिवड्ढपलियं कमेण देवठिई।
पलियं दिवड्ढमेगं अद्धो देवीण परिसासु।।२।।" ।। २३९ ।।

(२४०) कहि णं भंते! उत्तरिल्लाणं असुरकुमाराणं भवणा पण्णत्ता?, जहा ठाणपदे जाव बली,एत्थ वइरोयणिंदे वइरोयणराया परिवसति जाव विहरति ।२४०।

---

१. द्र.प्रज्ञापना सूत्र २/३२।।

'कहि णं भंते! उत्तरिल्लाणं असुरकुमाराणं देवाणं भवणा पण्णत्ता' इत्यादि, **क्व भदन्त! उत्तराणामसुरकुमाराणां भवनानि प्रज्ञप्तानि?** इत्येवं **यथा** प्रज्ञापनायां द्वितीये **स्थानाख्ये पदे** तथा तावद्वक्तव्यं **यावद् बलिः, अत्र वैरोचनेन्द्रो वैरोचनराजः परिवसति,** तत ऊर्ध्वमपि तावद्वक्तव्यं **यावद्विहरति,** तच्चैवम्-**'कहि णं भंते! उत्तरिल्ला असुरकुमारा देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरे जोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से एत्थ उत्तरिल्लाणं असुरकुमाराणं देवाणं तीसं भवणवाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा सेसं जहा दाहिणिल्लाणं जाव विहरंति, बली य एत्थ वइरोयणिंदे वइरोयणराया परिवसइ काले महानीलसरिसे जाव पभासेमाणे, से णं तत्थ तीसाए भवणवाससयसहस्साणं सट्ठीए सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हमणियाणं सत्तण्हमणियाहिवईणं चउण्हं य सट्ठीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं उत्तरिल्लाणं असुरकुमाराणं देवाणं देवीण य आहेवच्चं जाव विहरइ"** [प्रज्ञापना सू.१८०] समस्तमिदं प्राग्वत्।।२४०।।

सम्प्रति पर्षन्निरूपणार्थमाह-

(२४१) बलिस्स णं भंते! वइरोयणिंदस्स वइरोयणरन्नो कति परिसाओ पण्णत्ताओ?, गोयमा! तिण्णि परिसा, तंजहा-समिया चंडा जाया, अब्भिंतरिया समिया मज्झिमिया चंडा बाहिरिया जाया।।२४१।। (२४२) बलिस्स णं वइरोयणिंदस्स वइरोयणरन्नो अब्भिंतरियाए परिसाए कति देवसहस्सा पण्णत्त? मज्झिमियाए परिसाए कति देवसहस्सा जाव बाहिरियाए परिसाए कति देविसया पण्णत्ता?, गोयमा! बलिस्स णं वइरोयणिंदस्स २ अब्भिंतरियाए परिसाए वीसं देवसहस्सा पण्णत्ता, मज्झिमियाए परिसाए चउवीसं देवसहस्सा पण्णत्ता, बाहिरियाए परिसाए अट्ठावीसं देवसहस्सा पण्णत्ता, अब्भिंतरियाए परिसाए अद्धपंचमा देविसता, मज्झिमियाए परिसाए चत्तारि देविसया पण्णत्ता, बाहिरियाए परिसाए अद्धट्ठा देविसता पण्णत्ता।। २४२ ।। (२४३) बलिस्स ठितीए पुच्छा जाव बाहिरियाए परिसाए देवीणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! बलिस्स णं वइरोयणिंदस्स २ अब्भिंतरियाए परिसाए देवाणं अद्धट्ठपलिओवमा

ठिती पण्णत्ता, मज्झिमियाए परिसाए तिन्नि पलिओवमाइं ठिती पण्णत्ता, बाहिरियाए परिसाए देवाणं अड्ढाइज्जाइं पलिओवमाइं ठिई पन्नत्ता । अब्भिंतरियाए परिसाए देवीणं अड्ढाइज्जाइं पलिओवमाइं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवीणं दो पलिओवमाइं ठिती पण्णत्ता, बाहिरियाए परिसाए देवीणं दिवड्ढं पलिओवमं ठिती पण्णत्ता, सेसं जहा चमरस्स असुरिंदस्स असुरकुमाररण्णो।। २४३।।

'बलिस्स णं भंते!' इत्यादि प्राग्वत्, नवरमिदमत्र देव-देवीसङ्ख्यास्थितिनानात्वम्–

'वीस उ चउवीस अट्ठावीस सहस्साण (होंति) देवाणं।
अद्धपणचउद्धट्ठा देविसय बलिस्स परिसासु।।१।।
अद्धट्ठ तिण्णि अड्ढाइज्जाइं (होंति) पलियदेवठिई।
अड्ढाइज्जा दोण्णि य दिवड्ढ देवीण ठिइ कमसो।।२।।" ।। २४१-२४३ ।।

(२४४) कहि णं भंते! नागकुमाराणं देवाणं भवणा पण्णत्ता?, जहा ठाणपदे जाव दाहिणिल्लावि पुच्छियव्वा जाव धरणे इत्थ नागकुमारिंदे नागकुमारराया परिवसति जाव[1] विहरति।।२४४।।

'कहि णं भंते! नागकुमाराणं देवाणं भवणा पण्णत्ता?' इत्यादि, **क्व भदन्त! नागकुमाराणां देवानां भवनानि प्रज्ञप्तानि?**, एवं **यथा** प्रज्ञापनायां **स्थानाख्ये** द्वितीयपदे तथा वक्तव्यं **यावद् दाक्षिणात्या** अपि **प्रष्टव्या यावद्धरणोऽत्र नागकुमारेन्द्रो नागकुमारराजः परिवसति यावद् विहरति,** तच्चैवम्–

"कहि णं भंते! नागकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं नागकुमाराणं देवाणं चुलसी भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं नागकुमाराणं देवाणं भवणा पण्णत्ता, तत्थ णं बहवे नागकुमारा देवा परिवसंति महिड्ढीया महज्जुतिया, सेसं जहा ओहियाणं जाव विहरंति, धरण-भूयाणंदा एत्थ दुवे नागकुमारिंदा नागकुमाररायाणो परिवसंति महिड्ढीया सेसं जहा ओहियाणं जाव विहरंति।

कहि णं भंते! दाहिणिल्लाणं नागकुमाराणं देवाणं भवणा पण्णत्ता? कहि णं भंते! दाहिणिल्ला नागकुमारा

१. द्र. प्रज्ञापना सू. २/३४,३५।।

देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं नागकुमाराणं देवाणं चोयालीसं भवणावाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं नागकुमाराणं देवाणं भवणा पन्नत्ता, एत्थ णं बहवे दाहिणिल्ला नागकुमारा परिवसंति महिड्ढीया जाव विहरंति, धरणे एत्थ नागकुमारिंदे नागकुमारराया परिवसइ महिड्ढीए जाव पभासेमाणे, से णं तत्थ चोयालीसाए भवणावाससयसहस्साणं छण्हं सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं छण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं चउवीसाए आयरक्खदेवसाहस्सीणं अण्णेसिं च बहूणं दाहिणिल्लाणं नागकुमाराणं देवाणं देवीण य आहेवच्चं जाव विहरंति"[प्रज्ञापना सू. १८१-१८२] पाठसिद्धं।। २४४।।

सम्प्रति पर्षन्निरूपणार्थमाह–

(२४५) धरणस्स णं भंते! णागकुमारिंदस्स नागकुमाररण्णो कति परिसाओ पं०? गोयमा! तिण्णि परिसाओ, ताओ चेव जहा चमरस्स। (२४६) धरणस्स णं भंते! णागकुमारिंदस्स णागकुमाररन्नो अब्भिंतरियाए परिसाए कति देवसहस्सा पन्नत्ता?, जाव बाहिरियाए परिसाए कति देवीसता पण्णत्ता?, गोयमा! धरणस्स णं णागकुमारिंदस्स नागकुमाररण्णो अब्भिंतरियाए परिसाए सट्ठिं देवसहस्साइं, मज्झिमियाए परिसाए सत्तरिं देवसहस्साइं, बाहिरियाए असीतिदेवसहस्साइं, अब्भिंतरियाए परिसाए पण्णत्तरं देविसतं पण्णत्तं, मज्झिमियाए परिसाए पण्णासं देविसतं पण्णत्तं बाहिरियाए परिसाए पणवीसं देविसतं पण्णत्तं।। २४५-२४६।।

'धरणस्स णं भंते!' इत्यादि, प्राग्वत्, नवरमत्रा**भ्यन्तरपर्षदि षष्टिर्देवसहस्त्राणि मध्यमिकायां सप्ततिर्देवसहस्त्राणि बाह्यायामशीतिर्देवसहस्त्राणि,** तथाऽभ्यन्तरिकायां **पर्षदि पञ्चसप्ततं देवीशतम्, 'मज्झिमियाए परिसाए पण्णासं देविसतं पण्णत्तं'** मध्यमिकायां पर्षदि पञ्चाशं देवीशतं **बाह्यायां पञ्चविंशं देवीशतम्।। २४५-२४६।।**

(२४७) धरणस्स णं भंते ! णागकुमारिंदस्स नागकुमार रन्नो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? मज्झिमियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती

पण्णत्ता? अब्भिंतरियाए परिसाए देवीणं केवतियं कालं ठिती पण्णत्ता? मज्झिमियाए परिसाए देवीणं केवइयं कालं ठिती पण्णत्ता? बाहिरियाए परिसाए देवीणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! धरणस्स० रण्णो अब्भिंतरियाए परिसाए देवाणं सातिरेगं अद्धपलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवाणं अद्धपलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवाणं देसूणं अद्धपलिओवमं ठिती पण्णत्ता, अब्भिंतरियाए परिसाए देवीणं देसूणं अद्धपलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवीणं सातिरेगं चउब्भागपलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवीणं चउभागपलिओवमं ठिती पण्णत्ता, अट्ठो जहा चमरस्स।। २४७।।

तथाऽभ्यन्तरिकायां पर्षदि देवानां स्थितिः **सातिरेकमर्द्धपल्योपमं मध्यमिकायामर्द्धपल्योपमं बाह्यायां देशोनमर्द्धपल्योपमं,** तथाऽभ्यन्तरिकायां पर्षदि देवीनां स्थितिर्**देशोनमर्द्धपल्योपमं मध्यमिकायां सातिरेकं चतुर्भागपल्योपमं बाह्यायां चतुर्भागपल्योपमं,** शेषं प्राग्वत्।।२४७।।

(२४८) कहि णं भंते! उत्तरिल्लाणं णागकुमाराणं भवणा पण्णत्ता ? जहा ठाणपदे जाव विहरति।।२४८ ।।

'कहि णं भंते! उत्तरिल्लाणं नागकुमाराणं भवणा पण्णत्ता जहा ठाणपदे जाव विहरइ'त्ति, **क्व भदन्त! उत्तराणां नागकुमाराणां भवनानि प्रज्ञप्तानि?** इत्यादि **यथा प्रज्ञापनायां स्थानाख्ये पदे** तथा वक्तव्यं **यावद्विहरतीति** पदं, तच्चैवम्–

"कहि णं भंते! उत्तरिल्ला नागकुमारा परिवसन्ति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्स-बाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं उत्तरिल्लाणं नागकुमाराणं चत्तालीसं भवणावाससयसहस्सा हवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा सेसं जहा दाहिणिल्लाणं जाव विहरंति, भूयाणंदे एत्थ नागकुमारिंदे नागकुमारराया परिवसति महिड्ढीए जाव पभासेमाणे, से णं चत्तालीसाए भवणावाससयसहस्साणं सेसं तं चेव जाव विहरइ" [प्रज्ञापना सू. १८३] इति निगदसिद्धम्।।२४८ ।।

पर्षन्निरूपणार्थमाह–

(२४९) भूयाणंदस्स णं भंते! णागकुमारिंदस्स णागकुमाररण्णो अब्भिंतरियाए परिसाए कति देवसाहस्सीओ पण्णत्ताओ?, मज्झिमियाए परिसाए कति देवसाहस्सीओ पण्णत्ताओ?, बाहिरियाए परिसाए कइ देवसाहस्सीओ पण्णत्ताओ? अब्भिंतरियाए परिसाए कइ देविसया पण्णत्ता? मज्झिमियाए परिसाए कइ देविसया पण्णत्ता? बाहिरियाए परिसाए कइ देविसया पण्णत्ता?, गोयमा! भूयाणंदस्स णं नागकुमारिंदस्स नागकुमाररन्नो अब्भिंतरियाए परिसाए पन्नासं देवसाहस्सीओ पण्णत्ता, मज्झिमियाए परिसाए सट्ठिं देवसाहस्सीओ पण्णत्ताओ, बाहिरियाए परिसाए सत्तरि देवसाहस्सीओ पण्णत्ताओ, अब्भिंतरियाए परिसाएं[1] पणुवीसा दो देविसया पण्णत्ता, मज्झिमियाए परिसाए दो देवीसया पण्णत्ता, बाहिरियाए परिसाए पण्णत्तरं देविसयं पण्णत्तं। (२५०) भूयाणंदस्स णं भंते! नागकुमारिंदस्स नागकुमाररण्णो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? जाव बाहिरियाए परिसाए देवीणं केवतियं कालं ठिई पण्णत्ता?, गोयमा! भूताणंदस्स णं अब्भिंतरियाए परिसाए देवाणं देसूणं पलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवाणं साइरेगं अद्धपलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवाणं अद्धपलिओवमं ठिती पण्णत्ता, अब्भिंतरियाए परिसाए देवीणं अद्धपलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवीणं देसूणं अद्धपलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवीणं साइरेगं चउब्भागपलिओवमं ठिती पण्णत्ता। अत्थो जहा चमरस्स, अवसेसाणं वेणुदेवादीणं महाघोसपज्जवसाणाणं ठाणपदवत्तव्वया[2] णिरवयवा भाणियव्वा, परिसातो जहा[3] धरण-भूताणंदाणं (सेसाणं भवणवईणं) दाहिणिल्लाणं जहा[4] धरणस्स उत्तरिल्लाणं जहा भूताणंदस्स, परिमाणंपि ठितीवि।। २५०।।

---

१. ता.। ०ए दो पणवीसं देवीसया -L।। २. द्र. प्रज्ञापना सू. २/३७-४० ।। ३. द्र. ३/२४६,२४७ सू. ।। ४. द्र. ३/२४८,२४९ सू. ।

'भूयाणंदस्स ण'मित्यादि प्राग्वत्, नवरमत्राभ्यन्तरिकायां पर्षदि पञ्चाशद्देवसहस्राणि मध्यमिकायां षष्टिर्देवसहस्राणि बाह्यायां सप्ततिर्देवसहस्राणि, तथाऽभ्यन्तरिकायां पर्षदि पञ्चविंशे द्वे देवीशते मध्यमिकायां परिपूर्णे द्वे देवीशते बाह्यायां पञ्चसप्ततं देवीशतम्। तथाऽभ्यन्तरिकायां पर्षदि देवानां स्थितिर्देशोनं पल्योपमं मध्यमिकायां सातिरेकमर्द्धपल्योपमं बाह्यायामर्द्धपल्योपमं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां स्थितिरर्द्धपल्योपमं मध्यमिकायां देशोनमर्द्धपल्योपमं बाह्यायां सातिरेकं चतुर्भागपल्योपमं, शेषं प्राग्वत्। **'अवसेसाणं वेणुदेवाईणं महाघोसपज्जवसाणाणं ठाणपयवत्तव्वया भाणियव्वा'** इति, 'अवशेषाणां' नागकुमारराजव्यतिरिक्तानां वेणुदेवादीनां महाघोषपर्यवसानानां स्थानाख्यप्रज्ञापनागतद्वितीयपदवक्तव्यता भणितव्या, सा चैवम्-

"कहि णं भंते! सुवन्नकुमाराणं देवाणं भवणा पण्णत्ता? कहि णं भंते! सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं सुवण्णकुमाराणं देवाणं बावत्तरी भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं सुवण्णकुमाराणं देवाणं भवणा पण्णत्ता, तत्थ णं बहवे सुवण्णकुमारा देवा परिवसंति महिड्ढिया सेसं जहा ओहियाणं जाव विहरंति, वेणुदेवे वेणुदाली एत्थ दुवे सुवण्णकुमारिंदा सुवण्णकुमाररायाणो परिवसंति महिड्ढिया जाव विहरंति। कहि णं भंते! दाहिणिल्लाणं सुवण्णकुमाराणं भवणा पण्णत्ता? कहि णं भंते! दाहिणिल्ला सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसयसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं अट्ठत्तीसं भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं भवणा पण्णत्ता, एत्थ णं बहवे दाहिणिल्ला सुवण्णकुमारा परिवसंति, वेणुदेवे एत्थ सुवण्णकुमारिंदे सुवण्णकुमारराया परिवसति महिड्ढिए जाव पभासेमाणे, से णं तत्थ अट्ठत्तीसाए भवणावाससयसहस्साणं जाव विहरति।" [प्रज्ञापना सू. १८४-५]

पर्षद्वक्तव्यताऽपि धरणवन्निरवशेषा वक्तव्या। "कहि णं भंते! उत्तरिल्लाणं सुवण्णकुमाराणं भवणा पन्नत्ता? कहि णं भंते! उत्तरिल्ला सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए जाव मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं उत्तरिल्लाणं सुवण्णकुमाराणं देवाणं चोत्तीसं भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं बहवे उत्तरिल्ला सुवण्णकुमारा देवा परिवसंति महिड्ढिया जाव विहरंति, वेणुदाली य एत्थ सुवण्णकुमारिंदे सुवण्णकुमारराया परिवसति महिड्ढिए जाव पभासे०, (से णं) तत्थ चोत्तीसाए भवणावाससयसहस्साणं सेसं जहा नागकुमाराणं।" [प्रज्ञापना सू. १८६] **पर्षद्वक्तव्यता**ऽपि **भूतानन्द**वन्निरवशेषा वक्तव्या। यथा सुवर्णकुमाराणां वक्तव्यता भणिता तथा शेषाणामपि वक्तव्या, नवरं भवननानात्वमिन्द्रनानात्वं परिमाणनानात्वं चैताभिर्गाथाभिरनुगन्तव्यम्-

"चउसट्ठी असुराणं चुलसीई चेव होइ नागाणं।
बावत्तरिं सुवण्णे वाउकुमाराण छन्नउई।।१।।
दीवदिसाउदहीणं विज्जुकुमारिंदथणियमग्गीणं।
छण्हंपि जुयलयाणं छावत्तरिमो सयसहस्सा।।२।।
चोत्तीसा १ चोयाला २ अट्ठत्तीसं ३ च सयसहस्साइं।
पण्णा ४ चत्तालीसा १० दाहिणतो होंति भवणाइं।।३।।
तीसा १ चत्तालीसा २ चोत्तीसं ३ चेव सयसहस्साइं।
छायाला ४ छत्तीसा १० उत्तरतो होंति भवणाइं।।४।।
चमरे १ धरणे २ तह वेणुदेव ३ हरिकंत ४ अग्गिसीहे ५ य।
पुण्णे ६ जलकंते ७ या अमिए ८ लंबे य ९ घोसे य १०।।५।।
बलि १ भूयाणंदे २ वेणुदालि ३ हरिस्सह ४ अग्गिमाणव ५ विसिट्ठे ६।
जलप्पभ ७ अमियवाहण ८ पभंजणे ९ चेव महघोसे १०।।६।।
चउसट्ठी सट्ठी खलु छच्च सहस्सा उ असुरवज्जाणं।
सामाणिया उ एए चउग्गुणा आयरक्खा उ।।७।।" [प्रज्ञापना सू. १८७]

पर्षद्वक्तव्यताऽपि दाक्षिणात्यानां धरणवत्, उत्तराणां भूतानन्दवत्, तथा चाह–**'परिसाओ सेसाणं भवणवईणं दाहिणिल्लाणं जहा धरणस्स, उत्तरिल्लाणं जहा भूयाणंदस्से**'ति ।।२४९-२५०।।

तदेवं भवन[पति]वक्तव्यतोक्ता, सम्प्रति वानमन्तरवक्तव्यतामभिधित्सुराह–

(२५१) कहि णं भंते! वाणमंतराणं देवाणं भोमेज्जा णगरा पण्णत्ता?, जहा ठाणपदे[1] जाव विहरंति।। २५१।।

'कहि णं भंते! वाणमंतराणं देवाणं भोमेज्जा नगरा पण्णत्ता?' क्व भदन्त! वानमन्तराणां देवानां भौमेयानि नगराणि प्रज्ञप्तानि?, **'जहा ठाणपदे जाव विहरंति'** इति, यथा स्थानाख्ये **प्रज्ञापनायां** द्वितीये पदे तथा वक्तव्यं यावद्विहरन्तीति, तच्चैवं-**"गोयमा! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठावि एगं जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु, एत्थ णं वाणमन्तराणं तिरियमसंखेज्जा भोमेज्जा नगरावाससयसहस्सा भवंतीतिमक्खायं, ते णं भोमेज्जा नगरा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिया उक्किण्णंतरविउलगंभीरखायपरिहा पागारट्टालयकवाडतोरण-पडिदुवारदेसभागा जंतसयग्घिमुसलमु-सुंढिपरियरिया अयोज्झा सयाजया सयागुत्ता अडयालकोट्ठरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचियचंदणकलसा**

१. द्र. प्रज्ञापना सू. २/४१ ।।

चंदणघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावा पंचवण्णसरससुरभिमुक्क-पुप्फपुंजोवयारकलिया कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमघमघेंत-गंधुद्धुयाभिरामा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं वाणमंतराणं देवाणं भोमेज्जा नगरा पण्णत्ता, तत्थ णं बहवे वाणमंतरा देवा परिवसंति, तंजहा-पिसाया भूया जक्खा रक्खसा किंनरा किंपुरिसा भुयगपतिणो महाकाया गंधव्वगणा य निउणगंधव्वगीयरमणा अणपन्नियपणपन्निय इसिवाइय भूयवाइय कंदिय महाकंदिया य कुहंडपयंगदेवा चंचलचवलचित्तकीलणदवप्पिया गहिरहसियगीयणच्चणरई वणमालामेलमउडकुंडलसच्छंदवि-उव्वियाभरणचारुभूसणधरा सव्वोउयसुरहिकुसुमरइयपलंब-सोहंतकंतवियसंतचित्तवणमालरइयवच्छा कामकामा कामरूवदेहधारी नाणाविहवण्णरागवरवत्थचिल्ललगनियंसणा विविहदेसनेवत्थगहियवेसा पमुइयकंदप्पकलहकेलिकोलाहलप्पिया हासबोलबहुला असिमोग्गरसत्तिहत्था अणेगमणिरयण-विविह(निजुत्त)-चित्तचिंधगया सुरूवा महिड्ढिया महायसा जाव महासोक्खा हारविराइयवच्छा जाव दस दिसाओ उज्जोवेमाणा पभासेमाणा, ते णं तत्थ साणं साणं भोमेज्जनगरावाससयसहस्साणं साणं साणं सामाणियसाहस्सीणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अणीयाणं साणं २ अणीयाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं, अन्नेसिं च बहूणं वाणमंतराणं देवाण य देवीण य आहेवच्चं जाव भुंजमाणा विहरंति" [प्रज्ञापना सू. १८८] प्रायः सुगमं, नवरं 'भुयगवइणो महाकाया' इति, महाकाया–महोरगाः, किंविशिष्टाः? इत्याह–भुजगपतयः, 'गन्धर्वगणाः' गन्धर्वसमुदायाः, किंविशिष्टाः? इत्याह–'निपुणगन्धर्वगीतरतयः' निपुणाः–परमकौशलोपेता एवं गन्धर्वा–गन्धर्वजातीया देवास्तेषां यद् गीतं तत्र रतिर्येषां ते तथा, एते व्यन्तराणामष्टौ मूलभेदाः, इमे चान्येऽवान्तरभेदा अष्टौ–'अणपन्निय' इत्यादि, कथम्भूता एते षोडशापीत्यत आह–'चंचलचवलचित्तकीलणदवप्पिया' चञ्चला-अनवस्थितचित्तास्तथा चलचपलम्–अतिशयेन चपलं यच्चित्रं–नानाप्रकारं क्रीडनं यश्च चित्रो–नानाप्रकारो द्रवः–परिहासस्तौ प्रियौ येषां ते चलचपलचित्रक्रीडनद्रवप्रियाः, ततश्चञ्चलशब्देन विशेषणसमासः, तथा 'गहिरहसियगीयनच्चणरई' इति गम्भीरेषु हसितगीतनर्त्तनेषु रतिर्येषां ते तथा, तथा 'वणमालामेडमउल-कुंडलसच्छंदविउव्वियाभरण-भूसणधरा' इति वनमाला–वनमालामयानि आमेलमुकुटकुण्डलानि, आमेलः–आपीडशब्दस्य प्राकृत-लक्षणवशाद् आपीडः–शेखरकः, तथा स्वच्छन्दं विकुर्वितानि यानि आभरणानि तैर्यच्चारु भूषणं–मण्डनं तद्धरन्तीति वनमालाऽऽपीडमुकुटकुण्डलस्वच्छन्दविकुर्विताभरणचारुभूषणधराः, लिहादित्वादच्, तथा सर्वर्त्तुकैः–सर्वर्त्तुभाविभिः सुरभिकुसुमैः सुरचिताः–शोभनं निर्वर्त्तिताः तथा प्रलम्बत इति प्रलम्बा शोभत इति शोभमाना कान्ता–कमनीया विकसन्ती–अमुकुलिता अम्लानपुष्पमयी चित्रा-नानाप्रकारा वनमाला रचिता वक्षसि यैस्ते सर्वर्त्तुकसुरभिकुसुमरचितप्रलम्बशोभमानकान्तविकसच्चित्रवन-मालारचितवक्षसः, तथा कामं–स्वेच्छया गमो येषां ते कामगमाः–स्वेच्छाचारिणः, क्वचित् 'कामकामाः'

इति पाठः, कामेन–स्वेच्छया कामो–मैथुनसेवा येषां ते कामकामा अनियतकामा इत्यर्थः, तथा कामं–स्वेच्छया रूपं येषां ते कामरूपास्ते च ते देहाश्च कामरूपदेहास्तान् धरन्तीत्येवंशीलाः कामरूपदेहधारिणः, स्वेच्छाविकुर्वितनानारूपदेहधारिण इत्यर्थः, तथा नानाविधैर्वर्णै रागो–रक्तता येषां तानि नानाविधवर्णरागाणि वराणि–प्रधानानि चित्राणि–नानाविधानि अद्भुतानि वा (वस्त्राणि) चेल्ललकानि–देशीवचनाद् देदीप्यमानानि नियंसणं–परिधानं येषां ते नानाविधवर्णरागवर-वस्त्रचेल्ललकनिवसनाः तथा विविधैर्देशनेपथ्यैर्गृहीतो वेषो यैस्ते विविधदेशनेपथ्यगृहीतवेषाः, 'पमुइयकंदप्पकलहकेलिकोलाहलप्पिया' कन्दर्पः–कामोद्दीपनं वचनं चेष्टा च कलहो–राटिः केलिः–क्रीडा कोलाहलो–बोलः कन्दर्प्पकलहकेलि-कोलाहलाः प्रिया येषां ते कन्दर्प्पकलहकेलिकोलाहलप्रियाः, ततः प्रमुदितशब्देन सह विशेषणसमासः, 'हासबोलबहुला' इति हासबोलौ बहुलौ–अतिप्रभूतौ येषां ते हासबोलबहुलाः, तथाऽसिमुद्गरशक्तिकुन्ता हस्ते येषां ते असिमुद्गरशक्तिकुन्तहस्ताः, **"प्रहरणात् सप्तमी चे"** [ ] ति सप्तम्यन्तस्य पाक्षिकः परनिपातः, 'अणेगमणिरयणविविहनिजुत्तचित्ततिंधगया' इति, मणयः–चन्द्रकान्ताद्या रत्नानि–कर्केतनादीनि अनेकैर्मणिरत्नैर्विविधं–नानाप्रकारं नियुक्तानि विचित्राणि–नानाप्रकाराणि चिह्नानि गतानि–स्थितानि येषां ते तथा, शेषं प्राग्वत्।। २५१।।

(२५२) कहि णं भंते! पिसायाणं देवाणं भवणा पण्णत्ता?, जहा ठाणपदे जाव विहरंति कालमहाकाला य तत्थ दुवे पिसायकुमाररायाणो परिवसंति जाव[1] विहरंति।। २५२।।

'कहि णं भंते! पिसायाणं देवाणं भोमेज्जा नगरा पण्णत्ता?' क्व भदन्त! पिशाचानां देवानां भौमेयानि नगराणि प्रज्ञप्तानि? इत्यादि, **'जहा ठाणपदे जाव विहरंति'** यथा **'प्रज्ञापनायां'** स्थानाख्ये पदे तथा वक्तव्यं यावद्विहरन्तीति पदं, तच्चैवं–

"कहि णं भंते! पिसाया देवा परिवसंति? गोयमा! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठा चेगं जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु, एत्थ णं पिसायाणं देवाणं तिरियमसंखेज्जा भोमेज्जनगरावाससयसहस्सा भवंतीतिमक्खायं, ते णं भोमेज्जनगरा बाहिं वट्टा जो ओहिओ भोमेज्जनगरवण्णतो सो भाणियव्वो जाव पडिरूवा, एत्थ णं पिसायाणं भोमेज्जनगरा पण्णत्ता, तत्थ णं बहवे पिसाया देवा परिवसंति महिड्ढिया जहा ओहिया जाव विहरंति"[प्रज्ञापना सू. १८९] सुगमं,

१. द्र. प्रज्ञापना सू. २/४२।।

'**कालमहाकाला य एत्थ दुवे पिसाइंदा पिसायरायाणो परिवसंति** महिड्ढिया **जाव विहरंति**।। २५२।।

(२५३) कहि णं भंते! दाहिणिल्लाणं पिसायकुमाराणं जाव विहरंति काले य एत्थ पिसायकुमारिंदे पिसायकुमाररायाा परिवसति महड्ढिए जाव विहरति।२५३।

कहि णं भंते! दाहिणिल्लाणं पिसायाणं भोमेज्जा नगरा० बाहिं वट्टा जो ओहिओ भोमेज्जनगरवण्णतो सो भाणियव्वो जाव पडिरूवा, एत्थ णं पिसायाणं भोमेज्जनगरा पण्णत्ता। कहि णं भंते! दाहिणिल्ला पिसाया देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठावि एगं जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु एत्थ णं दाहिणिल्लाणं पिसायाणं देवाणं भोमेज्जा नगरा पण्णत्ता, तत्थ णं बहवे दाहिणिल्ला पिसाया देवा परिवसंति महिड्ढिया **जाव विहरंति, काले य तत्थ पिसाइंदे पिसायराया परिवसति महिड्ढिए** जाव पभासेमाणे, से णं तत्थ तिरियमसंखेज्जाणं भोमेज्जनगरावाससयसहस्साणं चउण्हं सामाणियसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं वाणमन्तराणं देवाणं देवीण य आहेवच्चं **जाव विहरति**' पाठसिद्धम्।। २५३ ।।

सम्प्रति पर्षन्निरूपणार्थमाह–

(२५४) कालस्स णं भंते! पिसायकुमारिंदस्स पिसायकुमाररण्णो कति परिसाओ पण्णत्ताओ?, गोयमा! तिण्णि परिसाओ पण्णत्ताओ, तंजहा-ईसा तुडिया दढरहा, अब्भिंतरिया ईसा, मज्झिमिया तुडिया, बाहिरिया दढरहा।। २५४।।

(२५५) कालस्स णं भंते! पिसायकुमारिंदस्स पिसायकुमाररण्णो अब्भिंतरपरिसाए कति देवसाहस्सीओ पण्णत्ताओ?, जाव बाहिरियाए परिसाए कइ देविसया पण्णत्ता?, गोयमा! कालस्स णं पिसायकुमारिंदस्स पिसायकुमाररण्णो अब्भिंतरियाए परिसाए अट्ठ देवसाहस्सीओ पण्णत्ताओ, मज्झिमियाए परिसाए

---

१. द्र. प्रज्ञापना सू. २/४३ ।।

दस देवसाहस्सीओ पण्णत्ताओ, बाहिरियाए परिसाए बारस देवसाहस्सीओ पण्णत्ताओ, अब्भिंतरियाए परिसाए एगं देविसतं पण्णत्तं, मज्झिमियाए परिसाए एगं देविसतं पण्णत्तं, बाहिरियाए परिसाए एगं देविसतं पण्णत्तं।। २५५।। (२५६) कालस्स णं भंते! पिसायकुमारिंदस्स पिसायकुमाररण्णो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? मज्झिमियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती पण्णत्ता? जाव बाहिरियाए परिसाए देवीणं केवतियं कालं ठिती पण्णत्ता?, गोयमा! कालस्स णं पिसायकुमारिंदस्स पिसायकुमाररण्णो अब्भिंतरियाए परिसाए देवाणं अद्धपलिओवमं ठिती पण्णत्ता, मज्झिमियाए परिसाए देवाणं देसूणं अद्धपलिओवमं ठिती पण्णत्ता, बाहिरियाए परिसाए देवाणं सातिरेगं चउब्भागपलिओवमं ठिती पण्णत्ता, अब्भंतरियाए परिसाए देवीणं सातिरेगं चउब्भागपलिओवमं ठिती पण्णत्ता, मज्झिमपरि० देवीणं चउब्भागपलिओवमं ठिती पण्णत्ता, बाहिरपरिसाए देवीणं देसूणं चउब्भागपलिओवमं ठिती पण्णत्ता, अट्ठो जो चेव चमरस्स, एवं उत्तरस्सवि, एवं णिरंतरं जाव गीयजसस्स।। २५४-२५५-२५६।।

'**कालस्स णं भंते! पिसायइंदस्स पिसायरन्नो कति परिसाओ पण्णत्ताओ?, गोयमा! तिण्णि परिसाओ पण्णत्ताओ, तंजहा-ईसा तुडिया दढरहा अब्भिंतरिया ईसा**' इत्यादि सर्वं प्राग्वत्, नवरमत्राभ्यन्तरिकायामष्टौ देवसहस्त्राणि मध्यमिकायां दश देवसहस्त्राणि बाह्यायां द्वादश देवसहस्त्राणि, तथाऽभ्यन्तरिकायां पर्षदि एकं देवीशतं मध्यमिकायामप्येकं देवीशतं बाह्यायामप्येकं देवीशतम्, अभ्यन्तरिकायां पर्षदि देवानां स्थितिरर्द्धपल्योपमं मध्यमिकायां देशोनमर्द्धपल्योपमं बाह्यायां सातिरेकचतुर्भागपल्योपमं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां सातिरेकं चतुर्भागपल्योपमं मध्यमिकायां चतुर्भागपल्योपमं बाह्यायां देशोनं चतुर्भागपल्योपमं, शेषं प्राग्वत्।

---

१. एवं सोलसण्हवि वंतरिंदाणं - जे. ।।

"कहि णं भंते! उत्तरिल्लाणं पिसायाणं भोमेज्जा नगरा पण्णत्ता?, कहि णं भंते! उत्तरिल्ला पिसाया देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे जहेव दाहिणिल्लाणं वत्तव्वया तहेव उत्तरिल्लाणंपि, नवरं मन्दरस्स उत्तरेणं, महाकाले इत्थ पिसाइंदे पिसायराया परिवसति जाव विहरति" [प्रज्ञापना सू. १९१] पाठसिद्धं, पर्षद्वक्तव्यताऽपि कालवत्,

'एवं जहा पिसायाणं तहा भूयाणवि जाव गंधव्वाणं नवरं इंदेसु नाणत्तं भाणियव्वं, इमेण विहिणा- भूयाणं सुरूव-पडिरूवा, जक्खाणं पुण्णभद्द-माणिभद्दा, रक्खसाणं भीम-महाभीमा, किंनराणं किंनर-किंपुरिसा, किंपुरिसाणं सप्पुरिस-महापुरिसा, महोरगाणं अइकाय-महाकाया, गंधव्वाणं गीयरई-गीयजसा–

"काले य महाकाले सुरूवपडिरूवपुण्णभद्दे य।
अमरवइमाणिभद्दे भीमे य तहा महाभीमे।।१।।
किंनरकिंपुरिसे खलु सप्पुरिसे खलु तहा महापुरिसे।
अइकायमहाकाए गीयरई चेव गीयजसे।।२।।" [प्रज्ञापना सू. १९२]

सुगमम्, पर्षद्वक्तव्यताऽपि कालवन्निरन्तरं वक्तव्या यावद् गीतयशसः।।२५४-२५५-२५६।।

तदेवमुक्ता वानमन्तरवक्तव्यता सम्प्रति ज्योतिष्काणामाह–

(२५७) कहि णं भंते! जोइसियाणं देवाणं विमाणा पण्णत्ता? कहि णं भंते! जोतिसिया देवा परिवसंति?, गोयमा! उप्पिं दीवसमुद्दाणं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो सत्तणउए जोयणसते उड्ढं उप्पतित्ता दसुत्तरजोयणसय बाहल्ले, तत्थ णं जोइसियाणं देवाणं तिरियमसंखेज्जा जोतिसियविमाणा-वाससतसहस्सा भवंतीतिमक्खायं, ते णं विमाणा अद्धकविट्ठकसंठाणसंठिया एवं जहा ठाणपदे जाव चंदमसूरिया य तत्थ णं दुवे जोतिसिंदा जोतिसरायाणो परिवसंति महिड्ढिया जाव विहरंति।। २५७ ।।

'कहि णं भंते! जोइसियाण'मित्यादि, **क्व भदन्त! ज्योतिष्कानां देवानां विमानानि प्रज्ञप्तानि? क्व भदन्त! ज्योतिष्का देवाः परिवसन्ति?**, भगवानाह–**गौतम! अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागाद्** रुचकोपलक्षितात् **'सप्तनवतिशतानि'** सप्तनवत्यधिकानि योजनशता**न्यूर्द्ध्वमुत्प्लुत्य**–बुद्ध्याऽतिक्रम्य **दशोत्तरयोजनशतबाहल्ये** तिर्यगसङ्ख्येयेऽसङ्ख्येययोजन-

१. दसुत्तरजोयणसया बाहल्लेण– L ।।

कोटीकोटीप्रमाणे ज्योतिर्विषये **'अ(त)त्र'** एतस्मिन् प्रदेशे **ज्योतिष्काणां देवा**नां **तिर्यगसङ्ख्येयानि ज्योतिष्कविमानशतसहस्राणि भवन्तीत्याख्यातं** मया शेषैश्च तीर्थकृद्भिः, **तानि च विमानान्यर्द्धकपित्थसंस्थानसंस्थितानि,** अत्राक्षेपपरिहारौ **चन्द्रप्रज्ञप्तिटीकायां सूर्यप्रज्ञप्तिटीकायां सङ्ग्रहणिटीकायां** चाभिहिताविति ततोऽवधार्यौ, 'सव्वफालियामया' सर्वात्मना स्फटिकमयानि सर्वस्फटिकमयानि **'जहा ठाणपदे जाव चंदमसूरिया एत्थ दुवे जोइसिंदा जोइसरायाणो परिवसंति महिड्ढिया जाव विहरंति'** तथा **प्रज्ञापनायां** स्थानाख्ये द्वितीये पदे तथा वक्तव्यं यावच्चन्द्र-सूर्यौ, द्वावत्र ज्योतिष्केन्द्रौ ज्योतिष्कराजानौ परिवसतस्ततोऽप्यूर्ध्वं यावद्विहरन्तीति, एतच्चैवं–

"अब्भुग्गयमूसियपहसिया इव विविहमणिकणगरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागछत्तातिछत्तकलिया तुंगा गगणतलमभिलंघमाणसिहरा जालंतररयणा पंजरुम्मिल्लियव्व मणिकणगथूभियागा वियसियसयवत्तपोंडरीया तिलगरयणद्धचंदचित्ता नाणामणिमयदामालंकिया अंतो बहिं च सण्हा तवणिज्जरुइलवालुयापत्थडा सुहफासा सस्सिरीया सुरूवा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं जोइसियाणं विमाणा पण्णत्ता, एत्थ णं जोइसिया देवा परिवसंति, तंजहा-बिहस्सती चंदसूरा सुक्कसणिच्छरा राहू धूमकेउबुहा अंगारका तत्ततवणिज्जकणगवण्णा जया तहा जोइसंमि चारं चरंति केऊ य गइरतीया अट्ठावीसइविहा य नक्खत्तदेवगणा नाणासंठाणसंठिया य पंचवण्णा य तारगाओ ठियलेसाचारिणो अविस्साममंडलगई पत्तेयनामंकपायडिय-चिंधमउडा महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं साणं विमाणावाससयसहस्साणं साणं साणं सामाणियसाहस्सीणं साणं साणं अग्गमहिसीणं सपरिवाराणं साणं साणं परिसाणं साणं साणं अणियाणं साणं साणं अणियाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं, अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति, चंदिमसूरिया य एत्थ दुवे जोइसिंदा जोइसियरायाणो परिवसंति महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं साणं जोइसियविमाणावाससयसहस्साणं चउण्हं चउण्हं सामाणियसाहस्सीणं चउण्हं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति" [प्रज्ञापना सू. १९५] इति, अभ्युद्गता–आभिमुख्येन सर्वतो गता उत्सृता–प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा–दीप्तिस्तया सितानि-धवलानि अभ्युद्गतोत्सृतप्रभासितानि, तथा विविधानां मणिकनकरत्नानां या भक्तयो–विच्छित्तिविशेषास्ताभिश्चित्राणि–आश्चर्यभूतानि विविधमणिकनकभक्तिचित्राणि, 'वाउद्धुयविजयवेजयंतीपडागच्छत्तातिच्छत्तकलिया' वातोद्धूता–वायुकम्पिता विजयः–अभ्युदयस्तत्संसूचिका वैजयन्त्यभिधाना याः पताकाः, अथवा विजय इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः–पताकास्ता एव विजयवर्जिता वैजयन्त्यः छत्रातिच्छत्राणि–उपर्युपरि स्थितानि छत्राणि तैः कलितानि वातोद्धूतविजयवैजयन्तीपताकाछत्रा-तिच्छत्रकलितानि 'तुङ्गानि'

उच्चानि, तथा गगनतलम्–अम्बरतलमनुलिखन्–अभिलङ्घयन् शिखरं येषां तानि गगनतलानुलिखच्छिखराणि, तथा जालानि–जालकानि तानि च भवनभित्तिषु लोकप्रतीतानि, तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तानि जालान्तररत्नानि, तथा पञ्जराद् उन्मीलितवद् यथा हि किल किमपि वस्तु पञ्जराद्–वंशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्तमनष्टच्छायत्वात् शोभते तथा तान्यपि विमानानीति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिका–शिखरं येषां तानि मणिकनकस्तूपिकानि, ततः पूर्वपदाभ्यां सह विशेषणसमासः, तथा विकसितानि यानि शतपत्त्राणि पुण्डरीकाणि च द्वारादिषु प्रतिकृतित्वेन स्थितानि तिलकाश्च–भित्त्यादिषु पुण्ड्राणि रत्नमयाश्चार्द्धचन्द्रा द्वारादिषु तैश्चित्राणि विकसितशतपत्रपुण्डरीकतिलकरत्नार्द्धचन्द्रचित्राणि, तथा नानामणिमयीभिर्दामभिरलङ्कृतानि नानामणिमयदामालङ्कृतानि, तथाऽन्तर्बहिश्च श्लक्ष्णानि–मसृणानि, तथा तपनीयं–सुवर्णविशेषस्तन्मय्या रुचिराया वालुकायाः–सिकतायाः प्रस्तटः–प्रतरो येषु तानि तपनीयरुचिरवालुकाप्रस्तटानि, तथा सुखस्पर्शानि शुभस्पर्शानि वा शेषं प्राग्वद् यावद् 'बहस्सइचंदा' इत्यादि, बृहस्पति-चन्द्र-सूर्य-शुक्र-शनैश्चर-राहु-धूमकेतु-बुधाङ्गारकाः तप्ततपनीयकनकवर्णाः-ईषत्कनकवर्णाः, तथा ये ग्रहा ज्योतिष्के–ज्योतिश्चक्रे चारं चरन्ति केतवः ये च बाह्यद्वीपसमुद्रेष्वगतिरतिकाः ये चाष्टाविंशतिविधा नक्षत्रदेवगणास्ते सर्वेऽपि नानाविधसंस्थानसंस्थिताः चशब्दात्तप्ततपनीयकनकवर्णाश्च, तारकाः पञ्चवर्णाः, एते च सर्वेऽपि स्थितलेश्या–अवस्थिततेजोलेश्याकाः, तथा ये चारिणः–चाररतास्तेऽविश्राममण्डलगतिकाः, तथा सर्वेऽपि प्रत्येकं नामाङ्केन–स्वस्वनामाङ्कपातेन प्रकटितं चिह्नं मुकुटो येषां ते प्रत्येकं स्वनामाङ्कप्रकटितमुकुटचिह्नाः, किमुक्तं भवति? चन्द्रस्य स्वमुकुटे चन्द्रमण्डलं लाञ्छनं स्वनामाङ्कप्रकटितं सूर्यस्य सूर्यमण्डलं ग्रहस्य ग्रहमण्डलं नक्षत्रस्य नक्षत्रमण्डलं तारकस्य तारकाकारमिति, शेषं प्राग्वत्।। २५७ ।।

पर्षन्निरूपणार्थमाह–

(२५८) सूरस्स[१] णं भंते! जोतिसिंदस्स जोतिसरण्णो कति परिसाओ पण्णत्ताओ?, गोयमा! तिण्णि परिसाओ पण्णत्ताओ, तंजहा-तुंबा तुडिया पेच्चा,

१. ⊥ संस्करणे चंदस्स णं भंते ! .... जहा चमरस्स । एवं सूरस्स वि। तत्र पृ. ३०६ टि. ३ मध्ये 'ला' प्रतौ पूर्वं चन्द्रमसः पर्षन्निरूपकं सूत्रमस्ति, तदनन्तरं च सूर्यस्य... एष एव क्रमः अस्माभिरादृतः । स्थानाङ्गे ३/१५५, १५७, सूत्रयोरयमेव क्रमो दृश्यते ।।

अब्भिंतरया तुंबा मज्झिमिया तुडिया बाहिरिया पेच्चा, सेसं जहा कालस्स परिमाणं, ठितीवि। अट्ठो जहा चमरस्स। चंदस्सवि एवं चेव।। २५८।।

'सूरस्स णं भंते! जोइसिंदस्स जोइसरण्णो कइ परिसाओ पण्णत्ताओ?, गोयमा! तिन्नि परिसाओ पन्नत्ताओ, तंजहा-तुंबा तुडिया पेच्चा, अब्भिंतरिया तुंबा मज्झिमिया तुडिया बाहिरिया पेच्चा, सेसं जहा कालस्स, अट्ठो जहा चमरस्स, चन्दस्सवि एवं चेव' पाठसिद्धं ज्योतिष्कास्तिर्यग्लोक इति।।२५८।।

तिर्यग्लोकप्रस्तावाद् द्वीपसमुद्रवक्तव्यतामाह–

(२५९) कहि णं भंते! दीवसमुद्दा? केवइया णं भंते! दीवसमुद्दा? केमहालया णं भंते! दीवसमुद्दा? किंसंठिया णं भंते! दीवसमुद्दा? किमाकारभावपडोयारा णं भंते! दीवसमुद्दा पन्नत्ता?, गोयमा! जंबुद्दीवाइया दीवा लवणादीया समुद्दा संठाणतो एकविधिविधाणा वित्थारतो अणेगविधिविधाणा दुगुणादुगुणे पडुप्पाएमाणा २ पवित्थरमाणा २ ओभासमाणवीचीया बहुउप्पल-पउम-कुमुद-णलिण-सुभग-सोगंधियं-पोंडरीय-महापोंडरीय-सतपत्त-सहस्सपत्तपप्फुल्ल-केसरोवचिता पत्तेयं पत्तेयं पउमवरवेइयापरिक्खित्ता पत्तेयं पत्तेयं वणसंडपरिक्खित्ता सयंभुरमणपज्जवसाणा अस्सिं तिरितलोए असंखेज्जा दीवसमुद्दा पण्णत्ता समणाउसो!।। २५९।।

'कहि णं भंते! दीवसमुद्दा' इत्यादि, **'क्व'** कस्मिन् णमिति वाक्यालङ्कारे **'भदन्त!'** परमकल्याणयोगिन्! **द्वीपसमुद्राः प्रज्ञप्ताः?**, अनेन द्वीपसमुद्राणामवस्थानं पृष्टं, **'केवइया णं भंते! दीवसमुद्दा'** इति 'कियन्तः' कियत्सङ्ख्याका णमिति वाक्यालङ्कारे भदन्त! द्वीपसमुद्राः प्रज्ञप्ताः?, अनेन द्वीपसमुद्राणां सङ्ख्यानं पृष्टं, **'केमहालिया णं भंते! दीवसमुद्दा'** इति किं महानालय–आश्रयो व्याप्यक्षेत्ररूपो येषां ते महालयाः किंप्रमाणमहालया णमिति प्राग्वद् द्वीपसमुद्राः प्रज्ञप्ताः?, किंप्रमाणं द्वीपसमुद्राणां महत्त्वमिति भावः, एतेन द्वीपसमुद्राणामायामादिपरिमाणं पृष्टं, तथा **'किंसंठिया**

१. ० य अरविंद कोवणतसत० **जे.** ।।

णं भंते! दीवसमुद्दा' इति किं संस्थितं–संस्थानं येषां ते किंसंस्थिता णमिति पूर्ववद् भदन्त! द्वीपसमुद्राः प्रज्ञप्ताः?, अनेन संस्थानं पप्रच्छ, **'किमागारभावपडोयारा णं भंते! दीवसमुद्दा पण्णत्ता'** इति आकारभावः–स्वरूपविशेषः कस्याकारभावस्य प्रत्यवतारो येषां ते किमाकारभावप्रत्यवताराः, बहुलग्रहणाद्वैयधि-करण्येऽपि समासः, णमिति पूर्ववद्, द्वीपसमुद्राः प्रज्ञप्ताः?, किं स्वरूपं द्वीपसमुद्राणामिति भावः, अनेन स्वरूपविशेषविषयः प्रश्नः कृतः, भगवानाह–**'गोयमे'**त्यादि, **गौतम! जम्बूद्वीपादयो द्वीपा 'लवणादिकाः'** लवणसमुद्रादिकाः **समुद्राः,** अनेन द्वीपानां समुद्राणां चादिरुक्तः, एतच्चापृष्टमपि भगवता कथितमुत्तरत्रोपयोगित्वात् गुणवते शिष्यायापृष्टमपि कथनीयमिति ख्यापनार्थं च, **'संठाणतो'** इत्यादि, 'संस्थानतः' संस्थानमाश्रित्य **'एगविहिविहाणा'** इति एकविधि–एकप्रकारं विधानं येषां ते एकविधिविधानाः, एकस्वरूपा इति भावः, सर्वेषां वृत्तसंस्थानसंस्थितत्वाद्, **'विस्तारतः'** विस्तारमधिकृत्य पुन**रनेकविधविधानाः** अनेकविधानि–अनेकप्रकाराणि विधानानि येषां ते तथा, विस्तारमधिकृत्य नानास्वरूपा इत्यर्थः, तदेव नानास्वरूपत्वमुपदर्शयति–**'दुगुणादुगुणे पडुप्पाएमाणा २ पवित्थरमाणा'** इति, द्विगुणं द्विगुणं यथा भवति एवं प्रत्युत्पद्यमाना गुण्यमाना इत्यर्थः, 'प्रविस्तरन्तः' प्रकर्षेणं विस्तारं गच्छन्तः, तथाहि–जम्बूद्वीप एकं लक्षं लवणसमुद्रो द्वे लक्षे धातकीखण्डश्चत्वारि लक्षाणीत्यादि, **'ओभासमाणवीचीया'** इति अवभासमाना वीचयः–कल्लोला येषां ते अवभासमानवीचयः, इदं विशेषणं समुद्राणां प्रतीतमेव, द्वीपानामपि च वेदितव्यं, तेष्वपि ह्रदनदीतडागादिषु कल्लोलसम्भवात्, तथा बहुभिरुत्पल-पद्म-कुमुद-नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापुण्डरीक-शतपत्र-सहस्रपत्रैः 'पप्फुल्ल'त्ति प्रफुल्लैः–विकसितैः 'केसरे'ति केसरोपलक्षितैरुपचिताः–उपचितशोभाका **बहूत्पल-पद्म-कुमुद-नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापौण्डरीक-शतपत्र-सहस्रपत्र-प्रफुल्लकेसरोपचिताः,** तत्रोत्पलं–गर्दभकं पद्मं–सूर्यविकासि कुमुदं–चन्द्रविकासि नलिनम्–ईषद्रक्तं पद्मं सुभगं–पद्मविशेषः सौगन्धिकं–कल्हारं पौण्डरीकं–सिताम्बुजं तदेव बृहत् महापौण्डरीकं शतपत्र-सहस्रपत्रे-पद्मविशेषौ पत्रसङ्ख्याकृतभेदौ, **'पत्तेयं २'** इति प्रतिशब्दोऽत्राभिमुख्ये **'लक्षणेनाभिप्रती आभिमुख्ये'** इति च समासस्ततो वीप्साविवक्षायां प्रत्येकशब्दस्य द्विर्वचनं **पद्मवरवेदिकापरिक्षिप्ताः प्रत्येकं वनखण्डपरिक्षिप्ताश्च 'सयंभुरमणपज्जवसाणा'** इति जम्बूद्वीपादयो द्वीपाः स्वयम्भूरमणद्वीपपर्यवसाना लवणसमुद्रादयः समुद्राः स्वयम्भूरमणसमुद्रपर्यवसाना **अस्मिन् तिर्यग्लोके** यत्र वयं स्थिता **असङ्ख्येया द्वीपसमुद्राः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!** इह 'अस्सिं तिरियलोए' इत्यनेन स्थानमुक्तम्, 'असंखेज्जा'

इत्यनेन सङ्ख्यानं, 'दुगुणादुगुण'मित्यादिना महत्त्वं 'संठाणतो' इत्यादिना संस्थानम्।।२५९।।

सम्प्रत्याकारभावप्रत्यवतारं विवक्षुरिदमाह–

(२६०) तत्थ णं अयं जंबुद्दीवे णामं दीवे सव्वदीवसमुद्दाणं[१] सव्वब्भिंतरिए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिते वट्टे रहचक्कवालसंठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिते वट्टे पडिपुन्नचंदसंठाणसंठिते, एक्कं जोयणसयसहस्सं आयाम-विक्खंभेणं तिण्णि जोयणसयसहस्साइं सोलस य सहस्साइं दोण्णि य सत्तावीसे जोयणसते तिण्णि य कोसे अट्ठावीसं च धणुसयं तेरस अंगुलाइं अद्धंगुलकं च किंचिविसेसाहियं परिक्खेवेणं पण्णत्ते।। से णं एक्काए जगतीए सव्वतो समंता संपरिक्खित्ते।।२६०।।

'तत्थ ण'मित्यादि, **'तत्र'** तेषु द्वीपसमुद्रेषु मध्ये **'अयं'** यत्र वयं वसामो **जम्बूद्वीपो नाम द्वीपः,** कथम्भूतः? इत्याह–**सर्वद्वीपसमुद्राणां 'सर्वाभ्यन्तरकः'** सर्वात्मना–सामस्त्येनाभ्यन्तरः सर्वाभ्यन्तर एव सर्वाभ्यन्तरकः, प्राकृतलक्षणात्स्वार्थे कप्रत्ययः, केषां सर्वात्मनाऽभ्यन्तरकः?, उच्यते, सर्वद्वीपसमुद्राणां, तथाहि-सर्वेऽपि शेषा द्वीपसमुद्रा जम्बूद्वीपादारभ्यागमाभिहितेन क्रमेण द्विगुणद्विगुणविस्तारास्ततो भवति सर्वद्वीपसमुद्राणां सर्वाभ्यन्तरकः, अनेन जम्बूद्वीपस्यावस्थानमुक्तं, **'सव्वखुड्डाए'** इति सर्वेभ्योऽपि शेषद्वीपसमुद्रेभ्यः क्षुल्लको–लघुः सर्वक्षुल्लकः, तथाहि–सर्वे लवणादयः समुद्राः सर्वे च धातकीखण्डादयो द्वीपा जम्बूद्वीपादारभ्य द्विगुणद्विगुणायामविष्कम्भपरिधयस्ततः शेषद्वीपसमुद्रापेक्षयाऽयं लघुरिति, एतेन सामान्यतः परिमाणमुक्तं, विशेषतस्त्वायामादिगतं परिमाणमग्रे वक्ष्यति, तथा **वृत्तो**ऽयं जम्बूद्वीपो यत**स्तैलापूपसंस्थानसंस्थितः**, तैलेन पक्वोऽपूपस्तैलापूपः, तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतपक्व इति तैलविशेषणं, तस्येव यत्संस्थानं तेन संस्थितस्तैलापूपसंस्थानसंस्थितः, तथा **वृत्तो**ऽयं जम्बूद्वीपो यतो **'रथचक्रवालसंस्थानसंस्थितः'** रथस्य–रथाङ्गस्य चक्रस्यावयवे समुदायोपचाराच्चक्रवालं–मण्डलं तस्येव यत् संस्थानं तेन संस्थितो रथचक्रवालसंस्थानसंस्थितः, एवं **वृत्तः पुष्करकर्णिकासंस्थानसंस्थितः** पुष्करकर्णिका–पद्मबीजकोशः **वृत्तः परिपूर्णचन्द्रसंस्थानसंस्थितः** पदद्वयं भावनीयम्, एतेन जम्बूद्वीपस्य संस्थानमुक्तम्।। सम्प्रत्यायामादिपरिमाणमाह–**'एक्कं ण'**मित्यादि,

---

१. जे. - L तुला औप. सू. १७०। दीवसमुद्दाणं अब्भिंतरिए - मु. ।।

एकं योजनशतसहस्रमायाम-विष्कम्भेन, आयामश्च विष्कम्भश्च आयामविष्कम्भं, समाहारो द्वन्द्वः, तेन, आयामेन विष्कम्भेन चेत्यर्थः, **त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशम्-**अष्टाविंशत्यधिकं **धनुःशतं त्रयोदशाङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिक**मित्येतावान् **परिक्षेपेण प्रज्ञप्तः,** इदं च परिक्षेपपरिमाणं **"विक्खंभवग्गदहगुण-करणी वट्टस्स परिरओ होइ।"** [ ]इति करणवशात्स्वयमानेतव्यं **क्षेत्रसमासटीका** वा परिभावनीया, तत्र गणितभावनायाः सविस्तरं कृतत्वात्।। सम्प्रत्याकारभावप्रत्यवतारप्रतिपादनार्थमाह–**'से ण'**मित्यादि, **'सः'** अनन्तरोक्तायामविष्कम्भपरिक्षेपपरिमाणो जम्बूद्वीपो **ण**मिति वाक्यालङ्कारे **एकया जगत्या** सुनगरप्राकारकल्पया **'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **'संपरिक्षिप्तः'** सम्यग्वेष्टितः।। २६०।।

(२६१) सा णं जगती अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, मूले बारस जोयणाइं विक्खंभेणं, मज्झे अट्ठ जोयणाइं विक्खंभेणं, उप्पिं चत्तारि जोयणाइं विक्खंभेणं, मूले वित्थिण्णा मज्झे संखित्ता उप्पिं तणुया गोपुच्छसंठाणसंठिता सव्ववइरामई अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया णिम्मला णिप्पंका णिक्कंकडच्छाया सप्पभा सस्सिरीया[1] सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा।। सा णं जगती एक्केणं जालकडएणं सव्वतो समंता संपरिक्खित्ता।।२६१।।

'सा णं जगई' इत्यादि, **सा च जगती ऊर्द्ध्वम्**-उच्चैस्त्वेना**ष्टौ योजनानि मूले द्वादश योजनानि विष्कम्भेन मध्येऽष्टौ उपरि चत्वारि,** अत एव **मूले** विष्कम्भमधिकृत्य **विस्तीर्णा, मध्ये सङ्क्षिप्ता** त्रिभागोनत्वात्, **उपरि तनुका,** मूलापेक्षया त्रिभागमात्रविस्तारभावात्, एतदेवोपमया प्रकटयति– **'गोपुच्छसंठाणसंठिया'** गोपुच्छस्येव संस्थानं गोपुच्छसंस्थानं तेन संस्थिता गोपुच्छसंस्थानसंस्थिता ऊर्द्ध्वीकृतगोपुच्छाकारा इति भावः, **'सव्ववइरामई'** सर्वात्मना–सामस्त्येन वज्रमयी–वज्ररत्नात्मिका **'अच्छा'** आकाशस्फटिकवदतिस्वच्छा **'सण्हा लण्हा'** श्लक्ष्णा–श्लक्ष्णपुद्गलस्कन्धनिष्पन्ना श्लक्ष्णदलनिष्पन्नपटवत् **'लण्हा'** मसृणा घुण्टितपटवत् **'घट्ठा'** घृष्टा इव घृष्टा खरशानया पाषाणप्रतिमावत् **'मट्ठा'** मृष्टा इव मृष्टा सुकुमारशानया पाषाणप्रतिमावत् **'नीरजा'** स्वाभाविकरजोरहितत्वात् **'निर्मला'**

---

१. सस्सिरीया - **कग** । सस्सिरिया **-ट ता** ।।

आगन्तुकमलाभावात् **'निष्पङ्का'** कलङ्कविकला कर्दमरहिता वा **'निक्कंकडच्छाया'** इति निष्कङ्कटा निष्कवचा निरावरणा निरुपघातेति भावार्थः छाया–दीप्तिर्यस्याः सा निष्कङ्कटच्छाया **'सप्रभा'** स्वरूपतः प्रभावती **'समरीचा'** बहिर्विनिर्गतकिरणजाला, अत एव **'सोद्द्योता'** बहिर्व्यवस्थितवस्तुस्तोमप्रकाशकरी **'प्रासादीया'** प्रसादाय–मनःप्रसत्तये हिता तत्कारित्वात् प्रासादीया मनःप्रह्लत्तिकारिणीति भावः **'दर्शनीया'** दर्शनयोग्या यां पश्यतश्चक्षुषी श्रमं न गच्छत इति **'अभिरूवा'** इति अभि–सर्वेषां द्रष्टृणां मनःप्रसादानुकूलतयाऽभिमुखं रूपं यस्याः सा अभिरूपा, अत्यन्तकमनीयेति भावः, अत एव **'प्रतिरूपा'** प्रतिविशिष्टम्-असाधारणं रूपं यस्याः सा प्रतिरूपा, अथवा प्रतिक्षणं नवं नवमिव रूपं यस्याः सा प्रतिरूपा **'सा णं जगती'** इत्यादि, **'सा'** अनन्तरोदितस्वरूपा **ण**मिति वाक्यालङ्कारे **जगती एकेन 'जालकटकेन'** जालानि-जालकानि यानि भवनभित्तिषु लोकेऽपि प्रसिद्धानि तेषां कटकः–समूहो जालकटको जालकाकीर्णा रम्यसंस्थानप्रदेशविशेषपङ्क्तिरिति भावः, तेन जालकटकेन **'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **संपरिक्षिप्ता**।।।२६१।।

(२६२) से णं जालकडए णं अद्धजोयणं उड्ढं उच्चत्तेणं पंचधणुसयाइं विक्खंभेणं सव्वरयणामए अच्छे सण्हे लण्हे जाव[1] पडिरूवे।। २६२।।

'से णं जालकडए' इत्यादि, **'सः' जालकटक ऊर्द्ध्वमुच्चैस्त्वेनार्द्धयोजनं**–द्वे गव्यूते **विष्कम्भेन पञ्च धनुःशतानि,** किमुक्तं भवति?, जगत्या प्रायो बहुमध्यभागे सर्वत्र जालकानि तानि च प्रत्येकमूर्द्ध्वमुच्चैस्त्वेन द्वे गव्यूते विष्कम्भतः पञ्चधनुःशतानीति, स च जालकटकः **'सव्वरयणामए'** इति सर्वात्मना रत्नमयः **'अच्छे सण्हे लण्हे जाव पडिरूवे'** इति यावच्छब्दकरणात् 'घट्ठे मट्ठे नीरए निम्मले निप्पंके निक्कंकडच्छाये सप्पभे सस्रीरीए[2] सउज्जोए पासाइए दरिसणिज्जे अभिरूवे' इति परिग्रहः, एतेषां [ग्रन्थाग्रम् ५०००] च पदानामर्थः प्राग्वत् ।।२६२ ।।

(२६३) तीसे णं जगतीए उप्पिं बहुमज्झदेसभाए एत्थ णं एगा महई पउमवरवेदिया[3] पं०, सा णं पउमवरवेदिया अद्धजोयणं उड्ढं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं[3] जगतीसमिया परिक्खेवेणं सव्वरयणामई०।। २६३।।

---

१. द्र. ३/२६१ सू. ।। २. समिरीया-३।२६१।। ३. ० णं सव्वरयणामई जग० **कखगटत्रि** ।।

'तीसे णं जगतीए' इत्यादि, **'तस्याः'** यथोक्तरूपाया **जगत्याः 'उपरि'** उपरितने तले यो **बहुमध्यदेशभागः,** सूत्रे एकारान्तता मागधदेशभाषालक्षणानुरोधात् यथा– 'कयरे आगच्छइ दित्तरूवे?' इत्यत्र, **'एत्थ ण'**मिति **'अत्र'** एतस्मिन् बहुमध्यदेशभागे **णमि**ति पूर्ववत् **महती एका पद्मवरवेदिका प्रज्ञप्ता** मया शेषैश्च तीर्थकृद्भिः, **सा चोद्ध्वमुच्चैस्त्वेनार्द्धयोजनं**–द्वे गव्यूते **पञ्च धनुःशतानि विष्कम्भेन 'जगतीसमिया'** इति जगत्याः समा–समाना जगतीसमा सैव जगतीसमिका **'परिक्षेपेण'** परिरयेण यावान् जगत्या मध्यभागे परिरयस्तावान् तस्या अपि परिरय इति भावः, **'सर्वरत्नमयी'** सामस्त्येन रत्नात्मिका 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकं पाठतोऽर्थतश्च प्राग्वत्।। २६३।।

(२६४) तीसे णं पउमवरवेइयाए अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-वइरामया नेमा, रिट्ठामया पइट्ठाणा, वेरुलियामया खंभा, सुवण्णरुप्पामया फलगा, लोहितक्खमईओ सूईओ, वइरामया संधी, णाणामणिमया कलेवरा कलेवरसंघाडा, णाणामणिमया रूवा, नाणामणिमया रूवसंघाडा, अंकामया पक्खा पक्खबाहाओ जोईरसामया वंसा वंसकवेल्लुया य, रययामईओ पट्टियाओ, जातरूवमयीओ ओहाडणीओ वइरामयीओ उवरिपुञ्छणीओ सव्वसेए रययामते सा[1] णं छादणे। २६४।

'तीसे ण'मित्यादि, **तस्या ण**मिति पूर्ववत् **पद्मवरवेदिकायाः 'अयं'** वक्ष्यमाणः **'एतद्रूपः'** एवंस्वरूपः **'वर्णावासः'** वर्णः–श्लाघा यथावस्थितस्वरूपकीर्त्तनं, तस्यावासो–निवासो ग्रन्थपद्धतिरूपो वर्णावासो वर्णकनिवेश इत्यर्थः, **'प्रज्ञप्तः'** प्ररूपितः, **तद्यथे**त्यादिना तदेव दर्शयति–**'वइरामया नेमा'** इति नेमा नाम पद्मवरवेदिकाया भूमिभागादूर्द्ध्वं निष्क्रामन्तः प्रदेशास्ते सर्वे 'वज्रमयाः' वज्ररत्नमयाः, वज्रशब्दस्य दीर्घत्वं प्राकृतत्वात्, एवमन्यत्रापि द्रष्टव्यं, **रिष्ठमयानि प्रतिष्ठानानि**–मूलपादाः, **'वेरुलियामया खंभा'** इति वैडूर्यरत्नमयाः स्तम्भाः, **सुवर्णरूप्यमयानि फलकानि, लोहिताक्ष-रत्नात्मिकाः सूचयः** फलकद्वयसम्बन्धविघटनाभावहेतुपादुकास्थानीयास्ते सर्वे **'वइरामया संधी'** वज्रमयाः सन्धयः–सन्धिमेलाः फलकानां, किमुक्तं भवति? वज्ररत्नापूरिताः फलकानां सन्धयः, **'णाणामणिमया कलेवरा'** इति नानामणिमयानि कलेवराणि–मनुष्यशरीराणि नानामणिमयाः **कलेवरसङ्घाटा**–मनुष्यशरीरयुग्मानि, **नानामणिमयानि रूपाणि**–रूपकाणि, **नानामणिमया रूपसङ्घाटाः**–

१. मु.। सा णं - जे . L नास्ति ।।

रूपकयुग्मानि, **'अङ्कामया पक्खा पक्खबाहातो य'** इति अङ्को–रत्नविशेषस्तन्मयाः पक्षास्तदेकदेशाः पक्षबाहवोऽपि तदेकदेशभूता एवाङ्कमयाः, आह च **मूलटीकाकारः- "अङ्कमयाः पक्षास्तदेकदेशभूताः, एवं पक्षबाहवोऽपि द्रष्टव्या"** [ ] इति, **'जोईरसामया वंसा वंसकवेल्लुया य'** इति ज्योतीरसं नाम रत्नं तन्मया वंशाः–महान्तः पृष्ठवंशासः **'वंशकवेल्लुया य'** इति महतां पृष्ठवंशानामुभयतस्तिर्यक् स्थाप्यमाना वंशाः, कवेल्लुकानि–प्रतीतानि, **'रययामईओ पट्टियाओ'** इति रजतमय्यः पट्टिका वंशानामुपरि कम्बास्थानीयाः, **'जायरूवमईओ ओहाडणीओ'** जातरूपं–सुवर्णविशेषस्तन्मय्यः 'ओहाडणीओ' अवघाटिन्यः आच्छादनहेतुकम्बोपरिस्थाप्यमानमहाप्रमाणकिलिञ्च-स्थानीयाः, **'वइरामईओ उवरिं पुंछणीओ'** इति 'वज्रमय्यो' वज्ररत्नात्मिका अवघाटनीनामुपरि पुञ्छन्यः–निबिडतरच्छादनहेतुश्लक्ष्णतरतृणविशेषस्थानीयाः, उक्तं च **मूलटीकाकारेण-"ओहाडणी हीरग्गहणं महत् क्षुल्लकं तु पुञ्छनी"** इति, [ ] **'सव्वसेए रययामए सा णं छादणे'** इति, सर्वश्वेतं रजतमयं पुञ्छनीनामुपरि कवेल्लुकानामध आच्छादनम्।।२६४।।

(२६५) सा णं पउमवरवेइया एगमेगेणं हेमजालेणं[२], एगमेगेणं गवक्खजालेणं, एगमेगेणं खिंखिणिजालेणं, एगमेगेणं घंटाजालेणं, एगमेगेणं मुत्ताजालेणं, एगमेगेणं मणिजालेणं, एगमेगेणं कणयजालेणं, एगमेगेणं रयणजालेणं, एगमेगेणं पउमवरजालेणं, सव्वरयणामएणं सव्वतो समंता संपरिक्खित्ता। ते णं जाला तवणिज्जलंबूसगा सुवण्णपयरगमंडिया णाणामणिरयणविविहहारद्धहारउवसोभित-समुदया ईसिं अण्णमण्णमसंपत्ता पुव्वावरदाहिणउत्तरागतेहिं वाएहिं मंदागं २ एज्जमाणा २ कंपिज्जमाणा २ लंबमाणा २ पझंझमाणा २ सद्दायमाणा २ तेणं उरालेणं मणुण्णेणं मणोहरेणं कण्णमणणेव्वुतिकरेणं सद्देणं सव्वतो समंता आपूरेमाणा सिरीए अतीव उवसोभेमाणा उवसोभेमाणा चिट्ठंति ।।२६५।।

---

१. हा. टी. मध्ये अस्ति ।। २. ० जालेणं एगमेगेणं खिंखिणिजोलणं एवं घंटाजालेणं जाव मणिजालेणं एगमेगेणं पउमवरजालेणं, सव्वरयणामएणं-कखगटत्रि । ० जालेणं एगमेगेमं गवक्खजालेणं एएणं अभिलावेणं खिंखिणि जा० घंटा जा० रयत जा० जातरूव जा० मणि जा० मुत्ता जा० रयत जा० जातरूव जा० मणि जा० रतण सव्वरयण जा० एगमेगेणं पउमवरजालेणं - ता ।।

'सा ण'मित्यादि, **'सा'** एवंस्वरूपा **णमि**ति वाक्यालङ्कारे **पद्मवरवेदिका** तत्र तत्र प्रदेशे **एकैकेन 'हेमजालेन'** सर्वात्मना हेममयेन लम्बमानेन दामसमूहेन, **एकैकेन 'गवाक्षजालेन'** गवाक्षाकृतिरत्नविशेषदामसमूहेन, **एकैकेन 'किङ्किणीजालेन'** किङ्किण्यः–क्षुद्रघण्टिकाः, **एकैकेन 'घण्टाजालेन'** किङ्किण्यपेक्षया किञ्चिन्महत्यो घण्टा घण्टाः, तथा **एकैकेन 'मुक्ताजालेन'** मुक्ताफलमयेन दामसमूहेन, **एकैकेन 'मणिजालेन'** मणिमयेन दामसमूहेन, **एकैकेन 'कनकजालेन'** कनकं–पीतरूपः सुवर्णविशेषस्तन्मयेन दामसमूहेन **एकैकेन रत्नजालेन, एकैकेन [वर] पद्मजालेन**–सर्वरत्नमयपद्मात्मकेन दामसमूहेन **'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सर्वासु विदिक्षु **परिक्षिप्ता,** एतानि च दामसमूहरूपाणि हेमजालादीनि जालानि लम्बमानानि वेदितव्यानि, तथा चाह–**'ते णं जाला'** इत्यादि, **तानि,** सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, प्राकृते हि लिङ्गमनियतमिति, **णमि**ति पूर्ववत् हेमजालादीनि क्वचित् दामा इति पाठः तत्र ता हेमजालादिरूपा दामान इति व्याख्येयं, **'तवणिज्जलंबूसगा'** तपनीयम् आरक्तं सुवर्णं तन्मयो लम्बूसगो–दाम्नामग्रिमभागे मण्डनविशेषो येषां तानि तपनीयलम्बूसकानि **'सुवण्णपयरगमंडिया'** इति पार्श्वतः सामस्त्येन सुवर्णप्रतरकेण–सुवर्णपत्रकेण मण्डितानि सुवर्णप्रतरकमण्डितानि, **'नाणामणिरयणविविहहारद्धहारउवसोभियसमुदया'** इति नानारूपाणां मणीनां रत्नानां च ये विविधा–विचित्रवर्णा हारा–अष्टादशसरिका अर्द्धहारा–नवसरिकास्तैरुपशोभितः समुदायो येषां तानि, तथा **'ईसिमन्नमन्नमसंपत्ता'** इति ईषत्–मनाग् अन्योऽन्यं–परस्परमसम्प्राप्तानि–असंलग्नानि **पूर्वापरदक्षिणोत्तरागतैर्वातैः 'मंदायं मंदायं'** इति मन्दं मन्दम् **एज्यमानानि**–कम्प्यमानानि **'भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः'** [सि.ह.७।४।७३] इत्यविच्छेदे द्विर्वचनं यथा पचति पचतीत्यत्र, एवमुत्तरत्रापि, ईषत्कम्पनवशादेव च प्रकर्षत इतस्ततो मनाक् चलनेन **लम्बमानानि** प्रलम्बमानानि, ततः परस्परसंपर्कवशतः **'पझंझमाणा पझंझमाणा'** इति **शब्दायमानानि शब्दायमानानि 'उदारेण'** स्फारेण शब्देनेति योगः, स च स्फारशब्दो मनःप्रतिकूलोऽपि भवति तत आह–**'मनोज्ञेन'** मनोऽनुकूलेन, तच्च मनोऽनुकूलत्वं लेशतोऽपि[1] स्यादत आह–**'मनोहरेण'** मनांसि श्रोतॄणां हरति–आत्मवशं नयतीति मनोहरः, 'लिहादे'राकृतिगणत्वादच्प्रत्ययः, तेन, तदपि मनोहरत्वं कुतः? इत्याह–**कर्णमनोनिर्वृतिकरेण**–**'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'**[सि.ह.७।४।७३] मिति वचनाद् हेतौ तृतीया, ततोऽयमर्थः–यतः[2] श्रोतृकर्णयोर्मनसश्च निर्वृतिकरः–सुखोत्पादकस्ततो

---

१. देशतो - इति जम्बूद्वीपप्र. टीका ।। २. प्रतिश्रोतृ० जम्बूद्वीपप्र. टीका १।११ पृ.३३।।

मनोहरस्तेन, इत्थम्भूतेन **शब्देन** तान् प्रत्यासन्नान् प्रदेशान् **'सर्वतः'** दिक्षु **'समन्ततः'** विदिक्षु **आपूरयन्ति** शत्रन्तस्य शाविदं रूपं, तत एव **'श्रिया'** शोभयाऽ**तीव उपशोभमानानि उपशोभमानानि तिष्ठन्ति**।।२६५।।

(२६६) तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे हयसंघाडा गयसंघाडा नरसंघाडा किण्णरसंघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा वसहसंघाडा सव्वरयणामया अच्छा[1] जाव पडिरूवा।। २६६।।

'तीसे ण'मित्यादि, **तस्याः पद्मवरवेदिकायास्तत्र तत्र देशे २ 'तहिं तहिं'** इति तस्यैव देशस्य तत्र तत्रैकदेशे, एतावता किमुक्तं भवति? यत्र देशे एकस्तत्रान्येऽपि विद्यन्त इति, **बहवे 'हयसंघाडा'** हययुग्मानि सङ्घाटशब्दो युग्मवाची यथा- साधुसङ्घाट इत्यत्र, एवं **गज-नर-किंनर-किंपुरुष-महोरग-गन्धर्व-वृषभसङ्घाटा** अपि वाच्याः, एते च कथम्भूताः? इत्याह-**'सव्वरयणामया'** सर्वात्मना रत्नमयाः **'अच्छा'** आकाशस्फटिकवदतिस्वच्छाः **'जाव पडिरूवा'** इति यावत्करणात् **'सण्हा लण्हा घट्ठा मट्ठा'** इत्यादिविशेषणकदम्बकपरिग्रहस्तच्च प्राग्वत्।। २६६ ।।

एते च सर्वेऽपि हयसङ्घाटादयः सङ्घाटाः पुष्पावकीर्णका उक्ताः, सम्प्रत्येतेषामेव हयादीनां पङ्क्त्यादिप्रतिपादनार्थमाह-'एवं पंतीओ वीहीओ एवं मिहुणगा' इति यथाऽमीषां हयादीनामष्टानां सङ्घाटा उक्तास्तथा पङ्क्तयोऽपि वक्तव्या वीथयोऽपि मिथुनकानि च, तानि चैवम्-

(२६७) तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे हयपंतीओ तहेव जाव पडिरूवाओ। एवं हयवीहीओ जाव पडिरूवाओ। एवं हयमिहुणाइं जाव पडिरूवाइं।।२६७।।

'तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे देसे तहिं तहिं बहुयाओ हयपंतीओ गयपंतीओ' इत्यादि, नवरमेकस्यां दिशि या श्रेणिः सा पङ्क्तिरभिधीयते, उभयोरपि पार्श्वयोरेकैकश्रेणिभावेन यच्छ्रेणिद्वयं सा वीथी, एते च वीथी-पङ्क्ति-सङ्घाटा हयादीनां पुरुषाणामुक्ताः, साम्प्रतमेतेषामेव हयादीनां स्त्री-

---

१. **जे. L। मु. आदिमध्ये** अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया णिम्मला णिप्पंका णिक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरसणिज्जा अभिरूवा पडिरूवा- **इति पाठः** ।।

पुरुषयुग्मप्रतिपादनार्थं **'मिहुणाइं'** इत्युक्तम्, उक्तेनैव प्रकारेण हयादीनां मिथुनकानि स्त्री-पुरुषयुग्मरूपाणि वाच्यानि, यथा 'तत्थ तत्थ देसे तहिं २ बहूइं **हयमिहुणाइं** गयमिहुणाइं' इत्यादि।। २६७ ।।

(२६८) तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे पउमलयाओ नागलताओ, एवं असोग- चंपग- चूय-वण- वासंति- अतिमुत्तग- कुंद- सामलयाओ णिच्चं कुसुमियाओ णिच्चं माइयाओ, णिच्चं लवइ[1]याओ, णिच्चं थवइयाओ, णिच्चं गुलइयाओ णिच्चं गोच्छियाओ, णिच्चं जमलियाओ, णिच्चं जुवलियाओ, णिच्चं विणमियाओ, णिच्चं पणमियाओ, सुविहत्तपिंडि[2]मंजरि-वडिंसकधरीओ सव्वरयणामईओ अच्छाओ जाव पडिरूवाओ।।→ [3]तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे अक्खयसोत्थिया पण्णत्ता सव्वरयणामया अच्छा← ।।२६८।।

'तीसे ण'मित्यादि, **तस्यां णमि**ति पूर्ववत् **पद्मवरवेदिकायां तत्र तत्र देशे २ 'तहिं २'** इति तस्यैव देशस्य तत्र तत्रैकदेशे, अत्रापि **'तत्थ २ देसे २ तहिं २'** इति वदता यत्रैका लता तत्रान्या अपि बहव्यो लताः सन्तीति प्रतिपादितं द्रष्टव्यं, **'बहुयाओ पउमलयाओ'** इत्यादि, बहव्यः 'पद्मलताः' पद्मिन्यः **'नागलताः'** नागा–द्रुमविशेषाः त एव लतास्तिर्यक्शाखाप्रसराभावात् नागलताः, **एवमशोकलताश्चम्पकलता वण**लताः वणाः–तरुविशेषाः, **वासन्तिकलता अतिमुक्तकलताः कुन्दलताः श्यामलताः,** कथम्भूता एताः? इत्याह–**'नित्यं'** सर्वकालं षट्स्वपि ऋतुष्वित्यर्थः **'कुसुमिताः'** कुसुमानि–पुष्पाणि सञ्जातान्यास्विति कुसुमिताः, तारकादिदर्शनादितप्रत्ययः, एवं **नित्यं मुकुलिताः,** मुकुलानि नाम कुड्मलानि कलिका इत्यर्थः, **नित्यं 'लवइयाओ'** इति पल्लविताः, **नित्यं 'थवइयाओ'** इति स्तबकिताः, **नित्यं 'गुम्मियाओ'** इति गुल्मिताः, स्तबकगुल्मौ गो(गु)च्छविशेषौ, **नित्यं गुच्छिताः, नित्यं यमलिताः**–यमलं नाम समानजातीययोर्लतयोर्युग्मं तत्संजातमास्विति यमलिताः, **नित्यं 'युगलिताः'** युगलं सजातीय-विजातीययोर्लतयोर्द्वन्द्वं, तथा 'नित्यं' सर्वकालं फलभारेण नता–ईषन्नता नित्यं प्रणता–

---

१. ०इताणि - जे. । एवमग्रेऽपि ।। २. पिण्ड्यो-लम्ब्यः - इति औप. अभयदेवसूरिवृत्तौ पृ.१४ ।। ३. →← चिह्नमध्यवर्तिपाठः कखगटत्रिमु अस्ति,जे. V नास्ति।। १. गुल्मकं च लतासमूहं - इति जंबू. शा.टी.१।११ पृ.३४ ।।

महता फलभारेण दूरं नताः, तथा नित्यं 'सुविभक्ते'त्यादि सुविभक्तिकः-सुविच्छित्तिकः प्रतिविशिष्टो मञ्जरीरूपो योऽवतंसकस्तद्धराः-तद्धारिण्यः। एष सर्वोऽपि कुसुमितत्वादिको धर्म एकैकस्या एकैकस्या लताया उक्तः, साम्प्रतं कासाञ्चिल्लतानां सकलकुसुमितत्वादिधर्म्मप्रतिपादनार्थमाह-'निच्चं कुसुमियमउलियलवइयथवइयगुलइयगोच्छियविणमियपणमिय**सुविभत्तपडिमंजरिवडंसगधरीओ**' एताश्च सर्वा अपि लता एवंरूपाः, किंरूपाः? इत्याह-**'सव्वरयणामईओ'** सर्वात्मना रत्नमय्यः, **'अच्छा सण्हा'** इत्यादि विशेषणकदम्बकं प्राग्वत्।। २६८।।

अधुना पद्मवरवेदिकाशब्दप्रवृत्तिनिमित्तं जिज्ञासुः पृच्छति-

(२६९) से केणट्ठेणं भंते! एवं वुच्चइ-पउमवरवेइया पउमवरवेइया?, गोयमा! पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं वेदियासु वेतियाबाहासु [१]वेदियासीसफलएसु वेदियापुडंतरेसु खंभेसु खंभबाहासु खंभसीसेसु खंभपुडंतरेसु सूईसु सुईमुहेसु सूईफलएसु सूईपुडंतरेसु पक्खेसु पक्खबाहासु पक्खपेरंतेसु[२] बहूइं उप्पलाइं पउमाइं जाव सतसहस्सपत्ताइं सव्वरयणामयाइं अच्छाइं सण्हाइं लण्हाइं घट्ठाइं मट्ठाइं णीरयाइं णिम्मलाइं निप्पंकाइं निक्कंकडच्छायाइं सप्पभाइं समिरीयाइं सउज्जोयाइं पासादीयाइं दरिसणिज्जाइं अभिरूवाइं पडिरूवाइं महता वासिक्कच्छत्तसमाणाइं[३] पण्णत्ताइं समणाउसो!, से तेणट्ठेणं गोयमा! एवं वुच्चइ-पउमवरवेदिया २।।२६९।।

'से केणट्ठेणं भंते!' इत्यादि, **से**शब्दोऽथशब्दार्थः, अथ **'केनार्थेन'** केन कारणेन **भदन्त!** एवमुच्यते-**पद्मवरवेदिका पद्मवरवेदिके**ति?, किमुक्तं भवति? पद्मवरवेदिकेत्येवंरूपस्य शब्दस्य तत्र प्रवृत्तौ किं निमित्तमिति?, एवमुक्ते भगवानाह-**गौतम! पद्मवरवेदिकायां तत्र तत्र प्रदेशे** तस्यैव देशस्य **तत्र तत्रैकदेशे 'वेदिकासु'** उपवेशनयोग्यमत्तवारणरूपासु **'वेदिकाबाहासु'** वेदिकापार्श्वेषु **'वेइयापुडंतरेसु'** इति द्वे वेदिके वेदिकापुटं तेषामन्तराणि-अपान्तरालानि वेदिकापुटान्तराणि तेषु, तथा **स्तम्भेषु** सामान्यतः तथा **'स्तम्भबाहासु'** स्तम्भपार्श्वेषु **'खंभसीसेसु'** इति स्तम्भशीर्षेषु

१. वेदियासीसफलएसु - **कखगट त्रि.मु.अस्ति, V जे. नास्ति । तथा रायपसेणइय १९७ सूत्रे** वेइयफलएसु **इति पाठेऽस्ति । २. राजप्रश्नीयसूत्रे (१९७) इतोऽग्रे** पक्खपुडंतरेसु-**इतिपाठः।। ३. V टता । ० समयाइं - मु. क ख ग त्रि ।।**

'खंभपुंडतरेसु' इति द्वौ स्तम्भौ स्तम्भपुटं, तेषामन्तराणि तेषु, **'सूचीषु'** फलकसम्बन्धविघटनाभावहेतु-पादुकास्थानीयासु तासामुपरीति तात्पर्यार्थः, **'सूइमुहेसु'** इति यत्र प्रदेशे सूची फलकं भित्त्वा मध्ये प्रविशति तत्प्रत्यासन्नो देशः सूचीमुखं तेषु, तथा **सूचीफलकेषु**–सूचीभिः संबन्धिता ये फलकप्रदेशा-स्तेऽप्युपचारात्सूचीफलकानि तेषु सूचीनामध उपरि च वर्त्तमानेषु, तथा **'सूईपुडंतरेसु'** इति द्वे सूच्यौ सूचीपुटं तेषामन्तरेषु, **पक्षाः पक्षबाहा**-वेदिकैकदेशास्तेषु **बहूनि 'उत्पलकानि'** गर्दभकानि बहूनि **'पद्मानि'** सूर्यविकासीनि बहूनि **'कुमुदानि'** चन्द्रविकासीनि, एवं नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापुण्डरीक-**शतपत्र-सहस्रपत्राण्यपि** वाच्यानि, एतेषां च विशेषः प्रागेवोपदर्शितः, एतानि कथम्भूतानि? इत्याह–**'सर्वरत्नमयानि'** सर्वात्मना रत्नमयानि, **'अच्छा'** इत्यादि विशेषणकदम्बकं प्राग्वत् **'महया वासिक्कछत्तसमाणा'** इति 'महान्ति' महाप्रमाणानि वार्षिकाणि–वर्षाकाले यानि पानीयरक्षणार्थं कृतानि तानि वार्षिकाणि तानि च तानि छत्राणि च तत्समानानि **प्रज्ञप्तानि** हे **श्रमण**! हे **आयुष्मन्!, 'से एएणट्ठेण'**मित्यादि, तदेतेनार्थेन **गौतम! एवमुच्यते पद्मवरवेदिका पद्मवरवेदिके**ति तेषु तेषु यथोक्तरूपेषु प्रदेशेषु यथोक्तरूपाणि पद्मानि पद्मवरवेदिकाशब्दस्य प्रवृत्तिनिमित्तमितिभावः, व्युत्पत्तिश्चैवं–पद्मवरा पद्मप्रधाना वेदिका पद्मवरवेदिका पद्मवरवेदिकेति।।२६९।।

(२७०) पउमवरवेइया णं भंते! किं सासया? असासया?, गोयमा! सिय सासया, सिय असासया।।२७०।।

'पउमवरवेइया णं भंते! किं सासया? असासया?' इत्यादि, **पद्मवरवेदिका ण**मिति पूर्ववत् **किं शाश्वती उताऽशाश्वती?,** आंबन्ततया सूत्रे निर्देशः प्राकृतत्वात्, किं नित्या उतानित्येति भावः, भगवानाह–**गौतम! स्यात् शाश्वती स्यादशाश्वती**–कथञ्चिन्नित्या कथञ्चिदनित्येत्यर्थः, स्याच्छब्दो निपातः कथञ्चिदित्येतदर्थवाची।।

(२७१) से केणट्ठेणं भंते! एवं वुच्चइ-सिय सासया? सिय असासया?, गोयमा! दव्वट्ठयाए सासता वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता, से तेणट्ठेणं गोयमा! एवं वुच्चइ-सिय सासता सिय असासता।।२७१।।

---

१. आदन्त० **इति राजप्रश्नीयवृत्तौ । जीवाभिगम-पुण्यसागर वृत्तौ-**आबन्त०।।

'से केणट्ठेणं भंते!' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–**गौतम! 'द्रव्यार्थतया'** द्रव्यास्तिकनयमतेन **शाश्वती,** द्रव्यास्तिकनयो हि द्रव्यमेव तात्त्विकमभिमन्यते न पर्यायान्, द्रव्यं चान्वयि परिणामित्वाद्, अन्यथा द्रव्यत्वायोगाद्, अन्वयित्वाच्च सकलकालभावीति भवति द्रव्यार्थतया शाश्वती, **'वर्णपर्यायैः'** तदन्यसमुत्पद्यमानवर्णविशेषरूपैरेवं **गन्धपर्यायै रसपर्यायैः स्पर्शपर्यायैः,** उपलक्षणमेतत्तदन्यपुद्गल-विचटनोच्चटनैश्चाऽ**शाश्वती,** किमुक्तं भवति? पर्यायास्तिकनयमतेन[1] पर्यायप्राधान्यविवक्षायामशाश्वती, पर्यायाणां प्रतिक्षणभावितया[2] कियत्कालभावितया वा विनाशित्वात्, **'से एएणट्ठेण'**मित्यादि उपसंहारवाक्यं सुगमम्।।२७१।।

इह द्रव्यास्तिकनयवादी स्वमतप्रतिस्थापनार्थमेवमाह–नात्यन्तासत उत्पादो नापि सतो विनाशो, **"नासतो विद्यते भावो, नाभावो विद्यते सत"** [भगवद्गीता २/१६] इति वचनात्, यौ तु दृश्येते प्रतिवस्तु उत्पाद-विनाशौ तदाविर्भावतिरोभावमात्रं यथा सर्प्पस्योत्फणत्व-विफणत्वे, तस्मात्सर्वं वस्तु नित्यमिति। एवं च तन्मतचिन्तायां संशयः–किं घटादिवद् द्रव्यार्थतया शाश्वती उत सकलकालमेवंरूपा? इति, ततः संशयापनोदार्थं भगवन्तं भूयः पृच्छति–

(२७२) पउमवरवेइया णं भंते! कालओ केवच्चिरं होति?, गोयमा! ण कयावि णासि ण कयावि णत्थि ण कयावि न भविस्सति। भुविं च भवति य भविस्सति य धुवा नियया सासता अक्खया अव्वया अवट्ठिया णिच्चा पउमवरवेदिया।। २७२।।

'पउमवरवेइया ण'मित्यादि, **पद्मवरवेदिका ण**मिति पूर्ववद् **'भदन्त!'** परमकल्याणयोगिन्! **'कियच्चिरं'** कियन्तं कालं यावद् **भवति**?, एवंरूपा कियन्तं कालमवतिष्ठते? इति, भगवानाह–**गौतम! न कदाचिन्नासीत्,** सर्वदैवासीदिति भावः, अनादित्वात्, तथा **न कदाचिन्न भवति,** सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, सदैव भावात्, तथा **न कदाचिन्न भविष्यति,** किन्तु भविष्यच्चिन्तायां सर्वदैव भविष्यतीति प्रतिपत्तव्यम्, अपर्यवसितत्वात्, तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति–**'भुविं चे'**त्यादि, **अभूच्च भवति च भविष्यति चे**ति, एवं त्रिकालावस्थायित्वाद् **'ध्रुवा',** मेर्वादिवद् ध्रुवत्वादेव सदैव स्वस्वरूपे **नियता,** नियतत्वादेव च **'शाश्वती'** शश्वद्भवनस्वभावा, शाश्वतत्वादेव च सततगङ्गासिन्धुप्रवाहप्रवृत्तावपि पौण्डरीकह्रद इवानेकपुद्गल-

---

१. ०न-**नास्ति जीवा.पुण्य. वृत्तौ ।।** २. ०स्थायितया-**पुण्यवृत्तौ ।।**

विचटनेऽपि तावन्मात्रान्यपुद्गलोच्चटनसम्भवाद् **'अक्षया'** न विद्यते क्षयो–यथोक्तस्वरूपाकारपरिभ्रंशो यस्याः साऽक्षया, अक्षयत्वादेव **'अव्यया'** अव्ययशब्दवाच्या, मनागपि स्वरूपचलनस्य जातुचिदप्य-सम्भवात्, अव्ययत्वादेव स्वप्रमाणे**ऽवस्थिता** मानुषोत्तरपर्वताद् बहिः समुद्रवत्, एवं स्वस्वप्रमाणे सदाऽवस्थानेन चिन्त्यमाना **नित्या** धर्मास्तिकायादिवत्।। २७२।।

(२७३) तीसे णं जगतीए उप्पिं पउमवरवेइयाए बाहिं एत्थ णं महेगे वणसंडे पण्णत्ते–देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं जगतीसमए परिक्खेवेणं, किण्हे किण्होभासे [1]नीले नीलोभासे हरिए हरिओभासे सीए सीओभासे णिद्धे णिद्धोभासे तिव्वे तिव्वोभासे किण्हे किण्हच्छाए नीले नीलच्छाए हरिए हरियच्छाए सीए सीयच्छाए णिद्धे णिद्धच्छाए तिव्वे तिव्वच्छाए [2]घणकडियडच्छाए रम्मे महामेहनिकुरंबभूए ।। २७३ ।।

'तीसे णं जगतीए' इत्यादि, **तस्या ण**मिति पूर्ववत् **जगत्या उपरि पद्मवरवेदिकाया बहिर्वर्त्ती** प्रदेशः **'तत्र'** तस्मिन् **ण**मिति पूर्ववत्, **महानेको वनषण्डः प्रज्ञप्तः,** अनेकजातीयानामुत्तमानां महीरुहाणां समूहो वनषण्डः, आह च **मूलटीकाकारः-"एगजाईएहिं रुक्खेहिं वणं अणेगजाईएहिं उत्तमेहिं रुक्खेहिं वणसंडे"** [ ] इति, स चैकैको **देशोने द्वे योजने विष्कम्भतो जगतीसमकः 'परिक्षेपेण'** परिरयेण। कथम्भूतः? इत्याह–**'किण्हे'** इत्यादि, इह प्रायो वृक्षाणां मध्यमे वयसि वर्त्तमानानि पत्राणि नीला(कृष्णा)नि तद्योगाद् वनखण्डोऽपि **कृष्णः**, न चोपचारमात्रात्कृष्ण इति व्यपदेशः किन्तु तथाप्रतिभासनात्, तथा चाह–**'कृष्णावभासः'** यावति भागे कृष्णानि पत्राणि सन्ति तावति भागे स वनखण्डः कृष्णोऽवभासतेऽतः कृष्णोऽवभासो यस्यासौ कृष्णावभासः, तथा हरितत्वमतिक्रान्तानि कृष्णत्वमसंप्राप्तानि पत्राणि नीलानि तद्योगाद् वनखण्डोऽपि **नीलः**, न चैतदप्युपचारमात्रेणोच्यते किन्तु तथाऽवभासात्, तथा चाह-**नीलावभासः**, समासः प्राग्वत्, यौवने तान्येव पत्राणि किशलयत्वं रक्तत्वं चातिक्रान्तानि ईषद्धरितालाभानि पाण्डूनि सन्ति हरितानीत्युपदिश्यन्ते, ततस्तद्योगाद्वनखण्डोऽपि **हरितः**, न चैतदुपचारमात्रं, किन्तु तथा

---

१. **इतः २७६ सूत्रपर्यतन्तः पाठः ता प्रतौ एव विद्यते । शेषादर्शेषु इत्थं संक्षिप्तः पाठः दृश्यते -** जाव अणेगसगडरहजाणजुग्गपरिमोयणे सुरम्मे पासातीए सण्हे लण्हे घट्ठे मट्ठे नीरए निप्पंके निम्मले निक्कंकडच्छाए सप्पमे समिरीए सउज्जोए पासादीए दरिसणिज्जे अभिरूवे पडिरूवे ।।

प्रतिभासोऽप्यस्ति तथा चाह–**हरितावभासः,** तथा बाल्यादतिक्रान्तानि वृक्षाणां पत्राणि शीतानि भवन्ति ततस्तद्योगाद् वनषण्डोऽपि **शीतः,** न चासौ न गुणतः किन्तु गुणत एव, तथा चाह–**'शीतावभासः'** अधोभागवर्त्तिनां व्यन्तराणां देवानां देवीनां च तद्योगे शीतवातसंस्पर्शः, ततः स शीतो वनखण्डोऽवभासते इति, तथा एते कृष्णनीलहरितवर्णा यथा(तः) स्वस्मिन् रूपेऽत्यर्थमुत्कटाः स्निग्धा भण्यन्ते तीव्राश्च ततस्तद्योगाद्वनखण्डोऽपि **स्निग्धस्तीव्र**श्चोक्तः, न चैतदुपचारमात्रं किन्तु तथा प्रतिभासोऽपि तत उक्तं **स्निग्धावभासस्तीव्रावभास** इति, इहावभासो भ्रान्तोऽपि भवति यथा मरुमरीचिकासु जलावभासः, ततो नावभासमात्रोपदर्शनेन यथाऽवस्थितं वस्तुस्वरूपमुक्तं[1] वर्णितं भवति किन्तु तथास्वरूपप्रतिपादनेन, ततः कृष्णत्वादीनां तथास्वरूपप्रतिपादनार्थमनुवादपुरस्सरं विशेषणान्तरमाह–**'किण्हे किण्हच्छाये'** इत्यादि, **कृष्णो** वनखण्डः, कुतः? इत्याह–**कृष्णच्छायः,** **"निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन"**[ ] मितिवचनाद्धेतौ प्रथमा, ततोऽयमर्थः–यस्मात् कृष्णा छाया–आकारः सर्वाविसंवादितया तस्य तस्मात्कृष्णः, एतदुक्तं भवति–सर्वाविसंवादितया तत्र कृष्ण आकार उपलभ्यते, न च भ्रान्तावभाससंपादितसत्ताकः सर्वाविसंवादी भवति, ततस्तत्त्ववृत्त्या स कृष्णो न भ्रान्तावभासमात्रव्यवस्थापित इति, एवं **नीलो नीलच्छाय** इत्याद्यपि भावनीयं, नवरं **शीतः शीतच्छाय** इत्यत्र छायाशब्द आतपप्रतिपक्षवस्तुवाची द्रष्टव्यः, **'घणकडियडच्छाए'** इति इह शरीरस्य मध्यभागे कटिस्ततोऽन्यस्यापि मध्यभागः कटिरिव कटिरित्युच्यते, कटिस्तटमिव कटितटं, घना–अन्यान्यशाखाप्रशाखानुप्रवेशतो निबिडा कटितटे–मध्यभागे छाया यस्य स घनकटितटच्छायः, मध्यभागे निबिडतरच्छाय इत्यर्थः, क्वचित्[2] पाठः 'घनकडियकडच्छाए' इति, तत्रायमर्थः–कटः सञ्जातोऽस्येति कटितः कटान्तरेणोपरि आवृत इत्यर्थः कटितश्चासौ कटश्च कटितकटः घना–निबिडा कटितकटस्येवाधोभूमौ छाया यस्य स घनकटितकटच्छायः, अत एव **रम्यो**–रमणीयः, तथा महान्–जलभारावनतः प्रावृट्कालभावी मेघनिकुरम्बो–मेघसमूहस्तं भूतो–गुणैः प्राप्तो **महामेघनिकुरम्बभूतः** महामेघवृन्दोपम इत्यर्थः।। २७३।।

(२७४) ते ण पायवा मूलमंतो कंदमंतो खंधमंतो तयामंतो सालमंतो पवालमंतो पत्तमंतो पुप्फमंतो फलमंतो बीयमंतो अणुपुव्व-सुजाय-रुइल-वट्टभावपरिणया

---

१. ० मुपवर्णितं - जम्बू. पुण्य. वृत्तौ ।। २. जम्बूद्वीपप्रज्ञप्तेः शान्तिचन्द्रीयवृत्तौ (पत्र२८) हीरविजयवृत्तौ (पत्र १२) चापि उक्तपाठ-पाठभेदौ व्याख्यातौ दृश्येते इति V पृ. ३०९-३१० टि. ८।।

एगखंधी अणेगसाह[१]-प्पसाह-विडिमा अणेगनरवामसुप्पसारियअगेज्झ-घण-विउल-बद्धं[२] [वट्ट?] खंधा अच्छिद्दपत्ता[३] अविरलपत्ता अवाईणपत्ता अणईइपत्ता निद्धूय-जरढ-पंडुपत्ता णवहरिय-भिसंत-पत्तभारंधयार-गंभीरदरिसणिज्जा उवविणिग्गय-णव-तरुण-पत्त-पल्लव-कोमलउज्जलचलंतकिसलय-सूमालपवाल-सोहियवरंकुरग्ग-सिहरा णिच्चं कुसुमिया णिच्चं माइया णिच्चं लवइया णिच्चं थवइया णिच्चं गुलइया णिच्चं गोच्छिया णिच्चं जमलिया णिच्चं जुवलिया णिच्चं विणमिया णिच्च पणमिया णिच्चं सुविभत्त-पिंडि-मंजरि-वडेंसगधरा णिच्चं कुसुमिय-माइय-लवइय-थवइय-गुलइय-गोच्छिय-जमलिय-जुवलिय-विणमिय-पणमिय-सुविभत्त-पिंडि-मंजरि-वडेंसगधरा ।। २७४ ।।

'ते णं पायवा' इत्यादि, **'ते'** वनषण्डान्तर्गताः **पादपा 'मूलवन्तः'** मूलानि प्रभूतानि दूरावगाढानि च सन्त्येषामिति मूलवन्तः, कन्द एषामस्तीति **कन्दवन्तः,** एवं **स्कन्धवन्तस्त्वग्वन्तः शालावन्तः प्रवालवन्तः पत्रवन्तः पुष्पवन्तः फलवन्तो बीजवन्त** इत्यपि भावनीयं, तत्र मूलानि–प्रसिद्धानि यानि कन्दस्याधः प्रसरन्ति कन्दास्तेषां मूलानामुपरिवर्त्तिनस्तेऽपि प्रतीताः, स्कन्धः–स्थुडं यतो मूलशाखाः प्रभवन्ति, त्वक्–छल्ली शाला–शाखा प्रवालः–पल्लवाङ्कुरः पत्रपुष्पफलबीजानि सुप्रसिद्धानि, सर्वत्रातिशायने **क्वचिद्भूम्नि वा** मतुप्प्रत्ययः, **'अणुपुव्वसुजाइरुइलवट्टभावपरिणया'** इति आनुपूर्व्या–मूलादिपरिपाट्या सुष्ठु जाता आनुपूर्वीसुजाता रुचिलाः–स्निग्धतया देदीप्यमानच्छविमन्तः, तथा वृत्तभावेन परिणता वृत्तभावपरिणताः, किमुक्तं भवति? एवं नाम सर्वासु दिक्षु विदिक्षु च शाखाभिः प्रशाखाभिश्च प्रसृता यथा वर्त्तुलाः सञ्जाता इति। आनुपूर्वीसुजाताश्च ते रुचिराश्च ते च ते वृत्तभावपरिणताश्च आनुपूर्वीसुजातरुचिरवृत्तभावपरिणताः। तथा ते पादपाः प्रत्येकमेकस्कन्धाः, (समासान्तइन्) प्राकृते वाऽस्य स्त्रीत्वमिति **'एगखंधी'** इति पाठः, तथाऽनेकाभिः शाखाभिः प्रशाखाभिश्च मध्यभागे विटपो–

---

१. अणेगसाला अणेगसाह० **जे. ।। २. मलयगिरिवृत्तौ 'वृत्तस्कन्धाः' तथा रायपसेणइयवृत्तावपि (पृ०१३) 'वृत्तस्कन्धाः' इत्येव व्याख्यातमस्ति किन्तु औपपातिकवृत्तौ 'बद्धः स्कन्धः' इति विवृतमस्ति। 'ता' प्रतावपि बध्ध-इति पाठोस्ति। द्रष्टव्यं औपपातिकस्य पञ्चमसूत्रस्य पादटिप्पणम् इति पृ.३१० टि.४।। ३. अतः पूर्वं 'ता' प्रतौ अयं पाठोस्ति-**ते णं साला पाईणपडिणआयता उदीणदाहिणवित्थिण्णा उण्णतणतं विप्पकाइंतओलंब-पलंबलंबसाहप्पसाहविडिमा।।

विस्तारो येषां **तेऽनेकशाखाप्रशाखाविटपाः,** तथा तिर्यग्बाहुद्वयप्रसारणप्रमाणो व्यामः अनेकैर्नरव्यामैः-पुरुषव्यामैः सुप्रसारितैरग्राह्यः-अप्रमेयो घनो-निबिडो विपुलो-विस्तीर्णः वृत्तः स्कन्धो येषां ते **अनेकनरव्यामसुप्रसारिताग्राह्यघनविपुलवृत्तस्कन्धाः,** तथाऽच्छिद्राणि पत्राणि येषां ते **अच्छिद्रपत्राः,** किमुक्तं भवति?- न तेषां पत्रेषु वातदोषतः कालदोषतो वा गड्डरिकादिरीतिरुपजायते, न तेषु पत्रेषु छिद्राणि भवन्तीत्यच्छिद्रपत्राः, अथवा एवं नामान्योऽन्यं शाखाप्रशाखानुप्रवेशात्पत्राणि पत्राणामुपरि जातानि येन मनागप्यपान्तरालरूपं छिद्रं नोपलक्ष्यत इति, तथा चाह-**'अविरलपत्ता'** इति, अत्र हेतौ प्रथमा ततोऽयमर्थः-यतोऽविरलपत्रा अतोऽच्छिद्रपत्राः, अविरलपत्रा अपि कुतः? इत्याह-**'अवातीनपत्राः'** वातीनानि-वातोपहतानि वातेन पातितानीत्यर्थः न वातीनानि अवातीनानि पत्राणि येषां ते तथा, किमुक्तं भवति? न तत्र प्रबलो वातः खरपरुषो वाति येन पत्राणि त्रुटित्वा भूमौ निपतन्ति, ततोऽवातीनपत्रत्वादविरलपत्रा इति, अच्छिद्रपत्रा इत्यत्र प्रथमव्याख्यानपक्षमधिकृत्य हेतुमाह-**'अणईइपत्ता'** न विद्यते ईतिः-गड्डरिकादिरूपा येषां तान्यनीतीनि अनीतीनि पत्राणि येषां ते अनीतिपत्राः, अनीतिपत्रत्वाच्चाच्छिद्रपत्राः, **'निद्धुयजरढपंडुपत्ता'** इति निर्द्धूतानि-अपनीतानि जरठानि पाण्डूनि पत्राणि येभ्यस्ते निर्द्धूतजरठपाण्डुपत्राः, किमुक्तं भवति? यानि वृक्षस्थानि जरठानि पाण्डूनि पत्राणि तानि वातेन निर्द्धूय निर्द्धूय भूमौ पात्यन्ते भूमेरपि च प्रायो निर्द्धूय निर्द्धूयान्यत्रापसार्यन्त इति, **'नवहरियभिसंतपत्तंधयारगंभीरदरिसणिज्जा'** इति नवेन-प्रत्यग्रेण हरितेन-नीलेन भासमानेन-स्निग्धत्वचा दीप्यमानेन पत्रभारेण-दलसञ्चयेन यो जातोऽन्धकारस्तेन गम्भीरा-अलब्धमध्यभागाः सन्तो दर्शनीया नवहरितभासमानपत्रान्धकारगम्भीरदर्शनीयाः, तथा उपविनिर्गतैः-निरन्तर-विनिर्गतैर्नवतरुण[पत्र]पल्लवैः तथा कोमलैः-मनोज्ञैरुज्ज्वलैः-शुद्धैश्चलद्भिः-ईषत्कम्पमानैः किशलयैः-अवस्थाविशेषोपेतैः पल्लवविशेषैः, तथा सुकुमारैः प्रवालैः-पल्लवाङ्कुरैः शोभितानि वराङ्कुराणि-वराङ्कुरोपेतानि अग्रशिखराणि येषां ते **उपविनिर्गतनवतरुणपत्रपल्लवकोमलोज्ज्वलचलत्किशलय-सुकुमारप्रवालशोभितवराङ्कुराग्रशिखराः,** इहाङ्कुरप्रवालयोः कालकृतावस्थाविशेषाद्विशेषो भावनीयः, **'निच्चं कुसुमिया निच्चं मउलिया निच्चं लवइया निच्चं थवइया निच्चं गोच्छिया निच्चं जमलिया निच्चं जुयलिया निच्चं विणमिया निच्चं पणमिया निच्चं कुसुमियमउलियलवइयथ-वइयगुलइयगोच्छियजमलियजुगलियविणमियपणमियसुविभत्तप(पिं)डिमंजरिवडंसगधरा' इति पूर्ववत्** ।। २७४।।

(२७५) सुय-बरहिण-मयणसाल-कोइल-कोरक-भिंगारग-कोंडलग-जीवंजीवग-नंदीमुहकविल-पिंगलक्ख-कारंडक-चक्कवाय-कलहंस-सारस-अणेग-सउणगणमिहुणविरइयसद्दुण्णइयमहुरसरणाइया सुरम्मा संपिंडियदरियभमर-महुयरिपहकर-परिलिंतमत्तछप्पयकुसुमासवलोलमहुरगुमगुमंत-गुजंतदेसभगा अब्भिंतरपुप्फफला बाहिरपत्तच्छण्णा[1] पत्तेहि य पुप्फेहि य ओच्छन्न-पलिच्छन्ना निरोया अकंटया साउफला निद्धफला णाणाविहगुच्छ-गुम्म-मंडवग-सोहिया विचित्त-सुहकेउबहुला वावी-पुक्खरिणी-दीहियासु य सुनिवेसियरम्मजालघरगा।। २७५।।

तथा **शुक-बर्हिण-मदनशलाका-कोकिल-कोरक-भिङ्गारक-कोंडल-जीवंजीवक-नन्दीमुख-कपिल-पिङ्गलाक्ष-कारण्डव-चक्रवाक-कलहंस-सारसा**ख्यानामनेकेषां शकुनगणानां मिथुनैः-स्त्रीपुंसयुग्मै**र्विचरितम्**-इतस्ततो गतं यच्च **शब्दोन्नतिकम्**-उन्नतशब्दकं **मधुरस्वरं** च **नादितं**-लपितं येषु ते तथा, अत एव **सुरम्याः**-सुष्ठु रमणीयाः, अत्र **शुकाः**-कीराः **बर्हिणो**-मयूरा **मदनशलाका**-शारिका कोकिलाऽपि चक्रवाक-कलहंस-सारसाः-प्रतीताः, शेषास्तु जीवविशेषा लोकतो वेदितव्याः, तथा संपिण्डिताः- एकत्र पिण्डीभूता दृप्ता-मदोन्मत्ततया दर्प्याध्माता भ्रमरमधुकरीणां पहकराः-सङ्घाताः, '**पहकरओरोहसंघाया**'[ ] इति '**देशीनाममाला**'वचनात्, यत्र ते **संपिण्डितदृप्तमधुकरभ्रमर-मधुकरीपहकराः**, तथा परिलीयमानाः-अन्यत आगत्यागत्य श्रयन्तो मत्ताः षट्पदाः कुसुमासवलोलाः-किञ्जल्कपानलम्पटा मधुरं गुमगुमायमानाः गुञ्जन्तश्च-शब्दविशेषं च विदधाना देशभागेषु तस्मिन् तस्मिन् देशभागे येषां ते **परिलीयमानमत्तषट्पदकुसुमासवलोल-मधुरगुमगुमायमानगुञ्जन्तदेशभागाः**, गमकत्वादेवमपि समासः, ततो भूयः पूर्वपदेन सह विशेषणसमासः, तथा**ऽभ्यन्तराणि**-अभ्यन्तरवर्त्तीनि **पुष्पाणि फलानि** च पुष्प-फलानि येषां ते तथा, '**बाहिरपत्तच्छन्ना**' इति बहिः पत्रैश्छन्ना-व्याप्ता बहिःपत्रछन्नाः, तथा **पत्रैश्च पुष्पैश्च** '**अवच्छन्नपरिच्छन्ना**' अत्यन्तमाच्छादिताः, तथा '**नीरोगाः**' रोगवर्जिताः '**अकण्टकाः**' कण्टकरहिताः, नैतेषु मध्ये बब्बूलकादिवृक्षाः सन्तीति भावः, तथा स्वादूनि फलानि येषां ते **स्वादुफलाः**, तथा स्निग्धानि फलानि येषां ते **स्निग्धफलाः**, तथा प्रत्यासन्नैर्नानाविधैः-नानाप्रकारैर्गुच्छैः-वृन्ताकीप्रभृतिभिर्गुल्मैः-नवमालिकादिभिर्मण्डपैः-द्राक्षामण्डपकै-रुपशोभिता

---

१. °पत्तोच्छण्णा - **ता** ।।

नानाविधगुच्छ-गुल्म-मण्डपकशोभिताः, तथा विचित्रैः–नानाप्रकारैः शुभैः–मङ्गलभूतैः केतुभिः–ध्वजैर्बहुला–व्याप्ता **विचित्रशुभकेतुबहुलाः**, तथा **'वाविपुक्खरिणीदीहियासु य [सु] निवेसियरम्मजालघरगा'** वाप्यः–चतुरस्राकारास्ता एव वृत्ताः पुष्करिण्यः यदिवा पुष्कराणि विद्यन्ते यासु ताः पुष्करिण्यः दीर्घिका–ऋजुसारिण्यः वापी-पुष्करिणीषु दीर्घिकासु च सुष्ठु निवेशितानि रम्याणि जालगृहकाणि येषु ते वापीपुष्करिणीदीर्घिकासुनिवेशितरम्यजालगृहकानि ।। २७५ ।।

(२७६) पिंडिम-णीहारिमं सुगंधि सुह-सुरभिमणहरं च महया गंधद्धणिं मुयंता सुहसेउकेउबहुला अणेगसगड-रह-जाण-जुग्ग-सीया-संदमाणियपडिमोयणा सुरम्मा पासादीया ४।। २७६ ।।

तथा पिण्डिता सती निर्हारिमा–दूरे विनिर्गच्छन्ती **पिण्डिमनीर्हारिमा** तां **सुगन्धिं**–सद्गन्धिकां शुभसुरभिभ्यो गन्धान्तरेभ्यः सकाशान्मनोहरा **शुभसुरभिमनोहरा** तां च **'महया'** इति प्राकृतत्वाद् द्वितीयार्थे तृतीया महतीमित्यर्थः, **गन्धघ्राणिं** यावद्भिर्गन्धपुद्गलैर्गन्धविषये घ्राणिरुपजायते तावती गन्धपुद्गलसंहतिरुपचाराद् गन्धघ्राणिरित्युच्यते तां निरन्तरं **मुञ्चन्तः**, तथा **'सुहसेउकेउबहुला'** इति शुभाः–प्रधानाः सेतवो–मार्गा आलवालपाल्यो वा केतवो–ध्वजा बहुला–अनेकरूपा येषां ते तथा, **'अणेगरहजाणजुग्गसिबियसंदमाणिपडिमोयणा'** इति, तथा रथा द्विविधाः–क्रीडारथाः सङ्ग्रामरथाश्च, यानानि सामान्यतः, शेषाणि वाहनानि, युग्यानि-गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि वेदिकोपशोभितानि जम्पानानि शिबिकाः–कूटाकारेणाच्छादिता जम्पानविशेषाः स्यन्दमानिकाः–पुरुषप्रमाणा जम्पानविशेषाः, अनेकेषां रथादीनामधो विस्तीर्णत्वात् प्रतिमोचनं येषु ते तथा, **'पासाइया'** इत्यादि पदचतुष्टयं प्राग्वत् ।।२७६।।

(२७७) तस्स णं वणसंडस्स अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते, से जहा नाम ए-आलिंगपुक्खरे ति वा मुइंगपुक्खरे ति वा सरतले इ वा करतले इ वा आयंसमंडले ति वा चंदमंडले ति वा सूरमंडले ति उरब्भचम्मे ति वा उसभचम्मे ति वा वराहचम्मे ति वा सीहचम्मे ति वा वग्घचम्मे ति वा [१]विगचम्मे ति वा

---

१. मिग० **राजप्र. सू.२५** ।।

दीवितचम्मे ति वा अणेगसंकुकीलगसहस्सवितते आवड-पच्चावड-सेढी-पसेढी-सोत्थिय-सोवत्थिय-पूसमाण-वद्धमाण-मच्छंडक-मकरंडक-जार-मारफुल्लावलि-पउमपत्त-सागरतरंग-वासंतिलय-पउमलयभत्तिचित्तेहिं सच्छाएहिं समिरीएहिं सउज्जोएहिं नाणाविहपंचवण्णेहिं तणेहि य मणिहि य उवसोहिए तंजहा-किण्हेहिं जाव सुक्किल्लेहिं।।२७७।।

'तस्स णं वणसंडस्से'त्यादि, **तस्य ण**मिति पूर्ववद् **वनखण्डस्य 'अन्तः'** मध्ये बहुसमः सन् रमणीयो **बहुसमरमणीयो भूमिभागः प्रज्ञप्तः,** किंविशिष्टः? इत्याह–**'से जहा नाम ए'** इत्यादि, **'तत्'** सकललोकप्रसिद्धं **यथे**ति दृष्टान्तोपदर्शने **नामे**ति शिष्यामन्त्रणे **'ए'** इति वाक्यालङ्कारे **'आलिंगपुक्खरे इ वा'** इति आलिङ्गो–मुरजो वाद्यविशेषस्तस्य पुष्करं–चर्म्मपुटकं तत् किलात्यन्तसममिति तेनोपमा क्रियते, इतिशब्दाः सर्वेऽपि स्वस्वोपमाभूतवस्तुपरिसमाप्तिद्योतकाः वाशब्दाः समुच्चये, मृदङ्गो–लोकप्रतीतो मर्दलस्तस्य पुष्करं **मृदङ्गपुष्करं,** परिपूर्णं–पानीयेन भृतं तडागं–सरस्तस्य तलम्–उपरितनो भागः **सरस्तलं, 'करतलं'** प्रतीतं, **चन्द्रमण्डलं [सूर्यमण्डलं]**[1] च यद्यपि तत्त्ववृत्त्या उत्तानीकृतकपित्थाकारपीठप्रासादापेक्षया वृत्तालेखमिति तद्गतो दृश्यमानो भागो न समतलस्तथाऽपि प्रतिभासते समतल इति तदुपादानम्, **आदर्शमण्डलं** सुप्रसिद्धम्, **'उरब्भचम्मे इ वे'** त्यादि, अत्र सर्वत्रापि **'अणेगसंकुकीलगसहस्सवितते'** इति विशेषणयोगः, उरभ्रः–ऊरणः **वृषभ-वराह-सिंह-व्याघ्र-छगलाः** प्रतीताः **द्वीपी**–चित्रकः, एतेषां प्रत्येकं **चर्म्म अनेकैः शङ्कु**प्रमाणैः **कीलकसहस्रैः**–महद्भिः कीलकैरनाडितं प्रायो मध्ये क्षामं भवति न समतलं, तथारूपतडाकासम्भवात्[2], अतः शङ्कुग्रहणं, **विततं**–विततीकृतं ताडितमिति भावः, यथाऽत्यन्तं बहुसमं भवति तथा तस्यापि वनखण्डस्यान्तर्बहुसमो भूमिभागः, पुनः कथम्भूतः? इत्याह– **'नाणाविहपंचवन्नेहिं मणीहिं तणेहि य उवसोभिए'** इति योगः, नानाविधा–जातिभेदान्नानाप्रकारा ये पञ्चवर्णा मणयस्तृणानि च तैरुपशोभितः, कथम्भूतैर्मणिभिः? इत्याह–**'आवडे'**त्यादि, आवर्तादीनि मणीनां लक्षणानि, तत्रावर्त्तः प्रतीत एकस्यावर्त्तस्य प्रत्यभिमुख आवर्त्तः प्रत्यावर्त्तः, श्रेणिः–तथाविधबिन्दुजातादेः पङ्क्तिः तस्याश्च श्रेणेर्या विनिर्गताऽन्या

---

१. ०लं. सूर्यमण्डलं च- **इति राज प्र.वृत्तौ, जम्बूद्वीपप्र. पुण्यसागरवृत्तौ च। २. ०ताडासम्भ० राजप्र.वृत्तौ, जम्बूद्वीपप्र. पुण्यसागरवृत्तौ च ।।**

श्रेणिः सा प्रश्रेणिः, स्वस्तिकः प्रतीतः, सौवस्तिक-पुष्पमाणवौ–लक्षणविशेषौ लोकात्प्रत्येतव्यौ, वर्द्धमानकं–शरावसम्पुटं मत्स्यकाण्डक-मकराण्डके प्रतीते, 'जारमारे'ति लक्षणविशेषौ सम्यग्मणिलक्षणवेदिनो लोकाद्वेदितव्यौ, पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासन्तीलता-पद्मलताः प्रतीतास्तासां भक्त्या–विच्छित्त्या चित्रम्–आलेखो येषु ते **आवर्त्त-प्रत्यावर्त्त-श्रेणि-प्रश्रेणि-स्वस्तिक-सौवस्तिक-पुष्पमाणव-वर्धमानक-मत्स्याण्डक-मकराण्डक-जार-मार-पुष्पावलि-पद्मपत्र-सागरतरङ्ग-वासन्ती-पद्मलताभक्तिचित्रा**स्तैः, किमुक्तं भवति? आवर्त्तादिलक्षणोपेतैः, तथा **सच्छायैः** सती–शोभना प्रभा–कान्तिर्येषां ते सत्प्रभास्तैः **'समिरीएहिं'**ति समरीचिकैः–बहिर्विनिर्गतकिरणजालसहितैः **'सोद्द्योतैः'** बहिर्व्यवस्थितप्रत्यासन्नवस्तुस्तोमप्रकाशकरोद्द्योतसहितैः, एवंभूतै**र्नाना**जातीयैः **पञ्चवर्णैर्मणि-भिस्तृणैश्चोपशोभितः,** तानेव पञ्च वर्णानाह–**'तंजहा कण्हे'** इत्यादि।।२७७।।

(२७८) तत्थ[1] णं जे ते किण्हा मणी[2] य तणा य तेसि णं अयमेतारूवे वण्णावासे पण्णत्ते, से जहा नाम ए जीमूते ति वा अंजणे ति वा खंजणे ति वा कज्जले ति वा मसी इ वा मसीगुलिया इ वा गवले इ वा गवलगुलिया ति वा भमरे ति वा भमरावलिया ति वा भमरपतंगयसारे ति वा जंबुफले ति वा अद्दारिट्ठे ति वा पुरपुट्ठए ति वा गए ति वा गयकलभे ति वा कण्हसप्पे इ वा कण्हकेसरे इ वा आगासथिग्गले ति वा कण्हासोए ति वा कण्हकणवीरे इ वा कण्हबंधुजीवए ति वा, भवे एयारूवे सिया?, गोयमा! णो तिणट्ठे समट्ठे, ते[3] णं कण्हा तणा य मणी य इत्तो इट्ठयराए चेव कंततराए चेव पिययराए चेव मणुण्णतराए चेव मणामतराए चेव वण्णेणं पण्णत्ते[4]।। २७८।।

'तत्थ ण'मित्यादि, **तत्र** तेषां पञ्चवर्णानां मणीनां तृणानां च मध्ये **णमि**ति वाक्यालङ्कारे **ये ते कृष्णा मणयस्तृणानि च,** ये इत्येव सिद्धे ये ते इति वचनं भाषाक्रमार्थं, **तेषां ण**मिति पूर्ववत् **'अयम्'** अनन्तरमुद्दिश्यमानः **'एतद्रूपः'** अनन्तरमेव वक्ष्यमाणस्वरूपः **'वर्णावासः'** वर्णकनिवेशः

---

१. तुला–राजप्रश्नीयसू. २५ ।। २. L जे. । तणा य मणी य - मु. । एवमग्रेऽपि ।।३. L जे.। तेसि णं कण्हाणं तणाणं मणीय य इत्तो - कखगत्रिटमु. ।। ४. पण्णत्ता समणाउसो - जे. ।।

प्रज्ञप्तः, तद्यथा–**'से जहा नाम ए'** इत्यादि, **स यथा नाम-'जीमूत' इति** 'जीमूतः' बलाहकः, स चेह प्रावृट्प्रारम्भसमये जलभृतो वेदितव्यः, तस्यैव प्रायोऽतिकालिमसम्भवात्, **इति**शब्द उपमाभूतवस्तुनाम-परिसमाप्तिद्योतकः, **वा**शब्द उपमानान्तरापेक्षया समुच्चये, एवं सर्वत्रे-तिवाशब्दौ द्रष्टव्यौ, **'अञ्जनं'** सौवीराञ्जनं रत्नविशेषो वा **'खञ्जनं'** दीपमल्लिकामलः **'कज्जलं'** दीपशिखापतितं **'मषी'** तदेव कज्जलं ताम्रभाजनादिषु सामग्रीविशेषेण घोलितं **मषीगुलिका**–घोलितकज्जलगुटिका, क्वचित् 'मसी इति वा मसीगुलिया इति वे'ति न दृश्यते, **गवलं**–माहिषं शृङ्गं तदपि चोपरितनत्वग्भागापसारणेन द्रष्टव्यं, तत्रैव विशिष्टस्य कालिम्नः सम्भवात्, तथा तस्यैव माहिषशृङ्गस्य निबिडतरसारनिर्वर्त्तिता गुटिका **गवलगुटिका 'भ्रमरः'** प्रतीतः **'भ्रमरावली'** भ्रमरपङ्क्तिः **'भ्रमरपतङ्गसारः'** भ्रमरपक्षान्तर्गतो विशिष्टकालिमोपचितः प्रदेशः **'जम्बूफलं'** प्रतीतम् **'आर्द्रारिष्टः'** कोमलकाकः **'परपुष्टः'** कोकिलः **गजो गजकलभ**श्च प्रतीतः **'कृष्णसर्पः'** कृष्णवर्णसर्प्पजातिविशेषः **'कृष्णकेसरः'** कृष्णबकुलः **'आकाशथिग्गलं'** शरदि रजो मेघविनिर्मुक्तमाकाशखण्डं तद्धि कृष्णमतीव प्रतिभातीति तदुपादानं, **कृष्णाशोक-कृष्णकणवीर-कृष्णबन्धुजीवाः** अशोक-कणवीर-बन्धुजीववृक्षभेदाः, अशोकादयो हि पञ्चवर्णा भवन्ति ततः शेषवर्णव्युदासार्थं कृष्णग्रहणम्, एतावत्युक्ते गौतमो भगवन्तं पृच्छति–**'भवे एयारूवे'** इति, **भवे**न्मणीनां तृणानां च कृष्णो वर्णः **'एतद्रूपः'** जीमूतादिरूपः?, भगवानाह-**गौतम! 'नायमर्थः समर्थः'** नायमर्थ उपपन्नो यदुतैवंभूतः कृष्णो वर्णो मणीनां तृणानां च, किन्तु **ते कृष्णा मणयस्तृणानि च 'इतः'** जीमूतादेः **इष्टतरका एव'** कृष्णवर्णेनाभीप्सिततरका एव, तत्र किञ्चिदकान्तमपि केषाञ्चिदिष्टतरं भवति ततोऽकान्तताव्यवच्छित्त्यर्थमाह–**'कान्ततरका एव'** अतिस्निग्धमनोहारिकालि-मोपचिततया जीमूतादेः कमनीयतरका एव, अत एव **'मनोज्ञतरकाः'** मनसा ज्ञायन्ते–अनुकूलतया स्वप्रवृत्तिविषयीक्रियन्त इति मनोज्ञा–मनोऽनुकूलास्ततः प्रकर्षविवक्षायां 'तरप्'प्रत्ययः, तत्र मनोज्ञतरमपि किञ्चिन्मध्यमं भवति ततः सर्वोत्कर्षप्रतिपादनार्थमाह–**'मनआपतरका एव'** द्रष्टॄणां मनांसि आप्नुवन्ति प्राप्नुवन्ति आत्मवशतां नयन्तीति मनआपास्ततः प्रकर्षविवक्षायां तरप्प्रत्ययः, प्राकृतत्वाच्च पकारस्य मकारे मणामतरा इति भवति।। २७८।।

(२७९) तत्थ णं जे ते णीलगा मणी य तणा य तेसि णं इमेतारूवे वण्णावासे पण्णत्ते, से जहा नाम ए-भिंगे इ वा भिंगपत्ते ति वा चासे ति वा चासपिच्छे ति वा सुए ति वा सुयपिच्छे ति वा णीली ति वा णीलीभेए ति वा णीलीगुलिया ति

वा सामाए ति वा उच्चंतए ति वा वणराई इ वा हलहरवसणे इ वा मोरग्गीवा ति वा पारेवयगीवा ति वा अयसिकुसुमे ति वा बाणकुसुमे इ वा अंजणकेसिगाकुसुमे ति वा णीलुप्पले ति वा णीलासोए ति वा णीलकणवीरे ति वा णीलबंधुजीवए ति वा, भवे एयारूवे सिता?, णो इणट्ठे समट्ठे, [1]ते णं णीलगा मणी य तणा य एत्तो इट्ठतराए चेव कंततराए चेव जाव वण्णेणं पण्णत्ते।।२७९।।

तथा **'तत्थ ण'**मित्यादि, तत्र तेषां मणीनां तृणानां च मध्ये **ये ते नीला मणयस्तृणानि च तेषामयमेतद्रूपः 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः,** तद्यथा–**'से जहा नाम ए'** इत्यादि, **स यथा नाम-'भृङ्गः'** कीटविशेषः पक्ष्मलः **भृङ्गपत्रं**–तस्यैव भृङ्गाभिधानस्य कीटविशेषस्य पक्ष्म **'शुकः'** कीरः **'शुकपिच्छं'** शुकस्य पत्रं **'चाषः'** पक्षिविशेषः **'चाषपिच्छं'** चाषपक्षः **'नीली'** प्रतीता **'नीलीभेदः'** नीलीच्छेदः **'नीलीगुलिया'** नीलीगुटिका **'श्यामाकः'** धान्यविशेषः **'उच्चंतगे वा'** इति 'उच्चन्तगः' दन्तरागः **'वनराजी'** प्रतीता हलधरो-बलदेवस्तस्य वसनं **हलधरवसनं** तच्च किल नीलं भवति, सदैव तथास्वभावतया हलधरस्य नीलवस्त्रपरिधानात्, **मयूरग्रीवा-पारापतग्रीवा-ऽतसीकुसुम-बाणकुसुमानि** प्रतीतानि, अत ऊर्ध्वं क्वचित् 'इंदनीले इ वा महानीले इ वा मरगते इ वा' तत्र इन्द्रनील-महानील-मरकता रत्नविशेषाः प्रतीताः, अञ्जनकेशिका–वनस्पतिविशेषस्तस्याः कुसुम-**मञ्जनकेशिकाकुसुमं 'नीलोत्पलं'** कुवलयं **नीलाशोक-नीलकणवीर-नीलबन्धुजीवा-**अशोकादिवृक्षविशेषाः, **'भवे एयारूवे'** इत्यादि प्राग्वद् व्याख्येयम्।। २७९ ।।

(२८०) तत्थ णं जे ते लोहितगा मणी य तणा य तेसि णं अयमेयारूवे वण्णावासे पण्णत्ते, से जहा णाम ए ससकरुहिरे ति वा उरब्भरुहिरे ति वा णररुहिरे ति वा वराहरुहिरे ति वा महिसरुहिरे ति वा बालिंदगोवए ति वा बालदिवागरे ति वा संझब्भरागे ति वा गुंजद्धराए ति वा जातिहिंगुलुए ति वा सिलप्पवाले ति वा पवालंकुरे ति वा लोहितक्खमणी ति वा लक्खारसए ति वा किमिरागे इ वा रत्तकंबले इ वा चीणपिट्ठरासीइ वा जासुयणकुसुमे इ वा किंसुअकुसुमे इ वा

---

१. L। तेसि णं णीलगाणं तणाणं मणीण य एत्तो - **कखगटत्रिमु.** ।।

पालियायकुसुमे इ वा रत्तुप्पले ति वा रत्तासोगे ति वा रत्तकणवीरे ति वा रत्तबंधुजीवे इ वा, भवे एयारूवे सिया?, नो तिणट्ठे समट्ठे, ते णं लोहियगा मणी य तणा य एत्तो इट्ठतराए चेव जाव वण्णेणं पण्णत्ते।।२८०।।

तथा **'तत्थ ण'**मित्यादि, तत्र तेषां मणीनां मध्ये **ये ते लोहिता मणयस्तृणानि च तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः,** तद्यथा–**'से जहा नाम ए'** इत्यादि, **स यथा नाम शशकरुधिरम्, उरभ्र**–ऊरणस्तस्य **रुधिरं, वराहः**-शूकरस्तस्य **रुधिरं मनुष्यरुधिरं महिषरुधिरं** च प्रतीतम्, एतानि हि किल शेषरुधिरेभ्यो लोहितवर्णोत्कटानि भवन्ति तत एतेषामुपादानं, **'बालेन्द्रगोपकः'** सद्योजात इन्द्रगोपकः, स हि प्रवृद्धः सन्नीषत्पाण्डुरक्तो भवति ततो बालग्रहणम्, इन्द्रगोपकः–प्रथमप्रावृट्कालभावी कीटविशेषः **'बालदिवाकरः'** प्रथममुद्गच्छन् **सूर्यः 'सन्ध्याभ्ररागः'** वर्षासु सन्ध्यासमयभावी अभ्ररागः गुञ्जा–लोकप्रतीता तस्या अर्द्धे रागो **गुञ्जार्द्धरागः,** गुञ्जाया हि अर्द्धमतिरक्तं भवति अर्द्धमतिकृष्णं ततो गुञ्जार्द्धग्रहणं, **जपाकुसुम-किंशुककुसुम-पारिजातकुसुम-जात्यहिङ्गुलकाः**–प्रतीताः **'शिलाप्रवालं'** प्रवालनामा रत्नविशेषः **प्रवालाङ्कुरः** तस्यैव रत्नविशेषस्य प्रवालाभिधस्याङ्कुरः, स हि प्रथमोद्गतत्वेनात्यन्तरक्तो भवति ततस्तदुपादानं, **लोहिताक्षमणि**र्नाम रत्नविशेषः, **लाक्षारस-कृमिराग-रक्तकम्बल-चीनपिष्टराशि-रक्तोत्पल-रक्ताशोक-रक्तकणवीर-रक्तबन्धुजीवाः** प्रतीताः, **'भवे एयारूवे'** इत्यादि प्राग्वत्।।२८० ।।

(२८१) तत्थ णं जे ते हालिद्दगा तणा य मणी य तेसि णं अयमेयारूवे वण्णावासे पण्णत्ते, से जहा णाम ए-चंपए [इ] वा चंपगच्छल्ली इ वा चंपयभेदे इ वा हालिद्दा ति वा हालिद्दभेदे ति वा हालिद्दगुलिया ति वा हरियाले ति वा हरियालभेदे ति वा हरियालगुलिया ति वा चिउरे ति वा चिउरंगरागे ति वा वरकणए ति वा वरकणगनिघसे ति वा सुवण्णसिप्पिए[1] ति वा वरपुरिसवसणे ति वा अल्लइ[2]-कुसुमे ति वा चंपककुसुमे इ वा कुहुंडियाकुसुमे ति वा [कोरंटकदामे इ वा]

---

१. सुवण्णसिप्पी इ वा- **पन्नवणासू. १७।१२७।** सुवर्णस्य शुक्तिः इत्यर्थः, **जम्बूद्वीपप्र. पुण्यसागरवृत्तौ।२.** सल्लइ० **ग.** ।। सेल्लइ० **त्रि** ।।

तडउडाकुसुमे ति वा घोसाडियाकुसुमे ति वा सुवण्णजूहियाकुसुमे ति वा सुहरिन्नयाकुसुमे इ वा कोरिंटवरमल्लदामे ति वा बीयगकुसुमे ति वा पीयासोए ति वा पीयकणवीरे ति वा पीयबंधुजीए ति वा, भवे एयारूवे सिया?, नो इणट्ठे समट्ठे, ते णं हालिद्दा तणा य मणी य एत्तो इट्ठयरा चेव जाव वण्णेणं पण्णत्ता।।२८१।।

'तत्थ ण'मित्यादि, **तत्र** तेषां मणीनां तृणानां च मध्ये **ये हरिद्रा मणयस्तृणानि च तेषामयमेतद्रूपो 'वर्णावासः'** वर्णकविशेषः **प्रज्ञप्तः,** तद्यथा–**'से जहा नाम ए'** इत्यादि, स यथा नाम–**चम्पकः** सामान्यतः सुवर्णचम्पको वृक्षः **'चम्पकच्छल्ली'** सुवर्णचम्पकत्वक् **'चम्पकभेदः'** सुवर्णचम्पकच्छेदः **'हरिद्रा'** प्रतीता **'हरिद्राभेदः'** हरिद्राच्छेदः **'हरिद्रागुलिका'** हरिद्रासारनिर्वर्त्तिता गुलिका **'हरितालिका'** पृथ्वीविकाररूपा प्रतीता **'हरितालिकाभेदः'** हरितालिकाच्छेदः **'हरितालिकागुलिका'** हरितालिकासारनिर्वर्त्तिता गुटिका **'चिकुरः'** रागद्रव्यविशेषः **'चिकुराङ्गरागः'** चिकुरसंयोगनिर्मितो वस्त्रादौ रागः, वरकनकस्य–जात्यसुवर्णस्य यः कषपट्टके निघर्षः स **वरकनकनिघर्षः,** वरपुरुषो–वासुदेवस्तस्य वसनं **वरपुरुषवसनं,** तद्धि किल पीतमेव भवतीति तदुपादानम्, **अ(स)ल्लकीकुसुमं** लोकतोऽवसेयं **'चम्पककुसुमं'** सुवर्णचम्पककुसुमं **'कूष्माण्डीकुसुमं'** पुष्पफलीकुसुमं कोरण्टकः–पुष्पजातिविशेषस्तस्य दाम **कोरण्टकदाम** तडवडा आउली तस्याः कुसुमं **तडवडाकुसुमं घोषातकी[1]कुसुमं सुवर्णयूथिकाकुसुमं** च प्रतीतं सुहरिण्यका–वनस्पतिविशेषस्तस्याः कुसुमं **सुहरिण्यकाकुसुमं** बीयको–वृक्षः प्रतीतस्तस्य कुसुमं **बीयककुसुमं पीताशोक-पीतकणवीर-पीतबन्धुजीवाः** प्रतीताः, **'भवे एयारूवे'** इत्यादि प्राग्वत्।।२८१।।

(२८२) तत्थ णं जे ते सुक्कल्लिगा मणी य तणा य तेसि णं अयमेयारूवे वण्णावासे पण्णत्ते, से जहा नाम ए-अंके ति वा संखे ति वा चंदे ति वा [2]कुंदे ति वा कुसुमे(मुए)ति वा [3]दगरएति वा [दहिघणे इ वा खीरे इ वा खीरपूरे इ वा] हंसावली ति वा कोंचावली ति वा हारावली ति वा बलायावली ति वा चंदावली ति वा सारतियबलाहए ति वा धंतधोयरूप्पपट्टे इ वा सालिपिट्ठरासी ति वा

१. घोशात० **इति राजप्र.वृत्तौ सू. २८।।२.** कुमुदेति वा दगरएति वा **-L ।। ३.** उदक-दयरय-**राजप्र.सू. २९।** दगे इ वा दगरए इ वा-**पण्णवणासू. १७।१२८ ।।**

कुंदपुप्फरासी ति वा कुमुयरासी ति वा सुक्कछिवाडी ति वा पेहुणमिंजा ति वा बिंसे ति वा मिणालिया ति वा गयदंते ति वा लवंगदले ति वा पोंडरीयदले ति वा सिंदुवारमल्लदामे ति वा सेतासोए ति वा सेयकणवीरे ति वा सेयबंधुजीए इ वा, भवे एयारूवे सिया?, णो तिणट्ठे समट्ठे, ते णं सुक्किल्ला मणी य तणा य एत्तो इट्ठतराए चेव जाव वण्णेणं पण्णत्ते।। २८२ ।।

'तत्थ ण'मित्यादि, **तत्र** तेषां मणीनां तृणानां च मध्ये **ये ते शुक्ला मणयस्तृणानि च तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः,** तद्यथा–**'से जहा नाम ए'** इत्यादि, **स यथा नाम-'अङ्कः'** रत्नविशेषः **शङ्ख-चन्द्र-कुमुदोदकरजो-दधिघन-क्षीर-क्षीरपूर-क्रोञ्चावलि-हारावलि-हंसावलि-बलाकाऽऽवलयः** प्रतीताः **'चन्द्रावली'** तडाकादिषु जलमध्यप्रतिबिम्बितचन्द्रपङ्क्तिः **'सारइयबलाहगे इ वा'** इति शारदिकः– शरत्कालभावी बलाहको–मेघः **'धंतधोयरूप्पपट्टेइ वे'**ति, ध्मातः–अग्निसंपर्केण निर्मलीकृतो धौतो–भूतिखरण्टितहस्तसन्मार्जनेनातिनिशितीकृतो यो रूप्यपट्टो–रजतपत्रं स ध्मातधौतरूप्य-पट्टः, अन्ये तु व्याचक्षते–ध्मातेन-अग्निसंयोगेन यो धौतः-शोधितो रूप्यपट्टः स ध्मातधौतरूप्यपट्टः, **शालिपिष्टराशिः-** शालिक्षोदपुञ्जः **कुन्दपुष्पराशिः कुमुदराशि**श्च प्रतीतः, **'सुक्कछेवाडिया इ वा'** इति छेवाडी नाम-वल्लादिफलिका, सा च क्वचिद्देशविशेषे शुष्का सती शुक्ला भवति ततस्तदुपादानं, **'पेहुणमिंजिया इ वा'** इति पेहुणं–मयूरपिच्छं तन्मध्यवर्त्तिनी मिञ्जा पेहुणमिञ्जिका सा चातिशुक्लेति तदुपन्यासः, **बिसं**–पद्मिनीकन्दः **मृणालं**–पद्मतन्तुः, **गजदन्त-लवङ्गदल-पुण्डरीकदल-श्वेतकणवीर-श्वेतबन्धुजीवाः** प्रतीताः, **'भवेयारूवे'** इत्यादि प्राग्वत्।। २८२।।

तदेवमुक्तं वर्णस्वरूपं, सम्प्रति गन्धस्वरूपप्रतिपादनार्थमाह–

(२८३) तेसि णं भंते! मणीण य तणाण य केरिसए गंधे पण्णत्ते?, से जहा णाम ए-कोट्ठपुडाण वा पत्तपुडाण वा चोयपुडाण वा तगरपुडाण वा एलापुडाण वा [किरिमेरिपुडाण वा] चंपगपुडाण वा कुंकुमपुडाण वा चंदणपुडाण वा उसीरपुडाण वा मरुयगपुडाण वा दमणगपुडाण वा जातिपुडाण[२] वा जूहियापुडाण

१. भिसे - **V. राजप्र.२९ सू.** ।। २. जातिपुडाण वा जूहियापुडाण वा मल्लियापुडाण वा मलियापु दमणा पु मरुतापुडाण वा - **ता**।।

वा मल्लियापुडाण वा णोमालियापुडाण वा वासंतियपुडाण वा केयतिपुडाण वा कप्पूरपुडाण वा पाडलिपुडाण वा अणुवायंसि उब्भिज्जमाणाण वा णिब्भिज्जमाणाण वा कोट्टेज्जमाणाण वा रुचिज्जमाणाण वा उक्किरिज्जमाणाण वा विकिरिज्जमाणाण वा परिभुज्जमाणाण वा भंडाओ वा भंडं साहरिज्जमाणाणं ओराला मणुण्णा मणहरा घाणमणणिव्वुतिकरा सव्वतो समंता गंधा अभिणिस्सवंति, भवे एयारूवे सिया?, णो तिणट्ठे समट्ठे, तेसि णं तणाणं मणीण य एत्तो उ इट्ठतराए चेव जाव मणामतराए चेव गंधे पण्णत्ते।। २८३ ।।

'तेसि णं मणीणं तणाण य' इत्यादि, **तेषां मणीनां तृणानां च कीदृशो गन्धः प्रज्ञप्तः?, भगवानाह-'से जहा नाम ए'** इत्यादि, प्राकृतत्वात् 'से' इति बहुवचनार्थः, ते यथा नाम गन्धा अभिनिःश्रवन्तीति सम्बन्धः, कोष्ठं–गन्धद्रव्यं तस्य पुटाः **कोष्ठपुटा**स्तेषां, वाशब्दाः सर्वत्रापि समुच्चये, इहैकस्य पुटस्य न तादृशो गन्ध आयाति द्रव्यस्याल्पत्वात् ततो बहुवचनं, **तगर**मपि गन्धद्रव्यम्, **'एलाः'** प्रतीताः, **'चोयगं'** गन्धद्रव्यं **चम्पक-दमनक-कुङ्कुम-चन्दनोशीर-मरुबक-जाती-यूथिका-मल्लिका-स्नानमल्लिका-केतकी-पाटला-नवमालिका-वास-कर्पूराणि** प्रतीतानि, नवरमुशीरं–वीरणीमूलं स्नानमल्लिका–स्नानयोग्यो मल्लिकाविशेषः एतेषा**मनुवाते**–आघ्रायकविवक्षितपुरुषाणामनुकूले[1] वाते वाति सति **'उद्भिद्यमानानाम्'** उद्घाट्यमानानां, **च**[2]शब्दः सर्वत्रापि समुच्चये, **'निर्भिद्यमानानां'** नितराम्–अतिशयेन भिद्यमानानां **'कोट्टिज्जमाणाण वा'** इति, इह पुटैः परिमितानि यानि कोष्ठादिगन्धद्रव्याणि तान्यपि परिमेये परिमाणोपचारात्कोष्ठपुटानीत्युच्यन्ते तेषां 'कुट्ट्यमानानाम्' उदूखले कुट्ट्यमानानां **'रुचिज्जमाणाण वा'**[3] इति श्लक्ष्णखण्डीक्रियमाणानाम्, एतच्च विशेषणद्वयं कोष्ठादिद्रव्याणामवसेयं, तेषामेव प्रायः कुट्टनश्लक्ष्णखण्डीकरणसम्भवात्, न तु यूथिकादीनाम्, **'उक्किरिज्जमाणाण वा'** इति क्षुरिकादिभिः कोष्ठादिपुटानां कोष्ठादिद्रव्याणां वा उत्कीर्यमाणानां **'विकिरिज्जमाणाण वा'** इति 'विकीर्यमाणानाम्' इतस्ततो विप्रकीर्यमाणानां **'परिभुज्जमाणाण वा'** परिभोगायोपभुज्यमानानां, क्वचित्पाठः 'परिभाएज्जमाणाण वा' इति, तत्र 'परिभाज्यमानानां' पार्श्ववर्त्तिभ्यो मनाग् २ दीयमानानां **'भंडाओ भंडं साहरिज्जमाणाण वा'** इति 'भाण्डात्' स्थानादेकस्माद्

१. ०कूलं-**राजप्रश्नीय सू. ३० वृत्तौ ।।** २. वाशब्दः - **राजप्र. ३० वृत्तौ ।।** ३. भंजिज्ज० **राजप्र.।।**

अन्यद् भाण्डं–भाजनान्तरं संहियमाणानाम् **'उदाराः'** स्फाराः, ते चामनोज्ञा अपि स्युरत आह– **'मनोज्ञाः'** मनोऽनुकूलाः, तच्च मनोज्ञत्वं कुतः? इत्याह–**'मनोहराः'** मनो हरन्ति–आत्मवशं नयन्तीति मनोहराः, यतस्ततो मनोहरत्वं कुतः? इत्याह–**घ्राणमनोनिर्वृतिकराः,** एवंभूताः **'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **गन्धाः 'अभिनिःस्रवन्ति'** जिघ्रतामभिमुखं निस्सरन्ति, एवमुक्ते शिष्यः पृच्छति–**'भवे एयारूवे'** इत्यादि प्राग्वत्।। २८३ ।।

(२८४) तेसि णं भंते! तणाण य मणीण य केरिसए फासे पण्णत्ते?, से जहा णाम ए-आईणे ति वा रूए ति वा बूरे ति वा णवणीते ति वा हंसगब्भतूली ति वा सिरीसकुसुमणिचते ति वा बालकुमुदपत्तरासी ति वा, भवे एतारूवे सिया?, णो तिणट्ठे समट्ठे, ते णं तणा य मणी य एत्तो इट्ठतराए चेव जाव फासेणं पण्णत्ते।।२८४।।

तेषां मणीनां तृणानां च कीदृशः स्पर्शः प्रज्ञप्तः?, भगवानाह–गौतम! **'से जहा नाम ए'** इत्यादि, तद्यथा–**'आजिनकं'** चर्म्ममयं वस्त्रं **रूतं** च प्रतीतं **'बूरः'** वनस्पतिविशेषः **'नवनीतं'** म्रक्षणं **हंसगर्भतूली शिरीषकुसुमनिचय**श्च प्रतीतः **'बालकुमुदपत्तरासी इ वे'**ति बालानि–अचिरकालजातानि यानि कुमुदपत्राणि तेषां राशिर्बालकुमुदपत्रराशिः, क्वचित् बालकुसुमपत्ररराशिरिति पाठः, **'भवे एयारूवे'** इत्यादि प्राग्वत्।।२८४।।

(२८५-A) तेसि णं भंते! [१]तणाण य मणीण य पुव्वावरदाहिणउत्तरागतेहिं वाएहिं मंदायं मंदायं एइयाणं वेइयाणं कंपियाणं खोभियाणं चालियाणं फंदियाणं घट्टियाणं उदीरियाणं केरिसए सद्दे पण्णत्ते?, से जहा णाम ए-सिवियाए वा संदमाणीयाए वा रहवरस्स वा सच्छत्तस्स सज्झयस्स सघंटयस्स [२]सपडागस्स सतोरण-वरस्स सणंदिघोसस्स सखिंखिणिहेमजालपेरंतपरिखित्तस्स हेमवयचित्त [विचित्त] तिणिसकणगनिज्जुत्तदारुयागस्स सुपिणिद्धारकमंडलधुरागस्स कालायससुकयणे-

---

१. जे. । नणाण पुव्वा० कखगटत्रिमु. । मणीण य तणाण य पुव्वा० L।। २. जे. L। सपडगस्स कखगटत्रि नास्ति ।।

मिजंतकम्मस्स[१] आइण्णवरतुरगसुसंपउत्तस्स कुसलणरछेयसारहिसुसंपरिगहितस्स सरसतबत्तीसतोणमंडितस्स[२] सकंकडवडिंसगस्स सचावसरपहरणावरणहरिय-जोहजुद्धसज्जस्स रायंगणंसि वा अंतेपुरंसि वा रम्मंसि वा मणिकोट्टिमतलंसि अभिक्खणं २ अभिघट्टिज्जमाणस्स वा →णियट्टिज्जमाणस्स[३] वा परूढवरतुरंगस्स चंडवेगाइट्ठस्स← ओराला मणुण्णा कण्णमणणिव्वुतिकरा सव्वतो समंता सद्दा अभिणिस्सवंति, भवे एतारूवे सिया?, णो तिणट्ठे समट्ठे ।। २८५-A ।।

'तेसि णं भंते!' इत्यादि, **तेषां भदन्त! तृणानां पूर्वापरदक्षिणोत्तरागतैर्वातैः 'मन्दायं मन्दाय'**मिति मन्दं मन्दम् **'एजितानां'** कम्पितानां **'व्येजितानां'** विशेषतः कम्पितानाम्, एतदेव पर्यायशब्देन व्याचष्टे–**कम्पितानां** तथा **'चालितानाम्'** इतस्ततो विक्षिप्तानाम्, एतदेव पर्यायेण व्याचष्टे-**स्पन्दितानां** तथा **'संघट्टितानां'** परस्परं घर्षयुक्तानां, कथं घट्टिताः? इत्याह–**'क्षोभितानां'** स्वस्थानाच्चालितानां, स्वस्थानाच्चालनमपि कुतः? इत्याह-**'उदीरितानाम्'** उत्प्राबल्येनेरितानां–प्रेरितानां, **कीदृशः शब्दः प्रज्ञप्तः?,** भगवानाह–'गोयमे'त्यादि, गौतम! **स यथा नामकः-शिबिकाया वा स्यन्दमानिकाया वा रथस्य वा,** तत्र शिबिका–जम्पानविशेषरूपा उपरिच्छादिता कोष्ठाकारा, तथा दीर्घो जम्पानविशेषः पुरुषस्य स्वप्रमाणावकाशदायी स्यन्दमानिका, अनयोश्च शब्दः पुरुषोत्पाटितयोः क्षुद्रहेमघण्टिकादिचलनवशतो वेदितव्यः, रथश्चेह सङ्ग्रामरथः प्रत्येयः, न क्रीडारथः, तस्याग्रेतनविशेषणानामसम्भवात्, तस्य च फलकवेदिका यस्मिन् काले (यः) पुरुषस्तदपेक्षया कटिप्रमाणाऽवसेया, तस्य च रथस्य विशेषणान्यभिधत्ते–**'सच्छत्तस्से'**त्यादि, सच्छत्रस्य **सध्वजस्य 'सघण्टाकस्य'** उभयपार्श्वावलम्बिमहाप्रमाणघण्टोपेतस्य **'सपताकस्य'** सह तोरणवरं–प्रधानं तोरणं यस्य स **सतोरणवरस्तस्य** सह नन्दिघोषो–द्वादशतूर्यनिनादो यस्य स **सनन्दिघोषस्तस्य,** तथा सह किङ्किणीभिः–क्षुद्रघण्टाभिर्वर्त्तन्त इति सकिङ्किणीकानि यानि हेमजालानि–हेममयदामसमूहास्तैः सर्वासु दिक्षु पर्यन्तेषु–बहिःप्रदेशेषु परिक्षिप्तो–व्याप्तः **सकिङ्किणीकहेमजालपर्यन्तपरिक्षिप्तस्तस्य,** तथा हैमवतं–हिमवत्पर्वतभावि 'चित्रविचित्रं'[४]–मनोहारिचित्रोपेतं तैनिशं–तिनिशदारुसम्बन्धि कनकनियुक्तं–

---

१. **०स्स** सुसंविद्धचक्कमंडलधुरातस्स आइण्ण० **जे.।।** २. ० तोरण० **कत्रिता।।** ३. **कखगटत्रि →← चिह्नद्वयमध्यवर्तिपाठः जे. नास्ति ।** ४. चित्रं विचित्रमनो० **राज प्र. वृत्तौ ।।**

कनकविच्छुरितं दारु-काष्ठं यस्य स **हैमवतचित्रविचित्रतैनिशकनकनियुक्तदारुस्तस्य,** सूत्रे च द्वितीयककारः स्वार्थिकः पूर्वस्य च दीर्घं प्राकृतत्वात्, तथा सुष्ठु-अतिशयेन सम्यक् पिनद्धमरकमण्डलं धूश्च यस्य स **सुपिनद्धारकमण्डलधूष्कस्तस्य,** तथा कालायसेन-लोहेन सुष्ठु-अतिशयेन कृतं नेमेः-बाह्यपरिधेर्यन्त्रस्य च-अरकोपरि फलकचक्रवालस्य कर्म्म यस्मिन् स **कालायससुकृतनेमियन्त्रकर्म्मा तस्य,** तथा आकीर्णा-गुणैर्व्याप्ता ये वराः-प्रधानास्तुरगास्ते सुष्ठु-अतिशयेन सम्यक् प्रयुक्ता-योत्रिता यस्मिन् स **आकीर्णवरतुरगसुसंप्रयुक्तः,** प्राकृतत्वाद् बहुव्रीहावपि निष्ठान्तस्य परनिपातः, तथा सारथ्यकर्म्मणि ये **कुशला नरा**स्तेषां मध्येऽतिशयेन **छेको**-दक्षः **सारथि**स्तेन सुष्ठु **सम्यक्परिगृहीतस्य,** तथा **'सरसयबत्तीसतोणमंडियस्य'** इति शराणां शतं प्रत्येकं येषु तानि शरशतानि तानि च तानि द्वात्रिंशत्तोणानि च-बाणाश्रयाः शरशतद्वात्रिंशत्तोणानि तैर्मण्डितः शरशतद्वात्रिंशत्तोणमण्डितः, किमुक्तं भवति? एवं नाम तानि द्वात्रिंशच्छरशतधृतानि तूणानि रथस्य सर्वतः पर्यन्तेष्ववलम्बितानि यथा तानि तस्य सङ्ग्रामायोपकल्पितस्यातीव मण्डनाय भवन्तीति, तथा कङ्कटं-कवचं सह कङ्कटं यस्य स सकङ्कटः सकङ्कटोऽवतंसः-शेखरो यस्य स **सकङ्कटावतंसस्तस्य,** तथा सह चापं येषां ते **सचापा** ये **शरा** यानि च कुन्त-भल्लि-मुषण्ढिप्रभृतीनि नानाप्रकाराणि **[प्रहरणानि]** यानि च कवच-खेटकप्रमुखाणि **आवरणानि** तै**र्भृतः**-परिपूर्णः, तथा योधानां युद्धं तन्निमित्तं सज्जः प्रगुणीभूतो यः स **योधयुद्धसज्जः,** ततः पूर्वपदेन सह विशेषणसमासः, तस्येत्थंभूतस्य **राजाङ्गणे अन्तःपुरे वा रम्ये वा मणिकुट्टिमतले**-मणिबद्धभूमितले **अभीक्ष्णमभीक्ष्णं** मणिको (कु)ट्टिमतलप्रदेशे राजाङ्गणप्रदेशे वा **'अभिघट्टिज्जमाणस्से**'ति अभिघट्ट्यमानस्य वेगेन गच्छतो ये **उदारामनोज्ञाः कर्णमनोनिर्वृतिकराः सर्वतः समन्तात् शब्दा अभिनिस्सरन्ति, 'भवे एयारूवे सिया'** इति 'स्यात्' कथञ्चिद् भवेद् एतद्रूपस्तेषां [३]मणीनां तृणानां च शब्दः?, भगवानाह-**नायमर्थः समर्थः।। २८५-A।।**

पुनरपि गौतमः प्राह-

(२८५-B) से जहा णाम ए-वेयालियाए वीणाए उत्तरमंदामुच्छिताए अंके सुपइट्ठियाए कुसलणरणारिसंपग्गहिताए [४]चंदणसारकोणपरिघट्टियाए पच्चूस-कालसमयंसि मंदं मंदं एइयाए [चालियाए फंदियाए] वेइयाए घट्टिताए खोभियाए

१. ०विचित्र० **राजप्र. वृत्तौ नास्ति** ।। २. सुसंपि० **राजप्र. वृत्तौ पृ.१७३।। ३. सूत्रप्रारम्भे केवलं तृणानामुल्लेखः, अत्र तु मणीनामपि उल्लेखोऽस्ति** ।। ४. चंदणसारनिम्मियकोण० **V।।**

उदीरियाए ओराला मणुण्णा कण्णमणणिव्वुतिकरा सव्वतो समंता सद्दा अभिणिस्सवंति, भवे एयारूवे सिया?, णो तिणट्ठे समट्ठे ।। २८५-B ।।

स यथा नामकः-प्रातः सन्ध्यायां देवतायाः पुरतो या वादनायोपस्थाप्यते सा किल मङ्गलपाठिका तालाभावे च वाद्यते इति विताले–तालाभावे भवतीति वैतालिकी तस्या **वैतालिक्या वीणाया 'उत्तरमन्दामुच्छियाए'** इति मूर्च्छनं मूर्च्छा सा सञ्जाताऽस्या इति मूर्च्छिता उत्तरमन्दया–उत्तरमन्दाभिधानया मूर्च्छनया–गान्धारस्वरान्तर्गतया सप्तम्या मूर्च्छिता उत्तरमन्दामूर्च्छिता, किमुक्तं भवति? गान्धारस्वरस्य सप्त मूर्च्छना भवन्ति, तद्यथा–

"नंदी य खुट्टिमा पूरिमा य चोत्थी अ सुद्धगंधारा ।
उत्तरगन्धारावि य हवई सा पंचमी मुच्छा ।।१।। [ ]
सुहुमुत्तरआयामा छट्ठी सा नियमसो उ बोद्धव्वा।
उत्तरमंदा य तहा हवई सा सत्तमी मुच्छा ।।२।।" [ ]

अथ किंस्वरूपा मूर्च्छनाः?, उच्यते, गान्धारादिस्वररूपामोचनेन गायतोऽतिमधुरा अन्यान्यस्वरविशेषा यान् कुर्वन्नास्तां श्रोतॄन् मूर्च्छितान् करोति किन्तु स्वयमपि मूर्च्छित इव तान् करोति, यदि वा स्वयमपि साक्षान्मूर्च्छां करोति, तथा चोक्तम्–

"अन्नन्नसरविसेसे उप्पायंतस्स मुच्छणा भणिया।
कत्तावि मुच्छितो इव कुणए मुच्छं व सोवेति ।।१।।" [ ]

गान्धारस्वरान्तर्गतानां च मूर्च्छनानां मध्ये सप्तमी उत्तरमन्दाभिधाना मूर्च्छना किलातिप्रकर्षप्राप्ता ततस्तदुत्पादनया च मुख्यवृत्त्या वादयिता मूर्च्छितो भवति, परमभेदोपचारात् वीणाऽपि मूर्च्छितेत्युक्ता, साऽपि यद्यङ्के सुप्रतिष्ठिता न भवति ततो न मूर्च्छनाप्रकर्षं विदधाति तत आह–**अङ्के**–स्त्रियाः पुरुषस्य वा उत्सङ्गे **सुप्रतिष्ठितायाः**, तथा **कुशलेन**–वादननिपुणेन **नरेण** पुरुषेण **नार्या** वा **सुष्ठु**-अतिशयेन **सम्यग् गृहीतायाः**, तथा चन्दनस्य सारः **चन्दनसार**स्तेन निर्मापितो यः **कोणः**-वादनदण्डस्तेन **परिघट्टितायाः**–संस्पृष्टायाः **'पच्चूसकालसमयंसि'** इति 'प्रत्यूषकालसमये' प्रभातवेलायां, क्वचित् 'पुव्वरत्तावरत्तकालसमयंसि' इति पाठस्तत्र प्रदोषसमये प्रातःसमये चेत्यर्थः **'मन्दं मन्दं'** शनैः शनैः

१. राजप्रश्नीयसूत्रे १७३ अपि अयं पाठः दृश्यते ।।

'एजिताया' चन्दनसारकोणेन मनाक् कम्पितायाः **'व्येजिताया:'** विशेषतः कम्पितायाः, एतदेव पर्यायेण व्याचष्टे–**चालिताया**स्तथा **घट्टिताया:**, ऊर्ध्वाधोगच्छता चन्दनसारकोणेन गाढतरं वीणादण्डेन सह तन्त्र्याः स्पृष्टाया इत्यर्थः, तथा **'स्पन्दिताया:'** नखाग्रेण स्वरविशेषोत्पादनार्थमीषच्चालितायाः **'क्षोभिताया:'** मूर्च्छां प्रापिताया ये **उदारा मनोज्ञाः कर्णमनोनिर्वृतिकराः सर्वतः समन्ताच्छब्दा अभिनिस्सरन्ति, 'स्यात्'** कथञ्चिद् **भवेदेतद्रूप**स्तेषां तृणानां मणीनां च शब्दः?, भगवानाह–**नायमर्थः समर्थः।। २८५-B।।**

पुनरपि गौतमः प्राह–

(२८५-C) से जहा णाम ए-किण्णराण वा किंपुरिसाण वा महोरगाण वा गंधव्वाण वा भद्दसालवणगयाण वा नंदणवणगयाण वा सोमणसवणगयाण वा पंडगवणगयाण वा महाहिमवंत-मलय-मंदरगिरि-गुहसमण्णागयाण वा एगतो सहिताणं संमुहागयाणं समुविट्ठाणं संनिविट्ठाणं पमुदियपक्कीलियाणं गीयरतिगंधव्वहरिसियमणाणं गज्जं पज्जं कत्थं गेयं पयबद्धं पायबद्धं उक्खित्तायं पवत्तायं[1] मंदायं रोचियावसाणं सत्तसरसमण्णागयं अट्ठरससुसंपउत्तं छद्दोसविप्पमुक्कं एकारसगुणालंकारं[2] अट्ठगुणोववेयं गुंजंतवंककुहरोवगूढं ।। २८५-C ।।

स यथा नामकः-किंनराणां वा किंपुरुषाणां वा महोरगाणां वा गन्धर्वाणां वा, वाशब्दाः सर्वेऽपि विकल्पार्थाः, **किन्नरादयो** व्यन्तरविशेषाः, तेषां कथम्भूतानाम्? इत्याह–**'भद्रशालवनगतानां वा'** इत्यादि, तत्र मेरोः समन्ततो भूमौ भद्रशालवनं प्रथममेखलायां नन्दनवनं द्वीतियमेखलायां सौमनसवनं शिरसि चूलिकायाः पार्श्वेषु सर्वतः पण्डकवनं **'महाहिमवंतमलयमन्दरगिरिगुहासमन्नागयाणं'** इति महाहिमवान्–हैमवतक्षेत्रस्योत्तरतः सीमाकारी वर्षधरपर्वतः, उपलक्षणं शेषवर्षधरपर्वतानां, मलयपर्वतस्य मन्दरगिरेश्च–मेरुपर्वतस्य च गुहा समन्वागतानां, **वा**शब्दा विकल्पार्थाः, एतेषु हि स्थानेषु प्रायः किन्नरादयः प्रमुदिता भवन्ति तत एतेषामुपादानम्, **'एगतो सहियाणं'**ति एकस्मिन् स्थाने सहितानां–समुदितानां **'संमुहागयाणं'**ति परस्परं संमुखागतानां–संमुखं स्थितानां, नैकोऽपि कस्यापि पृष्ठं दत्त्वा स्थित इत्यर्थः,

१. पायत्तायं-**राजप्र.सू.१७३** ।। २. **कखगटत्रिमु. जे. । एक्कारसालंकारं - L ।।**

पृष्ठदाने हर्षविघातोत्पत्तेः, तथा **'समुपविट्ठाणं'** सम्यक् परस्परानाबाधया उपविष्टाः समुपविष्टास्तेषां समुपविष्टानां, तथा **'संनिविट्ठाण'**मिति सम्यक् स्वशरीरानाबाधया न तु विषमसंस्थानेन निविष्टाः संनिविष्टास्तेषां, **'पमुइयपक्कीलियाणं'**ति प्रमुदिताः–प्रहर्षं गताः प्रक्रीडिताः–क्रीडितुमारब्धवन्तस्ततो विशेषणसमासस्तेषां, तथा गीते रतिर्येषां ते **गीतरतयो** गन्धर्वं–नाट्यादि तत्र हर्षितमनसो **गन्धर्वहर्षितमनस**स्ततः पूर्वपदेन विशेषणसमास**स्तेषां** गद्यादिभेदादष्टविधं **गेयं,** तत्र **गद्यं** यत्र स्वरसञ्चारेण गद्यं गीयते, यत्र तु **पद्यं**–वृत्तादिमद् गीयते तत्पद्यं, यत्र कथिकादि गीयते तत्**कथ्यं, पदबद्धं** यदेकाक्षरादि यथा ते ते इत्यादि, **पादबद्धं** यद् वृत्तादिचतुर्भागमात्रे पदे बद्धम्, **'उक्खित्ताय'**मिति उत्क्षिप्तकं प्रथमतः समारभ्यमाणं, दीर्घत्वं ककारात्पूर्वं प्राकृतत्वात्, एवमुत्तरत्रापि द्रष्टव्यं, **'प्रवृत्तकं'** प्रथमसमारम्भादूर्ध्वमाक्षेपपूर्वकप्रवर्त्तमानं **'मंदाय'**मिति मन्दकं मध्यभागे सकलमूर्च्छनादिगुणोपेतं मन्दं मन्दं सञ्चरत्, तथा **'रोइयावसाणं'**ति रोचितं–सम्यग्भावितमवसानं यस्य तद् रोचितावसानं, शनैः शनैः प्रक्षिप्यमाणस्वरं यस्य गेयस्यावसानं तद् रोचितावसानमिति भावः, तथा **'सप्तस्वरसमन्वागतं'** सप्त स्वराः षड्जादयः, उक्तञ्च–

"सज्जे रिसह गंधारे, मज्झिमे पंचमे सरे।
धेवए चेव नेसाए, सरा सत्त वियाहिया।।१।।" [स्थानाङ्ग-४५, अनुयोग-२५.]

ते च सप्त स्वराः पुरुषस्य स्त्रिया वा नाभीतः समुद्भवन्ति **"सत्त सरा नाभितो" [ ]** इति पूर्वमहर्षि-वचनात्, तथाऽष्टभी रसैः–शृङ्गारादिभिः सम्यक् प्रकर्षेण युक्त**मष्टरससंप्रयुक्तं,** तथा **एकादश अलङ्काराः** पूर्वान्तर्गते **"स्वरप्राभृते"** सम्यगभिहिताः, तानि च पूर्वाणि सम्प्रति व्यवच्छिन्नानि ततः पूर्वेभ्यो लेशतो विनिर्गतानि यानि भरतविशाखिलप्रभृतीनि तेभ्यो वेदितव्याः, **'छद्दोसविप्पमुक्कं'**ति षड्भिर्दोषैर्विप्रमुक्तं षड्दोषविप्रमुक्तं, ते च षड् दोषा अमी–**'भीयं दुयमुप्पिच्छं उत्तालं कागस्सरमणुणासं च'** [ ] ।

उक्तञ्च–

"भीयं दुयमुप्पिच्छमुत्तालं च कमसो मुणेयव्वं।
काकस्सरमणुनासं छद्दोसा होंति गेयस्स।।१।।" [अनुयोग-४७.]

तत्र 'भीतम्' उत्त्रस्तं, किमुक्तं भवति? यदुत्त्रस्तेन मनसा गीयते तद् भीतपुरुषनिबन्धनधर्म्मानुवृत्त-त्वाद् भीतमुच्यते, 'द्रुतं' यत्त्वरितं गीयते, 'उप्पिच्छं' नाम आकुलम्, उक्तञ्च–**'आहित्थं उप्पिच्छं च आउलं रोसभरियं च' [ ]** अस्यायमर्थः–आहित्थमुप्पिच्छं च प्रत्येकमाकुलं रोषभृतं वोच्यत इति,

आकुलता च श्वासेन द्रष्टव्या तथा पूर्वसूरिभिर्व्याख्यानात्, उक्तञ्च– **मूलटीकायाम्–"उप्पिच्छं श्वासयुक्त'**मिति, तथा उत्–प्राबल्येनातितालमस्थानतालं वा उत्तालं, श्लक्ष्णस्वरेण काकस्वरं, सानुनासिकमनुनासं, नासिकाविनिर्गतस्वरानुगतमिति भावः, तथा **'अट्ठगुणोववेय'**मिति अष्टभिर्गुणैरुपेतमष्टगुणोपेतं, ते चाष्टावमी गुणाः–पूर्णं रक्तमलङ्कृतं व्यक्तमविपु(घु)ष्टं मधुरं समं सललितं च, तथा चोक्तम्–

'पुण्णं रत्तं च अलंकियं च वत्तं तहेव अविपु(घु)ट्ठं।
महुरं समं सललियं अट्ठ गुणा होंति गेयस्स।।१।।' [अनुयोग-४८.]

तत्र यत्स्वरकलाभिः पूर्णं गीयते तत्पूर्णं, गेयरागानुरक्तेन यद् गीयते तद्रक्तम्, अन्योऽन्यस्वर-विशेषकरणेन यदलङ्कृतमेव गीयते तदलङ्कृतम्, अक्षरस्वरस्फुटकरणतो व्यक्तं, विस्वरं क्रोशतीव विपु(घु)ष्टं न विघुष्टमविपु(घु)ष्टं, मधुरस्वरेण गीयमानं मधुरं कोकिलारुतवत्, तालवंशस्वरादिसमनुगतं समं, तथा यत्स्वरघोलनाप्रकारेण ललतीव तत् सह ललितेनेति सललितं, यदि वा यच्छ्रोत्रेन्द्रियस्य शब्दस्पर्शनमतीव सूक्ष्ममुत्पादयति सुकुमारमिव च प्रतिभासते तत् सललितम् ।। २८५-C।।

इदानीमेतेषामेवाष्टानां गुणानां मध्ये कियतो गुणान् अन्यच्च प्रतिपिपादयिषुराह–

(२८५-D) रत्तं तिट्ठाणकरणसुद्धं सकुहरगुंजंतवंसतंतीतल-ताल-लय-गह सुसंपउत्तं मधुरं समं सुललियं मणोहरं मउयरिभियपयसंचारं सुरतिं सुणतिं वरचारुरूवं दिव्वं नट्ट सज्जं गेयं पगीयाणं, भवे एयारूवे सिया?, हंता गोयमा! एवंभूए सिया।।२८५-D।।

'रत्तं तिट्ठाणकरणसुद्ध'मित्यादि, 'रक्तं' पूर्वोक्तस्वरूपं तथा च 'त्रिस्थानकरणशुद्धं' त्रीणि स्थानानि–उरःप्रभृतीनि तेषु करणेन–क्रियया शुद्धं त्रिस्थानकरणशुद्धं, तद्यथा–उरःशुद्धं कण्ठशुद्धं शिरोविशुद्धं च, तत्र यदि उरसि स्वरः स्वभूमिकानुसारेण विशालो भवति तत उरोविशुद्धं, स एव यदि कण्ठे वर्त्तितो भवति अस्फुटितश्च ततः कण्ठविशुद्धं, यदि पुनः शिरःप्राप्तः सन् सानुनासिको भवति ततः शिरोविशुद्धं, यदि वा यद् उरः-कण्ठ-शिरोभिः श्लेष्मणाऽव्याकुलितैर्विशुद्धैर्गीयते तद् उरः-कण्ठ-शिरोविशुद्धत्वात्त्रिस्थानकरणविशुद्धं, तथा सकुहरो गुञ्जन् यो वंशो यत्र तन्त्री-तल-ताल-लय-ग्रहसुसंप्रयुक्तं भवति सुहकरे वंशे गुञ्जति तन्त्र्यां च वाद्यमानायां यत्तन्त्रीस्वरेणाविरुद्धं तत् **सकुहरगुञ्जद्वंश-**

---

१. यच्च-**राजप्र.वृत्तौ** ।

तन्त्रीसुसंप्रयुक्तं, तथा परस्पराहतहस्ततालस्वरानुवर्त्ति यद् गीतं **तत्तलसुसंप्रयुक्तं,** यत् मुरजकंसिकादीनामातोद्यानामाहतानां यो ध्वनिर्यश्च नृत्यन्त्या नर्त्तक्याः पादोत्क्षेपस्तेन समं **तत्तालसुसंप्रयुक्तं,** तथा शृङ्गमयो दारुमयो वंशमयो वाऽङ्गुलिकोशस्तेनाहतायास्तन्त्र्याः स्वरप्रकारो लयस्तमनुसरद् गेयं **'लयसुसंप्रयुक्तं'**, तथा यः प्रथमं वंशतन्त्र्यादिभिः स्वरो गृहीतस्तन्मार्गानुसारि **ग्रहसुसंप्रयुक्तं,** तथा **'महुर'**मिति मधुरं प्राग्वत्, तथा **'सम'**मिति तालवंशस्वरादिसमनुगतं समं **'सुललितं'** प्राग्वद् अत एव **मनोहरं,** पुनः कथम्भूतम्? इत्याह–**'मउयरिभियपयसंचारं'** तत्र मृदु–मृदुना स्वरेण युक्तं न निष्ठुरेण तथा यत्र स्वरोऽक्षरेषु–घोलनास्वरविशेषेषु सञ्चरन् रागेऽतीव प्रतिभासते स पदसञ्चारो रिभितमुच्यते मृदुरिभितपदेषु गेयनिबद्धेषु सञ्चारो यत्र गेये तत् मृदुरिभितपदसञ्चारं, तथा **'सुरइं'** इति शोभना रतिर्यस्मिन् श्रोतॄणां तत्सुरति, तथा शोभना नतिः रचनातोऽवसाने यस्मिन् तत्**सुनति,** तथा वरं–प्रधानं चारु–विशिष्टचङ्गिमोपेतं रूपं–स्वरूपं यस्य तद् **वरचारुरूपं 'दिव्यं'** प्रधानं **नृत्यं सद्यं गेयं प्रगीतानां-** गानानुसारध्वनिव(म)तां व्सवमुक्ते भगवानाह–**गौतम! स्यादेवंभूतः** शब्द इति।।२८५।।

(२८६) तस्स णं वणसंडस्स तत्थ तत्थ देसे २ तहिं तहिं बहवीओ खुड्डा-खुड्डियाओ वावीओ पुक्खरिणीओ गुंजालियाओ दीहियाओ (सरसीओ) सरपंतियाओ सरसरपंतीयाओ बिलपंतीयाओ अच्छाओ सण्हाओ रयतामयकूलाओ समतीराओ वइरामयपासाणाओ तवणिज्जमयतलाओ वेरुलियमणिफालियपडलपच्चोयडाओ णवणीयतलाओ सुवण्णसुज्झरययमणिवालुयाओ सुहोयारासुउत्तारओ णाणामणितित्थसुबद्धाओ चाउक्कोणाओ आणुपुव्वसुजायवप्पगंभीरसीयलजलाओ संछण्णपत्तभिसमुणालाओ बहुउप्पल-कुमुय-णलिण-सुभग-सोगंधित-पोंडरीय-सयपत्त-सहस्सपत्त-फुल्लकेसरोवचियाओ छप्पयपरिभुज्जमाणकमलाओ अच्छ-विमलसलिलपुण्णाओ परिहत्थभमंतमच्छकच्छभअणेगसउणमिहुणपरिचरिता-सद्दुण्णइयमहुरसरणाइयाओ पत्तेयं पत्तेयं पउमवरवेदियापरिक्खित्ताओ पत्तेयं पत्तेयं

---

१. ०त्ताल० **मु।** ०तल० **राजप्रश्नीयवृत्तौ जम्बूद्वीपपुण्यसागरवृत्तौ च।** २. ०त्तल० **राजप्रश्नीयवृत्तौ जम्बूद्वीपपुण्यसागरवृत्तौ च।** ३. मृदुः रिभितः- **राजप्रश्नीयवृत्तौ ।** ४. गातुमारब्धवतां-**राजप्रश्नीयवृत्तौ जम्बूद्वीप प्र. १।१३ वृत्तौ पृ.५५ च ।** ५. **कखगटत्रिमु.जे. ।** ०मणि० **V नास्ति ।।** ६. **जे.L ।** सद्दुण्णइयमहुरसरणाइयाओ-**मु. नास्ति द्र. ३/११८,८५४ ।।**

वणसंडपरिक्खित्ताओ अप्पेगतियाओ आसवोदाओ अप्पेगतियाओ वारुणोदाओ अप्पेगतियाओ खीरोदगाओ अप्पेगतियाओ घओदगाओ अप्पेगतियाओ खोदोदगाओ अप्पे० अमयरससमरसोदगाओ अप्पेगतियाओ पगतीए उदग(अमय)रसेणं पण्णत्ताओ पासाइयाओ ४।। २८६।।

'तस्स णं वणसंडस्से'त्यादि, **तस्य ण**मिति वाक्यालङ्कारे **वनखण्डस्य** मध्ये **तत्र तत्र देशे** तस्यैव देशस्य **तत्र तत्रै**कदेशे **'बहूईओ'** इति बहव्यः **'खुड्डाखुड्डियाओ'** इति क्षुल्लिकाः क्षुल्लिका लघवो लघव इत्यर्थः, **'वाप्यः'** चतुरस्राकाराः **'पुष्करिण्यः'** वृत्ताकाराः अथवा पुष्कराणि विद्यन्ते यासु ताः पुष्करिण्यः **'दीर्घिकाः'** सारिण्यस्ता एव वक्रा **गुञ्जालिकाः,** बहूनि केवलकेवलानि पुष्पावकीर्णकानि **'सरांसि'**, सूत्रे स्त्रीत्वं प्राकृतत्वात्, बहूनि सरांसि एकपङ्क्त्या व्यवस्थितानि सरःपङ्क्तस्ता बहव्यः **सरःपङ्क्तयः,** तथा येषु सरस्सु पङ्क्त्या व्यवस्थितेषु कूपोदकं प्रणालिकया सञ्चरति सा सरःसरःपङ्क्तस्ता बहव्यः **सरःसरःपङ्क्तयः,** तथा बिलानीव बिलानि–कूपास्तेषां पङ्क्तयो **बिलपङ्क्तयः,** एताश्च सर्वा अपि कथम्भूताः? इत्याह–**'अच्छा'** स्फटिकवद् बहिर्निर्म्मलप्रदेशाः **'श्लक्ष्णाः'** श्लक्ष्णपुद्गलनिष्पादितबहिःप्रदेशाः, तथा रजतमयं–रूप्यमयं कूलं यासां ता **रजतमयकूलाः,** तथा समम्-अगर्त्तासद्भावतोऽविषमं तीरं तीरावर्त्तिजलापूरितं स्थानं यासां ताः **'समतीराः'**, तथा वज्रमयाः पाषाणा यासां ता **वज्रमयपाषाणाः,** तथा तपनीयं–हेमविशेषस्तपनीयं–तपनीयमयं तलं–भूमितलं यासां तास्**तपनीयतलाः**, तथा **'सुवण्णसुज्झरययवालुयाओ'** इति सुवर्णं–पीतकान्तिहेम सुज्झं–रूप्यविशेषः रजतं प्रतीतं तन्मय्यो वालुका यासु ताः सुवर्णसुज्झरजतवालुकाः, **'वेरुलियमणिफालिहपडलपच्चोयडाओ य'**त्ति वैडूर्यमणिमयानि स्फाटिकपटलमयानि प्रत्यवतटानि तटसमीपवर्त्तिनोऽत्युन्नतप्रदेशा यासां ता वैडूर्यमणिस्फटिकपटलप्रत्यवतटाः **'सुहोयारासुउत्तारा'** इति सुखेनावतारो–जलमध्ये प्रवेशनं यासु ताः स्ववतारः तथा सु–सुखेन उत्तारो–जलमध्याद् बहिर्विनिर्गमनं यासु ताः सुखोत्तारः, ततः पूर्वपदेन विशेषणसमासः, **'नाणामणितित्थसुबद्धाओ'** इति नानामणिभिः–नानाप्रकारैर्मणिभिस्तीर्थानि सुबद्धानि यासां ता नानामणितीर्थसुबद्धाः, अत्र बहुव्रीहावपि क्तान्तस्य परनिपातो भार्यादिदर्शनात्प्राकृतशैलीवशाद्वा, **'चउक्कोणाओ'** इति चत्वारः कोणा यस्यां सा(ताः) चतुष्कोणाः

---

१. ऋज्व्योः नद्याः **-राजप्रश्नीयवृत्तौ** । दीर्घिका-नदी ऋज्वी **इति हारि. वृत्तौ। २.** सुखादि० **राजप्रश्नीयवृत्तौ** । **३.** ताः **- राजप्रश्नीयवृत्तौ** ।

एतच्च विशेषणं वापीः कूपांश्च प्रति द्रष्टव्यं, तेषामेव चतुष्कोणत्वसम्भवात् न शेषाणां, तथा आनुपूर्व्वेण–क्रमेण नीचैर्नीचैस्तरभावरूपेण सुष्ठु–अतिशयेन यो जातो वप्रः–केदारो जलस्थानं तत्र गम्भीरम्–अलब्धस्थाघं शीतलं जलं यासु ता **आनुपूर्व्यसुजातवप्रगम्भीरशीतलजलाः 'संछण्णपत्त-भिस-मुणालाओ'** सञ्छन्नानि–जलेनान्तरितानि पत्र-बिस-मृणालानि यासु ताः सञ्छन्नपत्र-बिस-मृणालाः, इह बिसमृणालसाहचर्यात्पत्राणि–पद्मिनीपत्राणि द्रष्टव्यानि, बिसानि–कन्दा मृणालानि–पद्मनालाः, तथा **बहुभिरुत्पल-कुमुद-नलिन-सुभग-सौगन्धिक-पुण्डरीक-शतपत्र-सहस्रपत्रकेसरफुल्लोपचिताः,** तथा षट्पदैः–भ्रमरैः परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादीनि च यासु ताः **षट्पदपरिभुज्यमानकमलाः,** तथाऽच्छेन–स्वरूपतः स्फटिकवच्छुद्धेन विमलेन–आगन्तुकमलरहितेन सलिलेन पूर्णा **अच्छविमलसलिलपूर्णाः,** तथा 'पडिहत्था' अतिरेकिताः अतिप्रभूता इत्यर्थः **"पडिहत्थमुद्धुमायं अहिरेइयं च जाण आउण्णं"[ ]** इति वचनात्,

उदाहरणं चात्र–

"घणपडिहत्थं गयणं सराइं नवसलिलसुट्ठु(उद्धु)मायाइं।
अहिरेइयं महं उण चिंताएँ मणं तुहं विरहे।।१।।" इति । [ ]

भ्रमन्तो मत्स्यकच्छपा यत्र ताः **पडिहत्थभ्रमन्मत्स्यकच्छपाः,** तथाऽनेकैः–शकुनमिथुनकैः प्रविचरिता–इतस्ततो गमनेन सर्वतो व्याप्ता **अनेकशकुनमिथुनकप्रविचरिताः,** ततः पूर्वपदेन विशेषणसमासः, एता वाप्यादयः सरस्सरःपङ्क्तिपर्यवसानाः **प्रत्येकं प्रत्येक**मिति, एकमेकं प्रति प्रत्येकम्, अत्राभिमुख्ये प्रतिशब्दो न वीप्साविवक्षायां, पश्चात्प्रत्येकशब्दस्य द्विर्वचनमिति, **पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं वनखण्डपरिक्षिप्ता**श्च, **'अप्पेगतियाओ'** इत्यादि, अपिर्बाढार्थे बाढमेककाः–काश्चन वाप्यादय आसवमिव–चन्द्रहासादिपरमासवमिव उदकं यासां ता **आसवोदकाः, अप्येकका** वारुणस्य वारुणसमुद्रस्येव उदकं यासां ता **वारुणोदकाः, अप्येककाः** क्षीरमिवोदकं यासां ताः **क्षीरोदकाः, अप्येकका** घृतमिवोदकं यासां ता **घृतोदकाः, अप्येककाः** क्षोद इव–इक्षुरस इव उदकं यासां ताः **क्षौदोदकाः, अप्येकका** अमृतरससमरसमुदकं यासां ता **अमृतरससमरसोदकाः, अप्येकका अमृतरसेन** स्वाभाविकेन **प्रज्ञप्ताः, 'पासाईया[ओ]'** इत्यादि विशेषणचतुष्टयं प्राग्वत्।।२८६।।

(२८७) तासि णं खुड्डियाणं वावीणं जाव बिलपंतियाणं पत्तेयं २ चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता। तेसि णं तिसोवाणपडिरूवाणं अयमेयारूवे

वण्णावासे पण्णत्ते, तंजहा-वइरामया नेमा रिट्ठामया पतिट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पामया फलगा वइरामया संधी लोहितक्खमईओ सूईओ णाणामणिमया अवलंबणा अवलंबणबाहाओ पासादियाओ ४ ।।२८७ ।।

तासां क्षुल्लिकानां वापीनां यावद् बिलपङ्क्तीनां प्रत्येकं २ चतुर्दिशि चत्वारि, एकैकस्यां दिशि एकैकभावात्, **'त्रिसोपानप्रतिरूपकाणि'** प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपकाणि त्रयाणां सोपानानां समाहारस्त्रिसोपानं त्रिसोपानानि च तानि प्रतिरूपकाणि चेति विशेषणसमासः, विशेषणस्य परनिपातः प्राकृतत्वात्, तानि **प्रज्ञप्तानि, तेषां च त्रिसोपानप्रतिरूपकाणाम् 'अयं'** वक्ष्यमाणः **'एतद्रूपः'** अनन्तरं वक्ष्यमाणस्वरूपः **'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा—'वज्रमयाः'** वज्ररत्नमया **'नेमाः'** भूमेरूर्ध्वं निष्क्रामन्तः प्रदेशाः **'रिष्ठमयाः'** रिष्ठरत्नमयाः **'प्रतिष्ठानाः'** त्रिसोपानमूलपादा **वैडूर्यमयाः स्तम्भाः सुवर्णरूप्यमयानि फलकानि**—त्रिसोपानाङ्गभूतानि **वज्रमयानि** वज्ररत्नापूरिताः **सन्धयः**—फलकद्वयापान्तरालप्रदेशाः **लोहिताक्षमय्यः सूच्यः**-फलकद्वयसम्बन्धविघटनाभावहेतुपादुकास्थानीयाः **नानामणिमया** अवलम्ब्यन्ते इति **अवलम्बना**—अवतरतामुत्तरतां चालम्बने हेतुभूता अवलम्बनबाहातो विनिर्गताः केचिदवयवाः **'अवलंबणबाहाओ'** इति अवलम्बनबाहा अपि नानामणिमयाः, अवलम्बनबाहा नाम उभयोः उभयोः पार्श्वयोरवलम्बनाश्रयभूता भित्तयः, **'पासाईयाओ'** इत्यादि पदचतुष्टयं प्राग्वत्।। २८७ ।।

(२८८) तेसि णं तिसोवाणपडिरूवगाणं पुरतो पत्तेयं २ तोरणा पं०। ते णं तोरणा नाणामणिमया णाणामणिमयखंभेसु उवणिविट्ठसण्णिविट्ठा विविहमुत्तं-तरोवचियाविविहतारारूवोवचिता ईहामिय-उसभ-तुरग-णर-मगर-विहग-वालग-किण्णर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ता खंभुग्गयवइर-वेदियापरिगताभिरामा विज्जाहरजमलजुयलजंतजुत्ताविव अच्चिसहस्समालणीया रुवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा पासातिया ४।।२८८।।

---

१. ०तरोरूवोवचिया-**राजप्र.सू.२०।।** २. **इतोऽग्रे राजप्र.सू.२० मध्ये** घंटावलिचलियमहुरमणहरा-**इति अधिकः पाठः ।।**

'तेसि ण'मित्यादि, **तेषां त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकं तोरणानि प्रज्ञप्तानि,** तेषां च तोरणानामयमेतद्रूपो 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा–**'ते णं तोरणा नाणामणिमया'** इत्यादि, तानि तोरणानि नानामणिमयानि, मणयः–चन्द्रकान्तादयः, विविधमणिमयानि, **नानामणिमयेषु स्तम्भेषु 'उप[नि]विष्टानि'** सामीप्येन स्थितानि, तानि च कदाचिच्चलानि अथवाऽपदपतितानि वाऽऽशङ्क्येरन् तत आह–सम्यग्–निश्चलतयाऽपदपरिहारेण च निविष्टानि ततो विशेषणसमासः **उंप[नि]विष्टसन्निविष्टानि 'विविहमुत्तंतरोचिया'** इति विविधा–विविधविच्छित्तिकलिता मुक्ता–मुक्ताफलानि 'अंतरे'ति अन्तराशब्दोऽगृहीतवीप्सोऽपि सामर्थ्याद्वीप्सां गमयति, अन्तरा२ 'ओचिया' आरोपिता यत्र तानि तथा, **'विविहतारारूवोवचिया'** इति विविधैस्तारारूपैः–तारिकारूपैरुपचितानि, तोरणेषु हि शोभार्थं तारका निबध्यन्ते इति लोकेऽपि प्रतीतम् इति विविधतारारूपोपचितानि, **'ईहामिग-उसभ-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलय-भत्तिचित्ता'** इति ईहामृगा–वृकाः व्यालाः–श्वापदभुजगाः, ईहामृग-ऋषभ-तुरग-नर-मकर-विहग-व्याल-किन्नर-रुरु-सरभ-कुञ्जर-वनलता-पद्मलतानां भक्त्या–विच्छित्त्या विचित्रम्–आलेखो येषु तानि तथा, स्तम्भोद्गताभिः–स्तम्भोपरिवर्त्तिनीभिर्वज्ररत्नमयीभिर्वेदिकाभिः परिगतानि सन्ति यानि अभिरमणीयानि तानि **स्तम्भोद्गतवज्रवेदिकापरिगताभिरामाणि,** तथा **'विज्जाहर[जमलजुमल]जंतजुत्ताविव अच्चीसहस्समालिणीया'** इति विद्याधरयोर्यद् यमलं–समश्रेणीकं युगलं–द्वन्द्वं विद्याधरयमलयुगलं तेषां यन्त्राणि–प्रपञ्चास्तैर्युक्तानीव, अर्चिषां सहस्रैर्मालनीयानि–परिवारणीयानि अर्चिःसहस्रमालनीयानि, किमुक्तं भवति?– एवं नाम प्रभासमुदायोपेतानि येनैवं संभावनोपजायते यथा नूनमेतानि न स्वाभाविकप्रभासमुदयोपेतानि किन्तु विशिष्टविद्याशक्तिमत्पुरुषविशेष-प्रपञ्चयुक्तानीति, **'रूवगसहस्स-कलिया'** इति रूपकाणां सहस्राणि रूपकसहस्राणि तैः कलितानि रूपकसहस्रकलितानि **'भिसमाणा'** इति दीप्यमानानि **'भिब्भिसमाणा'** इति अतिशयेन दीप्यमानानि **'चक्खुल्लोयणलेसा'** इति चक्षुः कर्तृ लोकने–अवलोकने लिसतीव–दर्शनीयत्वातिशयतः श्लिष्यतीव यत्र तानि चक्षुर्लोकनलेसानि **'सुहफासा'** इति शुभस्पर्शानि, सशोभाकानि रूपाणि यत्र तानि **सश्रीकरूपाणि, 'पासाइया'** इत्यादि विशेषणचतुष्टयं प्राग्वत्।।२८८।।

---

१. उपनिवि० **राजप्रश्नीयवृत्तौ जम्बूद्वीपप्र. पुण्यसागरवृत्तौ च।।**

(२८९) तेसि णं तोरणाणं उप्पिं अट्ठट्ठमंगलगा पण्णत्ता-सोत्थिय-सिरिवच्छ-णंदियावत्त-वद्धमाण-भद्दासण-कलस-मच्छ-दप्पणा सव्वरतणामया अच्छा सण्हा जाव[1] पडिरूवा।।२८९।।

'तेसिं तोरणाणं उवरिं अट्ठट्ठमंगले'त्यादि सुगमं, नवरं **'जाव पडिरूवा'** इति यावत्करणात् 'घट्ठा मट्ठा नीरया' इत्यादिपरिग्रहः।। २८९।।

(२९०) तेसि णं तोरणाणं उप्पिं बहवे किण्हचामरज्झया नीलचामरज्झया लोहियचामरज्झया हारिद्दचामरज्झया सुक्किल्लचामरज्झया अच्छा सण्हा रुप्पपट्टा वइरदंडा जलयामलगंधीया सुरूवा पासाइया ४।। २९० ।।

'तेसि ण'मित्यादि, **तेषां तोरणानामुपरि बहवः 'कृष्णचामरध्वजाः'** कृष्णचामरयुक्ता ध्वजाः कृष्णचामरध्वजाः, एवं बहवो **नीलचामरध्वजा लोहितचामरध्वजा हरिद्रचामरध्वजाः शुक्लचामरध्वजाः,** कथम्भूता इत्याह एते सर्वेऽपि? इति, अत आह–**'अच्छा'** आकाशस्फटिकवदति-निर्मलाः 'कृष्णाः'[2] कृष्ण(**सण्हा**–श्लक्ष्ण)पुद्गलस्कन्धनिर्मापिता **'रूप्यपट्टा'** इति रूप्यो–रूप्यमयो वज्रमयस्य दण्डस्योपरि पट्टो येषां ते रूप्यपट्टाः **'वइरदंडा'** इति वज्रो–वज्ररत्नमयो दण्डो रूप्यपट्टमध्यवर्त्ती येषां ते वज्रदण्डाः, तथा जलजानामिव–जलजकुसुमानां पद्मादीनामिवामलो–निर्म्मलो न तु कुद्रव्यगन्ध-सम्मिश्रो यो गन्धः स विद्यते येषां ते **जलजाऽमलगन्धिका** **"अतोऽनेकस्वरा"** [सि. हे. ७।२।६] दितीकप्रत्ययः, अत एव 'सुरम्याः', **'पासादीया'** इत्यादि विशेषणचतुष्टयं प्राग्वत्।। २९०।।

(२९१) तेसि णं तोरणाणं उप्पिं बहवे छत्ताइछत्ता पडागाइपडागा घंटाजुयला चामरजुयला उप्पलहत्थया पउमाहत्थया कुमुदहत्थया णलिणहत्थया सुभगहत्थया सोगंधिगहत्थया पोंडरीयहत्थया महापोंडरियहत्था सयपत्तहत्था सहस्सपत्तहत्था सयसहस्सवत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा।। २९१ ।।

'तेसि ण'मित्यादि, **तेषां तोरणानामुपरि बहूनि 'छत्रातिच्छत्राणि'** छत्रात्–लोकप्रसिद्धादेक-सङ्ख्याकादतिशायीनि द्वि[3]सङ्ख्यानि त्रिसङ्ख्यानि वा छत्रातिच्छत्राणि, बहव्यः पताकाभ्यो–लोक-

---

१. द्र.३।२६१।। २. सण्हा -श्लक्ष्ण० **-इति राजप्रश्नीयवृत्तौ।** ३. **इतोऽग्रे राजप्रश्नीयवृत्तौ-** 'उपर्यधोभावेन' **इति अधिकम्।**

प्रसिद्धाभ्योऽतिशायिन्यो दीर्घत्वेन विस्तारेण च पताकाः **पताकातिपताकाः,** बहूनि **घण्टायुगलानि** बहूनि **चामरयुगलानि** बहवः **'उत्पलहस्तकाः'** उत्पलाख्यजलजकुसुमसमूहविशेषाः, एवं [बहवः] **पद्महस्तका** बहवो **नलिनहस्तका** बहवः **सुभगहस्तका** बहवः **सौगन्धिकहस्तका** बहवः **पुण्डरीकहस्तका** बहवः **शतपत्रहस्तकाः** बहवः **सहस्रपत्रहस्तकाः,** उत्पलादीनि प्रागेव व्याख्यातानि, एते च छत्रातिच्छत्रादयः सर्वेऽपि **सर्वरत्नमयाः 'जाव पडिरूवा'** इति यावत्करणात् **'अच्छा** सण्हा लण्हा' इत्यादि विशेषणकदम्बकपरिग्रहः।।२९१।।

(२९२) तासि णं खुड्डाखुड्डियाणं वावीणं जाव बिलपंतियाणं तत्थ तत्थ देसे २ तहिं तहिं बहवे उप्पायपव्वया णियइपव्वया जगतीपव्वया दारुपव्वयगा दगमंडवगा दगमंचका दगमालका दगपासायगा ऊसडा[1] खडहडगा[2] अंदोलगा पक्खंदोलगा सव्वरयणामया अच्छा जाव पडिरूवा।।२९२।।

'तासि ण'मित्यादि, **तासां क्षुल्लिकानां वापीनां यावद् बिलपङ्क्तीनाम्,** अत्र यावच्छब्दात् पुष्करिण्यादिपरिग्रहः, अपान्तरालेषु **तत्र तत्र देशे** तस्यैव देशस्य **तत्र तत्रै**कदेशे **बहव उत्पातपर्वता-** यत्रागत्य बहवो व्यन्तरदेवा देव्यश्च विचित्रक्रीडानिमित्तं वैक्रियशरीरमारचयन्ति **'नियइपव्वया'** इति नियत्या–नैयत्येन पर्वता नियतिपर्वताः, क्वचित् 'निययपव्वया' इति पाठस्तत्र नियताः–सदा भोग्यत्वेनावस्थिताः पर्वता नियतपर्वताः, यत्र वानमन्तरा देवा देव्यश्च भवधारणीयेन वैक्रियशरीरेण प्रायः सदा रममाणा अवतिष्ठन्ते इति भावः,**'जगतीपर्वतकाः'** पर्वतविशेषाः **'दारुपर्वतकाः'** दारुनिर्मापिता इव पर्वतकाः **'दगमंडवगा'** इति 'दकमण्डपकाः' स्फटिकमण्डपकाः, उक्तं च **मूलटीकायां–"दकमण्डपकाः स्फाटिकमण्डपका" [ ]** इति, एवं **दकमञ्चका दकमालका दकप्रासादाः,** एते च दकमण्डपादयः केचित् **'ऊसडा'** इति उत्सृता उच्चा इत्यर्थः, केचित् **'खुड्डा'** इति क्षुल्ला लघवः क्वचित् **'खडख(ह)डगा'** इति लघव आयताश्च, तथा **अन्दोलकाः पक्ष्यन्दोलकाश्च,** तत्र यत्रागत्य मनुष्या आत्मानमन्दोलयन्ति ते अन्दोलका इति लोके प्रसिद्धाः, यत्र तु पक्षिण आगत्यात्मानमन्दोलयन्ति ते पक्ष्यन्दोलकाः, ते चान्दोलकाः पक्ष्यन्दोलकाश्च तस्मिन् वनखण्डे तत्र तत्र प्रदेशे व्यन्तरदेव-देवीक्रीडायोग्या बहवः सन्ति, ते चोत्पातपर्वतादयः कथम्भूताः? इत्याह–**'सर्वरत्नमयाः'** सर्वात्मना रत्नमयाः, **'अच्छा** सण्हा' इत्यादि विशेषणजातं पूर्ववत्।।२९२ ।।

---

१. **जे.।** ०डा खुल्लाखड०-**ग मु.।।** २. खुड्डखुड्डगा- **राजप्र.सू. १८०।।**

(२९३) तेसु णं उप्पायपव्वतेसु जाव पक्खंदोलएसु बहूणि हंसासणाइं एवं कोंचासणाइं गरुलासणाइं उण्णयासणाइं पणयासणाइं दीहासणाइं भद्दासणाइं पक्खासणाइं मगरासणाइं उसभासणाइं[१] सीहासणाइं पउमासणाइं[२] दिसासोवत्थिया-सणाइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं।।२९३।।

'तेसु ण'मित्यादि, **तेषु उत्पातपर्वतेषु यावत्पक्ष्यन्दोलकेषु,** यावत्करणान्नियतिपर्वतकादिपरिग्रहः, **बहूनि हंसासनानि,** तत्र येषामासनानामधोभागे हंसा व्यवस्थिता यथा सिंहासने सिंहाः तानि हंसासनानि, **एवं क्रौञ्चासनानि गरुडासनानि** च भावनीयानि, **उन्नतासनानि** नाम यानि उच्चासनानि **प्रणतासनानि**-निम्नासनानि **दीर्घासनानि**–शय्यारूपाणि **भद्रासनानि** येषामधोभागे पीठिकाबन्धः **पक्ष्यासनानि** येषामधोभागे नानास्वरूपाः पक्षिणः, एवं **मकरासनानि सिंहासनानि** च भावनीयानि, **पद्मासनानि**-पद्माकाराणि आसनानि **'दिसासोवत्थियासणाणि'** येषामधोभागे दिक्सौवस्तिका आलिखिताः सन्ति, अत्र यथाक्रममासनानां सङ्ग्राहिका **सङ्ग्रहणिगाथा–**

"हंसे १ कोंचे २ गरुडे ३ उण्णय ४ पणए य ५ दीह ६ भद्दे य ७।
पक्खे ८ मयरे ९ उसहे[३] १० सीह ११ दिसासो[व]त्थि १२ बारसमे।।१।।" [ ]

एतानि सर्वाण्यपि कथम्भूतानि? इत्यत आह–**'सव्वरयणामया'** इत्यादि प्राग्वत्।। २९३।।

(२९४) तस्स णं वणसंडस्स तत्थ तत्थ देसे २ तहिं तहिं बहवे आलिघरा मालिघरा कयलिघरा लयाघरा अत्थणघरा[३] पेच्छणघरा मज्जणघरगा पसाहणघरगा गब्भघरगा मोहणघरगा सालघरगा जालघरगा कुसुमघरगा चित्तघरगा गंधव्वघरगा आयंसघरगा सव्वरयणामया जाव पडिरूवा।।२९४ ।।

'तस्स णं वणसंडस्से'त्यादि, प्राग्वत् **तस्य वनखण्डस्य** मध्ये **तत्र तत्र प्रदेशे** तस्यैव देशस्य **तत्र तत्रै**कदेशे **बहूनि 'आलिगृहकाणि'** आलिः–वनस्पतिविशेषस्तन्मयानि गृहकाणि, मालिरपि-वनस्पतिविशेषस्तन्मयानि गृहकाणि **मालिगृहकाणि, कदलीगृहकाणि लतागृहकाणि** प्रतीतानि

---

१. अत्र (२९३) वृत्तौ जे. प्रतौ सङ्ग्रहणीगाथायां च उसभासणाइं - नास्ति, २९७ सू.वृत्तौ अस्ति ।। २. पउमे-इति पुण्यसागरवृत्तौ ।। ३. अच्छण० V।।

'अत्थणघरका' इति अवस्थानगृहकाणि येषु यदा तदा वाऽऽगत्य बहवः सुखासिकयाऽवतिष्ठन्ते, **प्रेक्षणकगृहाणि** यत्रागत्य प्रेक्षणकानि विदधति निरीक्षन्ते च, **मज्जनकगृहकाणि** यत्रागत्य स्वेच्छया मज्जनं कुर्वन्ति **प्रसाधनगृहकाणि** यत्रागत्य स्वं परं च मण्डयन्ति **गर्भगृहकाणि**–गर्भगृहाकाराणि, **'मोहणघरगा'** इति मोहणं–मैथुनसेवा **'रमियमोहणरयाइं' [ ]** इति **नाममाला**वचनात्, तत्प्रधानानि गृहकाणि मोहनगृहकाणि वासभवनानीति भावः, **'शालागृहकाणि'** पट्टशालाप्रधानानि गृहकाणि **'जालगृहकाणि'** जालकयुक्तानि गृहकाणि **'कुसुमगृहकाणि'** कुसुमप्रकरोपचितानि गृहकाणि **'चित्रगृहकाणि'** चित्रप्रधानानि गृहकाणि **'गन्धर्वगृहकाणि'** गीत-नृत्याभ्यासयोग्यानि गृहकाणि **'आदर्शगृहकाणि'** आदर्शमयानीव [आदर्श] गृहकाणि, एतानि च कथम्भूतानि? इत्यत आह– **'सव्वरयणामया'** इत्यादिविशेषणकदम्बकं प्राग्वत्।। २९४।।

(२९५) तेसु णं आलिघरएसु जाव आयंसघरएसु बहूइं हंसासणाइं जाव दिसासोवत्थियासणाइं सव्वरयणामयाइं जाव पडिरूवाइं।।२९५।।

'तेसु ण'मित्यादि, **तेषु आलिगृहकेषु, याव**च्छब्दान्मालिगृहकादिपरिग्रहः, **बहूनि हंसासनानि** इत्यादि प्राग्वत्।। २९५ ।।

(२९६) तस्स णं वणसंडस्स तत्थ तत्थ देसे तहिं तहिं बहवे जाइमंडवगा जूहिया-मंडवगा मल्लियामंडवगा णोमालियामंडवगा वासंतीमंडवगा दधिवासुयमंडवगा सूरिल्लिमंडवगा तंबोलीमंडवगा मुद्दियामंडवगा णागलयामंडवगा अतिमुत्तमंडवगा अप्फोतामंडवगा मालुयामंडवगा सामलयामंडवगा सव्वरयणामया जाव पडिरूवा।। २९६।।

'तस्स ण'मित्यादि, **तस्य वनखण्डस्य** मध्ये **तत्र तत्र देशे** तस्यैव देशस्य **तत्र तत्रै**कदेशे **बैंहवो जातिमण्डपका यूथिकामण्डपका मल्लिकामण्डपका नवमालिकामण्डपका वासन्तीमण्डपका** दधिवासुका नाम वनस्पतिविशेषस्तन्मया मण्डपका **दधिवासुकमण्डपकाः,** सूरिल्लिरपि वनस्पतिविशेष-स्तन्मया मण्डपकाः **सूरिल्लिमण्डपकाः,** ताम्बूली–नागवल्ली तन्मया मण्डपका**स्ताम्बूलीमण्डपकाः,** नागो–द्रुमविशेषः स एव लता नागलता, इह यस्य तिर्यक् तथाविधा शाखा प्रशाखा न प्रसृता सा

लतेत्यभिधीयते, **नागलतामयमण्डपकाः, अतिमुक्तकमण्डपकाः,** 'अप्फोया' इति वनस्पतिविशेषस्तन्मया मण्डपका **अप्फोयामण्डपकाः,** मालुका–एकास्थिकफला वृक्षविशेषास्तद्युक्ता मण्डपका **मालुकामण्डपकाः,** एते च कथम्भूताः? इत्याह–**'सव्वरयणामया'** इत्यादि प्राग्वत्।। २९६।।

(२९७) तेसु णं जातीमंडवएसु जाव सामलयामंडवएसु बहवे पुढविसिलापट्टगा पण्णत्ता, तंजहा- अप्पेगइया हंसासणसंठिता[1] जाव दिसासोत्थियासणसंठिता पं०, तत्थ बहवे वरसयणासणविसिट्ठसंठाणसंठिया पण्णत्ता समणाउसो! आइण्णग-रूय-बूर-णवणीत-तूलफासा मउया सव्वरयणामया अच्छा जाव पडिरूवा। तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति णिसीदंति तुयट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरि क्कंताणं सुभाणं कडाणं कम्माणं कल्लाणाणं कल्लाणं फलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति ।।२९७।।

'तेसु ण'मित्यादि, **तेषु जातीयमण्डपेषु** यावन्मालुकामण्डपेषु, यावत्करणाद् यूथिकामण्डपकादि-परिग्रहः, **बहवः शिलापट्टकाः प्रज्ञप्तास्तद्यथा–अप्येकका** हंसासनवत्संस्थिता **हंसासनसंस्थिताः** यावदप्येकका **दिक्सौवस्तिकासनसंस्थिताः,** यावत्करणात् 'अप्पेगइया कोंचासणसंठिता अप्पेगइया गरुडासणसंठिया अप्पेगइया उन्नयासणसंठिया अप्पेगइया पणयासणसंठिया अप्पेगइया भद्दासण-संठिया अप्पेगइया पक्खासणसंठिया अप्पेगइया मयरासणसंठिया अप्पेगइया उसभासणसंठिया अप्पेगइया सीहासणसंठिया अप्पेगइया पउमासणसंठिया अप्पेगइया दीहासणसंठिया इति परिग्रहः, अन्ये च **बहवः** शिलापट्टका यानि विशिष्टचिह्नानि विशिष्टनामानि च वराणि–प्रधानानि शयनानि आसनानि च तद्वत्संस्थिता **वरशयनासनविशिष्टसंस्थानसंस्थिताः,** क्वचित् 'मांसलसुघुट्ठविसिट्ठसंठाणसंठिया' इति पाठस्तत्रान्ये च बहवः शिलापट्टका मांसला इव मांसलाः अकठिना इत्यर्थः, सुघुष्टा इव सुघुष्टा अतिशयेन मसृणा इति भावः विशिष्टसंस्थानसंस्थिताश्च **'आईणग-रूय-बूर-नवणीय-तूलफासा मउया सव्वरयणामया**

---

१. L। **कखगगटत्रि मु मध्ये** ०ता कोंचासणसंठिता गरुलासणसंठिता उण्णयासणसंठिता पणयासणसंठिता दीहासणसंठिता भद्दासणसंठिता पक्खासणसंठिता मगरासणसंठिता उसभासणसंठिता सीहासणसंठिता पउमासणसंठिता दिसिसो० **इति पाठः** ।।

अच्छा' इत्यादि प्राग्वत्, **तत्रै**तेषु उत्पातपर्वतादिगतहंसासनादिषु यावन्नानारूपसंस्थानसंस्थितपृथिवी-शिलापट्टकेषु **णमि**ति पूर्ववद्, **बहवो वानमन्तरा देवा देव्यश्च** यथासुख**मासते 'शेरते'** दीर्घकायप्रसारणेन वर्त्तन्ते, न तु निद्रां कुर्वन्ति, तेषु देवयोनिकतया निद्राया अभावात्, **'तिष्ठन्ति'**–ऊर्ध्वस्थानेन वर्त्तन्ते **'निषीदन्ति'**– उपविशन्ति **'तुयट्टंति'** इति त्वग्वर्त्तनं कुर्वन्ति वामपार्श्वतः परावृत्य दक्षिणपार्श्वेनावतिष्ठन्ति दक्षिणपार्श्वतो वा परावृत्य वामपार्श्वेनावतिष्ठन्ते **'रमन्ते'** रतिमाबध्नन्ति **'ललन्ति'** मनईप्सितं यथा भवति तथा वर्त्तन्त इति भावः **'क्रीडन्ति'** यथासुखमितस्ततो गमनविनोदेन गीतनृत्यादिविनोदेन वा तिष्ठन्ति **'मोहन्ति'** मैथुनसेवां कुर्वन्ति, इत्येवं **'पुरापोराणाण'**मित्यादि, 'पुरा' पूर्वं प्राग्भवे इति भावः, **कृतानां कर्म्मणा**मिति योगः, अत एव पौराणानां **सुचीर्णानां**–सुचरितानामितिभावः, इह सुचरितजनितं कर्म्माऽपि कार्ये कारणोपचारात्सुचरितमिति विवक्षितं, ततोऽयं भावार्थः–विशिष्टतथा-विधधर्म्मानुष्ठानविषयाप्रमादकरणक्षान्त्यादिसुचरितानामिति, तथा **सुपराक्रान्तानाम्,** अत्रापि कारणे कार्योपचारात् सुपराक्रान्तजनितानि कर्माण्येव सुपराक्रान्तानि इत्युक्तं भवति, सकलसत्त्वमैत्री-सत्यभाषण-परद्रव्यानपहार-सुशीलादिरूपसुपराक्रमजनितानामिति, अत एव **शुभानां**-शुभफलानाम्, इह किञ्चिदशुभ-फलमपीन्द्रियमतिविपर्यासात् शुभफलमाभाति ततस्तात्त्विकशुभत्वप्रतिपत्त्यर्थमस्यैव पर्यायशब्दमाह– **'कल्याणानां'** तत्त्ववृत्त्या तथाविधविशिष्टफलदायिनाम्, अथवा कल्याणानाम्–अनर्थोपशमकारिणां, **कल्याणं**–कल्याणरूपं फलविपाकं **'पच्चणुभवमाणा'** प्रत्येकमनुभवन्तः **'विहरन्ति'** आसते।। २९७।।

तदेवं पद्मवरवेदिकाया बहिर्यो वनखण्डस्तद्वक्तव्यतोक्ता, सम्प्रति तस्या एव पद्मवरवेदिकाया अर्वाग् जगत्या उपरि यो वनखण्डस्तद्वक्तव्यतामभिधित्सुराह–

(२९८) तीसे णं जगतीए उप्पिं पउमवरवेदियाए अंतो एत्थ णं महं एगे वणसंडे पण्णत्ते देसूणाइं दो जोयणाइं विक्खंभेणं [1]जगतीसमए परिक्खेवेणं किण्हे किण्होभासे वणसंडवण्णओ [मणि]तणसद्दवज्जो[2] णेयव्वो, तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति णिसीयंति तुयट्टंति रमंति ललंति कीडंति मोहंति पुरा पोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कडाणं कम्माणं कल्लाणं फलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति।। २९८।।

१. ता.। वेईयासमये-**कखगटत्रि, जम्बूद्वीपप्र. सू. १।१४ ।। २. जे.। ० विहूणो L मु. ।।**

'तीसे णं जगतीए' इत्यादि, **तस्या जगत्या उपरि पद्मवरवेदिकाया 'अन्तः'** मध्यभागे **अत्र महानेको वनखण्डः प्रज्ञप्तः 'देसोणाइं दो जोयणाइं विक्खंभेण'** मित्यादि सर्वं बहिर्वनखण्डवदविशेषेण वक्तव्यं, नवरमत्र मणीनां तृणानां च शब्दो न वक्तव्यः, पद्मवरवेदिकान्तरिततया तथाविधवाताभावतो मणीनां तृणानां च चलनाभावतः परस्परसङ्घर्षाभावात्, तथा चाह-'[१]**वणसंडवण्णतो सद्दवज्जो जाव विहरंति**' इति।।२९८।।

सम्प्रति जम्बूद्वीपस्य द्वारसङ्ख्याप्रतिपादनार्थमाह–

(२९९) [२]जंबुद्दीवस्स णं भंते! दीवस्स कति दारा पण्णत्ता? गोयमा! चत्तारि दारा पण्णत्ता, तंजहा-विजये वेजयंते जयंते अपराजिए।। २९९।।

'जंबुद्दीवस्स णं भंते!' इत्यादि, **जम्बूद्वीपस्य णं**मिति प्राग्वत् **भदन्त! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?,** भगवानाह–**गौतम! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा-विजयं वैजयन्तं जयन्तमपराजितं** च।।२९९।।

(३००-A) कहि णं भंते! जंबुद्दीवस्स दीवस्स विजये नामं दारे पण्णत्ते ?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमेणं पणयालीसं जोयणसहस्साइं अबाधाए जंबुद्दीवे दीवे पुरच्छिमपेरंते लवणसमुद्दपुरच्छिमद्धस्स पच्चत्थिमेणं सीताए महाणदीए उप्पिं एत्थ णं जंबुद्दीवस्स दीवस्स विजये णामं दारे पण्णत्ते– अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, चत्तारि जोयणाइं विक्खंभेणं, तावतियं चेव पवेसेणं, सेए वरकणगथूभियागे ईहामिय-उसभ-तुरग-नर-मगर-विहग-वालग-किण्णर-रुरु-सरभ-चमर-कुंजर-वणलत-पउमलयभत्तिचित्ते खंभुग्गतवइरवेदियापरिगताभिरामे विज्जाहरजमलजुयलजंतजुत्ते इव अच्चीसहस्समालिणीए रूवगसहस्सकलिते भिसिमाणे भिब्भिसमाणे चक्खुल्लोयणलेसे सुहफासे सस्सिरीयरूवे ।।३००-A।।

'कहि णं भंते!' इत्यादि, **क्व भदन्त! जम्बूद्वीपस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं ?,** भगवानाह–**गौतम! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य 'पुरच्छिमेणं'**ति पूर्वस्यां दिशि **पञ्चचत्वारिंश-**

१. सूत्र-वृत्त्योः भेदः ।। २. तुला-जम्बूद्वीपप्र.१।१५ ।।

द्योजनसहस्त्रप्रमाणया **'अबाधया'** अपान्तरालेन यो **जम्बूद्वीपस्य 'पुरच्छिमपेरंते'** इति पूर्वः पर्यन्तो **लवणसमुद्रपूर्वार्द्धस्य 'पच्चत्थिमेणं'**ति पश्चिमे भागे **शीताया महानद्या उपरि 'अत्र'** एतस्मिन् प्रदेशे **जम्बूद्वीपस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तम्, अष्टौ योजनानि उच्चैस्त्वेन, चत्वारि योजनानि विष्कम्भेन, 'तावइयं चेव पवेसेणं'**ति तावन्त्येव चत्वारीत्यर्थः योजनानि प्रवेशेन, कथम्भूतमित्यर्थः, **'सेए'** इत्यादि, **'श्वेतं'** श्वेतवर्णोपेतं बाहल्येनाङ्करत्नमयत्वात् **'वरकणगथूभियाए'** इति वरकनका–वरकनकमयी स्तूपिका–शिखरं यस्य तद् वरकनकस्तूपिकाकम्, **'ईहामिय-उसभ-तुरग-नरमगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ते खंभुग्गयवरवेइयापरिगयाभिरामे विज्जाहरजमलजुगलजंतजुत्ते इव अच्चीसहस्समालणीए रूवगसहस्सकलिए भिसमाणे भिब्भिसमाणे चक्खुल्लोयणलेसे सुहफासे सस्सिरीयरूवे'** इति विशेषणजातं प्राग्वत् ।।३००-A।।

(३००-B) वण्णो दारस्स तस्सिमो होइ तं०-वइरामया णिम्मा रिट्ठामया पतिट्ठाणा वेरुलियामया खंभा जायरूवोवचियपवरपंचवण्णमणिरयणकोट्टिमतले हंसगब्भमए एलुए गोमेज्जमते इंदखीले लोहितक्खमईओ [१]दारचेडाओ जोतिरसामते उत्तरंगे वेरुलियामया कवाडा वइरामया संधी लोहितक्खमईओ सूईओ णाणामणिमया समुग्गगा ।। ३००-B।।

'[२]वण्णो दारस्स तस्सिमो होइ' इति 'वर्णः' वर्णकनिवेशो द्वारस्य 'तस्य' विजयाभिधानस्य 'अयं' वक्ष्यमाणो भवति, तमेवाह–**'तं जहे'**त्यादि, तद्यथा–**वज्रमया नेमा**–भूमिभागादूर्ध्वं निष्क्रामन्तः प्रदेशाः **रिष्टामयानि प्रतिष्ठानानि**–मूलपादाः **'[३]वेरुलियरुइलखंभे'** इति वैडूर्या–वैडूर्यरत्नमया रुचिराः स्तम्भा यस्य तद् वैडूर्यरुचिरस्तम्भं **'जायरूवोवचियपवरपंचवण्णमणिरयणकुट्टिमतले'** इति जातरूपेण–सुवर्णेनोपचितैः–युक्तैः प्रवरैः–प्रधानैः पञ्चवर्णैर्मणिभिः–चन्द्रकान्तादिभिः रत्नैः–कर्केतनादिभिः कुट्टिमतलं–बद्धभूमितलं यस्य तत्तथा **'हंसगब्भमए एलुगे'** इति हंसगर्भो–रत्नविशेषस्तन्मय [४]एलुको–देहली **'गोमेज्जमयइंदकीले'** इति गोमेयकरत्नमय इन्द्रकीलो

१. दारवेडाओ-**ग** । दारवेढाओ-**ट** ।। २. **तुला-राजप्र.टीका सूत्र १३०** ।। ३. वेरुलियमया खंभा - **इति राजप्र. सू. १३०** ।। ४. एलुकः - उम्मरः - **इति हारि. वृत्तौ** ।।

लोहिताक्षरत्नमय्यौ [१]द्वारपिण्डौ(चेट्यौ)–द्वारशाखे **'जोइरसामए उत्तरंगे'** इति ज्योतीरसमयमुत्तरङ्गं–द्वारस्योपरि तिर्यग्व्यवस्थितं काष्ठं **वैडूर्यमयौ कपाटौ लोहिताक्षमय्यो**–लोहिताक्षरत्नात्मिकाः **सूचयः**–फलकद्वयसम्बन्धविघटनाभावहेतुपादुकास्थानीयाः **'वइरामया संधी'** वज्रमयाः 'सन्धयः' सन्धिमेलाः फलकानां, किमुक्तं भवति? वज्ररत्नपूरिताः फलकानां सन्धयः, **'नानामणिमया समुग्गया'** इति समुद्गका इव समुद्गकाः– [२]सूतिकागृहाणि तानि नानामणिमयानि ।। ३००-B।।

(३००-C) वईरामईओ अग्गलाओ अग्गलपासाया वइरामई आवत्तणपेढिया अंकुत्तरपासगे णिरंतरितघणकवाडे भित्तीसु चेव भित्तीगुलिया छप्पण्णा तिण्णि होंति गोमाणसीया तत्तिया णाणामणिरयणवालरूवगलीलट्ठियसालभंजिया ।।३००-C।।

'वइरामया अग्गला अग्गलपासाया' अर्गलाः–प्रतीताः अर्गलाप्रासादा यत्राऽर्गला नियम्यन्ते, आह च– **मूलटीकाकारः**–**'अर्गलाप्रासादा यत्रार्गला नियम्यन्ते'[हा.टी.]** इति, एतौ द्वावपि वज्ररत्नमयौ, **'रययामयी आवत्तणपेढिया'** इति आवर्त्तनपीठिका यत्रेन्द्रकीलिका, उक्तं च– **मूलटीकायाम्**–**'आवर्त्तनपीठिका यत्रेन्द्रकीलको भवति'** **'अंकुत्तरपासए'** इति अङ्का अङ्करत्नमया उत्तरपार्श्वा यस्य तद् अङ्कोत्तरपार्श्वं **'निरंतरियघणकवाडे'** इति निर्गता अन्तरिका–लघ्वन्तररूपा ययोस्तौ निरन्तरिकौ अत एव घनौ कपाटौ यस्य तन्निरन्तरघनकपाटं **'भित्तिसु चेव भित्तिगुलिया छप्पण्णा तिन्नि होंति'** इति तस्य द्वारस्योभयोः पार्श्वयोर्भित्तिषु–भित्तिगता भित्तिगुलिकाः–पीठकसंस्थानीयास्तिस्रः षट्पञ्चाशतः–षट्पञ्चाशत्त्रिकप्रमाणा भवन्ति, **'गोमाणसिया तत्तिया'** इति गोमानस्यः–शय्याः 'तत्तिया' इति तावन्मात्राः षट्पञ्चाशत्त्रिकसङ्ख्याका इत्यर्थः, **'नानामणिरयणवालरूवगलीलट्ठियसालभंजियाए'** इति इदं द्वारविशेषणं, नानामणिरत्नानि–नानामणिरत्नमयानि व्यालरूपकाणि लीलास्थितशालभञ्जिकाश्च–लीलास्थितपुत्रिकाश्च यस्य तत्तथा ।। ३००-C।।

(३००-D) वइरामए कूडे रययामए उस्सेहे सव्वतवणिज्जमए उल्लोए णाणामणिरयणजालपंजर-मणिवंसग-लोहितक्खपडिवंसग-रयतभोम्मे अंकामया पक्खा पक्खबाहाओ जोतिरसामया वंसा वंसकवेल्लुगा य रयतामयीओ पट्टिताओ जायरूवमतीओ ओहाडणीओ वइरामयीओ उवरिपुंछणीओ सव्वसेतरययमए च्छायणे

१. द्वारपिंड्यौ- **जम्बू.वृत्ति पत्र ४८।।** २. चूलिका० **जम्बू. शा. टीका १। १६ पृ. ६५ पुण्य० टीका च।।**

अंकमतकणगकूडतवणिज्जथूभियाए ।।३००-D।।

'वइरामए कूडे' वज्रमयो–वज्ररत्नमयः कूटो–[१]माडभागः **रजतमय उत्सेधः**–शिखरम्, आह च **मूलटीकाकारः**–**"कूडो–माडभाग उच्छ्रयः–शिखर"**[हा.टी] मिति, केवलं शिखरमत्र तस्यैव माडभागस्य संबन्धि द्रष्टव्यं न द्वारस्य, तस्य प्रागेवोक्तत्वात्, **'सव्वतवणिज्जमए उल्लोए'** सर्वात्मना तपनीयमय उल्लोकः–उपरिभागः **'नानामणिरयणजालपंजर-मणिवंसग-लोहियक्खपडिवंसग-रययभोमे'** इति, मणयो–मणिमया वंशा येषां तानि मणिमयवंशकानि लोहिताक्षा–लोहिताक्षमयाः प्रतिवंशा येषां तानि लोहिताक्षप्रतिवंशकानि रजता–रजतमयी भूमिर्येषां तानि रजतभूमानि, प्राकृतत्वात्समासान्तमकारस्य च द्वित्वं, मणिवंशकानि लोहिताक्षप्रतिवंशकानि रजतभूमानि नानामणिरत्नानि–नानामणिरत्नमयानि जालपञ्जराणि–गवाक्षापरपर्यायाणि यस्मिन् द्वारे तत्तथा, पदानामन्यथोपनिपातः प्राकृतत्वात्, **'अंकमया पक्खा पक्खबाहाओ जोईरसामया वंसा वंसकवेल्लुगा य रययामईओ पट्टियाओ जायरूवमईओ ओहाडणीओ वइरामईओ उवरिपुंछणीओ सव्वसेयरययामए छा(य)णे'** इति पद्मवरवेदिकावद् भावनीयम्, **'अंकमयकणगकूडतवणिज्जथूभियागे'** इति अङ्कमयं–बाहुल्येनाङ्करत्नमयं पक्ष पक्षबाह्वादीनामङ्करत्नात्मकत्वात् कनकं–कनकमयं कूटं–शिखरं यस्य तत् कनककूटं तपनीया–तपनीयमयी स्तूपिका–लघुशिखररूपा यस्य तत्तपनीयस्तूपिकाकं, ततः पदत्रयस्य पदद्वयमीलनेन कर्म्मधारयः, एतेन यत् प्राक् सामान्यत उत्क्षिप्तं (उक्तं) 'सेए वरकणगथूभियागे' इति तदेव प्रपञ्चतो भावितमिति।

सम्प्रति तदेव श्वेतत्वमुपसंहारव्याजेन भूय उपदर्शयति–

(३००-E) सेते संखतलविमलणिम्मलदधिघणगोखीर फेणरययणिगरप्पगासे तिलगरयणद्धचंदचित्ते णाणामणिमयदामालंकिए अंतो य बहिं च सण्हे तवणिज्ज-[२]रुइलवालुयापत्थडे सुहप्फासे सस्सिरीयरूवे पासातीए ४।।३००-E।।

'सेए' श्वेतं, श्वेतत्वमेवोपमया दृढयति–**'संखतल-विमल-निम्मल-दधिघण-गोखीरफेण-रयँयनिगरप्पगासे'** इति विमलं–विगतमलं यत् शङ्खतलं शङ्खस्योपरितनो भागो यश्च निर्मलो दधिघनो–घनीभूतं दधि गोक्षीरफेनो रजतनिकरश्च तद्वत्प्रकाशः–[३]प्रतिमता यस्य तत्तथा,

---

१. माढभागः - **जंबू. १।१६ टीका पृ. ६५ ।। २. कखगटता त्रि । ० रूइल० L नास्ति ।। ३. प्रतिभासो -इति राजप्रश्नीयवृत्तौ ।। २. ता. प्रतौ एतत्पाठान्तरं दृश्यते ।।**

'तिलगरयणद्धचंदचित्ते' इति तिलकरत्नानि–पुण्ड्रविशेषास्तैरर्द्धचन्द्रैश्च चित्राणि–नानारूपाणि तिलकार्द्धचन्द्रचित्राणि, [१]क्वचित् संखतलविमलनिम्मलदधिघणगोखीरफेणरययनियरप्पगासद्धचंदचित्ता' इति पाठस्तत्र पूर्ववत् पृथक् पृथग् व्युत्पत्तिं कृत्वा पश्चात्पदद्वयस्य २ कर्मधारयः, **'नाणामणिदामालंकिए'** नानामणयो–नानामणिमयानि दामानि–मालास्तैरलङ्कृतं नानामणिदामालङ्कृतम् **अन्तर्बहिश्च 'श्लक्ष्णं'** श्लक्ष्णपुद्गलस्कन्धनिर्मापितं **'तवणिज्जवालुयापत्थडे'** इति तपनीयाः–तपनीयमय्यो या वालुकाः–सिकतास्तासां प्रस्तटः–प्रस्तारो यस्मिन् तत्तथा, **'सुहफासे सस्सिरीयरूवे पासाईए** जाव पडिरूवे' इति प्राग्वत्।।३००।।

(३०१) विजयस्स णं दारस्स उभयो पासिं दुहतो णिसीहियाते दो दो वंदणकलसपरिवाडीओ पण्णत्ताओ, ते णं वंदणकलसा वरकमलपइट्ठाणा सुरभिवरवारिपडिपुण्णा चंदणकयचच्चागा आविद्धकंठेगुणा पउमुप्पलपिहाणा सव्वरयणामया अच्छा सण्हा जाव पडिरूवा महता महता महिंदकुंभसमाणा पण्णत्ता समणाउसो!।।३०१।।

'विजयस्स णं दारस्से'त्यादि, **विजयस्य णमि**ति प्राग्वत् **द्वारस्य उभयोः पार्श्वयो**रेकैकनैषेधिकीभावेन **'दुहतो'** इति द्विधातो द्विप्रकारायां **नैषेधिक्यां,** नैषेधिकी–निषीदनस्थानम्, उक्तं च **मूलटीकाकारेण-"नैषेधिकी निषीदनस्थान"[हा.टी]** मिति प्रत्येकं **द्वौ द्वौ वन्दनकलशौ प्रज्ञप्तौ, ते च वन्दनकलशाः 'वरकमलपइट्ठाणा'** इति वरं–प्रधानं यत्कमलं तत्प्रतिष्ठानम्–आधारो येषां ते वरकमलप्रतिष्ठानाः, तथा **सुरभिवरवारिप्रतिपूर्णाश्चन्दनकृतचर्चाकाः**–चन्दनकृतोपरागाः **'आविद्धकंठेगुणा'** इति आविद्धः–आरोपितः कण्ठे गुणो–रक्तसूत्ररूपो येषु ते आविद्धकण्ठेगुणाः, कण्ठेकालवत्सप्तम्या अलुक्, **'पउमुप्पलपिहाणा'** इति पद्ममुत्पलं च यथायोगं पिधानं येषां ते पद्मोत्पलपिधानाः **'सव्वरयणामया अच्छा जाव पडिरूवा'** इति प्राग्वत् **'महयामहया'** इति अतिशयेन महान्तो **महेन्द्रकुम्भसमानाः,** कुम्भानामिन्द्र इन्द्रकुम्भो, राजदन्तादिदर्शनादिन्द्रशब्दस्य पूर्वनिपातः, महांश्चासौ इन्द्रकुम्भश्च तस्य समाना महेन्द्रकुम्भसमाना–महाकलशप्रमाणाः **प्रज्ञप्ताः** हे **श्रमण!** हे **आयुष्मन्!**।। ३०१।।

(३०२-A) विजयस्स णं दारस्स उभओ पासिं दुहतो णिसीहिआए दो दो णागदंतपरिवाडीओ, ते णं णागदंतगा मुत्ताजालंतरूसितहेमजालगवक्खजालखिंखिणीघंटाजालपरिक्खित्ता अब्भुग्गता अभिणिसिट्ठा तिरियं सुसंपग्गहिता

अहेपण्णगद्धरूवा पण्णगद्धसंठाणसंठिता [१]सव्ववइरामया अच्छा जाव पडिरूवा महता महया गयदंतसमाणा प० समणाउसो! । तेसु णं णागदंतएसु बहवे किण्हसुत्तबद्धवग्घारितमल्लदामकलावा [२]जाव सुक्किल्लसुत्तबद्धवग्घारिय-मल्लदामकलावा ।।३०२-A।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्य उभयोः पार्श्वयो**रेकैकनैषेधिकीभावेन **द्विधातो नैषेधिक्यां द्वौ द्वौ 'नागदन्तकौ'**नर्कुटकौ अङ्कुटकावित्यर्थः प्रज्ञप्तौ, **ते च नागदन्तका 'मुत्ताजालंतरूसियहेमजालगवक्खजालखिंखिणीजालपरिक्खित्ता'** इति मुक्ताजालानामन्तरेषु यानि उत्सृतानि–लम्बमानानि हेमजालानि–हेममयदामसमूहाः यानि च गवाक्षजालानि गवाक्षाकृतिरत्न-विशेषदामसमूहाः यानि च किङ्किणी–क्षुद्रघण्टा किङ्किणीजालानि–क्षुद्रघण्टा[सङ्घाता]स्तैः परिक्षिप्ताः–सर्वतो व्याप्ताः **'अब्भुग्गया'** इति अभिमुखमुद्गता अभ्युद्गता अग्रिमभागे मनाग् उन्नता इति भावः **'अभिनिसिट्ठा'** इति अभिमुखं–बहिर्भागाभिमुखं निसृष्टाः अभिनिसृष्टाः **'तिरियं सुसंपग्गहिया'** इति तिर्यग्–भित्तिप्रदेशे सुष्ठु अतिशयेन सम्यग्–मनागप्यचलनेन परिगृहीताः सुसंपरिगृहीताः **'अहेपन्नगद्धरूवा'** इति अधः–अधस्तनं यत्पन्नगस्य–सर्पस्यार्द्धं तस्येव रूपम्–आकारो येषां ते तथा अधःपन्नगार्द्धवदतिसरला दीर्घाश्चेति भावः, एतदेव व्याचष्टे–**'पन्नगार्द्धसंस्थानसंस्थिताः'** अधःपन्नगार्द्धसंस्थानसंस्थिताः **'सव्ववइरामया'** सर्वात्मना वज्रमयाः **'अच्छा** सण्हा **जाव पडिरूवा'** इति प्राग्वत्, **'महया महया'** इति अतिशयेन **'गजदन्तसमानाः'** गजदन्ताकाराः **प्रज्ञप्ता** हे **श्रमण**! हे **आयुष्मन्!**। **'तेसु णं नागदंतएसु'** इत्यादि, **तेषु च नागदन्तकेषु बहवः कृष्णसूत्रबद्धाः 'वग्घारिया'** इति अवलम्बिताः **'माल्यदामकलापाः'** पुष्पमालासमूहा बहवो नीलसूत्रबद्धा माल्यदामकलापाः, एवं लोहित-हारिद्र-**शुक्लसूत्रबद्धा** अपि वाच्याः।। ३०२-A ।।

(३०२-B) ते णं दामा तवणिज्जलंबूसगा सुवण्णपतरगमंडिता णाणामणि-रयणविविधहारद्धहारउवसोभितसमुदया [३]जाव सिरीए अतीव अतीव उवसोभेमाणा उवसोभेमाणा चिट्ठंति ।।३०२-B।।

---

१. जे.। सव्ववइरामया- **क ख ग ट त्रि मु** ।। २. द्र. राजप्र.सू. १३२ ।। ३. द्र. ३। २६५ ।।

'ते णं दामा' इत्यादि, **तानि दामानि 'तवनिज्जलंबूसगा'** इति तपनीयः–तपनीयमयो लम्बूसगो–दाम्नामग्रिमभागे प्राङ्गणे लम्बमानो मण्डनविशेषो गोलकाकृतिर्येषां तानि तपनीयलम्बूसकानि **'सुवण्णपयरगमंडिया'** इति पार्श्वतः सामस्त्येन सुवर्णप्रतरेण–सुवर्णपत्रकेण मण्डितानि सुवर्णप्रतरकमण्डितानि **'नानामणिरयणविविहहारद्धहारउवसोभियसमुदया'** इति नानारूपाणां मणीनां रत्नानां च ये विविधा–विचित्रवर्णा हारा–अष्टादशसरिका अर्द्धहारा–नवसरिकास्तैरुपशोभितः समुदायो येषां तानि, तथा **'जाव सिरीए अतीव उवसोभेमाणा चिट्ठंति'** अत्र यावत्करणादेवं परिपूर्णः पाठो द्रष्टव्यः–'ईसिमण्णमण्णमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायमेइज्जमाणा पलंबमाणा पलंबमाणा परुंभ(झंझ)माणा परुंभ(झंझ)माणा ओरालेणं मणुन्नेणं मणहरेणं कण्णमणनिव्वुइकरेणं सद्देणं ते पएसे सव्वतो समंता आपूरेमाणा आपूरेमाणा सिरीए उवसोभेमाणा उवसोभेमाणा चिट्ठंति।' एतच्च प्रागेव पद्मवरवेदिकावर्णने व्याख्यातमिति भूयो न व्याख्यायते।। ३०२-B ।।

(३०२-C) तेसि णं णागदंतकाणं उवरिं अण्णाओ दो दो णागदंतपरिवाडीओ पण्णत्ताओ, ते णं णागदंतगा मुत्ताजालंतरूसिया तहेव जाव समणाउसो!। तेसु णं णागदंतएसु बहवे रयतामया सिक्कया पण्णत्ता, तेसु णं रयणामएसु सिक्कएसु बहवे वेरुलियामतीओ धूवघडीओ पण्णत्ताओ, ताओ णं धूवघडीओ कालागुरु-पवरकुंदरुक्क-तुरुक्कधूवमघमघंतगंधुद्धुयाभिरामाओ सुगंधवरगंधगंधियाओ गंधवट्टिभूयाओ ओरालेणं मणुण्णेणं घाणमणणिव्वुइकरेणं गंधेणं ते पएसे सव्वतो समंता आपूरेमाणीओ आपूरेमाणीओ अतीव अतीव सिरीए जाव चिट्ठंति।।३०२-C।।

'तेसि णं नागदंताण'मित्यादि, **तेषां नागदन्तानामुपरि** अन्यौ **द्वौ नागदन्तकौ प्रज्ञप्तौ, ते च नागदन्तकाः 'मुत्ताजालंतरूसियहेमजालगवक्खजाल'** इत्यादि प्रागुक्तं सर्वं द्रष्टव्यं **यावद्** गजदन्तसमानाः प्रज्ञप्ता हे **श्रमण!** हे **आयुष्मन्! 'तेसु णं णागदंतएसु'** इत्यादि, **तेषु नागदन्तकेषु बहूनि रजतमयानि सिक्ककानि प्रज्ञप्तानि, तेषु च रजतमयेषु सिक्ककेषु बह्व्यो 'वैडूर्यरत्नमय्यो'** वैडूर्यरत्नात्मिकाः **'धूपघट्यो'** धूपघटिकाः **प्रज्ञप्ताः, ताश्च धूपघटिकाः 'कालागुरु-पवरकुंदुरुक्क–**

तुरुक्कधूवमघमघंतगंधुद्धुयाभिरामा' कालागुरुः प्रसिद्धः प्रवरः–प्रधानः कुन्दुरुष्कः–चीडा तुरुष्कं–सिल्हकं कालागुरुश्च प्रवरकुन्दुरुष्क-तुरुष्के च कालागुरु-प्रवरकुन्दुरुष्क-तुरुष्काणि तेषां धूपस्य यो मघमघायमानो गन्ध उद्धुत–इतस्ततो विप्रसृतस्तेनाभिरामाः कालागुरु-प्रवरकुन्दुरुष्क-तुरुष्कधूपमघमघायमानगन्धोद्धुताभिरामाः, तथा शोभनो गन्धो येषां ते सुगन्धास्ते च ते वरगन्धास्तेषां गन्धः स आस्वस्तीति **सुगन्धवरगन्धिकाः** "**अतोऽनेकस्वरादि**"**[सि. हे. ७।२।६]** तीकप्रत्ययः, अत एव **गन्धवर्त्तिभूताः**-सौरभ्यवर्त्तिभूताः सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पाः **'उदारेण'** स्फारेण **'मनोज्ञेन'** मनोऽनुकूलेन, कथं मनोऽनुकूलत्वम्? अत आह– **घ्राणमनोनिर्वृतिकरेण** हेतौ तृतीया यतो घ्राणमनोनिर्वृतिकरस्ततो मनोज्ञस्तेन **गन्धेन तान्** प्रत्यासन्नान् **प्रदेशान् आपूरयन्त्य आपूरयन्त्यः,** अत एव **श्रियाऽतीव** शोभमानास्**तिष्ठन्ति**।। ३०२-C ।।

(३०३) विजयस्स णं दारस्स उभयतो पासिं दुहतो णिसीधियाए दो दो सालभंजियापरिवाडीओ पण्णत्ताओ, ताओ णं सालभंजियाओ लीलट्ठिताओ सुपइट्ठियाओ सुअलंकिताओ [१]णाणाविहरागवसणाओ णाणामल्लपिणद्धाओ मुट्ठीगेज्झसुमज्झाओ आमेलगजमलजुयलवट्टितअब्भुण्णयपीणरचियसंठियपओहराओ रत्तावंगाओ असियकेसीओ मिदुविसयपसत्थलक्खणसंवेल्लितग्गसिरयाओ ईसिं असोगवरपादवसमुट्ठिताओ वामहत्थगहितग्गसालाओ ईसिं [२]अद्धुच्छिकडक्खचिट्ठिएहिं लूसेमाणीतो विव चक्खुल्लोयणलेसेहिं अण्णमण्णं [३]खिज्जमाणीओ इव पुढविपरिणामाओ सासयभावमुवगताओ चंदाणणाओ चंदविलासिणीओ चंदद्धसमनिडालाओ चंदाहियसोमदंसणाओ उक्का इव उज्जोएमाणीओ विज्जुघण[४]मरीचिसूरदिप्पंततेयअहिययरसंनिकासाओ सिंगारागारचारुवेसाओ पासाइयाओ ४ [५]तेयसा अतीव अतीव सोभेमाणीओ सोभेमाणीओ चिट्ठंति।।३०३।।

---

१. जे. L। णाणागार वसणाओ - **कखगटत्रिमु.।।** २. अद्ध oL **जे. । राजप्रश्नीय(सू. १३३) वृत्तौ** अर्ध तिर्यक्वलितम् - **इति पाठः ।** ३. पिज्ज० **ग** । खिज्जे० **ता.**। विज्ज० **क** । ४. **क ख ग ट** । मिरीयि-**ता** । मिरिय-**V राजप्र.सू. १३३** ।। ५. तेयसा.. चिट्ठंति-**ता. नास्ति । जम्बूद्वीपप्र. वृत्तौ (पत्र-५२)** प्रासादीया इत्यादि पद चतुष्टयं प्राग्वत्। **राद्रजप्रश्नीयवृत्तावपि (सू.१३३)** अभिरूवाओ चिट्ठंति इति प्राग्वत् ।।

'विजयस्स णं दारस्से'त्यादि, **विजयस्य द्वारस्योभयोः पार्श्वयोरे**कैकनैषेधिकीभावेन **द्विधातो**-द्विप्रकारायां **नैषेधिक्यां द्वे द्वे शालभञ्जिके प्रज्ञप्ते, ताश्च शालभञ्जिका** लीलया ललिताङ्गनि-वेशरूपया स्थिता **लीलास्थिताः 'सुपइट्ठियाओ'** इति सुष्ठु-मनोज्ञतया प्रतिष्ठिताः सुप्रतिष्ठिताः **'सुअलंकियाओ'** इति सुष्ठु-अतिशयेन रमणीयतयाऽलङ्कृताः स्वलङ्कृताः **'नाणाविहरागवसणाओ'** इति नानाविधो-नानाप्रकारो रागो येषां तानि नानाविधरागाणि तानि वसनानि-वस्त्राणि संवृततया यासां ता नानाविधरागवसनाः **'रत्तावंगाओ'** इति रक्तोऽपाङ्गो-नयनोपान्तं यासां ता रक्तापाङ्गाः **'असियकेसीओ'** इति असिताः-कृष्णाः केशा यासां ता असितकेश्यः **'मिउविसयपसत्थलक्खण-संवेल्लियग्गसिरयाओ'** मृदवः-कोमला विशदा-निर्म्मलाः प्रशस्तानि-शोभनानि अस्फुटितत्वप्रभृतीनि लक्षणानि येषां ते प्रशस्तलक्षणाः संवेल्लितं-संवृतमग्रं येषां शेखरककरणात् ते संवेल्लिताग्राः शिरोजाः-केशा यासां ता मृदुविशदप्रशस्तलक्षणसंवेल्लिताग्रशिरोजाः **'नाणामल्लपिणद्धाओ'** इति नानारूपाणि माल्यानि-पुष्पाणि पिनद्धानि-आविद्धानि यासां ता नानामाल्यपिनद्धाः, निष्ठान्तस्य परनिपातो भार्यादिदर्शनात्, **'मुट्ठिगेज्झसुमज्झा'** इति मुष्टिग्राह्यं सुष्ठु-शोभनं मध्यं-मध्यभागो यासां ता मुष्टिग्राह्यसुमध्याः **'आमेलग-जमल-जुगलव ट्टिय-अब्भुण्णयपीणरइय-संठियपओहराओ'** पीनं-पीवरं रचितं संस्थितं-संस्थानं यकाभ्यां तौ पीनरचितसंस्थितौ आमेलक-आपीडः शेखरक इत्यर्थः तस्य यमलं-समश्रेणीकं युगलं तद्वत् वर्त्तितौ-बद्धस्वभावावुपचितकठिनभावाविति भावः अभ्युन्नतौ पीनरचितसंस्थितौ च पयोधरौ यासां तास्तथा, **'ईसिं असोगवरपायवसमुट्ठियाओ'** इति ईषत्-मनाक् अशोकवरपादपे समवस्थिता-आश्रिता ईषदशोकवरपादपसमवस्थिताः, तथा वामहस्तेन गृहीतमग्रं शालायाः-शाखाया अर्थादशोकपादपस्य यकाभिस्ता **वामहस्तगृहीताग्रशालाः, 'ईसिं अड्ढऽच्छिकडक्खचिट्ठिएहिं लूसेमाणीओ विवे**'ति ईषत्-मनाग् 'अर्द्धं' तिर्यग्वलितम् अक्षि येषु कटाक्षरूपेषु चेष्टितेषु तैर्मुष्णन्त्य इव सुरजनानां मनांसि **'चक्खुल्लोयणलेसेहि य अण्णमण्णं विज्झेमाणीओ इव'** अन्नमन्नं-परस्परं चक्षुषां लोकनेन-अवलोकनेन लेशाः-संश्लेषास्तैर्विध्यमाना इव, किमुक्तं भवति? एवं नाम तास्तिर्यग्वलिताक्षिकटाक्षैः परस्परमवलोकमाना अवतिष्ठन्ते यथा नूनं परस्परसौभाग्यासहनतस्तिर्यग्वलि-ताक्षिकटाक्षैः परस्परं खिद्यन्त इवेति **'पुढविपरिणामाओ'** इति पृथिवीपरिणामरूपाः **शाश्वतभावमुपागता** विजयद्वारवत् **'चंदाणणाओ'** इति चन्द्रवद् आननं-मुखं यासां ताश्चन्द्राननाः **'चंदविलासिणीओ'**

---

१. रतिदसं० **जम्बू. टीका १।१६ पृ.६९ ।। २-३.** समुपस्थिता-**इति राजप्रश्नीयवृत्तौ । ४. एतद् देशीभाषापदं विद्यते,** आडो **इति भाषायाम्- इति V पृ.३२० टि.९ ।।**

इति चन्द्रवन्मनोहरं विलसन्तीत्येवंशीलाश्चन्द्रविलासिन्यः **'चंदद्धसमनिडालाओ'** इति चन्द्रार्द्धेन-अष्टमीचन्द्रेण समं-समानं ललाटं यासां ताश्चन्द्रार्द्धसमललाटाः **'चंदाहियसोमदंसणाओ'** इति चन्द्रादप्यधिकं सोमं-सुभगं कान्तिमद्दर्शनम्-आकारो यासां तास्तथा, **उल्का इव द्योतमानाः 'विज्जुघणमरीचिसूरदिप्पंततेयअहिययरसन्निकासाओ'** इति विद्युतो ये घना-बहुलतरा मरीचयस्तेभ्यो यच्च सूर्यस्य दीप्यमानमनावृतं तेजस्तस्मादप्यधिकतरः सन्निकाशः-प्रकाशो यासां तास्तथा **'सिंगारागारचारुवेसाओ'** इति शृङ्गारो-मण्डनभूषणाटोपस्तत्प्रधान आकार-आकृतिर्यासां ताः शृङ्गाराकाराः चारु वेषो-नेपथ्यं यासां ताश्चारुवेषास्ततः कर्म्मधारये शृङ्गाराकारचारुवेषाः **'पासाईयाओ'** इत्यादि विशेषणचतुष्टयं प्राग्वत्।।३०३।।

(३०४) विजयस्स णं दारस्स उभयतो पासिं दुहतो णिसीहियाए दो दो जालकडगा पण्णत्ता, ते णं जालकडगा सव्वरयणामया अच्छा जाव पडिरूवा।।३०४।।

'विजयस्स णं दारस्से'त्यादि, **विजयस्य द्वारस्य उभयोः पार्श्वयोरे**कैकनैषेधिकीभावेन **'द्विधातो'** द्विप्रकारायां **नैषेधिक्यां द्वौ द्वौ जालकटकौ प्रज्ञप्तौ, 'ते णं जालकडगा'** इत्यादि, ते च जालकटकाकीर्णा रम्यसंस्थानाः प्रदेशविशेषाः '**सव्वरयणामया अच्छा** सण्हा **जाव पडिरूवा**' इति प्राग्वत्।।३०४।।

(३०५) विजयस्स णं दारस्स उभओ पासिं दुहओ णिसीधियाए दो दो घंटाओ[१] पण्णत्ताओ, तासि णं घंटाणं अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-जंबूणतामतीओ घंटाओ वइरामतीओ लालाओ णाणामणिमया घंटापासा[२] तवणिज्जमतीओ संकलाओ रयतामतीओ रज्जूओ। ताओ णं घंटाओ ओहस्सराओ मेहस्सराओ हंसस्सराओ कोंचस्सराओ[३] सीहस्सराओ दुंदभिस्सराओ णंदिस्सराओ णंदिघोसाओ मंजुस्सराओ मंजुघोसाओ सुस्सराओ सुस्सरणिग्घोसाओ ते पदेसे

---

१. जे. L। घंटापरिवाडिओ - **कखगटत्रि राज प्र.सू. १३५** ।। २. जे. L। ०सगा-**कखगटत्रिमु.**।। ३. जे. L। ० ओ णंदिस्सराओ णंदिघोसाओ सीहस्सराओ सीहधोसाओ मंजु० **कखगटत्रिमु.** ।।

ओरालेणं मणुण्णेणं कण्णमणनिव्वुइकरेण सद्देण ते पएसे सव्वतो समंता आपूरेमाणीओ २ सिरिए अतीव उवसोमेमाणीओ २ चिट्ठंति।। ३०५।।

'विजयस्से'त्यादि, **विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वे द्वे घण्टे प्रज्ञप्ते, तासां च घण्टानामयमेतद्रूपः 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-जाम्बूनदमय्यो घण्टाः वज्रमय्यो लालाः नानामणिमया घण्टापार्श्वाः तपनीयमय्यः शृङ्खला** यासु ता अवलम्बितास्तिष्ठन्ति **रजतमय्यो रज्जवः**। **'ताओ णं घंटाओ'** इत्यादि, **ताश्च घण्टाः 'ओघस्वराः'** ओघेन–प्रवाहेण स्वरो यासां ता ओघस्वराः, मेघस्येवातिदीर्घः स्वरो यासां ता **मेघस्वराः,** हंसस्येव मधुरः स्वरो यासां ता **हंसस्वराः,** एवं **क्रौञ्चस्वराः,** सिंहस्येव प्रभूतदेशव्यापी स्वरो यासां ताः **सिंहस्वराः,** एवं **'दुन्दुभिस्वरा' नन्दिस्वराः,** द्वादशतूर्यसङ्घातो नन्दिः, नन्दिवद् घोषो–निनादो यासां ता **नन्दिघोषाः,** मञ्जुः–प्रियः स्वरो यासां ता **मञ्जुस्वराः,** एवं **मञ्जुघोषाः,** किं बहुना?, **सुस्वराः सुस्वरघोषाः, 'ओरालेण'**मित्यादि प्राग्वत्।।३०५।।

(३०६) विजयस्स णं दारस्स उभओ पासिं दुहतो णिसीधिताए दो दो वणमालाओ[१] पण्णत्ताओ, ताओ णं वणमालाओ णाणादुम-लता-किसलय-पल्लवसमाउलाओ छप्पयपरिभुज्जमाणसोभंतसस्सिरीयाओ[२] पासाईयाओ[३] (४) ।। ३०६।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वे द्वे वनमाले प्रज्ञप्ते, ताश्च वनमाला नानाद्रुमाणां** नाना**लतानां** च ये **किशलय**रूपा अतिकोमला इत्यर्थः **पल्लवा**स्तैः **समाकुलाः**–सम्मिश्राः **'छप्पयपरिभुज्जमाणसोभंतसस्सिरीया'** इति षट्पदैः परिभुज्यमाना सती शोभमाना षट्पदपरिभुज्यमानशोभमाना, अत एव सश्रीका, ततः पूर्वपदेन विशेषणसमासः, **'पासाईया'** इत्यादि पदचतुष्टयं प्राग्वत्।।३०६।।

---

१. **L जे.**। वणमालापरिवाडीओ - **कखगटत्रिमु. राजप्रश्नीयसू. १३६** ।। २. **L जे.**। ०माणकमलसोभंत० **कखगटत्रिमु.** ।। ३. **L जे.**। **इतोऽग्रे कखगटत्रिमु. मध्ये** ते पएसे उरालेणं जाव गंधेणं आपूरेमाणीओ जाव चिट्ठंति **इति पाठः। जे. प्रतौ** णिच्चंकुसुमिताओ जाव वडेंसगधरीओ सव्वरयणामईओ अच्छाओ जाव पडि. **इति पाठः** ।।

(३०७) विजयस्स णं दारस्स उभओ पासिं दुहतो णिसीहियाए दो दो [१]पगंठगा पण्णत्ता, ते णं पगंठगा चत्तारि जोयणाइं आयाम-विक्खंभेणं, दो जोयणाइं बाहल्लेणं, [२]सव्ववइरामता अच्छा जाव पडिरूवा। तेसि णं पगंठगाणं उवरिं पत्तेयं पत्तेयं पासायवडेंसगा पण्णत्ता, ते णं पासायवडिंसगा चत्तारि जोयणाइं उड्ढं उच्चत्तेणं दो जोयणाइं आयाम-विक्खंभेणं अब्भुग्गयमूसितपहसिता विव विविहमणिरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागच्छत्तातिछत्तकलिया तुंगा [३]गगणतलमणुलंघमाण (णुलिहंत)सिहरा जालंतररयण पंजरुम्मिलितव्व मणिकणगथूभियागा वियसियसयवत्तपोंडरीयतिलकरयणद्धचंदचित्ता णाणामणिमयदामालंकिया अंतो बाहिं च सण्हा [४]तवणिज्जरुइलवालुयापत्थडगा सुहफासा सस्सिरीयरूवा पासातीया४ ।।३०७।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वौ द्वौ प्रकण्ठकौ प्रज्ञप्तौ,** प्रकण्ठको नाम पीठविशेषः, आह च **मूलटीकाकारः**—**"प्रकण्ठौ पीठविशेषौ,"[हा.टी.]** **चूर्णिकार**स्त्वेवमाह— **"आदर्शवृत्तौ पर्यन्तावनतप्रदेशौ पीठौ प्रकण्ठौ"[ ]** इति, **ते च प्रकण्ठकाः** प्रत्येकं **चत्वारि योजनानि 'आयाम-विष्कम्भेन'** आयाम-विष्कम्भाभ्यां **द्वे योजने बाहल्येन 'सव्ववइरामया'** इति सर्वात्मना ते प्रकण्ठका वज्रमयाः '**अच्छा** सण्हा य' इत्यादि विशेषणकदम्बकं प्राग्वत्। **'तेसि णं पकंठयाण'**मित्यादि, **तेषां च प्रकण्ठकानामुपरि प्रत्येकं प्रासादावतंसकः प्रज्ञप्तः,** प्रासादावतंसको नाम प्रासादविशेषः, उक्तं च— **मूलटीकायां—"प्रासादावतंसकः प्रासादविशेष" [ ]** इति, व्युत्पत्तिश्चैवम्—प्रासादानामवतंसक इव—शेखरक इव प्रासादावतंसकः, **ते च प्रासादावतंसकाः** प्रत्येकं **चत्वारि योजनान्यूर्ध्वमुच्चैस्त्वेन द्वे योजने आयाम-विष्कम्भाभ्याम्, 'अब्भुग्गयमूसियपहसिया विवे'**ति अभ्युद्गता—आभिमुख्येन सर्वतो विनिर्गता उत्सृता—प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा तया सिता इव—बद्धा इव तिष्ठन्तीति गम्यते, अन्यथा कथमिव तेऽत्युच्चा निरालम्बास्तिष्ठन्तीति भावः, अथवा प्रबलश्वेतप्रभापटलया प्रहसितावि व प्रकर्षेण हसितावि व, तथा **'विविहमणिरयणभत्ति-**

---

१. पाअंठा - **जे.** । **एवमग्रेऽपि।।** २. सव्वरयणाम.**जे.** ।। ३. **जे.**। गगणतलमभिलंघमाणसिहरा-**कखगटत्रि मु।** गगणतलमणुलिहंतसिहरा - **L** । ४. **कखगटत्रिमु.** । तवणिज्जमयवा० **ग** । तवणिज्जवा० **L** ।।

चित्ता' विविधा अनेकप्रकारा ये मणयः–चन्द्रकान्ताद्या यानि च रत्नानि–कर्केतनादीनि तेषां भक्तिभिः–विच्छित्तिभिश्चित्रा–नानारूपा आश्चर्यवन्तो वा नानाविधमणिरत्नभक्तिविचित्राः **'वाउद्धुयविजयवेजयंती-पडागच्छत्तातिछत्तकलिया'** वातोद्धूता–वायुकम्पिता विजयः–अभ्युदयस्तत्संसूचिका वैजयन्तीनामानो (नाम्न्यो) याः पताकाः, अथवा विजया इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः पताकास्ता एव विजयवर्जिता वैजयन्त्यः, छत्रातिच्छत्राणि–उपर्युपरिस्थितान्यातपत्राणि तैः कलिता वातोद्धूतविजयवैजयन्तीपताका-छत्रातिच्छत्रकलिताः **'तुङ्गाः'** उच्चा उच्चैस्त्वेन चतुर्योजन-प्रमाणत्वात्, अत एव **'गगणतलमणुलिहन्तसिहरा'** इति, गगनतलम्–अम्बरम् अनुलिखन्ति–अभिलङ्घयन्ति शिखराणि येषां ते गगनतलानुलिखच्छिखराः, तथा जालानि–जालकानि यानि भवनभित्तिषु लोके प्रतीतानि तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि येषु ते **जालान्तररत्नाः,** सूत्रे चात्र विभक्तिलोपः प्राकृतत्वात्, तथा **पञ्जराद् उन्मीलिता इव**–बहिष्कृता इव, यथा हि किल किमपि वस्तु वंशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्तमविनष्टच्छायं भवति एवं तेऽपि प्रासादावतंसका इति भावः, तथा मणिकनकानि–मणिकनकमय्यः स्तूपिकाः–शिखराणि येषां ते **मणिकनकस्तूपिकाः,** तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकरत्नानि भित्त्यादिषु पुण्ड्रविशेषा अर्द्धचन्द्राश्च द्वारादिषु तैश्चित्रा–नानारूपा आश्चर्यभूता **विकसितशतपत्र-पुण्डरीकतिलका[रत्ना]र्द्धचन्द्रचित्राः अन्तर्बहिश्च** [नाना–अनेकप्रकारा ये चन्द्रकान्ताद्या **मणयस्तन्मयानि**–तत्प्रधानानि यानि **दामा**नि–पुष्पमालास्तैर**लङ्कृताः**] **'श्लक्ष्णाः'** मसृणाः, तथा तपनीयं–सुवर्णविशेषस्तन्मय्या वालुकायाः प्रस्तटं–प्रतरो येषु ते **तपनीय[रुचिर]वालुकाप्रस्तटाः 'सुहफासा सस्सिरीयरूवा पासाईया'** इत्यादि प्राग्वत्।।३०७।।

(३०८) तेसि णं पासायवडेंसगाणं उल्लोया पउमलता जाव सामलयाभत्तिचित्ता सव्वतवणिज्जमता अच्छा जाव पडिरूवा।। ३०८।।

'तेसि ण'मित्यादि, **तेषां च प्रासादावतंसकानाम् 'उल्लोकाः'** उपरितनभागाः **पद्मलता**भक्तिचित्रा अशोकलताभक्तिचित्राश्चम्पकलताभक्तिचित्राश्चूतलताभक्तिचित्रा वनलताभक्तिचित्रा वासन्ति-कलताभक्तिचित्राः [श्यामलताभक्तिचित्राः] **सर्वात्मना तपनीयमयाः 'अच्छा** सण्हा **जाव पडिरूवा'** इति विशेषणकदम्बकं प्राग्वत्।। ३०८।।

(३०९) तेसि णं पासायवडिंसगाणं पत्तेयं पत्तेयं अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते, से जहा णाम ए आलिंगपुक्खरे ति वा जाव मणीहिं उवसोभिए, मणीण वण्णो गंधो फासो य नेयव्वो।।३०९।।

'**तेसि ण**'मित्यादि, **तेषां प्रासादावतंसकानामन्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, 'से जहा नाम ए आलिंगपुक्खरे इ वा**' इत्यादि समस्तं भूमिवर्णनं **मणीनां वर्ण**पञ्चकसुरभि**गन्ध**-शुभ**स्पर्श**वर्णनं प्राग्वत्।। ३०९।।

(३१०) तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं मणिपेढियाओ पण्णत्ताओ, ताओ णं मणिपेढियाओ जोयणं आयाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वरयणामईओ जाव पडिरूवाओ।। ३१०।।

(३११) तासि णं मणिपेढियाणं उवरिं पत्तेयं २ सीहासणे पण्णत्ते, तेसि णं सीहासणाणं अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-रयतामया सीहा, सोवण्णिया पादा, तवणिज्जमया चक्कला, णाणामणिमयाइं [१]पायपीढ(सीस)गाइं, जंबूणय-मताइं गत्ताइं, वतिरामया संधी, नाणामणिमए वेच्चे, ते णं सीहासणा ईहामिय-उसभ जाव पउमलयभत्तिचित्ता ससारसारोवइयविविहमणिरयणपायपीढा अत्थरग-मिउमसूरग-नवतयकुसंत-लिं[२]च्चसीहकेसरपच्चुत्थताभिरामा आईणगरुयबूरणवनीत-तूलमउयफासा सुविरचितरयत्ताणा उवचियखोमदुगुल्लयपडिच्छयणा रत्तंसुयसंवुया सुरम्मा पासाईया ४।। ३११।।

'**तेसि ण**'मित्यादि, **तेषां** प्रासादावतंसकानामन्तर्**बहुसमरमणीयानां भूमिभागानां बहुमध्यदेश-भागे प्रत्येकं प्रत्येकं [मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजनमायाम-विष्कम्भेन अर्धयोजनानि बाहल्येन सर्वरत्नमय्यो यावत्प्रतिरूपाः तासां मणिपीठिकानामुपरि] सिंहासनं**

---

१. क ख ग ट त्रि। पायपीढा - ता। पायसीसगाइं - V।। २. लिक्ख० जे.। द्रष्टव्यं राजप्र. सू. ३७ टीप्पणम्।।

प्रज्ञप्तं, तेषां च सिंहासनानामयमेतद्रूपो 'वर्णावासो' वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-रजतमयाः सिंहा** तैरुपशोभितानि सिंहासनानि **'सौवर्णिकाः'** सुवर्णमयाः **पादाः तपनीयमयानि चक्कलानि-** पादानामधःप्रदेशाः भवन्ति [मुक्तानानामणिमयानि पादानामधःप्रदेशाः] प्रयुक्ताः, **नानामणिमयानि 'पाद-शीर्षकाणि'** पादानामुपरितना अवयवविशेषा **जाम्बूनदमयानि गात्राणि** [१]ईषदच्छाः **'वज्रमयाः'** वज्ररत्नापूरिताः **'सन्धयः'** गात्राणां सन्धिमेला **नानामणिमयं 'वेच्चं'** व्यूतं वानमित्यर्थः, आह च- **चूर्णिकृत्-'वेच्चे वाणक्कतेण'[ ]** मित्यादि, **तानि च सिंहासनानि ईहामृग-ऋषभ-**तुरग-नर-मकर-व्याल-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वनलता-**पद्मलताभक्तिचित्राणि 'ससारसारोवचिय-विविहमणिरयणपादपीढा'** इति, सारसारैः-प्रधानप्रधानैर्विविधैर्मणिरत्नैरुपचितैः पादपीठैः सह यानि तानि तथा, प्राकृतत्वाच्च उपचितशब्दस्यान्तरुपन्यासः, **'अत्थर-मउय(मिउ)-मसूरग-नवतयकुसन्त-लित्त-केसर-पच्चत्थुयाभिरामा'** इति, आस्तरकम्-आच्छादनं मृदु येषां मसूरकाणां तानि आस्तरकमृदूनि, विशेषणस्य परनिपातः प्राकृतत्वात्, नवा त्वग् येषां ते नवत्वचः कुशान्ता-दर्भपर्यन्ताः, नवत्वचश्च ते कुशान्ताश्च नवत्वक्कुशान्ताः प्रत्यग्रत्वग्दर्भपर्यन्तरूपाणि त्वतिकोमलानि लित्तानि-नम्र(मन)शीलानि च केसराणि, क्वचित् सिंहकेसरेति पाठस्तत्र सिंहकेसराणीव केसराणि मध्ये मसूरकाणां तानि नवत्वक्कुशान्तचिल्ल(लित्त)केसराणि, सिंहकेसरेति पाठपक्षे एकस्य केसरशब्दस्य शाकपार्थिवादि-दर्शनाल्लोपः, आस्तरकमृदुभिर्मसूरकैर्नवत्वक्कुशान्तलिच्च(त्त)केसरैः प्रत्यवस्तृतानि-आच्छादितानि सन्ति यानि अभिरामाणि तानि तथा, विशेषणपूर्वापरनिपातो यादृच्छिकः प्राकृतत्वात्, **'आईणग-रुय-बूर-नवणीय-तूलफासा'** इति आजिनकं-चर्म्ममयं वस्त्रं तच्च स्वभावादतिकोमलं भवति, रूतं-कर्पासपक्ष्म बूरो-वनस्पतिविशेषः नवनीतं-म्रक्षणं तूलम्-अर्कतूलं तेषामिव स्पर्शो येषां तानि तथा, तथा सुविरचितं रजस्त्राणं प्रत्येकमुपरि येषां तानि **सुविरचितरजस्त्राणानि 'उवचिय [खोम] दुगुल्ल-पट्टपडिच्छायणे'** इति उपचितं-परिकर्म्मितं यत्क्षौमं दुकूलं-कार्पासिकं वस्त्रं तत्प्रतिच्छादनं-रजस्त्राणस्योपरि द्वितीयमाच्छादनं प्रत्येकं येषां तानि तथा, तत उपरि **'रत्तंसुयसंवुया'** इति रक्तांशुकेन-अतिरमणीयेन रक्तेन वस्त्रेण संवृतानि-आच्छादितानि रक्तांशुकसंवृतानि, अत एव **सुरम्याणि 'पासाईया'** इत्यादि पदचतुष्टयं प्राग्वत्।। ३१०-३११ ।।

---

१. ईषादीनि-**जंबू.टीका** ।।

(३१२) तेसि णं सीहासणाणं उप्पिं पत्तेयं पत्तेयं विजयदूसे पण्णत्ते, ते णं विजयदूसा सेता [१]संख-कुंद-दगरय-अमतमहियफेणपुंजसन्निकासा सव्वरयणामया अच्छा जाव पडिरूवा।।३१२।।

'तेसि ण'मित्यादि, **तेषां** च **सिंहासनानामुपरि प्रत्येकं प्रत्येकं विजयदूष्यं**-वस्त्रविशेषः **प्रज्ञप्तः**, आह च- मूलटीकाकारः-**"विजयदूष्यं वस्त्रविशेष"** इति। **'ते ण'**मित्यादि, **तानि** च **विजयदूष्याणि 'शङ्ख-कुन्द-दकरजो-ऽमृतमथितफेनपुञ्जसन्निकाशानि'** शङ्खः प्रतीतः कुन्देति-कुन्दकुसुमं दकरजः-उदककणाः अमृतस्य-क्षीरोदधिजलस्य मथितस्य यः फेनपुञ्जो-डिण्डीरोत्करस्तत्सन्निकाशानि-तत्समप्रभाणि, पुनः कथम्भूतानि? इत्यत आह-**'सव्वरयणामया'** सर्वात्मना रत्नमयानि **'अच्छा** सण्हा **जाव पडिरूवा'** इति विशेषणकदम्बकं प्राग्वत्।।३१२।।

(३१३) तेसि णं विजयदूसाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं वइरामया अंकुसा पण्णत्ता, तेसु णं वइरामएसु अंकुसेसु पत्तेयं २ कुंभिक्का मुत्तादामा पण्णत्ता, ते णं कुंभिक्का मुत्तादामा अन्नेहिं चउहिं चउहिं तदद्धुच्चप्पमाणमेत्तेहिं अद्धकुंभिक्केहिं मुत्तादामेहिं सव्वतो समंता संपरिक्खित्ता, ते णं दामा तवणिज्जलंबूसका सुवण्ण-पयरगमंडिता जाव सिरिए अतीव २ उवसोभेमाणा २ चिट्ठंति।। ३१३।।

(३१४) तेसि णं पासायवडिंसगाणं उप्पिं बहवे अट्ठट्ठमंगलगा पण्णत्ता सोत्थिय तधेव [२]जाव छत्ता।। ३१४[३]।।

'तेसि ण'मित्यादि, **तेषां**-सिंहासनोपरिस्थितानां **विजयदूष्याणां प्रत्येकं प्रत्येकं बहुमध्यदेशभागे [प्रत्येकं २] वज्रमयाः** वज्ररत्नात्मकाः **'अङ्कुशाः'** अङ्कुशाकारा मुक्तादामावलम्बनाश्रयभूताः **प्रज्ञप्ताः, तेषु च वज्रमयेष्वङ्कुशेषु प्रत्येकं प्रत्येकं 'कुम्भाग्रं'** मगधदेशप्रसिद्धं कुम्भप्रमाणमुक्तामयं **मुक्तादाम प्रज्ञप्तं, तानि च कुम्भाग्राणि मुक्तादामानि** प्रत्येकं प्रत्येक**मन्यैश्चतुर्भिः[२] कुम्भाग्रैर्मुक्तादामभिस्तदर्धोच्चप्रमाणमात्रैः 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन

---

१. गटत्रि । संखंक- कुद - L जे. ।। २. द्र. ३/२८९-२९१।। ३. सूत्र ३१४ जे. नास्ति । वृत्तौ नास्ति व्याख्यातम् ।।

संपरिक्षिप्तानि, '[१]ते णं दामा तवणिज्जलंबूसगा नाणामणिरयणविविहहारद्धहारउवसोभियसमुदाया ईसिमन्नमन्नमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायं एइज्जमाणा२ वेइज्जमाणा२ [२]पकंपमाणा पकंपमाणा पझंझमाणा पझंझमाणा ओरालेणं मणुण्णेणं मणहरेणं कण्णमणनिव्वुइकरेणं[३] ते पएसे सव्वतो समंता आपूरेमाणा २ सिरीए उवसोभेमाणा **चिट्ठंति** ।।३१३-१४।।

(३१५) विजयस्स णं दारस्स उभओ पासिं दुहओ णिसीहियाए दो दो तोरणा पण्णत्ता[४], ते णं तोरणा णाणामणिमया तहेव जाव अट्ठट्ठमंगलका य छत्तातिछत्ता ।।३१५।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वे द्वे तोरणे प्रज्ञप्ते, तानि च तोरणानि नानामणिमयानी**त्यादितोरणवर्णनं निरवशेषं प्राग्वत्।।३१५।।

(३१६) तेसि णं तोरणाणं पुरतो दो दो सालभंजिताओ पण्णत्ताओ[५],वण्णओ ।। ३१६।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे शालभञ्जिके प्रज्ञप्ते,** शालभञ्जिकावर्णनं प्राग्वत्।। ३१६।।

(३१७) तेसि णं तोरणाणं पुरतो दो दो णागदंतगा प[६]ण्णत्ता, वण्णओ, उवरिमा णागदंता णत्थि।। ३१७।।

'तेसि ण'मित्यादि, **तेषां तोरणानां द्वौ द्वौ नागदन्तकौ प्रज्ञप्तौ,** तेषां च नागदन्तकानां वर्णनं यथाऽधस्तादनन्तरमुक्तं तथा वक्तव्यं, नवरमत्रो**परि नागदन्तका न वक्तव्या,** अभावात्।।३१७।।

(३१८) तेसि णं तोरणाणं पुरतो दो दो हयसंघाडगा दो दो गयसंघाडा एवं णर-किन्नर-किंपुरिष महोरग-गंधव्व-उसभसंघाडा पण्णत्ता, सव्वरयणामया अच्छा जाव पडिरूवा, एवं दो दो पंतीओ दो दो वीहीओ मिहुणगा, तेसिं णं तोरणाण

---

१. अत्र ३।२६५ तमं सूत्रं द्रष्टव्यम्। अत्र सूत्र-वृत्त्योर्भेदः दृश्यते। २. पलंबमाणा पलंबमाणा - **राजप्रश्नीयसूत्रे ।। ३.** ०णं सद्देणं - **राजप्रश्नीयसूत्रे ।। ४.** ०त्ता वण्णओ जाव सतसहस्सपत्तहत्थगा-जे.। वण्णओ जाव सहस्सपत्तहत्थगा **-L ।। ५. L जे.।** ० ओ जहेवणं हेट्ठा तहेव - **कखगटत्रिमु ।। ६. जे.।** पण्णत्ता णागदंत-वण्णओ **...L।** पण्णत्ता ते णं णागदंतगा मुत्ताजालंतरूसिया तहेव, तेसु णं णागदंतएसु बहवे किण्हे सुत्तवट्टवग्घारित-मल्लदामकलावा जाव चिट्ठंति **इति कखगटत्रि मु. ।।**

पुरओ दो दो पउमलताओ जाव सामलतातो णिच्चं कुसुमितातो जाव वडेंसगधरीओ सव्वरयणमया अच्छाओ जाव पडिरूवाओ ४ दो दो पउमलयाओ जाव पडिरूवाओ ।। ३१८ ।।

(३१९) तेसिं[१] णं तोरणाणं पुरतो[२] दो दो दिसासोवत्थिया सव्वरयणामया[३] अच्छा जाव पडिरूवा ।। ३१९ ।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ हयसङ्घाटकौ द्वौ द्वौ गजसङ्घाटकौ द्वौ द्वौ नरसङ्घाटकौ द्वौ द्वौ किन्नरसङ्घाटकौ द्वौ द्वौ किंपुरुषसङ्घाटकौ द्वौ द्वौ महोरगसङ्घाटकौ द्वौ द्वौ गन्धर्वसङ्घाटकौ द्वौ द्वौ वृषभसङ्घाटकौ,** एते च कथम्भूताः? इत्याह–**'सव्वरयणामया अच्छा** सण्हा' इत्यादि प्राग्वत्, **एवं पङ्क्तिवीथीमिथुनकान्यपि** प्रत्येकं वाच्यानि।। **'तेसिं तोरणाण'**मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे पद्मलते याव**त्करणाद् द्वे द्वे नागलते, द्वे द्वे अशोकलते, द्वे द्वे चम्पकलते, द्वे द्वे चूतलते, द्वे द्वे वासन्तीलते, द्वे द्वे कुन्दलते, द्वे द्वे अतिमुक्तकलते इति परिग्रहः, **द्वे द्वे श्यामलते,** एताश्च कथम्भूताः? इत्याह–**'निच्चं कुसुमियाओ'** इत्यादि **याव**त्करणात् 'निच्चं मउलिया निच्चं लवइयाओ निच्चं थइयाओ निच्चं गोच्छियाओ निच्चं जमलियाओ निच्चं विणमियाओ [निच्चं पणमियाओ] निच्चं सुविभत्तपडिमंजरिवडिंसगधरीओ निच्चं कुसुमियमउलियलवइयथवइयनिच्चं गोच्छियविणमियपणमियसुविभत्तपडिमंजरि**वडिंसगधरीओ'** [३।२६८] इति परिगृह्यते, अस्य व्याख्यानं प्राग्वत्। पुनः कथम्भूताः? इत्याह–**'सव्वरयणामया जाव पडिरूवा'** इति, अत्रापि यावत्करणात् 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकपरिग्रहः स च प्राग्वद् भावनीयः।। ३१८-३१९।।

(३२०) तेसि णं तोरणाणं पुरतो दो दो वंदणकलसा[४] पण्णत्ता, ।।३२०।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ वन्दनकलशौ प्रज्ञप्तौ, वर्णक**श्च वन्दनकलशानां 'वरकमलपइट्ठाणा' इत्यादिरूपः सर्वः प्राक्तनो वक्तव्यः।। ३२० ।।

---

१. एतत् ३१९ सूत्रं कख-प्रत्योः नास्ति। वृत्तौ च व्याख्यानं नास्ति ।। २. जे.L । ०तो अक्खयसोवत्थिया-गटत्रि ।। ३. सव्व जंबूणतामया - जे. ।। ४. जे. L । कखगटत्रिमु. मध्ये - पण्णत्ता ते णं वंदणकलसा वरकमलपइट्ठाणा तहेव सव्वरयणामया जाव पडिरूवा समणाउसो! इति पाठः ।।

(३२१) तेसि णं तोरणाणं पुरओ दो दो भिंगारगा पण्णत्ता वरकमलपइट्ठाणा जाव[1] महता महता मत्तगयमहामुहागितिसमाणा पण्णत्ता समणाउसो!।।३२१।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ भृङ्गारकौ प्रज्ञप्तौ,** तेषामपि वन्दनकलशानामिव वर्णको वक्तव्यः, नवरं पर्यन्ते **'मत्तगयमहामुहागिइसमाणा पण्णत्ता समणाउसो!'** इति वक्तव्यं 'मत्तगयमहामुहागिइसमाणा' इति मत्तो यो गजस्तस्य महद्–अतिविशालं यन्मुखं तस्याऽऽकृतिः–आकारस्तत्समानाः–तत्सदृशाः **प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!**।।३२१।।

(३२२) तेसि णं तोरणाणं पुरतो दो दो आतंसगा पण्णत्ता, तेसि णं आतंसगाणं अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-तवणिज्जमया पयंठगा वेरुलियमया छरुहा[2] (थंभया) वइरामया वरंगा णाणामणिमया वलक्खा अंकमया मंडला अणोघसिय-निम्मलाए छायाए समणुबद्धा चंदमंडलपडिणिकासा महता महता अद्धकायसमाणा पण्णत्ता समणाउसो!।। ३२२।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वावादर्शकौ प्रज्ञप्तौ, तेषां चादर्शकानामयमेतद्रूपः 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-तपनीयमयाः 'प्रकण्ठकाः'** पीठकविशेषाः **'वैडूर्यमया थंभया'** (छरुहा)आदर्शकगण्डप्रतिबन्धप्रदेशाः, आदर्शकगण्डानां मुष्टिग्रहणयोग्याः प्रदेशा इति भावः, **वज्ररत्नमया वराङ्गा** गण्डा इत्यर्थः, **'नानामणिमया वलक्षाः'** वलक्षो नाम शृङ्खलादिरूपमवलम्बनम्, **अङ्कमयानि**–अङ्करत्नमयानि **मण्डलानि** यत्र प्रतिबिम्बसंभूतिः **'अणोहसियणिम्मलाए छायाए'** इति, अवघर्षणमवघर्षितं, भावे क्तप्रत्ययः, भूत्यादिना निर्[3]मज्जनमित्यर्थः, अवघर्षितस्याभावोऽनवघर्षितं तेन निर्म्मला अनवघर्षितनिर्म्मला तया छायया समनुबद्धाः **'चंदमंडलपडिनिकासा'** इति चन्द्रमण्डलसदृशाः **'महया महया'** अतिशयेन महान्तः **'अर्द्धकायसमानाः'** द्रष्टुः शरीरार्द्धप्रमाणाः **प्रज्ञप्ता** हे **श्रमण**! हे **आयुष्मन्**!।।३२२।।

---

१ . **जे.L** । जा० सव्वरयणामया अच्छा जाव पडिरूवा महता - **इति क खगट त्रि मु.** ।। २. थरुहा - **जे.** । थेरुहा - **त्रि** । आवरुहा -**ग** ।। ३. निर्मार्जनम् - **इति जन्बूद्वीपप्र. वृत्तौ पृ. ७६।।**

(३२३-२४) तेसि णं तोरणाणं पुरतो दो दो वइरणाभा थाला पण्णत्ता, ते णं थाला अच्छतिच्छडियसालितंदुलनहसंदट्ठ[१]पडिपुण्णा इव चिट्ठंति, सव्वजंबूणतमता अच्छा जाव पडिरूवा महता महता रहचक्कसमाणा समणाउसो!।। तेसि णं तोरणाणं पुरतो दो दो पातीओ पण्णत्ताओ, ताओ णं पातीओ अच्छोदयपडिहत्थाओ णाणाविध[२]पंचवण्णस्स फलहरितगस्स बहुपडिपुण्णाओ विव चिट्ठंति सव्वरयणामतीओ जाव पडिरूवाओ महया महया गोकलिंजगचक्कसमाणाओ पण्णत्ताओ समणाउसो!।।३२३-२४।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे वज्रनाभे स्थाले प्रज्ञप्ते, तानि च स्थालानि** [तिष्ठन्ति] **'अच्छ-तिच्छडियसालितंदुलनहसंदट्ठपडिपुण्णा इव चिट्ठंति'** अच्छा-निर्म्मलाः शुद्ध[३]स्फटिकवत्त्रिच्छटिता, अत एव नखसन्दष्टाः-नखाः सन्दष्टा मुसलादिभिश्चुम्बिता येषां ते तथा, भार्यादिदर्शनात्परनिपातो निष्ठान्तस्य, अच्छैस्त्रिच्छटितैः शालितन्दुलैर्नखसन्दष्टैः परिपूर्णानीव अच्छत्रिच्छटितशालितन्दुलनखसन्दष्टपरिपूर्णानीव पृथिवीपरिमाणरूपाणि तानि तथास्थितानि केवलमेवमाकाराणीत्युपमा, तथा चाह-**'सव्वजंबूनदमया'** सर्वात्मना जम्बूनदमयानि '**अच्छा** सण्हा' इत्यादि प्राग्वत्, **'महया महया'** इति अतिशयेन महान्ति **रथचक्रसमानानि** प्रज्ञप्तानि हे **श्रमण**! हे **आयुष्मन्**!।। **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे 'पाईओ'** इति पात्र्यौ **प्रज्ञप्ते, ताश्च पात्र्यः 'अच्छोदकपडिहत्थाओ'** इति स्वच्छपानीयपरिपूर्णाः **'नाणाविहस्स फलहरियस्स बहुपडिपुण्णाओ विवे'**ति अत्र षष्ठी तृतीयार्थे बहुवचने चैकवचनं प्राकृतत्वात्, नानाविधैः 'फलहरितैः' हरितफलैर्बहु-प्रभूतं प्रतिपूर्णा इव तिष्ठन्ति, न खलु तानि फलानि जलं वा, किन्तु तथारूपाः शाश्वतभावमुपगताः पृथिवीपरिणामास्तत उपमानमिति, **'सव्वरयणामईओ'** इत्यादि प्राग्वत्, **'महया महया'** इति अतिशयेन महत्यो **गोकलिञ्ज[र]चक्रसमानाः प्रज्ञप्ता** हे**श्रमण!** हे **आयुष्मन्**!।३२३-२४।

---

१. L.जे.। बहुपिडपुण्णा-**मु.क ख ग ट ।। २. कखगटत्रिता । ०पंचवण्ण० L नास्ति ।। ३.** शुद्धा-**राजप्रश्नीयवृत्तौ पृ-१५० ।।**

(३२५) तेसि णं तोरणाणं पुरतो दो दो सुपतिट्ठगा पण्णत्ता, ते णं सुपतिट्ठगा सव्वोसधिपडिपुण्णा णाणाविधस्स य पसाहणगभंडस्स बहुपडिपुण्णा इव चिट्ठंति सव्वरयणामया अच्छा जाव पडिरूवा।। ३२५।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ सुप्रतिष्ठकौ** आधारविशेषौ **प्रज्ञप्तौ, ते च सुप्रतिष्ठकाः सर्वौषधिप्रतिपूर्णा नानाविधैः** पञ्चवर्णैः **प्रसाधनभाण्डैश्च बहुपरिपूर्णा इव तिष्ठन्ति,** अत्रापि तृतीयार्थे षष्ठी बहुवचने चैकवचनं प्राकृतत्वात्, उपमानभावना प्राग्वत्, **'सव्वरयणामया'** इत्यादि तथैव।। ३२५।।

(३२६) तेसि णं तोरणाणं पुरतो दो दो मणोगुलियाओ पण्णत्ताओ। →ताओ[1] णं मणोगुलियाओ सव्ववेरुलियामईओ अच्छाओ जाव पडिरूवाओ← तासु णं मणोगुलियासु बहवे सुवण्णरुप्पामया फलगा पण्णत्ता, तेसु णं सुवण्णरुप्पामएसु फलएसु बहवे वइरामया णागदंतगा पण्णत्ता, तेसु णं वइरामएसु णागदंतएसु बहवे रययामया सिक्कया पण्णत्ता, तेसु णं रययामएसु सिक्कएसु बहवे[2] वायकरगा पण्णत्ता। ते णं वायकरगा किण्हसुत्तसिक्कगवत्थिया जाव सुक्किलसुत्तसिक्कग-वत्थिया सव्ववेरुलियामया अच्छा जाव पडिरूवा।।३२६ ।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे मनोगुलिके प्रज्ञप्ते,** मनोगुलिका नाम पीठिका, उक्तं च– मूलटीकायां–**'मनोगुलिका पीठिके'**ति, **ताश्च मनोगुलिकाः सर्वात्मना 'वैडूर्यमय्यो'** वैडूर्यरत्नात्मिकाः **'अच्छा'** इत्यादि प्राग्वत्। **'तासु णं मणोगुलियासु बहवे'** इत्यादि, तासु मनोगुलिकासु बहूनि **सुवर्णमयानि रूप्यमयानि** च **फलकानि प्रज्ञप्तानि, तेषु सुवर्णरूप्यमयेषु फलकेषु बहवो वज्रमयाः 'नागदन्तकाः'** अङ्कुटकाः **प्रज्ञप्ताः, तेषु नागदन्तकेषु बहूनि 'रजतमयानि'** रूप्यमयानि **सिक्ककानि प्रज्ञप्तानि, तेषु च रजतमयेषु सिक्ककेषु बहवो 'वातकरकाः'** जलशून्याः करका इत्यर्थः **प्रज्ञप्ताः**। **'ते ण'**मित्यादि, **ते वातकरकाः 'कृष्णसूत्रसिक्कगवस्थिताः'** इति, आच्छादनं गवस्थाः[ताः] सञ्जाता एष्विति गवस्थिताः कृष्णसूत्रैः–कृष्णसूत्रमयैर्गवस्थैरिति गम्यते, सिक्ककेषु

---

१. जे.ता। →←**चिह्नद्वयमध्यवर्तिपाठः- कखगटत्रि नास्ति** ।। २. बहवे वेरुलिया वातकरगा पण्णत्ता। किण्हसुत्त० जे. ।।

गवस्थिताः कृष्णसूत्रसिक्कगवस्थिताः, एवं नीलसूत्रसिक्ककगवस्थिता इत्याद्यपि भावनीयं, ते च वातकरकाः **सर्वात्मना वैडूर्यमया अच्छा** इत्यादि प्राग्वत्।।३२६।।

(३२७) तेसि णं तोरणाणं पुरओ दो दो चित्ता रयणकरंडगा पण्णत्ता, से जहा णाम ए-रण्णो चाउरंतचक्कवट्टिस्स चित्ते रयणकरंडे वेरुलियमणि-फालिय-पडल-पच्चोयडे साए पभाए ते पदेसे सव्वतो समंता ओभासेइ उज्जोवेति तावेइ पभासेति, एवामेव ते चित्ता रयणकरंडगा वेरुलिय० जाव साए पभाए ते पदेसे सव्वतो समंता [१]ओभासेति ४ ।।३२७।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ 'चित्रौ'** चित्रवर्णोपेतावाश्चर्यभूतौ वा **रत्नकरण्डकौ प्रज्ञप्तौ, 'से जहा नामए'** इत्यादि, स यथा नाम–**राज्ञश्चतुरन्तचक्रवर्त्तिनः,** चतुर्षु–पूर्वापरदक्षिणोत्तररूपेषु पृथ्वीपर्यन्तेषु चक्रेण वर्त्तितुं शीलं यस्य तस्य **'चित्रः'** आश्चर्यभूतो नानामणिमयत्वेन नानावर्णो वा **'वेरुलियमणिफालियपडलपच्चोयडे'** इति बाहुल्येन वैडूर्यमणिमयः, तथा 'स्फाटिकपटल-प्रत्यवतटः' स्फाटिकपटलमयाच्छादनः **'साए पभाए'** इति स्वकीयया प्रभया **'तान्'** प्रत्यासन्नान् **प्रदेशान् 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येना**वभासयति,** एतदेव पर्यायत्रयेण व्याचष्टे–**उद्द्योतयति तापयति प्रभासति, 'एवमेवे'**त्यादि सुगमम्।। ३२७।।

(३२८-३०) तेसि णं तोरणाणं पुरतो दो दो हयकंठगा गयकंठा नरकंठा किण्णरकंठा किंपुरुषकंठा महोरगकंठा गंधव्वकंठा उसभकंठगा पण्णत्ता सव्वरयणा-मया अच्छा जाव पडिरूवा।। (३२९) [२]तेसि णं तोरणाण पुरतो दो दो पुप्फचंगेरीओ, एवं मल्लचुण्णगंधवत्थाभरणचंगेरीओ सिद्धत्थचंगेरीओ लोमहत्थचंगेरीओ सव्वरयणामतीओ अच्छाओ जाव पडिरूवाओ।। (३३०) →[३]एवं पडलगा वि दो दो ←।।३२८-३३०।।

---

१. ओभासेंति ४ सिरिए अतीव २ उवसोभेमाणा २ **चिट्ठंति जे.।। २. जे. L।** तेसिणं तोरणाण पुरतो - **स्थाने कखगटत्रि मु. मध्ये** तेसु णं हयकंठएसु जाव उसभकंठएसु **इति पाठः।। ३. जे.। ३३० सूत्र स्थाने मु. आदि मध्ये-** तेसि णं तोरणाणं पुरतो दो दो पुप्फपडलाइं जाव लोमहत्थपडलाइं सव्वरयणामयाइं जाव पडिरूवाइं **इति पाठः।।**

'तेसि णं तोरणाण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ 'हयकण्ठौ'** हयकण्ठप्रमाणौ रत्नविशेषौ प्रज्ञप्तौ, एवं **गजकिन्नरकिंपुरुषमहोरगगन्धर्ववृषभकण्ठा** अपि वाच्याः, उक्तं च– मूलटीकायां–'हयकण्ठौ हयकण्ठप्रमाणौ रत्नविशेषौ," [हा.टी.] एवं सर्वेऽपि कण्ठा वाच्या इति, तथा चाह–**'सव्वरयणामया'** सर्वे 'रत्नमयाः' रत्नविशेषरूपा **'अच्छा'** इत्यादि प्राग्वत्।। **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे पुष्पचङ्गेर्यौ प्रज्ञप्तौ, एवं माल्य-चूर्ण-गन्ध-वस्त्रा-ऽऽभरण-सिद्धार्थक-लोमहस्तकचङ्गेर्योऽपि** वक्तव्याः, एताश्च सर्वा अपि सर्वात्मना रत्नमय्यः, **'अच्छा'** इत्यादि प्राग्वत्।। **एवं** पुष्पादीनामष्टानां **पटलकान्यपि द्विद्विसङ्ख्याकानि** वाच्यानि।।३२८-३३०।।

(३३१-३३२) तेसि णं तोरणाणं पुरतो दो दो सीहासणाइं पण्णत्ताइं,[1] तेसि णं सीहासणाणं वण्णओ निरवयवो[जाव दामा]।। तेसि णं तोरणाणं पुरतो दो दो रुप्पछदा छत्ता पण्णत्ता, ते णं छत्ता[2] वेरुलियविमलदंडा जंबूणयकन्निका वइरसंधी मुत्ताजालपरिगता अट्ठसहस्सवरकंचणसलागा दद्दरमलयसुगंधी- सव्वोउअसुरभि-सीयलच्छाया मंगलभत्तिचित्ता चंदागारोवमा[3] वट्टा।। ३३१-३३२।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे सिंहासने प्रज्ञप्ते, तेषां च सिंहासनानां वर्णकः** प्रागुक्तो **निरवशेषो** वक्तव्यो यावद्दामवर्णनम्।। **'तेसि ण'**मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे 'रूप्यच्छदे'** रूप्याच्छादने **छत्रे प्रज्ञप्ते, तानि च छत्राणि वैडूर्यरत्नमयविमलदण्डानि जाम्बूनद-कर्णिकानि 'वज्रसन्धीनि'** वज्ररत्नापूरितदण्डशलाकासन्धीनि **मुक्ताजालपरिगतानि** अष्टौ सहस्राणि– अष्टसहस्रसङ्ख्याका वरकाञ्चनशलाका–वरकाञ्चनमय्यः शलाका येषु तानि **अष्टसहस्रवर-कञ्चनशलाकानि 'दद्दरमलयसुगन्धिसव्वोउयसुरहि-सीयलच्छाया'** इति दर्दरः–चीवरावनद्धं कुण्डिकादिभाजनमुखं तेन गालितास्तत्र पक्वा वा ये मलय इति–मलयोद्भवं श्रीखण्डं तत्सम्बन्धिनः सुगन्धयो गन्धवासास्तद्वत्सर्वेषु ऋतुषु सुरभिः शीतला च छाया येषां तानि, तथा **'मंगलभत्तिचित्ता'** तेषां अष्टानां मङ्गलानां भक्त्या–विच्छित्त्या चित्रम्-आलेखो येषां तानि मङ्गलभक्तिचित्राणि, तथा **'चंदागारोवमा'** इति चन्द्राकारः–चन्द्राकृतिः स उपमा येषां तानि तथा चन्द्रमण्डलवद् **वृत्तानी**ति भावः।।३३१-३३२।।

---

१. **जे.**। तेसिं णं सीहासणाणं अयमेयारूवे वण्णावासे पण्णत्ते तहेव जाव पासातीया ४ **इति कखगटत्रिमु.।। २. जे. L.। वेरुलियभिसंतविमल० कखगटत्रिमु.।। ३. कगटत्रिमु। छत्ता. ख जे. ।।**

(३३३) तेसि णं तोरणाणं पुरतो दो दो चामराओ पण्णत्ताओ, ताओ णं चामराओ चन्दप्पभवइरवेरुलियनानामणिरयणखचियचित्तदंडा[१] सुहुमरयतदीहवालाओ संखंककुंददगरयअमयमहियफेणपुंजसण्णिकासाओ सव्वरयणामयाओ अच्छाओ जाव पडिरूवाओ।।३३३।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वे द्वे चामरे प्रज्ञप्ते, तानि च चामराणि 'चंदप्पभवइरवेरुलियनाणामणिरयणखचियदंडा'** इति चन्द्रप्रभः–चन्द्रकान्तो वज्रं वैडूर्यं च प्रतीतं चन्द्रप्रभ-वज्र-वैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु दण्डेषु ते तथा, एवंरूपाश्चित्रा–नानाकारा दण्डा येषां चामराणां तानि तथा, सूत्रे स्त्रीत्वं प्राकृतत्वात्, तथा **'सुहुमरययदीहवालाओ'** इति सूक्ष्मा रजतमया दीर्घा वाला येषां तानि तथा, **'संखंककुंददगरयअमयमहियफेणपुंजसंनिकासाओ'** इति शङ्खः–प्रतीतोऽङ्को–रत्नविशेषः कुन्देति–कुन्दपुष्पं दकरजः–उदककणाः अमृतमथितफेनपुञ्जः–क्षीरोदजलमथनसमुत्थफेनपुञ्जस्तेषामिव संनिकाशः–प्रभा येषां तानि तथा, **अच्छा** इत्यादि प्राग्वत्।।३३३।।

(३३४) तेसि णं तोरणाणं पुरतो दो दो तिल्लसमुग्गा एवं कोट्ठसमुग्गा पत्तसमुग्गा चोयसमुग्गा तयरसमुग्गा एलासमुग्गा हरियालसमुग्गा हिंगुलयसमुग्गा मणोसिलासमुग्गा अंजणसमुग्गा सव्वरयणामया अच्छा जाव पडिरूवा।। ३३४।।

'तेसि ण'मित्यादि, **तेषां तोरणानां पुरतो द्वौ द्वौ 'तैलसमुद्गकौ'** सुगन्धितैलाधारविशेषौ, उक्तं च– **जीवाभिगममूलटीकायां–'तैलसमुद्गकौ सुगन्धितैलाधारौ' [हा.टी.] एवं कोष्ठादिसमुद्गका** अपि वाच्याः, अत्र **सङ्ग्रहणिगाथा–**

"तेल्ले कोट्ठसमुग्गे पत्ते चोए य तगर एला य।
हरियाले हिंगुलए मणोसिला अंजणसमुग्गो।।१।।"

'सव्वरयणामया' इति एते सर्वेऽपि सर्वात्मना रत्नमयाः '**अच्छा** सण्हा' इत्यादि प्राग्वत्।।३३४।।

(३३५) विजये णं दारे अट्ठसयं चक्कज्झयाणं एवं मिगज्झयाणं गरुडज्झयाणं विगज्झयाणं उच्छज्झयाणं[२] छत्तज्झयाणं पिच्छज्झयाणं सउणिज्झयाणं सीहज्झयाणं

---

१. चन्दप्पभवइरवेरुलियणाणामणिरयणओवितचित्तदंडाओ-**ता।** नानामणिकणगरयणविमलमहरिहतवणिज्जुज्जलविचित्तदंडाओ चिल्लिआओ- **क ख ग ट त्रि । २. विक०जे. ।**

उसभज्झयाणं अट्ठसतं सेयाणं चउविसाणाणं णागवरकेतूणं एवामेव सपुव्वावरेणं विजयदारे य आसीयं केउसहस्सं भवतिति मक्खायं।। ३३५।।

'विजये णं दारे' इत्यादि, तस्मिन् **विजये द्वारे 'अष्टशतम्'** अष्टाधिकं शतं **'चक्रध्वजानां'** चक्रालेखरूपचिह्नोपेतानां ध्वजानाम्, एवं **मृग-गरुड-**[१]**ऋच्छ-च्छत्र-पिच्छ-शकुनि-सिंह-वृषभ-चतुर्दन्त-**हस्तिध्वजानामपि प्रत्येकमष्टशतमष्टशतं वक्तव्यम्, **'एवामेव सपुव्वावरेणं'** 'एवमेव' अनेन प्रकारेण सपूर्वापरेण सह पूर्वैरपरैश्च वर्त्तत इति सपूर्वापरं सङ्ख्यानं तेन **विजयद्वारे 'अशीतम्'** अशीत्यधिकं **केतुसहस्रं भवतीत्याख्यातं** मयाऽन्यैश्च तीर्थकृद्भिः।।३३५।।

(३३६-३४३) [२]**विजये णं दारे णव** [३]**भोमा पण्णत्ता, तेसि णं भोमाणं अंतो बहुसमरमणिज्जा भूमिभागा पण्णत्ता जाव मणीणं फासो। तेसि णं भोमाणं उप्पिं उल्लोया पउमलया भत्तिचित्ता जाव सामलताभत्तिचित्ता जाव सव्वतवणिज्जमता अच्छा जाव पडिरूवा। तेसि णं भोमाणं बहुमज्झदेसभाए जे से पंचमे भोमे तस्स णं भोमस्स बहुमज्झदेसभाए →**[४]**एत्थ णं महं एगे सीहासणे पण्णत्ते, सीहासणवण्णतो विजयदूसे अंकुसे कुंभिक्केसु जाव दामा चिट्ठंति←। तस्स णं सीहासणस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं एत्थ णं विजयस्स देवस्स चउण्हं सामाणियसहस्साणं चत्तारि भद्दासणसाहस्सीओ पण्णत्ताओ। तस्स णं सीहासणस्स पुरत्थिमेणं एत्थ णं विजयस्स देवस्स चउण्हं अग्गमहिसीणं** [५]**परिवाराणं चत्तारि भद्दासणा पण्णत्ता। तस्स णं सीहासणस्स दाहिणपुरत्थिमेणं एत्थ णं विजयस्स देवस्स अब्भिंतरियाए परिसाए अट्ठण्हं देवसाहस्सीणं अट्ठ भद्दासणसाहस्सीओ पण्णत्ताओ, तस्स णं सीहासणस्स दाहिणेणं एत्थ णं विजयस्स देवस्स मज्झिमियाए**

---

१. रुरुक- **मु.।** ऋक्षक - **जम्बूद्वीपप्र. पुण्यसागरवृत्तौ।** वृक - **जंबू. शां. वृत्तौ** । २. विजयस्स णं दारस्स पुरओ-**इति जंबूद्वीप० पुण्यसा. वृत्तौ।।** ३. भोम्मा-**जे । एवमग्रेऽपि ।।** ४.→← **चिह्नद्वयमध्यवर्तिपाठ स्थाने जे. मध्ये.** एत्थ णं एगा मणिपेढिया पण्णत्ता जोयणं आयाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं सव्व मणीमयी अच्छा जाव पडि० । तीसे णं मणिपेढियाए उप्पिं महं एगे सीहासणे प० वण्णओ विजयदूसे अंकुसे कुंभिक्केसु जाव सिरिए अतीव २ - **इतिपाठः ।।** ५. **सपरिवाराणं-जे. नास्ति ।।**

परिसाए दसण्हं देवसाहस्सीणं दस भद्दासणसाहस्सीओ पण्णत्ताओ । तस्स णं सीहासणस्स दाहिणपच्चत्थिमेणं एत्थ णं विजयस्स देवस्स बाहिरियाए परिसाए बारसण्हं देवसाहस्सीणं बारस भद्दासणसाहस्सीओ पण्णत्ताओ।।३३६-३४३।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्य** पुरतो **नव 'भौमानि'** विशिष्टानि स्थानानि **प्रज्ञप्तानि, तेषां** च **भौमानां भूमिभागा उल्लोकाश्च** पूर्ववद्वक्तव्याः, **तेषां च भौमानां बहुमध्यदेशभागे यत्पञ्चमं भौमं तस्य बहुमध्यदेशभागे** विजयद्वाराधिपतिविजयदेवयोग्यं **सिंहासनं प्रज्ञप्तं,** तस्य **च सिंहासनस्य वर्णनं विजयदूष्यं** कुम्भाग्रमुक्ता**दामवर्णनं** प्राग्वत्, **तस्य च सिंहासनस्य 'अपरोत्तरस्यां'** वायव्यकोणे **उत्तरस्यामुत्तरपूर्वस्यां** च **विजयदेवस्य** सम्बन्धिनां **चतुर्णां सामानिकसहस्राणां चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य पूर्वस्यामत्र विजयस्य देवस्य चतसृणामग्रमहिषीणां चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणपूर्वस्यामाग्नेय**कोण इत्यर्थः, **अत्र विजयदेवस्य 'अभ्यन्तरपर्षदाम्'** अभ्यन्तरपर्षद्रूपाणा**मष्टानां देवसहस्राणां** योग्यानि **अष्टौ भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणस्यां** दिशि **अत्र विजयदेवस्य मध्यपर्षदो दशानां देवसहस्राणां** योग्यानि **दश भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणापरस्यां** दिशि नैर्ऋतकोण इत्यर्थः, **अत्र विजयदेवस्य बाह्यपर्षदो द्वादशानां देवसहस्राणां** योग्यानि **द्वादश भद्रासनसहस्राणि प्रज्ञप्तानि**।।३३६-३४३।।

(३४४-३४५) तस्स णं सीहासणस्स पच्चत्थिमेणं एत्थ णं विजयस्स देवस्स सत्तण्हं अणियाहिवतीणं सत्त भद्दासणा पण्णत्ता। तस्स णं सीहासणस्स [१]सव्वओ समंता विजयस्स देवस्स [२]सोलसण्हं आयरक्खदेव-साहस्सीणं सोलस भद्दासणसाहस्सीओ पण्णत्ताओ[३], अवसेसेसु [४]भोमेसु पत्तेयं पत्तेयं [५]सीहासणे पण्णत्ते वण्णओ, णवरं परिवारो णत्थि ।। ३४४-३४५।।

---

१. जे. । सव्वओ समंता - **स्थाने मु. L आदिमध्ये** पुरत्थिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं एत्थ णं **इति पाठः**।। २ जे. । सोलस -**L मु.**।। ३. **इताऽग्रे-मु. L आदिमध्ये** तंजहा-पुरत्थिमेणं चत्तारि साहस्सीओ, एवं चउसुवि जाव उत्तरेणं चत्तारि साहस्सीओ, **इत्थधिकः पाठः दृश्येत, जे-प्रतौ नास्ति अयं पाठः** ।।४. भोमेसु बहुमज्झदेसभाए पत्तेयं - **जे.** ।। ५. भद्दासणा पण्णत्ता-**मु. कखगटत्रि । सीहासणमपरिवारं पन्नत्तं - जम्बू. पुण्यसागरवृत्तौ** ।।

'तस्स णं सीहासणस्से'त्यादि, **तस्य सिंहासनस्य पश्चिमायां दिशि अत्र विजयस्य देवस्य** सम्बन्धिनां **सप्तानामनीकाधिपतीनां** योग्यानि **सप्त भद्रासनानि प्रज्ञप्तानि, तस्य सिंहासनस्य 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **अत्र विजयस्य देवस्य** सम्बन्धिनां **षोडशानामात्मरक्षदेव-सहस्राणां** योग्यानि **षोडश भद्रासनसहस्राणि प्रज्ञप्तानि, अवशेषेषु प्रत्येकं प्रत्येकं सिंहासनमपरिवारं** सामानिकादिदेवयोग्यभद्रासनरूपपरिवाररहितं **प्रज्ञप्तम्**।।३४४-३४५।।

(३४६) विजयस्स णं दारस्स [१]उवरिमागारा सोलसविहेहिं रतणेहिं उवसोभिता, तंजहा-रयणेहिं वयरेहिं वेरुलिएहिं जाव रिट्ठेहिं ।। (३४७) विजयस्स णं दारस्स [२]उवरि अट्ठट्ठमंगलगा पण्णत्ता, तंजहा-सोत्थित-सिरिवच्छ जाव दप्पणा सव्वरयणामया अच्छा जाव पडिरूवा।। (३४८) वि[३]जयस्स णं दारस्स उप्पिं बहवे कण्हचामरज्झया जाव सव्वरयणामया अच्छा जाव पडिरूवा ।। (३४९) विजयस्स णं दारस्स उप्पिं बहवे छत्तातिच्छत्ता तहेव।। ३४६-३४९।।

'विजयस्स ण'मित्यादि, **विजयस्य द्वारस्य 'उवरिमाकारा'** इति उपरितन आकारः-उत्तरङ्गादिरूपः **षोडशविधै रत्नैरुपशोभितः, तद्यथा-रत्नैः** सामान्यतः कर्केतनादिभिः १ **वज्रैः** २ **वैडूर्यैः** ३ लोहिताक्षैः ४ मसारगल्लैः ५ हंसगर्भैः ६ पुलकैः ७ सौगन्धिकैः ८ ज्योतीरसैः ९ अङ्कैः १० अञ्जनैः ११ रजतैः १२ जातरूपैः १३ अञ्जनपुलकैः १४ स्फटिकैः १५ **रिष्ठैः** १६।। **'विजयस्स ण'**मित्यादि, विजयस्य द्वारस्य **उपरि अष्टावष्टौ** स्वस्तिकादीनि **मङ्गलकानि प्र०, तद्यथे**त्यादिना तान्येवोपदर्शयति-**'सव्वरयणामया'** इत्यादि प्राग्वत्।।३४६-३४९।।

(३५०) से केणट्ठेणं भंते! एवं वुच्चति-विजए णं दारे २?, गोयमा विजए णं दारे विजए णाम देवे महिड्ढीए महज्जुतीए जाव महाणुभावे पलिओवमट्ठि-तीए परिवसति[४], से णं तत्थ चउण्हं सामाणियसाहस्सीणं चउण्हं अग्गमहिसीणं

---

१. उत्तिमागारे-**जे.** ।। २. उप्पिं बहवे अट्ठ०**मु. कखगटत्रि** । ३. विजयस्स णं दारस्स उप्पिं बहवे किण्हचामरज्झया **इत्यादि सूत्रपाठः जीवाभिगमसूत्रबह्वादर्शेषु दृष्टत्वाल्लिखितोऽस्ति, स च पूर्ववद् व्याख्येयः वृत्तौ तु केनाऽपि हेतुना व्याख्यातो नास्ति -इति जम्बूद्वीप प्र. शांतिचन्द्रीयावृत्तिः (पत्र६२)** ।।४. **इतोऽग्रे -जे. प्रतौ-**महिड्ढीए फ्रा हारविरायतवच्छे जाव दसदिसाओ उज्जोवे - **इत्यधिकः पाठः** ।।

सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं विजयस्स णं दारस्स विजयाए रायहाणीए अण्णेसिं च बहूणं[1] विजयाए रायहाणीए वत्थव्वगाणं देवाणं देवीण य आहेवच्चं जाव दिव्वाइं भोगभोगाइं भुंजमाणे विहरइ, से तेणट्ठेणं गोयमा! एवं वुच्चति-विजये दारे विजये दारे। →अदुत्तरं[2] च णं गोयमा! विजयस्स णं दारस्स सासए णामधेज्जे पण्णत्ते जण्ण कयाइ णासि ण कयाइ णत्थि ण कयाइ ण भविस्सति जाव अवट्ठिए णिच्चे विजए दारे ←।। ३५०।।

'से केणट्ठेणं भंते! एवं वुच्चइ' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-**'गोयमे'**त्यादि, **गौतम! विजये द्वारे** विजयो नाम, प्राकृतत्वाद् अव्ययत्वाच्च नामशब्दात्परस्य टावचनस्य लोपस्ततोऽयमर्थः-प्रवाहतोऽनादिकालसन्ततिपतितेन **विजय** इति **नाम्ना देवः 'महर्द्धिकः'** महती ऋद्धिः-भवनपरिवारादिका यस्यासौ महर्द्धिकः **'महाद्युतिकः'** महती द्युतिः शरीरगता आभरणगता च यस्यासौ महाद्युतिकः, तथा महद् बलं-शारीरः प्राणो यस्य स महाबलः, तथा महद् यशः-ख्यातिर्यस्यासौ महायशाः, महेश इत्याख्या-प्रसिद्धिर्यस्य स महेशाख्यः, अथवा ईशनमीशो भावे घञ्प्रत्ययः ऐश्वर्यमित्यर्थः **"ईश ऐश्वर्ये"** [**सि.हे.धा. १११६**] इति वचनात्, तत ईशनमैश्वर्यं-आत्मनः ख्याति अन्तर्भूतण्यर्थतया ख्यापयति-प्रथयति यः स ईशाख्यः महांश्चासावीशाख्यश्च महेशाख्यः, क्वचित् 'महासोक्खे' इति पाठस्तत्र महत् सौख्यं प्रभूतसद्वेद्योदयवशाद् यस्य स महासौख्यः **पल्योपमस्थितिकः परिवसति, स च तत्र चतुर्णां सामानिकसहस्राणां चतसृणामग्रमहिषीणां सपरिवाराणां** प्रत्येकमेकैकसहस्रसङ्ख्यपरिवारसहितानां **तिसृणां** अभ्यन्तर-मध्यम-बाह्यरूपाणां यथाक्रममष्ट-दश-द्वादशदेवसहस्रसङ्ख्याकानां **पर्षदां सप्तानामनीकानां**-हयानीक गजानीक-रथानीक-पदात्यनीक-महिषानीक-गन्धर्वानीक-नाट्यानीकरूपाणां **सप्तानामनीकाधिपतीनां षोडशानामात्मरक्षसहस्राणां विजयस्य द्वारस्य विजयाया राजधान्या अन्येषां च बहूनां विजयराजधानीवास्तव्यानां देवानां देवीनां च 'आहेवच्चं'**ति आधिपत्यम् अधिपतेः कर्म आधिपत्यं रक्षा इत्यर्थः, सा च रक्षा सामान्येनाप्यारक्षकेणेव क्रियते तत आह-पुरस्य पतिः पुरपतिस्तस्य कर्म्म पौरपत्यं सर्वेषामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि

१. बहूणं वाणमंतराणं देवाणं - **जे.**। २. →← **चिह्नद्वयमध्यवर्तिपाठः- जे. नास्ति** ।।

स्वनायकनियुक्ततथाविध-गृहचिन्तकसामान्यपुरुषस्येव (स्यात्) ततो नायकत्वप्रतिपत्त्यर्थमाह–'स्वामित्वं' स्वमस्यास्तीति स्वामी तद्भावः स्वामित्वं नायकत्वमित्यर्थः, तदपि च नायकत्वं कदाचित्पोषकत्वमन्तरेणापि भवति यथा हरिणयूथाधिपतेर्हरिणस्य तत आह–भर्तृत्वं-पोषकत्वं **'डुभृञ् धारणपोषणयोः'** [धा.११४०] इति वचनात्, अत एव महत्तरकत्वं, तदपि चेह महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि भवति यथा कस्यचिद्वणिजः स्वदासदासीवर्गं प्रति तत आह–'आणाईसरसेणावच्चं' आज्ञया ईश्वर आज्ञेश्वरः सेनायाः पतिः सेनापतिः आज्ञेश्वरश्चासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म्म आज्ञेश्वरसेनापत्यं स्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः, 'कारयन्' अन्यैर्नियुक्तैः पुरुषैः पालयन् स्वयमेव, महता रवेणेति योगः 'अहय'त्ति आख्यानकप्रतिबद्धानि यदिवा 'अहतानि' अव्याहतानि नित्यानि नित्यानुबन्धीनीति भावः, ये नाट्य-गीते नाट्यं–नृत्यं गीतं–गानं यानि च वादितानि 'तन्त्री-तल-ताल-त्रुटितानि' तन्त्री–वीणा तलौ–हस्ततलौ तालः–कंसिका त्रुटितानि–वादित्राणि, तथा यश्च घनमृदङ्गः पटुना पुरुषेण प्रवादितः, तत्र घनमृदङ्गो नाम घनसमानध्वनिर्यो मृदङ्गस्तत एतेषां द्वन्द्वस्तेषां रवेण **'दिव्यान्'** प्रधानान् भोगार्हा भोगाः–शब्दादयो **भोगभोगास्तान् भुञ्जानः 'विहरति'** आस्ते, **'से एएणट्ठेण'**मित्यादि, तत **एतेन 'अर्थेन'** कारणेन **गौतम! एवमुच्यते-विजयद्वारं विजयद्वारमिति,** विजयाभिधान-देवस्वामिकत्वाद् विजयमिति भावः।।३५०।।

(३५१) कहि णं भंते! विजयस्स देवस्स विजया णाम रायहाणी पण्णत्ता?, गोयमा! विजयस्स णं दारस्स पुरत्थिमेणं तिरियमसंखेज्जे दीव-समुद्दे वीतिवतित्ता अण्णंमि जंबुद्दीवे दीवे बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं विजयस्स देवस्स विजया णाम रायहाणी पण्णत्ता बारस जोयणसहस्साइं आयाम-विक्खंभेणं सत्ततीसं जोयणसहस्साइं नव य अडयाले जोयणसए किंचिविसेसाहिए परिक्खेवेणं पण्णत्ते। सा णं एगेणं पागारेणं सव्वतो समंता संपरिक्खित्ता।।३५१।।

'कहि णं भंते! विजयस्से'त्यादि, **क्व भदन्त! विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता?,** भगवानाह–**गौतम! विजयस्य द्वारस्य पूर्वस्यां दिशि तिर्यग् असङ्ख्येयान् द्वीप-समुद्रान् 'व्यतिव्रज्य'** अतिक्रम्य अत्रान्तरे यो**ऽन्यः जम्बूद्वीपः** अधिकृतद्वीपतुल्याभिधानः, अनेन जम्बूद्वीपानामप्यसङ्ख्येयत्वं सूचयति, **तस्मिन् द्वादश योजनसहस्राणि अवगाह्य अत्रान्तरे विजयस्य**

देवस्य योग्या **विजया नाम राजधानी प्रज्ञप्ता** मया शेषैश्च तीर्थकृद्भिः, सा च **द्वादश योजनसहस्राणि 'आयाम-विष्कम्भेन'** आयाम-विष्कम्भाभ्यां, **सप्तत्रिंशद् योजनसहस्राणि नव शतानि 'अष्टाचत्वारिंशानि'** अष्टचत्वारिंशदधिकानि **किञ्चिद्विशेषाधिकानि परिक्षेपेण,** इदं च परिक्षेपपरिमाणं **"विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ"**[**लघुसङ्ग्र.७**] इति करणवशात्स्वयमानेतव्यम्। **'सा ण'**मित्यादि, **'सा'** विजयाभिधाना राजधानी **ण**मिति वाक्यालङ्कारे **एकेन** महता **प्राकारेण 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन [सं]**परिक्षिप्ता** ।। ३५१ ।।

(३५२) से णं पागारे सत्ततीसं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं मूले अद्धतेरस जोयणाइं विक्खंभेणं मज्झे[1] सक्कोसाइं छजोयणाइं विक्खंभेणं उप्पिं तिण्णि सद्धकोसाइं जोयणाइं विक्खंभेणं, मूले वित्थिण्णे मज्झे संखित्ते उप्पिं तणुए, बाहिं वट्टे, अंतो चउरंसे, गोपुच्छसंठाणसंठिते सव्वकणगामए अच्छे जाव पडिरूवे ।।३५२।।

'से ण'मित्यादि, **स प्राकारः सप्तत्रिंशतं योजनानामर्द्धयोजनमूर्ध्वमुच्चैस्त्वेन मूलेऽर्द्धत्रयोदश योजनानि विष्कम्भेन मध्ये षड् योजनानि सक्रोशानि**-एकेन क्रोशेनाधिकानि **विष्कम्भेन उपरि त्रीणि योजनानि सार्द्धक्रोशानि [योजनानि]** सार्द्धानि द्वादश अर्द्धक्रोशाधिकानि [द्वादश] **विष्कम्भेन, मूले विस्तीर्णो मध्ये सङ्क्षिप्तो,** मूलविष्कम्भतोऽर्द्धस्य त्रुटितत्वात्, **उपरि तनुको,** मध्यविष्कम्भादप्यर्द्धस्य त्रुटितत्वात्, **बहिर्वृत्तोऽन्तश्चतुरस्रो 'गोपुच्छसंस्थानसंस्थितः'** ऊर्ध्वीकृतगोपुच्छसंस्थानसंस्थितः **'सव्वकणगामए'** सर्वात्मना कनकमयः **'अच्छे'** इत्यादि विशेषणजातं प्राग्वत्।।३५२।।

(३५३) से णं पागारे णाणाविहपंचवण्णेहिं कविसीसएहिं उवसोभिए, तंजहा-किण्हेहिं जाव सुक्किल्लेहिं। ते णं कविसीसका अद्धकोसं आयामेणं, पंचधणुसताइं विक्खंभेणं, देसोणमद्धकोसं उड्ढं उच्चत्तेणं, सव्वमणिमया अच्छा जाव पडिरूवा ।।३५३।।

---

१. मज्झे छ सक्कोसाइं जोयणाइं - **कखटजे.** ।।

'से ण'मित्यादि, **स प्राकारो नानाविधानि** च तानि पञ्चवर्णानि च **नानाविधपञ्चवर्णानि तैः**, नानाविधत्वं च पञ्चवर्णापेक्षया कृष्णादिवर्णतारतम्यापेक्षया वा द्रष्टव्यं, पञ्चवर्णत्वमेवोपदर्शयति– **'किण्हेहिं'** इत्यादि। **'ते णं कविसीसगा'** इत्यादि, **तानि कपिशीर्षकाणि** प्रत्येक**मर्द्धक्रोशं**– धनुःसहस्रप्रमाण**मायामेन**–दैर्घ्येण **पञ्च धनुःशतानि 'विष्कम्भेन'** विस्तारेण, **देशोनमर्द्धक्रोशमूर्ध्वमुच्चैस्त्वेन 'सव्वमणिमया'**इत्यादि सर्वात्मना मणिमया**'अच्छा'** इत्यादि विशेषणकदम्बकं प्राग्वत्।३५३।

(३५४) विजयाए णं रायहाणीए एगमेगाए बाहाए पणुवीसं पणुवीसं दारसतं भवतीति मक्खायं। ते णं दारा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च विक्खंभेणं तावतियं चेव पवेसेणं सेता वरकणगथूभियागा[1] दारवण्णओ जाव[2] वणमाला ।।३५४।।

'विजयाए णं रायहाणीए' इत्यादि, **विजयाया राजधान्या एकैकस्यां बाहायां पञ्चविंशं-पञ्चविंशत्यधिकं द्वारशतं**२ प्रज्ञप्तं, सर्वसङ्ख्यया पञ्च द्वारशतानि।। **'ते णं दारा'** इत्यादि, **तानि द्वाराणि** प्रत्येकं **द्वाषष्टियोजनानि अर्द्धयोजनं चोद्ध्वमुच्चैस्त्वेन, एकत्रिंशतं योजनानि क्रोशं च विष्कम्भतः, 'तावइयं चेव पवेसेणं'** एतावदेव–एकत्रिंशद् योजनानि क्रोशं चेत्यर्थः प्रवेशेन, **'सेया वरकणगथूभियागा'** इत्यादि **द्वारवर्णनं** निरवशेषं तावद्वक्तव्यं **यावद्वनमाला**वर्णनम्।। ३५४।।

(३५५) तेसि णं दाराणं उभओ पासिं दुहतो णिसीहियाए दो दो पगंठगा पण्णत्ता, ते णं पगंठगा एक्कतीसं जोयणाइं कोसं च आयाम-विक्खंभेणं, पन्नरस जोयणाइं अड्ढाइज्जे य कोसे बाहल्लेणं पण्णत्ता सव्ववइरामया अच्छा जाव पडिरूवा। तेसि णं पगंठगाणं उप्पिं पत्तेयं २ पासायवडिंसगा पण्णत्ता। ते णं पासायवडिंसगा एक्कतीसं जोयणाइं कोसं च उड्ढं उच्चत्तेणं पन्नरस जोयणाइं अड्ढाइज्जे य कोसे

---

१. L जे । ० यागा ईहामिय० तहेव जधा विजए दारे जाव तवणिज्जवालुगपत्थडा सुहफासा सस्सिरीया सरूवा पासातीया४। तेसि णं दाराणं उभयो पासिं दुहतो णिसीहियाए दो वंदणकलसपरिवाडीओ पण्णत्ताओ तहेव भाणियव्वं जाव वणमालाओ **कखगटत्रिमु. । V. ।। २. द. ३। ३००-३०६ ।।**

आयाम-विक्खंभेणं[1] अब्भुगयमूसितपहसिया विव वण्णओ उल्लोगा सीहासणाइं जाव मुत्तादामा सेसं इमाए गाहाए अणुगंतव्वं, तं जहा-

तोरण मंगलया सालभंजिया णागदंतएसु दामाइं ।
संघाडं पंति वीधी मिधुण लता सोत्थिया चेव ।।१।।

वंदणकलसा भिंगारगा य आदंसगा य थाला ।
पातीओ य सुपतिट्ठा मणोगुलिया वातकरगा य ।।२।।

चित्ता रयणकरंडा हयगयणरकंठका य ।
चंगेरी पडला सीहासणा छत्त चामरा उवरी भोमा[2] य ।।३।।

एवामेव सपुव्वावरेणं विजयाए रायहाणीए एगमेगंसि दारंसि असीतं २ केउसहस्सं भवतीति मक्खायं।।३५५।।

'तेसि णं दाराण'मित्यादि, **तेषां द्वाराणां प्रत्येकमुभयोः पार्श्वयोरे**कैकनैषेधिकीभावेन **'द्विधातो'** द्विप्रकारायां **नैषेधिक्यां द्वौ द्वौ 'प्रकण्ठकौ'** पीठविशेषौ प्रज्ञप्तौ, **ते च प्रकण्ठकाः** प्रत्येक**मेकत्रिंशतं योजनानि क्रोश**मेकं **च आयाम-विष्कम्भाभ्यां, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् बाहल्येन 'सव्ववइरामया'** इति सर्वात्मना ते प्रकण्ठका वज्ररत्नमयाः **'अच्छा** सण्हा' इत्यादि विशेषणजातं प्राग्वत्। **'तेसिं पगंठगाण'**मित्यादि, **तेषां प्रकण्ठकानामुपरि प्रत्येकं 'प्रासादावतंसकः'** प्रासादविशेषः **प्रज्ञप्तः। 'ते णं पासायवडेंसगा'** इत्यादि, **ते प्रासादावतंसका एकत्रिंशतं योजनानि क्रोशं** चैक**मूर्ध्वमुच्चैस्त्वेन, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् आयाम-विष्कम्भाभ्यां,** तेषां च प्रासादानाम् **'अब्भुग्गयमूसियपहसियाविव'** इत्यादि सामान्यतः स्वरूप**वर्णनम् उल्लोक**वर्णनं मध्यभूमिभागवर्णनं **सिंहासन**वर्णनं विजयदूष्यवर्णनं **मुक्तादामो**पवर्णनं च विजयद्वारवत्, शेषमपि तोरणादिकं विजयद्वारवदिमाभिर्वक्ष्यमाणाभिर्गाथाभिरनुगन्तव्यं, ता एव गाथा आह-**'तोरणे'**त्यादि गाथात्रयं, द्वारेषु

---

१. V ता। ०णं सेसं तं चेव जाव समुग्गया णवरं बहुवयणं भाणितव्वं। विजयाए णं रायधाणीए एगमेगे दारे अट्ठसयं चक्कज्झयाणं जाव अट्ठसतं सेयाणं चउविसाणाणं णागवरकेऊणं एवामेव- मु. कखगट त्रि ।। २. भोम्मा य -J।।.

प्रत्येकमेकैकस्यां नैषेधिक्यां द्वे द्वे **तोरणे** वक्तव्ये, तेषां च तोरणानामुपरि प्रत्येकमष्टावष्टौ **मङ्गलकानि**, तेषां तोरणानामुपरि कृष्णचामरध्वजादयो ध्वजाः, तदनन्तरं तोरणानां पुरतः **शालभञ्जिकाः**, तदनन्तरं नागदन्तकास्तेषु च **नागदन्तकेषु दामानि**, ततो हयसङ्घाटादयः **सङ्घाटा** वक्तव्याः, ततो हयपङ्क्त्यादयः **पङ्क्तय**स्तदनन्तरं हयवीथ्यादयो **वीथय**स्ततो हयमिथुनकादीनि **मिथुनानि** ततः पद्मलतादयो **लताः**, ततः **'सोत्थिया'** चतुर्दिक्सौवस्तिका वक्तव्यास्ततो **वन्दनकलशा**स्तदनन्तरं **भृङ्गारका**स्तत **आदर्शका**स्ततः **स्थालानि**, ततः **पात्र्य**स्तदनन्तरं **सुप्रतिष्ठानि**, ततो **मनोगुलिका**स्तासु **'वातकरकाः'** वातभृताः करका वातकरका जलशून्या इत्यर्थः, तदनन्तरं **चित्रा रत्नकरण्डका**स्ततो **हय**कण्ठा **गज**कण्ठा **नरकण्ठाः**, उपलक्षणमेतत् किन्नरकिंपुरुषमहोरगगन्धर्ववृषभकण्ठकाः क्रमेण वक्तव्याः, तदनन्तरं पुष्पादि**चङ्गेर्यो** वक्तव्यास्ततः पुष्पादि**पटलकानि**, ततः **सिंहासनानि**, तदनन्तरं **छत्राणि**, ततश्च**चामराणि**, ततस्तैलादिसमुद्गका वक्तव्यास्ततो ध्वजाः, तेषां च ध्वजानामिदं चरमसूत्रम्– **'एवामेव सपुव्वावरेणं विजयाए रायहाणीए एगमेगंसि दारंसि असीयं असीयं केउसहस्सं भवतीति मक्खायं'**, तदनन्तरं भौमानि वक्तव्यानि ।।३५५।।

तत्सूत्रं साक्षादुपदर्शयति–

(३५६) विजयाए णं रायहाणीए एगमेगे दारे (तेसि णं दाराणं पुरओ) सत्तरस २ भोमा पण्णत्ता, तेसि णं भोमाणं [भूमिभागा] उल्लोया[१] [य] पउमलया० भत्तिचित्ता। तेसि णं भोमाणं बहुमज्झदेसभाए जे ते नवमनवमा भोमा तेसि णं भोमाणं बहुमज्झदेसभाए →पत्तेयं[२] २ सीहासणा पण्णत्ता, सीहासणवण्णओ जाव दामा जहा हेट्ठा, एत्थ णं अवसेसेसु भोमेसु पत्तेयं पत्तेयं भद्दासणा (सिंहासणा) पण्णत्ता ।।३५६।।

'तेसि णं दाराण'मित्यादि, तेषां द्वाराणां **पुरतः सप्तदश सप्तदश भौमानि प्रज्ञप्तानि, तेषां च भौमानां भूमिभागा उल्लोकाश्च** प्राग्वद्वक्तव्याः। **'तेसि णं भोमाण'** मित्यादि, **तेषां च भौमानां**

---

१. उल्लोया य भाणियव्वा-V ।। २.→← **चिह्नद्वयमध्यवर्तिपाठस्थाने ता-प्रतौ** पत्तेयं २ मणिपेढिया सीहासरिट्ठेहिं, तेसिणं दाराणं उप्पिं अट्ठट्ठ मंगलगा सतसहस्सपत्तहत्थगा **इति पाठः** ।।

बहुमध्यदेशभागे यानि नवमनवमानि भौमानि तेषां बहुमध्यदेशभागेषु प्रत्येकं विजयदेवयोग्यं **[सिंहासनं** यथा] विजयद्वारपञ्चमभौमे किन्तु सपरिवारं सिंहासनं वक्तव्यम्, **अवशेषेषु च भौमेषु प्रत्येकं** सपरिवारं सिंहासनं प्रज्ञप्तम् ।।३५६।।

(३५७) तेसि णं दाराणं उवरिमागारा सोलसविधेहिं रयणेहिं उवसोभिया तं चेव जाव छत्ताइछत्ता, एवामेव पुव्वावरेण विजयाए रायहाणीए पंच दारसता भवंतीति मक्खाया←।। ३५७।।

'तेसि णं दाराणं उवरिमागारा सोलसविहेहिं रयणेहिं उवसोभिता' इत्यादि प्राग्वत्।।३५७।।

(३५८) विजयाए णं रायहाणीए चउद्दिसिं पंच पंच जोयणसताइं अबाहाए, एत्थ णं चत्तारि वणसंडा पण्णत्ता, तंजहा-असोगवणे सत्तवण्णवणे चंपगवणे चूतवणे, → पुव्वेण असोगवणं, दाहिणतो होति सत्तिवण्णवणं । अवरेणं चंपगवणं, चूयवणं उत्तरे पासे ।। ← ते णं वणसंडा साइरेगाइं दुवालस जोयणसहस्साइं आयामेणं पंच जोयणसयाइं विक्खंभेणं पण्णत्ता पत्तेयं पत्तेयं पागारपरिक्खित्ता किण्हा किण्होभासा वणसंडवण्णओ भाणियव्वो जाव बहवे वाणमंतरा देवा य देवीओ य आसयंति सयंति चिट्ठंति णिसीदंति तुयट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कम्माणं कडाणं कल्लाणाणं कल्लाणं फलवित्तिविसेसं पच्चणुभवमाणा विहरंति।।३५८।।

'विजयाए णं रायहाणीए' इत्यादि, **विजयाया राजधान्याः 'चउदिसि'**मिति चतस्रो दिशः समाहृताश्चतुर्दिक् तस्मिन् चतुर्दिशि-चतसृषु दिक्षु **पञ्च पञ्च योजनशतानि 'अबाहाए'** इति बाधनं बाधा-आक्रमणं तस्यामबाधायां कृत्वेति गम्यते, अपान्तरालेषु मुक्त्वेति भावः, **चत्वारो वनखण्डाः प्रज्ञप्ताः, 'तद्यथे'**त्यादि, तानेव वनखण्डान् नामतो दिग्भेदतश्च दर्शयति, अशोकवृक्षप्रधानं

१.मु. । →← **चिह्नद्वयमध्यवर्तिपाठस्थाने कखगटत्रि-मध्ये** पुरत्थिमेणं असोगवणे दाहिणेणं सत्तवण्णवणे पच्चत्थिमेणं चंपगवणे उत्तरेणं चूतवणे **इति पाठः** ।।

वन**मशोकवनम्,** एवं **सप्तपर्णवनं चम्पकवनं चूतवनमपि** भावनीयं, **'पुव्वेण असोगवण'**मित्यादिरूपा गाथा पाठसिद्धा। **'ते णं वणसंडा'** इत्यादि, ते वनखण्डाः **सातिरेकाणि द्वादश योजनसहस्राण्यायामेन पञ्च योजनशतानि विष्कम्भेन प्रज्ञप्ताः प्रत्येकं प्रत्येकं प्राकारपरिक्षिप्ताः,** पुनः कथम्भूतास्ते वनषण्डाः? इत्यादि पद्मवरवेदिकाबहिर्वनखण्डवत्तावदविशेषेण वक्तव्यं यावत् 'तत्थ णं **बहवे वाणमंतरा देवा य देवीओ य आसयंति** जाव **विहरंति**'।। ३५८।।

(३५९) तेसि णं वणसंडाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं पासायवडिंसगा पण्णत्ता, ते णं पासायवडिंसगा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च आयाम-विक्खंभेणं, अब्भुग्गतमूसिय-पहसिया विव तहेव जाव अंतो बहुसमरमणिज्जा भूमिभागा पण्णत्ता उल्लोया पउमभत्तिचित्ता भाणियव्वा। तेसि णं पासायवडेंसगाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं सीहासणा पण्णत्ता वण्णावासो सपरिवारा। तेसि णं पासायवडिंसगाणं उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता। तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओव-मट्ठितीया परिवसंति, तंजहा-असोए सत्तवण्णे चंपए चूते। तत्थ णं ते साणं साणं वणसंडाणं, साणं साणं पासायवडेंसयाणं, साणं साणं सामाणियाणं, साणं साणं अग्गमहिसीणं साणं साणं परिसाणं, साणं साणं आयरक्खदेवाणं आहेवच्चं जाव विहरंति।।३५९।।

'तेसि ण'मित्यादि, **तेषां वनखण्डानां बहुमध्यदेशभागे प्रत्येकं प्रासादावतंसकाः प्रज्ञप्ताः, ते च प्रासादावतंसका द्वाषष्टियोजनान्यर्द्धयोजनं चोर्ध्वमुच्चैस्त्वेन एकत्रिंशतं योजनानि क्रोशं च विष्कम्भेन 'अब्भुग्गयमूसियपहसियाविव'** इत्यादि प्रासादावतंसकानां वर्णनं निरवशेषं तावद्वक्तव्यं यावत्तत्र प्रत्येकं सिंहासनं सपरिवारम्। **'तत्थ ण'**मित्यादि, **तेषु** वनखण्डेषु प्रत्येकमेकैकदेवभावेन **चत्वारो देवा महर्द्धिका यावत्** 'महज्जुइया महाबला महायसा महासोक्खा महाणुभावा' इति परिग्रहः

---

१. अब्भुगतमू० वण्णओ बहुसम० **जे.**।।

पल्योपमस्थितिकाः परिवसन्ति, तद्यथा-'असोए' इत्यादि, अशोकवनेऽशोकः सप्तपर्णवने **सप्तपर्णः** चम्पकवने **चम्पकः** चूतवने **चूतः**। 'तेसि ण'मि(**तत्थ णं** ते इ)त्यादि, ते अशोकादयो देवास्तस्य **वनखण्डस्य स्वस्य प्रासादावतंसकस्य,** सूत्रे बहुवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययो भवतीति, **स्वेषां स्वेषां सामानिक**सहस्राणां **स्वासां स्वासामग्रमहिषीणां** सपरिवाराणां **स्वासां स्वासां पर्षदां** स्वेषां स्वेषामनीकानां [अनीकाधिपतीनां] **स्वेषां स्वेषामात्मरक्षकाणाम् 'आहेवच्चं** पोरेवच्च'मित्यादि प्राग्वत् ।। ३५९ ।।

(३६०) विजयाए णं रायहाणीए अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते जाव पंचवण्णेहिं मणीहिं उवसोभिए तणसद्दविहूणे जाव देवा य देवीओ य आसयंति जाव विहरंति।। ३६०।।

'विजयाए ण'मित्यादि, **विजयाया राजधान्या अन्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः,** तस्य 'से जहा नाम ए आलिंगपुक्खरे इ वा' इत्यादि वर्णनं प्राग्वत् निरवशेषं तावद्वक्तव्यं यावन्मणीनां स्पर्शः ।।३६०।।

(३६१) तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगे महं उपकारियलेणे पण्णत्ते-बारस जोयणसयाइं आयाम-विक्खंभेणं, तिन्नि जोयणसहस्साइं सत्त य पंचाणउते जोयणसते किंचि विसेसाहिए परिक्खेवेणं पं०अद्धकोसं बाहल्लेणं सव्वजंबूणतामते अच्छे जाव पडिरूवे।।३६१।।

तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे, अत्र महद् एकमुपकारिकालयनं प्रज्ञप्तं, राजधानीस्वामिसत्कप्रासादावतंसकादीन् उपकरोति–उपष्टम्भातीत्युपकारिका–राजधानीस्वामिसत्कप्रासादावतंसकादीनां पीठिका, अन्यत्र त्वियमुपकार्योपकारकेति प्रसिद्धा, उक्तञ्च–**'गृहस्थानं स्मृतं राज्ञामुपकार्योपकारका'**[ ] इति, उपकारिकालयनमिव उपकारिकालयनं तद् **द्वादश योजनशतानि 'आयाम-विष्कम्भेन'** आयाम-विष्कम्भाभ्यां, **त्रीणि योजनसहस्राणि सप्त योजनशतानि पञ्चनवतानि**–पञ्चनवत्यधिकानि **किञ्चिद्विशेषाधिकानि परिक्षेपेण प्रज्ञप्तानि,** परिक्षेपपरिमाणं चेदं प्रागुक्तकरणवशात्स्वयमानेतव्यम्, **अर्द्धक्रोशं**–धनुःसहस्रपरिमाणं **बाहल्येन 'सव्वजंबूणयामए'** इति सर्वात्मना जाम्बूनदमयम्, **'अच्छे'** इत्यादि विशेषणजातं प्राग्वत्।।३६१।।

(३६२) से णं एगाए पउमवरवेइयाए एगेणं वणसंडेणं सव्वतो समंता संपरिक्खित्ते पउमवरवेतियाए वण्णओ वणसंडवण्णओ जाव[1] विहरंति, से णं वणसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं ओवारियालयणसमे परिक्खेवेणं।३६२।

'से ण'मित्यादि, **'तद्'** उपकारिकालयनम् **एकया पद्मवरवेदिकया** तत्पृष्ठभाविन्या **एकेन च वनखण्डेन 'सर्वतः'** सर्वासु दिक्षु **'समन्ततः'** सामस्त्येन **संपरिक्षिप्तं, पद्मवरवेदिकावर्णको वनखण्डवर्णकः** प्राग्वन्निरवशेषो वक्तव्यो **यावत्** 'तत्थ बहवे वाणमंतरा देवा य देवीओ य आसयंति सयंति जाव विहरंति' इति।।३६२।।

(३६३) तस्स णं उपकारियालयणस्स चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पण्णत्ता, वण्णओ, तेसि णं तिसोवाणपडिरूवगाणं पुरतो पत्तेयं पत्तेयं तोरणा पण्णत्ता वण्णओ।।३६३।।

'तस्स ण'मित्यादि, **तस्य उपकारिकालयनस्य 'चउदिसिं'**ति चतुर्दिशि चतसृषु दिक्षु एकैकस्यां दिशि एकैकभावेन **चत्वारि त्रिसोपानप्रतिरूपकाणि**–प्रतिविशिष्टरूपाणि त्रिसोपानानि **प्रज्ञप्तानि,** त्रिसोपान**वर्णकः** पूर्ववद्वक्तव्यः, **तेषां च त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकं तोरणं प्रज्ञप्तं,** तेषां च तोरणानां **वर्णनं** प्राग्वद्वक्तव्यम्।।३६३।।

(३६४) तस्स णं उपकारियालयणस्स उप्पिं बहुसमरमणिज्जे भूमिभागे पण्णत्ते, जाव[2] मणीणं फासो तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं महं एगे मूलपासायवडिंसए पण्णत्ते, से णं [मूलं][3] पासायवडिंसए बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं, एक्कतीसं जोयणाइं कोसं च आयाम-विक्खंभेणं, अब्भुग्गयमूसियप्पहसिते तहेव । तस्स णं पासायवडिंसगस्स अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते जाव मणिफासे उल्लोए।।३६४।।

---

१. जावासयंति - **जे.** । २. **L** । जाव मणी - **जे.** । जाव मणीहिं उवसोभिते मणिवण्णओ, गंधरसफासो - **कखगटत्रिमु.।। ३. राजप्रश्नीयसूत्रे (२०४,२०५)** मूलपासायवेडंसेगे-**इति पाठोऽस्ति** ।।

'तस्स ण'मित्यादि, **'तस्य' उपकारिकालयनस्य उपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः,** 'से जहा नाम ए' इत्यादि भूमिभागवर्णनं प्राग्वत्तावद्वाच्यं यावन्**मणीनां स्पर्शः, तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महानेको मूलप्रासादावतंसकः प्रज्ञप्तः, स च द्वाषष्टिर्योजनानि अर्द्धं च योजनमूर्ध्वमुच्चैस्त्वेन, एकत्रिंशतं योजनानि क्रोशं चायाम-विष्कम्भाभ्याम्, 'अब्भुग्गयमूसियपहसियाविवे'**त्यादि, तस्य वर्णनं मध्ये भूमिभागवर्णनं सिंहासनवर्णनं शेषाणि च भद्रासनानि तत्परिवारभूतानि विजयद्वारबहिःस्थितप्रासादवद् भावनीयानि।। ३६४।।

(३६५) तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागे एत्थ णं महं एगा मणिपेढिया पन्नत्ता। सा च [१]एगं जोयणमायाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमई अच्छा सण्हा।।३६५।।

'तस्स ण'मित्यादि, **तस्य** मूलप्रासादावतंसकस्य **बहुमध्यदेशभागे**ऽत्र महती **एका मणिपीठिका प्रज्ञप्ता, सा चैकं योजनमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमयी'** इति सर्वात्मना मणिमयी **'अच्छा सण्हा'** इत्यादि विशेषणकदम्बकं प्राग्वत्।।३६५।।

(३६६) तीसे णं मणिपेढियाए उवरिं महं एगे सीहासणे पन्नत्ते, एवं सीहासण-वण्णओ सपरिवारो।। ३६६।।

'तीसे ण'मित्यादि, **तस्या मणिपीठिकाया उपरि** अत्र **महदेकं सिंहासनं प्रज्ञप्तं,** तस्य च सिंहासनस्य परिवारभूतानि शेषाणि भद्रासनानि प्राग्वद्वक्तव्यानि।। ३६६।।

(३६७) तस्स णं पासायवडिंसगस्स उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता।।३६७।।

(३६८) से णं मूलपासायवडिंसए अण्णेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं [२]पासायवडिंसएहिं सव्वतो समंता संपरिक्खित्ते, ते णं पासायवडिंसगा एक्कतीसं जोयणाइं कोसं च उड्ढं उच्चत्तेणं, अद्धसोलसजोयणाइं अद्धकोसं च आयाम-विक्खंभेणं, अब्भुग्गत० तहेव, तेसि णं पासायवडिंसयाणं अंतो बहुसमरमणिज्जा

१. जे. L । दो जोयणाइं आयाम-विक्खंभेणं जोयणं बाहल्लेणं -कखट ।। २. द्र. ३ । ३०७-३०९ ।।

भूमिभागा उल्लोया। तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं सीहासणं पण्णत्तं, [१]वण्णओ, तेसिं परिवारभूता भद्दासणा पण्णत्ता, तेसि णं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।।३६८।।

'से ण'मित्यादि, **स च मूलप्रासादावतंसकोऽन्यैश्चतुर्भिर्मूल**प्रासादावतंसकै**स्तदर्द्धोच्चत्व-प्रमाणमात्रैः**-मूल**प्रासादावतंस**कार्द्धोच्चत्वप्रमाणैः **सर्वतः समन्तात्संपरिक्षिप्तः,** तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-**एकत्रिंशतं योजनानि क्रोशं** चैक**मूर्ध्वमुच्चैस्त्वेन, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् आयाम-विष्कम्भाभ्यां,** तेषामपि **'अब्भुग्गयमूसियपहसियाविवे'**त्यादि स्वरूपवर्णनं मध्ये **भूमिभाग**वर्णन**मुल्लोक**वर्णनं च प्राग्वत्। **'तेसि ण'**मित्यादि, तेषां प्रासादावतंसकानां **बहुमध्यदेशभागे प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञप्तं,** तेषां च सिंहासनानां **वर्णनं** प्राग्वत्, नवरमत्र सिंहासनानां शेषाणि परिवारभूतानि [२]न वक्तव्यानि।।३६७-३६८।।

(३६९) ते णं पासायवडिंसका अण्णेहिं चउहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासायवडेंसएहिं सव्वतो समंता संपरिक्खित्ता। ते णं पासायवडेंसका→ [३]पण्णरसजोयणाइं अड्ढातिज्जे य कोसे ← उड्ढं उच्चत्तेणं, देसूणाइं अट्ठ जोयणाइं आयाम-[४]विक्खंभेणं, अब्भुग्गयमूसियपहसिया विव तहेव, तेसि णं पासायवडेंसगाणं अंतो बहुसमरमणिज्जा भूमिभागा उल्लोया, तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं पउमासणा पन्नत्ता, तेसि णं पासायाणं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।।३६९।।

'ते णं पासायवडेंसया' इत्यादि, ते प्रासादावतंसका **अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्व-प्रमाणमात्रैः**-मूलप्रासादावतंसकपरिवारभूतप्रासादावतंसकार्द्धोच्चत्वप्रमाणमात्रैर्मूलप्रासादापेक्षया चतुर्भागमात्रप्रमाणैरित्यर्थः **सर्वतः समन्तात्संपरिक्षिप्ताः।** तदर्द्धोच्चत्वप्रमाणमेव दर्शयति-**'ते ण'**मित्यादि, **ते प्रासादावतंसकाः पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् ऊर्द्ध्वमुच्चैस्त्वेन देशोनानि**

१. द्र. ३।३११-३१३।। २. सूत्र-वृत्त्योः भेदः।। ३.जे।→← चिह्नद्वयमध्यवर्तिपाठस्थाने मु.L मध्ये अद्धसोल-सजोयणाइं अद्धकोसं च **इति पाठः** ।। ४. विक्खंभेण जाव सिहासण सपरि० **इति जे. प्रतौ ३६९ सूत्र समाप्तिं यावत्पाठः।।**

अष्टौ योजनानि आयाम-विष्कम्भाभ्यां, सूत्रे च 'आयाम-विक्खंभेणं'ति एकवचनं समाहारविवक्षणात्, एवमन्यत्रापि भावनीयम्, एतेषामपि **'अब्भुग्गयमूसिये'**त्यादिस्वरूपवर्णनं मध्ये **भूमिभाग**वर्णन**मुल्लोक**-वर्णनं सिंहासनवर्णनं च प्राग्वत् केवलमत्रापि सिंहासनमपरिवारं वक्तव्यम्।। ३६९।।

(३७०) ते णं पासायवडेंसगा अण्णेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासाय-वडेंसएहिं सव्वतो समंता संपरिक्खित्ता। ते णं पासायवडेंसका देसूणाइं अट्ठ जोयणाइं उड्ढं उच्चत्तेणं देसूणाइं चत्तारि जोयणाइं आयाम-विक्खंभेणं[1] अब्भुग्गत० भूमिभागा उल्लोया भद्दासणाइं उवरिं मंगलगा झया छत्तातिछत्ता।। ३७०।।

'ते ण'मित्यादि, **ते**ऽपि **प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चप्रमाणमात्रैः-**अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणैर्मूलप्रासादापेक्षयाऽष्टभागमात्रप्रमाणैरित्यर्थः **सर्वतः समन्तात्संपरिक्षिप्ताः।** तदेव तदर्द्धोच्चत्वप्रमाणमात्रमुपदर्शयति–**'ते ण'**मित्यादि, **ते प्रासादावतंसका देशोनानि अष्टौ योजनानि ऊर्ध्वमुच्चैस्त्वेन देशोनानि चत्वारि योजनान्यायाम-विष्कम्भाभ्यां,** तेषामपि **'अब्भुग्गयमूसियपहसियाविवे'**त्यादिस्वरूपादिवर्णनमनन्तरप्रासादावतंसकवत्।। ३७०।।

(३७१) [[2]ते णं पासायवडिंसगा अण्णेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासाय-वडिंसएहिं सव्वतो समंता संपरिक्खित्ता। ते णं पासायवडिंसगा देसूणाइं चत्तारि जोयणाइं उड्ढं उच्चत्तेणं देसूणाइं दो जोयणाइं आयाम-विक्खंभेण अब्भुग्गयमूसिय० भूमिभागा उल्लोया पउमासणाइं उवरिं मंगलगा झया छत्ताइच्छत्ता]।। ३७१।।

'ते ण'मित्यादि, **ते**ऽपि च **प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्च-त्वप्रमाणमात्रैः-**अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणमात्रैर्मूलप्रासादावतंसकापेक्षया षोडशभाग-प्रमाणमात्रैरित्यर्थः **सर्वतः समन्ततः संपरिक्षिप्ताः।** तदर्द्धोच्चत्वप्रमाणमेव दर्शयति–**'ते ण'**मित्यादि, **तै प्रासादावतंसका देशोनानि चत्वारि योजनान्यूर्द्ध्वमुच्चैस्त्वेन देशोने द्वे योजने आयाम-विष्कम्भाभ्यां,** तेषामपि स्वरूपवर्णनं मध्ये **भूमिभाग**वर्णन**मुल्लोक**वर्णनं सिंहासनवर्णनं च परिवारवर्जितं प्राग्वत्, तदेवं चतस्रः प्रासादावतंसकपरिपाट्यो भवन्ति, क्वचित्तिस्र एव दृश्यन्ते न चतुर्थी।।३७१।।

१.०विक्खंभेणं सीहासणा सपरि० **इति पाठः जे. प्रतौ ३७० सूत्रं यावत्। २. आदर्शेषु एतत् सूत्रं नैव लभ्यते।**

(३७२-A) तस्स णं मूलपासायवडेंसगस्स उत्तरपुरत्थिमेणं एत्थ णं विजयस्स देवस्स सभा सुधम्मा पण्णत्ता अद्धतेरसजोयणाइं आयामेणं, छ सक्कोसाइं जोयणाइं विक्खंभेणं, णव जोयणाइं उड्ढं उच्चत्तेणं, अणेगखंभसतसंनिविट्ठा अब्भुग्गय-सुकयवइरवेदिया-तोरणवररयितसालभंजिया-सुसिलिट्ठविसिट्ठलट्ठसंठियपसत्थ-वेरुलियविमलखंभा ।।३७२-A।।

'तस्स ण'मित्यादि, **तस्य मूलप्रासादावतंसकस्य 'उत्तरपूर्वस्याम्'** ईशानकोण इत्यर्थः, **'अत्र'** एतस्मिन् भागे **विजयस्य देवस्य** योग्या **सभा सुधर्मा** नाम विशिष्टच्छन्दकोपेता सा**ऽर्द्धत्रयोदश-योजनान्यायामेन षट् सक्रोशानि योजनानि विष्कम्भेन नव योजनानि ऊर्ध्वमुच्चैस्त्वेन** 'अणेगे'त्यादि अनेकेषु स्तम्भशतेषु सन्निविष्टा **अनेकस्तम्भशतसन्निविष्टा 'अब्भुग्गयसुकयवरवेइया तोरणवररइय-सालभंजिया सुसिलिट्ठविसिट्ठलट्ठसंठियपसत्थवेरुलियविमलखंभा'** अभ्युद्गता-अतिरमणीयतया द्रष्टृणां प्रत्यभिमुखमुत्-प्राबल्येन स्थिता सुकृतेव सुकृता निपुणशिल्पिरचितेवेति भावः, अभ्युद्गता चासौ सुकृता च अभ्युद्गतसुकृता वज्रवेदिका-द्वारमुण्डकोपरि वज्ररत्नमयी वेदिका तोरणं चाभ्युद्गतसुकृतं यत्र सा तथा, तथा वराभिः-प्रधानाभिः रचिताभिः-विरचिताभिः रतिदाभिर्वा शालभञ्जिकाभिः सुश्लिष्टा-सम्बद्धा विशिष्टं-प्रधानं लष्टं-मनोज्ञं संस्थितं-संस्थानं येषां ते विशिष्टलष्टसंस्थिताः प्रशस्ताः-प्रशंसास्पदीभूता वैडूर्यस्तम्भाः-वैडूर्यरत्नमयाः स्तम्भा यस्यां सा वररचितशालभञ्जिकासुश्लिष्टविशिष्ट-लष्टसंस्थितप्रशस्तवैडूर्यस्तम्भा, ततः पूर्वपदेन कर्म्मधारयः।।३७२-A।।

(३७२-B) णाणामणिकणगरयणखइयउज्जलबहुसमसुविभत्तभूमिभागा[1] ईहामिय-उसभ-तुरग-णर-मगर-विहग-वालग-किण्णर-रुरु-सरभ-चमर-कुंजर-वणलय-पउमलयभत्तिचित्ता खंभुग्गयवइरवेइयापरिगयाभिरामा विज्जाहर-जमलजुयलजंतजुत्ताविव अच्चिसहस्समालणीया रूवगसहस्सकलिया भिसमाणी भिब्भसमाणी चक्खुलोयणलेसा सुहफासा सस्सिरीयरूवा कंचणमणिरयणथूभियागा ।। ३७२-B।।

---

१. **जे.L**। सुविभत्तचित्तरणिज्जकुट्टिमतला - **कखगटत्रिमु.**।।।।

तथा नानामणिकनकरत्नानि खचितानि यत्र स नानामणिकनकरत्नखचितः, निष्ठान्तस्य परनिपातो भार्यादिदर्शनात्, नानामणिकनकरत्नखचितः उज्ज्वलो–निर्म्मलो बहुसमः–अत्यन्तसमः सुविभक्तो निचितो–निबिडो रमणीयश्च भूमिभागो यस्यां सा **नानामणिकनकरत्नखचितोज्ज्वलबहुसमसुविभक्तभूमिभागा 'ईहामिग-उसह-तुरग-नर-मगर-विहग-वालग-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वणलय-पउमलयभत्तिचित्ता'** इति, तथा स्तम्भोद्गतया–स्तम्भोपरिवर्त्तिन्या वज्रवेदिकया–वज्ररत्नमय्या वेदिकया परिगता सती याऽभिरामा **स्तम्भोद्गतवज्रवेदिकापरिगताभिरामा 'विज्जाहरजमलजुगलजंतजुत्ताविव अच्चिसहस्समालणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा'** इति प्राग्वत् **'कंचणमणिरयणथूभियागा'** इति काञ्चनमणिरत्नानां स्तूपिका–शिखरं यस्याः सा काञ्चनमणिरत्नस्तूपिकाका ।।३७२-B।।

(३७२-C) नाणाविहपंचवण्णघंटापडागपडिमंडितग्गसिहरा धवला मिरी-इकवचं विणिम्मुयंती लाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचियवंदणकलसा ।।३७२-C।।

'नाणाविहपंचवण्णघंटापडागपरिमंडियग्गसिहरा' नानाविधाभिः–नानाप्रकाराभिः पञ्चवर्णाभिर्घण्टाभिः पताकाभिश्च परि–सामस्त्येन मण्डितमग्रशिखरं यस्याः सा नानाविधपञ्चवर्णघण्टा-पताकापरिमण्डिताग्रशिखरा **'धवला'** श्वेता **मरीचिकवचं**–किरणजालपरिक्षेपं **विनिर्मुञ्चन्ती 'लाउल्लो-इयमहिया'** इति लाइयं नाम यद् भूमेर्गोमयादिना उपलेपनम् उल्लोइयं–कुड्यानां मालस्य च सेटिकादिभिः संमृष्टीकरणं लाउल्लोइयं ताभ्यामिव महिता–पूजिता लाउल्लोइयमहिता, तथा गोशीर्षेण–गोशीर्षनामचन्दनेन सरसरक्तचन्दनेन दर्द्दरेण–बहलेन चपेटाकारेण वा दत्ताः पञ्चाङ्गुलयस्तला–हस्तका यत्र सा **गोशीर्षक-सरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितला,** तथा उपचिता–निवेशिता वन्दनकलशा–मङ्गलकलशा यस्यां सा उपचितवन्दनकलशा ।।३७२-C।।

(३७२-D) वंदणघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्ट-वग्घारियमल्लदामकलावा ।। ३७२-D।।

'वंदणघडसुकयतोरणपडिदुवारदेसभागा' इति वन्दनघटैः–वन्दनकलशैः सुकृतानि–सुष्ठु कृतानि शोभनानीति तात्पर्यार्थः यानि तोरणानि तानि वन्दनघटसुकृतानि तोरणानि प्रतिद्वारदेशभागे यस्यां सा

वन्दनघटसुकृततोरणप्रतिद्वारदेशभागा, तथा **'आसत्तोसत्त[विउल]वट्टवग्घारियमल्लदामकलावा'** इति आ–अवाङ् अधोभूमौ सक्त आसक्तो भूमौ लग्न इत्यर्थः ऊर्ध्वं सक्त उत्सक्तः–उल्लोचतले उपरिसम्बद्ध इत्यर्थः, विपुलो–विस्तीर्णः वृत्तो–वर्त्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः– पुष्पमालासमूहो यस्यां सा आसक्तोत्सक्तविपुलवृत्तवग्घारितमाल्यदामकलापा ।।३७२-D।।

(३७२-E)पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलिता कालागुरु-पवरकुंदुरुक्क-तुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामा सुगंधवरगंधिया[1] गंधवट्टिभूया अच्छरगणसंघसंविकिन्ना दिव्वतुडियसद्दसंपणाइया[2] सव्वरयणामती अच्छा जाव पडिरूवा।।३७२-E।।

तथा पञ्चवर्णेन सरसेन-सच्छायेन सुरभिणा मुक्तेन-क्षिप्तेन पुष्पपुञ्जलक्षणेनोपचारेण-पूजया कलिता **पञ्चवर्णसरससुरभिमुक्तपुष्पपुञ्जोपचारकलिता 'कालागुरु-पवरकुन्दुरुक्क-तुरुक्कधूवमघ-मघेंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया'** इति प्राग्वत्, **'अच्छरगणसंघसंविकिण्णा'** इति अप्सरोगणानां सङ्घः-समुदायस्तेन सम्यग्-रमणीयतया विकीर्णा-व्याप्ता **'दिव्वतुडियसद्दसंपणादिया'** इति दिव्यानां त्रुटितानाम्-आतोद्यानां वेणु-वीणा-मृदङ्गादीनां ये शब्दास्तैः सम्यक्-श्रोत्रमनोहारितया प्रकर्षेण नादिता-शब्दवती दिव्यत्रुटितसंप्रणादिता **'अच्छा** सण्हा **जाव पडिरूवा'** इति प्राग्वत्।। ३७२-E।।

(३७३) [3]तीसे णं सोहम्माए सभाए तिदिसिं तओ दारा पण्णत्ता। ते णं दारा पत्तेयं पत्तेयं दो दो जोयणाइं उड्ढं उच्चत्तेणं एगं जोयणं विक्खंभेणं तावइयं चेव पवेसेणं सेया वरकणगथूभियागा जाव वणमालादारवन्नओ।।३७३।।

'तीसे णं सोहम्माए सभाए ण'मित्यादि, **सभायाः सुधर्मायाः 'त्रिदिशि'** तिसृषु दिक्षु एकैकस्यां दिशि एकैकद्वारभावेन **त्रीणि द्वाराणि प्रज्ञप्तानि,** तद्यथा-एकं पूर्वस्यामेकं दक्षिणस्यामेकमुत्तरस्याम्। **'ते णं दारा'** इत्यादि, तानि द्वाराणि **प्रत्येकं प्रत्येकं द्वे द्वे योजने ऊर्ध्वमुच्चैस्त्वेन योजनमेकं विष्कम्भेन 'तावइयं चेवे'**ति योजनमेकं **प्रवेशेन 'सेया वरकणगथूभियागा'** इत्यादि प्रागुक्तं **द्वारवर्णनं** तदेतावद्वक्तव्यं **यावद्वनमाला** इति।। ३७३।।

---

१. ०गंधगंधिया - **पुजे L।।** २. दिव्वतुडियमधुरसद्दसंणिणाइणा सुरम्मा सव्वरयणामई - **कखट।** दिव्वतुडियमधुर-सद्दसंपणाइया सुरम्मा सव्वरयणामई-**गत्रि।** दिव्वउडियसद्द संणिणदिता सव्वरयणामई **जे.।।** ३. सभाए सुधम्माए तिदिसं - **जे. ।।**

(३७४) तेसि णं दाराणं पुरतो मुहमंडवा पण्णत्ता, ते णं मुहमंडवा अद्धतेरस-जोयणाइं आयामेणं, छजोयणाइं सक्कोसाइं विक्खंभेणं, साइरेगाइं दो जोयणाइं उड्ढं उच्चत्तेणं, अणेगखंभसयसंनिविट्ठा जाव उल्लोया भूमिभागवण्णओ।।३७४।।

'तेसि ण'मित्यादि, **तेषां द्वाराणां पुरतः** प्रत्येकं प्रत्येकं **मुखमण्डपः प्रज्ञप्तः, ते च मुखमण्डपा अर्द्धत्रयोदश योजनानि आयामेन, षड् योजनानि सक्रोशानि विष्कम्भेन, सातिरेके द्वे योजने ऊर्द्ध्वमुच्चैस्त्वेन,** एतेषामपि **'अणेगखंभसयसन्निविट्ठा'** इत्यादि वर्णनं सुधर्म्मायाः सभाया इव निरवशेषं द्रष्टव्यं, तेषां मुखमण्डपाना**मुल्लोक**वर्णनं बहुसमरमणीय**भूमिभागवर्णनं** च यावन्मणीनां स्पर्शः प्राग्वत्।। ३७४।।

(३७५) तेसि णं मुहमंडवाणं उवरिं पत्तेयं पत्तेयं अट्ठट्ठमंगला [१]पण्णत्ता, सोत्थिय जाव मच्छ०।।३७५।।

'तेसि ण'मित्यादि, **तेषां मुखमण्डपानामुपरि अष्टावष्टौ मङ्गलकानि-स्वस्तिकादीनि प्रज्ञप्तानि,** तान्येवाह-'तंजहे'त्यादि, एतच्च विशेषणं सुधर्मासभाया अपि द्रष्टव्यम्।।३७५।।

(३७६) तेसि णं मुहमंडवाणं [२]पुरओ पत्तेयं पत्तेयं पेच्छाघरमंडवा पण्णत्ता, ते णं पेच्छाघरमंडवा अद्धतेरसजोयणाइं आयामेणं, जाव दो जोयणाइं उड्ढं उच्चत्तेणं जाव [३]मणिफासो।।३७६।।

'तेसि ण'मित्यादि, **तेषां मुखमण्डपानां पुरतः प्रत्येकं २ प्रेक्षागृहमण्डपः प्रज्ञप्तः, तेऽपि च प्रेक्षागृहमण्डपा अर्द्धत्रयोदश योजनान्यायामेन,** सक्रोशानि षड् योजनानि विष्कम्भेन, सातिरेके **द्वे योजने ऊर्द्ध्वमुच्चैस्त्वेन,** प्रेक्षागृहमण्डपानां च **भूमि**भागवर्णनं पूर्ववत्तावद्वाच्यं **यावन्मणीनां स्पर्शः**।। ३७६।।

(३७७) तेसि णं ० बहुमज्झदेसभाए पत्तेयं पत्तेयं वइरामए अक्खाडगे पण्णत्ते, तेसि णं वइरामयाणं अक्खाडगाणं बहुमज्झदेसभाए पत्तेयं २ मणिपीढिया पण्णत्ता,

१. पण्णत्ता सोत्थिय जाव मच्छ-**गत्रि** । अट्ठट्ठमंगला जाव सहस्सपत्तहत्था-**जे.** ।। २. पुरओ तिदिसिं तओ पेच्छाघर-मंडवा-**कखट**।। ३ मणीणं फासो -**L** ।।

ताओ णं मणिपीढियाओ जोयणमेगं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं, सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ।। ३७७।।

'तेसि ण'मित्यादि, **तेषां च** बहुसमरमणीयानां भूमिभागानां **बहुमध्यदेशभागे प्रत्येकं प्रत्येकं वज्रमयः 'अक्षपाटकः'** चतुरस्राकारः **प्रज्ञप्तः, तेषां चाक्षपाटकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजनमेकमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमईओ'** इति सर्वात्मना मणिमय्यः **'अच्छा'** इत्यादि विशेषणकदम्बकं प्राग्वत्।।३७७।।

(३७८) तासि णं मणिपीढियाणं उप्पिं पत्तेयं पत्तेयं सीहासणे पण्णत्ते, सीहासणवण्णओ जाव[1] दामा परिवारो।। ३७८।। (३७९) तेसि णं पेच्छाघरमंडवाणं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।। ३७९।।

'तासि ण'मित्यादि, **तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञप्तं,** तेषां च **सिंहासनानां वर्णनं परिवार**श्च प्राग्वद्वक्तव्यः, **तेषां च प्रेक्षागृहमण्डपानामुपरि अष्टावष्टौ** स्वस्तिकादीनि **मङ्गलकानि** प्रज्ञप्तानि, कृष्णचामर**ध्वजादि** च प्राग्वद्वक्तव्यम्।।३७८-३७९।।

(३८०) तेसि णं पेच्छाघरमंडवाणं पुरतो →पत्तेयं[2] २ मणिपेढिया पण्णत्ता← तिदिसिं तओ मणिपेढियाओ पं० ताओ णं मणिपेढियाओ दो दो जोयणाइं आयाम-विक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमतीओ अच्छाओ जाव पडिरूवाओ। ३८०।

'तेसि ण'मित्यादि, **तेषां प्रेक्षागृहमण्डपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः प्रत्येकं द्वे द्वे योजने आयाम-विष्कम्भाभ्यां योजनमेकं बाहल्येन सर्वात्मना मणिमय्यः अच्छा** इत्यादि प्राग्वत्।। ३८० ।।

(३८१) तासि णं मणिपेढियाणं उप्पिं पत्तेयं पत्तेयं चेइयथूभा पण्णत्ता, ते णं चेइयथूभा सातिरेगाइं[3] दो जोयणाइं उड्ढं उच्चत्तेणं दो जोयणाइं आयाम-विक्खंभेणं

---

१. जाव दामा अपरिवारा-**कखट** । जाव दामा सपरिवारो -**गत्रि** । जाव दामा- **जे.** । २. →←**चिह्नद्वय-मध्यवर्तिपाठः जे L अस्ति** । तिसिं तओ मणि० **कखगटत्रिमु** ।। ३. **जे.**। सातिरेगाइं- **L नास्ति** ।।

सेया संखंक-कुंद-दगरयामयमहितफेणपुंजसण्णिकासा सव्वरयणामया अच्छा जाव पडिरूवा।।३८१।।

'तासि ण'मित्यादि, **तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यस्तूपाः प्रज्ञप्ताः, ते च चैत्यस्तूपाः सातिरेके द्वे योजने ऊर्ध्वमुच्चैस्त्वेन द्वे योजने आयाम-विष्कम्भाभ्यां शङ्खाङ्ककुन्द-दकरजो-ऽमृतमथितफेनपुञ्जसंनिकाशाः सर्वात्मना रत्नमया अच्छाः** श्लक्ष्णा इत्यादि प्राग्वत्।३८१।

(३८२) तेसि णं चेइयथूभाणं उप्पिं अट्ठट्ठमंगलगा बहुकिण्हचामरझया पण्णत्ता छत्तातिछत्ता।।३८२।।

'तेसि ण'मित्यादि, **तेषां चैत्यस्तूपानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा** इत्यादि प्राग्वत्।। ३८२।।

(३८३) तेसि णं चेतियथूभाणं चउद्दिसिं पत्तेयं पत्तेयं चत्तारि मणिपेढियाओ प०, ताओ णं मणिपेढियाओ जोयणं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं सव्वमणिमईओ।।३८३।।

'तेसि ण'मित्यादि, **तेषां चैत्यस्तूपानां प्रत्येकं प्रत्येकं 'चतुर्दिशि'** चतसृषु दिक्षु एकैकस्यां दिशि एकैकमणिपीठिकाभावेन **चतस्रो मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजन-मायाम-विष्कम्भाभ्यामर्द्धं योजनं बाहल्येन सर्वात्मना मणिमय्यः** अच्छा इत्यादि प्राग्वत्।।३८३।।

(३८४) तासि णं मणिपीढियाणं उप्पिं पत्तेयं पत्तेयं चत्तारि जिणपडिमाओ जिणुस्सेहपमाणमेत्ताओ पलियंकणिसण्णाओ थूभाभिमुहीओ चिट्ठंति[1], तंजहा-उसभा वद्धमाणा चंदाणणा वारिसेणा।।३८४।।

'तासि ण'मित्यादि, **तासां मणिपीठिकानामुपरि** एकैकस्या मणिपीठिकाया उपरि एकैक-प्रतिमाभावेन **चतस्रो जिनप्रतिमा जिनोत्सेधः**-उत्कर्षतः पञ्च धनुःशतानि जघन्यतः सप्त हस्ताः, इह तु पञ्च धनुःशतानि सम्भाव्यन्ते, **'पलियंकनिसन्नाओ'** इति पर्यङ्कासननिषण्णाः **स्तूपाभिमुख्य-स्तिष्ठन्ति, तद्यथा-ऋषभा वर्द्धमानाश्चन्द्रानना वारिषेणा**।। ३८४।।

---

१. **जे.**। सन्निविट्ठाओ चिट्ठंति - **कखगत्रि** । सन्निखित्ताओ चिट्ठंति - **खट - राजप्र. सू. २२५** ।।

(३८५) तेसि णं चेतियथूभाणं पुरतो पत्तेयं[१] पत्तेयं मणिपेढियाओ पन्नत्ताओ, ताओ णं मणिपेढियाओ दो दो जोयणाइं आयाम-विक्खंभेणं, जोयणं बाहल्लेणं, सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ।। ३८५।।

'तेसि ण'मित्यादि, **तेषां चैत्यस्तूपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका द्वे द्वे योजने आयाम-विष्कम्भाभ्यां योजन**मेकं **बाहल्येन सर्वात्मना मणिमय्यः अच्छा** इत्यादि प्राग्वत्।। ३८५।।

(३८६) तासि णं मणिपेढियाणं उप्पिं पत्तेयं पत्तेयं चेइयरुक्खा पण्णत्ता, ते णं चेतियरुक्खा अट्ठजोयणाइं उड्ढं उच्चत्तेणं, अद्धजोयणं उव्वेहेणं, दो जोयणाइं खंधी, अद्धजोयणं विक्खंभेणं, छजोयणाइं विडिमा, बहुमज्झदेसभाए [२]अट्ठजोयणाइं आयाम-विक्खंभेणं, साइरेगाइं अट्ठजोयणाइं सव्वग्गेणं पण्णत्ताइं।। ३८६।।

'तासि ण' मित्यादि, **तासां च मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यवृक्षाः प्रज्ञप्ताः, ते चैत्यवृक्षा अष्टौ योजनान्यूर्ध्वमुच्चैस्त्वेन अर्द्धयोजनमुत्सेधेन** उण्डत्वेन **द्वे योजने** उच्चैस्त्वेन **स्कन्धः** स एव**ार्द्धं योजनं विष्कम्भेन** यावद् **बहुमध्यदेशभागे** ऊर्ध्वं विनिर्गता शाखा सा **विडिमा** सा **षड् योजनान्यूर्ध्वमुच्चैस्त्वेन**, साऽपि **चार्द्धं(ष्टौ) योजनं विष्कम्भेन, सर्वाग्रेण सातिरेकाण्यष्टौ योजनानि प्रज्ञप्तः**।। ३८६।।

(३८७-A) तेसि णं चेइयरुक्खाणं अयमेतारूवे वण्णावासे पण्णत्ते, तंजहा-वइरामयमूलरययसुपतिट्ठितविडिमा रिट्ठामयविपुलकंदवेरुलियरुतिलखंधा सुजात-वरजात रूवपढमगविसालसाला ।।३८७-A।।

---

१. जे.। पुरओ तिदिसिं - कखगटत्रिमु. ।। २. जे. L। अद्धजोयणाइं-कगटत्रि पु. । "श्री मलयगिरिसूरिणा प्रस्तुतसूत्रस्य वृत्तौ - 'अर्द्धं योजनं विष्कम्भेण' इति व्याख्यातम्, किन्तु एतत् सम्यग् न प्रतीयते। रायपसेणइय (सू. २२७ वृत्ति प. २१९) अष्टौ योजनानि विष्कम्भेण इति व्याख्यातमस्ति तथा जम्बूद्वीपप्रज्ञप्तिवृत्तावपि (पत्र-३३२) 'अष्टौ योजनानि आयाम-विष्कम्भाभ्यां' इति व्याख्यातं दृश्यते, अतः अट्ठ जोयणाइं इति पाठः एव समीचीनोऽस्ति ।" इति V. पृ.३३५ टि. ९ ।।

'तेसि ण' मित्यादि, **तेषां च चैत्यवृक्षाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा-'वइरामया मूला रययसुपइट्ठिया विडिमा'** वज्राणि–वज्ररत्नमयानि मूलानि येषां ते वज्रमूलाः, तथा रजता–रजतमयी सुप्रतिष्ठिता विडिमा–बहुमध्यदेशभागे ऊर्ध्वविनिर्गता शाखा येषां ते रजतसुप्रतिष्ठितविडिमा, ततः पूर्वपदेन कर्म्मधारयसमासः, **'रिट्ठमयकंदवेरुलियरुचिरखंधी'** रिष्ठमयो–रिष्ठरत्नमयः कन्दो येषां ते रिष्ठरत्नमयकन्दाः, तथा वैडूर्यो–वैडूर्यरत्नमयो रुचिरः स्कन्धो येषां ते तथा, ततः पूर्वपदेन कर्म्मधारयसमासः, **'सुजायवरजायरूवपढमगविसालसाला'** सुजातं–मूलद्रव्यशुद्धं वरं–प्रधानं यज्जातरूपं तदात्मका प्रथमका–मूलभूता विशाला शाला–शाखा येषां ते सुजातवरजातरूपप्रथमकविशालशालाः ।।३८७-A।।

(३८७-B) नाणामणिरयणविविधसाहप्पसाहवेरुलियपत्ततवणिज्जपत्तवेंटा जंबूणयरत्तमउयसुकुमालपवाल[1]पल्लववरंकुर[2] [3] ।।३८७-B।।

'नानामणिरयणविविहसाहप्पसाहवेरूलियपत्ततवणिज्जपत्तवेंटा' नानामणिरत्नानां नानामणिरत्नात्मिका विविधाः शाखाः प्रशाखाश्च येषां ते तथा, वैडूर्याणि–वैडूर्यमयानि पत्राणि येषां ते तथा, तथा तपनीयानि–तपनीयमयानि पत्रवृन्तानि येषां ते तथा, ततः पूर्ववत्पदद्वयपदद्वयमीलनेन कर्म्मधारयः, जाम्बूनदा–जाम्बूनदनामकसुवर्णविशेषमया रक्ता–रक्तवर्णा मृदवो–मनोज्ञाः सुकुमाराः–सुकुमारस्पर्शा ये प्रवाला–ईषदुन्मीलितपत्रभावाः पल्लवाः–सञ्जातपरिपूर्णप्रथमपत्रभावरूपा वराङ्कुराः–प्रथममुद्भिद्यमाना अङ्कुरास्तान् धरन्तीति **जाम्बूनदरक्तमृदुसुकुमारप्रवालपल्लव[वरा]ङ्कुरधराः,** क्वचित्पाठः 'जंबूणयरत्तमउयसुकुमालकोमलपवालपल्लवङ्कुरग्गसिहरा' तत्र जाम्बूनदानि रक्तानि मृदूनि–अकठिनानि सुकुमाराणि–अकर्कशस्पर्शानि कोमलानि–मनोज्ञानि प्रवालपल्लवाङ्कुराः–यथोदितस्वरूपा अग्रशिखराणि च येषां ते तथा,

(३८७-C)विचित्तमणिरयणसुरभिकुसुमफलभरणमियसाला सच्छाया सप्पभा [4]समिरीया सउज्जोया अधियं णयणमणणिव्वुतिकरा अमयरससमरसफला पासातीया दरिसणिज्जा अभिरूवा पडिरूवा।।३८७-C।।

---

१. ०लकोमलपवाल० **जे.** ।। २. **ता. V.** । पल्लवसोभंतवरं० **मु. क खगटत्रि** ।। ३. **जे.L** । कुरग्गसिहरा-**कखगटत्रिमु** ।। ४. ससिरीया-**जे.** ।।

'विचित्तमणिरयणसुरभिकुसुमफलभरेण नमियसाला' विचित्रमणिरत्नानि–विचित्रमणिरत्नमयानि यानि सुरभीणि कुसुमानि फलानि च तेषां भरेण नमिता–नामं ग्राहिताः शालाः–शाखा येषां ते तथा, सती–शोभना छाया येषां ते **सच्छायाः,** तथा सती–शोभना प्रभा–कान्तिर्येषां ते **सत्प्रभाः,** सह उद्द्योतेन वर्त्तन्ते मणिरत्नानामुद्द्योतभावात् **सोद्द्योताः,** अधिकम्–अतिशयेन नयनमनोनिर्वृतिकराः, अमृतरससमरसानि फलानि येषां ते **अमृतरससम[रस]फलाः 'पासाईया'** इत्यादि विशेषणचतुष्टयं प्राग्वत् ।। ३८७ ।।

(३८८) ते णं चेइयरुक्खा अन्नेहिं बहूहिं तिलय-लवय-छत्तोवग-सिरीस-सत्तवन्न-दहिवन्न-लोद्ध-धव-चंदण-अज्जुण[1]-नीव-कुडय-कयंब-पणस-ताल-तमाल-पियाल-पियंगु-पारावय-रायरुक्ख-नंदिरुक्खेहिं सव्वओ समंता संपरिक्खित्ता।। ३८८।।

'ते णं चेइयरुक्खा' इत्यादि, **ते चैत्यवृक्षा अन्यैर्बहुभिस्तिलक-लवङ्ग-छत्रोपग-शिरीष-सप्तपर्ण-दधिपर्ण-लोध्र-धव-चन्दन-नीप-कुटज-कदम्ब-पनस-ताल-तमाल-प्रियाल-प्रियङ्गु-पारापत-राजवृक्ष-नन्दिवृक्षैः सर्वतः समन्तात्संपरिक्षिप्ताः।।** ३८८।।

(३८९) ते णं तिलया जाव नंदिरुक्खा कुस[2]-विकस-विसुद्धरुक्खमूला मूलवंतो कन्दमंतो जाव सुरम्मा।।३८९।।

'ते णं तिलगा' इत्यादि, **ते तिलका यावन्नन्दिवृक्षा मूलवन्तः कन्दवन्त** इत्यादि वृक्षवर्णनं प्राग्वत्तावद्वक्तव्यं यावदनेकशकट-रथ-यान-शिबिका-स्यन्दमानिकाप्रतिमोचना सुरम्या इति।। ३८९।।

(३९०) ते णं तिलया जाव नंदिरुक्खा अण्णाहिं बहूहिं पउमलयाहिं जाव सामलयाहिं सव्वतो समंता संपरिक्खित्ता। ताओ णं पउमलयाओ जाव सामलयाओ निच्चं कुसुमियाओ जाव पडिरूवाओ।। ३९०।।

'ते णं तिलगा' इत्यादि, **ते तिलका यावन्नन्दिवृक्षा अन्याभिर्बहुभिः पद्मलताभि**र्नागलताभिशोक-लताभिश्चम्पकलताभिश्चूतलताभिर्वनलताभिर्वासन्तिकालताभिरतिमुक्तकलताभिः कुन्दलताभिः **श्याम-**

---

१. अज्जुण- **जे. L अस्ति, मु. नास्ति । जे. प्रतौ सर्वे तृतीयान्ता- दृश्यन्ते,** तिलएहिं,..... अज्जुणेहिं..... णंदिरुकखेहिं-**इति।। २. जे. L.** कुस-विकस-विसुद्धरुकक्खमूला-**कखगटत्रिमु. नास्ति ।।**

लताभिः सर्वतः समन्तात्संपरिक्षिप्ताः, 'ताओ णं पउमलयाओ जाव सामलयाओ निच्चं कुसुमियाओ' इत्यादि लतावर्णनं तावद्वक्तव्यं **यावत् 'पडिरूवाओ'** इति, व्याख्या चास्य पूर्ववत्।।३९०।।

(३९१) तेसि णं चेतियरुक्खाणं उप्पिं बहवे अट्ठट्ठमंगलगा[१] झया छत्तातिछत्ता।। ३९१।।

'तेसि ण'मित्यादि, **तेषां चैत्यवृक्षाणामुपरि अष्टावष्टौ मङ्गलकानि बहवः** कृष्णचामर**ध्वजा** इत्यादि पूर्ववत्तावद् वक्तव्यं यावद् बहवः सहस्रपत्रहस्तकाः सर्वरत्नमया यावत्प्रतिरूपका इति।।३९१।।

(३९२) तेसि णं चेइयरुक्खाणं पुरतो [२]पत्तेयं २ तओ मणिपेढियाओ पण्णत्ताओ, ताओ णं मणिपेढियाओ जोयणं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं, सव्व-मणिमतीओ अच्छा जाव पडिरूवाओ।।३९२।।

'तेसि ण'मित्यादि, **तेषां चैत्यवृक्षाणां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजनमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमय्यः, अच्छा** इत्यादि प्राग्वत्।। ३९२।।

(३९३) तासि णं मणिपेढियाणं उप्पिं पत्तेयं पत्तेयं महिंदज्झया, पण्णत्ता, ते णं महिंदज्झया अद्धट्ठमाइं जोयणाइं उड्ढं उच्चत्तेणं, अद्धकोसं उव्वेहेणं, अद्धकोसं विक्खंभेणं, वइरामयवट्टलट्ठ[३]संठियसुसिलिट्ठपरिघट्ठमट्ठसुपतिट्ठिता विसिट्ठा अणेगवर-पंचवण्णकुडभीसहस्सपरिमंडियाभिरामा वाउद्धुयविजयवेजयंतीपडागा छत्तातिछत्त-कलिया तुंगा गगणतलमभिलंघमाणसिहरा पासादीया जाव पडिरूवा।। ३९३।।

'तासि ण'मित्यादि, **तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं महेन्द्रध्वजः प्रज्ञप्तः, ते च महेन्द्रध्वजा 'अर्द्धाष्टमानि'** सार्द्धानि सप्त **योजनान्यूर्ध्वमुच्चैस्त्वेन, अर्द्धक्रोशं**–धनुःसहस्रप्रमाण-**मुद्वेधेन, अर्द्धक्रोशं**-धनुःसहस्रप्रमाणं **'विष्कम्भेन'** विस्तारेण, **'वइरामयवट्टलट्ठसंठियसुसिलिट्ठ-परिघट्ठमट्ठसुपइट्ठिया'** इति वज्रमया–वज्ररत्नमयाः तथा वृत्तं–वर्त्तुलं लष्टं–मनोज्ञं संस्थितं–संस्थानं

---

१. ० गा जाव हत्थागा-**जे.।।** २. **जे.L** । तिदिसिं तओ - **कखहगटत्रिमु. ।।** ३.०लट्ठि० **जे. ।।**

येषां ते वृत्तलष्टसंस्थिताः, तथा सुश्लिष्टा यथा भवन्ति एवं परिघृष्टा इव खरशानया पाषाणप्रतिमेव सुश्लिष्टपरिघृष्टाः मृष्टाः सुकुमारशानया पाषाणप्रतिमेव सुप्रतिष्ठिता मनागप्यचलनात् **'अणेगवरपंच-वण्णकुडभीसहस्सपरिमंडियाभिरामा'** अनेकैर्वरैः–प्रधानैः पञ्चवर्णैः कुडभीसहस्रैः–लघुपताकासहस्रैः परिमण्डिताः सन्तोऽभिरामा अनेकवरपञ्चवर्णकुडभीसहस्रपरिमण्डिताभिरामाः **'वाउद्धुयविजयवेजयंती-पडागा छत्ताइछत्तकलिया तुंगा गगणतलमणुलिहंतसिहरा पासाईया जाव पडिरूवा'** इति प्राग्वत्।।३९३।।

(३९४) तेसि णं महिंदज्झयाणं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।।३९४।।

'तेसि ण'मित्यादि, **तेषां महेन्द्रध्वजानामुपरि अष्टावष्टौ मङ्गलकानि** बहवः कृष्णचामरध्वजा इत्यादि पूर्ववत् सर्वं वक्तव्यं यावद् बहवः सहस्रपत्रकहस्तका इति।।३९४।।

(३९५) तेसि णं महिंदज्झयाणं पुरतो पत्तेयं[१] २ णंदाओ पुक्खरिणीओ पं० ताओ णं पुक्खरिणीओ अद्धतेरसजोयणाइं आयामेणं सक्कोसाइं छ जोयणाइं विक्खंभेणं दसजोयणाइं उव्वेहेणं अच्छाओ सण्हाओ पुक्खरिणीवण्णओ, पत्तेयं पत्तेयं पउमवरवेइयापरिक्खित्ताओ पत्तेयं पत्तेयं वणसंडपरिक्खित्ताओ वण्णओ[२] ।।३९५।।

'तेसि ण'मित्यादि, **तेषां महेन्द्रध्वजानां पुरतः प्रत्येकं प्रत्येकं 'नन्दा'** नन्दाभिधाना **पुष्करिणी प्रज्ञप्ता, 'अर्द्धत्रयोदश'** सार्द्धानि द्वादश **योजनानि आयामेन, षड्योजनानि सक्रोशानि विष्कम्भेन, दश योजनान्युद्वेधेन**–उण्डत्वेन, **'अच्छाओ सण्हाओ** रययमयकूडाओ' इत्यादि **वर्णनं** जगत्युपरि पुष्करिणीवन्निरवशेषं वक्तव्यं यावत् 'पासाईयाओ उदगरसेणं पन्नत्ताओ' ताश्च नन्दापुष्करिण्यः **प्रत्येकं २ पद्मवरवेदिकया प्रत्येकं २ वनखण्डेन च परिक्षिप्ताः**।।३९५।।

(३९६-३९७) तासि णं णंदाणं पुक्खरिणीणं पत्तेयं२ तिदिसिं तिसोवाणपडिरूवगा पं०, तेसि णं तिसोवाणपडिरूवगाणं वण्णओ, तोरणवण्णओ जाव छत्तातिच्छत्ता।।

---

१. अत्र सूत्र-वृत्त्योः पाठभेदो दृश्यते ।। २. जे. । तिदिसिं-मु. कखगटत्रि ।। ३. जे. L। वण्णओ जाव पडिरूवाओ- कखगटत्रिमु. ।।

सभाए णं सुहम्माए छ [मणो]गुलियासाहस्सीओ पण्णत्ताओ, तंजहा-पुरत्थिमेणं दो साहस्सीओ, पच्चत्थिमेणं दो साहस्सीओ, दाहिणेणं एगसाहस्सी, उत्तरेणं एगा साहस्सी, तासु णं मणोगुलियासु बहवे सुवण्णरुप्पामया फलगा पण्णत्ता, तेसु णं सुवण्णरुप्पा मएसु फलगेसु बहवे वइरामया णागदंतगा पण्णत्ता, तेसु णं वइरामएसु नागदंतएसु बहवे किण्हसुत्तवट्टवग्घारितमल्लदामकलावा जाव सुक्किलवट्टवग्घारितमल्लदामकलावा, ते णं दामा तवणिज्जलंबूसगा जाव चिट्ठंति।। ३९६-३९७।।

तासां च नन्दापुष्करिणीनां त्रिदिशि त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि, तेषां च वर्णनं तोरणवर्णनं च प्राग्वत्।। **'सभाए णं सुहम्माए'** इत्यादि, **सभायां सुधर्म्मायां षड् [मनो] गुलिका-सहस्राणि प्रज्ञप्तानि, तद्यथा-द्वे सहस्रे पूर्वस्यां** दिशि **द्वे पश्चिमायामेकं सहस्रं दक्षिणस्यामेकमुत्तरस्या**मिति, **एतासु** च **फलक-नागदन्तक-माल्यदामवर्णनं** प्राग्वत्।।३९६-३९७।।

(३९८) सभाए णं सुहम्माए छगोमाणसीसाहस्सीओ पण्णत्ताओ, तंजहा-पुरत्थिमेणं दो साहस्सीओ, एवं पच्चत्थिमेणवि, दाहिणेणं सहस्सं, एवं उत्तरेणवि, तासु णं गोमाणसीसु बहवे सुवण्णरुप्पमया फलगा[1] पं० →तेसु णं सुवण्णरूप्पामएसु फलगेसु बहवे वइरामया णागदंतगा पण्णत्ता← । तेसु णं वइरामएसु नागदंतएसु बहवे रयतामया सिक्कता पण्णत्ता, तेसु णं रयतामएसु सिक्कएसु बहवे वेरूलियामईओ धूवघडिताओ पण्णत्ताओ, ताओ णं धूवघडियाओ कालागुरु-पवरकुंदुरुक्क-तुरुक्क जाव घाणमणणिव्वुइकरेणं गंधेणं ते पएसे सव्वतो समंता आपूरेमाणीओ चिट्ठंति।। ३९८।।

'सभाए णं सुहम्माए' इत्यादि, **सभायां सुधर्मायां षड् गोमानसिकाः**-शय्यारूपाः स्थानविशेषास्तासां **सहस्राणि प्रज्ञप्तानि, तद्यथा-द्वे सहस्रे पूर्वस्यां** दिशि **द्वे पश्चिमायामेकं**

---

१. **जे. L**। ० गा. पं. जाव तेसु णं वइरा० **मु.** ।।

दक्षिणस्यामेकमुत्तरस्यामिति, **तास्वपि फलक**वर्णनं **नागदन्त**वर्णनं **धूपघटिका**वर्णनं च विजयद्वारवत्।।३९८।।

(३९९) →सभाए णं सुहम्माए अल्लोया य पउमलयाभत्तिचित्ता जाव सामल० जाव सव्वतवणिज्जमए जाव पडि०← । सभाए णं सुधम्माए अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते जाव मणीणं फासो अच्छे जाव पडिरूवे।। ३९९।।

'सभाए णं सुहम्माए' इत्यादि **उल्लोक**वर्णनं **'सभाए णं सुहम्माए'** इत्यादि भूमिभागवर्णनं च प्राग्वत् ।।३९९।।

(४००) तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं महं एगा मणिपीढिया पण्णत्ता, सा णं मणिपीढिया दो जोयणाइं आयाम-विक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमता अच्छा जाव पडिरूवा।। ४००।।

'तस्स णं बहुसमरमणीयस्स भूमिभागस्से'त्यादि, **तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे, अत्र महती एका मणिपीठिका प्रज्ञप्ता, द्वे योजने आयाम-विष्कम्भाभ्यामेकं योजनं बाहल्येन सर्वात्मना मणिमयी 'अच्छा'** इत्यादि प्राग्वत्।।४००।।

(४०१-४०३) तीसे णं मणिपीढियाए उप्पिं एत्थ णं [१]महं एगे माणवए णाम चेइयखंभे [२]पण्णत्ते, अद्धट्ठमाइं जोयणाइं उड्ढं उच्चत्तेणं अद्धकोसं उव्वेहेणं अद्धकोसं विक्खंभेणं [३]छअंसे छकोडीए छविग्गहिते वइरामयवट्टलट्ठसंठिते, [४]एवं जहा महिंदज्झयस्स वण्णओ जाव पडिरूवा।। (४०२) तस्स णं माणवकस्स चेतियखंभस्स उवरिं छक्कोसे ओगाहित्ता, हेट्ठावि छक्कोसे वज्जेत्ता, मज्झे अद्धपंचमेसु जोयणेसु एत्थ णं बहवे सुवण्णरुप्पमया फलगा पं०, तेसु णं सुवण्णरुप्पमएसु फलएसु बहवे वइरामया णागदंता पण्णत्ता। तेसु णं वइरामएसु

---

१. मंह एगे - **जे.Lअस्ति । कखगटत्रिमु. राज प्र. सू. २३९ नास्ति ।।** २. पण्णत्ते, महिंदज्झयपमाणं जाव अद्धकोसं विक्खंभेणं. **जे. ।।** ३. **जे ।** छकोडीए छलंसे - **मु. L।।** ४. एवं जहा-**जे. नास्ति ।।**

नागदंतएसु बहवे रययामता सिक्कगा पण्णत्ता।। (४०३)तेसु णं रययामयसिक्कएसु बहुवाओ वइरामया गोलवट्टसमुग्गका पण्णत्ता, तेसु णं वइरामएसु गोलवट्टसमुग्गएसु बहुवाओ जिणसकहाओ संनिक्खित्ताओ चिट्ठंति, [१]जाओ णं विजयस्स देवस्स अण्णेसिं च बहूणं वाणमंतराणं देवाण य देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्कारणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेतियं पज्जुवासणिज्जाओ। माणवगस्स णं चेतियखंभस्स उवरिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।।४०१-४०३।।

'तीसे ण'मित्यादि, **तस्या मणिपीठिकाया उपरि महानेको माणवकनामा चैत्यस्तम्भः प्रज्ञप्तः, अर्द्धाष्टमानि**–सार्द्धानि सप्त **योजनान्यूर्ध्वमुच्चैस्त्वेन अर्द्धक्रोशं**-धनुःसहस्रमान**मुद्वेधेन, अर्द्धक्रोशं विष्कम्भेन षडस्रिकः षट्कोटीकः षड्विग्रहिकः 'वइरामयवट्टलट्ठसंठिए'** इत्यादि महेन्द्रध्वजवद् वर्णनमशेषमस्यापि तावद्वक्तव्यं यावद् 'बहवो सहस्सपत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा' इति।। **'तस्स ण'**मित्यादि, **तस्य माणवकस्य चैत्यस्तम्भस्योपरि षट् क्रोशान् अवगाह्य** उपरितनभागात् षट् क्रोशान् वर्जयित्वेति भावः, **अधस्तादपि षट् क्रोशान् वर्जयित्वा मध्येऽर्द्धपञ्चमेषु योजनेषु बहवे 'सुवण्णरुप्पमया फलगा'** इत्यादिफलकवर्णनं नागदन्तवर्णनं सिक्कगवर्णनं च प्राग्वत्।। **'तेषु ण'**मित्यादि, **तेषु रजतमयेषु सिक्ककेषु बहवो वज्रमया गोलवृत्ताः समुद्गकाः, तेषु च वज्रमयेषु समुद्गकेषु बहूनि जिनसक्थीनि संनिक्षिप्तानि तिष्ठन्ति, यानि विजयस्य देवस्यान्येषां च बहूनां वानमन्तराणां देवानां देवीनां चार्चनीयानि** चन्दनतः, **वन्दनीयानि** स्तुत्यादिना, **पूजनीयानि** पुष्पादिना, **[सं]माननीयानि** बहुमानकरणतः, **सत्कारणीयानि** वस्त्रादिना **कल्याणं मङ्गलं दैवतं चैत्यमि**तिबुद्ध्या **पर्युपासनीयानि**।।४०१-४०३।।

(४०४) तस्स णं माणवकस्स चेतियखंभस्स पुरत्थिमेणं एत्थ णं महं एगा मणिपेढिया पं०, सा णं मणिपेढिया[२] जोयणं आयाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमई जाव पडिरूवा।।४०४।।

१.मु.L। ताओ - **जे.।। २.Lजे.।** ०या दो जोयणाइं आयाम- विक्खभेणं जोयणं बाहल्लेणं-**कखगटत्रिमु।।**

'तस्स ण'मित्यादि, तस्य **माणवकस्य चैत्यस्तम्भस्य पूर्वस्यां** दिशि **अत्र महत्येका मणिपीठिका प्रज्ञप्ता,** योजनमेक**मायाम-विष्कम्भाभ्या**मर्द्धयोजनं **बाहल्येन सर्वात्मना मणिमयी** 'अच्छा' इत्यादि प्राग्वत्।।४०४।।

(४०५) तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे सीहासणे पण्णत्ते[१] सपरिवारे।।४०५।।

'तीसे ण'मित्यादि, **तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं प्रज्ञप्तं** तद्वर्णनं शेषाणि च भद्रासनानि **तत्परिवार**भूतानि प्राग्वत्।।४०५।।

(४०६) तस्स णं माणवगस्स चेतियखंभस्स पच्चत्थिमेणं एत्थ णं महं एगा मणिपेढिया पं० जोयणं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं, सव्वमणिमती अच्छा जाव पडिरूवा।।४०६।।

'तस्स ण'मित्यादि, **तस्य माणवकनाम्नश्चैत्यस्तम्भस्य पश्चिमायां** दिशि **अत्र महत्येका मणिपीठिका प्रज्ञप्ता,** एकं **योजनमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमयी'** इत्यादि प्राग्वत्।।४०६।।

(४०७) तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे देवसयणिज्जे पण्णत्ते, तस्स णं देवसयणिज्जस्स अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-नाणामणिमया पडिपादा, सोवण्णिया पादा, नाणामणिमया पायसीसा, जंबूणयमयाइं गत्ताइं, वइरामया संधी, णाणामणिमते चिंच्चे[२], रइयामई तूली, लोहियक्खमया बिब्बोयणा, तवणिज्जमती गंडोवहाणिया। से णं देवसयणिज्जे सालिंगणवट्टीए उभओ बिब्बोयणे दुहओ उण्णए मज्झे णयगंभीरे गंगापुलिणवालुयाउद्दालसालिसए ओतवितखोमदुगुल्लपट्टपडिच्छायणे[३] आईणग-रूत-बूर-णवणीय-तूलफासे रत्तंसुयसंवुते सुरम्मे पासाईए।।४०७।।

---

१. Lजे. पण्णत्ते सीहासणवण्णओ- कखगटत्रिमु.।।२. वेच्चे-Lजे.।। ३.०च्छयणे - जे. L। इतोऽग्रे. सुविरचितरयत्ताणे-L मु. अस्ति, जे. नास्ति ।।

'तीसे ण'मित्यादि, **तस्या मणिपीठिकाया उपरि अत्र महदेकं [देव]शयनीयं प्रज्ञप्तं, तस्य च देवशयनीयस्यायमेतद्रूपः 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः, तद्यथा-नानामणिमयाः प्रतिपादाः-** मूलपादानां प्रतिविशिष्टोपष्टम्भकरणाय पादाः प्रतिपादाः **'सौवर्णिकाः'** सुवर्णमयाः **'पादाः'**[1] मूलपादाः, **जाम्बूनदमयानि गात्राणि-**ईषाऽऽदीनि **वज्रमया** वज्ररत्नपूरिताः **सन्धयः, 'नानामणिमये चिच्चे'** इति चिच्चं नाम च्युतं वानमित्यर्थः, नानामणिमयं च्युतं–विशिष्टवानं **रजतमयी तूली लोहिताक्षमयानि 'बिब्बोयणा'** इति उपधानकानि, आह च– **मूलटीकाकारः–"बिब्बोयणा उपधानकानि उच्यन्ते"** [ ] इति, **तपनीयमय्यो गण्डोपधानकाः। 'से णं देवसयणिज्जे'** इत्यादि, **तद् देवशयनीयं 'सालिङ्गनवर्त्तिकं'** सह आलिङ्गनवर्त्त्या–शरीरप्रमाणेनोपधानेन यत् तत्तथा **'उभओ बिब्बोयणे'** इति उभयतः–उभौ–शिरोऽन्त-पादान्तावाश्रित्य बिब्बोयणे–उपधाने यत्र तद् उभयतो बिब्बोयणं **'दुहतो उन्नते'** इति उभयत उन्नतं **'मज्झेणयगंभीरे'** इति, मध्ये च नतं निम्नत्वाद् गम्भीरं च महत्त्वात् नतगम्भीरं गङ्गापुलिनवालुकाया अवदालो–विदलनं पादादिन्यासेऽधोगमनमिति भावः तेन 'सालिसए' इति सदृशकं **गङ्गापुलिनवालुकावदालसदृशं,** तथा **'ओयविय'** इति विशिष्टं परिकर्मितं क्षौमं–कार्पासिकं दुकूलं–वस्त्रं तदेव पट्ट **ओयवियक्षौमदुकूलपट्टः** स **प्रतिच्छादनम्**-आच्छादनं यस्य तत्तथा, **'आईणगरूयबूरनवणीयतूलफासे'** इति प्राग्वत्, **'रत्तंसुयसंवुए'** इति रक्तांशुकेन संवृतं रक्तांशुकसंवृतम्, अत एव **सुरम्यं, 'पासाईए'** इत्यादि पदचतुष्टयं प्राग्वद्।।४०७।।

(४०८) तस्स णं देवसयणिज्जस्स उत्तरपुरत्थिमेणं एत्थ णं महई[2] एगा मणिपीढिका पण्णत्ता-जोयणमेगं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं, सव्वमणिमई अच्छा जाव पडिरूवा ।।४०८।।

'तस्स ण'मित्यादि, **तस्य देवशयनीयस्य उत्तरपूर्वस्यां** दिशि **अत्र महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमयी अच्छा'** इत्यादि प्राग्वत्।।४०८।।

---

१. इतोऽग्रे राजप्रश्नीयसूत्र (२४५) वृत्तौ नानामणिमयानि पादशीर्षकाणि-इति पाठोऽस्ति ।। २. मु. त्रि । महं - जे. L।

(४०९) तीसे णं मणिपीढियाए उप्पिं एत्थ णं खुड्डए महिंदज्झए [१]पण्णत्ते, पमाणं वण्णओ जो महिंदज्झयस्स ।। ४०९ ।।

'तीसे ण'मित्यादि, **तस्या मणिपीठिकाया उपरि अत्र क्षुल्लको महेन्द्रध्वजः प्रज्ञप्तः,** तस्य **प्रमाणं च वर्णकश्च महेन्द्रध्वजवद्वक्तव्यः**।।४०९।।

(४१०) तस्स णं खुड्डागमहिंदज्झयस्स पच्चत्थिमेणं एत्थ णं महं एगे विजयस्स देवस्स चुप्पालए नाम पहरणकोसे पण्णत्ते। तत्थ णं विजयस्स देवस्स बहवे फलिहरयणपामोक्खा पहरणरयणा संनिक्खित्ता चिट्ठंति, उज्जलसुणिसिय-सुतिक्खधारा पासाईया(४)।।४१०।।

'तस्स ण'मित्यादि, **तस्य क्षुल्लकस्य महेन्द्रध्वजस्य पश्चिमायां** दिशि **अत्र विजयस्य देवस्य** सम्बन्धी महान् एक**श्चोप्पालो नाम 'प्रहरणकोशः'** प्रहरणस्थानं **प्रज्ञप्तं,** किंविशिष्टमित्याह– 'सव्ववइरामए अच्छे जाव पडिरूवे' इति प्राग्वत्। **'तत्थ ण'**मित्यादि, **तत्र** चोप्पालकाभिधाने प्रहरणकोशे **बहूनि परिघरत्नप्रमुखाणि प्रहरणरत्नानि संनिक्षिप्तानि तिष्ठन्ति,** कथम्भूतानीत्यत आह– **उज्ज्वलानि**-निर्मलानि **सुनिशितानि**-अतितेजितानि, अत एव **[सु]तीक्ष्णधाराणि प्रासादीयानी**त्यादि प्राग्वत्।।४१०।।

(४११) [२]तीसे णं सभाए सुहम्माए उप्पिं बहवे [३]अट्ठट्ठमंगलगा जाव हत्था।४११।

'तीसे णं सभाए' इत्यादि, **तस्याः सुधर्म्मायाः सभाया उपरि बहून्यष्टावष्टौ मङ्गलकानि** इत्यादि सर्वं प्राग्वत्तावद्वक्तव्यं **यावद्** बहवः सहस्रपत्र**हस्तकाः** सर्वरत्नमया अच्छा यावत्प्रतिरूपाः।।४११।।

(४१२) सभाए णं सुधम्माए उत्तरपुरत्थिमेणं एत्थ णं महं एगे सिद्धायतणे पण्णत्ते, अद्धतेरस जोयणाइं आयामेणं, छ जोयणाइं सकोसाइं विक्खंभेणं, नव जोयणाइं उड्ढं उच्चत्तेणं जाव गोमाणसिया वत्तव्वया जा चेव सभाए सुहम्माए वत्तव्वया

---

१. जे. L। कखगटत्रिमु. मध्ये पण्णत्ते अद्धट्ठमाइं जोयणाइं उड्ढं उच्चत्तेणं अद्धकोसं उव्वेधेणं अद्धकोसं विक्खंभेणं वेरुलियामयवट्टलट्ठसंठिते तहेव जाव मंगला झया छत्तातिछत्ता **इति पाठः** ।। २. मु. L। सभाए णं सुहम्माए - जे. ।। ३. अट्ठट्ठ जाव हत्था - जे. । अट्ठट्ठमंगलगाझया छत्तातिछत्ता - मु. L।।

सा चेव [१]निरवसेसा भाणियव्वा तहेव दारा मुहमंडवा पेच्छाघरमंडवा झया थूभा चेइयरुक्खा महिंदज्झया णंदाओ पुक्खरिणीओ, [२]तओ य सुधम्माए जहा पमाणं मणगुलियाणं गोमाणसीया धूवयघडिओ तहेव भूमिभागे उल्लोए य जाव मणिफासे।।४१२।।

'सभाए ण'मित्यादि, **सभायाः सुधर्म्मायाः उत्तरपूर्वस्यां** दिशि **अत्र महदेकं सिद्धायतनं प्रज्ञप्तम्, अर्द्धत्रयोदश योजनान्यायामेन षट् सक्रोशानि योजनानि विष्कम्भतो नव योजनान्यूर्ध्वमुच्चैस्त्वेने**त्यादि सर्वं सुधर्म्मावद्वक्तव्यं **यावद् गोमानसीवक्तव्यता,** तथा चाह–**'जा चेव सभाए सुधम्माए वत्तव्वया सा चेव निरवसेसा भाणियव्वा** जाव गोमाणसियाओ' इति, किमुक्तं भवति?– यथा सुधर्म्मायाः सभायाः पूर्वदक्षिणोत्तरवर्त्तीनि त्रीणि **द्वाराणि,** तेषां च द्वाराणां पुरतो **मुखमण्डपाः,** तेषां च मुखमण्डपानां पुरतः **प्रेक्षागृहमण्डपाः,** तेषां च प्रेक्षागृहमण्डपानां पुरतश्चैत्य**स्तूपाः** सप्रतिमाः, तेषां च चैत्यस्तूपानां पुरत**श्चैत्यवृक्षाः,** तेषां च चैत्यवृक्षाणां पुरतो **महेन्द्रध्वजाः,** तेषां च महेन्द्रध्वजानां पुरतो **नन्दापुष्करिण्य** उक्ताः, तदनन्तरं च सभायां **सुधर्म्मायां** षड् **गुलिका**सहस्राणि षड् **गोमानसी**सहस्राण्यप्युक्तानि तथाऽत्रापि सर्वमनेनैव क्रमेण निरवशेषं वक्तव्यम्, **उल्लोक**वर्णनं बहुसमरमणीय**भूमिभाग**वर्णनमपि तथैव।।४१२।।

(४१३) तस्स णं सिद्धायतणस्स अंतो बहुसमरमणिज्जे भूमीभागे बहुमज्झदेसभाए एत्थ णं महं एगा मणिपेढिया पण्णत्ता दो जोयणाइं आयाम-विक्खंभेणं, जोयणं बाहल्लेणं सव्वमणिमयी अच्छा जाव पडि०।। ४१३।।

'तस्स ण'मित्यादि, **तस्य (सिद्धायतनस्य) बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र महत्येका मणिपीठिका प्रज्ञप्ता, द्वे योजने आयाम-विष्कम्भाभ्यां योजनमेकं बाहल्येन सर्वमणिमयी अच्छा** इत्यादि प्राग्वत्।।४१३।।

(४१४) तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे देवच्छंदए पण्णत्ते, साइरेगाइं दो जोयणाइं उड्ढं उच्चत्तेणं दो जोयणाइं आयाम-विक्खंभेणं सव्वरयणामए अच्छे जाव पडि०।। ४१४।।

---

१. णिरवयवा पमाणादिया जाव गोमाणसिया **-जे.** ।। २. सुधम्मासरिसप्पमाणं मणगुलिया दामा गोमाणसी धूवधडियाओ **- L।**

'तीसे ण' मित्यादि, **तस्याश्च मणिपीठिकाया उपरि अत्र महानेको देवच्छन्दकः प्रज्ञप्तः, सातिरेके द्वे योजने ऊर्ध्वमुच्चैस्त्वेन द्वे योजने आयाम-विष्कम्भाभ्यां सर्वात्मना रत्नमया अच्छा** इत्यादि प्राग्वत्।। ३१४।।

(४१५) तत्थ णं देवच्छंदए अट्ठसतं जिणपडिमाणं जिणुस्सेहप्पमाणमेत्तीणं संणिक्खित्तं चिट्ठइ। तासि णं जिणपडिमाणं अयमेयारूवे वण्णावासे पण्णत्ते, तंजहा-तवणिज्जमता हत्थतला पादतला, अंकामया णक्खा अंतोलोहियक्खपरिसेया, कणगामया पादा, कणगामया गोप्फा, कणगामतीओ जंघाओ, कणगामया जाणू, कणगामया ऊरू, कणगामईओ गायलट्ठीओ, तवणिज्जमतीओ णाभीओ, रिट्ठा-मतीओ रोमरातीओ, तवणिज्जमया चुच्चुया, तवणिज्जमता सिरिवच्छा, कणग-मईओ बाहाओ, कणगमईओ पासाओ, कणगमतीओ गीवाओ, रिट्ठामते मंसू, सिलप्पवालमया ओट्ठा, फलिहामया दंता, तवणिज्जमतीओ जीहाओ, तवणिज्जमया तालुया, कणगमतीओ णासाओ अंतोलोहितक्खपरिसेयाओ, अंकामयाणि अच्छीणि अंतोलोहितक्खपरिसेताइं, पुलगमतीओ दिट्ठीओ रिट्ठामतीओ तारगाओ, [१]रिट्ठामयाइं अच्छिपत्ताइं, रिट्ठामतीओ भमुहाओ, कणगामया कवोला, कणगामया [२]सवणा कणगामया णिडालावट्टा, वइरामतीओ सीसघडीओ, तवणिज्जमतीओ केसंतकेस-भूमीओ रिट्ठामया उवरिमुद्धजा।। ४१५।।

(४१६) तासि णं जिणपडिमाणं पिट्ठतो पत्तेयं पत्तेयं छत्तधारपडिमाओ पण्णत्ताओ, ताओ णं छत्तधारपडिमाओ हिमरं[३]जतकुंदेंदुसप्पकासाइं सकोरेंटमल्ल-दामधवलाइं आतपत्ताइं सलीलं [४]धारेमाणीओ चिट्ठंति।।४१६।।

'तत्थ ण'मित्यादि, **तत्र देवच्छन्दके 'अष्टशतम्'** अष्टाधिकं शतं **जिनप्रतिमानां**

१. रिट्ठामया अच्छीणि अच्छिपत्ताणि - **जे.** ।। २. सवणा अंतोलोहियक्खपरि० **जे.**।। ३. रययकुमुदकुंदेंदु - सण्णिकासाइं-**जे** ।। ४. **जे. L**। ओहारेमाणीओ **२ कखगटत्रि** ।।

जिनोत्सेधप्रमाणमात्राणां पञ्चधनुःशतप्रमाणानामिति भावः **सन्निक्षिप्तं तिष्ठति। 'तासि णं जिण-पडिमाण'**मित्यादि, **तासां जिनप्रतिमानामयमेतद्रूपो 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः, तपनीयमयानि हस्ततल**पादतलानि **'अङ्कमयाः'** अङ्करत्नमया **अन्तः**–मध्ये **लोहिताक्षरत्नप्रतिषेका नखाः, कनकमय्यो जङ्घाः, कनकमयानि जानूनि, कनकमया ऊरवः, कनकमय्यो गात्रयष्टयः, तपनीयमया नाभयः, रिष्ठरत्नमय्यो रोमराजयः, तपनीयमयाः 'चुच्चुकाः'** स्तनाग्रभागाः, **तपनीयमयाः श्रीवृक्षाः** (वत्साः), **'शिलाप्रवालमयाः'** विद्रुममया **ओष्ठाः, स्फटिकमया दन्ताः, तपनीयमय्यो जिह्वाः, तपनीयमयानि तालुकानि, कनकमय्यो नासिकाः अन्तर्लोहिताक्षरत्नप्रतिसेकाः, अङ्कमयानि अक्षीणि अन्तर्लोहिताक्षप्रतिसेकानि, रिष्ठरत्नमय्यो**ऽक्षिमध्यगतास्तारिकाः, **रिष्ठरत्नमयानि अक्षिपत्राणि, रिष्ठरत्नमय्यो भ्रुवः, कनकमयाः कपोलाः, कनकमयाः श्रवणाः, कनकमय्यो ललाटपट्टिकाः, वज्रमय्यः शीर्षघटिकाः, तपनीयमय्यः केशान्तकेशभूमयः, केशानामन्तभूमयः** केशभूमयश्चेति भावः, **रिष्टमया उपरि मूर्द्धजाः**-केशाः, **तासां जिनप्रतिमानां पृष्ठत** एकैका **छत्रधरप्रतिमा हेमरजतकुन्देन्दु(समान)-प्रकाशं सकोरिटमाल्यदामधवलमातपत्रं** गृहीत्वा **सलीलं धरन्ती तिष्ठति**।। ४१५-४१६।।

(४१७) तासि णं जिणपडिमाणं उभओ पासिं [१]दो २ चामरधारपडिमाओ पन्नत्ताओ, ताओ णं चामरधारपडिमाओ चंदप्पहवइरवेरुलियनाणा[२]मणिरयणखचितदंडाओ चिल्लियाओ सुहुमरयतदीहवालाओ संखंककुंददगरयअमतमथितफेणपुंजसण्णिकासाओ धवलाओ चामराओ गहाय सलीलं [३]वीजेमाणीओ चिट्ठंति।।४१७।।

'तासि णं जिणपडिमाण'मित्यादि, **तासां जिनप्रतिमानां प्रत्येकमुभयोः पार्श्वयोर्द्वे द्वे चामरधारप्रतिमे प्रज्ञप्ते, 'चंदप्पभवइरवेरुलियनाणामणिरयणखचितदंडाओ'** इति चन्द्रप्रभः–चन्द्रकान्तो वज्रं वैडूर्यं च प्रतीतं चन्द्रप्रभ-वज्र-वैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु दण्डेषु ते तथा, एवंरूपाश्चित्राः–नानाप्रकारा दण्डा येषां तानि तथा, सूत्रे स्त्रीत्वं प्राकृतत्वात्, **'सुहुमरययदीहवालाओ'** इति सूक्ष्माः–श्लक्ष्णा रजतस्य–रजतमया वाला येषां तानि तथा,

---

१. जे. L। पत्तेयं पत्तेयं **कखगटत्रि राजप्र. वृत्तौ च** ।। २. जे. L। णाणामणिकणगरयणविमलमहरिहत-वणिज्जुज्जलविचित्तदंडाओ-**कखगटत्रिमु** ।। ३. जे. । ओहारेमाणीओ - **कखगटत्रिमु.** ।।

'संखंककुंददगरयअमयमहियफेणपुंजसन्निकासाओ धवलाओ चामराओ' इति प्रतीतं, **चामराणि गृहीत्वा सलीलं वीजयन्त्यस्तिष्ठन्ति**।। ४१७ ।।

(४१८)तासि णं जिणपडिमाणं पुरतो दो दो नागपडिमाओ, दो २ जक्खपडिमाओ, दो २ भूतपडिमाओ, दो२ कुंडधारपडिमाओ→[१]विणओणयाओ पायवडियाओ पंजलिउडाओ ←। संणिक्खित्ताओ चिट्ठंति सव्वरयणामतीओ अच्छाओ सण्हाओ लण्हाओ घट्ठाओ मट्ठाओ णीरयाओ णिप्पंकाओ जाव पडिरूवाओ।।४१८।।

'तासि ण'मित्यादि, **तासां जिनप्रतिमानां पुरतो द्वे द्वे नागप्रतिमे द्वे द्वे यक्षप्रतिमे द्वे द्वे भूतप्रतिमे द्वे द्वे कुण्डधारप्रतिमे संनिक्षिप्ते तिष्ठतः,** ताश्च **'सव्वरयणामईओ अच्छाओ'** इत्यादि प्राग्वत्।।४१८।।

(४१९) तत्थ[२] णं देवच्छंदए जिणपडिमाणं पुरतो अट्ठसतं [३]घंटाणं अट्ठसतं वंदण-कलसाणं एवं अट्ठसतं भिंगारगाणं एवं आयंसगाणं थालाणं पातीणं सुपतिट्ठकाणं मणगुलियाणं वातकरगाणं चित्ताणं रयणकरंडगाणं हयकंठगाणं जाव उसभकंठगाणं पुप्फचंगेरीणं जाव लोमहत्थचंगेरीणं पुप्फपडलगाणं अट्ठसयं तेल्लसमुग्गाणं जावट्ठसतं धूवगडच्छुयाणं संणिखित्तं चिट्ठति।।४१९।।

'तत्थ ण'मित्यादि, **'तस्मिन्' देवच्छन्दके जिनप्रतिमानां पुरतोऽष्टशतं घण्टानामष्टशतं वन्दनकलशानामष्टशतं भृङ्गाराणा**मष्टशत**मादर्शाना**मष्टशतं **स्थालानाम**ष्टशतं **पात्रीणा**मष्टशतं **सुप्रतिष्ठाना**मष्टशतं **मनोगुलिकानां**–पीठिकाविशेषरूपाणामष्टशतं **वातकरकाणा**मष्टशतं **चित्राणां रत्नकरण्डकाणा**मष्टशतं **हयकण्ठानाम**ष्टशतं गजकण्ठानामष्टशतं नरकण्ठानामष्टशतं किन्नरकण्ठानामष्टशतं किंपुरुषकण्ठानामष्टशतं महोरगकण्ठानामष्टशतं गन्धर्वकण्ठानामष्टशतं **वृषभकण्ठाना**मष्टशतं **पुष्पचङ्गेरीणा**मष्टशतं माल्यचङ्गेरीणामष्टशतं चूर्णचङ्गेरीणामष्टशतं गन्धचङ्गेरीणामष्टशतं वस्त्रचङ्गेरीणामष्टशतमाभरणचङ्गेरीणामष्टशतं **लोमहस्तचङ्गेरीणां**

---

१. **कखगटत्रिमु.। →←चिह्नद्वयमध्यवतिपाठः जे.L राजप्रश्नीय सू. २५७ नास्ति ।।** २. तत्थ णं देवच्छंदए अट्ठ० **जे.** । तासि णं जिणपडिमाणं पुरतो **- मु. क ख ग ट त्रि ।। ३. मु.**। घंटा । वंदणकलसा भिंगारगा य, आयंसगा य थाला य । पाईओ सुपइट्ठा, मणगुलिया वायकरगा य ।। १ ।। चित्ता रयणकरंडा, हयगयणरकंठगा य चंगेरी । पडला सीहासण छत्त चामरा समुग्गाय झया य ।। २ ।। **जे.** ।।

लोमहस्तका-मयूरपिच्छपुञ्जनिकाः अष्टशतं **पुष्पपटलका**नामष्टशतं माल्यपटलकानां मुत्कलानि पुष्पाणि ग्रथितानि माल्यानि अष्टशतं चूर्णपटलकानाम्, एवं गन्धवस्त्राभरणसिद्धार्थलोमहस्तकपटलकानामपि प्रत्येकं प्रत्येकमष्टशतं वक्तव्यम्, अष्टशतं सिंहासनानामष्टशतं छत्राणामष्टशतं चामराणा**मष्टशतं तैलसमुद्गकाना**मष्टशतं कोष्ठसमुद्गकानामष्टशतं चोयकसमुद्गकानामष्टशतं तगरसमुद्गकानामष्टशतमेलासमुद्गकानामष्टशतं हरितालसमुद्गकानामष्टशतं हिङ्गुलकसमुद्गकानामष्टशतं मनःशिलासमुद्गकानामष्टशतम् अञ्जनसमुद्गकानां, सर्वाण्यप्येतानि तैलादीनि परमसुरभिगन्धोपेतानि द्रष्टव्यानि, अष्टशतं ध्वजानाम्, अत्र **सङ्ग्रहणिगाथे-**

"वंदणकलसा भिंगारगा य आयंसगा य थाला य।
पाईओ सुपइट्ठा मणगुलिया वायकरगा य।।१।।
चित्ता रयणकरंडा हयगयनरकंठगा य चंगेरी।
पडला सिंहासणछत्तचामरा समुग्गयकझया य।।२।।" [ ]

अष्टशतं **धूपकडुच्छुकानां संनिक्षिप्तं तिष्ठति**।। ४१९।।

(४२०) तस्स णं सिद्धायतणस्स णं उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता[1] ।। ४२०।।

'तस्स ण'मित्यादि, **तस्य सिद्धायतनस्य उपरि अष्टावष्टौ मङ्गलकानि, ध्वजच्छत्रातिच्छत्रादीनि** तु प्राग्वत्।।४२०।।

(४२१) तस्स णं सिद्धाययणस्स णं उत्तरपुरत्थिमेणं एत्थ णं महं एगा उववायसभा पण्णत्ता[2] जहा सुधम्मा तहेव जाव गोमाणसीओ उववायसभाए वि दारा मुहमंडवा सव्वं भूमिभागे तहेव जाव[3] मणिफासो [सुहम्मासभावत्तव्वया भाणियव्वा जाव भूमीए फासो]।। ४२१।।

'तस्स ण'मित्यादि, **तस्य सिद्धायतनस्य उत्तरपूर्वस्यामत्र महत्येका उपपातसभा प्रज्ञप्ता, तस्याश्च** सुधर्म्मासभाया इव प्रमाणं त्रीणि **द्वाराणि** तेषां च द्वाराणां पुरतो **मुखमण्डपा** इत्यादि सर्वं

---

१. **जे.L। इतोऽग्रे कखगटत्रिमु मध्ये** - उत्तिमागारा सोलसविहेहिं रयणेहिं उवसोभिया तंजहा-रयणेहिं जाव रिट्ठेहिं **इति अधिकः पाठः**। २. ०त्ता पमाणं जहा सुहम्मासभाए जाव वण्णगा - **ता.।। ३. द्र. ३। २७७-३९९।।**

तावद्वक्तव्यं **यावद् गोमानसी**वर्णनं, तदनन्तरमुल्लोकवर्णनं ततो **भूमिभाग**वर्णनं तावद् **यावन्मणीनां स्पर्शः**, तथा चाह–**'सुहम्मसभावत्तव्वया भाणियव्वा जाव भूमीए फासो'** इति।। ४२१।।

(४२२) तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपेढिया पण्णत्ता-जोयणं आयाम-विक्खंभेणं, अद्धजोयणं बाहल्लेणं, सव्वमणिमती अच्छा ।। ४२२ ।।

(४२३) तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे देवसयणिज्जे पण्णत्ते, तस्स णं देवसयणिज्जस्स [१]वण्णओ ।। ४२३ ।।

(४२४) उववायसभाए णं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता[२] ।।४२४।।

'तस्स ण'मित्यादि, **तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी अच्छा** इत्यादि विशेषणजातं प्राग्वत् । **तस्याश्च मणिपीठिकाया उपरि अत्र महदेकं देवशयनीयं प्रज्ञप्तं, तस्य** स्वरूप**वर्णनं** यथा सुधर्म्मायां सभायां देवशयनीयस्य तस्य तथा द्रष्टव्यं, तस्या अपि **उपपातसभाया उपरि अष्टावष्टौ मङ्गलकानी**त्यादि प्राग्वत्।। ४२२-४२४।।

(४२५) तीसे णं उववायसभाए उत्तरपुरत्थिमेणं एत्थ णं महं एगे हरए पण्णत्ते। से णं [३]हरए अद्धतेरसजोयणाइं आयामेणं, छ जोयणाइं सक्कोसाइं विक्खंभेणं, दस जोयणाइं उव्वेहेणं अच्छे सण्हे आयाम-विक्खंभेणं उव्वेधो वण्णओ जहा णंदाए पुक्खरणीए । तस्स णं हरतस्स तिदिसिं तओ तिसोमाणपडिरूवा । तेसि णं तिसोमाण-पडिरूवाणं पुरतो पत्तेयं पत्तेयं तोरणवण्णओ।। ४२५ ।।

---

१. द्र. ३।४०७ ।। २. जे.। ०त्ता जाव उत्तिमागारा-**कखगटत्रिमु ।। २. ता. । (वण्णओ जहा णंदाणं पुक्खरिणीणं) मु. V. ।। ३. द्र. ३।३९५-३९६ । ३।३८८-२९१ ।। ३.** हरए आयामविक्खंभेणं उव्वेधो वण्णओ जहा णंदाए पुक्खरणीए से णेगाए पयुमवणसंडवण्णओ जाव सयंति । तस्स णं हरतस्स तिदिसिं ततो तिसोमा० तेसिणं तिसोमा० पुरतो पत्तेयं तोरणवण्णओ-ता. ।।

(४२६) तस्स णं हरतस्स उत्तरपुरत्थिमेणं एत्थ णं एगा महं अभिसेयसभा पण्णत्ता, जहा सभासुधम्मा तं चेव निरवसेसं जाव गोमाणसीओ भूमिभाए उल्लोए तहेव ।।४२६।।

'**तीसे ण**'मित्यादि, **तस्या उपपातसभाया उत्तरपूर्वस्यां** दिशि **अत्र महानेको ह्रदः प्रज्ञप्तः, अर्द्धत्रयोदश योजनान्यायामेन, षड् योजनानि सक्रोशानि विष्कम्भेन दश योजनान्युद्वेधेन** '**अच्छे सण्हे** रययाकूले' इत्यादि **नन्दापुष्करिणीवत्सर्वं** निरवशेषं वाच्यं, तथा चाह–'आयामुव्वेहेणं विक्खंभेणं वन्नओ जो चेव नंदापुक्खरिणीण' मिति।।[१]'**तीसे ण**'मित्यादि, **स ह्रद एकया पद्मवरवेदिकया** एकेन च वनखण्डेन सर्वतः समन्तात्संपरिक्षिप्तः, पद्मवरवेदिकाया वर्णनं वनखण्डवर्णनं च तावद् यावत् 'तत्थ णं बहवे वाणमंतरा देवा य देवीओ य आसयंति जाव विहरंती'ति, **तस्य ह्रदस्य 'त्रिदिशि'** तिसृषु दिक्षु **त्रिसोपानप्रतिरूपकाणि** प्रज्ञप्तानि, **तेषां च त्रिसोपानप्रतिरूपकाणां तोरणानां**[२] **च [वर्णनं** पूर्ववत् **]** '**तस्स ण**'मित्यादि, **तस्य ह्रदस्य उत्तरपूर्वस्यां** दिशि **अत्र महत्येकाऽभिषेकसभा प्रज्ञप्ता,** साऽपि प्रमाण-स्वरूप-द्वार-मुखमण्डपप्रेक्षागृहमण्डप-चैत्यस्तूपवर्णनादिप्रकारेण **सुधर्मासभा**-वत्तावद्वक्तव्या **यावद् गोमानसी**वक्तव्यता, तदनन्तरं **तथैवोल्लोक**वर्णनं **भूमिभाग**वर्णनं च तावद् यावन्मणीनां स्पर्शः ।। ४२५-४२६ ।।

(४२७) तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपेढिया पण्णत्ता-जोयणं आयाम-विक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमया अच्छा।।४२७।।

'**तस्स ण**'मित्यादि, **तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायाम-विष्कम्भाभ्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी** '**अच्छा** सण्हा' इत्यादि विशेषणकदम्बकं प्राग्वत्।। ४२७।।

(४२८) तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे सीहासणे पण्णत्ते, सीहासण-वण्णओ अपरिवारो।।४२८ ।।

'**तीसे ण**'मित्यादि, **तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं प्रज्ञप्तं, सिंहासनवर्णकः** प्राग्वत्, नवरमत्र परिवारभूतानि भद्रासनानि न वक्तव्यानि।।४२८।।

१. अस्या वक्ष्यमाणव्याख्याया मूलपाठो न दृश्यते पुस्तकेषु ।। २. अत्र सम्बन्धस्त्रुटितो दृश्यते ।।

(४२९-४३३) तत्थ णं विजयस्स देवस्स सुबहु अभिसेक्के भंडे संणिक्खित्ते चिट्ठति। अभिसेयसभाए उप्पिं अट्ठट्ठमंगलए जाव उत्तिमागारा सोलसविधेहिं रयणेहिं। तीसे णं अभिसेयसभाए उत्तरपुरत्थिमेणं एत्थ णं एगा महं अलंकारियसभा पण्णत्ता, अभिसेयसभावत्तव्वया भाणियव्वा जाव गोमाणसीओ मणिपेढियाओ जहा अभिसेय-सभाए उप्पिं सीहासणं स(अ)परिवारं ।। तत्थ णं विजयस्स देवस्स सुबहु अलंकारिए भंडे संनिक्खित्ते चिट्ठति, उत्तिमागारा अलंकारिय० उप्पिं मंगलगा झया जाव उत्तिमागारा ।।४२९-४३३।।

'तत्थ ण'मित्यादि, **तस्मिन्** सिंहासने **विजयस्य देवस्य** योग्यं **सुबहु 'अभिषेकभाण्डम्'** अभिषेकोपस्करः **संनिक्षिप्तः तिष्ठति, तस्याश्चाभिषेकसभाया उत्तरपूर्वस्यां** दिशि **अत्र महत्येकाऽ-लङ्कारसभा प्रज्ञप्ता**, सा च प्रमाण-स्वरूप-द्वारत्रय-मुखमण्डप-प्रेक्षागृहमण्डपादिवर्णनप्रकारेणा**भिषेक-सभा**वत्तावद्वक्तव्या यावद**परिवारं सिंहासनम्**।। **'तत्थ ण'**मित्यादि, **'तत्र'** सिंहासने **विजयदेवस्य** योग्यं **सुबहु 'आलङ्कारिकम्'** अलङ्कारयोग्यं **भाण्डं संनिक्षिप्तं तिष्ठति**।।४२९-४३३।।

(४३४) तीसे णं आलंकारियसहाए उत्तरपुरत्थिमेणं एत्थ णं एगा महं ववसातसभा पण्णत्ता, अभिसेयसभावत्तव्वया जाव सीहासणं[1] अपरिवारं।। ४३४।।

'तीसे ण'मित्यादि, **तस्या अलङ्कारसभाया उत्तरपूर्वस्यां दिशि अत्र महत्येका व्यवसायसभा प्रज्ञप्ता,** सा **चाभिषेकसभावत्**प्रमाण-स्वरूप-द्वारत्रय-मुखमण्डपादिवर्णकप्रकारेण तावद्वक्तव्या **यावद[2]परिवारं सिंहासनम्**।।४३४।।

(४३५-४३८) त(ए)त्थ णं विजयस्स देवस्स एगे महं पोत्थयरयणे संनिक्खित्ते चिट्ठति, तस्स णं पोत्थयरयणस्स अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा-रिट्ठामतीओ कंबियाओ, रयतामतातिं पत्तकाइं, रिट्ठामयातिं अक्खराइं तवणिज्जमए दोरे, णाणामणिमए गंठी, अंकमयाइं पत्ताइं, वेरुलियमए लिप्पासणे, तवणिज्जमती संकला, रिट्ठमए छादने, रिट्ठामया मसी, वइरामयी लेहणी, रिट्ठामयाइं अक्खराइं, धम्मिए लेक्खे[3]

१.०णे सपरिवारे - जे ।। २. सपरिवारं - इति राजप्रश्नीयवृत्तौ ।। ३. जे। सत्थे - कखगटत्रिमु. ।।

ववसायसभाए णं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता उत्तिमागारेति।। तीसे णं ववसा(उववा)यसभाए उत्तरपुरच्छिमेणं एगे महं [१]बलिपेढे पण्णत्ते, दो जोयणाइं आयामविक्खंभेणं, जोयणं बाहल्लेणं सव्वरयतामए अच्छे जाव पडिरूवे।। एत्थ णं तस्स णं बलिपेढस्स उत्तरपुरत्थिमेणं एगा महं णंदापुक्खरिणी पण्णत्ता जं चेव माणं हरयस्स तं चेव सव्वं।। ४३५-३८।।

'एत्थ ण'मित्यादि, **'अत्र'** सिंहासने **महदेकं पुस्तकरत्नं संनिक्षिप्तं तिष्ठति, तस्य च पुस्तकरत्नस्यायमेतद्रूपः 'वर्णावासः'** वर्णकनिवेशः **प्रज्ञप्तः-'रिष्टमय्यौ'** रिष्टरत्नात्मिके **कम्बिके** [२]पुष्टके इति भावः, रजतमयो**(तपनीयमयो) दवरको** यत्र पत्राणि प्रोतानि सन्ति, **नानामणिमयो ग्रन्थि**र्दवरकस्यादौ येन पत्राणि न निर्गच्छन्ति **'अङ्कमयानि'** अङ्करत्नमयानि **पत्राणि** नानामणि-**(वैडूर्य)मयं लिप्यासनं-**मषीभाजनमित्यर्थः, **तपनीयमयी शृङ्खला** मषीभाजनसत्का **रिष्टरत्नमय-**मुपरितनं तस्य **छादनं 'रिष्टमयी'** रिष्टरत्नमयी **मषी वज्रमयी लेखिनी रिष्टमयान्यक्षराणि धार्म्मिकं लेख्यं, तस्याश्च उपपातसभाया उत्तरपूर्वस्यां** दिशि **महदेकं बलिपीठं प्रज्ञप्तं, द्वे योजने आयाम-विष्कम्भाभ्यां योजन**मेकं **बाहल्येन 'अच्छे सण्हे'** इत्यादि विशेषणजातं प्राग्वत्।। **'तस्स ण'**मित्यादि, **तस्य बलिपीठस्य उत्तरपूर्वस्यां** दिशि **अत्र महत्येका नन्दापुष्करिणी प्रज्ञप्ता,** सा च ह्रदप्रमाणा, ह्रदस्येव च तस्या अपि त्रिसोपानवर्णनं तोरणवर्णनं च प्राग्वत्।।४३५-४३८।।

तदेवं यत्र यादृग्भूता च राजधानी विजयस्य देवस्य तदेतद् उपवर्णितं, सम्प्रति विजयो देवस्तत्रोत्पन्नस्तदा यदकरोद् यथा च तस्याभिषेकोऽभवत्तदुपदर्शयति–

(४३९) तेणं कालेणं तेणं समएणं विजए देवे विजयाए रायहाणीए उववातसभाए देवसयणिज्जंसि देवदूसंतरिते अंगुलस्स असंखेज्जतिभागमेत्तीए [४]ओगाहणाए विजयदेवत्ताए [५]उववण्णे।।४३९।।

१.अत्र प्रथमं जीर्णपुस्तके नन्दापुष्करिणी विवेचनं वर्तते पश्चात् बलिपीठस्य परं च टीकायां प्रथमं बलिपीठस्य पश्चात् नन्दायाः, एतदनुसारेण मयाऽप्येवं लिखितम् ।। २. पृष्ठके - **इति राजप्रश्नीयवृत्तौ पृ.२७१** ।। ३. रत्नमयो - **इति राजप्रश्नीयवृत्तौ** ।। ४. जे.। बोंदीए-**कखगटत्रिमु.**।।

'तेणं कालेणं तेणं समएणं' इत्यादि, **तस्मिन् काले तस्मिन् समये विजयो देव उपपातसभायां देवशयनीये देवदूष्यान्तरिते** प्रथमतोऽङ्गुलासङ्ख्येयभागमात्रयाऽवगाहनया समुत्पन्नः।।३३९।।

(४४०) तए णं से विजये देवे अहुणोववण्णमेत्तए चेव समाणे पंचविहाए पज्जत्तीए पज्जत्तीभावं गच्छति, तंजहा-आहारपज्जत्तीए सरीरपज्जत्तीए इंदियपज्जत्तीए आणापाणु-पज्जत्तीए भासामणपज्जत्तीए।।४४०।।

'तए ण'मित्यादि, सुगमं, नवरमिह भाषा-मनःपर्याप्त्योः समाप्तिकालान्तरस्य प्रायः शेषपर्याप्ति-कालान्तरापेक्षया स्तोकत्वादेकत्वेन विवक्षणमिति **'पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ'** इत्युक्तम्।।४४०।।

(४४१) तए णं तस्स विजयस्स देवस्स पंचविहाए पज्जत्तीए पज्जत्तीभावं गयस्स समाणस्स इमे एयारूवे अज्झत्थिए चिंतिए पत्थिते मणोगए संकप्पे समुप्पज्जित्था-किं मे पुव्वं करणिज्जं किं मे पच्छा करणिज्जं किं मे पुव्विं सेयं किं मे पच्छा सेयं किं मे पुव्विं वा पच्छा वा हिताए सुहाए खेमाए णीस्सेसाते अणुगामियत्ताए भविस्सतीतिकट्टु एवं संपेहेति।।४४१।।

'तए ण'मित्यादि, तत**स्तस्य विजयस्य देवस्य पञ्चविधया पर्याप्त्या पर्याप्तभावं गतस्य सतोऽयम्-एतद्रूपः सङ्कल्पः समुदपद्यत,** कथम्भूतः? इत्याह-**'मनोगतः'** मनसि गतो-व्यवस्थितो, नाद्यापि वचसा प्रकाशितस्वरूप इति भावः, पुनः कथम्भूतः? इत्याह-**'आध्यात्मिकः'** आत्मन्यधि अध्यात्मं तत्र भव आध्यात्मिक आत्मविषय इति भावः, सङ्कल्पश्च द्विधा भवति-कश्चिदाध्यात्मिको-ऽपरश्च चिन्तात्मकः, तत्रायं चिन्तात्मक इति प्रतिपादनार्थमाह-**'चिन्तितः'** चिन्ता सञ्जाताऽस्मिन्निति चिन्तितश्चिन्तात्मक इति भावः, सोऽपि कश्चिदभिलाषात्मको भवति कश्चिदन्यथा, तत्रायमभिलाषात्मक-स्तथा चाह-प्रार्थनं प्रार्थो णिजन्तादच् प्रार्थः सञ्जातोऽस्मिन्निति **प्रार्थितो**ऽभिलाषात्मक इति भावः, किंस्वरूपः? इत्याह-**'किं मे'** इत्यादि, **किं 'मे' मम पूर्वं करणीयं किं मे पश्चात्करणीयं,** तथा **किं मे पूर्वं** कर्त्तुं **श्रेयः किं मे पश्चात्कर्त्तुं श्रेयः,** तथा **किं मे पूर्वमपि च पश्चादपि च हिताय** भावप्रधानोऽयं निर्देशो हितत्वाय-परिणामसुन्दरतायै **सुखाय**-शर्म्मणे **क्षेमाय**ेति अयमपि भावप्रधानो

निर्देशः सङ्गतत्वाय, **निःश्रेयसाय**-निश्चितकल्याणाय **अनुगामिकतायै**-परम्परया शुभानुबन्धसुखाय **भविष्यतीति**।।४४१।।

(४४२) तते णं तस्स विजयस्स देवस्स सामाणियपरिसोववण्णगा देवा विजयस्स देवस्स इमं एतारूवं अज्झत्थितं चिंतियं पत्थियं मणोगयं संकप्पं समुप्पण्णं समभिजाणित्ता जेणेव से विजए देवे तेणामेव उवागच्छंति, तेणेव उवागच्छित्ता विजयं देवं करतलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, जएणं विजएणं वद्धावेत्ता एवं वयासी-एवं खलु देवाणुप्पियाणं विजयाए रायहाणीए सिद्धायतणंसि अट्ठसतं जिणपडिमाणं जिणुस्सेहपमाणमेत्तीणं संनिक्खित्तं चिट्ठति, सभाए य सुधम्माए माणवए चेतियखंभे वइरामएसु गोलवट्टसमुग्गतेसु बहूओ जिणसकहाओ सन्निक्खित्ताओ चिट्ठंति, जाओ णं देवाणुप्पियाणं अन्नेसिं च बहूणं विजयरायहाणिवत्थव्वाणं देवाणं देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्कारणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेतियं पज्जुवासणिज्जाओ एतण्णं देवाणुप्पियाणं पुव्विंपि सेयं एतण्णं देवाणुप्पियाणं पच्छावि सेयं एतण्णं देवा० पुव्विं करणिज्जं पच्छा करणिज्जं एतण्णं देवा० पुव्विं वा पच्छा वा जाव आणुगामियत्ताते भविस्सतीतिकट्टु महता महता जय[जय]सद्दं पउंजंति।।४४२।।

'तए ण'मित्यादि, **'ततः'** एतच्चिन्तासमनन्तरमेव दिव्यानुभावतो **विजयस्य देवस्य 'सामाणिय-परिसोववन्नगा देवा'** इति सामानिकाः पर्षदुपपन्नकाश्च-अभ्यन्तरादिपर्षदुपगताः **'इमम्'** अनन्तरोक्तम् **'एतद्रूपम्'** अनन्तरोदितस्वरूप**माध्यात्मिकं चिन्तितं प्रार्थितं मनोगतं सङ्कल्पं समभिज्ञाय 'जेणेवे'**ति यत्रैव **विजयो देवस्तत्रैवोपागच्छन्ति, उपागम्य च 'करयलपरिग्गहिय'**मित्यादि द्वयोर्हस्तयोरन्योऽन्या-न्तरिताङ्गुलिकयोः संपुटरूपतया यदेकत्र मीलनं सा अञ्जलिस्तां करतलाभ्यां परिगृहीता-निष्पादिता करतलपरिगृहीता ताम्, आवर्त्तनमावर्त्तः शिरस्यावर्त्तो यस्याः सा **शिरस्यावर्त्ता,** कण्ठेकाल उरसिलोमेत्यादि-वदलुक्समासः, **तामत** एव **मस्तके कृत्वा जयेन विजयेन वर्द्धापयन्ति**-जय त्वं देव! विजय त्वं देव! इत्येवं वर्द्धापयन्तीत्यर्थः, तत्र जयः-परैरनभिभूयमानता प्रतापवृद्धिश्च, विजयस्तु परेषामसहमानानामभि-

भवोत्पादः,**जयेन विजयेन** च **वर्द्धापयित्वा एवमवादिषुः-'एवं खलु देवाणुप्पियाण**'मित्यादि पाठसिद्धम्।।४४२।।

(४४३) तए णं से विजए देवे तेसिं सामाणियपरिसोववण्णगाणं देवाणं अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठ तुट्ठ जाव हियते देवसयणिज्जाओ अब्भुट्ठेइ, २ त्ता दिव्वं देवदूसं[1] परिहेइ, २ त्ता देवसयणिज्जाओ पच्चोरुहइ, २ हित्ता उपपातसभाओ पुरत्थिमेणं दारेण णिग्गच्छइ, २ त्ता जेणेव हरते तेणेव उवागच्छति, उवागच्छित्ता हरयं अणुपदाहिणीकरेमाणे करेमाणे पुरत्थिमिल्लेणं तोरणेणं अणुप्पविसति, २ त्ता पुरत्थिमिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहति, २ हरयं ओगाहति, २ त्ता जलावगाहणं करेति, २ त्ता जलमज्जणं करेति, २ त्ता जलकिडुं करेति, २ त्ता आयंते चोक्खे परमसूतिभूते हरतातो पच्चुत्तरति, २ त्ता जेणेव अभिसेयसभा तेणेव उवागच्छति, २ त्ता अभिसेयसभं अणुप्पदाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसति, २ त्ता जेणेव सए सीहासणे तेणेव उवागच्छति, २ त्ता सीहासणवरगते पुरत्थाभिमुहे सण्णिसण्णे।।४४३।।

'तए ण'मित्यादि, **'ततः'** एतद्वचनानन्तरं **विजयो देवस्तेषां सामानिकपर्षदुपपन्नकानां**-सामानिकानां पर्षदुपपन्नकानां च **देवानामन्तिके एनमर्थं 'श्रुत्वा'** आकर्ण्य **'निशम्य'** हृदये परिणमय्य '**हट्ठतुट्ठ**चित्तमाणंदिए' इति हृष्टतुष्टोऽतीव तुष्ट इति भावः, अथवा हृष्टो नाम विस्मयमापन्नो यथा शोभनमहो! एतैरुपदिष्टमिति, 'तुष्टः' तोषं कृतवान् यथा भव्यमभूद् यदेतैरित्थमुपदिष्टमिति, तोषवशादेव चित्तमानन्दितं-स्फीतीभूतं "**टुणदु समृद्धौ**"[**सि.है.धा. ३१२**] इति वचनात्, यस्य स चित्तानन्दितः, भार्यादिदर्शनात्पाक्षिको निष्ठान्तस्य परनिपातः मकारः प्राकृतत्वादलाक्षणिकस्ततः पदत्रयस्य पदद्वय२ मीलनेन कर्म्मधारयः, 'पीइमणे' इति प्रीतिर्मनसि यस्यासौ प्रीतिमना जिनप्रतिमाऽर्चनविषयबहुमानपरायणमना इति भावः, ततः क्रमेण बहुमानोत्कर्षवशात् 'परमसोमणस्सिए' इति शोभनं मनो यस्यासौ सुमनास्तस्य भावः सौमनस्यं परमं च तत् सौमनस्यं च परमसौमनस्यं तत्सञ्जातमस्मिन्निति परमसौमनस्यितः, एतदेव व्यक्तीकुर्वन्नाह-'हरिसवसविसप्पमाणहियए' हर्षवशेन विसर्प्पद्-विस्तारयायि हृदयं यस्य स हर्षवशविसर्प्पद्धृदयः **देवशयनीयादभ्युत्तिष्ठति, अभ्युत्थाय च देवदूष्यं परिधत्ते, परिधाय च**

---

१. जे. । देवदूसजूयलं - कखगटत्रिमु ।।

उपपातसभातः पूर्वद्वारेण निर्गच्छति, निर्गत्य च यत्रैव प्रदेशे ह्रदस्तत्रोपागच्छति, उपागत्य ह्रदमनुप्रदक्षिणीकृत्य पूर्वेण तोरणेन ह्रद**मनुप्रविशति, [अनु] प्रविश्य** च ह्रदे **प्रत्यवरोहति,** मध्ये प्रविशतीति भावः, **प्रत्यवरुह्य** च **ह्रदमवगाहते, अवगाह्य जलमज्जनं करोति, कृत्वा** च क्षणमात्रं **जलक्रीडां करोति,** ततः **'आयंते'** इति नवानामपि श्रोतसां शुद्धोदकप्रक्षालनेनाऽऽचान्तो-गृहीताच-मनश्**चोक्षः**-स्वल्पस्यापि शङ्कितमलस्यापनयनात्, अत एव **परमशुचिभूतो ह्रदात् प्रत्युत्तरति,** प्रत्युत्तीर्य **यत्रैव** प्रदेशेऽ**भिषेकसभा तत्रैवोपागच्छति, उपागत्याभिषेकसभामनुप्रदक्षिणीकुर्वन् पूर्वद्वारेणानुप्रविशति, अनुप्रविश्य यत्रैव** मणिपीठिका यत्रैव च मणिपीठिकाया उपरि **सिंहासनं तत्रोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः**।। ४४३।।

(४४४) तते[1] णं तस्स विजयस्स देवस्स सामाणियपरिसोववण्णगा देवा आभिओगिते देवे सद्दावेंति, २ त्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया! विजयस्स देवस्स महत्थं महग्घं महरिहं विपुलं इंदाभिसेयं उवट्ठवेह।।४४४।।

'तए ण'मित्यादि, **ततस्तस्य विजयस्य देवस्य सामानिकाः पर्षदुपपन्नकाश्च देवाः 'आभियोगिकान्'** अभियोजनमभियोगः, प्रेष्यकर्म्मणि व्यापार्यमाणत्वमिति भावः, अभियोगे नियुक्ता आभियोगिकास्तान् **देवान् 'शब्दायन्ते'** आकारयन्ति, **शब्दायित्वा** च **तानेवमवादिषुः-'क्षिप्रमेव'** शीघ्रमेव **भो देवानां प्रियाः! विजयस्य देवस्य 'महार्थं'** महान् अर्थो-मणिकनकरत्नादिक उपयुज्यमानो यस्मिन् स महार्थस्तं महार्थं, तथा महान् अर्घः-पूजा यत्र स **महार्घस्तं**, महम्-उत्सवमर्हतीति **महार्हस्तं, 'विपुलं'** विस्तीर्णं शक्राभिषेकवद् **इन्द्राभिषेकमुपस्थापयत**।।४४४।।

(४४५-A) तते[2] णं ते आभिओगिता देवा सामाणियपरिसोववण्णेएहिं देवेहिं एवं वुत्ता समाणा हट्ठतुट्ठ जाव हितया करतलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं देवा तहत्ति आणाए विणएणं वयणं पडिसुणंति, २ त्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमंति, २ त्ता वेउव्वियसमुग्घाएणं समोहणंति, २ त्ता संखेज्जाइं जोयणाइं दंडं णिसिरंति, तं०-रयणाणं जाव रिट्ठाणं, अहाबायरे पोग्गले परिसाडंति, २ त्ता अहासुहुमे पोग्गले परियायंति, २ त्ता दोच्चंपि वेउव्वियसमुग्घाएणं समोहणंति २ त्ता ।।४४५-A।।

१. तुला - राजप्रश्नीयसूत्र २७८ ।। २. तुला - राजप्रश्नीयसूत्र २७९ ।।

'तए णं ते' इत्यादि, **ततस्ते आभियोगिका देवाः सामानिकपर्षदुपपन्नकैर्देवैरेवमुक्ताः 'हट्ठतुट्ठ**चित्तमाणंदिया पीइमणा परमसोमणस्सिया हरिसवसविसप्पमाण**हियया करयलपरिग्गहियं** दसणहं **सिरसावत्तं मत्थए अंजलिं कट्टु**' इति पूर्ववत्, **विनयेन वचनं 'प्रतिशृण्वन्ति'** अभ्युपगच्छन्ति, कथम्भूतेन विनयेन? इत्याह–**'एवं देवा तहत्ति आणाए'** इति हे देवाः! एवं–यथैव यूयमादिशत तथैवाज्ञया–युष्मदादेशेन कुर्म्म इत्येवंरूपेण **प्रतिश्रुत्य वचनमुत्तरपूर्वं दिग्भाग**मीशानकोणमित्यर्थः तस्यात्यन्तप्रशस्तत्वात् **'अपक्रामन्ति'** गच्छन्ति, **अपक्रम्य** च **वैक्रियसमुद्घातेन**–वैक्रियकरणाय प्रयत्नविशेषेण **'समोहणंति'** समवहन्यन्ते समवहता भवन्तीत्यर्थः, समवहताश्चात्मप्रदेशान् दूरतो विक्षिपन्ति, तथा चाह–**'संखेज्जाणि जोयणाणि दंडं निसरंति'** दण्ड इव दण्ड ऊर्ध्वाधआयतः शरीरबाहल्यो जीवप्रदेशसमूहस्तं शरीरस्य बहिः सङ्ख्येयानि योजनानि यावत् 'निसृजन्ति' निष्काशयन्ति, निसृज्य च तथाविधान् पुद्गलानाददते, एतदेव दर्शयति–**तद्यथा-'रत्नानां'** कर्केतनादीनां १ वज्राणां २ वैडूर्याणां ३ लोहिताक्षाणां ४ मसारगल्लानां ५ हंसगर्भाणां ६ पुलकानां ७ सौगन्धिकानां ८ ज्योतीरसानाम् ९ अञ्जनानाम् १० अञ्जनपुलकानां ११ रजतानां १२ जातरूपाणाम् १३ अङ्कानां १४ स्फटिकानां १५ **रिष्ठानां** १६, **यथाबादरान्**–असारान् **पुद्गलान् परिशातयन्ति, यथासूक्ष्मान्**–सारान् **पुद्गलान् पर्याददते, पर्यादाय** च चिकीर्षितरूपनिर्माणार्थं **द्वितीयमपि** वारं **वैक्रियसमुद्घातेन समवहन्यन्ते समवहत्य** यथोक्तानां रत्नादीनां योग्यान् यथाबादरान् पुद्गलान् परिशातयन्ति यथासूक्ष्मानाददते, आदाय च ।।४४५।।

(४४५-B) अट्ठसहस्सं सोवण्णियाणं कलसाणं अट्ठसहस्सं रुप्पामयाणं कलसाणं अट्ठसहस्सं मणिमयाणं अट्ठसहस्सं सुवण्णरुप्पामयाणं अट्ठसहस्सं सुवण्णमणिमयाणं अट्ठसहस्सं रुप्पामणिमयाणं अट्ठसहस्सं सुवण्णरुप्पामणिमताणं अट्ठसहस्सं भोमेज्जाणं कलसाणं अट्ठसहस्सं भिंगारगाणं एवं आयंसगाणं थालाणं पातीणं सुपतिट्ठाणं वातकरगाणं चित्ताणं रयणकरंडगाणं पुप्फचंगेरीणं जाव लोमहत्थचंगेरी[1]णं पुप्फपडलगाणं जाव लोमहत्थगपडलगाणं अट्ठसतं सीहासणाणं छत्ताणं चामराणं →अं[2]वपडगाणं बट्टकाणं तवसिप्पाणं खोरकाणं पीणकाणं तेल्ल←समुग्गकाणं जाव अंजणसमुग्गाणं झयाणं

१. →←चिह्नद्वयमध्यवर्तिपाठः जे. नास्ति, कखगटत्रिमु. अस्ति ।।

अट्ठसहस्सं धूवकडुच्छुयाणं विउव्वंति, २ त्ता →[१]ते साभाविए विउव्विए य कलसे य जाव धूवकडुच्छुए य गेण्हंति, गेण्हित्ता विजयातो रायहाणीतो पडिनिक्खमंति, २ त्ता ताए उक्किट्ठाए जाव उद्धुताए ←दिव्वाए देवगतीए तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झं मज्झेणं वीईवयमाणा २ जेणेव खीरोदे समुद्दे तेणेव उवागच्छंति, तेणेव उवागच्छित्ता खीरोदगं गिण्हित्ता जातिं तत्थ उप्पलाइं जाव सतसहस्सपत्तातिं तातिं गिण्हंति, २ त्ता जेणेव पुक्खरोदे समुद्दे तेणेव उवागच्छंति, २ त्ता पुक्खरोदगं गेण्हंति, पुक्खरोदगं गिण्हित्ता जातिं तत्थ उप्पलाइं जाव सतसहस्सपत्ताइं ताइं गिण्हंति २ त्ता ।।४४५-B।।

'अष्टसहस्रम्' अष्टाधिकं सहस्रं **सौवर्णिकानां कलशानां** विकुर्वन्ति १ **अष्टसहस्रं रूप्यमयानाम्** २ **अष्टसहस्रं मणिमयानाम्** ३ **अष्टसहस्रं सुवर्णरूप्यमयानाम्** ४ **अष्टसहस्रं सुवर्णमणिमयानाम्** ५ **अष्टसहस्रं रूप्यमणिमयानाम्** ६ **अष्टसहस्रं सुवर्णरूप्यमणिमयानाम्** ७ **अष्टसहस्रं भौमेयानाम्** ८ **अष्टसहस्रं भृङ्गाराणाम्** ९, **एवमादर्श-स्थाल-पात्री-सुप्रतिष्ठ-**मनोगुलिका-**वातकरक-चित्र-रत्नकरण्डक-पुष्पचङ्गेरी यावल्लोमहस्तचङ्गेरी-पुष्पपटलक यावल्लोमहस्तकपटलक-सिंहासन-च्छत्र-चामर-समुद्गक-ध्वज-धूपकडुच्छुकानां** प्रत्येकं प्रत्येकमष्टसहस्रं **विकुर्वन्ति, विकुर्वित्वा 'ताए उक्किट्ठाए'** इत्यादि पूर्वं व्याख्यातार्थं, **यत्रैव क्षीरोदसमुद्रस्तत्रागच्छन्ति, आगत्य** च **क्षीरोदकं गृह्णन्ति, यानि** च तत्र **उत्पलानि** पद्मानि कुमुदानि नलिनानि सुभगानि सौगन्धिकानि पुण्डरीकाणि महापुण्डरीकाणि शतपत्राणि सहस्रपत्राणि **शतसहस्रपत्राणि** च **तानि गृह्णन्ति, गृहीत्वा** पुष्करोदे समुद्रे समागत्य तत्रोदकमुत्पलादीनि च गृह्णन्ति, तदनन्तरम् ।।४४५-B।।

(४४५-C) जेणेव समयखेत्ते जेणेव भरहेरवयातिं वासाइं जेणेव मागधवरदाम-पभासाइं तित्थाइं तेणेव उवागच्छंति, तेणेव उवागच्छित्ता तित्थोदगं गिण्हंति, २ त्ता तित्थमट्टियं गेण्हंति, २ त्ता जेणेव गंगासिंधुरत्तारत्तवईओ महाणदीओ तेणेव उवागच्छंति, २ त्ता [२]सरितोदगं गेण्हंति, २ त्ता उभयतडमट्टियं गेण्हंति, गेण्हित्ता जेणेव चुल्लहिमवंत-सिहरिवासधरपव्वता तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वतूवरे य सव्वपुप्फे य

१. →←चिह्नद्वयमध्यवर्तिपाठः जे. नास्ति । २. सलिलोदगं-जे. राजप्र. सू. २७९ ।।

सव्वगंधे य सव्वमल्ले य सव्वोसहिसिद्धत्थए य गिण्हंति, सव्वोसहिसिद्धत्थए गिण्हित्ता जेणेव पउमद्दहपुंडरीयद्दहा तेणेव उवागच्छंति, तेणेव २ त्ता दहोदगं गेण्हंति जातिं तत्थ उप्पलाइं जाव सतसहस्सपत्ताइं ताइं गेण्हंति, ताइं गिण्हित्ता ।।४४५-C)

यत्रैव समयक्षेत्रं यत्रैव भरतैरावतानि क्षेत्राणि **यत्रैव** च तेषु भरतैरावतेषु वर्षेषु **मागध-वरदाम-प्रभासाख्यानि तीर्थानि तत्रैवोपागत्य तीर्थोदकं तीर्थमृत्तिकां** च **गृह्णन्ति,** ततो **गङ्गा-सिन्धु-रक्ता-रक्तवतीषु महानदीषु नद्युदकमुभयतटमृत्तिकां** च **गृह्णन्ति,** ततः **क्षुल्लहिमवच्छिखरिषु समागत्य सर्वतुवरान्**–कषायान् **सर्वाणि** जातिभेदेन **पुष्पाणि सर्वान् 'गन्धान्'** गन्धवासादीन् **सर्वाणि माल्यानि**–प्रथितादिभेदभिन्नानि **सर्वौषधीः सिद्धार्थकांश्च गृह्णन्ति, गृहीत्वा** तदनन्तरं **पद्मह्रद-पुंण्डरीकह्रदेषूपागत्य तदुदकमुत्पलादीनि** च **गृह्णन्ति,** ।।४४५-C।।

(४४५-D) जेणेव हेमवतेरण्णवयाइं वासाइं जेणेव रोहियरोहितंससुवण्णकूलरुप्पकूलाओ तेणेव उवागच्छंति, २ त्ता सलिलोदगं गेण्हंति, २ त्ता उभओ तडमट्टियं गिण्हंति, गेण्हित्ता जेणेव सद्दावई-वियडावई वट्टवेतड्ढपव्वता तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए य गेण्हंति, सिद्धत्थए य गेण्हित्ता जेणेव महाहिमवंतरुप्पिवासधरपव्वता तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वपुप्फे तं चेव जेणेव महापउमद्दहमहापुंडरीयद्दहा तेणेव उवागच्छंति, तेणेव उवागच्छित्ता जाइं तत्थ उप्पलाइं तं चेव जेणेव हरिवासे रम्मावासेति जेणेव हरकान्तहरिकंतणरकंत-नारिकंताओ सलिलाओ तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सलिलोदगं गेण्हंति, सलिलोदगं गेण्हित्ता जेणेव वियडावइगंधावतिवट्टवेयड्ढपव्वया तेणेव उवागच्छंति सव्वपुप्फे य तं चेव जेणेव णिसहनीलवंतवासहरपव्वता तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वतूवरे य तहेव जेणेव तिगिच्छिदहकेसरिदहा तेणेव उवागच्छंति, २ त्ता जाइं तत्थ उप्पलाइं तं चेव ।।४४५-D।।

---

१. पौण्ड० राजप्रश्नीयवृत्तौ ।।

(४४५-D) ततो **हैमवतैरण्यवतेषु वर्षेषु रोहिता-रोहितांशा-सुवर्णकूला-रूप्यकूलासु** महानदीषु **नद्युदकमुभयतटमृत्तिकां** तदनन्तरं **शब्दापाति-विकटापाति-वृत्तवैताढ्येषु सर्वतुवरादीन्,** ततो **महाहिमवद्रूप्पिवर्षधरपर्वतेषु** सर्वतुवरादीन्, ततो **महापद्म-महापौण्डरीकह्रदेषु** ह्रदोदकमुत्पलादीनि च, तदनन्तरं **हरिवर्ष-रम्यकवर्षेषु हरकान्ता-हरिकान्ता-नरकान्ता-नारीकान्तासु** महानदीषु **सलिलोदकम्** उभयतटमृत्तिकां च, ततो **गन्धापाति**माल्यवत्पर्यायवृ**त्तवैताढ्येषु** सर्वतुवरादीन् ततो **निषध-नीलवर्षधरपर्वतेषु सर्वतुवरादीन्,** तदनन्तरं तद्गतेषु **तिगिच्छि-केसरिमहाह्रदेषु** ह्रदोदक**मुत्पलादीनि** च, ।।४४५-D।।

(४४५-E) जेणेव पुव्वविदेहावरविदेहवासाइं जेणेव सीयासीओयाओ महाणईओ जहा णदीसु जेणेव सव्वचक्कवट्टिविजया जेणेव सव्वमागहवरदामपभासाइं तित्थाइं तहेव जहेव जेणेव सव्ववक्खारपव्वता सव्वतुवरे य जेणेव सव्वंतरणदीओ सलिलोदगं गेण्हंति, २ तं चेव जेणेव मंदरे पव्वते जेणेव भद्दसालवणे तेणेव उवागच्छंति, सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए गिण्हंति, २ त्ता जेणेव णंदणवणे तेणेव उवागच्छइ, २ त्ता सव्वतुवरे जाव सव्वोसहिसिद्धत्थे य सरसं च गोसीसचंदणं गिण्हंति, २ त्ता जेणेव सोमणसवणे तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए य सरसगोसीसचंदणं दिव्वं च सुमणदामं गेण्हंति, गेण्हित्ता जेणेव पंडगवणे तेणामेव समुवागच्छंति, तेणेव २ त्ता सव्वतूवरे जाव सव्वोसहिसिद्धत्थए सरसं च गोसीसचंदणं दिव्वं च सुमणोदामं दद्दरयमलयसुगंधिए य गंधे गेण्हंति, २ त्ता एगतो मिलंति, २ त्ता जंबूद्दीवस्स पुरत्थिमिल्लेणं दारेणं णिग्गच्छंति, पुरत्थिमिल्लेणं निग्गच्छित्ता ताए उक्किट्ठाए जाव दिव्वाए देवगतीए तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झंमज्झेणं वीयीवयमाणा २ जेणेव विजया रायहाणी तेणेव उवागच्छंति, २ त्ता विजयं रायहाणिं अणुप्पयाहिणं करेमाणा २ जेणेव अभिसेयसभा जेणेव विजए देवे तेणेव उवागच्छंति, २ त्ता करतलपरिग्गहितं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति, २ त्ता विजयस्स देवस्स तं महत्थं महग्घं महरिहं विपुलं अभिसेयं उवट्ठवेंति।।४४५-E।।

ततः **पूर्वविदेहापरविदेहेषु [१]शीता-शीतोदामहानदीषु** नद्युदकम् उभयतटमृत्तिकां च, तदनन्तरं **सर्वेषु चक्रवर्त्तिविजेतव्येषु मागध-वरदाम-प्रभासाख्यतीर्थेषु** तीर्थोदकानि तीर्थमृत्तिकाश्च, ततः **सर्वेषु वक्षस्कारपर्वतेषु सर्वतुवरादीन्,** तदनन्तरं **सर्वास्वन्तरनदीषु नद्युदकमुभ**यतटमृत्तिकाश्च, ततो **मन्दरपर्वते भद्रशालवने सर्वतुवरादीन्,** ततो **नन्दनवने सर्वतुवरादीन्** सरसं च गोशीर्षचन्दनं, ततः **सौमनसवने** सर्वतुवरादीन् सरसं च गोशीर्षचन्दनं **दिव्यं च सुमनोदाम** गृह्णन्ति, ततः **पण्डकवने** सर्वतुवर-पुष्प-गन्ध-माल्य-सरसगोशीर्षचन्दन-दिव्यसुमनोदामानि **'दद्दरमलए सुगंधिए य [गंधे] गिण्हंति'** इति दर्दरः–चीवरावनद्धकुण्डिकादिभाजनमुखं तेन गालितं तत्र पक्वं वा यन्मलयोद्भवतया प्रसिद्धत्वान्मलयं–श्रीखण्डं येषु तान् 'सुगन्धान्' परमगन्धोपेतान् गन्धान् गृह्णन्ति, **गृहीत्वा एकत्र मिलन्ति, मिलित्वा तया उत्कृष्टया दिव्यया देवगत्या यत्रैव विजया राजधानी** यत्रैव विजयो देवस्**तत्रैवोपागच्छन्ति, उपागत्य** च करतलपरिगृहीतां शिरस्यावर्त्तिकां मस्तकेऽञ्जलिं कृत्वा **विजयं देवं जयेन विजयेन वर्द्धापयन्ति,** वर्द्धापयित्वा **महार्थं महार्घं महार्हं विपुलमिन्द्राभिषेकयोग्यं** क्षीरोदकादि **'उपनयन्ति'** समर्प्पयन्ति।।४४५-E।।

(४४६) [२]तते णं तं विजयदेवं चत्तारि य सामाणियसाहस्सीओ चत्तारि अग्गमहिसीओ सपरिवाराओ तिण्णि परिसाओ सत्त अणिया सत्त अणियाहिवई सोलस आयरक्खदेव-साहस्सीओ अन्ने य बहवे विजयरायधाणिवत्थव्वगा वाणमंतरा देवा य देवीओ य तेहिं साभावितेहि उत्तरवेउव्वितेहिं य वरकमलपतिट्ठाणेहिं सुरभिवरवारिपडिपुण्णेहिं चंदणकयचच्चातेहिं आविद्धकंठेगुणेहिं पउमुप्पलपिधाणेहिं करतलसुकुमालकोमल-परिग्गहिएहिं अट्ठसहस्साणं सोवण्णियाणं कलसाणं रूप्पमयाणं जाव अट्ठसहस्साणं भोमेयाणं कलसाणं सव्वोदएहिं सव्वमट्टियाहिं सव्वतुवरेहिं सव्वपुप्फेहिं जाव सव्वोसहिसिद्धत्थएहिं य सव्विड्ढीए सव्वजुत्तीए सव्वबलेणं सव्वसमुदएणं सव्वायरेणं सव्वविभूतिए सव्वविभूसाए सव्वसंभमेणं सव्वोरोहेणं सव्वणाडएहिं सव्वपुप्फवत्थगंध-मल्लालंकारेणं सव्वदिव्वतुडियसण्णिणाएणं महया इड्ढीए महया जुत्तीए महया बलेणं

१. सीतासीतो० **राजप्रश्नीयवृत्तौ** । २. तुला-राजप्रश्नीयसूत्र-२८० ।

महता समुदएणं महता वरतुरियजमगसमगपडुप्पवादितरवेणं संख-पणव-पडह-भेरि-झल्ल-रिखरमुहि-मुरव-मुयंग-दुंदुहि-हुडुक्कणिग्घोससंनिनादितरवेणं महता महता इंदाभिसेगेणं अभिसिंचंति।।४४६ ।।

'तए ण'मित्यादि, **ततो ण**मिति वाक्यालङ्कारे **तं विजयं देवं चत्वारि** देव**सामानिकसहस्त्राणि चतस्त्रोऽग्रमहिष्यः सपरिवारास्तिस्त्रः पर्षदो** यथाक्रममष्ट-दश-द्वादशदेवसहस्त्रपरिमाणाः **सप्तानीकानि सप्तानीकाधिपतयः षोडश आत्मरक्षदेवसहस्त्राणि, अन्ये च बहवो विजयराजधानीवास्तव्या वानमन्तरा देवा देव्यश्च तैः**-तद्गतदेवजनप्रसिद्धैः **स्वाभाविकैर्वैकुर्विकैश्च वरकमलप्रतिस्थानैः सुरभिवरवारिप्रतिपूर्णैश्चन्दनकृतचर्चाकैः 'आविद्धकण्ठेगुणैः'** आरोपितकण्ठे रक्तसूत्रतन्तुभिः **पद्मोत्पलपिधानैः सुकुमारकरतलपरिगृहीतैर**नेकसहस्त्रसङ्ख्यैः कलशैरिति गम्यते, तानेव विभागतो दर्शयति–**अष्टसहस्त्रेण सौवर्णिकानां कलशानाम्, अष्टसहस्त्रेण रूप्यमयानाम्,** अष्टसहस्त्रेण मणिमयानाम्, अष्टसहस्त्रेण सुवर्ण-रूप्यमयानाम्, अष्टसहस्त्रेण सुवर्ण-मणिमयानाम्, अष्टसहस्त्रेण रूप्य-मणिमयानाम्, अष्टसहस्त्रेण सुवर्ण-रूप्यमणिमयानाम्, **अष्टसहस्त्रेण भौमेयानां,** सर्वसङ्ख्ययाऽष्टभिः सहस्त्रैश्चतुःषष्ट्यधिकैः, तथा **'सर्वोदकैः'** सर्वतीर्थनद्याद्युदकैः **सर्वतुवरैः सर्वपुष्पैः** सर्वगन्धैः सर्वमाल्यैः **सर्वौषधिसिद्धार्थकैश्च 'सर्वर्द्ध्या'** परिवारादिकया **'सर्वद्युत्या'** यथाशक्ति विस्फारितेन शरीरतेजसा **'सर्वबलेन'** सामस्त्येन स्वस्वहस्त्यादिसैन्येन **'सर्वसमुदयेन'** स्वस्वाभियोग्यादिसमस्तपरिवारेण **'सर्वादरेण'** समस्तयावच्छक्तितोलनेन **'सर्वविभूत्या'** स्वस्वाभ्यन्तरवैक्रियकरणादिबाह्यरत्नादिसम्पदा, तथा **'सर्वविभूषया'** यावच्छक्तिस्फारोदारशृङ्गारकरणेन **'सव्वसंभमेणं'**ति सर्वोत्कृष्टेन सम्भ्रमेण, सर्वोत्कृष्टसम्भ्रमो नाम इह स्वनायकविषयबहुमानख्यापनार्थपरा स्वनायककार्यसम्पादनाय यावच्छक्ति त्वरितत्वरिता प्रवृत्तिः, **सर्वपुष्प-वस्त्र-गन्ध-माल्यालङ्कारेण,** अत्र गन्धा–वासा माल्यानि–पुष्पदामानः अलङ्कारा–आभरणानि, ततः समाहारो द्वन्द्वः, ततः सर्वदिव्यत्रुटितानि तेषां शब्दाः सर्वदिव्यत्रुटितशब्दास्तैः सह सर्वशब्देन विशेषणसमासः, **'सव्वदिव्वतुडियसद्दनिनाएण'**मिति सर्वाणि च तानि दिव्यत्रुटितानि च–दिव्यतूर्याणि च, एषामेकत्र मीलनेन यः सङ्गतो नितरां नादो–महान् घोषः सर्वदिव्यत्रुटितशब्दसंनिनादस्तेन, इह तुल्येष्वपि सर्वशब्दो दृष्टो यथाऽनेन सर्वं पीतं घृतमिति, तत आह–**'महया इड्ढीए'** इत्यादि, महत्या यावच्छक्तितुलितया 'ऋद्ध्या' परिवारादिकया **'महया जुईए'**

इत्याद्यपि भावनीयं, तथा **महता**-स्फूर्त्तिमता **वराणां**-प्रधानानां **त्रुटितानाम्**-आतोद्यानां **यमकसमकम्**-एककालं **पटुभिः** पुरुषैः **प्रवादितानां** यो **रवस्तेन**, एतदेव विशेषेणाचष्टे-**'संख-पणव-पडह-भेरि-झल्लरि-खरमुहि-हुडुक्क-मुरव-मुइंग-दुंदुहि [हुडुक्क]निग्घोससंनिनादितरवेणं'** शङ्खः प्रतीतः पणवो-भाण्डानां पटहः प्रतीतः भेरी-ढक्का झल्लरी-चर्मावनद्धा विस्तीर्णा वलयरूपा खरमुही-काहला हुडुक्का-महाप्रमाणो मर्दलो मुरजः-स एव लघुर्मृदङ्गो दुन्दुभिः-भेर्याकारा सङ्कटमुखी, तासां द्वन्द्वः, तासां निर्घोषो-महान् ध्वानो नादितं च घण्टायामिव वादनोत्तरकालभावी सततध्वनिस्तल्लक्षणो यो रवस्तेन **महता महता इन्द्राभिषेकेणाभिषिञ्चति**।। ४४६।।

(४४७-A) तए णं तस्स विजयस्स देवस्स महता महता इंदाभिसेगंसि वट्टमाणंसि अप्पेगतिया देवा णच्चोदगं णातिमट्टियं पविरलफुसियं दिव्वं सुरभिं रयरेणुविणासणं गंधोदगवासं वासंति, अप्पेगतिया देवा णिहतरयं णट्ठरयं भट्ठरयं पसंतरयं उवसंतरयं करेंति, अप्पेगतिया देवा विजयं रायहाणिं सब्भिंतरबाहिरियं आसितसम्मज्जितोवलित्तं सित्तसुइसम्मट्ठरत्थंतरावणवीहियं करेंति ।। ४४७-A।।

'तए ण'मित्यादि, **ततो ण**मिति पूर्ववत् **तस्य विजयस्य देवस्य 'महया'** इति अतिशयेन महति **इन्द्राभिषेके वर्त्तमानेऽप्येकका देवा** विजयां राजधानीं, सप्तम्यर्थे द्वितीया प्राकृतत्वात्ततोऽयमर्थः-विजयायां राजधान्यां **नात्युदके** प्रभूतजलसङ्ग्रहभावतो वैरस्योपपत्तेः **नातिमृत्तिके** अतिमृत्तिकाया अपि कर्दमरूपतायाम् उत्साहवृद्धिजनकत्वाभावात् **'पविरलफुसिय'**मिति प्रविरलानि-घनभावे कर्दमसम्भवात् प्रकर्षेण यावता रेणवः स्थगिता भवन्ति तावन्मात्रेणोत्कर्षेण स्पृष्टानि-स्पर्शनानि यत्र वर्षे तत् प्रविरलस्पृष्टं **'रयरेणुविणासणं'**ति श्लक्ष्णतरा रेणुपुद्गला रजस्त एव स्थूला रेणवः रजांसि च रेणवश्च रजो-रेणवस्तेषां विनाशनं रजो-रेणुविनाशनं **'दिव्यं'** प्रधानं **सुरभिगन्धोदकवर्षं वर्षन्ति, अप्येकका** विजयां राजधानीं समस्तामपि **'निहतरजसं'** निहतं रजो यस्यां सा निहतरजास्तां, तत्र निहतत्वं रजसः क्षणमात्रमुत्थानाभावेनापि सम्भवति, तत आह-**'नष्टरजसं'** नष्टं-सर्वथाऽदृश्यीभूतं रजो यत्र [ग्रन्थाग्रं ७०००] सा नष्टरजास्तां, तथा भ्रष्टं-वातोद्धूततया राजधान्या दूरतः पलायितं रजो यस्याः सा **भ्रष्टरजास्ताम्**, एतदेवैकार्थिकद्वयेन प्रकटयति-**प्रशान्तरजसम् उपशान्तरजसं कुर्वन्ति,**

१. तुला-राजप्रश्नीयसूत्र-२८१ ।

अप्येकका देवा विजयां राजधानीम् 'आसियसंमज्जियोवलित्तं सित्तसुइसम्मट्ठ[रय]रत्थंतरावणवीहियं करेंति' इति आसिक्तमुदकच्छटेन सम्मार्जितं कचवरशोधनेन उपलिप्तमिव गोमयादिनोपलिप्तं, तथा सिक्तानि जलेनात एव शुचीनि–पवित्राणि सम्मृष्टानि–कचवरापनयनेन रथ्यान्तराणि आपणवीथय इव–हट्टमार्गा इव आपणवीथयो रथ्याविशेषाश्च यस्यां सा तथा तां कुर्वन्ति ।।४४७-A।।

(४४७-B) अप्पेगतिया देवा विजयं रायहाणिं मंचातिमंचकलितं करेंति, अप्पेगतिया देवा विजयं रायहाणिं णाणाविहरागऊसियजयविजयवेजयन्तीधयपडागातिपडागमंडितं करेंति, अप्पेगतिया देवा विजयं रायहाणिं लाउल्लोइयमहियं करेंति, अप्पेगतिया देवा विजयं गोसीससरसरत्तचंदणदद्दरदिण्णपंचंगुलितलं करेंति, अप्पेगतिया देवा विजयं उवचियचंदणकलसं चंदणघडसुकयतोरणपडिदुवारदेसभागं करेंति, अप्पेगतिया देवा विजयं आसत्तोसत्तविपुलवट्टवग्घारितमल्लदामकलावं करेंति, अप्पेगइया देवा विजयं रायहाणिं पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलितं करेंति, अप्पेगइया देवा विजयं कालागुरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघेंतगंधुद्धुयाभिरामं सुगंधवरगंधियं गंधवट्टिभूयं करंति, अप्पेगइया देवा हिरण्णवासं वासंति, अप्पेगइया देवा सुवण्णवासं वासंति, अप्पेगइया देवा एवं रयणवासं वइरवासं पुप्फवासं मल्लवासं गंधवासं चुण्णवासं वत्थवासं आहरणवासं, अप्पेगइया देवा हिरण्णविधिं भाइंति, एवं सुवण्णविधिं रयणविधिं वतिरविधिं पुप्फविधिं मल्लविधिं चुण्णविधिं गंधविधिं वत्थविधिं भाइंति आभरणविधिं ।।४४७-B।।

अप्येकका देवा मञ्चातिमञ्चकलितां कुर्वन्ति, अप्येकका देवा नानाविधा विशिष्टा रागा येषु ते नानाविधरागा **नानाविधरागैरुच्छृतैः**-ऊर्ध्वीकृतैर्ध्वजैः **पताकातिपताकाभिश्च मण्डितां कुर्वन्ति, अप्येकका देवा लाउल्लोइयमहितां गोशीर्षसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितलां कुर्वन्ति, अप्येकका देवा विजयां राजधानीमुपचितचन्दनकलशां** कुर्वन्ति, अप्येकका देवा **चन्दनघटसुकृततोरणप्रतिद्वारदेशभागां कुर्वन्ति, अप्येकका देवा विजयां** राजधानी**मासिक्तोत्सक्तविपुलवृत्तवग्घारितमाल्यदामकलापां कुर्वन्ति, अप्येकका देवा विजयां राजधानीं पञ्चवर्ण-**

[सरस]सुरभिमुक्तपुष्पपुञ्जोपचारकलितां कुर्वन्ति, अप्येकका देवा विजयां राजधानीं **कालागुरु-प्रवरकुन्दुरुष्क-तुरुष्कधूपमघमघायमानां गन्धोद्धुताभिरामां सुगन्धवर**गन्ध**गन्धिकां गन्धवर्त्तिभूतां कुर्वन्ति,** एतेषां च पदानां व्याख्यानं पूर्ववत्, **अप्येकका देवा हिरण्यवर्षं वर्षन्ति, अप्येकका: सुवर्णवर्षमप्येकका आभरणवर्षं (रत्नवर्षमप्येकका वज्रवर्षमप्येकका:) पुष्पवर्ष**मप्येकका **माल्य-वर्ष**मप्येकका**श्चूर्णवर्षं वस्त्रवर्षं** (आभरणवर्षं) **वर्षन्ति, अप्येकका देवा हिरण्यविधिं-**हिरण्यरूपं मङ्गलप्रकारं **'भाजयन्ति'** विश्राणयन्ति शेषदेवेभ्यो ददतीति भाव:, एवं **सुवर्णरत्नाभरणपुष्पमाल्य-गन्धचूर्णवस्त्रविधिभाजनमपि** भावनीयम्।।४४७-B।।

(४४७-C) अप्पेगतिया देवा दुयं णट्टविधिं उवदंसेंति, अप्पेगतिया विलंबितं णट्टविहिं उवदंसेंति, अप्पेगइया देवा दुतविलंबितं णाम णट्टविधिं उवदंसेंति, अप्पेगतिया देवा अंचियं णट्टविधिं उवदंसेंति, अप्पेगतिया देवा रिभितं णट्टविधिं उवदंसेंति, अ० अंचितरिभितं णाम दिव्वं णट्टविधिं उवदंसेंति, अप्पेगतिया देवा आरभडं णट्टविधिं उवदंसेंति, अप्पेगतिया देवा भसोलं णट्टविधिं उवदंसेंति अप्पेगतिया, देवा आरभडभसोलं णाम दिव्वं णट्टविधिं उवदंसेंति, अप्पेगतिया देवा उप्पायणिवायपवुत्तं संकुचियपसारियं रियारियं भंतसंभंतं णाम दिव्वं णट्टविधिं उवदंसेंति । अप्पेगतिया देवा चउव्विधं वातियं वादेंति, तंजहा-ततं विततं घणं झुसिरं ।।४४७-C।।

'अप्पेगइया देवा दुयं नट्टविहिं उवदंसेंति' इत्यादि, इह द्वात्रिंशन्नाट्यविधय:, ते च येन क्रमेण भगवतो वर्द्धमानस्वामिन: पुरत: सूर्याभदेवेन भाविता **राजप्रश्नीयो**पाङ्गे दर्शितास्तेन क्रमेण विनेयजनानुग्रहार्थमुपदर्श्यन्ते, तत्र स्वस्तिकश्रीवत्सनन्दावर्त्तवर्द्धमानकभद्रासनकलशमत्स्यदर्पणरूपाष्ट-मङ्गलाकाराभिनयात्मक: प्रथमो नाट्यविधि: १, द्वितीय आवर्त्तप्रत्यावर्त्तश्रेणिप्रतिश्रेणिस्वस्तिक-पुष्पमाणवकवर्द्धमानकमत्स्याण्डकमकराण्डकजारमारपुष्पावलिपद्मपत्रसागरतरङ्गवासन्ती-लतापद्मलताभक्तिचित्राभिनयात्मक: २, तृतीय ईहामृग-ऋषभ-तुरग-नर-मकर-विहग-व्याल-किन्नर-रुरु-सरभ-चमर-कुञ्जर-वनलता-पद्मलता-भक्तिचित्रात्मक: ३, चतुर्थ एकतोच (तश्च) क्रद्विधातोच (तश्च) क्रएकतश्चक्रवालद्विधातश्चक्रवालचक्रार्द्धचक्रवालाभिनयात्मक: ४, पञ्चमश्चन्द्रावलिप्रविभक्ति-

१. तुला-राजप्रश्नीयसूत्र-७९-११३।।

सूर्यावलिप्रविभक्ति-वलयावलिप्रविभक्ति-हंसावलीप्रविभक्ति-तारावलिप्रविभक्ति-मुक्तावलिप्रविभक्ति-रत्नावलिप्रविभक्ति-पुष्पावलिप्रविभक्तिनामा ५, षष्ठश्चन्द्रोद्गमप्रविभक्ति-सूर्योद्गमप्रविभक्त्यभिनयात्मक उद्गमनोद्गमनप्रविभक्तिनामा ६, सप्तमश्चन्द्रागमन-सूर्यागमनप्रविभक्त्यभिनयात्मक आगमनागमन-प्रविभक्तिनामा ७, अष्टमश्चन्द्रावरणप्रविभक्ति-सूर्यावरणप्रविभक्त्यभिनयात्मक आवरणावरणप्रविभक्तिनामा ८, नवमश्चन्द्रास्तमयनप्रविभक्ति-सूर्यास्तमयनप्रविभक्त्यभिनयात्मकोऽस्तमयनास्तमयनप्रविभक्तिनामा ९, दशमश्चन्द्रमण्डलप्रविभक्ति-सूर्यमण्डलप्रविभक्ति-नागमण्डलप्रविभक्ति-यक्षमण्डलप्रविभक्ति-भूतमण्डलप्रविभक्त्यभिनयात्मको मण्डलप्रविभक्तिनामा १०, एकादश ऋषभमण्डलप्रविभक्ति-सिंहमण्डल-प्रविभक्ति-हयविलम्बित-गजविलम्बित-हयविलसित-गजविलसित-मत्तहयविलसित-मत्तगजविलसित-मत्तहयविलम्बित-मत्तगजविलम्बिताभिनयो द्रुतविलम्बितनामा ११, द्वादशः सागरप्रविभक्ति-नागप्रविभक्त्य-भिनयात्मकः सागरनागप्रविभक्तिनामा १२, त्रयोदशो नन्दाप्रविभक्ति-चम्पाप्रविभक्त्यभिनयात्मको नन्दाचम्पाप्रविभक्त्यात्मकः १३, चतुर्दशो मत्स्याण्डकप्रविभक्ति-मकराण्डकप्रविभक्ति-जारप्रविभक्ति-मारप्रविभक्त्यभिनयात्मको मत्स्याण्डकमकराण्डकजारमारप्रविभक्तिनामा १४, पञ्चदशः क इति ककारप्रविभक्तिः ख इति खकारप्रविभक्तिर्ग इति गकारप्रविभक्तिर्घ इति घकारप्रविभक्तिर्ङ इति ङकार-प्रविभक्तिरित्येवं क्रमभाविककारादिप्रविभक्त्यभिनयात्मकः ककार-खकार-गकार-घकार-ङकारप्रवि-भक्तिनामा १५, एवं षोडशश्चकारछकारजकारझकारञकारप्रविभक्तिनामा १६, सप्तदशः टकारठ-कारडकारढकारणकारप्रविभक्तिनामा १७, अष्टादशस्तकारथकारदकारधकारनकारप्रविभक्तिनामा १८, एकोनविंशतितमः पकारफकारबकारभकारमकारप्रविभक्तिनामा १९, विंशतितमोऽशोकपल्लव-प्रविभक्त्याम्रपल्लवप्रविभक्ति-जम्बूपल्लवप्रविभक्ति-कोशाम्बपल्लवप्रविभक्त्यभिनयात्मकः पल्लव २ प्रविभक्तिनामा २०, एकविंशतितमः पद्मलताप्रविभक्त्यशोकलताप्रविभक्ति-चम्पकलताप्रविभक्ति-चूतलताप्रविभक्ति-वनलताप्रविभक्ति-वासन्तीलताप्रविभक्त्यतिमुक्तलताप्रविभक्ति-श्यामलता-प्रविभक्त्यभिनयात्मको लताप्रविभक्तिनामा २१, द्वाविंशतितमो द्रुतनामा २२, त्रयोविंशतितमो विलम्बितनामा २३, चतुर्विंशतितमो द्रुतविलम्बितनामा २४, पञ्चविंशतितमः अञ्चितनामा २५, षड्विंशतितमो रिभितनामा २६, सप्तविंशतितमोऽञ्चितरिभितनामा २७, अष्टाविंशतितम आरभटनामा २८, एकोनत्रिंशत्तमो भसोलनामा २९, त्रिंशत्तम आरभटभसोलनामा ३०, एकत्रिंश उत्पात-निपात-प्रसक्त-सङ्कुचित-प्रसारित-रेक्कर-चित्त(रियारिय)भ्रान्त-सम्भ्रान्तनामा ३१, द्वात्रिंशत्तमस्तु चरम-

चरमनामानिबद्धनामा, स च सूर्याभदेवेन भगवतो वर्द्धमानस्वामिनः पुरतो भगवतश्चरमपूर्वमनुष्यभव-चरमदेवलोकभव-चरमच्यवन-चरमगर्भसंहरण-चरमभरतक्षेत्रावसर्प्पिणीतीर्थकरजन्माभिषेक-चरमबालभाव-चरमयौवन-चरमकामभोग-चरमनिष्क्रमण-चरमतपश्चरण-चरमज्ञानोत्पाद-चरमतीर्थप्रवर्त्तन-चरमपरिनिर्वाणाभिनयात्मको भावितः ३२। तत्रैतेषां द्वात्रिंशतो नाट्यविधीनां मध्ये कांश्चन नाट्यविधीनुपन्यस्यति–**अप्येकका देवाः द्रुतं**-द्रुतनामकं द्वाविंशतितमं **नाट्यविधिमुपदर्शयन्ति, एवमप्येकका विलम्बितं नाट्यविधिमुपदर्शयन्ति, अप्येकका द्रुतविलम्बितं नाट्यविधिम्, अप्येकका अञ्चितं नाट्यविधिम्, अप्येकका रिभितं नाट्यविधिम्, अप्येकका अञ्चितरिभितं नाट्यविधिम्, अप्येकका आरभटं नाट्यविधिम्, अप्येकका भसोलं नाट्यविधिम्, अप्येकका आरभटभसोलं नाट्यविधिमुपदर्शयन्ति, अप्येकका देवा उत्पातनिपातम्** उत्पातपूर्वो निपातो यस्मिन् स उत्पातनिपातस्तं, एवं निपातोत्पातं **सङ्कुचितप्रसारितं 'रियारिय'**मिति गमनागमनं **भ्रान्तसम्भ्रान्तं नाम, नाट्यविधिं**-सामान्यतो नर्त्तनविधिं द्वात्रिंशद्विध्युत्तीर्ण**मुपदर्शयन्ति**। **अप्येकका देवाश्चतुर्विधं वाद्यं वादयन्ति, तद्यथा-'ततं'** मृदङ्गपटहादि **'विततं'** वीणादिकं **'घनं'** कंसिकादि **'शुषिरं'** काहलादि ।।४४७-C।।

(४४७-D) अप्पेगतिया देवा चउव्विधं गेयं गातंति, तंजहा-उक्खित्तयं पवत्तयं मंदायं रोइदावसाणं अप्पेगतिया देवा चउव्विधं अभिणयं अभिणयंति[१], तंजहा-दिट्ठंतियं पाडंतियं सामन्नोविणिवातियं लोगमज्झावसाणियं, अप्पेगतिया देवा पीणंति, अप्पेगतिया देवा छुक्कारेंति, अप्पेगतिया देवा तंडवेंति, अप्पे० लासेंति, अप्पेगतिया देवा पीणंति वुक्कारेंति तंडवेंति लासंति, अप्पेगतिया देवा अप्फोडंति, अप्पेगतिया देवा वग्गंति, अप्पेगतिया देवा तिवतिं छिंदंति अप्पेगतिया देवा अप्फोडेंति वग्गंति तिवतिं छिंदेंति, अप्पेगतिया देवा हतहेसियं करेंति, अप्पेगतिया देवा हत्थिगुलगुलाइयं करेंति, अप्पेगतिया देवा रहघणघणातियं करेंति, अप्पेगतिया देवा हयहेसियं करेंति हत्थिगुलगुलाइयं करेंति रहघणघणाइयं करेंति, अप्पेगतिया देवा उच्छोलेंति, अप्पेगतिया देवा पच्छोलेंति, [अप्पेगतिया देवा उक्किट्ठिं करेंति] अप्पेगतिया देवा उक्किट्ठीओ करेंति, अप्पेगतिया

१. अभिणेंति - जे. ।।

देवा उच्छोलेंति पच्छोलिंति, उक्किट्ठिओ करेंति, अप्पेगतिया देवा सीहणादं करेंति, अप्पेगतिया देवा पाददद्दरयं करेंति, अप्पेगतिया देवा भूमिचवेडं दलयंति, अप्पेगतिया देवा सीहनादं पाददद्दरयं भूमिचवेडं दलयंति, अप्पेगतिया देवा हक्कारेंति, अप्पेगतिया देवा वुक्कारेंति, अप्पेगतिया देवा थक्कारेंति, अप्पे० पुक्कारेंति, अप्पेगतिया देवा नामाइं सावेंति, अप्पेगतिया देवा हक्कारेंति वुक्कारेंति थक्कारेंति पुक्कारेंति णामाइं सावेंति ।।४४७-D।।

अप्येकका देवाश्चतुर्विधं गेयं गायन्ति, तद्यथा-'उत्क्षिप्तं' प्रथमतः समारभ्यमाणं **'प्रवृत्तम्'** उत्क्षेपावस्थातो विक्रान्तं मनाग्भरेण प्रवर्त्तमानं **मन्दाय**मिति-मध्यभागे मूर्च्छनादिगुणोपेततया मन्दं मन्दं घोलनात्मकं **'रोचितावसान'**मिति रोचितं-यथोचितलक्षणोपेततया भावितं सत्यापितमितियावद् अवसानं यस्य तद् रोचितावसानम्। **अप्येककाश्चतुर्विधमभिनयमभिनयन्ति, तद्यथा-दार्ष्टान्तिकं प्रतिश्रुतिकं सामान्यतो विनिपातिकं लोकमध्यावसानिकमिति,** एतेऽभिनयविधयो नाट्यकुशलेभ्यो वेदितव्याः, **अप्येकका देवाः 'पीनयन्ति'** पीनमात्मानं कुर्वन्ति स्थूला भवन्तीति भावः, **अप्येकका देवाः 'ताण्डवयन्ति'** ताण्डवरूपं नृत्यं कुर्वन्ति, **अप्येकका देवाः 'लास्ययन्ति'**[1] लास्यरूपं नृत्यं कुर्वन्ति, **अप्येकका देवाः 'छुक्कारेंति' छूत्कारं कुर्वन्ति, अप्येकका देवा** एतानि पीनत्वादीनि चत्वार्यपि कुर्वन्ति, **अप्येकका देवा उच्छलन्ति, अप्येकका देवाः प्रोच्छलन्ति, अप्येकका देवास्त्रिपदिकां छिन्दन्ति, अप्येकका**स्त्रीण्यप्येतानि कुर्वन्ति, **अप्येकका देवा हयहेषितानि कुर्वन्ति, अप्येकका देवा हस्तिगडगडायितं कुर्वन्ति, अप्येकका रथघणघणायितं कुर्वन्ति, अप्येकका देवा**स्त्रीण्यप्येतानि कुर्वन्ति, **अप्येकका देवा आस्फोटयन्ति,** भूम्यादिकमिति गम्यते, **अप्येकका देवा वल्गन्ति, अप्येकका देवाः सिंहनादं नदन्ति, अप्येकका देवाः पाददर्दरकं कुर्वन्ति, अप्येकका देवा भूमिचपेटां ददति-**भूमिं चपेटयाऽऽस्फालयन्तीति भावः, अप्येकका देवा महता महता शब्देन 'रवन्ते' शब्दं कुर्वन्ति, **अप्येकका देवा**श्चत्वार्यपि **सिंहनादादीनि** कुर्वन्ति, **अप्येकका देवा 'हक्कारेंति'** हक्कारं कुर्वन्ति **अप्येकका देवाः 'वुक्कारेंति'**[2] मुखेन वुक्कार[3]शब्दं कुर्वन्ति, **अप्येकका देवाः 'थक्कारेंति'** थक्क इत्येवं महता शब्देन कुर्वन्ति, अप्येककास्त्रीण्यप्येतानि कुर्वन्ति।।४४७-D।।

१. *लासयन्ति* - **राजप्रश्नीयवृत्तौ सू.२८१ ।।२-३.** बुक्का० **राजप्रश्नीयवृत्तौ सू. २८४ ।।**

(४४७-E) अप्पेगतिया देवा उप्पतंति, अप्पेगतिया देवा णिवयंति, अप्पेगतिया देवा परिवयंति, अप्पेगतिया देवा उप्पयंति णिवयंति परिवयंति, अप्पेगतिया देवा जलेंति, अप्पेगतिया देवा तवंति, अप्पेगतिया देवा पतवंति, अप्पेगतिया देवा जलंति तवंति, पतवंति, अप्पेगइया देवा गज्जेंति, अप्पेगइया देवा विज्जुयायंति, अप्पेगइया देवा वासंति, अप्पेगइया देवा गज्जंति विज्जुयायंति वासंति, अप्पेगतिया देवा देवसन्निवायं करेंति, अप्पेगतिया देवा देवुक्कलियं करेंति, अप्पेगइया देवा देवकहकहं करेंति, अप्पेगतिया देवा देवदुहदुहं करेंति अप्पेगतिया देवा देवसन्निवायं देवउक्कलियं देवकहकहं देवदुहदुहं करेंति, अप्पेगतिया देवा देवुज्जोयं करेंति, अप्पेगतिया देवा विज्जुयारं करेंति, अप्पेगतिया देवा चेलुक्खेवं करेंति, अप्पेगतिया देवा देवुज्जोयं विज्जुतारं चेलुक्खेवं करेंति, अप्पेगतिया देवा उप्पलहत्थगता जाव सहस्सपत्त० घंटाहत्थगता कलसहत्थगता जाव धूवकडुच्छुय-हत्थगता हट्ठ तुट्ठा जाव हरिसवसविसप्पमाणहियया विजयाए रायहाणीए सव्वतो समंता आधावेंति परिधावेंति।।४४७-E।।

अप्येकका देवा अवपतन्ति, अप्येकका देवा उत्पतन्ति अप्येकका देवाः परिपतन्ति-तिर्यग्निपतन्तीत्यर्थः, अप्येकका देवास्त्रीण्यप्येतानि कुर्वन्ति, **अप्येककाः 'ज्वलन्ति'** ज्वालामालाकुला भवन्ति, **अप्येकका देवाः 'तपन्ति'** तप्ता भवन्ति, **अप्येककाः प्रतपन्ति, अप्येकका देवा**स्त्रीण्यपि कुर्वन्ति, **अप्येकका देवा गर्जयन्ति, अप्येकका: 'विज्जुयारंति'** विद्युतं कुर्वन्ति, **अप्येकका देवा वर्षं वर्षन्ति अप्येकका**स्त्रीण्यप्येतानि कुर्वन्ति, **अप्येकका देवा देवोत्कलिकां कुर्वन्ति-**देवानां वातस्येवोत्कलिका देवोत्कलिका तां कुर्वन्ति, **अप्येकका देवा देवकहकहं कुर्वन्ति-**प्रभूतानां देवानां प्रमोदभरवशतः स्वेच्छावचनैर्बोलः कोलाहलो देवकहकहस्तं कुर्वन्ति, **अप्येकका देवा देवदुहुदुहुकं कुर्वन्ति-**दुहुदुहुकमित्यनुकरणवचनमेतत्, अप्येककास्त्रीण्यप्येतानि कुर्वन्ति, **अप्येकका देवाश्चेलोत्क्षेपं कुर्वन्ति,** अप्येकका देवा वन्दन**कलशहस्तगताः**–वन्दनकलशा हस्ते गता येषां ते वन्दनकलशहस्तगताः, अप्येकका देवाः भृङ्गारकलशहस्तगताः, एवमादर्श-स्थाल-पात्री-सुप्रतिष्ठक-वातकरक-चित्ररत्नकरण्डक-पुष्पचङ्गेरीयावल्लोमहस्तचङ्गेरी-पुष्पपटलकयावल्लोमहस्तपटलक-सिंहासन-चामर-तैलसमुद्ग-कयावदञ्जनसमुद्गक-**धूपकडुच्छुकहस्तगताः** प्रत्येकमभिलाप्याः, **'हट्ठतुट्ठे'**त्यादि यावत्करणात्

'हट्ठतुट्ठचित्तमाणंदिया पीतिमणा परमसोमणस्सिया **हरिसवसविसप्पमाणहियया**' इति परिग्रहः, **सर्वतः समन्ताद् आधावन्ति प्र(परि)धावन्ति**।।४४६-४७।।

(४४८) तए णं तं विजयं देवं चत्तारि सामाणियसाहस्सीओ चत्तारि अग्गमहिसीओ सपरिवाराओ जाव सोलसआयरक्खदेवसाहस्सीओ अण्णे य बहवे विजयरायहाणीवत्थव्वा वाणमंतरा[२] देवा य देवीओ य तेहिं वरकमलपतिट्ठाणेहिं जाव अट्ठसतेणं सोवण्णियाणं कलसाणं तं चेव जाव अट्ठसएणं भोमेज्जाणं कलसाणं सव्वोदगेहिं सव्वमट्टियाहिं सव्वतुवरेहिं सव्वपुप्फेहिं जाव सव्वोसहिसिद्धत्थएहिं सव्विड्ढीए जाव निग्घोसनाइयरवेणं महया २ इंदाभिसेएणं अभिसिंचंति २ पत्तेयं २ सिरसावत्तं अंजलिं कट्टु एवं वयासि-जय जय नंदा! जय जय भद्दा! जय जय नंदा भद्दं ते अजियं जिणाहि जियं पालयाहि अजितं जिणाहि सत्तुपक्खं जितं पालयाहि मित्तपक्खं जियमज्झे वसाहि तं देव! निरुवसग्गं इंदो इव देवाणं चंदो विव ताराणं चमरो विव असुराणं धरणो विव नागाणं भरहो विव मणुयाणं बहूणि पलिओवमाइं बहूणि सागरोवमाणि चउण्हं सामाणियसाहस्सीणं जाव आयरक्ख-देवसाहस्सीणं विजयस्स देवस्स विजयाए रायहाणीए अण्णेसिं च बहूणं विजयरायहाणि-वत्थव्वाणं वाणमंतराणं देवाणं देवीण य आहेवच्चं जाव आणाईसरसेणावच्चं कारेमाणे पालेमाणे विहराहित्तिकट्टु महता २ सद्देणं जयजयसद्दं पउंजंति।। ४४८।।

'तए णं तं विजयं देवं चत्तारि सामाणियसाहस्सीओ' इत्याद्यभिषेकनिगमनसूत्रमाशीर्वादसूत्रं च पाठसिद्धम्।। ४४८।।

(४४९-४५०) तए[३] णं से विजए देवे महया २ इंदाभिसेएणं अभिसित्ते समाणे सीहासणाओ अब्भुट्ठेइ सीहासणाओ अब्भुट्ठेत्ता अभिसेयसभातो पुरत्थिमिल्लेणं दारेणं पडिणिग्गच्छति २ त्ता जेणामेव अलंकारियसभा तेणेव उवागच्छति २ त्ता आलंकारियसभं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमेणं दारेणं अणुपविसति,पुरत्थिमिल्लेणं दारेणं

---

१. तुला-राजप्रश्नीयसूत्र २८२ ।। २. वाणमंतरा- जे. नास्ति ।। ३. तुला-राजप्रश्नीयसूत्र २८३-२८४ ।।

अणुपविसित्ता जेणेव सीहासणे तेणेव उवागच्छति, २ त्ता सीहासणवरगते पुरत्थाभिमुहे सण्णिसण्णे, तए णं तस्स विजयस्स देवस्स आभियोग्गा देवा ते आलंकारियं भंडं उवणेंति ।।४४९-४५०।।

'**तए ण**'मित्यादि, **ततः स विजयो देवो** वानमन्तरैः '**महया २**' इति अतिशयेन महता **इन्द्राभिषेकेणाभिषिक्तः सन् सिंहासनादभ्युत्तिष्ठति, अभ्युत्थायाभिषेकसभातः पूर्वद्वारेण विनिर्गत्य यत्रैवालङ्कारसभा तत्रैवोपागच्छति, उपागत्यालङ्कारिकसभामनुप्रदक्षिणीकुर्वन् पूर्वद्वारेणानुप्रविशति, अनुप्रविश्य च** यत्रैव मणिपीठिका **यत्रैव च सिंहासनं तत्रोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः संनिषण्णः, ततस्तस्य विजयस्य देवस्याभियोग्या देवा** सुबहु '**आलङ्कारिकम्**' अलङ्कारयोग्यं **भाण्डमुपनयन्ति**।।४४९-४५०।।

(४५१) तए णं से विजए देवे तप्पढमयाए पम्हलसूमालाए दिव्वाए सुरभीए गंधकासाईए गाताइं लूहेति, गाताइं लूहेत्ता सरसेणं गोसीसचंदणेणं गाताइं अणुलिंपति, सरसेणं गोसीसचंदणेणं गाताइं अणुलिंपेत्ता ततोऽणंतरं च णं नासाणीसासवायवज्झं चक्खुहरं वण्णफरिसजुत्तं हतलालापेलवातिरेगं धवलं कणगखइयंतकम्मं आगासफलिहसरिसप्पभं अहतं दिव्वं देवदूसजुयलं णियंसेइ, णियंसेत्ता हारं पिणिद्धेइ, हारं पिणिद्धेत्ता एवं एकावलिं पिणिद्धेति, एकावलिं पिणिद्धेत्ता एवं एतेणं अभिलावेणं मुत्तावलिं कणगावलिं रयणावलिं कडगाइं तुडियाइं अंगयाइं केयूराइं [१]दसमुद्दिताणंतकं कडिसुत्तकं पालंबं कुंडलाइं चूडामणिं [३]चित्तरयणसंकडं मउडं पिणिद्धेइ, पिणिद्धेत्ता गंठिमवेढिमपूरिमसंघाइमेणं [४]चउव्विहेणं मल्लेणं कप्परुक्खयंपिव अप्पाणं अलंकियविभूसितं करेति, कप्परुक्खयंपिव अप्पाणं अलंकियविभूसियं करेत्ता दद्दरमलयसुगंधगंधितेहिं गंधेहिं गाताइं

---

१. तुला- राजप्रश्नीयसूत्र २८५।। २. V। जंबू. ३।२११। दसमुद्दियाणंताइं कडिसुत्तं-ता । दसमुद्दिताणंतकं कडिसुत्तकं वेअच्छि (तेअत्थि-मु.)सुत्तगं मुरविं कंठमुरविं पालंबं [सि-मु]-कखगट त्रि । द्र. राज.प्र.२८५।। ३. V। जंबू. ३।२११। चित्तं रतणसंकुडुक्कडं-ता । चित्तरयपुक्कडं-मु.। द्र.भगवतीसू. ९।१९०। ४. 'गंठिमे'-त्यादितो यावत् 'करेत्ता'इत्यय पाठोऽग्रलिखित सूत्रस्यादावेव दृश्यते व्याख्यानुसारेण ।।

[१]सुक्किडति (भुकुंडे ति) २ त्ता दिव्वं च सुमणदामं पिणिद्धति।। ४५१।।

'तए ण'मित्यादि, **ततः स विजयो देवस्तत्प्रथमतया** तस्यामलङ्कारसभायां प्रथमतया पक्ष्मला च सा सुकुमारा च **पक्ष्मलसुकुमारा** तया **'सुरभिगन्धकाषायिक्या'** सुरभिगन्धकषायद्रव्यपरिकर्म्मितया लघुशाटिकयेति गम्यते **गात्राणि रूक्षयति, रूक्षयित्वा सरसेन गोशीर्षचन्दनेन गात्राण्यनुलिम्पति, अनुलिप्य** देवदूष्ययुगलं निधत्त इति योगः, कथम्भूतः? इत्याह–**'नासानीसासवायवज्झं'** नासिकानिःश्वासवातवाह्यम्, एतेन श्लक्ष्णतामाह, **'चक्षुर्हरं'** चक्षुर्हरति–आत्मवशं नयति विशिष्टरूपातिशयकलितत्वाच्चक्षुर्हरं **'वर्णस्पर्शयुक्तम्'** अतिशायिना वर्णेनातिशायिना स्पर्शेन युक्तं **'हयलालापेलवाइरेग'**मिति हयलाला–अश्वलाला तस्या अपि पेलवमतिरेकेण हयलालापेलवातिरेकं **"नाम नाम्नैकार्थ्ये समासो बहुलम्" [सि.हे.३/१/१८]** इति समासः, अतिविशिष्टमृदुत्व-लघुत्व-गुणोपेतमिति भावः, **धवलं**–श्वेतं कनकखचितानि–विच्छुरितानि अन्तकर्म्माणि–अञ्चलयोर्वानलक्षणानि यस्य तत् **कनकखचितान्तकर्म्म आकाशस्फटिकं** नाम–अतिस्वच्छस्फटिकविशेषस्तत्**समप्रभं दिव्यं 'देवदूष्ययुगलं'** देववस्त्रयुग्मं **'निवस्ते'** परिधत्ते, **परिधाय हारा**दीन्याभरणानि **पिनह्यति,** तत्र हारः–अष्टादशसरिकः अर्द्धहारो–नवसरिकः **एकावली**–विचित्रमणिका **मुक्तावली**–मुक्ताफलमयी **कनकावली**–कनकमणिमयी **प्रालम्बः**–तपनीयमयो विचित्रमणिरत्नभक्तिचित्र आत्मनः प्रमाणेन स्वप्रमाण आभरणविशेषः **कटकानि**–कलाचिकाभरणानि **त्रुटितानि**–बाहुरक्षकाः **अङ्गदानि**–बाह्वाभरणविशेषा **'दशमुद्रिकाऽनन्तकं'** हस्ताङ्गुलिसम्बन्धि मुद्रिकादशकं **'कुण्डले'** कर्णाभरणे **चूडामणि**मिति–चूडामणिर्नाम सकलपार्थिवरत्नसर्वसारो देवेन्द्रमनुष्येन्द्रमूर्द्धकृतनिवासो निःशेषापमङ्गलाशान्तिरोगप्रमुखदोषापहारकारी प्रवरलक्षणोपेतः परममङ्गलभूत आभरणविशेषः **'चित्तरयणसंकडं मउड'**मिति चित्राणि–नानाप्रकाराणि यानि रत्नानि तैः सङ्कटः चित्ररत्नसङ्कटः प्रभूतरत्ननिचयोपेत इति भावः। 'तं **दिव्वं सुमणदामं**'ति 'दिव्यां' प्रधानां पुष्पमालाम् **ग्रन्थिमं**–ग्रन्थनं ग्रन्थस्तेन निर्वृत्तं ग्रन्थिमं **"भावादिमः"** [ ] प्रत्ययः, यत् सूत्रादिना ग्रथ्यते तद् ग्रन्थिममिति भावः,

---

१. सुकुडेति- **कख।** सुकडेति-**गट।** सुक्किडेति- **त्रि।** सुक्किडति- **मु.।** 'भुकुंडेति'- **एतत्पाठः जम्बूद्वीप- प्रज्ञप्तेः (३।२११) सूत्रस्याधारेण स्वीकृतः हीरविजयसूरिणा अस्य व्याख्या कृताऽस्ति । 'भुकुंडेति-उद्धूलयन्ति' (हस्तलिखित वृत्ति पत्र-३०२) भगवती वृत्तौ (पत्र-४७७) वाचनान्तरपाठस्य विवरणे-** 'भुकुंडेति- उद्धूलयन्ति' **इति लभ्यते - इति V पृ. ३५१ टि. ८ ।।**

भरिमं[1]–यद् ग्रन्थितं सद् वेष्ट्यते यथा पुष्पलम्बूसको गेण्डूक[2] (वेष्टिमं) इत्यर्थः, **पूरिमं** येन वंशशलाकादिमयपञ्जरी पूर्यते, **सङ्घातिमं** यत्परस्परतो नालसङ्घातेन सङ्घात्यते, एवंविधेन **चतुर्विधेन माल्येन कल्पवृक्षमिवात्मानमलङ्कृतविभूषितं करोति, कृत्वा** ।।४५१।।

(४५२) तए णं से विजए देवे केसालंकारेणं वत्थालंकारेणं मल्लालंकारेणं आभरणालंकारेणं चउव्विहेणं अलंकारेणं अलंकिते विभूसिए समाणे पडिपुण्णालंकारे सीहासणाओ अब्भुट्ठेइ, २ त्ता आलंकारियसभाओ पुरत्थिमिल्लेणं दारेणं पडिनिक्खमति, २ त्ता जेणेव ववसायसभा तेणेव उवागच्छति, २ त्ता ववसायसभं अणुप्पदाहिणं करेमाणे २ पुरत्थिमिल्लेणं दारेणं अणुपविसति, २ त्ता जेणेव सीहासणे तेणेव उवागच्छति, २ त्ता सीहासणवरगते पुरत्थाभिमुहे सण्णिसण्णे।।४५२।।

'तए णं से विजए' इत्यादि, **परिपूर्णालङ्कारः सिंहासनादभ्युत्तिष्ठति, अभ्युत्थायालङ्कारसभातः पूर्वेण द्वारेण निर्गत्य यत्रैव व्यवसायसभा तत्रैवोपागच्छति, उपागत्य** सिंहासनवरगतः **पूर्वाभिमुखः सन्निषण्णः**।। ४५२।।

(४५३) तेणं[3]ते णं तस्स विजयस्स देवस्स आभियोग्गा देवा पोत्थयरयणं उवणेंति।४५३

'तए ण'मित्यादि, **ततस्तस्य विजयस्य देवस्याभियोग्याः पुस्तकरत्नमुपनयन्ति**।।४५३।।

(४५४) तए णं से विजए देवे पोत्थयरयणं गेण्हति, २ त्ता पोत्थयरयणं मुयति, पोत्थयरयणं मुएत्ता पोत्थयरयणं विहाडेति, पोत्थयरयणं विहाडेत्ता पोत्थयरयणं वाएति, पोत्थयरयणं वाएत्ता धम्मियं ववसायं पगेण्हति, धम्मियं ववसायं पगेण्हित्ता पोत्थयरयणं पडिणिक्खिवेइ, २ त्ता सीहासणाओ अब्भुट्ठेति, २ त्ता ववसायसभाओ पुरत्थिमिल्लेणं दारेणं पडिणिक्खमइ, २ त्ता जेणेव णंदापुक्खरिणी तेणेव उवागच्छति, २ त्ता णंदं पुक्खरिणिं अणुप्पयाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसति, २ त्ता पुरत्थिमिल्लेणं तिसोपाणपडिरूवगएणं पच्चोरुहति, २ त्ता हत्थपादाइं पक्खालेति,

१. पूरिमं (वेष्टिमं)-इति राजप्रश्नीयवृत्तौ सू. २८५ ।। २. गेन्दूकः -इति राजप्रश्नीयवृत्तौ सू. २८५ ।। ३. तुला- राजप्रश्नीयसूत्र- २८७-८८ ।।

२ त्ता एगं महं सेतं रयतामयं विमलसलिलपुण्णं मत्तगयमहामुहाकितिसमाणं भिंगारं गिण्हति, भिंगारं गेण्हित्ता जाइं तत्थ उप्पलाइं पउमाइं जाव सतसहस्सपत्ताइं ताइं गिण्हति, २ त्ता णंदातो पुक्खरिणीतो पच्चुत्तरेइ, २ त्ता जेणेव सिद्धायतणे तेणेव पहारेत्थ गमणाए।।४५४।।

'तए ण'मित्यादि, **ततः स विजयो देवः पुस्तकरत्नं गृह्णाति, गृहीत्वा पुस्तकरत्न**मुत्सङ्गादाविति गम्यते **मुञ्चति, मुक्त्वा विघाटयति, विघाट्या**नुप्रवाचयति अनु-परिपाट्या प्रकर्षेण-विशिष्टार्थावगम-रूपेण **वाचयति, वाचयित्वा 'धार्म्मिकं'** धर्मानुगतं **व्यवसायं** व्यवस्यति, कर्त्तुमभिलषतीति भावः, व्यवसाय-सभायाः शुभाध्यवसायनिबन्धनत्वात्, क्षेत्रादेरपि कर्म्मक्षयोपशमादिहेतुत्वात्, उक्तञ्च-

"**उदयक्खयखओवसमोवसमा जं च कम्मुणो भणिया।**
दव्वं खेत्तं कालं भवं च भावं च संपप्प।।१।।" इति, [धर्मसङ्ग्रहणी-१४९]

धार्म्मिकं च **व्यवसायं व्यवसायपुस्तकरत्नं प्रतिनिक्षिपति, प्रतिनिक्षिप्य सिंहासनादभ्युत्तिष्ठति, अभ्युत्थाय व्यवसायसभातः पूर्वद्वारेण विनिर्गच्छति, विनिर्गत्य यत्रैव** व्यवसायसभाया एव पूर्वा **नन्दापुष्करिणी तत्रैवोपागच्छति, उपागत्य नन्दां पुष्करिणीमनुप्रदक्षिणीकुर्वन् पूर्व**तोरणेना**नुप्रविशति, [अनु]प्रविश्य पूर्वेण त्रिसोपानप्रतिरूपकेण प्रत्यवरोहति,** मध्ये प्रविशतीति भावः, **प्रत्यवरुह्य हस्त-पादौ प्रक्षालयति, प्रक्षाल्यैकं महान्तं श्वेतं रजतमयं विमलसलिलपूर्णं मत्तकरिमहामुखाकृति-समानं भृङ्गारं गृह्णाति, गृहीत्वा यानि तत्रोत्पलानि पद्मानि** कुमुदानि नलिनानि **यावत् शतसहस्रपत्राणि तानि गृह्णाति, गृहीत्वा नन्दातः पुष्करिणीतः प्रत्युत्तरति, प्रत्युत्तीर्य यत्रैव सिद्धायतनं तत्रैव प्रधावितवान् गमनाय।।४५४।।**

(४५५) तए णं तस्स विजयस्स देवस्स चत्तारि सामाणियसाहस्सीओ जाव अण्णे य बहवे वाणमंतरा देवा य देवीओ य अप्पेगइया उप्पलहत्थगया जाव हत्थगया विजयं देवं पिट्ठतो पिट्ठतो अणुगच्छंति।।४५५।।

'तए ण'मित्यादि, **ततस्तस्य विजयस्य देवस्य चत्वारि सामानिकदेवसहस्राणि** चतस्रः सपरिवारा अग्रमहिष्यः तिस्रः पर्षदः सप्तानीकानि सप्तानीकाधिपतयः षोडशात्मरक्षदेवसहस्राणि **अन्ये च बहवो**

१. कर्मोदयादिनिमित्तत्त्वात् **-इति राजप्रश्नीयवृत्तौ सू. २८६ ।। २. तुला -राजप्रश्नीयसूत्र -२८९-९० ।।**

विजयराजधानीवास्तव्या **वानमन्तरा देवाश्च देव्यश्च अप्येकका उत्पलहस्तगता** अप्येकका: पद्महस्तगता अप्येकका: कुमुदहस्तगता: एवं नलिन-सुभग-सौगन्धिक-पुण्डरीक-महापुण्डरीक-शतपत्र-सहस्रपत्र-शतसहस्रपत्र**हस्तगता:** क्रमेण प्रत्येकं वाच्या:, **विजयं देवं पृष्ठत: पृष्ठत:** परिपाट्येति भाव: **अनुगच्छन्ति**।।४५५।।

(४५६) तए णं तस्स विजयस्स देवस्स बहवे आभिओगिया देवा देवीओ य कलसहत्थगता जाव धूवकडुच्छुयहत्थगता विजयं देवं पिट्ठतो २ अणुगच्छंति।।४५६।।

'तए ण'मित्यादि, **ततस्तस्य विजयस्य देवस्य बहव आभियोग्या देवा देव्यश्च** अप्येकका वन्दन**कलशहस्तगता:** अप्येकका भृङ्गारहस्तगता: अप्येकका आदर्शहस्तगता: एवं स्थाल-पात्री-सुप्रतिष्ठवातकरक-चित्ररत्न-करण्डक-पुष्पचङ्गेरीयावल्लोमहस्तचङ्गेरी-पुष्पपटलकयावल्लोमहस्त-पटलक-सिंहासनच्छत्र-चामर-तैलसमुद्गकयावदञ्जनसमुद्गक-**धूपकडुच्छुकहस्तगता:** क्रमेण प्रत्येक-मालाप्या:, **विजयं देवं पृष्ठत: पृष्ठतोऽनुगच्छन्ति।। ४५६।।**

(४५७-A) तंते णं से विजए देवे चउहिं सामाणियसाहस्सीहिं जाव अण्णेहि य बहूहिं रायहाणिवत्थवएहिं वाणमंतरेहिं देवेहि य देवीहि य सद्धिं संपरिवुडे सव्विड्ढीए सव्वजुत्तीए जाव णिग्घोसणाइयरवेणं जेणेव सिद्धाययणे तेणेव उवागच्छति, २ त्ता सिद्धायतणं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमिल्लेणं दारेणं अणुपविसति, अणुपविसित्ता जेणेव देवच्छंदए तेणेव उवागच्छति, २ त्ता आलोए जिणपडिमाणं पणामं करेति, २ त्ता लोमहत्थगं गेण्हति लोमहत्थगं गेण्हित्ता जिणपडिमाओ लोमहत्थएणं पमज्जति, २ त्ता सुरभिणा गंधोदएणं ण्हाणेति, २ त्ता दिव्वाए सुरभिगंधकासाइए गाताइं लूहेति, २ त्ता सरसेणं गोसीसचंदणेणं गाताणि अणुलिंपइ, अणुलिंपेत्ता जिणपडिमाणं अहयाइं सेताइं दिव्वाइं देवदूसजुयलाइं णियंसेइ, नियंसेत्ता अग्गेहिं वरेहिं य पुप्फेहिं गंधेहिं य मल्लेहिं चुण्णेहि य अच्चेति, २ त्ता ।।४५७ - A।।

तत: स विजयो देवश्चतुर्भि: सामानिकसहस्रैश्चतसृभि: सपरिवाराभिरग्रमहिषीभिस्तिसृभि: पर्षद्भि: सप्तभिरनीकै: सप्तभिरनीकाधिपतिभि: षोडशभिरात्मरक्षदेवसहस्रैर**न्यैश्च बहुभि**र्विजय**राजधानी-**

१. तुला- राजप्रश्नीयसूत्र-२९१-३५७ ।।

वास्तव्यैर्वानमन्त**रैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः सर्वद्ध्या 'जाव निग्घोसनादितरवेण'** मिति यावत्करणादेवं परिपूर्णः पाठो द्रष्टव्यः–'सव्वजुईए सव्वबलेणं सव्वसमुदएणं सव्वविभूईए सव्वसंभमेणं सव्वपुप्फ-गंध-मल्लालंकारेणं सव्वतुडियसद्दनिनाएणं महया इड्ढीए महया जुईए महया बलेणं महया समुदएणं महया वरतुडियजमगसमगपडुप्पवाइयरवेणं संख-पणव-पडह-भेरि-झल्लरि-खरमुहि-हुडुक्क-दुंदुभि**निग्घोसनादितरवेणं'** अस्य व्याख्या प्राग्वत्। **यत्रैव सिद्धायतनं तत्रैवोपागच्छति, उपागत्य सिद्धायतनमनुप्रदक्षिणीकुर्वन् पूर्वद्वारेण प्रविशति, प्रविश्यालोक्य(के) जिनप्रतिमानां प्रणामं करोति, कृत्वा** यत्रैव मणिपीठिका **यत्रैव देवच्छन्दको** यत्रैव जिनप्रतिमास्तत्रोपागच्छति, उपागत्य **लोमहस्तकं परामृशति, परामृश्य च जिनप्रतिमाः प्रमार्जयति, प्रमार्ज्य** दिव्ययोदकधारया **स्नपयति, स्नपयित्वा सरसेनार्द्रेण गोशीर्षचन्दनेन गात्राण्यनुलिम्पति, अनुलिप्य 'अहतानि'** अपरिमलितानि **दिव्यानि देवदूष्ययुगलानि 'नियंसइ'**त्ति परिधापयति, **परिधाप्य 'अग्रैः'** अपरिभुक्तैः **'वरैः'** प्रधानै**र्गन्धैर्माल्यै**श्चार्चयति। एतदेव सविस्तरमुपदर्शयति–

(४५७-B) पुप्फारुहणं गंधारुहणं मल्लारुहणं वण्णारुहणं चुण्णारुहणं आभरणारुहणं करेति, करेत्ता आसत्तोसत्तविउलवट्टवग्घारितमल्लदाम० करेति, २ त्ता अच्छेहिं सण्हेहिं [सेएहिं] रययामएहिं अच्छरसातंदुलेहिं जिणपडिमाणं पुरतो अट्ठट्ठमंगलए आलिहति-सोत्थियसिरिवच्छ जाव दप्पण अट्ठट्ठमंगलगे आलिहति, आलिहित्ता कयग्गाहग्गहितकरतलपब्भट्ठविप्पमुक्केणं[1] दसद्धवन्नेणं कुसुमेणं पुप्फपुंजोवयारकलितं करेति, २ त्ता चंदप्पभवइरवेरुलियविमलदंडं कंचणमणिरयणभत्तिचित्तं कालागरु-पवरकुंदुरुक्क-तुरुक्कधूवगंधुत्तमाणुविद्धं धूमवट्टिं विणिम्मुयंतं वेरुलियामयं कडुच्छुयं पग्गहित्तु पयत्तेण धूवं दाऊण जिणवराणं अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं अत्थजुत्तेहिं अपुणरुत्तेहिं संथुणइ, २ त्ता सत्तट्ठ पयाइं ओसरति, सत्तट्ठपयाइं ओसरित्ता वामं जाणुं अंचेइ, २ त्ता दाहिणं जाणुं धरणितलंसि णिवाडेइ, तिक्खुत्तो मुद्धाणं धरणियलंसि णमेइ, नमित्ता ईसिं पच्चुण्णमति, २ त्ता कडयतुडियथंभियाओ भुयाओ पडिसाहरति,

१. ०हिं दसद्धवण्णोहिं कुसुमेहिं सव्वओ समंता पुप्फ० **जे.** ।।

२ त्ता करयलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वयासी-णमोऽत्थु णं अरिहंताणं भगवंताणं जाव सिद्धिगइणामधेयं ठाणं संपत्ताणं तिकट्टु वंदति णमंसति, वंदित्ता णमंसित्ता।।४५७-B।।

पुष्पारोपणं माल्यारोपणं वर्णकारोपणं चूर्णारोपणं गन्धारोपणम् आभरणारोपणं (च) **करोति, कृत्वा** तासां जिनप्रतिमानां पुरतः **'अच्छैः'** स्वच्छैः **'श्लक्ष्णैः'** मसृणै **रजतमयैः,** अच्छो रसो येषां तेऽच्छरसाः, प्रत्यासन्नवस्तुप्रतिबिम्बाधारभूता इवातिनिर्मला इति भावः, ते च ते तन्दुला**श्चाच्छरसतन्दुलाः,** पूर्वपदस्य दीर्घान्तता प्राकृतत्वात्, यथा 'वइरामया नेमा' इत्यादौ, तैर**ष्टावष्टौ** स्वस्तिकादीनि **मङ्गलकान्यालिखति, आलिख्य 'कयग्गाहगहिय'**मित्यादि मैथुनप्रथमसंरम्भे मुखचुम्बनाद्यर्थं युवत्याः पञ्चाङ्गुलिभिः केशेषु ग्रहणं कचग्राहस्तेन कचग्राहेण गृहीतं करतलाद्विमुक्तं सत् प्रभ्रष्टं **करतलप्रभ्रष्टवि[प्र]मुक्तं,** प्राकृतत्वादेवं पदव्यत्ययः, तेन **'दशार्द्धवर्णेन'** पञ्चवर्णेन **'कुसुमेन'** कुसुमसमूहेन **'पुष्पपुञ्जोपचारकलितं'** पुष्पपुञ्ज एवोपचारः–पूजा पुष्पपुञ्जोपचारस्तेन कलितं–युक्तं **करोति, कृत्वा** च **'चंदप्पभवइरवेरुलियविमलदंडं'** चन्द्रप्रभ-वज्र-वैडूर्यमयो विमलो दण्डो यस्य स तथा तं **काञ्चनमणिरत्नभक्तिचित्रं** कालागुरु-प्रवरकुन्दुरुष्क-तुरुष्कधूपेन गन्धोत्तमेनानुविद्धा **कालागुरु-प्रवरकुन्दुरुष्क-तुरुष्कधूपगन्धोत्तमानुविद्धा,** प्राकृतत्वात्पदव्यत्ययः, तां **धूपवर्तिं विनिर्मुञ्चन्तं वैडूर्यमयं** धूप**कडुच्छुकं प्रगृह्य प्रयतो धूपं दत्त्वा जिनवरेभ्यः,** सूत्रे षष्ठी प्राकृतत्वात्, **सप्ताष्टानि पदानि** पश्चा**दपसृत्य** दशाङ्गुलिमञ्जलिं मस्तके कृत्वा प्रयतः **'अट्ठसयविसुद्धगंठजुत्तेहिं'** इति विशुद्धो–निर्मलो, लक्षणदोषरहित इति भावः यो ग्रन्थः–शब्दसन्दर्भस्तेन युक्तानि विशुद्धग्रन्थयुक्तानि अष्टशतं च तानि विशुद्धग्रन्थयुक्तानि च तैः **'अर्थयुक्तैः'** अर्थसारैः **अपुनरुक्तैः महावृत्तैः,** तथाविधदेवलब्धेः प्रभाव एषः, **संस्तौति, संस्तुत्य वामं जानुं 'अञ्चति'** उत्पाटयति, **दक्षिणं जानुं धरणितले 'निवाडेइ'** इति निपातयति लगयतीत्यर्थः **'त्रिकृत्वः'** त्रीन् वारान् **मूर्द्धानं धरणितले 'नमेइ'**त्ति **नमयति, नमयित्वा चेषत्प्रत्युन्नमयति, ईषत्प्रत्युन्नम्य कटकत्रुटितस्तम्भितौ भुजौ 'संहरति'** सङ्कोचयति, **संहृत्य करतलपरिगृहीतं शिरस्यावर्त्तं मस्तकेऽञ्जलिं कृत्वैवमवादीत्-'नमोऽत्थु ण'**मित्यादि, नमोऽस्तु णमिति वाक्यालङ्कारे देवादिभ्योऽतिशयपूजामर्हन्तीत्य**र्हन्तस्तेभ्यः**, सूत्रे षष्ठी **"छट्ठिविभत्तीएँ भन्नइ चउत्थी"[ ]**इति प्राकृतलक्षणात्, ते चार्हन्तो नामादिरूपा अपि

सन्ति, ततो भावार्हत्प्रतिपत्त्यर्थमाह–**'भगवद्भ्यः'** भगः–समग्रैश्वर्यादिलक्षणः स एषामस्तीति भगवन्तस्तेभ्यः, आदिः–धर्म्मस्य प्रथमा प्रवृत्तिस्तत्करणशीला आदिकरास्तेभ्यः, तीर्यते संसारसमुद्रोऽनेनेति तीर्थं तत्करणशीलास्तीर्थकरास्तेभ्यः, स्वयम्–अपरोपदेशेन सम्यग्वरबोधिप्राप्त्या बुद्धा–मिथ्यात्वनिद्रापगमसम्बोधेन स्वयंसंबुद्धास्तेभ्यः, तथा पुरुषाणामुत्तमाः पुरुषोत्तमाः, भगवन्तो हि संसारमप्यावसन्तः सदा परार्थव्यसनिन उपसर्जनीकृतस्वार्था उचितक्रियावन्तोऽदीनभावाः कृतज्ञतापतयोऽनुपहतचित्ता देव-गुरुबहुमानिन इति भवन्ति पुरुषोत्तमास्तेभ्यः, तथा पुरुषाः सिंहा इव कर्म्मगजान् प्रति पुरुषसिंहास्तेभ्यः, तथा पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्म्मकलापेनेति पुरुषवरपुण्डरीकाणि तेभ्यः, तथा पुरुषा वरगन्धहस्तिन इव परचक्रदुर्भिक्षमारिप्रभृतिक्षुद्रगजनिराकरणेनेति पुरुषवरगन्धहस्तिनस्तेभ्यः, तथा लोको–भव्यसत्त्वलोकस्तस्य सकलकल्याणैकनिबन्धनतया भव्यत्वभावेनोत्तमा लोकोत्तमास्तेभ्यः, तथा लोकस्य–भव्यलोकस्य नाथा–योगक्षेमकृतो लोकनाथास्तेभ्यः, तत्र योगो–बीजाधानोद्भेदपोषणकरणं क्षेमं–तदुपद्रवाद्यभावापादनं, तथा लोकस्य–प्राणिलोकस्य पञ्चास्तिकायात्मकस्य वा हितोपदेशेन सम्यक्प्ररूपणया वा हिता लोकहितास्तेभ्यः, तथा लोकस्य–देशनायोग्यस्य विशिष्टस्य प्रदीपा–देशनांशुभिर्यथाऽवस्थितवस्तुप्रकाशका लोकप्रदीपास्तेभ्यः, तथा लोकस्य–उत्कृष्टमतेर्भव्यसत्त्वलोकस्य प्रद्योतनं प्रद्योतः प्रद्योतकत्वं–विशिष्टज्ञानशक्तिस्तत्करणशीला लोकप्रद्योतकराः, तथा च भवन्ति भगवत्प्रसादात् तत्क्षणमेव भगवन्तो गणभृतो विशिष्टज्ञानसम्पत्समन्विता यद्वशाद् द्वादशाङ्गमारचयन्तीति तेभ्यः, तथाऽभयं–विशिष्टमात्मनः स्वास्थ्यं निःश्रेयसधर्म्मभूमिका-निबन्धनभूता परमा धृतिरिति भावः, तद् अभयं ददतीत्यभयदास्तेभ्यः, सूत्रे च 'क'प्रत्ययः स्वार्थिकः प्राकृतलक्षणवशात्, एवमन्यत्रापि, तथा चक्षुरिव चक्षुः–विशिष्ट आत्मधर्मस्तत्त्वावबोधनिबन्धनं श्रद्धास्वभावः, श्रद्धाविहीनस्याचक्षुष्मत इव तत्त्वदर्शनायोगात्, तद्ददातीति चक्षुर्दास्तेभ्यः, तथा मार्गो-विशिष्टगुणस्थाना-वाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषस्तं ददतीति मार्गदास्तेभ्यः, तथा शरणं–संसारकान्तारगतानामतिप्रबलरागादिपीडितानां समाश्वसनस्थानकल्पं तत्त्वचिन्तारूपमध्यवसानं, तद्ददतीति शरणदास्तेभ्यः, तथा बोधिः–जिनप्रणीतधर्मप्राप्तिस्तां तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनरूपां ददतीति बोधिदास्तेभ्यः, तथा धर्मं–चारित्ररूपं ददतीति धर्मदास्तेभ्यः कथं धर्म्मदाः? इत्याह–धर्मं दिशन्तीति धर्म्मदेशकास्तेभ्यः, तथा धर्म्मस्य नायकाः–स्वामिनस्तद्वशीकरणात्तत्फलपरिभोगाच्च धर्मनायकास्तेभ्यः, धर्म्मस्य सारथय इव सम्यक् प्रवर्त्तनयोगेन धर्मसारथयस्तेभ्यः, तथा धर्म एव वरं–प्रधानं चतुरन्तहेतुत्वात्

चतुरन्तं २ चक्रमिव चतुरन्तचक्रं तेन वर्त्तितुं शीलं येषां ते धर्म्मवरचतुरन्तचक्रवर्त्तिनस्तेभ्यः, तथाऽप्रतिहते-अप्रतिस्खलिते क्षायिकत्वाद् वरे-प्रधाने ज्ञानदर्शने धरन्तीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, तथा छादयति-आवरयतीति छद्म-घातिकर्म्मचतुष्टयं व्यावृत्तम्-अपगतं छद्म येभ्यस्ते व्यावृत्तछद्मानस्तेभ्यः, तथा राग-द्वेष-कषायेन्द्रियपरीषहोपसर्ग-घातिकर्म्मशत्रून् जितवन्तो जिनाः, अन्यान् जापयन्तीति जापकास्तेभ्यो जिनेभ्यो जापकेभ्यः, तथा भवार्णवं स्वयं तीर्णा अन्यांश्च तारयन्तीति तीर्णास्तारकास्तेभ्यः, तथा केवलवेदसा अवगततत्त्वा बुद्धा अन्यांश्च बोधयन्तीति बोधकास्तेभ्यः, मुक्ताः-कृतकृत्या निष्ठितार्था इति भावः, अन्यांश्च मोचयन्तीति मोचकास्तेभ्यः, सर्वज्ञेभ्यः, सर्वदर्शिभ्यः, शिवं-सर्वोपद्रवरहितत्वात्, 'अचलं' स्वाभाविकप्रायोगिकचलनक्रियाव्यपोहात्, 'अरुजं' शरीर-मनसोरभावेनाऽऽधि-व्याध्यसम्भवात्, अनन्तं-केवलात्मनाऽनन्तत्वात्, 'अक्षयं' विनाशकारणाभावाद्, 'अव्याबाधं' केनापि विबाधयितुमशक्यत्वात्, न पुनरावृत्तिर्यस्मात्तदपुनरावृत्ति, सिध्यन्ति-निष्ठितार्था भवन्त्यस्यामिति सिद्धिः-लोकान्तक्षेत्रलक्षणा सैव गम्यमानत्वाद् गतिः सिद्धिगतिः २ रिति नामधेयं यस्य तत्सिद्धिगतिनामधेयं, तिष्ठत्यस्मिन्निति स्थानं-व्यवहारतः सिद्धक्षेत्रं निश्चयतो यथाऽवस्थितं स्वं स्वरूपं, स्थान-स्थानिनोरभेदोपचारात्तु **सिद्धिगतिनामधेयं [स्थानं] तत्संप्राप्तेभ्यः**। एवं प्रणिपातदण्डकं पठित्वा **'वंदइ नमंसइ'** इति वन्दते-ताः प्रतिमाश्चैत्यवन्दनविधिना प्रसिद्धेन, नमस्करोति-पश्चात्प्रणिधानादियोगेनेत्येके, अन्ये त्वभिदधति-विरतिमतामेव प्रसिद्धश्चैत्यवन्दनविधिरन्येषां तथाऽभ्युपगमे कायोत्सर्गासिद्धेरिति वन्दते सामान्येन, नमस्करोत्याशयवृद्धेरुत्थाननमस्कारेणेति, तत्त्वमत्र भगवन्तः परमर्षयः केवलिनो विदन्ति, ततो **वन्दित्वा नमस्यित्वा** ।। ४५७-B।।

(४५८-४६०) जेणेव सिद्धायतणस्स बहुमज्झदेसभाए तेणेव उवागच्छति, २ त्ता दिव्वाए उदगधाराए अब्भुक्खति, २ त्ता सरसेणं गोसीसचंदणेणं पंचंगुलितलेणं मंडलं आलिहति,२ त्ता चच्चए दलयति, चच्चए दलयित्ता कयग्गाहग्गहियकरतलपब्भट्ठविप्पमुक्केणं दसद्धवण्णेणं कुसुमेणं मुक्कपुप्फपुंजोवयारकलियं करेति, २ त्ता धूवं दलयति, २ त्ता।।४५८।। (४५९) जेणेव सिद्धायतणस्स दाहिणिल्ले दारे तेणेव उवागच्छति, २ त्ता लोमहत्थयं गेण्हइ,२ त्ता दारचेडीओ य सालिभंजियाओ य वालरूवए य लोमहत्थएणं

पमज्जति, २ त्ता बहुमज्झदेसभाए सरसेणं गोसीसचंदणेणं [१]पंचंगुलितलं अणुलिंपति, २ त्ता चच्चए दलयति, २ त्ता पुप्फारुहणं जाव आहरणारुहणं करेति, २ त्ता आसत्तोसत्त-विपुल जाव मल्लदामकलावं करेति, २ त्ता कयग्गाहग्गहित जाव पुंजोवयारकलितं करेति, २ त्ता धूवं दलयति, २ त्ता ।।४५९।। (४६०) जेणेव मुहमंडवस्स बहुमज्झदेस-भाए तेणेव उवागच्छति, २ त्ता बहुमज्झदेसभाए लोमहत्थेणं पमज्जति, २ दिव्वाए उदगधाराए अब्भुक्खेति, २ त्ता सरसेणं गोसीसचंदणेणं पंचंगुलितलेणं मंडलगं आलिहति, २ त्ता चच्चए दलयति, २ त्ता कयग्गाह जाव धूवं दलयति २ त्ता।। ४५८-४६०।।

यत्रैव सिद्धायतनस्य बहुमध्यदेशभागस्तत्रैवोपागच्छति, उपागत्य बहुमध्यदेशभागं **दिव्ययोदकधारया 'अभ्युक्षति'** अभिमुखं सिञ्चति, **अभ्युक्ष्य सरसेन गोशीर्षचन्दनेन पञ्चाङ्गुलितलं ददाति, दत्त्वा कचग्राहगृहीतेन करतलप्रभ्रष्टविमुक्तेन दशार्द्धवर्णेन 'कुसुमेन'** कुसुमजातेन **पुष्पपुञ्जोपचारकलितं करोति, कृत्वा धूपं ददाति, दत्त्वा च यत्रैव दाक्षिणात्यं द्वारं तत्रैवोपागच्छति, उपागत्य लोमहस्तकं गृह्णाति, गृहीत्वा** तेन **द्वारशाखा-शालभञ्जिका-व्यालरूपकाणि** च **प्रमार्जयति, प्रमृज्य** दिव्ययोदकधारयाऽभ्युक्षणं गोशीर्षचन्दनचर्चां पुष्पाद्यारोपणं धूपदानं करोति, ततो दक्षिणद्वारेण निर्गत्य **यत्रैव** दाक्षिणात्यस्य **मुखमण्डपस्य बहुमध्यदेशभागस्तत्रोपागच्छति, उपागत्य लोमहस्तकं परामृशति, परामृश्य** च बहुमध्यदेशभागं **लोमहस्तकेन प्रमार्जयति, प्रमृज्य दिव्ययोदकधारयाऽभ्युक्षणं सरसेन गोशीर्षचन्दनेन पञ्चाङ्गुलितलं मण्डलमालिखति, कचग्राहगृहीतेन** करतलप्रभ्रष्टविमुक्तेन दशार्द्धवर्णेन कुसुमेन **पुष्पपुञ्जोपचारकलितं करोति,** कृत्वा **धूपं ददाति, दत्त्वा** च ।। ४५८-४६०।।

(४६१-४६४) जेणेव मुहमंडवगस्स पच्चत्थिमिल्ले दारे तेणेव उवा०, लोमहत्थगं गेण्हति, २ त्ता दारचेडीओ य सालिभंजियाओ य वालरूवए य लोमहत्थगेण पमज्जति, २ त्ता दिव्वाए उदगधाराए अब्भुक्खेति, २ त्ता सरसेणं गोसीसचंदणेणं जाव चच्चए दलयति, २ त्ता आसत्तोसत्त० कयग्गाह० धूवं दलयति २ त्ता ।। ४६१।। (४६२)

---

१. जे.V। पंचगुलितलेणं - **क ख ग ट त्रि मु.** ।।

जेणेव मुहमंडवगस्स उत्तरिल्ला णं खंभपंती तेणेव उवागच्छइ, २ त्ता लोमहत्थगं परा० सालभंजियाओ दिव्वाए उदगधाराए सरसेणं गोसीसचंदणेणं पुप्फारुहणं जाव आसत्तोसत्त० कयग्गाह० धूवं दलयति ।। ४६२।। (४६३) जेणेव मुहमंडवस्स पुरत्थिमिल्ले दारे तं चेव सव्वं भाणियव्वं जाव दारस्स अच्चणिया ।। ४६३।। (४६४) जेणेव दाहिणिल्ले दारे तं चेव ।। ४६४।।

यत्रैवं दाक्षिणात्यस्य **मुखमण्डपस्य पश्चिमं द्वारं तत्रोपागच्छति, उपागत्य लोमहस्तपरामर्शनं,** तेन च लोमहस्तकेन **द्वारशाखा-शालभञ्जिका-व्यालरूपकप्रमार्जनं, उदकधारयाऽभ्युक्षणं गोशीर्षचन्दनचर्चां** पुष्पाद्यारोपणं **धूपदानं करोति,** कृत्वा **यत्रैव** दाक्षिणात्यस्य **मुखमण्डपस्योत्तरद्वारं तत्रोपागच्छति, उपागत्य** पूर्ववद् द्वारार्चनिकां करोति, कृत्वा च **यत्रैव** दाक्षिणात्यस्य **मुखमण्डपस्य पूर्वद्वारं** तत्रोपागच्छति, उपागत्य **पूर्ववत्तत्राप्यर्चनिकां** करोति, कृत्वा च दाक्षिणात्यस्य मुखमण्डपस्य यत्रैव **दाक्षिणात्यं द्वारं** तत्रोपागच्छति, उपागत्य पूर्ववत्तत्र पूजां विधाय तेन द्वारेण विनिर्गत्य यत्रैव दाक्षिणात्यः प्रेक्षागृहमण्डपो ।।४६१-४६४।।

(४६५-४७०) जेणेव पेच्छाघरमंडवस्स बहुमज्झदेसभाए जेणेव वइरामए अक्खाडए जेणेव मणिपेढिया जेणेव सीहासणे तेणेव उवागच्छति, २ त्ता लोमहत्थगं गिण्हति, लोमहत्थगं गिण्हित्ता अक्खाडगं च सीहासणं च लोमहत्थगेण पमज्जति, २ त्ता दिव्वाए उदगधाराए अब्भु० पुप्फारुहणं जाव धूवं दलयति ।।४६५।। (४६६-४६९) जेणेव पेच्छाघरमंडवपच्चत्थिमिल्ले दारे दारच्चणिया उत्तरिल्ला खंभपंती तहेव पुरत्थिमिल्ले दारे तहेव जेणेव दाहिणिल्ले दारे तहेव ।।४६६-४६९।।(४७०) जेणेव चेतियथूभे तेणेव उवागच्छति,२ त्ता लोमहत्थगं गेण्हति,२ त्ता चेतियथूभं लोमहत्थएणं पमज्जति,२ त्ता दिव्वाए दग० सरसेण० पुप्फारुहणं आसत्तोसत्त जाव धूवं दलयति, २ त्ता।।४६५-४७०।।

यत्रैव दाक्षिणात्यस्य **प्रेक्षागृहमण्डपस्य बहुमध्यदेशभागो यत्रैव वज्रमयोऽक्षपाटको यत्रैव च मणिपीठिका यत्रैव च सिंहासनं तत्रैवोपागच्छति, उपागत्य लोमहस्तकं परामृशति,** परामृश्याक्षपाटकं मणिपीठिकां **सिंहासनं च प्रमार्जयति,** प्रमार्ज्योदकधारयाऽभ्युक्ष्य चन्दनचर्चां

पुष्पपूजां धूपदानं च करोति, कृत्वा च **यत्रैव दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्योत्तरद्वारं** तत्रैवोपागच्छति, उपागत्य पूर्ववद् **द्वारार्चनिकां** करोति, कृत्वा यत्रैव दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्य **पूर्वद्वारं** तत्रोपागच्छति, उपागत्य पूर्वद्वारार्चनिकां करोति, कृत्वा यत्रैव तस्य दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्य दाक्षिणात्यं द्वारं तत्रोपागच्छति, उपागत्य तत्रार्चनिकां कृत्वा **यत्रैव** दाक्षिणात्य**श्चैत्यस्तम्भः(स्तूप)-स्तत्रोपागच्छति, उपागत्य स्तूपं** मणिपीठिकां च **लोमहस्तकेन प्रमृज्य दिव्ययोदकधारयाऽभ्युक्षति, सरसगोशीर्षचन्दनचर्चां पुष्पाद्यारोहण-धूपदानादि** करोति, कृत्वा च ।। ४६५-४७०।।

(४७१-४७४) जेणेव पच्चत्थिमिल्ला मणिपेढिया जेणेव पच्चत्थिमिल्ला जिणपडिमा तेणेव उवागच्छति, जिणपडिमाए आलोए पणामं करेइ, २ त्ता लोमहत्थगं गेण्हति, २ त्ता तं चेव सव्वं जं जिणपडिमाणं जाव सिद्धिगइनामधेज्जं ठाणं संपत्ताणं वंदति णमंसति, एवं उत्तरिल्लाएवि, एवं पुरत्थिमिल्लाएवि, एवं दाहिणिल्लाएवि।। ४७१-४७४।।

यत्रैव पाश्चात्या मणिपीठिका यत्रैव च पाश्चात्या **जिनप्रतिमा तत्रोपागच्छति,** उपागत्य **जिनप्रतिमाया आलोके प्रणामं करोती**त्यादि पूर्ववद् याव**न्नमस्यित्वा** यत्रैवो**त्तरा** जिनप्रतिमा तत्रोपागच्छति, उपागत्य तत्रापि यावन्नमस्यित्वा यत्रैव **पूर्वा** जिनप्रतिमा तत्रोपागच्छति उपागत्य पूर्ववद् यावन्नमस्यित्वा यत्रैव **दाक्षिणात्या** जिनप्रतिमा पूर्ववत् सर्वं तदेव यावन्नमस्यित्वा ।। ४७१-४७४।।

(४७५-A) जेणेव चेइयरुक्खा दारविही य मणिपेढिया जेणेव महिंदज्झए दारविही, जेणेव दाहिणिल्ला नंदापुक्खरणी तेणेव उवा०,लोमहत्थगं गेण्हति, चेतियाओ य तिसोपाणपडिरूवए य तोरणे य सालभंजियाओ य वालरूवए य लोमहत्थएण पमज्जति, २ त्ता दिव्वाए उदगधाराए सिंचति, सरसेणं गोसीसचंदणेणं अणुलिंपति, २ त्ता पुप्फारुहणं जाव धूवं दलयति, २ त्ता सिद्धायतणं अणुप्पयाहिणं करेमाणे जेणेव उत्तरिल्ला णंदापुक्खरिणी तेणेव उवागच्छति, २ त्ता तहेव महिंदज्झया चेतियरुक्खो चेतियथूभे पच्चत्थिमिल्ला मणिपेढिया जिणपडिमा उत्तरिल्ला पुरत्थिमिल्ला दक्खिणिल्ला पेच्छाघरमंडवस्सवि तहेव जहा दक्खिणिल्लस्स पच्चत्थिमिल्ले दारे जाव दक्खिणिल्ला

णं खंभपंती मुहमंडवस्सवि तिण्हं दाराणं अच्चणिया भणिऊणं दक्खिणिल्ला णं खंभपंती उत्तरे दारे पुरच्छिमे दारे सेसं तेणेव कमेण जाव पुरत्थिमिल्ला णंदापुक्खरिणी जेणेव सभा सुधम्मा तेणेव पहारेत्थ गमणाए। तते णं तस्स विजयस्स चत्तारि सामाणियसाहस्सीओ एयप्पभितिं जाव सव्विड्ढीए जाव णाइयरवेणं जेणेव सभा सुहम्मा तेणेव उवागच्छंति, २ त्ता ।। ४७५-A।।

यत्रैव दाक्षिणात्य**श्चैत्यवृक्ष**स्तत्रोपागच्छति, उपागत्य पूर्ववदर्चनिकां करोति, कृत्वा च यत्रैव **महेन्द्रध्वज**स्तत्रोपागच्छति, उपागत्य पूर्ववदर्चनिकां विधाय **यत्रैव दाक्षिणात्या नन्दापुष्करिणी तत्रैवोपागच्छति, उपागत्य लोमहस्तकं परामृशति,** परामृश्य **तोरणानि त्रिसोपानप्रतिरूपकाणि शालभञ्जिका-व्यालरूपकाणि** च **प्रमार्जयति, प्रमार्ज्य दिव्ययोदकधारया सिञ्चति,** सिक्त्वा **सरसगोशीर्षचन्दन**पञ्चाङ्गुलितलप्रदान-**पुष्पाद्यारोहण-धूपदानादि करोति,** कृत्वा च **सिद्धायतनमनुप्रदक्षिणीकृत्य यत्रैवोत्तरा नन्दापुष्करिणी स तत्रोपागच्छति, उपागत्य** पूर्ववत्सर्वं करोति, कृत्वा **चौत्तराहे माहेन्द्रध्वजे** तदनन्तरमौत्तराहे **चैत्यवृक्षे** तत औत्तराहे **चैत्यस्तूपे,** ततः **पश्चिमोत्तरपूर्वदक्षिण**जिनप्रतिमासु पूर्ववत्सर्वा वक्तव्यता वक्तव्या, तदनन्तरमौत्तराहे प्रेक्षागृहमण्डपे समागच्छति, तत्र दाक्षिणात्ये प्रेक्षागृहमण्डपे पूर्ववत्सर्वं वक्तव्यं, तत उत्तरद्वारेण विनिर्गत्यौत्तराहे मुखमण्डपे समागच्छति, तत्रापि दाक्षिणात्यमुखमण्डपवत्सर्वं कृत्वोत्तरद्वारेण विनिर्गत्य सिद्धायतनस्य पूर्वद्वारे समागच्छति, तत्रार्चनिकां पूर्ववत्कृत्वा पूर्वस्य मुखमण्डपस्य दक्षिणोत्तरपूर्वद्वारेषु क्रमेणोक्तरूपां पूजां विधाय पूर्वद्वारेण विनिर्गत्य पूर्वप्रेक्षामण्डपे समागत्य पूर्ववदर्चनिकां करोति, ततः पूर्वप्रकारेणैव क्रमेण चैत्यस्तूपजिनप्रतिमाचैत्यवृक्षमाहेन्द्रध्वजनन्दापुष्करिणीनाम् ।।४७५-A।।

(४७५-B) तं णं सभं सुधम्मं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमिल्लेणं अणुपविसति, २ त्ता जेवेण मणिपेढिया तेणेव उवागच्छति, २ त्ता आलोए जिणसकहाणं पणामं करेति, २ त्ता जेणेव माणवचेतियक्खंभे जेणेव वइरामया गोलवट्टसमुग्गका तेणेव उवागच्छति, २ त्ता लोमहत्थयं गेण्हति, २ त्ता वइरामए गोलवट्टसमुग्गए लोमहत्थएण पमज्जइ, २ त्ता वइरामए गोलवट्टसमुग्गए विहाडेति, २ त्ता जिणसकहाओ लोमहत्थएणं

पमज्जति, २ त्ता सुरभिणा गंधोदएणं तिसत्तखुत्तो जिणसकहाओ पक्खालेति, २ त्ता सरसेणं गोसीसचंदणेणं अणुलिंपइ, २ त्ता अग्गेहिं वरेहिं गंधेहिं मल्लेहि य अच्चिणति, २ त्ता धूवं दलयति, २ त्ता वइरामएसु गोलवट्टसमुग्गएसु पडिणिक्खिवति, २ त्ता माणवकं चेतियखंभं लोमहत्थएणं पमज्जति, २ त्ता दिव्वाए उदगधाराए अब्भुक्खेइ, २ त्ता सरसेणं गोसीसचंदणेणं चच्चए दलयति, २ त्ता पुप्फारुहणं जाव आसत्तोसत्त० कयग्गाह० धूवं दलयति, २ त्ता जेणेव सभाए सुधम्माए बहुमज्झदेसभाए तं चेव जेणेव सीहासणे तेणेव जहा दारच्चणिता जेणेव देवसयणिज्जे तं चेव जेणेव खुड्डागे महिंदज्झए तं चेव जेणेव पहरणकोसे चोप्पाले तेणेव उवागच्छति, २ त्ता पत्तेयं २ पहरणाइं लोमहत्थएणं पमज्जति, पमज्जित्ता सरसेणं गोसीसचंदणेणं तहेव सव्वं सेसंपि दक्खिणदारं आदिकाउं तहेव णेयव्वं जाव पुरत्थिमिल्ला णंदापुक्खरिणी सव्वाणं सभाणं जहा सुधम्माए सभाए तहा अच्चणिया उववायसभाए णवरि देवसयणिज्जस्स अच्चणिया सेसासु सीहासणाण अच्चणिया हरयस्स जहा णंदाए पुक्खरिणीए अच्चणिया ।।४७५-B।।

ततः सभायां सुधर्मायां पूर्वद्वारेण **प्रविशति, प्रविश्य यत्रैव मणिपीठिका तत्रैवोपागच्छति, उपागत्यालोके जिनसक्थ्नां प्रणामं करोति, कृत्वा** च **यत्र माणवकश्चैत्यस्तम्भो यत्र वज्रमया गोलवृत्ताः समुद्गकास्तत्रागत्य समुद्गकान् गृह्णाति, गृहीत्वा च विघाटयति, विघाट्य लोमहस्तकेन प्रमार्जयति, प्रमार्ज्यो**दकधारयाऽभ्युक्षति, अभ्युक्ष्य **गोशीर्षचन्दनेनानुलिम्पति,** ततः **प्रधानैर्गन्ध-माल्यैरर्चयति, अर्चयित्वा धूपं दहति,** तदनन्तरं भूयोऽपि **वज्रमयेषु गोलवृत्तसमुद्गकेषु प्रक्षिपति, प्रक्षिप्य** तान् वज्रमयान् गोलवृत्तसमुद्गकान् स्वस्थाने **प्रतिनिक्षिपति,** प्रतिनिक्षिप्य तेषु पुष्प-गन्ध-माल्य-वस्त्राभरणान्यारोपयति, ततो **लोमहस्तकेन माणवकचैत्यस्तम्भं प्रमार्ज्योदक-धारयाऽभ्युक्ष्य चन्दनचर्चां पुष्पाद्यारोपणं धूपदानं च करोति,** कृत्वा सिंहासनप्रदेशे समागत्य **सिंहासनस्य** लोमहस्तकेन प्रमार्जनादिरूपां पूर्ववदर्चनिकां करोति, कृत्वा यत्र मणिपीठिका यत्र च **देवशयनीयं** तत्रोपागत्य मणिपीठिकाया देवशयनीयस्य च प्राग्वदर्चनिकां करोति, तत उक्तप्रकारेणैव क्षुल्लकेन्द्रध्वज**पूजां** करोति, कृत्वा च यत्र **चोप्पालको** नाम **प्रहरणकोशस्तत्र समागत्य लोमहस्तेन** परिघरत्नप्रमुखाणि प्रहरणरत्नानि **प्रमार्जयति, प्रमार्ज्यो**दकधारयाऽभ्युक्षणं **चन्दनचर्चां** पुष्पाद्यारोपणं

धूपदानं करोति, कृत्वा सभायाः सुधर्मायाः बहुमध्यदेशभागेऽर्चनिकां पूर्ववत्करोति, कृत्वा सभायाः सुधर्मायाः दक्षिणद्वारे समागत्यार्चनिकां पूर्ववत्करोति, ततो दक्षिणद्वारे विनिर्गच्छति, इत ऊर्ध्वं यथैव सिद्धायतनान्निष्क्रामतो दक्षिणद्वारादिका दक्षिणनन्दापुष्करिणीपर्यवसाना पुनरपि प्रविशत उत्तरनन्दापुष्करिणीप्रभृतिका उत्तरान्ता ततो द्वितीयं वारं निष्क्रामतः पूर्वद्वारादिका पूर्वनन्दापुष्करिणी पर्यवसानार्चनिका वक्तव्या तथैव सुधर्मायाः सभाया अप्यन्यूनातिरिक्ता द्रष्टव्या, ततः पूर्वनन्दापुष्करिण्या **अर्चनिकां** कृत्वो**पपातसभां** पूर्वद्वारेण प्रविशति, प्रविश्य च मणिपीठिकाया **देवशयनीयस्य** तदनन्तरं बहुमध्यदेशभागे प्राग्वदर्चनिकां विदधाति, ततो दक्षिणद्वारेण समागत्य तस्यार्चनिकां कुरुते, अत ऊर्ध्वमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या। ततः पूर्वनन्दापुष्करिणी-तोऽपक्रम्य **ह्रदे** समागत्य पूर्ववत्तोरणा**र्चनिकां** करोति, कृत्वा पूर्वद्वारेणाभिषेकसभायां प्रविशति, प्रविश्य मणिपीठिकायाः **सिंहासनस्या**भिषेकभाण्डस्य बहुमध्यदेशभागस्य च पूर्ववद**र्चनिकां** क्रमेण करोति, तदनन्तरमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या।।४७५-B।।

(४७६-५५७) ववसायसभाए पोत्थयरयणं लोम० दिव्वाए उदगधाराए सरसेणं गोसीसचंदणेणं अणुलिंपति, अग्गेहिं वरेहिं गंधेहि य मल्लेहि य अच्चिणति, २ त्ता मल्लेहि सीहासणे लोमहत्थएणं पमज्जति, जाव धूवं दलयति, सेसं तं चेव णंदाए जहा हरयस्स तहा जेणेव बलिपीढं तेणेव उवागच्छति, २ त्ता अभिओगे देवे सद्दावेति, २ त्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया! विजयाए रायहाणीए सिंघाडगेसु य तिएसु य चउक्केसु य चच्चरेसु य चतुमुहेसु य महापहपहेसु य पासाएसु य पागारेसु य अट्टालएसु य चरियासु य दारेसु य गोपुरेसु य तोरणेसु य वावीसु य पुक्खरिणीसु य जाव बिलपंतिगासु य आरामेसु य उज्जाणेसु य काणणेसु य वणेसु य वणसंडेसु य वणराईसु य अच्चणियं करेह, करेत्ता ममेयमाणत्तियं खिप्पामेव पच्चप्पिणह। तए णं ते आभिओगिया देवा विजएणं देवेणं एवं वुत्ता समाणा जाव हट्ठतुट्ठा विणएणं पडिसुणेंति, २ त्ता विजयाए रायहाणीए सिंघाडगेसु य जाव अच्चणियं करेत्ता जेणेव विजए देवे तेणेव उवागच्छन्ति,

२ त्ता एयमाणत्तियं पच्चप्पिणंति। तए णं से विजए देवे तेसि णं आभिओगियाणं देवाणं अंतिए एयमट्ठं सोच्चा णिसम्म हट्ठतुट्ठचित्तमाणंदिय जाव हयहियए जेणेव णंदापुक्खरिणी तेणेव उवागच्छति, २ त्ता पुरत्थिमिल्लेणं तोरणेणं जाव हत्थपायं पक्खालेति, २ त्ता आयंते चोक्खे परमसुइभूए णंदापुक्खरिणीओ पच्चुत्तरति, २ त्ता जेणेव सभा सुधम्मा तेणेव पहारेत्थ गमणाए। तए णं से विजए देवे चउहिं सामाणियसाहस्सीहिं जाव सोलसहिं आयरक्खदेवसाहस्सीहिं सव्विड्ढीए जाव निग्घोसनाइयरवेणं जेणेव सभा सुधम्मा तेणेव उवागच्छति, २ त्ता सभं सुधम्मं पुरत्थिमिल्लेणं दारेणं अणुपविसति, २ त्ता जेणेव मणिपेढिया तेणेव उवागच्छति, २ त्ता सीहासणवरगते पुरत्थाभिमुहे सण्णिसण्णे।। ४७६-५५७।।

ततः पूर्वनन्दापुष्करिणीतः पूर्वद्वारेण **व्यवसायसभां** प्रविशति प्रविश्य **पुस्तकरत्नं लोमहस्तकेन** प्रमृज्यो**दकधारयाऽ**भ्युक्ष्य **चन्दनेन** चर्चयित्वा **वरगन्धमाल्यैर**र्चयित्वा पुष्पाद्यारोपणं धूपदानं च करोति, तदनन्तरं मणिपीठिकायाः **सिंहासनस्य** बहुमध्यदेशभागस्य च क्रमेणार्चनिकां करोति, तदनन्तरमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतो **बलिपीठे** समागत्य तस्य बहुमध्यदेशभागे पूर्ववदर्चनिकां करोति, कृत्वा चोत्तरपूर्वस्यां नन्दापुष्करिण्यां समागत्य तस्यास्तोरणेषु पूर्ववदर्चनिकां कृत्वाऽऽ**भियोगिकान् देवान् शब्दयति, शब्दयित्वा एवमवादीत्-'खिप्पामेवे**'त्यादि, सुगमं यावत् **'एयमाणत्तियं पच्चप्पिणंति'** नवरं **शृङ्गाटकं**-त्रिकोणं स्थानं **त्रिकं**-यत्र रथ्यात्रयं मिलति **चतुष्कं**-चतुष्पथयुक्तं **चत्वरं**-बहुरथ्यापातस्थानं **चतुर्मुखं**-यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति **महापथो**-राजपथः शेषः सामान्यः **पन्थाः प्राकारः**-प्रतीतः **अट्टालकाः**-प्राकारस्योपरि भृत्याश्रयविशेषाः **चरिका**-अष्टहस्तप्रमाणो नगरप्राकारान्तरालमार्गः **द्वाराणि**-प्रासादादीनां **गोपुराणि**-प्राकारद्वाराणि **तोरणानि**-द्वारादिसम्बन्धीनि आगत्य रमन्तेऽत्र माधवीलतागृहादिषु दम्पत्य इति स **आरामः**-पुष्पादिसद्वृक्षसङ्कुलमुत्सवादौ बहुजनोपभोग्य**मुद्यानं**-सामान्यवृक्षवृन्दं नगरासन्नं **काननं**-नगरविप्रकृष्टं **वनम्**-एकानेकजातीयोत्तमवृक्षसमूहो **वनषण्डः**-एकजातीयोत्तमवृक्षसमूहो **वनराजी**। **'तए ण'**मित्यादि, **ततः स विजयो देवो** बलिपीठे बलिविसर्जनं करोति, कृत्वा च **यत्रैवो**त्तर**नन्दापुष्करिणी तत्रोपागच्छति, उपागत्यो**त्तरपूर्वां नन्दां पुष्करिणीं

प्रदक्षिणीकुर्वन् **पूर्वतोरणेना**नुप्रविशति, अनुप्रविश्य पूर्वत्रिसोपानप्रतिरूपकेण प्रत्यवरोहति, प्रत्यवरुह्य **हस्तपादौ प्रक्षालयति, प्रक्षाल्य नन्दापुष्करिणीतः प्रत्युत्तरति, प्रत्युत्तीर्य चतुर्भिः सामानिक-सहस्रै**श्चतसृभिरग्रमहिषीभिः सपरिवाराभिस्तिसृभिः पर्षद्भिः सप्तभिरनीकैः सप्तभिरनीकाधिपतिभिः **षोडशभिरात्मरक्षदेवसहस्रै**रन्यैश्च बहुभिर्विजयराजधानीवास्त व्यैर्वानमन्तरैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः **सर्वर्द्ध्या यावद्** दुन्दुभि**निर्घोषनादितरवेण** विजयाया राजधान्या मध्यंमध्येन **यत्रैव सभा सुधर्मा तत्रोपागच्छति, उपागत्य सभां सुधर्मां पूर्वद्वारेणानुप्रविशति, अनुप्रविश्य यत्रैव मणिपीठिका** यत्रैव सिंहासनं **तत्रैवोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः**।४५७-५५७।

(५५८-५६१) तए णं तस्स विजयस्स देवस्स चत्तारि सामाणियसाहस्सीओ अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं पत्तेयं २ पुव्वणत्थेसु भद्दासणेसु णिसीयंति ।। ५५८।।(५५९) तए णं तस्स विजयस्स देवस्स चत्तारि अग्गमहिसीओ पुरत्थिमेणं पत्तेयं २ पुव्वणत्थेसु भद्दासणेसु णिसीयंति।। ५५९।।(५६०) तए णं तस्स विजयस्स देवस्स दाहिणपुरत्थिमेणं अब्भिंतरियाए परिसाए अट्ठ देवसाहस्सीओ पत्तेयं २ जाव णिसीयंति। एवं दक्खिणेणं मज्झिमियाए परिसाए दस देवसाहस्सीओ जाव णिसीदंति । दाहिणपच्चत्थिमेणं बाहिरियाए परिसाए बारस देवसाहस्सीओ पत्तेयं २ जाव णिसीदंति।।५६०।।(५६१) तए णं तस्स विजयस्स देवस्स पच्चत्थिमेणं सत्त अणियाहिवती पत्तेयं २ जाव णिसीयंति।।५५८-५६१।।

ततस्तस्य विजयस्य देवस्यापरोत्तरेण–अपरोत्तरस्यां दिशि एव**मुत्तरस्यामुत्तरपूर्वस्यां** दिशि च **चत्वारि २ सामानिकदेवसहस्राणि** चतुर्षु **भद्रासनसहस्रेषु निषीदन्ति।। ततस्तस्य विजयस्य देवस्य पूर्वस्यां** दिशि **चतस्रोऽग्रमहिष्यश्च**तुर्षु **भद्रासनेषु निषीदन्ति। ततस्तस्य विजयस्य देवस्य दक्षिणपूर्वस्यामभ्यन्तरिकायाः पर्षदोऽष्टौ देवसहस्राणि** अष्टासु भद्रासनसहस्रेषु **निषीदन्ति**। ततस्तस्य विजयस्य देवस्य **दक्षिणस्यां** दिशि **मध्यमिकायाः पर्षदो दश देवसहस्राणि** दशसु भद्रासनसहस्रेषु **निषीदन्ति**। ततस्तस्य विजयस्य देवस्य **पश्चिमायां** दिशि **बाह्यायाः पर्षदो द्वादश देवसहस्राणि** द्वादशसु भद्रासनसहस्रेषु **निषीदन्ति।। ततस्तस्य विजयस्य देवस्य पश्चिमायां दिशि सप्तानीकाधिपतयः** सप्तसु भद्रासनेषु **निषीदन्ति**।। ५५८-५६१।।

(५६२-५६५) तए णं तस्स विजयस्स देवस्स पुरत्थिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं सोलस आयरक्खदेवसाहस्सीओ पत्तेयं २ पुव्वणत्थेसु भद्दासणेसु णिसीदंति, तंजहा-पुरत्थिमेणं चत्तारि साहस्सीओ जाव उत्तरेणं ४।। ते णं आयरक्खा सन्नद्ध-बद्ध-वम्मियकवया उप्पीलियसरासणपट्टिया पिणद्धगेवेज्जविमलवरचिंधपट्टा गहियाउहपहरणा ति-णयाइं ति-संधीणि वइरामयकोडीणि धणूइं अभिगिज्झ परियाइयकंडकलावा णीलपाणिणो पीयपाणिणो रत्तपाणिणो चावपाणिणो चारुपाणिणो चम्मपाणिणो खग्गपाणिणो दंडपाणिणो पासपाणिणो णील-[1]पीय-रत्त-चाव-[2]चारु-चम्म-खग्ग-दंडपासवरधरा आयरक्खा रक्खोवगा गुत्ता गुत्तपालिता जुत्ता जुत्तपालिता पत्तेयं २ समयतो विणयतो किंकरभूता विव चिट्ठंति।।५६२।। (५६३) ततेणं से विजए देवे चउहिं सामाणियसाहस्सीहिं जाव सोलसहिं आतरक्खदेवसाहस्सीहिं अण्णेहि य बहुहिं विजयरायट्ठाणिवत्थव्वएहिं देवेहि य देवीहि य महताहतणट्ट-गीत-वाइत-तंती-तल-ताल-तुडिय जाव भुंजमाणे विहरति ।।५६३ ।। (५६४) विजयस्स णं भंते! देवस्स केवतियं कालं ठिती पण्णत्ता?, गो०! एगं पलिओवमं ठिती पण्णत्ता।।५६४।। (५६५) विजयस्स णं भंते! देवस्स सामाणियाणं देवाणं केवतियं कालं ठिती पण्णत्ता?, एगं पलिओवमं ठिती पण्णत्ता, एवंमहिड्ढीए एवंमहज्जुतीए एवंमहब्बले एवंमहायसे एवंमहासुक्खे एवंमहाणुभागे विजए देवे २।। ५६२-५६५।।

ततस्तस्य विजयस्य देवस्य सर्वतः समन्तात् सर्वासु दिक्षु सामस्त्येन **षोडश आत्मरक्षकदेवसहस्राणि** षोडशसुस भद्रासनसहस्रेषु **निषीदन्ति, तद्यथा-चत्वारि सहस्राणि** चतुर्षु भद्रासनसहस्रेषु **पूर्वस्यां दिशि,** एवं दक्षिणस्यां दिशि, एवं प्रत्येकं पश्चिमोत्तर**यो**रपि।। **ते चात्मरक्षाः सन्नद्धबद्धवर्मितकवचाः,** कवचं–तनुत्राणं वर्म–लोहमयकुतूलिकादिरूपं सञ्जातमस्मिन्निति वर्मितं सन्नद्धं–शरीरे आरोपणात् बद्धं–गाढतरबन्धनेन बन्धनात् वर्मितं कवचं यैस्ते सन्नद्धबद्धवर्मितकवचाः,

१. ०पीय - सीत-रत्त० **जे.** ।। २. ०चारुसेत्तचम्म० **जे** ।। ३. **सूत्र ५६३ ता. प्रतावेव वर्तते** ।।

'उप्पीलियसरासणपट्टिया' इति उत्पीडिता–गाढीकृता शरा अस्यन्ते–क्षिप्यन्तेऽस्मिन्निति शरासनः–इषुधिस्तस्य पट्टिका यैरुत्पीडितशरासनपट्टिकाः **'पिणद्धगेवेज्जविमल-वरचिंधपट्टा'** इति पिनद्धं ग्रैवेयं–ग्रीवाभरणं विमलवरचिह्नपट्टश्च यैस्ते पिनद्धवरग्रैवेयविमलवरचिह्नपट्टाः **'गहियाउहपहरणा'** इति आयुध्यतेऽनेनेत्यायुधं–खेटकादि प्रहरणम्–असिकुन्तादि, गृहीतानि आयुधानि प्रहरणानि च यैस्ते गृहीतायुधप्रहरणाः **'त्रिनतानि'** आदिमध्यावसानेषु नमनभावात्, **'त्रिसन्धीनि'** आदिमध्यावसानेषु सन्धिभावात्, **वज्रमयकोटीनि धनूंषि अभिगृह्य 'परियाइयकंडकलावा'** इति पर्याप्तकाण्डकलापा विचित्रकाण्डकलापयोगात्, केचित् **'नीलपाणय'** इति नीलः काण्डकलाप इति गम्यते पाणौ येषां ते नीलपाणयः, एवं **पीतपाणयः रक्तपाणयः,** चापं पाणौ येषां ते **चापपाणयः,** चारुः–प्रहरणविशेषः पाणौ येषां ते **चारुपाणयः,** चर्म–अङ्गुष्ठाङ्गुल्योराच्छादनरूपं पाणौ येषां ते **चर्मपाणयः,** एवं **दण्डपाणयः खड्गपाणयः पाशपाणयः,** एतदेव व्याचष्टे–यथायोगं **नील-पीत-रक्त-चाप-चारु-चर्म-दण्ड(खड्ग)-पाशधरा आत्मरक्षाः,** रक्षामुपगच्छन्ति–तदेकचित्ततया तत्परायणा वर्त्तन्त इति **रक्षोपगाः 'गुप्ताः'** न स्वामिभेदकारिणः, तथा गुप्ता–पराप्रवेश्या पालिः–सेतुर्येषां ते **गुप्तपालिकाः,** तथा **'युक्ताः'** सेवकगुणोपेततयोचिताः, तथा युक्ता–परस्परं बद्धा न तु बृहदन्तराला पालिर्येषां ते **युक्तपालिकाः, प्रत्येकं प्रत्येकं समयतः**—आचारत आचारेणेत्यर्थः **विनयतश्च किङ्करभूता इव तिष्ठन्ति,** न खलु ते किङ्कराः, किन्तु तेऽपि मान्याः, तेषामपि पृथगासननिपातनात्, केवलं ते तदानीं निजाचारपरिपालनतो विनीतत्वेन च तथाभूता इव तिष्ठन्ति तदुक्तं किङ्करभूता इवेति।। **'तए णं से विजए'** इत्यादि, सुप्रतीतं यावद्विजयदेववक्तव्यतापरिसमाप्तिः।।५५८-५६५।।

तदेवमुक्ता विजयद्वारवक्तव्यता, सम्प्रति वैजयन्तद्वारवक्तव्यतामभिधित्सुराह–

(५६६) कहि णं भंते! जंबुद्दीवस्स २ वेजयंते णामं दारे पण्णत्ते?, गोयमा! जंबुद्दीवे २ मंदरस्स पव्वयस्स दक्खिणेणं पणयालीसं जोयणसहस्साइं अबाधाए जंबुद्दीवदीवदाहिणपेरंते लवणसमुद्ददाहिणद्धस्स उत्तरेणं, एत्थ णं जंबुद्दीवस्स २ वेजयंते णामं दारे पण्णत्ते, अट्ठ जोयणाइं उड्ढं उच्चत्तेणं सच्चेव सव्वा वत्तव्वता जाव[1] णिच्चे।।५६६।। (५६७) कहि णं भंते!० रायहाणी?, दाहिणे णं जाव[2]

१-२. द्र. ३।२९९-३५० । जाव दारे- V।

वेजयंते देवे २।।५६७।। (५६८) कहि णं भंते! जंबुद्दीवस्स २ जयंते णाम दारे पण्णत्ते?, गोयमा! जंबुद्दीवे २ मंदरस्स पव्वयस्स पच्चत्थिमेणं पणयालीसं जोयणसहस्साइं जंबुद्दीवे २ पच्चत्थिमपेरंते लवणसमुद्दपच्चत्थिमद्धस्स पुरत्थिमेणं सीओदाए महाणदीए उप्पिं, एत्थ णं जंबुद्दीवस्स २ जयंते णामं दारे पण्णत्ते, तं चेव से पमाणं जयंते देवे पच्चत्थिमेणं से रायहाणी जाव एमहिड्ढीए।।५६८।। (५६९) कहि णं भंते! जंबुद्दीवस्स २ अपराइए णामं दारे पण्णत्ते?, गोयमा! मंदरस्स उत्तरेणं पणयालीसं जोयणसहस्साइं अबाहाए जंबुद्दीवे २ उत्तरपेरंते लवणसमुद्दस्स उत्तरद्धस्स दाहिणेणं, एत्थ णं जंबुद्दीवे २ अपराइए णामं दारे पण्णत्ते, तं चेव पमाणं, रायहाणी उत्तरेणं जाव अपराइए देवे, चउण्हवि अण्णंमि जंबुद्दीवे ।।५६६-५६९।।

'कहि णं भंते' इत्यादि, सर्वं पूर्ववत्, नवरमत्र वैजयन्तस्य द्वारस्य दक्षिणतस्तिर्यगसङ्ख्येयान् द्वीप-समुद्रान् व्यतिक्रम्येति वक्तव्यं, शेषं प्राग्वत्।। एवं जयन्तापराजितद्वारवक्तव्यताऽपि वाच्या, नवरं जयन्तद्वारस्य पश्चिमायां दिशि, अपराजितद्वारस्योत्तरतस्तिर्यगसङ्ख्येयान् द्वीप-समुद्रान् व्यतिव्रज्येति वाच्यम्।।५६६-५६९।।

सम्प्रति विजयादिद्वाराणां परस्परमन्तरं प्रतिपिपादयिषुरिदमाह–

(५७०) जंबुद्दीवस्स णं भंते! दीवस्स दारस्स य दारस्स य एस णं केवतियं अबाधाए अंतरे पण्णत्ते?, गोयमा! अउणासीतिं जोयणसहस्साइं बावण्णं च जोयणाइं देसूणं च अद्धजोयणं दारस्स य २ अबाधाए अंतरे पण्णत्ते।। ५७०।।

'जंबुद्दीवस्स ण'मित्यादि, **जम्बूद्वीपस्य ण**मिति प्राग्वत् **भदन्त! द्वीपस्य** सम्बन्धिनो **द्वारस्य च द्वारस्य चैतत् कियत्प्रमाणाबाधया-**अन्तरित्वा प्रतिघातेनान्तरं **प्रज्ञप्तम्?,** भगवानाह–**गौतम! एकोनाशीतियोजनसहस्राणि द्विपञ्चाशद् योजनानि देशोनं चार्द्धयोजनं द्वारस्य च द्वारस्य चाबाधयाऽन्तरं प्रज्ञप्तं,** तथाहि–चतुर्णामपि द्वाराणां प्रत्येकमेकैकस्य कुड्यस्य द्वारशाखापरपर्यायस्य बाहल्यं गव्यूतं द्वाराणां च विस्तारः प्रत्येकं २ चत्वारि २ योजनानि, ततश्चतुर्ष्वपि द्वारेषु सर्वसङ्ख्यया

कुड्यद्वारप्रमाणमष्टादश योजनानि, जम्बूद्वीपस्य च परिधिस्तिस्रो लक्षाः षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके ३१६२२७ क्रोशत्रयम् ३ अष्टाविंशं धनुःशतं १२८ त्रयोदशाङ्गुलानि एकमर्धाङ्गुल १३।। मिति, अस्माच्च जम्बूद्वीपपरिधेः सकाशात्तानि कुड्यद्वारपरिमाणभूतान्यष्टादश योजनानि शोध्यन्ते, शोधितेषु च तेषु परिधिसत्को योजनराशिरेवंरूपो जातः–तिस्रो लक्षाः षोडश सहस्राणि द्वे शते नवोत्तरे ३१६२०९, शेषं तथैव, ततो योजनराशेश्चतुर्भिर्भागो ह्रियते, लब्धानि योजनानामेकोनाशीतिः सहस्राणि द्विपञ्चाशदधिकानि गव्यूतं चैकं ७९०५२ क्रो० १। यानि च परिधिसत्कानि त्रीणि गव्यूतानि तानि धनुस्त्वेन क्रियन्ते लब्धानि धनुषां षट् सहस्राणि, यदपि च परिधिसत्कमष्टाविंशं धनुःशतं तदप्येतेषु धनुःषु मध्ये प्रक्षिप्यते, ततो जातो धनूराशिरेकषष्टिः शतान्यष्टाविंशत्यधिकानि ६१२८,एषां चतुर्भिर्भागो ह्रियते, लब्धानि धनुषां पञ्चदश शतानि द्वात्रिंशदधिकानि १५३२,यान्यपि च त्रयोदशाङ्गुलानि तेषामपि चतुर्भिर्भागो ह्रियते, लब्धानि त्रीणि अङ्गुलानि, एतदपि सर्वं देशोनमेकं गव्यूतमिति लब्धं देशोनमर्द्धयोजनं, उक्तं च–

'[1]कुड्डुदुवारपमाणं अट्ठारस जोयणाइं परिहीए।
सोहिय चउहि विभत्तं इणमो दारंतरं होइ।।१।।
[2]अउणासीइ सहस्सा बावण्णा अद्धजोयणं नूणं।
दारस्स य दारस्स य अंतरमेयं विणिद्दिट्ठं।।२।।' [ ] ।।५७०।।

(५७१) जंबुद्दीवस्स णं भंते! दीवस्स पएसा लवणं समुद्दं पुट्ठा?, हंता पुट्ठा ।५७१।

(५७२) ते णं भंते! किं जंबुद्दीवे २ लवणसमुद्दे?, गोयमा! जंबुद्दीवे दीवे नो खलु ते लवणसमुद्दे।। ५७२ ।।

'जंबूद्दीवस्स णं भंते!' इत्यादि, **जम्बूद्वीपस्य ण**मिति पूर्ववत् **भदन्त! द्वीपस्य 'प्रदेशाः'** स्वसीमागतचरमरूपा **लवणं समुद्रं 'स्पृष्टाः?'** कर्तरि क्तप्रत्ययः, स्पृष्टवन्तः, काक्वा पाठ इति प्रश्नार्थत्वावगतिः, पृच्छतश्चायमभिप्रायः–यदि स्पृष्टास्तर्हि वक्ष्यमाणं पृच्छ्यते नो चेत्तर्हि नेति भावः, भगवानाह–**हंते**त्यादि, **'हन्त'** इति प्रत्यवधारणे **स्पृष्टाः**।। एवमुक्ते भूयः पृच्छति–**'ते ण'**मित्यादि, **ते भदन्त!** स्वसीमागतचरमरूपाः प्रदेशाः **किं जम्बूद्वीपः**? किं वा **लवणसमुद्रः?**, इह यद् येन

---

१. कुड्यद्वारप्रमाणमष्टादश योजनानि परिधेः । शोधयित्वा चतुर्भिर्विभक्ते इदं द्वारान्तरं भवति ।।१।। २. एकोनाशीनिः सहस्राणि द्विपञ्चाशत् अर्द्धयोजनमूनम् द्वारस्य द्वारस्य चान्तमेतत् विनिर्द्दिष्टम्।।२।। ३-४. लवणे स० L ।

संस्पृष्टं तत्किञ्चित्तद्व्यपदेशमश्नुवानमुपलब्धं यथा–सुराष्ट्रेभ्यः सङ्क्रान्तो मगधदेशं मागध इति, किञ्चित्पुनर्न तद्व्यपदेशभाग् यथा–तर्जन्या संस्पृष्टा ज्येष्ठाऽङ्गुलिर्ज्येष्ठैवेति, इहापि च जम्बूद्वीपचरमप्रदेशा लवणसमुद्रं स्पृष्टवन्तस्ततो व्यपदेशचिन्तायां संशय इति प्रश्नः, भगवानाह– **गौतम! जम्बूद्वीप** एव णमिति निपातस्यावधारणार्थत्वात् ते चरमप्रदेशा द्वीपो, जम्बूद्वीपसीमावर्त्तित्वात्, **न खलु** ते जम्बूद्वीपचरमप्रदेशा **लवणसमुद्रः,** [न ते] जम्बूद्वीपसीमानमतिक्रम्य लवणसमुद्रसीमानमुपगताः किन्तु स्वसीमागता एव लवणसमुद्रं स्पृष्टवन्तस्तेन तटस्थतया संस्पर्शभावात् तर्जन्या संस्पृष्टा ज्येष्ठाङ्गुलिरिव ते स्वव्यपदेशं भजन्ते न व्यपदेशान्तरं, तथा चाह–नो खलु ते जम्बूद्वीपचरमप्रदेशा लवणसमुद्रः।।५७१-५७२।।

(५७३) लवणस्स णं भंते! समुद्दस्स पदेसा जंबुद्दीवं दीवं पुट्ठा?, हंता पुट्ठा ।५७३।

(५७४) ते णं भंते! किं लंवणसमुद्दे जंबुद्दीवे दीवे?, गोयमा! लवणे णं ते समुद्दे नो खलु ते जंबुद्दीवे दीवे।।५७४।।

(५७५) जंबुद्दीवे णं भंते! दीवे जीवा उद्दाइत्ता २ लवणसमुद्दे पच्चायंति?, गोयमा! अत्थेगतिया पच्चायंति, अत्थेगतिया नो पच्चायंति।। ५७५।।

(५७६) लवणे णं भंते! समुद्दे जीवा उद्दाइत्ता २ जंबुद्दीवे २ पच्चायंति?, गोयमा! अत्थेगतिया पच्चायंति, अत्थेगतिया नो पच्चायंति।। ५७३-५७६।।

एवं **'लवणस्स णं भंते! समुद्दस्स पदेसा'** इत्यादि लवणविषयमपि सूत्रं भावनीयम्।। **'जंबुद्दीवे णं भंते!'** इत्यादि, **जम्बूद्वीपे भदन्त! द्वीपे** ये **जीवास्ते 'उद्दाइत्ता'** इति **'अवद्राय** २' मृत्वा २ **लवणसमुद्रे 'प्रत्यायान्ति'** आगच्छन्ति?, भगवानाह–**गौतम!** अस्तीति निपातोऽत्र बह्वर्थः, **सन्त्येकका** जीवा ये **'अवद्रायावद्राय'** मृत्वा २ लवणसमुद्रे **प्रत्यायान्ति, सन्त्येकका** ये **न प्रत्यायान्ति,** जीवानां तथा तथा स्वस्वकर्म्मवशतया गतिवैचित्र्यसम्भवात्।। एवं लवणसूत्रमपि भावनीयम्।।५७३-५७६।।

सम्प्रति जम्बूद्वीप इति नाम्नो निबन्धनं जिज्ञासिषुः प्रश्नं करोति–

---

१. लवणे स० L ।

(५७७) से केणट्ठेणं भंते! एवं वुच्चति जंबुद्दीवे २?, गोयमा! जंबुद्दीवे णं दीवे मंदरस्स पव्वयस्स उत्तरेणं णीलवंतस्स वासधरपव्वतस्स दाहिणेणं गंधमायणस्स वक्खारपव्वयस्स पुरत्थिमेणं मालवंतस्स वक्खारपव्वयस्स पच्चत्थिमेणं एत्थ णं उत्तरकुरा णाम कुरा पण्णत्ता, पाईणपडीणायता उदीणदाहिणवित्थिण्णा अद्धचंद-संठाणसंठिता एक्कारस जोयणसहस्साइं अट्ठ बायाले जोयणसते दोण्णि य एक्कोणवीसतिभागे जोयणस्स विक्खंभेणं।। तीसे जीवा पाईणपडीणायता दुहओ वक्खारपव्वयं पुट्ठा, पुरत्थिमिल्लाए कोडीए पुरत्थिमिल्लं वक्खारपव्वतं पुट्ठा, पच्चत्थिमिल्लाए कोडीए पच्चत्थिमिल्लं वक्खारपव्वयं पुट्ठा, तेवण्णं जोयणसहस्साइं आयामेणं, तीसे धणुपट्ठं दाहिणेणं सट्ठिं जोयणसहस्साइं चत्तारि य अट्ठारसुत्तरे जोयणसते दुवालस य एकूणवीसतिभाए जोयणस्स परिक्खेवेणं पण्णत्ते।। ५७७।।

'से केणट्ठेणं भंते!' इत्यादि, **अथ केन 'अर्थेन'** केन कारणेन **भदन्त! एवमुच्यते जम्बूद्वीपो द्वीपः?** इति, भगवानाह–**जम्बूद्वीपे** णमिति वाक्यालङ्कारे **द्वीपे मन्दरपर्वतस्य 'उत्तरेण'** उत्तरतः **नीलवतो वर्षधरपर्वतस्य 'दक्षिणेन'** दक्षिणतो [१]**गन्धमादनस्य वक्षस्कारपर्वतस्य 'पुरत्थिमेणं'**ति पूर्वस्यां दिशि [२]**माल्यवतो वक्षस्कारपर्वतस्य पश्चिमायाम् 'अत्र'** एतस्मिन् प्रदेशे **उत्तरकुरवो नाम कुरवः प्रज्ञप्ताः,** सूत्र एकवचननिर्देशोऽकारान्ततानिर्देशश्च प्राकृतत्वात्, ताश्च कथम्भूताः? इत्याह– **'पाईणे'**त्यादि, **प्राचीनापाचीनायता उदग्दक्षिणविस्तीर्णा अर्द्धचन्द्रसंस्थानसंस्थिता एकादश योजनसहस्राण्यष्टौ योजनशतानि 'द्विचत्वारिंशानि'** द्विचत्वारिंशदधिकानि **द्वौ चैकोनविंशतिभागौ योजनस्य 'विष्कम्भेन'** दक्षिणोत्तरतया विस्तारेण, तथाहि–महाविदेहे मेरोरुत्तरत उत्तरकुरवो दक्षिणतो दक्षिणकुरवः, ततो यो महाविदेहक्षेत्रस्य विष्कम्भस्तस्मान्मन्दरविष्कम्भे शोधिते यदवशिष्यते तस्यार्द्धं यावत्परिमाणमेतावत्प्रत्येकं दक्षिणकुरूणामुत्तरकुरूणां च विष्कम्भः, उक्तं च–**"वइदेहा विक्खंभा मंदरविक्खंभसोहियद्धं जं। कुरुविक्खंभं जाणसु"**[ ] इति, स च यथोक्तप्रमाण एव, तथाहि–महाविदेहे विष्कम्भस्त्रयस्त्रिंशद् योजनसहस्राणि षट् शतानि चतुरशीत्यधिकानि योजनानां चतस्रः कलाः ३३६८४ क० ४,

---

१. माल्यवतः **-इति सूत्रानुसारम्** ।। २. गन्धमादनस्य **-इति सूत्रानुसारम्** ।।

एतस्मान्मेरुविष्कम्भो दश योजनसहस्राणि शोध्यन्ते १०००० स्थितानि पश्चात्त्रयोविंशतिः सहस्राणि षट् शतानि चतुरशीत्यधिकानि योजनानां चतस्रः कलाः २३६८४ क० ४, एतेषामर्द्धे लब्धान्येकादश सहस्राणि अष्टौ शतानि द्विचत्वारिंशदधिकानि योजनानां द्वे च कले ११८४२ क० २।।

'तीसे' इत्यादि, **तासा**मुत्तरकुरूणां **जीवा** उत्तरतो नीलवर्षधरसमीपे **प्राचीनापाचीनायता उभयतः** पूर्वपश्चिमभागाभ्यां **वक्षस्कारपर्वतं** यथाक्रमं माल्यवन्तं गन्धमादनं च **'स्पृष्टा'**-स्पृष्टवती, एतदेव भावयति-**'पुरत्थिमिल्लाए'** इत्यादि, **पूर्वया 'कोट्या'**-अग्रभागेन **पूर्वं वक्षस्कारपर्वतं**-माल्यवदभिधानं **'स्पृष्टा'** स्पृष्टवती **'पश्चिमया'**-पश्चिमदिगवलम्बिन्या **कोट्या पश्चिमवक्षस्कारपर्वतं**-गन्धमादनाख्यं **स्पृष्टा,** सा च जीवा **आयामेन त्रिपञ्चाशद् योजनसहस्राणि,** कथमिति चेदुच्यते-इह मेरोः पूर्वस्यामपरस्यां च दिशि भद्रशालवनस्य यदायामेन परिमाणं यच्च मेरोर्विष्कम्भस्य तदेकत्र मीलितं गन्धमादन-माल्यवद्वक्षस्कारपर्वतमूलपृथुत्वपरिमाणरहितं यावत्प्रमाणं भवति तावदुत्तरकुरूणां जीवायाः परिमाणम्, उक्तं च-

"मंदरपुव्वेणायय बावीस सहस्स भद्दसालवणं।
दुगुणं मंदरसहियं दुसेलरहियं च कुरुजीवा।।१।।" [बृहत्क्षेत्रसमास-२६५]

तच्च यथोक्तप्रमाणमेव, तथाहि-मेरोः पूर्वस्यामपरस्यां च दिशि प्रत्येकं भद्रशालवनस्य दैर्घ्यपरिमाणं द्वाविंशतिर्योजनसहस्राणि, ततो द्वाविंशतिः सहस्राणि द्वाभ्यां गुण्यन्ते, जातानि चतुश्चत्वारिंशत् सहस्राणि ४४०००,मेरोश्च पृथुत्वपरिमाणं दश योजनसहस्राणि १००००,तानि पूर्वराशौ प्रक्षिप्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि ५४०००,गन्धमादनस्य माल्यवतश्च वक्षस्कारपर्वतस्य प्रत्येकं मूले पृथुत्वं पञ्च योजनशतानि, ततः पञ्च शतानि द्वाभ्यां गुण्यन्ते, जातं योजनसहस्रं, तत् पूर्वराशेरपनीयते, जातानि त्रिपञ्चाशद् योजनसहस्राणि ५३०००। **'तीसे धणुपट्ठ'**मित्यादि, **तासा**मुत्तरकुरूणां **धनुःपृष्ठं 'दक्षिणेन'** दक्षिणतः, तच्च **षष्टिर्योजनसहस्राणि चत्वारि योजनशतानि अष्टादशोत्तराणि द्वादश एकोनविंशतिभागा योजनस्य परिक्षेपेण,** द्वयोरपि हि गन्धमादन-माल्यवद्वक्षस्कारपर्वतयोरायामपरिमाण-मेकत्र मीलितमुत्तरकुरूणां धनुःपृष्ठपरिमाणं, **"आयामो सेलाणं दोण्ह व मिलिओ कुरूण धणुपट्ठं" [ ]** इति वचनात्, गन्धमादनस्य माल्यवतश्च वक्षस्कारपर्वतस्य प्रत्येकमायामपरिमाणं त्रिंशद् योजनसहस्राणि द्वे शते नवोत्तरे षट् च कलाः ३०२०९ क० ६, उभयोश्च मिलित आयामो यथोक्तपरिमाणो भवति [६०४१८ क० १२]।।

(५७८) उत्तरकुराए णं भंते! कुराए केरिसए आगारभावपडोयारे पण्णत्ते? गोयमा! बहुसमरमणिज्जे भूमिभागे पण्णत्ते से जहा णाम ए आलिंगपुक्खरेइ वा जावं तणाणं मणीण य वण्णो गंधो फासो सद्दो य भाणितव्वो ।। ५७८।।

'उत्तरकुराए णं भंते!' इत्यादि, **उत्तरकुरूणां भदन्त! कुरूणां,** सूत्रे एकवचनं प्राकृतत्वात्, **कीदृश आकारभाव**स्वरूपस्य **प्रत्यवतार**:-सम्भव: **प्रज्ञप्त: ?,** भगवानाह-**गौतम! बहुसमरमणीयो भूमिभाग** उत्तरकुरूणां **प्रज्ञप्त:, 'से जहा नाम ए-आलिंगपुक्खरेइ वा'** इत्यादि जगत्युपरि वनखण्डवर्णकवत्तावद्वक्तव्यं **यावत्तृणानां च मणीनां च वर्णो गन्ध: स्पर्श: शब्दश्च** सवर्णक: परिपूर्ण उक्तो भवति, पर्यन्तसूत्रं चेदम्-'दिव्वं नट्टं सज्जं गेयं पगीयाणं भवे एयारूवे?, हंता सिया' [३-२८५] इति।। ५७८।।

(५७९) उत्तरकुराए णं कुराए तत्थ-तत्थ देसे तहिं-तहिं बहुईओ खुड्डा-खुड्डीयाओ वावीओ जावं बिलपंतियाओ, तिसोवाणपडिरुवगा, तोरणा पव्वयगा, पव्वयगेसु आसणाइं, धरगा, धरएसु आसाणाइं मंडवगा, मंडवएसु पुढविसिलापट्टगा। तत्थ णं बहवे उत्तरकुरा मणुस्सा मणुस्सीओ य आसयंति सयंति जाव पच्चणुभवमाणा विहरंति[3]।।५७९।।

---

१. **"जी० ३।२७७-२८५ । जाव इति पदादग्रे मु. क,ख,ग,ट,त्रि सङ्केतितादर्शेषु उत्तरकुरुवक्तव्यातायाः सङ्क्षिप्तः पाठोऽस्ति, विशदवर्णनार्थं च एकोरुकद्वीपवक्तव्यतायै समर्पितोऽस्ति यथा**-एवं एक्कोरुयदीव-वत्तव्वया जाव देवलोकपरिग्गहा णं ते मणुयगणा पण्णत्ता समणाउसो ! णवरि इमं णाणत्तं छधणुसहस्स-मूसिता दोछप्पन्ना पिट्ठकरंडसता अट्ठमभत्तस्स आहारट्ठे समुप्पज्जति तिण्णि पलिओवमाइं देसूणाइं →←पलिओवमस्सासंखेज्जाइभागेण ऊणगाइं जहण्णेणं तिण्णि पलिओवमाइं, उक्कोसेणं एकूणपण्णराइंदियाइं अणुपालणा, सेसं जहा एगरुयाणं । उत्तरकुराए णं कुराए छव्विहा मणुस्सा अणुसज्जंति, तं जहा-पम्हगंधा१ मियगंधा२ अममा३ सहा४ तेयालीसे५ सणिच्चारी६। **द्रष्टव्यं ३-२१८ सूत्रस्य पादटिप्पणम्। अर्वाचीनादर्शेषु उत्तरकुरुवक्तव्यता सङ्क्षिप्ताऽस्ति, एकोरुकवक्तव्यता च विस्तृताऽस्ति। जे. ताडपत्रीयादर्शे, हारिभद्रीयवृत्तौ मलयगिरिवृत्तौ च एकोरुकवक्तव्यता सङ्क्षिप्ताऽस्ति, उत्तरकुरुवक्तव्यता च विस्तृताऽस्ति। अस्माभिः प्राचीनादर्शस्य वृत्त्योश्चाऽऽधारेण उत्तरकुरुवक्तव्यताया विस्तृतपाठः समादृतः"इति V पृ.३६६ टि. ३। २. द्र. ३-२८६ ।। ३. अस्मिन् सूत्रे समाविष्टानामनेकसूत्राणां पूर्तिस्थलावबोधार्थं द्रष्टव्यं जी० ३-२८६-२८७।**

'उत्तरकुराए णं कुराए' इत्यादि, **उत्तरकुरुषु तत्र तत्र देशे** तस्य देशस्य **तत्र तत्र** प्रदेशे **बहवे 'खुड्डा खुड्डियाओ वावीओ'** इत्यादि, तथा **त्रिसोपानप्रतिरूपकाणि तोरणानि पर्वतकाः पर्वतकेष्वासनानि गृहकाणि, गृहेष्वासनानि मण्डपका, मण्डपेषु पृथिवीशिलापट्टकाः** पूर्ववद् वक्तव्याः, तदनन्तरं चेदं वक्तव्यम्–**'तत्थ णं बहवे उत्तरकुरा मणुस्सा मणुस्सीओ य आसयंति सयंति जाव कल्लाणं फलवित्तिविसेसं पच्चणुभवमाणा विहरन्ति'** एतद्व्याख्याऽपि प्राग्वत्।।५७९।।

(५८०) उत्तरकुराए णं कुराए तत्थ-तत्थ देसे तहिं-तहिं बहवे सेरियागुम्मा जाव महाजाइगुम्मा । ते णं गुम्मा दसद्धवण्णं कुसुमं कुसुमेंति जेण कुराए बहुसमरमणिज्जे भूमिभागे वायविहुयग्गसालेहिं मुक्कपुप्फपुंजोवयारकलिए सिरीए अईव उवसोभेमाणे चिट्ठइ ।।५८०।।

'उत्तरकुराए णं भंते! कुराए' इत्यादि, **उत्तरकुरुषु ण**मिति पूर्ववत् **कुरुषु तत्र तत्र देशे 'तहिं तहिं'** इति तस्य तस्य देशस्य तत्र तत्र प्रदेशे **बहवः सरिकागुल्माः** नवमालिकागुल्माः कोरण्डगुल्माः बन्धुजीवकगुल्माः मनोवद्यगुल्माः बीयकगुल्माः बाणगुल्माः [कणवीरगुल्माः] कुब्जकगुल्माः सिन्दुवारगुल्माः जातिगुल्माः मुद्गरगुल्माः यूथिकागुल्माः मल्लिकागुल्माः वासन्तिकगुल्माः वस्तुलगुल्माः कस्तूलगुल्माः सेवालगुल्माः अगस्त्यगुल्माः मगदन्तिगुल्माः चम्पकगुल्माः **[महा]जातिगुल्माः** नवनातिकागुल्माः कुन्दगुल्माः महाकुन्दगुल्माः, सरिकादयो लोकतः प्रत्येतव्याः, गुल्मा नाम ह्रस्वस्कन्ध-बहुकाण्ड-पत्र-पुष्प-फलोपेताः, ततः सर्वत्र विशेषणसमासः, सरिकादीनां चेमास्तिस्रः **सङ्ग्रहणिगाथाः**–

"सेरियए नोमालिय-कोरंटय-बन्धुजीवग-मणोज्जा।
बीयय-बाणय-कणवीर-कुज्ज तह सिंदुवारे य।।१।।

जाई-मोग्गर तह जूहिया य तह मल्लिया य वासंती।
वत्थुल-कत्थुल-सेवालगत्थि-मगदंतिया चेव।।२।।

चंपक-जाई-नवनाइया य कुंदे तहा महाकुंदे।
एवमणेगागारा हवंति गुम्मा मुणेयव्वा।।३।।" [ ]

---

१. वृत्तौ अन्तिमं पदं महाकुन्दगुल्माः इति विद्यते, वृत्तिकृता तिस्रः गाथाः उद्धृताः सन्ति, तत्रापि अन्तिमं पदं महाकुंदे इति विद्यते, किन्तु जम्बूद्वीपप्रज्ञप्तौ (२-१०), भगवत्यां (२२-५), प्रज्ञापनायां (१-३८) च अन्तिमं पदं महाजातिगुल्माः इति विद्यते ।।

'ते णं गुम्मा' इत्यादि, **'ते'** अनन्तरोदिता **ण**मिति वाक्यालङ्कारे **गुल्माः 'दशार्द्धवर्णं'** पञ्चवर्णं **'कुसुमं'** जातावेकवचनं कुसुमसमूहं **'कुसुमयन्ति'** उत्पादयन्तीति भावः, **येन** कुसुमोत्पादनेन **कुरूणां बहुसमरमणीयो भूमिभागो 'वायविहुयग्गसालेहिं'**ति वातेन विधुताः–कम्पिता वातविधुतास्ताश्च ता अग्रशाखाश्च वातविधुताग्रशाखास्ताभिः, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, मुक्तो यः पुष्पपुञ्जः स एवोपचारः–पूजा **मुक्तपुष्पपुञ्जोपचारस्तेन कलितः श्रियाऽतीव उपशोभमानस्तिष्ठति**।।५८०।।

(५८१) उत्तरकुराए णं कुराए तत्थ-तत्थ देसे तहिं-तहिं बहवे रुक्खा हेरुयालवणा भेरुयालवणा मेरुयालवणा सालवणा सरलवणा सत्तवण्णवणा पूयफलिवणा खज्जूरिवणा णालिएरिवणा कुस-विकुस-विसुद्धरुक्खमूला मूलमंतो कंदमंतो जाव अणेगसगड-रह-जाण-जुग्ग-गिल्लि-थिल्लि-सीय-संदमाणियपडिमोयणा सुरम्मा पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, पत्तेहि य पुप्फेहि य अच्छण्ण-पडिच्छण्णा सिरीए अतीव-अतीव उवसोभेमाणा उवसोभेमाणा चिट्ठंति।।५८१।।

'उत्तरकुराए णं कुराए' इत्यादि, **उत्तरकुरुषु तत्र तत्र देशे** तस्य २ देशस्य **तत्र तत्र** प्रदेशे **बहूनि,** सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, **हेरुतालवनानि भेरुतालवनानि मेरुतालवनानि शाल-वनानि सरलवनानि सप्तपर्णवनानि पूगीफलीवनानि खर्जूरीवनानि नालिकेरीवनानि कुशविकुशविशुद्धवृक्षमूलानि,** ते च वृक्षाः **मूलमंतो कंदमंतो** इत्यादि विशेषणजातं जगत्युपरिवन-खण्डकवर्णकवत्तावत्परिभावनीयं **यावद् 'अणेगसगड-रह-जाण-जोग्ग-गिल्लि-थिल्लि-सीय-संदमाण-पडिमोयणासुरम्मा पासाईया दरसणिज्जा अभिरूवा पडिरूवा'** इति, भेरुतालादयो वृक्षजातिविशेषाः शालादयः प्रतीताः।।५८१।।

---

१. सेरुतालवणाइं हेरुतालवणाइं **(जम्बू०२-९) २. द्र० ३-२७४-२७६ । ३.** य फलेहि य **(जम्बू० २-८) ४.** पूगफ० **S ।।**

OMKARGRAPHICS
+9408031622